काश्मीरशैवदर्शनबृहत्कोषः

प्रथमः खण्डः



श्री रणवीर-केन्द्रीय-संस्कृत-विद्यापीठम्, जम्बुः

@ditya.

16.01.2020

श्रीः

काश्मीरशैवदर्शनबृहत्कोषः

(काश्मीरशैवदर्शनसंकलितशब्दव्याख्यायाः)

श्रीः

काश्मीरशैवदर्शनबृहत्कोषः

(काश्मीरशैवदर्शनसंकलितशब्दव्याख्यायाः)

प्रथमः खण्डः

(अकारादिः — ञकारान्तः)

परियोजनानिदेशकः व्याख्याकारश्च
डॉ० बलजिन्नाथपण्डितः
प्रधान सम्पादकः
डॉ० प्रियतमचन्द्रशास्त्री
सम्पादकौ
डॉ० यशःपालःखजूरिया
प्रो० नीलकण्ठगुर्टुः

2001

श्री रणवीर-केन्द्रीय-संस्कृत-विद्यापीठम्
शास्त्रिनगरं, जम्मू-180 004

प्रकाशकः
डॉ. प्रियतमचन्द्रशास्त्री
प्राचार्यः
श्री रणवीर-केन्द्रीय-संस्कृत-विद्यापीठम्,
शास्त्रिनगरं, जम्मू-4

पुनर्मुद्रणादिकाः सर्वेऽधिकाराः दिल्लीस्थ-राष्ट्रिय संस्कृत-संस्थानेन-स्वायत्तीकृताः

मूल्यम् 250/- रु०

मुद्रक :
स्वस्ति प्रिंटर्स, 7309/5, प्रेमनगरं, दिल्ली-110007

ENCYCLOPEDIA OF KĀŚMĪRA ŚAIVISM

VOLUME I

Project Director & Commentator
Dr. B.N. PANDITA
General Editor
Dr. Priyatam Chandra Shastri
Editors
Dr. Y.P. Khajuria
Prof. N.K. Gurtoo

2001
Sri Ranbir Kendriya Sanskrit Vidyapeetha
JAMMU - 180004

Published by
Dr. Priyatam Chandra Shastri
Principal
Shri Ranbir Kendriya Sanskrit Vidyapeetha
Shastri Nagar, Jammu-4

© Rashtriya Sanskrit Sansthan
56-57, Institutional Area, Janak Puri,
New Delhi-110058

Price: Rs. 250/-

Printed by
Svasti Printers
7309/5 Prem Nagar
Delhi-110007

THE LIST OF SCHOLARS WHO WORKED ON THE PROJECT

---

(1) *Project Director* : Dr. Balajinnath Pandita

(2) *General Editors* : Dr. Mandan Mishra
: Dr. Muralidhar Pandey
: Dr. Jagannath Pathak
: Dr. Raghav Prasad Chaudhary
: Dr. Priyatam Chandra Shastri

(3) *Editors* : Dr. Y.P. Khajuria
: Prof. Neelkanth Gurtoo

Research Assistant : Dr. Dwarka Nath Shastri
- do - : Dr. Brijnandan Sharma
- do - : Dr. Girija Sharma
- do - : Dr. Ganesh Shukla

Copyist : Sh. Krishna Nand Pathak
- do - : Dr. Harish Kumar Sharma
- do - : Smt. Sunita Gupta
- do - : Dr. Madhu Kumar Marwaha
- do - : Dr. Suresh Pandey

Cūḍāmaṇi Adhyāpaka : Sh. Dinanath Yakash

FOREWORD

It is a matter of great pleasure that the "Kāśmīra-Śaivadarśana-Bṛhat-Koṣa" is being published by Shri Ranbir Kendriya Sanskrit Vidyapeetha, Jammu, which is one of the constituent units of Rashtriya Sanskrit Sansthan, New Delhi.

Kāśmīra Śaivism has its own weightage and importance in the fields of Indian Philosophy and *āgamas*. We generally find two types of *Śaivism*–one is *Śaivāgama*, widely known in south India and the other is "Kāśmīra Śaivism" popular not only in Kashmir but also all over India and abroad. The four main features of *Śaivāgama* of south India are – *vidyā* or *jñāna, kriyā, caryā* and *yoga*. The *śaivāgama* offers rich literature in Sanskrit language. Some of the texts of *āgamas* have been published from Pondicherry and other places. These books on *āgama* are used by temple priests of southern *śivālayas* as a manual of *alayārcana*. There are numerous unpublished texts of these *āgamas* in the form of manuscripts that belong to the *arcakas* of various *śivālayas*. These *āgamas* deal with both architectural and iconographical subjects belonging to *devālayas*. Besides these texts describe various methods of rituals to be performed in *devālayas* like *naityika* and *naimittika* worship of the Lord. The philosophical thoughts are described occasionally.

The texts of Kāśmīra Śaivism mainly deal with the philosophical aspects like *śivatattva, śaktitattva, sṛṣṭi, dīkṣā, vidyā* etc. Kriyā and other subjects are also delineated in "Kāśmīra Śaivism", but they have not been given much importance. In fact, "Kāśmīra Śaivism" is decidedly a rare section of Indian Philosophy that minutely deals with the philosophical matters. It deals at length with both the theoretical and practical aspects of spiritual philosophy. The theory is dealt logically and the practice in tune with psychology. It throws light on the method of several such topics of Śaiva Yoga, about which all other Schools of Indian thought are more or less silent. With a view to facilitate scholars and students of Sanskrit and indological studies to grasp the nuances of conceptual and theoretical details of Kāśmīra Śaivism, a project had been initiated by the name of "Kāśmīra-Śaivadarśana-Bṛhat-Koṣa Project" by the Rashtriya Sanskrit Sansthan in one of its constituent Vidyapeethas at Jammu in the year 1980 as result of good efforts of Dr. R.K. Sharma, the then Director of Rashtriya Sanskrit Sansthan, and Dr. Mandan Mishra, the then Principal of Shri Ranbir Kendriya Sanskrit Vidyapeetha, Jammu.

The philosophy enshrined in Śaivadarśana is profound and requires detailed and comprehensive study of the subject. At present very few learned scholars are available for undertaking research, teaching and guidance on the subject. It is important to point out that most of the books on the subject have been published from Kashmir series, Srinagar, the seat of Śaivadarśana learning. The valuable literature on this rare subject is fast depleting owing to the fact that the books on the subject are either not available or out of print and very few scholars are available to deal with the subject. The objective of this Koṣa is to facilitate research study in the subject and to preserve this rare knowledge. Consequent upon the decision that followed, Dr. Baljinnath Pandita an eminent scholar and an authority on Kāśmīra Śaivism had been appointed as Project Director with some assistants to help him in the scheduled research work. The Project was completed in 1990. All the important words relating to Kāśmīra Śaivadarśana have been systematically arranged in alphabetical order in the Koṣa and explained wherever felt necessary.

The Koṣa is spread over in two volumes – the first volume contains letters from the beginning to letter "ञ" i.e. last letter of 'च' varga and the second volume from 'ट' varga upto the end. Dr. Pandita has made an undaunted effort to highlight the historical and philosophical interpretations of Kāśmīra Śaivadarśana through an elaborate upodghāta in Sanskrit and an Introduction in English.

I extend my sincere thanks to Dr. Baljinnath Pandita for the compilation of the Koṣa. I laud the efforts of Dr R.K. Sharma and Dr. Mandan Mishra (former Directors of Rashtriya Sanskrit Sansthan, New Delhi) for their guidance and encouragement rendered to the Project from time to time. My thanks are due to the Principal, Shri Ranbir Kendriya Sanskrit Vidyapeetha, Jammu and those who worked with the project for their efforts in the preparation and publication of the Koṣa.

Professor V. Kutumba Sastry
Director,
Rashtriya Sanskrit Sansthan, New Delhi

प्राङ्नतिः

काश्मीर-शैव-दर्शनं भारतस्य अध्यात्मविद्याया अमूल्यनिधिरस्ति। अन्यानि भारतीयदर्शनानि मिथो विरोधिर्भिमन्तव्यैः विवादानां परिवेशे प्रविष्टानि सन्ति, परं काश्मीर-शैव-दर्शनं स्वीयसमन्वयात्मकस्वभावेन अधिकं संगतं समुपयोगि च दृश्यते। काश्मीरशैवदर्शन-विद्याया आविर्भावः ऋषिभिः स्वतपोबलेन मननशक्तिबलेन च कृत आसीत्। भगवता ब्रह्मणा शुक्राचार्येण वृहस्पतिप्रभृतिभिश्च अतिप्राचीन युगे अस्या विद्याया मननं कृतम्। तदनन्तरम् अगस्त्य-दत्तात्रेय-दुर्वासादिभिः अस्या विद्यायाः प्रचारः कृत आसीत्। त्रयम्बकादित्येन दुर्वाससः एतस्या विद्यायाः रहस्यम् अवगतम् आसीत्।

इति परम्परायाः क्रम एव सोमानन्दोत्पलदेवाभिनवगुप्तैः अनेके ग्रन्थाः रचिताः तेषां भाष्याणि भाषितानि। एभिर्विद्वद्वरेण्यैः शैवागमसाधनायां कौलाचारः त्रिकाचारादि साधनाक्रमः प्रतिपादितः। अद्यापि "कौल" "तिक्कू" प्रभृतयः तत्साधकानुयायिनः काश्मीरेषु द्रष्टुं शक्यन्ते। काश्मीरशैवदर्शनं स्वात्मानं वेदमूलकं मन्यते। वैदिकविधिना समेऽपि संस्काराः समादरणीया इति चोपदिशति। वेदोक्तवर्णाश्रमधर्मं सर्वोत्तमत्वेनांगीकरोति। आगमशास्त्रं प्रत्यभिज्ञा-शास्त्रं स्पन्दशास्त्रं च शैवदर्शनस्यैव अवान्तरसिद्धान्ताः सन्ति। भोगमोक्षस्वर्गनरकसुखदुःखबन्धनादीनां बीजं परमशिवस्य स्वातन्त्र्यमेव वर्तते। स्वातन्त्र्यं काश्मीरशैवदर्शनस्य मूलसिद्धान्तोऽस्ति। तदनुसृत्य केवलं परमेश्वर एव परमसत्यस्वरूपेण भासते अन्यद्यत्किंचिदपि संसारे भासमानं दृश्यते तत्सर्वं नास्ति मिथ्या अपि तु परमशिवस्यैव विलासः अस्ति। पूर्णस्वतन्त्रः परमशिवः ज्ञानस्वरूपोऽप्यस्ति क्रियास्वरूपोऽपि। ज्ञानक्रिययोः समन्वयत्वमेव परमशिवत्वमस्ति। शैवदर्शनं चैतन्यस्य आनन्दस्वरूपत्वं गतिशीलत्वं चैव स्पन्द इति कथ्यते। शैवदर्शनस्य स्पन्द-स्वातन्त्र्य-सिद्धान्ताभ्यां स्वकीयया समन्वयात्मकदृशा जगन्मिथ्येति सिद्धान्तः स्वयमेव निरस्यते। जगदपि परम-शिवस्यैव स्वरूपमस्ति इति संसाध्य भारतीयसमाजेन औदासीन्यम् एवादृतमस्ति।

एतेन भारतीयसमाजः पूर्णक्रियाशीलः संजातोऽस्ति एतेन भुक्तेः मुक्तेश्च समकालमेव अधिगतेः मार्गः प्रशस्यते, एतस्मादेवकारणात् काश्मीरशैवदर्शनस्य महत्त्वं चरमसीमानं प्राप्तवद् वर्तते। अस्याः दर्शन-विद्यायाः संरक्षणसमवर्धनप्रचाराणाञ्च इदानीन्तनसमाजस्य कृते महती अपेक्षा वर्तते। अस्या अपेक्षायाः पूर्तये राष्ट्रियसंस्कृत-संस्थानेन प्रयास आरब्धः। कालस्य कुटिलगत्या शास्त्रज्ञानं प्रति उपेक्षावशाच्च ईश्वरीयज्ञानस्य निधान काश्मीरशैवदर्शनशास्त्रं ह्रासोन्मुखं संदृश्यते। शैवदर्शनस्य सिद्धान्तानां साधनायाः स्वामिलक्ष्मणजू-सदृशाः साधका अन्ये च शैवदर्शनस्य तत्त्ववेत्तारोऽपि शनैः शनैः लोपं गच्छन्तो अवलोक्यन्ते।

काश्मीरस्य भौगोलिकधरातलमपि साम्प्रतं आतङ्कवाद्ग्रस्तं वर्तते। एतस्यां परिस्थितौ काश्मीरस्य एतस्य ज्ञानरूपाधिक्षेपस्य रक्षणं परमम् अनिवार्यम् अस्ति। तन्त्रालोकादृशप्रौढग्रन्थानां पाठसंगतये कस्यचिच्छैवदर्शनकोशस्य महती न्यूनता समनुभूयमाना आसीत्। उक्तन्यूनतायाः निरासाय राष्ट्रियसंस्कृतसंस्थानेन महान् प्रयासः कृतः। काश्मीरशैवदर्शनबृहत्कोषस्य निर्मितये एका परियोजना परिकल्पिता।

एतस्याः परियोजनायाः कार्यं सम्यक्तया संचालनाय काश्मीरशैवदर्शनस्य प्रसिद्धो विद्वान् डॉ. बलजिन्नाथपण्डितमहोदयः निदेशकत्वेन नियुक्तः। तेन पण्डितवर्येण स्वसहयोगिनां सहयोगेन आगमशास्त्र-स्पन्दशास्त्र-प्रत्यभिज्ञाशास्त्रग्रन्थानां सूक्ष्मम् अध्ययनं कृत्वा तेषु समागतानाम् अभिधानानां चिन्तनं मननं समीक्षणञ्च कृत्वा परमवैदुष्येण महता श्रमेण च आधुनिकां कोशनिर्माणपरिपाटीम् आधारीकृत्य अस्याः काश्मीरशैवदर्शनबृहत्कोषपरियोजनायाः कार्यं परमसाफल्येन सम्पादितम्।

अयं कोषः द्वयोर्भागयोर्विभक्तोऽस्ति प्रथमो भागः अकारादिः ञकारान्तः वर्तते। द्वितीयो भागः टकारादिः समाप्तिपर्यन्तश्चास्ति। अहं हृदयतः कोषनिर्मातुः अवाप्तराष्ट्रियख्यातेः विदुषः डॉ. बलजिन्नाथपण्डितमहाभागस्य धन्यवादं करोमि। राष्ट्रियसंस्कृतसंस्थानस्य निदेशकचराणां डॉ. रामकरणशर्म डॉ. मण्डनमिश्र डॉ. कमलाकान्तमिश्र-महाभागानां धन्यवादं करोमि यैः स्वनिदेशकत्वे कोशनिर्माणं प्रारब्धं प्रोत्साहितं च। संस्थानस्य वर्तमाननिदेशकमहोदयाः श्रीबेम्पटि-कुटुम्बशास्त्रिमहाभागा अपि अस्य कोशस्य प्रकाशने विविधान् विघ्नान् अपाकृत्य महतीं कृपां कृतवन्तः, तान् प्रत्यपि कार्तज्ञ्यं बिभर्मि।

डॉ. मुरलीधरपाण्डेय डॉ. जगन्नाथपाठक डॉ. राघवप्रसादचौधरी डॉ. रामकिशोरशुक्लानां जम्बूविद्यापीठस्य प्रचार्यचराणामपि धन्यवादं करोमि। यैः यथासमयं कोशनिर्माणकार्ये अपेक्षितं साहाय्यं विहितम्।

इदानीमहं काश्मीरशैवदर्शनबृहत्कोषस्य प्रथमखण्डस्य तत्र भवतां विदुषां करकमलेषु समर्पणं कुर्वन् हर्षातिशयम् अनुभवामि। अहं न केवलम् आशासे प्रत्युत् विश्वसिमि यत् काश्मीरशैवदर्शनशास्त्रस्य अध्येतारः अनुसन्धातारः शैवीसाधनायाः साधकाश्च अस्मात् बृहत्कोषात् पर्याप्तं मार्गदर्शनं साहाय्यञ्च प्राप्स्यन्ति इति।

विदुषां विधेयः

डॉ. प्रियतमचन्द्रशास्त्री

प्राचार्यः

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, जम्मू

उपोद्घातः

सर्वत्र जगति तेषु-तेषु सभ्यजननिवासभूतेषु देशेषु तत्रत्यानां तेषां-तेषां मानवसमाजानां चेतस्सु तावत् सुपुरातनादेव कालात् प्राणिनां स्वस्य विषये जगद्विषये च काश्चन दार्शनिक्यो जिज्ञासाः समुदिताः। तासां जिज्ञासानां मध्ये यास्तावन्मुख्यतमास्ता आचार्यशङ्करोपदेशानुसारं चतस्रः। उक्तं यथा तैरपरोक्षानुभूतौ :-

"कोऽहं कथमिदं जातं को वै कर्त्तास्य विद्यते।
उपादानं किमस्यासीद् विचारः सोऽयमीदृशः।।"

(अ० अ०,१२)

एवं विधाः जिज्ञासाः पाश्चात्येष्वपि देशेषु समुदयन्त। तत्रत्यैस्तु मनीषिभिर्बुद्धिबलमाश्रित्य विचारितं, तर्कप्रधानया शैल्या च समाधानानि प्रख्यापितानि बहुधा।

भारतीयैः पुनर्जिज्ञासुभिर्बुद्धिबलादतिरिक्तेन योगबलेनाप्येवं विधानां जिज्ञासानां विषये निर्णेतुं प्रयतितं बहुधा। यूरोपदेशेऽप्यभूवन् केचन योगिनो यैर्योगजेन साक्षात्कारेण वस्तुतत्त्वं साक्षाद् दृष्टं, तदनुसारं च तद्विषये समुपदिष्टम्। परं तत्रत्या ते पुरातना योगिनोऽद्यापि दार्शनिकमध्ये न गण्यन्ते। अपि तु ते रहस्यवादिन इत्युच्यन्ते, तेषां विचाराः उपदेशाश्च दर्शनविद्यायाः सकाशाद् बाह्या एवं मन्यन्ते। भारतीयैर्योगिभिर्योगाभ्यासेनान्तःकरणभूमिकामुत्तीर्य सुषुप्तितुर्यदशयोः प्रकाशमानस्यात्मनः स्वरूपस्य स्वभावस्य च यत् साक्षात् दर्शनं लब्धं तदनुसारमेव तैस्तस्य विषयेऽनेकप्रकारतयोपदेशाः कृताः। तेषां ते एवोपदेशाः भारते दर्शनविद्येति नाम्ना प्रसिद्धिमगच्छन्। सुषुप्तेस्तुर्यायाश्चापि सन्ति कतिचित्-कतिचित् सोपानानि। तत्र येन-येन योगिना यस्मिन्-यस्मिन् सोपाने स्थितस्यात्मनः स्वरूपं स्वभावश्च यथा-यथा साक्षात्कृतौ तथा तथैव तद्विषये तैरुपदिष्टम्। योगेनोपायेन सुषुप्तिपदस्थस्य स्वात्मस्वरूपस्य यैः साक्षाद् दर्शनमवाप्तं न तैस्तस्यां साक्षात्कारावस्थायां जगतो विषये किमपि दृष्टम्। तैर्बहिरिन्द्रियभूमिमन्तःकरणभूमिं चोत्तीर्णस्य स्वात्मनः स्वरूपस्य स्वभावस्य च साक्षात्कारं कुर्वद्भिस्तदनुसारमेव दर्शनविद्याया विषये उपदिष्टम्। योगसमाधिमध्ये प्रपञ्चस्य विषये न किमपि साक्षात् पश्यद्भिस्तैस्तद्विषये जाग्रत्स्वप्नभूमिकयोः स्थितस्य जगतः स्वभावेन साकं तुलनात्मकान् विचारान् विदधद्भिर्बुद्धिबलेनैव तर्कविद्यासहायतया स्वं स्वं मतमुपदिष्टं प्रचारितं च। ततस्तेषां दर्शनसिद्धान्ताः केवलमंशत एव दर्शनाश्रिताः, भूयसांशेन ते कल्पनाश्रिता एव पाश्चात्यदर्शनसिद्धान्तवत्। यैः पुनर्भारतीयैर्योगिभिः सुषुप्तिमप्युत्तीर्य तुर्यदशायां स्थितं स्वात्मस्वरूपं दृष्टं तैस्तद्विषये, तत्स्वभावविषये च यदुपदिष्टं तत्तु सत्यं दर्शनमेव, साक्षाद्दर्शनानुसारित्वात्। न तत्कल्पनाश्रितम्। तुर्यावस्थायां प्रपञ्चात्मकस्य जगतो बीजस्यापि साक्षात्कारो भवति। तेन तुर्याश्रितैर्दार्शनिकैर्जगतो विषये विद्यमानानामपि दर्शनविषये समुत्थानां जिज्ञासानां समाधानं यत् कृतं तदपि वस्तुतो दर्शनमेव, न कल्पनामात्रकल्पितम्। कल्पनाकल्पितास्तु केवलं तद्विषयाः शब्दप्रयोगा एव। न हि वास्तविकं साक्षात्कारात्मकं दर्शनं शब्दैर्वर्णयितुं शक्यं याथार्थ्येन। ततोऽरुन्धतीन्यायेनैव तद्विषयाः शाब्दा उपदेशाः ऋषिभिः कृताः। तैरुपदेशैर्बलमवाप्य साधकः स्वयमपि

वस्तुतत्त्वप्रकाशकं दर्शनं साक्षाल्लभते। इति दर्शनपथप्रदर्शका एव तेषां दार्शनिका उपदेशाः।

अत्र तावदेषा शङ्का समुत्तिष्ठति यद् भारतीयैर्दर्शनगुरुभिः केन कारणेन भिन्नभिन्नप्रकाराणामनेकासां दर्शनविद्यानामुपदेशाः कृताः। भेदस्तु कल्पनाश्रित एव भवति न वस्तुस्थितिसमाश्रितः। अत्रोच्यते :— सन्ति सुषुप्तेस्तुर्यायाश्चापि तावदधरोत्तराणि सोपानानि। न च सर्वेऽपि योगिनः तुर्याश्रिता एव न चापि सर्वे सुषुप्त्याश्रिताः। सुषुप्तेस्तु मुख्यं तावत् सोपानद्वयम्। तत्र येन-येन योगिना यस्या-यस्या अवस्थाया यस्मिन्-यस्मिन् सोपाने स्थितस्य स्वात्मनः साक्षात्कारः समवाप्तस्तेन-तेन योगिना तदनुसारमेव दर्शनविद्याया उपदेशः कृतः। तस्य-तस्य गुरोः शिष्यपरम्परायां स्वस्य-स्वस्यैव मतस्य पोषणं संवृत्तं, मतान्तराणां च निरसनमपि प्रवृत्तम् । किञ्च, जगद्विषये यद् यद् गुरुभिः कल्पनामाश्रित्य प्रतिपादितं तस्य तस्य विषये स्वस्मिन्नपि वर्गे क्वचित्-क्वचिन्मतभेदो विकासमुपयातः। तुर्यायाः दशाया एव हि दर्शनं वस्तुतः सत्यं दर्शनम्। परं तुर्याया अपि मुख्यं सोपानचतुष्टयम्। ततः सत्यदर्शनस्यापि चत्वारो भेदाः ते च वास्तविकस्य सत्यस्य सूक्ष्मसूक्ष्मतरमुत्तरोत्तरं च विशुद्धतरं स्वरूपमुपदिशन्तः उत्तरोत्तरमधिकमधिकं प्रामाण्यं भजन्ते। इत्येव हि भारतीये दर्शने भेदस्य कारणम्।

भारतीया ये प्राचीनतमा दर्शनविद्यागुरवस्तेषु मुख्याः प्रथमतो ऋग्वेदीयस्य नासत्यसूक्तस्य, पुरुषसूक्तस्य, वागम्भृणीयसूक्तस्य च द्रष्टार ऋषयः। तदनन्तरं मुख्या दर्शनगुरवो ह्युपनिषदामृषयः। सर्वेषामेव तेषां दर्शनं हि सत्यदर्शनम्। तत एव ते ऋषय इत्युच्यन्ते। उक्तं हि मुनिना यास्केन :—

“ऋषिर्दर्शनात्” इति (नि. २-११-१)।
“साक्षात्कृतधर्माण ऋषयो बभूवुरिति च” (नि० १-२०-२)

प्राचीनेषु युगेषु भारतवर्षे सूक्ष्मतराणां दर्शनविद्यानामुपदेशो योग्येभ्य एव पात्रेभ्यो दीयते स्म, यतस्ते तदुपदेशानुसारं योगमभ्यस्य स्वयमपि साक्षाद्दर्शनभाजो भवन्ति स्म। नासौ दर्शनविद्या यस्मै कस्मैचिदपि विश्वासशैथिल्यभाजे वा विश्वासरहिताय वा, अलसाय वा, संसारासक्ताय वा दीयते स्म। साधारणा प्रजाजनाः प्रायशोऽर्थकामासक्ता एव भवन्ति। अर्थकामपूर्त्तय एव धर्ममप्याचरन्ति। मोक्षकामाः केचन विरला एव जना भवन्ति। तत एव प्राचीनैर्दर्शनगुरुभिरेषा विद्या न स्फुटतया प्रतिपादिताऽभूत्। य एवास्याः पात्रतामधारयत्तस्या एव दीयते स्म। स चैनां सम्यगभ्यस्य स्वयमपि सत्यं साक्षात्कृत्य याथार्थ्येन दार्शनिकतां लभते स्म। अत एवोक्तं भगवतापि गीतासु :—

“मनुष्याणां सहस्रेषु कश्चिद् यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः।।” इति
(भ० गी०, ७,३)

उपनिषदोऽप्येतस्याः सन्नीतेरुपदेशं ददति। तद्यथा :—

“कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमश्नन्।” इति। (क. ३-४-१)
“श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्य श्रोता कुशलानुशिष्टः।” इति।
(तदेव, २,७)

इत्थं सुचिरं भारतीया दर्शनविद्या श्रद्धाभाजैः साधकैर्गुरूपदेशतो लभ्यते स्म, श्रद्धयाभ्यस्ता च शिष्येभ्यः सत्फलदा भवति स्म। निराबाधा परम्परैषा प्रचलिता सहस्राणि वर्षाणि यावत्। अस्याः साधकाः सफलतामवाप्य सिद्धा इत्युच्यन्ते स्म। इत्थं भारतीया दर्शनविद्या सिद्धविद्यैवाभूत् पुरा। गच्छति काले कलेस्तृतीयसाहस्रीमध्ये भारते वेदागमविरुद्धस्य

बौद्धधर्मस्य प्रचारः प्रवर्तितस्तात्कालिकैः कैश्चन गुरुभिः। तद्धर्मप्रधानगुरुणा तत्रभवता बुद्धेन योऽपरोक्षः साक्षात्कारो लब्धोऽसौ तावत् सुषुप्तेरेव न तुर्यायाः। परं तमपि साक्षात्कारमधरीकृत्य तेन बुद्धिगतस्य तर्कविद्याश्रितस्य निर्णयस्यैव प्राधान्यमुद्घोषितम्। ततः प्रभृति बुद्धिवैभवप्रधानानामेव दर्शनोपदेशानां प्रसारः प्रवृत्तो भारतेऽपि वर्षे। इत्थं भारतीयया दर्शनविद्यया श्रद्धामधरीकृत्य तर्कबुद्धेराश्रयं गृह्णत्या पाश्चात्यदर्शनस्थितिसामीप्यसंसर्पणं प्रति प्रवृत्तेः श्रीगणेशः कृतः। अग्रे तर्कप्रधानाः जैनबौद्धदर्शनशाखाः, वैदिकानि षड्दर्शनानि, वैष्णवदर्शनवर्गः, शैवशाक्तदर्शनानि च विकासमुपागच्छन्। सर्वोऽप्यसौ विकासो भूयसांशेन तर्कविद्याबलेन यत् परपक्षनिरसनं स्वपक्षस्थापनं च तदेवोभयं विदधानो नैव बहून् स्वात्मसाक्षात्कारिणो दार्शनिकान्, अपि तु वादविवादरतान् पण्डितानेव प्रधानतां नीतवान्। तत्र बौद्धजैनदर्शनानि वेदागमविरोधीनि। षड्दर्शनानि वेदोपनिषदनुकूलानि सन्त्यपि तर्कप्रधानान्येव, नोपासनाप्रधानानि सर्वाणि। एषैव वार्ता वैष्णवदर्शनानां दाक्षिणात्यशैवदर्शनानामपि च। भारते बौद्धसंस्कृतेर्ह्रासस्य युगे यद्वेदागममूलानां दर्शनविद्यानां महत्त्वं विकासमुपयातं, तत्रापि तर्कप्रधानतैव पदं चकार, न श्रद्धाप्रधानता, नापि साधनाप्रधानता। शङ्कराचार्यवर्यैः स्वयं श्रद्धाभाजैः साधनाभ्यासपरैश्च सद्भिरपि बहुधा तर्कविद्यापक्षपातप्रभावतः औपनिषदस्य पारमैश्वर्यसिद्धान्तस्य स्थाने शून्यवादतुल्यो विवर्त्तवाद एव प्रचारितः। किञ्च यद्यपि तैर्वेदान्तविद्याया अधिकारिनिरूपणमनेकत्र प्रतिपादितं स्वग्रन्थेषु, तथापि तदनुयायिभिर्मठाधीशैः सरलसरलान् तत्कृतान् ग्रन्थानाश्रित्य तदुपायत एवानधिकारिषु सामान्यजनेषु वेदान्तविद्यायास्तथा प्रचारः कृतो यथासौ विद्यास्वल्पेनैव कालेन निर्वीर्यतामुपगता तत्रभवता वाचस्पतिमिश्रेणापि तर्कबहुलस्य विवर्त्तवादस्यैव प्रचारः कृतः। शाङ्करी साधनापद्धतिर्नैव मनागपि स्पृष्टा। तेन च भारतीया जनता जगदिदं, देशमिमं, धर्ममिमं च सर्वं विवर्त्तकोटौ निक्षिप्य राष्ट्रहितानां विषये मन्दादरा सञ्जाता। तत् फलतया वर्षसहस्रं यावदस्माभिर्भारतीयैर्दुःखान्येव भुक्तानि महान्ति। इदानीं स्वतन्त्राः सन्तोऽपि वयं न सर्वथा कल्याणभाजः। एवं विधायाः अस्मद्विपत्तेर्बहूनि कारणानि। तेषां मध्ये साधारणैर्जनैरलभ्यस्य मोक्षलाभस्य यत्र-तत्र प्रचारः राजनीतिशास्त्रं प्रति च ताटस्थ्यमेव हि मुख्यं कारणद्वयम्। जीवनस्य हि फलद्वयं भुक्तिर्मुक्तिश्चेति। तत्रापि भुक्तौ बहूनामधिकारो मुक्तौ च विरलविरलानामेव। भुक्तिलाभस्याधारशिला हि सौराज्यम्। तस्य स्थापनायाः मुख्य उपायो हि राजनीतिः। साऽस्माभिः सहस्रैर्वर्षैरवहेलिता। कारणं च मुख्यं तदवहेलनायाः विवर्त्तवादाश्रयेण मुक्तिमात्रप्रचारः इति। उक्तमासीदुपनिषदृषिणा :—

“अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः।।” इति।
(ई० वा० ३,६)

“विद्यां चाविद्यां च यस्तद्वेदोभयं स ह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।” इति च।
(ई० वा०, उ०, ११)

आगमिकैः शैवदर्शनैर्यद्यपि भुक्तिमुक्ती उभे जीवनफलतया स्वीकृते, यद्यपि च मुक्त्युपायैः साकं भुक्त्युपाया अप्युपदिष्टाः तथापि नैव तैः राष्ट्रस्य राजनैतिकीं स्थितिं शोधयितुं वा विकासयितुं वा मनागपि यतितम्। प्रभावोऽयं मुख्यतो बौद्धवादस्यैव। यद्यप्यद्वैतवेदान्तिभिर्बौद्धवादो निरस्तस्तर्कबलेन, परं तथापि तत् प्रभावः स्वयं स्वीकृत एव। तत एव साधनाभ्यासस्य स्थाने तर्कविद्याश्रितानां शास्त्रार्थानामेव सुमहान् प्रचारः कृतस्तैः।

एवं याति काले भारतीयाः दर्शनविद्याः प्रायशः सर्वा अपि केवलं पठनपाठनादावेव शास्त्रार्थादावेव वा प्रायुज्यन्त विद्वद्भिर्न साधनाक्रमेण तत्त्वसाक्षात्कारलब्धये। इत्थं सुचिरं भारते दर्शनविद्याया ज्ञानपक्षस्यैव भूयान् प्रचारः संवृत्तो न साधनात्मकस्य क्रियापक्षस्य। एवमङ्गविकलैषा दर्शनविद्या निर्वीर्यतां प्राप्ता सुचिरादेव। यच्चान्तरान्तरा

सिद्धजनैरुपदिष्टमत्र विषये तत् प्रति मन्दादरता प्रकटिता मठाधीशैरपि, पण्डितैरपि च। उक्तमासीत् स्पष्टं स्वतन्त्रानन्दनाथेन सिद्धेन मातृकाचक्रविवेके :—

> "ज्ञानस्य सिध्यति विना क्रियया न रूपं
> तस्यास्तथैव न हि तेन विनोपलभ्यः।
> तस्मात्तयोर्यमलतैव मतं हि सैद्धं
> पूर्वापरत्वकलनं त्विह पूर्वपक्षः।।"
> (मा० च०, वि० १,१६)

युगधर्मविजृम्भितमेतदित्यस्तु तावत्। अथ प्रकृतमेवानुसराम :—

प्राक्तनानामुपासनापराणामपि भारतीयानां योगिनां मध्ये कैश्चन सवेद्यसुषुप्तेः प्रथमे सोपाने स्थितस्य स्वात्मस्वरूपस्य साक्षात्कारमवाप्यापवर्गदशाप्रधानायाः न्यायवैशेषिकदर्शनविद्यायाः प्रचारः कृतः। तदनुसारं साधकस्य तत्त्वज्ञानप्राप्त्या मिथ्याज्ञानस्य नाशः, तन्नाशे रागद्वेषमोहानां नाशः। तेषां दोषाणामपाये कर्मसु प्रवृत्तेरभावः। कर्मणामभावे पुनर्जन्मनिवृत्तिः। तथा सति निश्चेष्टा शान्ता दुःखहीना च गगनतुल्या विभोरात्मनः स्थितिर्यस्यां ज्ञानसुखादिविशेषगुणव्यापारान् प्रति योग्यतायां सत्यामपि न तेषु कापि प्रवृत्तिः। एषैव प्रवृत्तिशून्या गगनतुल्या आत्मनः स्थितिरपवर्ग इति परिभाषिता तैः। उक्तं हि हैमचन्द्रे कोषे "अपवर्गस्त्यागमोक्षयोः क्रियावसाने साफल्ये" इति। (अ० को०, रा० पृ०, ५७)

तदत्र स्थितावात्मा प्रवृत्तिं त्यजति, दुःखेभ्यो मुक्तो भवति, क्रिया तस्य समाप्ता भवति, असौ दुःखाभावरूपं जीवनसाफल्यमवाप्नोति। एषाऽऽत्मनोऽपवर्गाख्या दशा। प्रारम्भे शब्दोऽयमेवं विधायां नैयायिकाभिमतायां स्थितिं वक्तुं प्रयुक्तोऽपि पश्चात् पुस्तकलेखकैः सामान्यतो मोक्षस्य समानार्थकत्वेन रूपेण स्वीकृतः। एतदनुसारमेव तैर्न्यायवैशेषिकैर्मुक्त्यवस्थायामात्मनः वास्तविकं स्वरूपमिदमेव निश्चेष्टं चैतन्यमिति प्रचारितम्। जगद्विषये तैस्तस्यां दशायां नैव किमपि साक्षात्कृतम्, तेषां विषयज्ञानमात्रेऽपि प्रवृत्त्यभावात्। ततो वेदवाक्यान्याश्रित्य तैस्तर्कयुक्त्यैव प्रतिपादितमीश्वरकृतया सृष्टिसंहारादिक्रियया नित्यद्रव्येभ्यः परमाणुभ्यो जगतः सृष्टिप्रभृति ईश्वरस्तेषां कल्पनानुसारमतिकारुणिकः सन् संसृतिसागरे सततगत्योन्मज्जननिमज्जनादिकष्टजातकपात्रभूतेभ्यो बद्धजीवेभ्योकर्मफलभोगावसरान् दातुं परमाणुभ्यो जगत् सृजति, नियत्यनुसारं तद्रक्षति सुचिरं संसृतिपरम्परासु श्रान्तेभ्यो जीवेभ्यो विश्रान्तिसुखं दातुं काले काले संसारं परमाणुविभागतः प्रलयं नयति। कालान्तरे पुनः सृजति। परं कुत आयाताः परमाणवः, कदा, कथं, कुतश्च प्रारब्धं जीवात्मनां मिथ्याज्ञानम्। कथं निरंशानां परमाणूनां संयोगेन स्थूल-स्थूलतरादिद्रव्याणामुत्पत्तिः। संयोगस्याव्याप्यवृत्तित्वेन दिग्विभागमय एव द्रव्ये तस्य सम्भवः, न च परिमण्डलानां परमाणूनां कोऽपि दिग्विभागः सम्भवति। ततः कथमेकदेशसंयोगतो महत्तरस्य द्रव्यस्योत्पत्तिः। ततो नैषा न्यायवैशेषिकाणां दर्शनविद्या पार्यन्तिकी, न च सर्वथाऽपरोक्षसाक्षात्काराश्रिता। ततो न सर्वथा सत्यदर्शनात्मिका, अपि त्वंशतः कल्पनाश्रितैव।

सांख्ययोगदर्शनगुरवस्ततोऽपि सूक्ष्मतरां सुषुप्तिमवाप्य तत्रस्थमेवात्मनः स्वभावमुपदिष्टवन्तः। तथा हि तैः कैवल्याख्या स्थितिरात्मनः साक्षात्कृता। अन्यत् सर्वं वेदवाक्यानि समाश्रित्य कल्पनया तर्कसाहाय्येन च प्रतिपादितम्। तेषां कल्पनानुसारमात्मा स्वयं पुष्करपलाशवन्निर्लेपः शुद्धचैतन्यात्मकः। परमनादिकालात् प्रकृतिपरिणामभूतया बुद्ध्या तथा समुपश्लिष्टो यथा बुद्धिधर्माः सुख-दुःखादयः आत्मनो धर्माः प्रतीयन्ते परस्परमविवेकवशात्। किञ्च तेषामेषापि कल्पना यदात्मानः (पुरुषाः) अनादिकालादेव कर्मफलभोगपाशेन बद्धाः अविवेकवशादेव। प्रकृतिस्त्रिगुणा सती कर्मपाशबद्धानां पुरुषाणां कर्मफलभोगसिद्धये, संसृतेः सकाशान्मोक्षसिद्धये च

गुणवैषम्येनोपायभूतेनान्तःकरणबहिष्करण-तन्मात्रगण-भूत-गणरूपेण परिणामं भजमाना क्रमेण जगद्रूपतयाऽऽत्मानं प्रकटयति। तथा सति अविवेकहताः पुरुषाः कर्मफलानि भुञ्जते। कदाचित् कश्चित्तथाविधः पुरुषः सांख्यसिद्धान्तज्ञानमवाप्य योगाभ्यासेन निर्विकल्पां समाधिमासादयति। समाध्यन्तरे पुरुषः स्वात्मानं चिन्मात्रमेव पश्यन् प्रकृतिविकारभूतानन्तःकरणबाह्यकरणादीन् स्वात्मनो भिन्नानेवानुभवति। बुद्धेरेते, न ममेति, विवेकमसौ साक्षात्कुरुते। तथा यथार्थविवेकान्मुक्तो भवति। ततः प्रारब्धकर्मसमाप्तिं यावदत्र संसारे जीवति। प्रारब्धान्ते पतिते तस्य स्थूलदेहे, बुद्धिविकारजातमयं तस्य सूक्ष्मं लिङ्गशरीरमपि तं त्यक्त्वा मूलप्रकृतौ लयं याति। तथा सति तस्य पुरुषस्य सविधे नैव किमपि तत्त्वान्तरं वा वस्त्वन्तरं वा तिष्ठति। समस्तज्ञानक्रियासाधनैः शून्यः सन् केवलस्तिष्ठति। दुःखत्रयाभिघातेभ्यो मुक्तः सन् सर्वथा च केवलः सन् कैवल्यभाग् भवतीत्युच्यते। केवलस्य भावो हि कैवल्यम्। तथाविधायामवस्थायां गगनवन्निश्चेष्टः सन् चिरं सुषुप्त इव तिष्ठति। तस्यैषा सूक्ष्मतरा सुप्तिदशैव सांख्यैर्मोक्ष इत्युच्यते। केवलत्वेन प्रवृत्तं कैवल्यपदं मूलतस्तथाविधां सुषुप्तिमेव कथयितुं प्रवृत्तं सदग्रेऽर्थविस्तारनियमानुसारं मोक्षदशाया नामान्तरतया प्रयुक्तं शास्त्रकृद्भिः। सांख्यैस्तथाविधं कैवल्यमेव साक्षादनुभूतम्। अन्यच्च प्रकृतिपरिणामादिसिद्धान्तजातं वेदादिवाक्यसाहाय्यतः कल्पनयैव कल्पितं, न साक्षाद् दृष्टम्। परं तथापि सांख्यशास्त्रदृष्टिर्न्यायवैशेषिकदृष्ट्यपेक्षया नितरां सूक्ष्मा। नैयायिकाः परमाणूनां स्थितावेव विश्रान्ताः, परं सांख्याः परमाणुकारणानि पञ्चतन्मात्रतत्त्वेषु कल्पितवन्तस्तन्मात्रतत्त्वानां बीजं, करणगणबीजं चाहङ्कारत वे दृष्ट्वा तस्यापि मूलं महत्तत्त्वे (समष्टिरूपे बुद्धितत्त्वे) दृष्ट्वा तन्मूलमपि मूलप्रकृतौ स्थापितवन्तः सूक्ष्म-सूक्ष्मतरया बुद्ध्या। तत एवैते सूक्ष्मदर्शिनः। परं कैवल्यदशापि तेषां सुषुप्तिरेव। न हि निर्विकल्पसमाधौ गगनतुल्याच्छून्यप्रायात् पुरुषत वादन्यत् किमपि जगत्कारणभूतं सत्तत्त्वं तत्र तैर्दृष्टम्। तत एव सांख्यज्ञानमपि सौषुप्तज्ञानमेव। नैतत्तुर्यदशोचितं ज्ञानम्। जीवचैतन्योचितमेव तज्ज्ञानम्। न तत्र निजमैश्वर्यं किमप्यनुभवगोचरतां याति। मूलप्रकृतेः स्वस्वभावादेव परिणामित्वं पश्यद्भिः कल्पयद्भिर्वैतैः सांख्यैस्तस्याः परिणामं प्रति प्रेरकस्येश्वरस्य सत्ता नैवाङ्गीकृता। अतोऽनीश्वरं सांख्यशास्त्रम्। न्यायवैशेषिकास्तु गुरवः सेश्वराः। योगदर्शने तु यद्यपीश्वरस्य सत्ता प्रतिपादितास्ति परं तस्येश्वरत्वं केवलमियदेव यदसौ सदामुक्तः, आदिसिद्धः, कपिलादीनामपि योगविद्यागुरूणामादिगुरुः, योगसिद्धिभाक् पुरुषविशेष इति। नासौ जगतः सृष्टिसंहारादि कर्तुं समर्थस्तत्र तत्र नियामकः सर्वशक्तिमान् आत्मा। जगतो मूलकारणस्यान्वेषणमपि सांख्ययोगशास्त्रयोः परिपूर्णतया नैव सम्पन्नम्। कुत आयाता मूलप्रकृतिः, कथमाविष्टा पुरुषान्, केन कारणेन पुरुषा अविवेकबुद्ध्या संवेष्टिताः; कथं संवेष्टिताः, केन कारणेन कथं च तैर्निजं स्वभावभूतं ताटस्थ्यमपहस्तीकृतम्। कैवल्यदशायामैश्वर्यहीनतामय्यां कथं सहृदयैः प्रवेष्टव्यम्। इत्थं संसारविषये योपपत्तिः सांख्ययोगाचार्यैः प्रस्तुताऽसौ तेषां बुद्धिवैभवफलमेव कल्पनाशीलताप्रावीण्यमेव च, नेतरत् किमपि साक्षादपरोक्षदर्शनतः साक्षात्कृतम् पार्यन्तिकम् वस्तुतत्त्वम्। ततो ग्रामगमने वृक्षमूलस्थानीयमेव सांख्ययोगशास्त्रज्ञानम्, यतो मूलतः सौषुप्तमेवैतज्ज्ञानं न तुर्यदशोचितमिति विदाङ्कुर्वन्तु विद्वांसः।

कैवल्यवादिभ्योऽपि सूक्ष्मतरविचारशीला विज्ञानवादिनः शून्यवादिनश्च बौद्धाः। सांख्यैरीश्वरस्य सत्ता न स्वीकृता, परं बौद्धैरात्मनोऽप्यस्तित्त्वं निराकृतं मायीयक्षेत्र एव विचारणशीलैः। बौद्धास्तावत्तर्कबुद्धिफलरूपस्य ज्ञानस्य सुषुप्तिपदप्रापकस्य च योगस्याभ्यासस्य फलत्वेनैतन्निश्चिन्वन्ति यदेतत् सर्वमपि जगद्वस्तुतो नास्त्येव परमार्थतः। केवलं जीवानां विकल्पबुद्धिरेवैनं स्थापयति। ततः संकल्पकल्पितपदार्थवदेतत् केवलमाभासंत एव, स्वप्नसंसारवत्। यत्तु वस्तुतोऽस्ति तद्विज्ञानमेव नान्यत्। तच्च विज्ञानं क्षणे-क्षणे सदाभिनवतया प्रकाशते प्रवहति च नदीप्रवाहवद्दीपशिखा-परम्परावद्वा। यथा खलु क्षणिकासु जलधारासु निरन्तरं प्रवहत्सु सदैवोत्तरोत्तरासु धारासु पूर्वपूर्वाभ्यो धाराभ्यः स्नेहस्यन्दनवेगस्पर्शादिविशेषताः सङ्क्रमते, यथा वा दीपज्योतिः परम्परासु प्रकाशादिविशेषाः उत्तरोत्तरं प्रविशन्ति तथैव क्षणिकविज्ञानपरम्परास्वपि प्राक्तनेभ्यो विज्ञानक्षणेभ्य उत्तरोत्तरेषु विज्ञानक्षणेषु बोधसंस्काराः ज्ञातविषयवासनाश्च

सङ्क्रमते। तथा सति विज्ञानपरम्पराणां द्विप्रकारा परिणामाः सञ्जायन्ते। प्रथमतस्ताः विज्ञानपरम्पराः 'अहम्' इत्याकारेण सततगत्या प्रवहन्ति। एतच्च तासामालयविज्ञानात्मकं रूपम्। विज्ञानपरम्परासु तावदनादिकालादेव विषयावभासनसंस्काराः अपि प्रवहणशीला एव। ततः प्राक्तनविषयावभाससंस्कारादेव विज्ञानपरम्पराः स्वयमपि विषयाकारतयावभासन्ते। एतत् प्रवृत्तिविज्ञानम् ततो यदपि विज्ञानविषयरूपं विश्वमाभाति तद्वस्तुतो विज्ञानमेव प्राक्तनसंस्कारवशात्तथा तथा भाति यथा स्वप्नेषु विज्ञानसंस्कारोद्बोधवशादेव वस्तुतोऽविद्यमाना एव भावा आभासन्ते तथैव जाग्रदवस्थायामपि सर्वं विज्ञानगतसंस्कारकारणादेवाभासते वस्तुतोऽविद्यमानमेव। जगद्विषये एतन्निश्चित्य बौद्धाः योगाभ्यासेन विज्ञानगतान् प्राक्तनसंस्कारांस्तथा शिथिलयन्ति यथा नैव प्रवृत्तिविज्ञानस्य प्ररोहो भवति। पुनः पुनरभ्यासवशाच्च ते संस्कारास्तथा शैथिल्यमुपयान्ति यथा शरीरत्यागक्षणे विनष्टा एव भवन्ति। केवलं शुद्धं विज्ञानमेवावशिष्यते। एषा शुद्धा विज्ञानैकमयतास्थितिरेव जीवनस्य चरमं फलम्। इति विज्ञानवादिनां बौद्धानां मतम्। शून्यवादिनां बौद्धानामयं तर्को यद्विज्ञानस्य विज्ञानत्वं हि विषयावभासः। ततो विषयावभासे समुच्छिन्ने सति विज्ञानस्य किं विज्ञानत्वमवशिष्टं भवति। तेन प्रमातृ-प्रमाण-प्रमेयावभासाभावे सति नैव तत्तत्त्वं विज्ञानमिति वक्तुं शक्यते। ततस्त्रिपुरीशून्यतामयं तत्त्वं तैः शून्यमिति व्यपदिष्टं पुरातनैर्वसुमित्रासङ्गादिभिर्बौद्धाचार्यैः। तदनुयायिभिरपरथा तर्कः प्रस्तुतः, तद्यथा :— प्रवृत्तिविज्ञानशान्तौ सम्पन्नायामग्रेऽभ्यासवशात्तथा विधा स्थितिरुपजायते यथा शरीरपातानन्तरमालय-विज्ञानधारापि समुच्छिन्नैव भवति। यथा दीपे तैलक्षये जाते सति वर्तिकाग्रे प्रवहन्ती दीपज्योतिरपि क्षयं याति तथैव सर्वथा शान्तासु वासनासु देहत्यागक्षणे आलयविज्ञानधारापि दीपशिखेव निर्विण्णा भवति। दीपज्योतिर्निर्वाणसाम्यादेव तस्याः स्थितेः पारिभाषिकमन्वर्थं चाभिधानं निर्वाणमिति। मूलतस्तथाविधे प्रवाहसमुच्छेदात्मकेऽभावे प्रवृत्तोऽयं निर्वाणशब्दः कालेन ग्रन्थकृद्भिः सामान्यतो मोक्षपदसमानार्थकतया शास्त्रेषु प्रयुक्तस्तथैवाद्यापि प्रयुज्यते। परं मूलतोऽपवर्गः कैवल्यं निर्वाणं चेति शब्दा भिन्नभिन्नेष्वर्थेषु प्रवृत्ता अभूवन्निति विदाङ्कुर्वन्तु सुधियः।

वेदान्तशास्त्रगुरोः शङ्कराचार्यस्य द्विप्रकाराः उपदेशाः ग्रन्थेषु निबद्धा लभ्यन्ते। तत्र उत्कृष्टतराः उपदेशाः वास्तविकमोक्षमार्गगामिभ्यः साधकवरेभ्यः प्रवृत्ताः सन्तः प्रपञ्चसारादौ लभ्यन्ते। सारभूतं च तेषामुपदेशानां तत्त्वं तैः सौन्दर्यलहर्य्यामुपनिबद्धं सद्विरलविरलैरेव महापुरुषैर्गृह्यते। अपरे तेषामुपदेशाः अवरकोटिभ्योऽधिकारिभ्य उक्तास्तर्क-प्रधानेषु, ब्रह्मसूत्रभाष्यादिषु प्रतिपादिताः सन्ति। ते अवरे तेषामुपदेशाः शास्त्रार्थादौ, वादविवादादौ वा रुचिमद्भ्यः कलहप्रियेभ्यः पण्डितेभ्यः उपदिष्टाः मन्तव्याः। एवं विधैव प्रवृत्तिरभूद् गौडपादाचार्याणाम्। असौ द्विप्रवाहोपदेशप्रवृत्तिस्तेषां सुभगोदयस्तुतौ माण्डूक्यकारिकाग्रन्थे च स्पष्टतां याति। परमग्रे कलिकालप्रभावाच्छङ्करानुयायिभिर्मठाधीशैष्टीकादिनिर्मातृभिश्च विद्वद्भिरद्वैतवेदान्तस्य शास्त्रार्थाद्युपयोगीकलहप्रधानस्तर्कपक्ष एव जगति प्रचारितः, साधनापक्षश्चात्यन्तमवहेलितः। तत एवाग्रे वैष्णवाः केचनैतान् वेदान्तिनः "प्रच्छन्नबौद्धाः इमे" इत्येवमुक्तवन्तः। आचार्याभिनवगुप्तैश्च तेषां मतं "शून्यवादाविदूरवर्तिब्रह्मदर्शनम्" इत्युक्तम्।

वस्तुतो हि श्री वाचस्पतिमिश्रादिभिर्भाष्यकारैस्तुर्यदशोन्मेषमात्रयुतायामपवेद्यसुषुप्तौ सम्भाव्यमानस्यात्मतत्त्वस्य विवेचनं कृतं, तत् संस्कारानुबिद्धया तीव्रबुद्ध्यैव च दार्शनिकसमस्यानां समाधानं कृतम्। वेदान्तदर्शनव्याख्याकारैस्तैर्विद्वत्पुङ्गवैः स्वात्मनोऽपरोक्षः साक्षात्कारो लब्धो वा न वा लब्ध इति विषयः संशयित एव। तेषां तर्ककौशलेनैतदेव प्रतीयते यन्न ते साक्षादात्मदर्शिनोऽपि तु सर्वशास्त्रनिष्णाताः विद्वांस एव केवलमिति। ततस्तैः कृता वेदान्तदर्शनव्याख्याः न दर्शनतया स्वीकार्याः सर्वत्र। परं कलेः प्रभावात् तेषां व्याख्यानमेव प्रामाण्यमत्र जगति सर्वत्र स्वीक्रियते।

यः पुनः पारमैश्वर्यसुविभूषित ऋग्वेदीय औपनिषदो वाऽद्वैतसिद्धान्तस्तस्य पोषणमद्वैतवेदान्तिभिश्चिरात् परित्यक्तम्। दार्शनिकसमस्याविषये एतेषामद्वैतवेदान्तिनामेवं विधं समाधानः— ब्रह्मैवैकं परमार्थतया सत्यं तत्त्वम्। परमनादिकालात् प्रचलदपरं प्रातिभासिकं तत्त्वमप्यस्ति। तच्च तत्त्वमनाद्यज्ञानं यद् व्यष्टिरूपतयाऽविद्येति

समष्टिरूपतया च मायेत्युच्यते। यद्यप्येतस्य तत्त्वस्य सत्ता नैव पारमार्थिकी तथाऽपि तत्त्वमुपाधिरूपतया ब्रह्मणः सविधे स्थितं सत् तं मायोपाध्यवच्छिन्नस्येश्वरस्य रूपेणाविद्योपाध्यवच्छिन्नस्य च जीवस्य रूपेणाभासयत्येकतोऽपरतश्च स्वयं जडजगद्रूपतयाऽऽभासते। वस्तुतः ईश्वरो वा जीवो वा जगदपि वा नैव विद्यते, परमविद्योपहताः जीवाः एकमेव ब्रह्मेश्वररूपतया जीवरूपतया जगद्रूपतया च पश्यन्ति। कर्मजन्मपरम्परा अपि जीवानामादिरहिताः। तदनुसारं ते जगत्यत्र फलभोगं लभन्ते। कदाचित् कोऽपि जीवः उपनिषदां श्रवणेन, मननेन, तदुपदिष्टेन तत्त्वनिदिध्यासनेन चानादिकालात् प्रवृत्तामविद्यां विनाश्य एकं ब्रह्मैव केवलं पश्यति सर्वत्र। यथा प्रबुद्धो जनः सर्वमपि स्वप्नात्मकं जगन्मिथ्येति पश्यति, तथैव मोहनिद्रायाः प्रबुद्धः साधकः विश्वमिदं बन्ध्यासुतकल्पं पश्यन् स्वे सत्ये स्वरूपे स्थितो भवति। ततः स्वात्मानमपि ब्रह्मणोऽभिन्नमेवानुभवति। एतद् बुद्ध्वा यदा प्रारब्धान्ते शरीरं त्यजति तदा तस्याविद्याकल्पितो जीवभावो ब्रह्मभावे लयं याति। स ब्रह्मणि लय एव मुक्तिर्वेदान्तिनाम्। ब्रह्म-तत्त्वं हि शुद्धं सच्चिदानन्दमयमेव। ब्रह्मणि लीनो जनोऽपि जीवभावे विनष्टे सति ब्रह्म एवावशिष्यते। सैष जीवभावस्य लयो ब्रह्मभावे च स्थितिर्मोक्ष इति। स एंव जीवनस्य परमुपादेयं फलम्।

अत्राद्वैतब्रह्मवादेऽपि काश्चन विचिकित्सा अवशिष्यन्ते। यथा :—शुद्ध एकमात्रे च ब्रह्मणि स्थिते सति कुतो जीवभावस्योदयः। अनाद्यज्ञानात्मकाविद्याकारणादिति चेत्, कुतः समायाताऽसावविद्या, कं चोपाधितया समाविष्टा। न खल्वसौ ब्रह्म समावेष्टुं शक्ता, तस्य सततं विद्यात्मकत्वात्। न चास्ति वस्तुतस्तदतिरिक्तः कोऽपि जीवो यमसौ समाविशेत्। किञ्च, अविद्याऽसौ निःसारा सती कथं सद्रूपतयावभासमानं जगदाभासयेत्। किञ्चैतैर्वेदान्तिभिर्जीवानां जीवत्वं, तेषां कर्माणि, सततगत्या च प्रचलन्नयं संसार इत्येतेऽपि पदार्थाः अनादय इति समुद्घोषिताः। तदियतोऽनादिपदार्थान् स्वीकुर्वन्त एते कथमद्वैतवादिन इति ते एव जानन्ति। वस्तुतः एतैरद्वैतवेदान्तिभिर्निरोध-समाधिदशायां सर्वोपाधिशून्यस्य शुद्धस्य जीवचैतन्यस्य दर्शनमवाप्य तदनुसारमेव दार्शनिकसमस्यानां विषये उपपत्तयः प्रस्तुताः। यथा चैतेषामुपपत्तयस्तथैतत् प्रतिभाति यत्तेषां निरोधसमाधिस्तथाविधापवेद्यसुषुप्तिर्यस्यां तुर्यदशाया उन्मेषोऽपि मनाक् समुदेति। तत एव तैरात्मस्वरूपं शून्यमिति नोपदिष्टम्। अपि तु सच्चिदानन्दमयमिति। परं पारमैश्वर्यात्मकस्यात्मस्वरूपस्य दर्शनाभावतस्तेषामसौ निरोधसमाधिस्तुर्योन्मेषयुक्तापि वस्तुतः सुषुप्तिरेवेति। तत एव जगतो विषये सर्वशङ्कासमाधानकारिणी न काप्युपपत्तिस्तैः प्रस्तुता। तेन जगदुपपत्तये तैरपि तर्कयुक्तिसहायाः कल्पना एवाश्रिता यदनुसारमनेकानादितत्त्वकल्पनाश्रयतोऽद्वैतवेदान्तवादः प्रचालितः।

किञ्च — सत्ता पारमार्थिकी वा भवतु प्रातिभासिकी वा, सत्ता तु सत्तैव। ततो नेदं जगद् बन्ध्यासुतकल्पमसत्यम्। सृष्टिसंहारादिसामर्थ्यरूपमैश्वर्यं तैर्मायोपाध्याश्रितमेव मतम्। मायोपाधिरहिते ब्रह्मणि न किमपि सामर्थ्यं तैर्दृष्टम्। ततस्तच्छून्यगगनतुल्यमेव प्रतिपादितम्। आनन्दात्मकतापि तस्य दुःखाभावरूपैव सिद्ध्यति, न भावात्मकपरचमत्काररूपा। तथाविधस्य चमत्कारस्य स्वात्मपरमेश्वरतानुभूतिमूलत्वात्। ऐश्वर्यहीने गगनतुल्ये ब्रह्मणि का परब्रह्मता, का च परमानन्दमयता। आचार्याभिनवगुप्तोक्त्या विश्वबृंहकत्वं ब्रह्मणो ब्रह्मत्वम्। बृंहकत्वं च विकासकत्वम्। तद्राहित्ये तस्य शून्यतुल्यमेव स्यात्।

भक्तिभावोद्भावितप्रभावैर्वैष्णवैर्द्वैतशैवैश्च परस्य तत्त्वस्य परमेश्वरत्वं सम्यक् प्रतिपादितम्। परमुभये अपि ते सूक्ष्मसूक्ष्मतरशरीरस्थितं विष्णुं वा शिवं वा परं तत्त्वं मन्यमानाः सालोक्यं वा सामीप्यं वा, सारूप्यं वा सायुज्यं वा प्राणिनां चरमोत्कर्षपदं स्वीकुर्वन्ति, न च शुद्ध-परिपूर्ण-चिदानन्दमात्रं तत्त्वं प्रति श्रद्धाभाजः। आधिदैविकं हि ते परतत्त्वस्य स्वरूपं बहुमन्यमानाः नाध्यात्मिकविचारसरणौ रुचिमन्तः। अद्वैतशैवादिदर्शनविदः तथविधं विष्णुं शिवं वा वस्तुतो महासृष्ट्यन्तर्गतलोकविशेषाधिपतिमधिकारविशेषभाजं देवाधिदेवमेव मन्यन्ते, नैश्वर्यपरिच्छेदशून्यं परमेश्वररूपं परतरं तत्त्वम्। ततः परिपूर्णमोक्षपदप्राप्तेः सोपानकल्पान्येवैतेषां वैष्णवानां द्वैतशैवानां च सालोक्यादीनि पदानि, न परमोक्षरूपाणि। अपरं च एते दार्शनिका अपि जीवानां कर्मजालानामनादित्वमज्ञानस्य चापि

तथाविधत्वं प्रतिपादयन्तो न सन्तोषावहं तर्कमुपस्थापयन्ति। वीरशैवानां सामरस्यात्मिका स्थितिरद्वैतभावोन्मुखी वर्तते नूनम्। परं तेषां गुरवः स्वं सिद्धान्तं "शिवविशिष्टाद्वैतं" कथयन्ति। मरणानन्तरं वीरशैवानां शिवलोकगतिं स्वीकुर्वन्तो वस्तुतः सालोक्यमेव जीवनलक्ष्यं मन्यन्ते।

ये तावद्‍भेदप्रधाना दशशिवागमास्ते तुर्यदशायाः निम्नतमस्य सोपानस्य यद् दर्शनं तस्यैवोपदेशकाः। भेदाभेदप्रधाना अष्टादशरुद्रागमास्तु तं स्वात्मसाक्षात्कारमनुसरन्ति यस्तुर्यदशाया द्वितीये सोपाने समुद्दीप्तो भवति। ततस्त आगमाः भेदाभेदमयीमेव दृष्टिमाश्रित्य ज्ञानविज्ञानोपदेशान् विदधति। तत ऊर्ध्वं भैरवागमानां स्थितिः। ते तावत्तुर्यायास्तृतीये सोपाने समुज्ज्वलतया प्रकाशमानमात्मसाक्षात्कारमनुसृत्याभेददृष्ट्यैव दर्शनसिद्धान्तानुपपादयन्ति। ततोऽप्युत्कृष्टतरं स्थानं त्रिकागमानाम्। ते हि दर्शनसिद्धान्तप्रतिपादने वा साधनाभ्यासोपदेशे वोभयत्र पराद्वैतमयीं दृष्टिमाश्रित्य ज्ञानविज्ञानमार्गं दर्शयन्ति। पराद्वैतमयी दृष्टिरसौ भवति यदनुसारमेक एव परमेश्वरः स्वेच्छया स्वस्वातन्त्र्यमहिम्ना बन्धमोक्षोभयमयीं दिव्यां क्रीडां सततगत्या क्रीडनशीलो विजयते। तद्दृष्टौ बन्धो मोक्षश्च, ज्ञानमज्ञानं चोभयमेकमेव तत् परमेश्वराख्यं तत्त्वं यत्तथा-तथा स्वेच्छया स्वविलासलीलया नटवद्विहरन्नभिव्यक्ततां नयति स्वं परमेश्वरत्वम्।

त्रिकाख्यानागमानेव मुख्यतयानुसरन्त्या दार्शनिक्या दृष्ट्या परिपूर्णं विकासमुपयातं दर्शनं हि कश्मीरशैवदर्शनम्। दाक्षिणात्येभ्यः शैवदर्शनेभ्यो विलक्षणत्वमस्य प्रकटीकर्तुमेवेदमद्वैतशैवदर्शनमित्येव मन्यते स्म पुरा। अस्याभिनवः प्रचारः कलियुगे त्र्यम्बकादित्याख्येन सिद्धेन प्रवर्तितः। तेन कारणेनास्य संज्ञा त्र्यम्बकशैवदर्शनमिति वा त्र्यम्बकमठिकादर्शनमिति चाप्युच्यते। एतद्दर्शनानुसारं जीवनस्य चरमं लक्ष्यं शास्त्रस्यास्य च पार्यन्तिकं फलं स्वात्मनः विस्मृतस्य परिपूर्णपरमेश्वरतात्मकस्य वास्तविकस्य तत्त्वस्य पुनः प्रत्यभिज्ञाकरणम्। ततः सर्वदर्शनसंग्रहे माधवाचार्येणास्याभिधानं 'प्रत्यभिज्ञादर्शनम्' इत्युक्तम्।

अस्य दर्शनस्य यः प्रयोगपक्षस्तस्य केषामप्यङ्गानां, विशेषतो योगाभ्यासस्य, शिवपूजायाः, लिङ्गयोनिपूजायाः, यन्त्रप्रयोगस्य, शाम्भव्या मुद्राया प्रचारस्य प्रमाणानि सिन्धुसभ्यताया बहुषु भग्नावशेषेषु लभ्यन्ते भूरिशः। ऋग्वेदादावविद्यमानाया योगविद्यायाः उल्लेखा उपनिषत्सु सन्ति। याज्ञवल्क्यस्मृतेस्तृतीयेऽध्याये यतिधर्मप्रकरणे त्रिकसाधनायाः मुख्यप्रक्रियायाः गुह्यस्य रहस्यस्य मनाक् प्रतिपादनं कृतमस्ति। (या० स्मृ०,३,१९८-२०१)

भगवद्गीतान्तर्गतानां कासाञ्चित् साधनानां दर्शनसिद्धान्तानां च केषाञ्चित् स्फुटं व्याख्यानं केवलं त्रिकशास्त्रस्यैव साहाय्येन सन्तोषजनकतया कर्तुं शक्यते। उदाहरणार्थम् :— तपस्विभ्योऽधिको योगी (भ० गी० ६,४६), ज्ञानाद्ध्यानं विशिष्यते (भ० गी० १२,१२) मत्तः स्मृतिर्ज्ञानमपोहनं च (भ० गी० १५,१५) इत्येतेषां वाक्यानाम्। गीतासु षष्ठेऽध्याये स्फुटतया त्रिकशास्त्रीयः शाम्भवयोग एव वर्णितोऽस्ति। महाभारते भगवतः श्रीकृष्णस्य योगदीक्षागुरुत्वेन भगवान् दुर्वासाः उक्तोऽस्ति। श्री कृष्णेन दुर्वाससः उक्तेः स्मरणं कृतम् मौसुलपर्वणि। कालिदासेन कुमारसम्भवे शाम्भव्या मुद्रायाः सरसं वर्णनं कृतमस्ति। भर्तृहरिणा वाक्यपदीये काश्मीरशैवदर्शनसिद्धान्ताः केचन संक्षेपतः प्रतिपादिताः। अवधूतगीतायां त्रिकशास्त्रपरिभाषाणामुल्लेखोऽस्ति। योगवासिष्ठीया सिद्धान्ताः बहुधाऽस्य दर्शनस्य सिद्धान्ताननुहरन्ति। कर्णाटदेशीयेषु वचनग्रन्थेषु त्रिकयोगप्रक्रियाः वर्णिताः सन्ति। इत्येवं विधैः प्रमाणैरेतत् सिद्ध्यति यच्छैवदर्शनस्य त्रिकयोगविद्यायाः प्रचारो भारतवर्षे प्रागैतिहासिकादेव कालात् प्रवर्तमानोऽभूदिति। वस्तुतोऽसौ योगिनां प्रयोगपरम्परास्वेव प्रावर्तत, न ग्रन्थलेखनक्रमे। यतोऽतिरहस्यभूतत्वाद् गुरवो ग्रन्थेष्वस्य रहस्यानि न लिखन्ति स्म। ईदृश एवास्य प्रचारस्योदन्तः स्पष्टमुक्तोऽस्ति श्रीमत्सोमानन्दपादैः शिवदृष्टेश्चरमे प्रकरणे। तदुच्यते यथा :— गुरुशिष्यपरम्परासु सततं प्रवहदेतच्छास्त्रं यदा कलियुगान्तरे क्रमेण क्षीयमाणं सदतीव विरलतां सुदुर्लभतां चोपयातं तदा कैलासपर्वते विहरता भगवता श्रीकण्ठनाथेनास्य पुनः प्रचारार्थमादिष्टो महामुनिर्दुर्वासाः। तस्मिन्नेव च काले पृथिव्यामस्य शास्त्रस्य प्रचारं कर्तुं श्रीकण्ठनाथस्यैवाज्ञया त्रयः सिद्धा भुवमवातरन्।

तेषां मध्ये अमर्दकेनावरकोटिभाजां साधकानां कृते शैवदर्शनस्य तत्साधनभूतायाश्चोपास्तेरुपदेशो भेददृष्टिमालम्ब्य कृतः। द्वितीयेन श्रीनाथाख्येन सिद्धेन मध्यमकोटिभाजां साधकानां हिताय तदुपदेशो भेदाभेददृष्टिमालम्ब्य कृतः। तृतीयः सिद्धस्तु त्र्यम्बकादित्यो भगवतो दुर्वाससो मानसः पुत्रः। तस्मै महामुनिनाऽद्वैतदृष्टिमालम्ब्य शैवदर्शनसिद्धान्तानां त्रिकसाधनाक्रमाणां च रहस्यमनुग्रहशक्तिपातेन तथा प्रकाशितं यथा सर्वविषयकं प्रातिभं ज्ञानं तस्योद्दीप्तमभवत्। स च शिष्यपरम्पराक्रमद्वयं प्रवर्तयामास। स्वस्य मानसपुत्रस्य द्वितीयत्र्यम्बकादित्यस्य क्रमेणासौ त्र्यम्बकमठिकां प्रवर्तयामास। मानसदुहितृक्रमेण चार्द्धत्र्यम्बकाख्यां मठिकाम्। मठिकाद्वयमप्येतदभेददृष्टिप्रधानम्। त्र्यम्बकमठिकायाः पञ्चदशो गुरुः कयापि ब्राह्मणकुमार्या सह विधिपूर्वकम् विवाहं विधाय सङ्गमादित्याख्यं सुतं जनयामास यस्त्र्यम्बकमठिकायाः षोडशो गुरुरभवत्। अष्टमे शतके स कदाचित्तीर्थान्यटन् कश्मीरानाजगाम। अस्य देशस्य सौन्दर्यकारणात् शिवभक्तजनबहुलत्वाच्चात्रैवोपनिविष्टः सपरिवारः। तस्यैव सन्ततौ चतुर्थे सोपाने प्रादुरभूच्छ्रीसोमानन्दो नवमशतकमध्ये। सङ्गमादित्येनात्र स्थापितायां मठिकायां बहवो योगिप्रवराः प्रादुरभूवन्। तैरेव शिवस्यानुग्रहाच्छैवदर्शनस्य भैरवागमाः सम्प्राप्ताः, उत्कृष्टतरैश्च योगिभिः सौरभर्गशिखाद्यास्त्रयः, सिद्धा-वामक-मालिन्याख्याश्च ते त्रयः आगमाः सम्प्राप्ता ये त्रिकागमाः इति वा षडर्धागमाः इति वोच्यन्ते। एषा त्र्यम्बकपरम्परा कश्मीरेष्वद्यापि प्रचलति। अर्धत्र्यम्बकपरम्परा दशम्यां शताब्दौ काङ्ड़ायां ब्रजेश्वर्याऽधिष्ठिते जालन्धरपीठेऽतीवप्रसिद्धाऽभवत्। तत्रत्य एव पीठाधिपोऽसौ त्रिककुलोभयसाधनारहस्यवित् सम्पूर्णज्ञानविज्ञानस्वतन्त्रः श्रीशम्भुनाथाख्यो गुरुरभवद् योऽभिनवगुप्ताचार्यस्य चेतसि विद्यमानाः सर्वा अपि सिद्धान्तविषयाः साधनाविषयाश्च शङ्का दूरीकृत्य तं सर्वथा निशङ्कभावस्थमकार्षीत्। श्रीनाथस्यामर्दकस्यापि च मठिके आचार्याभिनवगुप्तस्य काले कश्मीरेषु प्रवर्तमाने आस्ताम्। परमिदानीं केवलं त्र्यम्बकमठिकैवावशिष्टा। वस्तुत एतस्य मठिकाचतुष्टयस्यापि यद् विज्ञानं तत् सर्वं कश्मीरशैवदर्शनमेव। तदेव हि सिद्धयोगीश्वरीमतमित्युक्तं गुरुभिः। नवमस्य शतकस्यारम्भे कश्मीरेषु वसुगुप्तनामा मुनिः सिद्धदर्शनमवाप्य सिद्धमुखादेव शिवसूत्राख्यमागमं प्राप्तवान्। तदभ्यासं सम्यग्विधायासौ तदागमसिन्धोर्मथनं विधाय तस्मात् स्पन्दतत्त्वसाक्षात्कारात्मकममृतं लब्धवान्। तदुपदेशं चासौ सच्छिष्येषु कृतवान्। तेषां शिष्याणां मध्ये भट्टकल्लटेन नवमे शतके शिवसूत्रोपदिष्टस्य स्पन्दसिद्धान्तस्य स्पन्दतत्त्वसाक्षात्कारोपायभूतस्य च साधनाभ्यासस्य प्रचारार्थं कानपि ग्रन्थान् जग्रन्थ। तेषां मध्ये स्पन्दकारिका, स्पन्दवृत्तिश्चेति द्वावेव ग्रन्थाविदानीं लभ्येते। इदानीं शिवसूत्रस्य खण्डत्रयमेव लभ्यते। चतुर्थस्तु खण्डश्चिराद् विनष्टः। असौ खण्डोऽतीव रहस्यात्मकोऽभूत्। तदुपरि भट्टकल्लटेन निर्मिता तत्त्वार्थचिन्तामण्याख्या टीका नैव लभ्येदानीम्। केवलं कानिचित्तद्वाक्यानि ग्रन्थान्तरेषु क्वापि क्वाप्युल्लिखितानि लभ्यन्ते। भट्टकल्लटस्य तत्त्वविचारः, स्वस्वभावसम्बोधनं च केवलं नाम्नैव ज्ञायेते। तेन शिवसूत्रोपरि मधुवाहिनी नाम टीकापि निर्मिताऽभूद्, येदानीं न लभ्यते क्वापि।

नवमशतकमध्ये एवाविरभूवन्नन्येऽपि केचन ग्रन्थकर्त्तारः। तन्मध्ये भट्टनारायणेन स्तवचिन्तामणेर्भट्टप्रद्युम्नेन च तत्त्वगर्भस्तोत्रस्य निर्माणं कृतम्। तदनन्तरं त्र्यम्बकवंशीयेन श्रीसोमानन्देन स्वप्ने समवाप्तया शिवस्याज्ञया सर्वेषामपि शैवागमानां स्पन्दशास्त्रग्रन्थानां च सारमादाय अद्वैतशैवदर्शनस्य विषये न्यायदर्शनोपदिष्टशैल्यनुसारं प्रथमस्य तर्कप्रतिष्ठस्य दर्शनग्रन्थस्य निर्माणं कृतम्। स च ग्रन्थः शिवदृष्टिरिति ख्यातः। अन्यत् सोमानन्दकृतं केवलं नामावशेषतां यातम्। अत्यन्तसूक्ष्मतरतर्कबहुला शिवदृष्टिः। तस्यां स्वपक्षस्थापनं संक्षेपत एव कृतं वर्तते परपक्षपरीक्षणं, विशेषतो विज्ञानवादिनां सूक्ष्मतराणां तर्काणां दिग्दर्शनं विधाय तेषां निराकरणमतीव विस्तरेण कृतं श्रीसोमानन्देन शिवदृष्टौ। सप्तमाह्निके भोगमोक्षप्रदानामुपायानां च यत्प्रतिपादनं कृतं तत्तु रहस्यवस्तुप्रतिपादकत्वेन हेतुना न तथा स्पष्टतां नीतमस्ति। प्रायशोऽरुचिकरा एव भवन्ति विज्ञानवादिनां शुष्कप्रायास्तर्काः। अत एवान्यदर्शनाचार्यैर्न ते सम्यक् स्पृष्टाः। केवलं श्री सोमानन्दादिभिः कश्मीरशैवदर्शनाचार्यैरेव तेषां सम्यक् प्रतिपादनं विधायैव तर्कबलेनैव निराकरणं कृतम्। तेन च शिवदृष्टेर्माहात्म्यमतीवोच्चतरत्वं प्राप्तं, परं पाठकेभ्योऽध्येतृभ्यश्च सूक्ष्मतर्कबहुलत्वाद् ग्रन्थ

एषोऽरुचिकर एवातिष्ठत्। नास्य पठनपाठने बहुधा लोकप्रियतामवाप्ते। तदुपरि पश्चादाचार्योत्पलदेवेन विरचिता वृत्तिरत एवार्धावशिष्टैवेदानीम्, आचार्याभिनवगुप्तकृतं च शिवदृष्ट्यालोचनमत एव विनष्टम्। किञ्च, पञ्चदशे शतके कश्मीरेषु भारतीयसंस्कृतेः तत्संस्कृतिमतां च प्रजानां यत् सुमहत् कदनं संवृत्तं, तस्मिन्नेव कदने शतशः धर्मदर्शनादिग्रन्थाः यदाग्निसात्कृत्य विनाशं नीता मौसुलैस्तदैव शिवदृष्ट्यालोचनादीनि ग्रन्थरत्नान्यपि विनाशमुपगतानि। तस्याः ग्रन्थसमृद्धेः कश्चन परिचयो जयरथकृतात् तन्त्रालोकविवेकाल्लभ्यते मनाक्।

नवमे एव शतके श्रीसोमानन्दस्य शिष्येणाचार्योत्पलदेवेन कश्मीरशैवदर्शनस्य सर्वोत्तमस्य ग्रन्थस्य निर्माणं दार्शनिक्या शैल्या कृतम्। स च ग्रन्थ ईश्वरप्रत्यभिज्ञेति। तत्र ग्रन्थे सर्वेषामपि स्वदर्शनविषयाणां तर्कबुद्धिनिष्ठं प्रतिपादनं, परपक्षाणां च तथाविधमेव संक्षिप्तं परीक्षणमतीव प्रौढिमय्या शैल्या कृतं वर्तते। येऽपि दर्शनविषयास्तथाप्यवशिष्टास्तेषां प्रतिपादनं तैः सिद्धित्रय्यां कृतम्। अन्येऽपि केचन ग्रन्थास्तैर्निर्मिता ये पञ्चदशशतकीये कदने विनष्टा एव। स्वकीयेषु ग्रन्थेषु तैः संक्षिप्ता वृत्तयोऽपि विरचिता अभूवन्, या अंशत एव लभ्यन्ते। ईश्वरप्रत्यभिज्ञावृत्तिमादाय तैः पदवाक्यप्रमाणज्ञतादृष्ट्या सूक्ष्मतरविचारबहुला टीकापरनाम्नी विवृत्तिरपि निर्मिताऽभूत्। परं शिवदृष्टिवृत्तिवत् सापि विनष्टा सती नाद्यावधि लब्धा केनापि। आचार्यमहोदयनिर्मिता शिवस्तोत्रावलिरद्यापि कश्मीरेष्वतीव लोकप्रियास्ति। दशमशतकारम्भे भट्टभास्कराख्यो गुरुः शिवसूत्रवार्तिकं निर्माय सूत्राणां वास्तविकं वसुगुप्तादारभ्य च परम्परया प्राप्तं स्पष्टीकरणं कृतवान्। सम्भवतोऽयमेवाचार्यस्तन्त्रालोकेऽभिनवगुप्तमहोदयैर्निजगुरुमध्ये गणितः। अस्य वार्तिकमतीवसारग्राहि, परं टीकाद्यभावान्न पण्डितसमाजे लोकप्रियतां कदापि प्राप। यथोत्तरं मुनीनां प्रामाण्यमितिन्यायेन शैवदर्शनस्यास्य दार्शनिकसिद्धान्तानां, साधनोपायानाञ्च रहस्यानां विषये यत्सर्वमान्यं स्पष्टीकरणं तत्तावदाचार्याभिनवगुप्तैरेव कृतम् । तैः कृताः केचन सुबोधाः ग्रन्थाः शैवदर्शनाध्ययने प्रविविक्षूणां कृते अतीव हिताः । तेषां कालो दशमशतकमध्यादेकादशशतकमध्यं यावत्। तैर्निर्मितेश्वरप्रत्यभिज्ञाविमर्शिनी शैवदर्शनस्य सर्वोत्कृष्टो ग्रन्थोऽस्ति। ईश्वरप्रत्यभिज्ञाविवृत्तेः पदान्यादाय तैः पदवाक्यप्रमाणशास्त्रदृष्ट्या यत् सविस्तरं व्याख्यानं कृतमस्ति तन्मूलविवृत्तेरभावान्न तथा विद्वज्जनोपकारकरम्। शैवदर्शनीयप्रयोगपक्षे तैरतिविस्तरस्य सुपरिपूर्णस्य चानुपमस्य तन्त्रालोकाख्यस्य ग्रन्थरत्नस्य निमार्णं विधाय शैवदर्शनस्य योग-याग-दीक्षा-पूजनादिविषयाः सुस्पष्टातां नीताः। एवं च शैवशास्त्रज्ञानं तैर्विज्ञानपदवीमारोपितम्। नास्तीदृशः परिपूर्णः कोऽप्यन्यः साधनाविषयो ग्रन्थः क्वाप्यत्र जगति। अस्य ग्रन्थस्य संक्षिप्तः सारस्तैस्तन्त्रसारे सुस्पष्टतां नीतः। अपरं यदनुपमं तेषां ग्रन्थद्वयं तत्तावत् :– (1) परात्रीशिकाविवरणं शैवसाधनायाः सुगुप्तरहस्यप्रतिपादकम्, (2) मालिनीविजयवार्तिकं यदतीवानुपमं सदपि व्याख्याद्यभावान्नलोकप्रियतां गतम्। तेषां स्तोत्राण्यप्यतीव मनोहराणि सारगर्भाणि च अलङ्कारादिशास्त्रेष्वपि तेषां सुमहान् अधिकारः। तेषां वैदुष्यं ग्रन्थकर्तृत्वञ्च सर्वथाऽनुपमं परिपूर्णं च। तेषां स्वल्पकायेषु ग्रन्थेष्वनुत्तराष्टिकाऽतीवसारभूतसिद्धान्तप्रकाशिका। पर्यन्तपञ्चिका च ततोऽप्यतिसूक्ष्मतरविचारबहुलाऽतीव चमत्कारकारिणी विदुषां कृते। श्लोकद्वयमात्रावशिष्टं तेषां शिवशक्त्यविनाभावस्तोत्रं कस्य नाम सहृदयस्य विदुषः कृते नानन्दसन्दोहदायि। बहवस्तेषां ग्रन्था, नामशेषतां याताः, अनेके पुनर्विस्मृतनामधेया अपि।

अग्रिमे युगे ये ग्रन्थकाराः शैवशास्त्रप्रचारं कृतवन्तस्तेषां मध्ये नूनं सुमहत् प्राधान्यं तन्त्रालोकविवेककारस्य जयरथस्य। तन्त्रालोकस्य सविस्तरां व्याख्यां निर्माय तैर्महदुपकृतं तन्त्रशास्त्रजिज्ञासूनां विदुषां साधकानां च। तन्त्रालोकोऽपि कदाचिदन्यसुविस्तृतग्रन्थजातवद्विनष्ट एवाभविष्यत् पञ्चदशशतकीये महाकदने चेत् कश्मीरेभ्यः पलायिता विद्वांस एनं ग्रन्थं प्रति प्रगाढस्नेहवन्तो नाभविष्यन्। तस्य प्रगाढ़स्य स्नेहस्य विकासे चिरस्थितौ च मुख्यं कारणं तद् व्याख्यानं जयरथकृतम्। अन्यथा कतिपयविद्वज्जनमात्रप्रियोऽसौ ग्रन्थोऽपि शिवदृष्ट्यालोचनादिग्रन्थरत्नानन्तरपदवीपथिकतामगमिष्यत्।

येषां च ग्रन्थकाराणां मध्यमकोटिकमेव माहात्म्यं ते तावदेते :— १. रामकण्ठ :— स्पन्दविवृत्तिनिर्माता,

२. उत्पलवैष्णव :— स्पन्दप्रदीपिकाकारः, ३. आदिनाथोऽनुत्तरप्रकाशपञ्चाशिकाकृत्, ४. अभिनवगुप्तविशेषः। तन्त्रवटधानिकाकारः (अयं महागुरोः पितृव्यतनयः) ५. योगराजः— परमार्थसारस्य व्याख्याकारः ६. आनन्दराजानकः— विज्ञानकौमुदीनिर्माता। ७. शिवोपाध्यायः— विज्ञानभैरवोद्द्योतादिग्रन्थनिर्माता, ८. ईश्वरप्रत्यभिज्ञाविमर्शिन्याष्टीकाकारो भास्करकण्ठः, यस्य भास्करी सुप्रसिद्धास्त्यद्यत्वे। ९. मनसाराम :— स्वातंत्र्यदीपिकानिर्माता।

अभिनवगुप्तस्य शिष्याणां मध्येऽभिनवगुप्तविशेषं विहायान्यः केवलमेक एवाभूद्बुचिमान् शास्त्रनिर्माणे व्याख्यादिकरणे च। स चासीत् क्षेमराजः। परं न तेन तन्त्रालोकस्य, तन्त्रसारस्य वा, मालिनीविजयवार्तिकस्य वा व्याख्या निर्मिता। केवलं केषामपि शैवागमानां स्तोत्राणाञ्च व्याख्या निर्मिता। तदतिरिक्ततया तस्य.शिवसूत्रविमर्शिनी, स्पन्दनिर्णयः, इति द्वौ प्रसिद्धौ टीकाग्रन्थौ, स्पन्दसन्दोहः, पराप्रावेशिका चेति लघुकायं ग्रन्थद्वयं प्रसिद्धाः कृतयः।

सन्ति केचन तेऽप्यागमिकाः साधकाः ये शाक्ता इत्युच्यन्ते। तेषां मध्ये ये प्राधान्यं भजन्ते तेऽपि पराद्वैतवादिन एव। तेषां प्रतिपादनप्रक्रियायां केवलं परिभाषाविशेषप्रयोगकृतमन्तरम्। ताश्च परिभाषा विन्दुर्नादो, बिन्दुः कला, कलातीत इत्याद्याः। अपरं च शैवे भक्तिसहायस्य त्रिकयोगाभ्यासस्य प्राधान्यं प्रयोगविषये, परं शाक्ते मन्त्र-मण्डल-मुद्रायागादीनामेव प्राधान्यम्। किञ्च, शाक्ते कौलसाधनायाः प्रमुखता, शैवे नासौ तथा, यतः शाक्तेऽसौ परमावश्यकी शैवे पुनरसौ त्रिकयोगसाहाय्यमात्र एवोपयोगिनी, नावश्यं विहिता, न चापि निषिद्धा। शैवे ज्ञानपक्षस्य विशेषो महिमा, शाक्ते पुनः क्रियापक्षस्य। शैवे मुमुक्षायाः प्राधान्यं, शाक्ते पुनर्बुभुक्षाया अपि। शैवे मोक्षलाभं प्रति सावधानता, शाक्ते पुनर्व्यावहारिकसिद्धिजालमपि प्रति सा। परं तथापि शैवशाक्तशास्त्रयोः सिद्धान्ताः परस्परं प्रायशः समानतन्त्राः।

कौलसाधकानां मध्ये ये शैवदर्शनगुरवस्तेषु मुख्यास्तावज्जालन्धरपीठाधिपोऽसौ शम्भुनाथाख्यः सिद्धो यो मूलत आन्ध्र प्रदेशीयः श्रीसुमतिनाथस्य साक्षाच्छिष्यः सन् परतः काङ्गड़ायां स्थितस्य वज्रेश्वर्याऽधिष्ठितस्य जालन्धरपीठस्याधिपत्यमवाप्य तत्रागमनशीलानामभिनवगुप्तसदृशानां तत्त्वदर्शिनामपि शैवयोगिनां गुरुतामवाप। अद्वैतशैवपरम्पराया याऽपरार्द्धत्र्यम्बकाख्या मठिका तस्या अप्ययं तात्कालिको गुरुस्त्रिके कौले च परिपूर्णज्ञानविज्ञानवान्। एवं प्रतिभाति यदयं श्रीशम्भुनाथ एव क्रमस्तोत्रनिर्माता श्रीसिद्धनाथ इति। अस्यैव शिष्यपरम्परायां शैवो नागार्जुनः प्रकटीभूतः कालान्तरे। चतुर्दशे शतके महाराष्ट्रदेश आविरभून्महेश्वरानन्दो यः कौलसाधकः सन् काश्मीरशैवदर्शनस्य मुख्यसिद्धान्तान् स्वीये महार्थमञ्जरीपरिमले सुस्पष्टतया सप्रमाणं च प्रतिपादितवान्। कश्मीरमण्डलबाह्या जिज्ञासवोऽस्मान्महार्थमञ्जरीपरिमलादेव पराद्वैतपरमागमिकं दर्शनमभ्यस्यन्ति प्रायः। अस्य शैली तावदभिनवगुप्तीयां शैलीमनुसरति। केवलमेषमहार्थमञ्जरीपरिमल एव हि कश्मीरदर्शनस्यासौ महत्त्वमण्डितो ग्रन्थो यः कश्मीरदेशाद् बाह्ये क्षेत्रे समुपयातः। कश्मीरेषु शाहिजहानस्य काले प्रादुरभूदेकः सुमहान् कौलगुरुः। अवरङ्गजेबस्य सभायामप्यसौ सम्मानमलभत। जोधपुरनरेशो जसवन्तसिंहस्तस्य शिष्यत्वं लब्धवान्। प्रातिभं तस्याविर्भूतं शैवदर्शनज्ञानम् सविज्ञानम्। तत्कृताः केचन महत्त्वमण्डिताः ग्रन्थाः विद्यन्ते, परं देवीनामविलासं विहायान्येषां मुद्रणं नैव सञ्जातम्। तेषु मुख्यास्तावत् — कल्पवृक्षप्रबन्धः, कल्पवृक्षचित्रम्, शिवजीवदशकम्, सच्चिदानन्दकन्दली तथा देशभाषामयं चात्मचरितम्। आसीत् कोऽपि स्वतन्त्रानन्दनाथाख्यः सिद्धो यस्य मातृकाचक्रविवेको द्विवारं प्रकाशितोऽभवत्। शाक्तदर्शनमध्ये गणनीयोऽसौ ग्रन्थः। शाक्तसाधनारहस्यपूर्णोऽसौ नात्यन्तं प्रसिद्धः पण्डितसमाजमध्ये। परमतिसूक्ष्माणां रहस्यानां प्रतिपादकः सिद्धजनमात्रसंवेद्यसारः।

वर्तमाने युगे वाराणस्यां विद्वद्ब्राह्मणकुलजाय वरकलोपाह्वयाय श्रीवैद्यनाथशास्त्रिणे भगवता श्री दुर्वाससा प्रत्यक्षं दर्शनं प्रदाय समुचितमुद्रादिसचिवा शाम्भवी योगविद्या प्रदत्ता बाल्य एव। तस्या अभ्यासेन शास्त्रिवर्यैरात्मसाक्षात्कारः

समवाप्तः। तदनन्तरं तैः परिव्राजकव्रतमुपादाय आचार्यामृतवाग्भवेति नाम्ना यत्र-तत्र भ्रमद्भिः कतिचन शैवदर्शनग्रन्थाः निर्मिताः। तेषु प्रधानो ग्रन्थ आत्मविलासो यस्य निर्माणं तैः कश्मीरमण्डले कृतं, हिन्दी व्याख्या च नालागढ़े निर्मिता। अन्ये च दर्शनग्रन्थास्तेषां परमशिवस्तोत्रम्, सिद्धमहारहस्यं, महानुभवशक्तिस्तवः, मन्दाक्रान्तास्तोत्रं चेति। तैः प्रतिपादितां दर्शनविद्यां वयं तेषां शिष्याः अभिनवशैवदर्शनमिति वदामः। तदनुसारं मयापि स्वातन्त्र्यदर्पणाख्यस्य ग्रन्थस्य निर्माणं कृतम्। अस्य दर्शनस्य सर्वेषामपि ग्रन्थानां, ग्रन्थकृतां चाचार्याणां, सिद्धान्तानां, साधनानाञ्चापि सविस्तरः परिचयोऽत्र कोषे तत्रतत्र स्थाने द्रष्टव्यः सुधीभिः।

दर्शनशास्त्रविषया याः मुख्याः समस्यास्तासां समाधानं शैवदर्शनगुरुभिरपरोक्षसाक्षात्कारस्य परतरं स्तरमाश्रित्य इत्थं कृतम्। तत्र "कोऽहम्" इति प्रश्नोस्योत्तरं तदुपदेशानुसारमिदम् :— शिव एवाहं निजयैव पारमैश्वर्यलीलया स्वं स्वरूपं स्वां च स्वभावभूतां स्वातन्त्र्यशक्तिं निजयैव मायाशक्त्या तिरोधायाल्पज्ञाल्पशक्तियुतचैतन्यरूपया जीवतयावभासमान इदानीमस्मि। मया पुनः कदाचिच्छिवेच्छया स्वं याल्पज्ञाल्पशक्तियुतचैतन्यरूपया जीवतयावभासमान इदानीमस्मि। मया पुनः कदाचिच्छिवेच्छया स्वं स्वरूपं निरवच्छेदपरिपूर्णं शुद्धचिन्मयं पारमैश्वर्यलीलाचमत्कारनिर्भरं प्रत्यभिज्ञाय परिपूर्णशिवरूपतयैव स्थातव्यम्। "कथमिदम्" इत्यस्य प्रश्नस्य समाधानं यत्तैः शैवसिद्धैरुपदिष्टं तदेतत्:— मदिच्छाविलासत एवेदं सर्वमेवं भासमानमस्ति। निखिलमपि जगदिदन्तया भिन्नतयाऽवभासयितुमुन्मुखी न केनापि निरोद्धुं शक्या स्वतन्त्रया मदीयेच्छाशक्तिस्तयैव जगदिदमाभासितम्। सर्वमिदं जगन्मदन्तः शुद्धचिन्मात्ररूपतया तथैव सदा विद्यमानमस्ति यथा बीजे वृक्षो दुग्धमध्ये च दध्यादि, बीजरूपतया क्षीररूपतया च विद्यते। यद्यपि क्षीरं तत्तद्दध्यादिरूपतयाऽवभासनकर्मणि हेत्वन्तराण्यपेक्षते, तथापि चिन्मात्रतत्त्वं विश्वं विश्वात्मतयाऽऽभासमानं सन्न कमपि हेतुमपेक्षते विहाय शिवरूपस्य मम पारमैश्वर्यमयीं विलसनस्वभावां स्वतन्त्रामिच्छाशक्तिम्। ननु यथा सांख्यमते प्रकृतिः परिणाममाप्नुवती त्रयस्त्रिंशत्तत्त्वात्मकतया परिणमते स्वयमेव किं तथैव शिवोऽपि परिणामनीत्या जगदाकारतामाप्नोति। चेत्तथैव जगदाभासः प्रतिपादितः शैवे,—तर्हि शिवो विकारी सिद्ध्येत्। विकारित्वं च जडस्यैव शोभते न चिदात्मकस्य। एतद्दोषापहारार्थं वैष्णवैः प्रतिपादितं यत् परमेश्वरस्त्वविकारी केवलं तस्य शक्तिरेव हि परिणामिनी यस्याः परिणामतो जगदाभासः इति। अत्रोच्यते शैवै :— न खलु परमेश्वरस्य न चापि तदभिन्नायास्तच्छक्तेः परिणामः कोऽपि। परमेश्वरो ह्यनवच्छिन्नशुद्धचिन्मात्रस्वरूपः; न च चित् कदापि कथमपि परिणाममधिगच्छति। परमेश्वरंस्य शक्तिस्तदभिन्ना सती परमेश्वरात्मिकैव, ततः शक्तेः परिणामस्तदभिन्नस्य शिवस्यापि परिणामं प्रसञ्जयेत्। ततो न परिणामन्यायेन परमेश्वरो जगदाकारतयाऽवभासते, अपितु प्रतिबिम्बन्यायेनैव मूलसृष्टिः सम्पद्यते। परिणामस्याभिनवारम्भस्य चावकाशः केवलं जडानां पदार्थानां जडेभ्य उपादानकारणेभ्यः सम्पद्यमानायां लौकिक्यामेव सृष्टौ न मूलसृष्टिक्रमे। यथा खलु दर्पणे मुखस्य प्रतिबिम्बेऽवभासमानेऽपि सति न मुखस्य कोऽपि विकारो नापि दर्पणस्य। तथा प्रतिबिम्बन्यायेनावभासमानेऽपि प्रपञ्चे न परस्य तत्त्वस्य नापि तच्छक्तेः कोऽपि विकारः। परमेश्वरो निजे लीलाविलासे प्रसरन् स्वस्मिन्नेव प्रकाशे दपर्णकल्पे स्वीयानामेव पारमेश्वरीणां शक्तीनां प्रतिबिम्बजातं स्वेच्छानुसारमवभासयति। लोके बिम्बं चेत् पूर्वाभिमुखं तर्हि तत्प्रतिबिम्बं पश्चिमाभिमुखं दृश्यते। बिम्बे यद्वामं तत् प्रतिबिम्बे दक्षिणमित्यादि विपरीतता प्रतीपता वा बिम्बात् प्रतिबिम्बस्य। एवमेवांत्रापि परस्मिँस्तत्त्वे विश्वमहमात्मतया प्रमातृतयाऽभिन्नतया च सदा विद्यते, परं तदेव प्रतिबिम्बरूपतायामिदमात्मकता भिन्नरूपतामयीं प्रमेयात्मकतां गृह्णाति। इत्थं प्रतिबिम्बन्यायेनैव शिवस्य पञ्चापि कृत्यानि सम्पद्यन्ते।

अत्रास्याः समस्याया विषये बौद्धाः वेदान्तिनश्चोपदिशन्ति यन्नास्त्येव जगद् वस्तुतः। केवलमाभासते एव तथैव यथा स्वाप्नं जगदविद्यमानमेव सदाभासते। कारणं चैतदाभासस्य वेदान्तिमतेऽनिर्वचनीयासावविद्या यद्वशाज्जीवाः एकमेवाद्वितीयं ब्रह्म ईश्वररूपतया, जीवरूपतया, जडजगद्रूपतया च पश्यन्तः कर्मफलभोगानुसारं संसृतिसागरे निमज्जनोन्मज्जनपरम्परा अनुभवन्ति तावद् यावदुपनिषदां श्रवण-मनन-निदिध्यासनाद्युपायबलादविद्यां विनाश्य

विद्यामुद्दीप्य तद्बलेन सर्वं ब्रह्मैव न पश्यन्ति। तदित्थमविद्यैवैकमात्रं जगदाभासस्य मूलकारणम्। बौद्धा अप्यविद्याया अनादित्वमेव प्रतिपादयन्तस्तन्मूलतो विकासमुपगच्छतां विषयज्ञानानां याः संस्काररूपावासनास्तासां वासनानामेव कारणात् क्षणे-क्षणे विनाशमुपगच्छतां चित्तानां प्रवाहा एव पुद्गलाख्यजीवरूपतयाऽत्र संसारे आभासन्ते, त एव प्राक्तनवासनाप्रभावतो जगदेतदविद्यमानमपि विद्यमानमिव पश्यन्ति स्वप्नजगदिव। परं बौद्धसाधनाभ्यासेन जगतोऽविद्यमानतायाः संस्कारमात्मनि सम्यक् टङ्कयन्तश्चित्तप्रवाहात्मकाः पुद्गलाः यदा प्रारब्धान्ते शरीरं परित्यजन्ति तदा तेषां शुद्धं विज्ञानं न विषयग्रहणे प्रवर्तते नापि शरीरान्तरग्रहणे। इत्थमवशिष्टा शुद्धविज्ञानसन्ततिर्जन्ममरणादिदुःखेभ्यो मुक्ता भवति। शून्यवादिनो बौद्धा एवं वदन्ति यद्विषयज्ञानसम्पादनकारणादेव चित्तं विज्ञानमित्युच्यते। विषयज्ञानाभावे सति तत् प्रमातृ-प्रमाण-प्रमेयात्मकत्रिपुरी शून्यं केवलं चित्तप्रवाहरूपमेव सत् शून्यमित्येव वक्तुमुचितं, न विज्ञानमिति। तेष्वेव केऽपि विषयविज्ञानप्रवाहे समुच्छिन्ने सति चित्तस्य स्वात्मविषयस्याहमितिरूपस्यालयविज्ञानस्यापि धारा समुच्छिन्नैव भवतीति मन्यन्ते। यथा दीपज्योतिः प्रवाहस्तैलक्षये निर्विण्णो भवति तथैवालयविज्ञानप्रवाहोऽपि वासनाक्षये निर्विण्णो भवन् विनाशमुपयातीति शून्यतां गच्छतीति वदन्ति।

परं कुत आयातमनादिरूपमज्ञानं, कं च गृहीतवत्तत्। न खलु तदज्ञानमविद्यात्मकं सद् ब्रह्म स्रष्टुमलमभविष्यत्तस्य सततगत्या शुद्धत्वाद् विद्यात्मकत्वाच्च। नास्ति वस्तुतो ब्रह्मणोऽतिरिक्तः कोऽपि जीवाख्यः पदार्थोऽयमसावविद्याऽऽक्रामेत। किञ्च, विद्यायाऽभाव एव ह्यविद्या, न चाभावरूपायाः तस्याः सकाशादस्य भावरूपतयावभासमानस्य जगतोऽवभासो न्याय्यः। किं नाम मूलभूतं कारणमविद्यायाः। जगद्व्यवहारस्याविद्याकारणत्वे सति सृष्टिसंहाराद्यैश्वर्ययोगोऽपि तस्या एवेति किं प्रयोजनमकिञ्चित्करेण ब्रह्मणेति बहुतरशङ्कातङ्कसङ्कुलोऽयमविद्यावादो वेदान्तिनां वासनावादश्च बौद्धानां न सूरिभ्यः सन्तोषकरः। यश्च वेदान्तसिद्धान्त उपनिषदां तत्र स्पष्टं ब्रह्मण ऐश्वर्यमुपदिष्टं, तथैव ऋग्वेदीयेषु पुरुषसूक्त-वागम्भृणीयसूक्तादिषु। तत एव हि :— वैष्णवा एतान् शङ्कराचार्यपरम्पराभाजो ''विवर्त्तवादपोषकानद्वैतवेदान्तिनः, ''प्रच्छन्नबौद्धा इमे'' इत्युक्तवन्तः। आचार्याभिनवगुप्तमहोदयास्तु तेषां मतं ''शून्यवादातिदूरवर्तिब्रह्मदर्शनम्'' (प०त्री०वि०,पृ०,२२१) इत्युक्तवन्तः। ततः शैवाः परमेश्वरस्य परमेश्वरत्वमेव जगत्सृष्टेर्मूलकारणत्वेन स्वीकृतवन्तः पुनरप्यौपनिषदमेव विज्ञानं सत्यत्वेन घोषितवन्तः।

बौद्धानामत्यन्तसूक्ष्मसूक्ष्मतराणां तर्काणामवहेलनैव कृता आचार्यैर्वैदिकेषु षड्दर्शनेषु, वैष्णवेषु दाक्षिणात्येषु चापि शैवदर्शनेषु। तेषां तर्कयुक्तीनां तात्पर्यं तेषु-तेषु दर्शनक्षेत्रेषु न केनापि ग्रन्थकृता सम्यग् विचारितम्। अविचार्यैव ता युक्तयो ''नास्तिकवादा इमे'' इत्याक्रोशपूर्वकं सर्वथाऽवहेलिताः, यद्यपि न तथाविधाऽनादरबहुला दर्शनविषयप्रतिपादनशैली न्यायदर्शनेन प्रशस्ता। सूक्ष्मसूक्ष्मतराणां तर्कयुक्तीनां परीक्षणार्थमेव हि न्यायदर्शनेन छलवितण्डानिग्रहस्थानादिरूपाणां विषयाणां प्रतिपादनं कृतमस्ति। ततोऽन्यायपूर्वकमेव नैयायिकादिभिर्वेदान्तिपर्यन्तैर्दर्शनविद्याविचारकैः वैष्णवशैवैरपि घोरोऽन्यायः समाचरितो बौद्धं विज्ञानवादं प्रति। परमत्र काश्मीरशैवदर्शने गुरुभिर्न तथाऽऽचरितम्। अत एव शिवदृष्टेः षष्ठे आह्निके श्रीसोमानन्दनाथैर्वैदिकपौराणिकादिदर्शनसिद्धान्तानां सर्वेषामपि परीक्षणं केवलं द्वात्रिंशत् कारिकाभिः कृत्वैकमात्रस्य बौद्धवादस्य परीक्षणार्थं षट्पञ्चाशत् कारिकाः विनिर्मिताः। एवमेव चार्वाकैः साकं वादविवादार्थं तैस्तत्रैवाह्निके सप्तत्रिंशत् कारिका विरचिताः। आचार्याभिनवगुप्तोक्त्यनुसारं श्री सोमानन्दादीनां महागुरूणामेषैव शैली यत् परपक्षं सम्यक् पूर्णतया च सुविचार्यैव तत् परिहारपूर्वकं स्वमतं स्थापनीयमिति। उक्तं ह्येतद्विषये श्रीसोमानन्दपादानां नीतिमधिकृत्य तैः—

''स्वपक्षान् परपक्षांश्च निःशेषेण न वेद यः।
स्वयं स संशयाम्भोधौ निमज्जंस्तारयेत् कथम्।।'' (प० त्री० वि०,पृ० ११७)

एवंविधाऽतीवोदारस्वभावाऽभूत् प्रवृत्तिः केवलं कश्मीरशैवदर्शनगुरूणामेव।

''को वै कर्तास्य विद्यते'' इति प्रश्नमधिकृत्य शैवदर्शनगुरुभिः स्पष्टतया प्रमाणबलेनैतत् प्रतिपादितं यत्

सर्वशक्तिमान् परमेश्वर एव हि जगतो मूलकर्ता। मूलसृष्टिस्तु तत्कृतैव। किमर्थं सृष्टिं करोतीति प्रश्नं समाधातुं तैः प्रतिपादितं यत् स्वस्वभावतयैवासौ सृष्ट्यादिपञ्चकृत्यानि करोति। स्वात्मनि शुद्धचिन्मयतया प्रकाशमानमपरिच्छिन्नपरिपूर्णाहंरूपतया च विमर्शपदवीमुपगच्छत् सर्वं जगदसौ निजलीलाविलासत एवेदं रूपतयाऽऽभासयति, स्वस्माद् भिन्नतया। एषाऽभिन्नस्यापि जगतो भेदमयतयाऽऽभासनैवैतस्य सृष्टिः। सृष्टस्य सुचिरं नियत्यनुसारं प्रचालनं तथा तथा सुचिरमवस्थापनं चास्य स्थितिः। काले-काले चोत्तरोत्तराणां तत्त्वानां पूर्वपूर्वतत्त्वेषु विलापनं तेषां संहारः। प्रचलति स्थितिकृत्ये स्वात्मनः सकाशाद् भिन्नतयाऽऽभासितानां जीवानां सुचिरं जीवभाव एव स्थापनम्। अधोऽधस्तिर्यगादियोनिषु तेषां पातनं कदाचिद् दीक्षितानामपि चेतसि शिवशास्त्रं शिवयोगं च प्रत्यविश्वासस्य समुत्थापनं प्राग्गृहीतं शिवमार्गं परिहृत्यवरेषु मार्गेषु तेषां प्रवर्तनम् इत्येवमादि सर्वमपि शिवस्य विलयकृत्यं निग्रह-पिधान-तिरोधानादिनामभिरपिपदैरुच्यमानं चतुर्थं कृत्यम्। गुरुं प्रति शास्त्रं प्रति जीवेषु रुचिविशेषस्योद्भावनं, दीक्षाकर्मपूर्वकं तान् योगे ज्ञाने भक्तौ च प्रवर्तन्पन्ततश्च स्वरूपसाक्षात्कारं प्रति तेषां प्रेरणं शिवस्य पञ्चममनुग्रहकृत्यम्। एतेषु कृत्येषु परिमितप्रायमधिकारमसौ सृष्टेषु देवाधिदेवेष्वपि वितरति बहुधा। ते च ब्रह्मविष्णुप्रभृतयः परमेश्वरेच्छानुसारं सृष्ट्यादिकृत्यानि कयाकयापि मात्रया कर्तुं शक्नुवन्ति प्रवृत्ता अपि भवन्ति तत्र। इत्थमाब्रह्मस्तम्बपर्यन्ताः जीवनिकायाः स्वं-स्वं कर्म शिवेच्छयैव कुर्वन्ति। इति वस्तुतः स एव हि सर्वकर्ता। "उपादानं किमस्यास्तीति" प्रश्नमधिकृत्य शैवे कृता ह्येषा व्यवस्था :— यथा हि पृथिव्यादीनि निर्मातुमिच्छन् श्रीब्रह्मदेवः क्षित्यादिपरमाणून्, जीवानां च प्राक्तनानि कर्माणि, नित्यविभुद्रव्याणि चाकाशादीन्यपेक्षते न तथा परमेश्वरः किमप्युपादानकारणं वा स्वविलासतो भिन्नं निमित्तकारणं वा कदाप्यपेक्षते सृष्टिप्रभृतिकृत्य-सम्पादने। स्वेच्छयैव स्वस्मिन्नेव चित्प्रकाशे स्वात्मचिन्मयमेव विश्वं स्वशक्तीनां बहिर्मुखेन प्रतिबिम्बनेनासौ तथा तथाऽऽभासयति। ततस्तदर्थं तस्य न कस्याप्युपादानस्यावश्यकता। स्वेच्छामात्रतो यदिच्छति तदवभासयति। ततस्तस्य निजाशक्तिरेव जगदुपादानं परम्। विश्वोत्पत्तिमसौ प्रतिबिम्बरूपतयैव करोति न परिणामनीत्या। तस्य पारमैश्वर्यः शक्तयस्तदिच्छात एव दर्पणे नगरवद् विश्वात्मकतयाऽऽभासन्ते। परमसावाभासो न कल्पनाकलितो, अपि तु स्वस्वातन्त्र्यलीलाविलासकलित एव येनासौ नटवदेव स्वात्मानं जीवनिकायतया जगद्रूपतया चाभासयति। किमर्थमेवं दुःखैकबहुलां जगत्सृष्टिमसौ कुरुते इति बौद्धैः पृष्टे सति शैवा वदन्ति यत्स्वभाव एव हि तस्य सृष्ट्यादिपञ्चकृत्याभिनयनम्। न च स्वभावविषये प्रश्नो न्याय्यः। अग्निः केन कारणेनोष्णः, प्रकाशकश्चेति प्रश्न एतदेवोत्तरं यत् स्वभाव एवैषाग्नेः। तस्य तदभावेऽग्नित्वमेव न स्यादपि तु कृष्णाङ्गारमात्रत्वम्।

तदुक्तम् :—

> **"अस्यास्यदेकरूपेण वपुषा चेन् महेश्वरः।**
> **महेश्वरत्वं संवित्त्वं तदत्यक्ष्यद् घटादिवत्।।"**

(तं० आ०, ३,१०१)

अपरं च परमेश्वरस्यानन्तायां सृष्टावत्र पृथिव्यामिदानीं कलिकालप्रभावत एव दुःखबहुलत्वं, पुनरागते सत्ययुगेऽत्र सुखशान्तिबहुलतैव भविष्यति। सन्ति चापरे स्वरादिलोकाः ये सदा सुखबहुला एव। तदूर्ध्वं च विद्याकलामध्य ऐश्वर्यबहुलानि भुवनानि। तदत्र पारमेश्वरे महानाट्येऽनन्तप्रकारकमेव हि तत्र-तत्र बुद्धिधर्माष्टकवैचित्र्यम्। वस्तुतो हि पारमेश्वरी याऽपरिमिता विश्वपूर्णा च चित् सा स्वभावत एवानन्दमयी। आनन्दस्य स्वभाव एव हि बहिर्मुखं स्पन्दनम्। शिशुरप्यन्तरानन्दान्दोलितः सन् बहिः परिस्पन्दते क्रीडां च करोति। तत आनन्दचमत्कारपरिस्पन्दनत एव पारमैश्वर्यक्रीडायां प्रवर्तमानः परमेश्वरः स्वस्वभावत एव सृष्टिसंहारादिलीलाविलासे विलसन्नेव सदा पञ्चकृत्यान्यभिनयन् विजयते। तथा चोक्तमाचार्योत्पलदेवपादै :—

“सदा सृष्टिविनोदाय सदास्थितिसुखासिने।
सदत्रिभुवनाहारतृप्ताय भवते नमः।।” इति।

(शि० स्तो०, २०,६)

परमेश्वरस्य या परा पारमेश्वरीशक्तिस्तस्या बहिर्मुखाभिव्यक्तिरेव हि विश्वम्। तस्याः शक्तेः किमपि विश्लेषणमप्येतैः शैवसिद्धैर्मनाक् सुस्पष्टतां नीतमस्ति। तद्यथा :— मूलतो हि परं तत्त्वं चिच्छक्तिमयम्, चितः स्वभावो ह्यानन्दः। चेतनाया याऽसावानन्दस्वभावता तद्वशादेवासौ सदैवान्तर्बहिरुभयतोमुखपरिस्पन्दमयी। स्पन्दनवशादानन्द ऊर्मितुल्यामवस्थामाप्नोति। सैषाऽऽनन्दस्योर्मिः पारमेश्वरीच्छाशक्तिः। असाविच्छाग्रे स्रष्टृत्वरूपतामापद्यमाना सती प्रथमं स्रष्टृत्वं विमृशन्ती स्वान्तरेव सूक्ष्मतरं स्रष्टव्यस्वरूपमवभासयन्ती स्रष्टव्यमन्तः सृजतीदमिति। परं तथाप्यहन्ताच्छादितैवात्रेदन्ता। सैषा परस्याः शक्तेर्ज्ञानशक्तिमयी स्थितिः। तदनन्तरं यदेदन्ताया स्फुटताऽऽभासते तदाऽहन्तास्फुटतामिवापद्यते, येन स्रष्टव्यस्य स्फुट आभासो भवतीदमिति। सैषा पराशक्तेः क्रियाशक्तिमयी स्थितिः। ज्ञानशक्ति-प्रधानायां तु स्थितौ परमेश्वरः सदाशिव इति क्रियाशक्तिप्राधान्ये चेश्वर इति परिभाष्यते शैवदर्शने। इच्छाशक्ति प्राधान्ये स एव शक्तिरिति परिभाष्यते, आनन्दशक्तिप्रागल्भ्ये च शिव इति। पर्यन्ते चिच्छक्तिरेव हि परमेश्वरः इति, परमशिवः इति, परं तत्त्वमिति च परिभाष्यते सिद्धैः।

परस्मिँस्तत्त्वे सर्वमपि जगत् केवलमनवच्छिन्नं परिपूर्णं चाहमित्येव प्रकाशते विमृश्यते च। तस्य परस्य तत्त्वस्य या विश्वोत्तीर्णता तस्या विमर्शस्य प्राधान्ये सति तस्य शिव इति संज्ञा पारिभाषिकी, विश्वमयतां प्रत्युन्मुखतामयी याऽपरा स्थितिस्तस्याः प्राधान्यस्य विवक्षया तस्य शक्तिरिति संज्ञा। वस्तुतः शिव एव शक्तिः शक्तिरेव च शिवः। शिवशक्त्युभयमयं यदेकं विभेदरहितं तत्त्वं तदेव परमशिवतत्त्वमित्युक्तं सिद्धैः। वस्तुतः एकमेव हि तत्तत्त्वं शिष्याणां सम्यग् बोधाय त्रिधा निरूप्यते त्रिभिश्च नामभिरुपदिश्यते तस्मिन् कर्मणि सौकर्यमात्रप्रयोजनायेति स्मर्त्तव्यं सुधीभिः।

अत्र सैद्धे दर्शनशास्त्रे शक्तिपातस्य दीक्षाविधेश्च सुमहत् प्रधान्यम्। स एव हि जनो मुक्तिमार्गगामी सञ्जायते यदुपरि शिवः शक्तिपातमनुतिष्ठेत्। असौ शक्तिपातोऽपि बहुविधः। तत एव साधका अप्यनेकस्तरकसाफल्यभाजो भवन्ति। प्रथमं तावत् शक्तिपातस्त्रिप्रकारः, स च तीव्रो वा मध्यो वा मन्दो वेति। तेष्वपि पुनः तीव्रमध्यमन्दत्व-भेदेन प्रत्येकं त्रिप्रकारता। इति मुख्यमिदं शक्तिपातप्रकारविश्लेषणं नवधा। तत्र तीव्रशक्तिपातभाजोऽत्रैव जन्मनि मुक्तिं लभन्ते, मध्यशक्तिपातेन दिव्यभोगभुक्त्यनन्तरं मुक्ता भवन्ति। मन्दशक्तिपातवतां बुभुक्षा मुमुक्षातस्तीव्रतरा भवति। ततस्ते क्रमेणैवोर्ध्वोर्ध्वं ज्ञानविज्ञानपर्वतारोहणं मन्दमन्दगत्या कुर्वन्तोऽभीष्टान् भोगांश्च भुञ्जाना एव क्रमेण कतिपयजन्मानन्तरमेव परमं पदं प्राप्नुवन्ति। यादृक् सामर्थ्यो यस्मिन् प्राणिनि शक्तिपातस्तादृश्या गत्याऽसौ शिवभावमासादयति। केचित् तीव्रतरशक्तिपातपवित्रीकृताः सद्य एव स्वात्मनः शिवभावं प्रत्यभिजानन्ति सिद्धगुरुदर्शनस्पर्शनादिमात्रत एव। केऽपि तत्कालमेव शिवभावप्रत्यभिज्ञया तदैव देहपातपूर्वकं शिवाभेदतां गच्छन्ति केषामपि तीव्रशक्तिपातवतामन्तरेव योगिनी दीक्षाफलतया प्रातिभं ज्ञानं समुदेति। विनायासं च त एवमेव शिवभावसाक्षात्कारभाजो भवन्ति। केचन पुनर्ज्ञानोपदेशमात्रेण स्वात्मशिवतायाः प्रत्यभिज्ञां लभन्ते। सैषा भवति तेषां ज्ञानदीक्षा। केऽपि शिवशक्तिपातपूताः जना ज्ञानयोग-क्रियाद्यभ्यासं विनैव गुरुकृपामात्रतो मुक्ता भवन्ति। सम्पूर्णज्ञानिनो योगसिद्धाश्च गुरवोऽनुग्रहपूर्वकं शिष्याणां क्रियादीक्षां तथाऽनुतिष्ठन्ति यथा तेषामनन्तजन्मसंगृहीता मला अन्तरेव दग्धा भवन्ति। परं तैः स्वयं तथा नानुभूयते यावज्जीवम्। जीवनान्ते तेषां स्वात्मप्रत्यभिज्ञा एवमेव समुदेति येन ते शरीरान्तरं न गृह्णन्ति। सामर्थ्यशालिनो गुरवः परलोकगतमपि वा इहैव वा देहान्तरस्थं वा देशान्तरस्थितं वा शिष्यं तस्य गोमय-दर्भाद्याकृतिं निर्माय तस्या एव क्रियादीक्षां तथा सम्पादयन्ति यथा यत्र-तत्र स्थिता अपि ते मोक्षमार्गेऽग्रेसरतां लभन्ते। भोगवासनावतां शिष्याणां कृते गुरवो योजनिकाख्यां क्रियामनुतिष्ठन्ति। तत् फलतया

च ते कमपि कालं तत्र-तत्र लोकेषु निवसन्ति दिव्यदेहधारणपूर्वकम्, तत्रत्यांश्च भोगान् भुक्त्वा स्वात्मप्रत्यभिज्ञां प्रत्यग्रेसरा भवन्ति। शक्तिपातं कुर्वन् परमेश्वरो न सततं तत्पर एव भवति बहुधा। प्रायः कदाचिच्छक्तिपातं विदधाति। तेन साधको योगादौ प्रवर्तते। परं कदाचित् प्राणिषु तिरोधानमपि करोति। येन तेषामज्ञानमेव वर्धते। कदाचित् पुनः कस्याप्युपरि शक्तिपातं विधाय मध्ये तमेव साधकं प्रति निग्रहपरोऽपि मनाग् भवति। तेनासौ शिष्यो गुरुं शास्त्रं च निन्दति। बहुधा परमेश्वरो वैविध्येन निग्रहानुग्रहौ क्रमशश्चालयन्नपि भक्तजनैः साकं विविधतया क्रीडापरो भवति। एवंविधेन वैचित्र्येणैव जगत्यत्र बहुविधवैविध्यमयी निग्रहानुग्रहलीलैषा शिवस्य सञ्चलन्ती जगत्यत्र चमत्कारमयतामादधाति। अन्यथा वैचित्र्याभावेनेदं जगन्नाट्यलीलात्मकतामापद्येत। विविधपात्रगतनिजनिजविशेषताकृतेन वैचित्र्येण विना नाट्यकला न मनागपि रुचिकरा भवति। एषा च जगती विश्वनाट्यसूत्रधारस्य परमेश्वरस्य शिवस्य कला कथं वैविध्योपाहितचमत्कारहीनाऽभविष्यत्। उक्तमत एवाचार्यामृतवाग्भवै :—

"सभ्यो नटो विभावादिभावाः रङ्गः स्वयं भवन्।
स्वचरित्रानुकारेण स्वमेव रसते रसम्।।" इति।

(वि० शा०,१३)

प्रत्यभिज्ञातस्वात्मपरमेश्वरभावः साधकस्तावत्कालमत्र जगति जीवितस्तिष्ठति यावत् तस्य प्रारब्धं कर्मजातं फलभोगेन क्षीणं न भवेत्। तावत् कालमसौ प्रारब्धकर्मानुसारं सुखदुःखादिभोगान् भुञ्जानोऽपि न तत्कारणाद् व्यामोहमुपगच्छति। ज्ञातेन्द्रजालसतत्त्वो विद्वान् यथा पश्यन्नपीन्द्रजालं न व्यामुह्यति तथैव प्रत्यभिज्ञातस्वस्वरूपो योगी। सैषा तस्य जीवन्मुक्तिसमाख्या स्थितिः। जीवन्मुक्तानां मध्ये शिवसमावेशाभ्यासपरो योगी देहे तिष्ठन्नपि पारमेश्वरीं लीलां सृष्टिसंहारादिमयीं स्वयमपि मनाक् कर्तुं सामर्थ्यं लभते। सैषा तस्य सैव वर्या जीवन्मुक्तिः। क्षीणे प्रारब्धे, पतिते च स्थूलदेहे कश्चन योगी सूक्ष्मं लिङ्गदेहमपि परित्यजँस्तत्कालमेव शिवभावमासादयन् शिवेनैक्यमाप्नोति। कश्चित् पुनर्भोगवासनायामवशिष्टायां सत्यां क्वाप्युत्कृष्टे भुवने तत्रत्यान् दिव्यान् भोगान् भुक्त्वैव शिवैक्यमापद्यते। कश्चित्तु प्रपञ्चेऽत्र कमपि दिव्यमधिकारं लब्ध्वा क्वापि दिव्ये भुवने प्रशासकत्वमवाप्य सुचिरं तिष्ठति। तदन्ते पुनरत्रत्यस्यैव गुरोरनुग्रहेण शिवभावासादनं प्रत्यग्रेसरति। कोऽपि तत्रत्येन भुवनाधिपतिना पुनर्दीक्ष्यते मोक्षमार्गं प्रति च प्रेर्यते। कश्चन मन्दमन्दशक्तिपातवान् जनः योगभ्रष्टो भूत्वा दिव्यभोगाँश्च भुक्त्वा पुनरत्रैव लोके जन्म लभते। पुनश्च दीक्षामवाप्य योगमभ्यस्य मुक्तिमार्गपथिकतां स्वीकृत्य योगाद्यभ्यासेन शिवभावमापद्यते। शिष्याणां योगसिद्धेर्बाह्यलक्षणान्यपि परीक्ष्यन्ते कैश्चन गुरुभिः। ततश्च यथा-यथां ते प्रगतिमार्गपथिकतां प्रति प्रेर्यन्ते। मृतशरीरस्यापि दीक्षा विधीयते स्म। कदाचिच्छिवयोगिभिः। इत्येवम्प्रकारकमतीव रुचिकरमाश्चर्यकरं च विधिजातं तन्त्रालोके निबद्धं वर्तते।

कश्मीरशैवदर्शनस्य मते स्वस्वरूपप्रत्यभिज्ञाऽनेकैरुपायैर्लब्धुं शक्यते। परं तेषूपायेषु सर्वोत्तमस्तावत् त्रिकाचाराख्य उपायः। तत्र त्रिकाचारेऽपि बहुप्रकारा उपायभेदा उपदिष्टाः। तेषां मध्ये यः साधको येनैवोपायेन प्रत्यभिज्ञां सुखपूर्वकं लब्धुं समर्थस्तस्यैव तस्यैवोपायस्य दीक्षा दीयते गुरुणा। उक्तमेतद्विषये आगमवाक्येन :—

"चित्तभेदान्मनुष्याणां शास्त्रभेदो वरानने।
व्याधिभेदाद् यथा भेदो भेषजानां महौजसाम्।।
यथैकं भेषजं ज्ञात्वा न सर्वत्र भिषज्यति।
तथैकं हेतुमालम्ब्य न सर्वत्र गुरुर्भवेत्।।" इति।।

उद्ध० :— (तं० आ० वि०, खं० ३, पृ० ५५)

यथोक्तं प्राक् दीक्षा, क्रिया, योगो, भक्तिरित्यादीन्यङ्गानि त्रिकसाधनाक्रमस्य। तेषु योगरूपमेव साधनाङ्ग

विशेषतयाऽभ्यस्यते शैवेः। सिद्धान्तशैवेः वीरशैवैश्च योगः पातञ्जल एव स्वीकृतः। परं कश्मीरशैवदृष्ट्याऽसौ पातञ्जलो योगः सुषुप्तिपदवीं यावदेव नेतुमलं, न तुर्यदर्शनं प्रदातुम्। निर्बीजोऽपि यः समाधिरसौ सुषुप्तेरेव प्रकारविशेषः, न तुर्यदर्शनात्मकः। पाशुपतानां योगोऽपि क्रियायोग एव, ज्ञानयोगोऽपि वा क्वचित्। किञ्च श्मशानवासाद्यमङ्गलात्मकक्रियाबहुलोऽसौ योगो न कश्मीरेषु कदापि लोकप्रियतामुपयातः। काश्मीरशैवाः प्रायः त्रिकाचारीययोगक्रमानुसारिणः। केचनोत्कृष्टोत्कृष्टतराः साधकाः कौलिकीमपि साधनामभ्यस्यन्ति स्म त्वरितफलप्राप्तये। परं नासौ साधारणेभ्यः साधकेभ्य उपयोगिनी, यतो जितेन्द्रिया एव साधकास्तदधिकारिणः। ततस्त्रिकयोग एव सर्वसाधारणः कश्मीरशैवसाधनाक्रमः। तस्मिन् योगे यमनियमाद्या नावश्यकाः। न हि ते साक्षात्प्रत्यभिज्ञोपायाः। किञ्च बलात्कारेण मनसो दमने, इन्द्रियशोषणे च कृते सति बहुधैतेषु करणेष्ववाञ्छनीयाः प्रतिक्रियाः सम्भवन्ति, ताश्च विपरीताः प्रतिक्रियाः साधकमधः पातयन्ति। सत्यां भोगवासनायां न यमाद्याः हिताः। उक्तं ह्याचार्याभिनवगुप्तपादैः—

“अनादरविरक्त्यैव गलन्तीन्द्रियवृत्तयः। यावत्तु विनियम्यन्ते तावत्तावद्विकुर्वते।”

(भा० वि० वा०, २,११२)

“स्वं पन्थानं हयस्येव मनसो ये निरुन्धते। तेषां तत्खण्डनायोगात् धावत्युत्पथकोटिभिः।।”

(तदेव, २,१०६-११०)

तत एव त्रिकयोगस्य भुक्तिमुक्ती उभे फले इति शैवदर्शनसिद्धान्तः। भुक्तिमार्गे प्रसरन्नपि शिवभक्तः क्रमेणोत्कृष्टतरयोगप्रक्रियाधिकारमाप्नुवन् शिवानुग्रहात् कदाचिन्मुक्त्येकपरायणो भवत्येव। ततः शिवस्यानुग्रहेण लब्धा भुक्तयोऽपि पर्यन्ते मुक्तिलाभं प्रत्येव नयन्ति योगिनम्। उक्तं चैतद् भगवद्गीतास्वपि भगवद् दुर्वाससः शिष्येण श्री कृष्णेन गुरुणा :—

द्र० :- (भ० गी०, ६-४० ४५)

त्रिकयोगस्य मुख्यास्तिस्रो भूमिका :— (१) सर्वोत्कृष्टो योगक्रमः शाम्भवः। असौ निर्विकल्पस्वस्वरूपसाक्षात्काराभ्यासः। मनसो विकल्पन क्रियास्पन्द रहितायां स्थितौ स्वात्मा स्वेनैव प्रकाशेन प्रकाशमानः सन् स्वयं स्वात्मानं साक्षात्करोति। परमत्रैतदवश्यमवधेयम्, चेत्तत्र साक्षात्कारे स्वात्मनः परमेश्वरतायाः प्रकाशो विमर्शश्च न भवेत्तर्हि नासौ शाम्भवोपायः, अपितु पातञ्जलयोगस्य निर्बीजसमाध्यवस्था वा, बौद्धानां जैनयोगो वा, वर्तमानकालिकानां गुरुत्वेन प्रथितानां प्रचारकाणां भावातीतं ध्यानं वा भवति। शाम्भवेन योगेन विश्वभावपूर्णस्यानवछिन्नस्य, पारमैश्वर्यशक्तिघनस्य, विश्वबीजस्य, विश्वबृंहकस्य (विश्वविकासस्य) असीमस्य—शुद्धसंविन्मात्रस्वरूपस्यात्मनः, साक्षादनुभवो जायते। साधकः केवलं स्वस्या इच्छाशक्तेः प्रबलेन प्रयोगेण शुद्धे स्वे चिन्मये स्वरूपे स्थितिं लभते, न किमपि करोति न वा जानाति विहाय स्वात्मानम्। स एषः शाम्भवोपायो यदा परिपक्वो भवति तदा विनापीच्छाशक्तिप्रयोगं तथा भवति। सैषा शाम्भवोपायस्य परिपक्वावस्थैवानन्दयोग इत्युच्यते। अस्या एव ह्यनुपाययोग इत्यप्याख्या। शाम्भवस्य मातृकाख्यः प्रकारस्तन्त्रालोकादौ सविस्तरं प्रतिपादितोऽस्ति, मालिन्याख्यश्च परात्रीशिकाविवरणे। अपरेऽपि प्रकाराः विज्ञानभैरवादावुपदिष्टाः।

वास्तविकस्य सत्यस्य तत्त्वस्य यः सततगत्या पुनः पुनर्विमर्शनस्याभ्यासोऽसौ शाक्तोपायः। तस्यापि भेदप्रभेदास्तन्त्रालोके वा तन्त्रसारे वा, अन्येष्वपि वा, ग्रन्थेषु तत्र-तत्र सङ्केतिताः सन्ति। स्वात्ममात्रावलम्बनः सविकल्पज्ञानाभ्यासोऽयं शाक्तयोगः। भावनायोग इत्यप्यस्य संज्ञा। कालीनयाख्यो योगः क्रमनयापरपर्यायो हि शाक्तोपायस्यैव प्रकारविशेषो, न ततः पृथक् कोऽप्यन्यः उपायः। अस्य सविस्तरं प्रतिपादनं तन्त्रालोकस्य तृतीयस्याह्निकस्य मध्ये कृतमस्ति। आणवोपायस्तृतीयः। असौ हि प्रमेयालम्बनः सत्यस्य तत्त्वस्य भावनायाः अभ्यासः। स च ध्यानोच्चारादिरूपस्तन्त्रालोकस्य तृतीये एवाह्निके प्रतिपादितोऽस्ति विस्तरतः। तदधश्च याग-जप-पूजादीनां स्थितिः। एतेषां सर्वेषामपि योगप्रकाराणां स्वरूपमत्र कोषे तत्र-तत्राकारादिक्रमेण दत्तं सत् सुधीभिर्द्रष्टव्यम्। पातञ्जलो

योगस्तावच्चित्तवृत्तिनिरोधात्मकः। अयं त्रिकयोगस्तु जीवशिवाभेदभावात्मकः। पातञ्जलस्य योगशब्दस्य व्युत्पत्तिर्युज् समाधौ इत्यस्माद् धातोरस्य पुनस्त्रिकयोगस्य पदव्युत्पत्तिर्युजिर् योगे इत्यस्मात्।

पातञ्जलयोगविद्या श्रमणोचिता त्रिकविद्या पुनः समस्तजनतोचिता। श्रमणा, ब्रह्मचारिणो, गृहस्थाश्च सर्वेऽप्यत्राधिकारिणः। अस्य दर्शनस्य प्रधानगुरूणां मध्ये भट्टकल्लटः, सोमानन्दः तथा उत्पलदेवः इत्येते सर्वेऽपि गृहमेधिनोऽभूवन्। अभिनवगुप्तो दारपुत्रादिसम्बन्धरहितः सन्नपि न श्रमणो, न चापि विरक्तः सन्यासी। असौ यावज्जीवं स्वगृहे एव स्वसम्बन्धिभिः सह निवासमकरोत्। अन्येषु सम्प्रदायेषु साधकाः विशेषं चिह्नजातं धारयन्ति। शैवसाधकाः साधारणजनवद्विचरन्ति। साधकत्वविशेषचिह्नरूपस्य लिङ्गस्य धारणमत्र निषिद्धम्। केवलं साधारणजनवत् त्रिपुण्ड्ररुद्राक्ष-यज्ञोपवीतादिधारणं शैवैः क्रियते स्म। अन्येषु साधनामार्गेषु साधकाः स्वकीयं साधकत्वं बाह्यचिह्नैः ख्यापयन्ति शैवसाधकाः स्वकीयं साधकत्वं गोपयन्ति। उक्तं हि यथा :—

“अन्तः कौलो बहिः शैवो लोकाचारे च वैदिकः।
सारमादाय तिष्ठेत नारिकेलफलं यथा।।”

(तं० आ० वि०, खं० ३,पृ० २७८)

यद्यप्यस्य शास्त्रस्य गुरवः साधकाश्च सर्वेषु कालेषु सर्वस्मिन्नपि भारतवर्षे यत्र-तत्र प्रकटीभूताः, तथापि कश्मीरमण्डल एवास्य वाङ्मयस्य सुमहान् विकासो यतो जातः, यतश्चाद्यावध्यस्य परम्परा कश्मीरेष्वेव जीवति, तत एव वर्तमाने युगेऽस्य त्र्यम्बकमठिकापरम्परागतस्य पराद्वैतशैवदर्शनस्य लोकप्रथितमभिधानं कश्मीर-शैव-दर्शनमिति ख्यातम् । अद्य यावत् कश्मीरब्राह्मणैरैतिहासिकासु महतीष्वापत्स्वप्यस्य शास्त्रस्य पठन-पाठनाभ्यसनव्याख्यानादिपरम्पराः महता यत्नेन रक्षिताः। पञ्चदशे शतके तेषां सर्वस्वं विनष्टम्। प्राणरक्षार्थं धर्मरक्षार्थं च तैर्देशत्यागोऽपि कृतः सर्वस्वं विहाय, परं शैवशास्त्रादिग्रन्थरत्नानां सुरक्षा, तदध्ययनपरम्परायाश्चापि सुरक्षा तैस्तथाकृता यथाऽद्य यावद्विज्ञानधनमेतत् सुरक्षितमेव वर्तते सत्स्वपि यत्र-तत्र ग्रन्थरत्नदाहेषु सिकन्दराख्यस्य मूर्तिभञ्जकस्य मौसुलमतावलम्बिनः शासकस्य शासने। अग्रे अस्या विद्यायाः प्रसारः कुत्र कथं च भवितेति शिव एव साधु जानाति।

शिवमस्तु।

बलजिन्नाथ पण्डितः
शास्त्री, एम०ए०, पी-एच० डी०,
राष्ट्रपतिसम्मानितो विद्वान्।

जम्मूपुरी - ११-९-१९९६

INTRODUCTION

History of the development of philosophy goes back to the beginning of the growth of human civilization. Even the earliest civilized human societies had started to find out some correct answers to some philosophical quarries regarding man and his universe. Questions that arose on such topics in the minds of some early thinkers were like this : --------"Who am I? What am I? What is the real and final aim of my life? How is such aim to be attained? Why this birth, death and consequent misery? How can it be ended? How has the phenomenon come into existence? Who creates , manages and governs it? Out of what substance has it been created"? Such quarries have been compiled, briefly, by Śaṅkarācārya in his *Aparokṣānubhūti* (*A.An.*12). Thinkers in the West, having been urged by love for humanity, proceeded to solve such problems about man and his universe by the means of deep mental pondering, aided by refined wisdom and sharp intelligence and conducted through rational reasoning and logical argumentation. Such developments happened in India also, but our ancient thinkers and original teachers of such subjects depended much more on direct intuitional revelations of the truth regarding such problems and used the above mentioned mental faculties just as aids to form clear conceptions about the truth and to express such impressions to others. All their such mental and vocal activities proceeded in accordance with their intuitional experiences of the truth, attained by them through some practices in Yoga. While proceeding on the paths of their mental and vocal faculties, they did not, generally, deviate from the truth as revealed to them, directly, during the practice of Yoga. But there remained certain questions with regard to the phenomenal existence, which did not at all become clear during several types of the *Samādhiyoga*, because such yogic revelation, transcending the field of all phenomenal manifestations, does not reveal anything about any phenomenal entity. It reveals only the actual character of an individual pure consciousness, shining an individual being. Most of the ancient Indian thinkers tried to solve such philosophical riddles by means of rational imagination, aided by some scriptural statements, drawn from *Vedas* and *Upaniṣads*. But the higher importance given to Yogic revelations did not come down by any degree in their such mental and vocal efforts in the field of philosophy.

Philosophy is known in India as *Darśana*. *Darśana* means a direct revelation, a direct experience, an independent enlightenment, not depending on any mental faculty of thinking, understanding and reasoning etc. Such instrumental aids of knowledge do not find any place between the discoverer of the truth and the truth discovered by him. *Darśana* is a direct revelation or enlightenment. It is an intuitional experience of the self by the self. No prominent logical element of philosophical thinking did, thus, find any important place in the process of *Darśana* in ancient India. As said above, such elements were used only in the process of expression and such expressions drew authority from scriptures. Such *Darśana* of India was practised and realized by long lines of *Aupaniṣadic* teachers and their disciples for several millennia of years. The practitioners of *Darśana* did not bother to conduct logical discussions or debates. They had, instead, some frank discussions based on direct realization of the truth. The logical aspect of philosophy was later given a forceful start by Gautama Buddha, some time during the middle of the third millennium of the age of *Kaliyuga*. He is said to have advised his listeners not to believe in the correctness of his sermons, so long as they were not logically convinced. Logical thinking did thus replace the ardent faith and the place of adherent practice was usurped by logical discussions and debates. Such turn in the development of the *Darśana-Vidyā* of India got a very strong philip from the powerful royal patronage of great emperors like Aśoka and Kaniṣka, as well as from a strong support of later powerful kings like Harṣha. Such process of a radical change in the growth and development of Indian thought had a strong influence on the traditions of the ancient Indian *Darśana*, proceeding on the basis of *Upaniṣads* and *Āgamas*. Some of such, mutually, conflicting trends in the growth of Indian *Darśana* gave rise to the development of six Vedic schools of thought, four main schools of each Vaiṣṇavism and Śaivism, four important schools of Buddhism and several schools of Jainism in India and *Darśana* came, thus, very close to philosophy, and the two names started later to be used as *synonymous*. There were such saints in Europe as well, who proceeded on the path of the direct realization of the truth through ardent worship and constant meditation. But they did neither get any royal patronage nor any intelligent and ardently devoted admirers. Their teachings did not, therefore, spread among scholars in general. Thus such teachings of the saints in the west did not develop as any schools of *philosophy*. These are even now counted in Europe among *mysticism*, which is often placed there outside the field of philosophy.

But, inspite of such upheaval in the field of the development of Indian philosophy and its growth ahead, the basic masters of most of such schools of thought did not lose their faith in, or adherence to, the practice of Yoga, yielding an intuitional realization of the philosophical truth. They continued still to have face to face realization of the truth about man and his phenomenon by the means of practice in Yoga, though, in course of time, such actual-practitioners of Yoga were reduced to a *negligible* minority and the field of philosophy came into the hands of dry logicians, well-versed in discussions and debates, aimed, mostly, at gaining royal patronage in the courts of some big states in India. But it remained yet a fact that some ardent Yogins were still taken as the masters of different schools of thought. Thus, the ancient masters of *Nyāya-Vaiśeṣika* were practical Yogins, practising the *Pāśupata* system of Yoga. *Sāṁkhya-Yoga* philosophers practiced the Yoga system of Kapila, an ancient sage of India. Different schools of Vaiṣṇavism patronized the practice of the Yoga taught in *Pāñcarātra-Āgamas*. Schools of Śaivism in the south used to propagate the practice of Yoga as taught in Śaiva Āgamas. That was the position in ancient ages. In the medeval times, the writers of works on Nyāya, having forgotten the practice of such *Āgamic* Yoga; took refuge in the Yoga of Patañjali. The great Śankarācārya and his grand preceptor, Gauḍapāda were prominent Yogins practising the Tāntric Yoga of *Śrīvidyā*. Vijñānavāda, the most prominent sect of Buddhism, is still known as *Yogācāra* on account of its special adherence to the practice of Yoga, for the purpose of having a direct realization of the truth. During the long process of such academic development, the *Darśana* of India, though coming, sufficiently, close to the subject known as 'philosophy' in the west, did not, totally, lose its basic *Darśana* character, consisting of direct intuitional realization and revelation. But alas ! it is now losing such character just on account of too much importance having been given to fake thesis, prepared by young and inexperienced scholars, for the purpose of mere material gains, under the administration of India by public leaders having, actually no, interest in the ancient cultural heritage of India.

A question arises here as to why is there so much mutual difference in the basic philosophical principles and doctrines of the different schools of thought in India, when all of them are, basically, derived from the intuitional realization of the truth, revealed by the means of Yoga. The answer to such objection lies in the differences in Yogic discoveries regarding the character of life as it functions in different states and sub-states, of animation as well as in the different higher and lower varieties of Yoga through which such character of life is, directly, realized. The character of the self and the phenomenal existence, as discovered by the Yogins of India through their intuitional insight, can be classified into four main types of waking, dreaming, sleeping and the revelationally one. The waking existence, called *Jāgrat-Sattā*, is gross in its character. Beings residing in it conduct their functions through their gross forms. This world of ours is one of its typical examples. Such existence is known in Indian philosophy as the waking existence. The finer existence of gods, semi-gods, ghosts and fore-fathers, etc. is the subtle existence, termed as the dreaming existence or *Svapna-Sattā*. Beings in such existence work through their subtle mental bodies, consisting of mind, intellect, ego, senses and organs, all in their subtle forms. They function, nearly, in the same manner in which we, the waking beings, do in our dreams. The still finer existence is the sleeping one, called *Suṣupti*, the dreamless sleep. Enlightened beings, having realized themselves to be such pure individual I-consciousness, that transcends even mind and all mental apparatus; but not having had the realization of their divine potency, belong to such existence. They do not have any miseries of the, worldly, life, do not at all indulge in any mental or physical activities, relax, constantly, on perfect tranquillity, and rest, motionlessly, like the pure space. Theirs is an elevated existence, an existence of partial liberation. The fourth type of existence is that of such liberated beings, who have had a direct realization of the, exactly, real, self, along with its divine character. They relax, joyfully, while enjoying the tastes of their purity, infinity and the bounties of divine potency. Such beings consist of, only, the pure and divinely, potent I-consciousness, which should not, however, be confused with ego. They relish, blissfully, the sweet awareness of their divine potency. Such existence is known as *Turyā*, the fourth type of existence. It is, in fact, an existence of *yogins* to whom the correct nature of the self is already revealed.

The animation of ordinary beings, like we people of this world, does also move up and down, through all these four varieties and our functioning in them is known as the four states named *Jāgrat*, the waking one, *Svapna*, the dreaming one, *Suṣupti*, the sleeping one and *Turyā*, the fourth one of self-revelation. The waking state of animation is not of any special interest from our philosophical view-point. A type of *Yogasamādhi*, focussed towards the dreaming state of animation, revealed to our ancient religious teachers, the nature of such subtle existence of heavens, hells, etc., as well as the religious paths that can lead an aspirant to heaven and can save him from falling into hell. Such teachers of India developed the *Mīmāṁsā* philosophy. Many other religions of the world do also have philosophies and religious doctrines believed to be leading to heavenly, existence of various types.

Most of the, highly, prominent schools of Indian philosophy are, generally, based on the revelations of the sleeping state of animation, known as *Suṣupti.* It was attained by our ancient sages by the means of yoga practices, focussed against the nature of the self, as it exists and shines in the sleeping state. It is not, however, necessary that each and every such Yogin should have one and the same type of such revelation, because it varies in accordance with :— (i) the nature of the concerned types of sleeping existence, (ii) various standards in the merits of different Yoga practices and (iii) the variety in the intellectual and vocal capacities of different Yogins. It is on such account that our ancient Yogins gave start to different schools of philosophy, agreeing on some points and disagreeing on others. Yogins having the realization of the truth, as it shines in the fourth state of animation, named *Turyā,* the state of spontaneous revelation of the real nature of the self, did not appear in India in such a big number as did those who rested in the sleeping existence. Then there are several types of the *Turyā* as well. Therefore,, the Yogins of such higher standard do also differ in some of their special philosophical principles and practical doctrines of theology. An outline of such varieties of Indian philosophy is given here, so that a reader develops in his mind a correct notion about the comparative merits of Kashmir *Śaivism,* the philosophy of life, shining at the highest step of *Turyā,* the position of a charming intuitional revelation of the purest nature of the self, as well as that of the, exactly, real nature of all phenomena.

The revelation of the truth, as it shines at the initial step of *Suṣupti,* the sleeping state of animation, was attained by some Vedic practitioners of *Pāśupata-Yoga* and they developed the philosophy of Nyāya-Vaiśeṣika. They discovered the finest aspect of the self as being the pure individual consciousness, having no *propensity* towards any activities of, whatsoever, character, though possessing the capabilities to know, to do, to like, to dislike and so on. An individual being, having realized such pure character of his self, attains freedom from all kinds of misery and *turbulence* and lies in an eternal peace and absolute *tranquillity,* just like the pure space. His consciousness does not yield any fruit other than such undisturbed and eternal *tranquillity.* Such position of a being, having been named as *Apavarga,* was proclaimed by *Nyāya-Vaiśesika* Yogins as the final goal of life. It is, in fact, the picture of the self, as it shines at the initial step of sleeping animation and, as it was revealed to logicians by a successful practice in the Yoga system of *Pāśupatas.* Some other *Pāśupatas,* who were not ardent logicians, and who worshipped *Paśupati* Śiva in the manner of Nāṅga monks, living in cremation-grounds, discovered the nature of the self as it shines at the initial step of *Turyā.* Their position shall be clarified ahead.

The *Nyāya-Vaiśeṣikas* did not discover the real essence of the phenomenal existence in their *Yoga-Samādhi.* Therefore, taking help from some Vedic scriptural passages, they built such system of theistic philosophy which propounds the theory of the creation of all phenomena by God, the only *omniscient* and omnipotent supreme authority, out of atoms which have been accepted there as eternally existent components of the whole physical existence. Besides, they accepted the eternal existence of several entities like time, space, mind, souls, etc. All creation, preservation and dissolution is, according to their view, worked out, administered and conducted by God in accordance with the divine law of 'karman', which cannot be ignored even by that supreme authority. All such principles of their philosophy, regarding the phenomenon and its creation, etc. were established by the teachers of Nyāya-Vaiśeṣika through their intellectual calculations, aided by scriptural passages and their fine wisdom. Inference, worked out on the basis of experience, and scriptural authority, was, mostly, resorted to by them in proving the correctness of their principles. So far as their *Yoga-Samādhi* is concerned, it did not provide them with any solution about the problems regarding the phenomenon, because that did not at all appear in such *Samādhi,* which is a finer variety of *Suṣupti,* the state of simple animation that does not at all allow any objective manifestation.

The teachers of the Sānkhya-Yoga system reached a step deeper into the sleeping animation and, discovering the self as free from all turbulence, caused by mind, intellect, ego and all the senses, found all mental activities as the functions of non-self, attached somehow to the self. Using their finer wisdom and finding some support in some scriptural passages of *Upaniṣads,* they built the theory of transformation of *Mūlaprakṛti,* the root substance, known as *Pradhānatattva,* the principal substance as well. Such *Tattva* is, precisely, the same substance as the cosmic energy of the modern physics. Such teachers of philosophy declared that the root substance, undergoing, outwardly, a series of transformations, appears, gradually, in the forms of intellect, ego, mind, senses, organs, subtle and gross objective elements and all these combine into the emergence of the whole universe, consisting of multitudes of subjects, objects and instrumental elements. Thus, they discoverd the source of atoms and many other eternal elements of the Nyāya-Vaiśeṣika in the cosmic energy. Having immense adherence to the Yoga system, taught by the ancient sage Kapila, they prescribed the practice of Yoga, discussed later in the *Yoga-Sūtra* of Patañjali, as the means to realize the fact that the self of a being is, in fact, absolutely, tranquil, having no turbulence of knowing, doing, desiring, etc. and also to see all such turbulence as a wonderfully complex transformation of *Prakṛti,* so much so, that one should, actually, feel that he does not have any real relation with any mental or physical transformation of *Prakṛti.* Having developed such discriminative knowledge in them, they become free from all the transformations of *Prakṛti* and, consequently, do not take up any other physical body after their death. *Prakṛti* has no personal motive in clinging to, wordly, beings in the form of their mental and physical form. The, only, two motives behind such activities of *Prakṛti* are :- (1) fructification of the past actions of ignorant beings and (2) development of the above mentioned discriminatory knowledge in them. As *Prakṛti* does not see any motive in clinging on to the person of a being who has earned such discriminative knowledge, she leaves him all alone, withdrawing all senses, organs and mental apparatus from him. Consequently, such a being does not take up any other body and becomes free from the cycles of births and deaths. Lying, absolutely, alone, he stays eternally, in such position of loneliness, the *Kaivalya* of the *Sānkhya-Yoga* systems and that has been said to be the final aim of life. Seeing all the phenomenal changes as different modifications of *Prakṛti,* and finding them as happening, spontaneously, on account of the basic nature of such basic element, the teachers of Sānkhya philosophy did not bother about God and His Godhead. Patañjali, the author of *Yogasūtra,* accepts *Īśvara* as an eternally, liberated, being, having been the preceptor of all the ancient Yogins like Kapila and having the correct knowledge of every thing in the universe. *Īśvara* has not been, thus, accepted as the Almighty God, the master ruler of the whole universe even in the *Yogasūtra,* though meditation on Him has been accepted as helpful in attaining perfection in Yoga and in calming down obstacles in its practice.

The *Vijñānavādin* and the *Śūnyavādin* thinkers in the tradition of Buddhist thinking, putting their sharp intelligence into action, while taking into consideration, the nature of the self at a still finer position in the sleeping state of animation, realized a continued flux of momentary I-consciousness (Alaya-Vijñāna) as the element taken, generally, and wrongly, as the *Ātman* or a soul of a being. They termed it as *Vijñānam*, that is, a momentary mental consciousness. Comparing the phenomenal existence, along with all its functions, with the mere apparent objective existence of the dream world, they worked out the two principles of :- (i) non-existence of all objective entities outside the field of consciousness and (2) the false appearance of their individual self shining as 'I', caused by some past impressions, lying in the flux of *Vijñāna,* the flow of mental consciousness (not the pure consciousness). Besides, they discovered the annihilation of all the past impressions and the consequent stirless flow of simple and motionless momentary mental consciousness as the final goal of life. The Śunyavādin Buddhists, going still deeper in the dreamlessly, sleeping animation, discovered the final attainable position as the perfect extinction of the flow of the light of I-consciousness. Both, such positions are known in Buddhism as Nirvāṇa, meaning, extinction of the flow of the momentary mental I-consciousness, talked about as Ātman. In the view of a Śivayogin, that is the picture of the truth as it shines at the finest step of sleeping animation. It is the state of perfect sleep, devoid of even the active impressions of the dreaming and waking states. All the entities, appearing in the mental and physical existence, were taken by such Buddhist thinkers as some non-existent and, merely, apparent phenomena, just like those appearing in our dreams.

Most of the Yogins in the tradition of *Advaita Vedānta* did also have, nearly, the same type of revelation about the nature of the self and the working of the phenomenal existence. The *Nirodha-Samādhi* of Vedānta did also reveal to practitioners a sort of nihilism and, consequently, they also declared all the physical and mental phenomena to be non-existent, comparing them with the children of barren women. But even then they had a peep into *Turīyā* state, the state of spontaneous revelation of the real nature of the self, shining as the base on which the flux of momentary mental consciousness stands. Therefore, they announced the real nature of the self of a being as consisted of eternal, infinite and pure I-consciousness. They discovered such single and pure consciousness as the real self of each and every being and declared its nature as being consisted of pure existence and infinite consciousness, having blissfulness as its essential character. So far as the phenomenal existence of physical and mental entities is concerned, they declared it as appearing, merely, on the basis of the ignorance of, worldly, beings and compared it with our dream-world. The pure infinite consciousness, termed as *Brahman*, was declared by them to be the, only really, existent truth. They denied the real and separate existence of any beings other than Brahman. Like the Vijñānavādins and the Śūnyavādins, they also found the cause of the appearance of all physical and mental phenomena in the basic ignorance of worldly beings. Since no physical or mental entity enjoys any real existence, they did not accept the authority of any real master as its ruling administrator. Therefore, they denied the real existence of God, soul and the universe, though for the purpose of the attainment of success in the practice of Yoga, leading to *Nirodha-Samādhi,* they advised to conduct worship of God, just as an aid to such Yoga and also as a mean to get, worldly and heavenly, pleasures, which are, generally, desired only, by ignorant beings. The individual existence of all, worldly and heavenly, beings was declared by them as, simply, appearing on account of our basic ignorance. Once a being sheds off his such ignorance, he feels that he is none other than Brahman, the only existent reality. As soon as such a being sheds off his physical form, at the time of death, his individuality gets at once dissolved and he starts to shine as Brahman alone. That is the ***Brahma-Nirvāṇa*** or ***Mukti***, which is announced by Vedāntins as the final goal of life. Such Advaita Vedāntins explained the theistic teachings of Upaniṣads as the lower Vedānta, meant for a lower category of aspirants and accepted their purely, absolutist teachings as the higher Vedānta, meant for, highly, meritorious aspirants. It was on account of such leanings of the Advaitins towards the nihilistic views of the Buddhist thinkers, that some Vaiṣṇava philosophers called them *"Pracchanna-Bauddhas"* or crypto Buddhists. Abhinavagupta takes such *Brahmavāda* as a theory coming very close to *Śūnyavāda*.

All the above mentioned schools of thought have accepted the existence and the effect of the past impressions of the beginningless ignorance as the basic cause of the miserable position of all, wordly, beings.

None among the ancient or later teachers of such schools did ever care to devote his intellect and Yogic practice to find any answer to some great philosophical problems like a few given below :— "Where from did the basic ignorance *(Avidyā)* emerge? What could have been the cause of its emergence? Whom could it involve? Could it have involved *Brahman*, the only existent reality"? If so, the absolute purity of *Brahman* is gone. It could have, no doubt, involved an ignorant being, if such a being would have existed at all in addition to Brahman. But such argument would refute the principle of the absolute monistic unity propounded by Vedānta. If *Avidyā*, the basic ignorance, is so powerful as to manifest beings other than *Brahman*, and also to involve them in bondage, it may continue to do so even after the attainment of the revelation of the truth through the practice in *Nirodha-Samādhi*. The principle of the beginninglessness and causelessness of the basic ignorance of beings in bondage is such a locuna, which spoils the merits of all the above mentioned schools of Indian thought, as it amounts, logically, to a sort of escapism. The *Advaita Vedānta* accepts, openly, the inapplicability of *Avidyā*.

Such logical problems of philosophy were solved, satisfactorily, by Śaiva-Śākta scholars of thought and, to some extent, by some schools of Vaiṣṇavism. The teachers of such schools approached the problem, not only, through the faculties of head, but also through those of heart as well. Adding a devotional attitude to Yogic investigation of the truth, they realized absolute theism as the essential character of the basic reality, called by them, respectively, as Śiva or Śakti or Nārāyaṇa. Their practices in devotional Yoga of the Āgamic origin revealed to them the basic nature of the self as it shines at different steps of *Turyā* state, the fourth state of animation, consisting of spontaneous and intuitional revelation of the truth about the self and its environment. Such explorers of the truth, penetrating into the deepest levels of the secrets about the basic truth, found absolute theism as the essential nature of the absolute and the basic reality known in India by many names like *Ātmana-Paramātman*, etc.

Such devotional practitioners of Yoga discovered the origin of all phenomena in the theistic nature of such basic absolute authority, called God. They saw the whole, worldly, process of creations, etc. as the playful manifestation of the divine power and nature of God. Besides, they prescribed such devotional worship and practices in Yoga, which can lead to the exact realization of the basic character of the self as well as that of God, along with His divine powers. Such devotional Yoga can lead aspirants either to a close union with God or to an absolute unity with Him, with the result that they, getting freedom from misery, start to taste the blissfulness of the divine powers of God.

प. त्री.ल. वृ.	परात्रीशिकालघुवृत्तिः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-६८	आ. अभिनवगुप्तः
प. त्री. वि.	परात्रीशिकाविवरणम्	पृष्ठसंख्यया	कश्मीर ग्रन्थावलिः नं.-१५	आ. अभिनवगुप्तः
प. त्री. विवृ.	परात्रीशिकाविवृत्तिः	पृष्ठसंख्यया	कश्मीर ग्रन्थावलिः नं.-६६	लक्ष्मीरामः
प. पं.	पर्यन्तपञ्चाशिका	श्लोकसंख्यया	राघवन् प्रकाशनम् (मद्रास)	आ. अभिनवगुप्तः
प. प्रा.	परा-प्रावेशिका	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-१५	क्षेमराजः
प. म. स्त.	परशम्भुमहिम्नस्तवः	प्रकरणश्लोकसंख्यया	अडयार प्रकाशनम् (मद्रास)	श्री दुर्वासाः
प. सा.	परमार्थसारः	श्लोकसंख्यया	कश्मीरग्रन्थावलिः नं.-७	आ. अभिनवगुप्तः
प. सा. वि.	परमार्थसार विवृत्तिः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-७	योगराजः
पं. प्र.	पञ्चार्थप्रमाणम्	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः (उद्धरणमात्रलभ्यम्)	क्षेमराजः
पं. श.	पञ्चशतिका	....	कश्मीरग्रन्थावलिः (उद्धरणमात्रलभ्या)	क्षेमराजः
पू. प्र.	पूर्णता प्रत्यभिज्ञा	श्लोकसंख्यया	रामेश्वर झा प्रकाशनम्, (वाराणसी)	रामेश्वर झा
प्र. हृ.	प्रत्यभिज्ञाहृदयम्	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-३	क्षेमराजः

बो. पं. द.	बोधपञ्चदशिका	श्लोकसंख्यया	कश्मीरग्रन्थावलिः नं.-१४	आ. अभिनवगुप्तः
भ. गी.	भगवद्गीता	श्लोकसंख्यया	गीता प्रैस, गोरखपुर	आगमः
भ. गी. रा.	भगवद्गीता (रामकण्ठीयटीका)	पृष्ठ संख्यया	कश्मीरग्रन्थावलिः नं.-६४	....
भ. गी. सं.	भगवद्गीतार्थसंग्रहः	पृष्ठसंख्यया	श्री लक्ष्मण जू प्रकाशनम्	आ. अभिनवगुप्तः
भ. गी. स	भगवद्गीता (सर्वतोभद्रटीका)	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-६४	रामकण्ठः
भा.	भावोपहारः	श्लोकसंख्यया	कश्मीरग्रन्थावलिः नं.-१४	चक्रपाणिनाथः
भा. वि.	भावोपहारविवरणम्	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः	रम्यदेवः
भास्क.	भास्करी टीका (ईश्वरप्रत्यभिज्ञायाः)	पृष्ठसंख्यया	डॉ. के. सी. पाण्डेय, प्रकाशनम्	भास्करकण्ठः
भै. स्तो.	भैरवस्तोत्रम्	श्लोकसंख्यया	श्री केशवभट्ट प्रकाशनम्, (श्रीनगर)	आ. अभिनवगुप्तः
म. तं.	मतङ्गतन्त्रम्	श्लोकसंख्यया	उद्धरणमात्रलब्धम्	आगमः
म. न. प्र.	महानयप्रकाशः	श्लोकसंख्यया	कश्मीरग्रन्थावलिः नं.-२१	शितिकण्ठः
म. न. प्र. वि.	महानयप्रकाशया विवृत्तिः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः	शितिकण्ठः
म. मं.	महार्थमञ्जरी	श्लोकसंख्यया	सं. विश्वविद्यालय, (वाराणसी)	महेश्वरानन्दः
म. मं. प.	महार्थमञ्जरी-परिमलः	पृष्ठसंख्यया	सं. विश्वविद्यालय, (वाराणसी)	महेश्वरानन्द
म. श. स्तो.	महानुभवशक्तिस्तवः	श्लोकसंख्यया	श्री पीठं, जम्मू	आ. अमृतवाग्भवः
मं. स्तो.	मन्दाक्रान्तास्तोत्रम्	श्लोकसंख्यया	श्री पीठं, जम्मू	आ. अमृतवाग्भवः
मा. च. वि.	मातृकाचक्रविवेकः	श्लोकसंख्यया	श्री पीठं, जम्मू	स्वतन्त्रानन्दनाथः
मा. वि. तं.	मालिनीविजयोत्तरतन्त्रम्	श्लोकसंख्यया	काश्मीरग्रन्थावलिः नं.-३७	आगमः
मा. वि. वा.	मालिनीविजयवार्तिकम्	श्लोकसंख्यया	कश्मीर ग्रन्थावलिः नं.-३१	आ. अभिनवगुप्तः
यो. हृ. दी.	योगिनीहृदयदीपिका	पृष्ठसंख्यया	सरस्वतीभवन सीरीज़ नं.-७, (वाराणसी)	अमृतानन्दनाथः
रा. त.	राजतरङ्गिणी	श्लोकसंख्यया	....	कल्हणः
रा. भ. गी. टी.	रामकण्ठीया गीता टीका	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-६४	रामकण्ठः
व. रा. वा.	वरदराजीयं शिवसूत्रवार्तिकम्	सूत्रसंख्यया	कश्मीरग्रन्थावलिः नं.-४३	वरदराजः
वा. म.	वामकेश्वरीमतम्	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-४६	जयरथः
वि. कौ.	विज्ञानकौमुदी (विज्ञानभैरव टीका)	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-८	आनन्दराजानकः
वि. पं.	विरूपाक्षपञ्चाशिका	पृष्ठसंख्यया	त्रिवेन्द्रम सं. सीरीज़, अङ्क ९	विरूपाक्षनाथः विद्याधर चक्रवर्ती च
वि. भै.	विज्ञानभैरवः	श्लोकसंख्यया	कश्मीरग्रन्थावलिः नं.-८	आगमः

वि. भै. उ.	विज्ञानभैरवोद्द्योतः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-८	शिवोपाध्यायः
विं. शा	विंशतिकाशास्त्रम्	श्लोकसंख्यया	भरतपुरप्रकाशनम्	आ. अमृतवाग्भवः
शिव. दृ.	शिवदृष्टिः	प्रकरणसूत्र संख्यया	भरतपुरप्रकाशनम् नं.-५४	आ. सोमानन्दः
शि. दृ. वृ.	शिवदृष्टिवृत्तिः	पृष्ठसंख्यया	भरतपुरप्रकाशनम्	आ. उत्पलदेवः
शि. सू. वा. भा.	शिवसूत्रवार्त्तिकम् (भास्करीयम्)	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-४	भट्टभास्करः
शि. सू. वा. व.	शिवसूत्रवार्त्तिकम् (वरदराजीयम्)	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-४३	वरदराजः
शि. सू. वि.	शिवसूत्रविमर्शिनी (द्वि. संस्करणम्)	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-१	क्षेमराजः
शि. सू. वि.वृ.	शिवसूत्रविवृत्तिः	सूत्रसंख्यया	पाण्डुलिपिः	बलजिन्नाथः
शि. स्तो.	शिवस्तोत्रावलिः	श्लोकसंख्यया	चौखम्बा ग्रन्थमाला नं.-१५	उत्पलदेवः
शि. स्तो. वि.	शिवस्तोत्रावलिविवृत्तिः	पृष्ठसंख्यया	चौखम्बा ग्रन्थमाला नं.-१५	क्षेमराजः
शो. प्र.	शोधप्रभा-पत्रिका	पृष्ठसंख्यया	ला. ब. शा. विद्यापीठ, दिल्ली	क्षेमराजः
श्री. कं. सं.	श्रीकण्ठी संहिता	श्लोकसंख्यया	उद्धरणमात्रलभ्या	आगमः
ष. त्रि. त. सं.	षट्त्रिंशतत्त्वसन्दोहः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-१३	अमृतानन्दनाथः
ष. त्रिं. त. सं.वि.	षट्त्रिंशत्तत्त्वसंदोहविवृत्तिः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं. १३	आनन्दराजानकः
स. मं. आ.	सर्वमङ्गलागमः	....	उद्धरणमात्रलभ्यः	आगमः
सि. म. र.	सिद्धमहारहस्यम्	श्लोकसंख्यया	श्रीपीठम्, जम्मू	आ. अमृतवाग्भवः
सि. मा. द.	सिद्धमानवदर्शनम्	श्लोकसंख्यया	ला. ब. शा. विद्यापीठ, दिल्ली	आ. अमृतवाग्भवः
सौ. भा.	सौभाग्य-भास्करः	पृष्ठसंख्यया	निर्णयसागर, मुंबई	भास्कररायः
स्त.. चिं.	स्तवचिन्तामणिः	श्लोकसंख्यया	कश्मीरग्रन्थावलिः नं.-१०	भट्टनारायणः
स्त. चिं. वि.	स्तवचिन्तामणिविवृत्तिः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं. १०	क्षेमराजः
स्पं. का.	स्पन्दकारिका	श्लोकसंख्यया	कश्मीरग्रन्थावलिः नं.-६	भट्टकल्लटः
स्पं. नि.	स्पन्दनिर्णयः	पृष्ठसंख्यया	कश्मीरग्रन्थावलिः नं.-४२	क्षेमराजः

काश्मीरशैवदर्शनबृहत्कोषः

(अ)

अ—— 1. अकारः, मूलभूतो वर्णः, सर्ववर्णवर्गावभासस्य बीजभूमिः। यथा–

"अमूला तत्क्रमाज्ज्ञेया क्षान्ता सृष्टिरुदाहृता।"

(प०त्री० 8)

"अकारादिक्षकारान्ता वर्णसृष्टिर्वर्णक्रमेण अमूला-अकारमूला, अकारसमवायिकारणका.....। अकारस्य सर्ववर्णात्मकत्वं श्रुतिराह–"अकारो वै सर्वा वाक्....इति"। गीतास्वपि– अक्षराणामकारोऽस्मि....."(10, 33) इति।

(प०त्री० विवृ०पृ० 5)

2. अकारव्यङ्ग्यम् अनुत्तरं तत्त्वम्। 3. अकार व्यंग्यः कौलिक्या शक्त्याऽविनाभूतोऽकुलः परमशिवः। यथा–

"अकुलस्यास्य देवस्य कुलप्रथनशालिनी।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः"॥

(तं०आ० 3-67)

4. परमशिवाख्यं सकलतत्त्वव्रातावभासस्य मूलकारणभूतं स्वतन्त्रं तत्त्वव्रातावभासकञ्च बीजभूतं स्रोतः स्थानीयं मूलतत्त्वम्।

द्र० 'अनुत्तरम्' इति।

~दार्शनिकविचारतः —— परमेश्वरस्य विश्वोतीर्णस्यान्तः कृतविश्वस्य स्वात्मनो यः सततोदितः स्वप्रकाशो विमर्शोऽविकल्पकोऽसौ मातृकाक्रमे 'अ' इत्यभिव्यक्तो भवति परमयोगिनां योगजदृशा। अत्र परमेश्वरस्तावदनुन्मीलितां विश्वसिसृक्षामन्तः स्वात्मरूपतयैव विमृशन्अन्तर्घन-परिपूर्ण-संवित्स्वरूपः सन् 'अ' इति विमर्शेनाभिव्यक्तो भवति मातृकोपासनक्रमे परयोगिनाम्। यथा–

"एवं परमेश्वरस्य स्वात्मनीच्छात्मिका स्वातन्त्र्यशक्तिरनुन्मीलित-भावविकासा तथाविधान्तर्घन संवित्स्वभाव-विमर्शसारा 'अ' इत्युच्यते।"

(प०त्री०वि० पृ० 167)

"अकारोऽनुत्तरशक्तिविमर्शात्मा"

(स्व०उद्०प०-4, पृ० 220)

"अनुत्तराकुलस्वरूपादकारात्......."

(प्र०हृ०पृ० 50)

~प्रणवकला—— प्रणवे अकारमात्रा, सा च ब्रह्मेति भाव्यते योगिभिः। यथा–

"अकारो ब्रह्मवाचकः"

(स्व०तं० 4-263)

"निवृत्तिस्तु यदा सर्वं निष्पन्नं प्रणवं विभुः।
अकाराख्यं परं धाम ब्रह्मा स कमलासनः।"

(ने०तं० 21-69-70)

~मातृकाक्रमे—— विश्वोत्तीर्णस्यान्तः कृतविश्वस्य परमेश्वरस्य परस्यानुत्तरस्य तत्त्वस्य स्वात्मनः, स्वस्वभावभूतस्य परमेश्वरत्वस्य च परिपूर्णोऽद्वैतमयो विमर्शः। स च विश्वावभासनसामर्थ्यस्य तथाविधस्वभावस्य चापि सामान्यतो विमर्शो नाकाशकल्पोऽपि त्वैश्वर्यसुनिर्भरः। यथा–

"अनन्यापेक्षिता यास्य विश्वात्मत्वं प्रति प्रभोः।
तां परां प्रतिभां देवीं संगिरन्ते ह्यनुत्तराम्॥"

(तं०आ० 3-66)

ततो न शून्यप्रायतत्त्वात्मकब्रह्मव्यञ्जक इति।

~साधनाव्यवहारे अकारादिक्षकारान्तस्य वर्णसमुदायस्य तन्मूलं यतः सर्वापि वर्णसृष्टिरभिव्यज्यते, यत एव च सर्वा मन्त्रसृष्टिः। यथा–

"अमूला तत्क्रमाज्ज्ञेया क्षान्ता सृष्टिरुदाहृता।
सर्वेषामेव मन्त्राणां विद्यानां च यशस्विनि॥
इयं योनिः समाख्याता सर्वतन्त्रेषु सर्वदा।"

(प०त्री० 89)

अ, इ, उ—— 1. मूलभूतं मातृकात्मकबीजत्रयमक्षुब्धतायामवस्थायां स्थितम्। एतच्च क्रमेण 1- अकारो=अनन्योन्मुखतात्मिकाऽनुत्तरा परा प्रतिभा देवी, 2- इकारः=स्वस्वभाव-प्रत्यवमर्शरूपा इच्छा परमेश्वरस्य, 3- उकारो=ज्ञातव्य विश्वोन्मेषात्मा ज्ञानशक्तिः प्रभोः। यथा–

"अनन्यापेक्षिता यास्य विश्वात्मत्वं प्रति प्रभोः।
तां परां प्रतिभां देवीं संगिरन्ते ह्यनुत्तराम्॥"

(तं०आ० 3-66)

"संघट्टेऽस्मिँश्चिदात्मत्वाद्यत्तत्प्रत्यवमर्शनम्।
इच्छाशक्तिरघोराणां शक्तीनां सा परा प्रभुः॥"

(तदेव 3-71, 72)

"स्वात्मप्रत्यवमर्शो यः प्रागभूदेकवीरकः।
ज्ञातव्यविश्वोन्मेषात्मा ज्ञानशक्तितया स्थितः॥"

(तदेव 3-73, 74)

द्र० 'अ' इति, 'इ' इति, 'उ' इति च पृथक् पृथक्।

"तिस्रः परमेश्वरस्य शक्तयः- 'अनुत्तरेच्छोन्मेष' इति। तदेव परामर्शत्रयम्- अ, इ, उ इति।"

(तं०सा० पृ० 12)

एतच्छक्तित्रयमेव प्रक्षुब्धतायाम् आ, ई, ऊ इति। यथा-

"अतः षण्णां त्रिकं सारं चिदिष्युन्मेषणात्मकम्।
तदेव त्रितयं प्राहुर्भैरवस्य परं महः॥
तत्त्रिकं परमेशस्य पूर्णा शक्तिः प्रगीयते॥

(तं०आ० 3-192, 193)

द्र०(तं०आ० 3-66 तः 78)

अकरणम्—— अष्टविधव्यावहारिकदुष्कर्मणां सम्पादनस्याभावः। समयदीक्षायां पालनीयः समयविशेषः। यथा—

"अफलं-चेष्टितं हिंसा परदाराभिमर्शनम्।
गर्वं दम्भं भूतविषव्याधितन्त्रं नचाचरेत्॥"

(उद्धृ०तं०आ० 15-524, 25)

अकलः—— सर्वथा शुद्धः प्रमाता। कलातत्त्वस्य तदुद्भूतानाञ्च मायीयानां तत्त्वान्तराणां सम्पर्केण रहितः प्रमाता। स्वत एव कलाद्युत्तीर्णो न विज्ञानप्रभावेण नापि प्रलयकारणादकलतां प्राप्तः प्रमाता। स च सर्वथैवाभेदनिष्ठत्वात् शैवशास्त्रेषु 'शिव' इत्येवोक्तो बहुशः। यथा—

(क) शिवादिसकलात्मान्ताः शक्तिमन्तः प्रकीर्तिताः॥ इति

(मा.वि०तं० 2-3)

(ख) त्रिधा मन्त्रेश्वरेशानाः शिवः साक्षान्न भिद्यते॥

(तदेव 2-7)

तत्र शिवाः, मन्त्रमहेशाः, मन्त्रेशाः, मन्त्राः, विज्ञानाकलाः, प्रलयाकलाः, सकला इति सप्त शक्तिमन्तः

(तं०सा०पृ० 92, 94)
(तं०आ० 10-11, 12) इति च

वस्तुतः साक्षादनुभूताभेदात्मकशिवभावाः परे योगिनः शिवेन साकं सर्वथैकीभावप्राप्तेः प्राक् कञ्चित् कालं स्वात्मशिवाभेदचमत्काररसं रसयन्तस्तिष्ठन्ति। त एवाकलाः। ते केवलम् 'अहम्' इत्येवमेव प्रकाशन्ते, सर्वमपि च 'अहम्' इत्येवमेव पश्यन्ति, विमृशन्ति च । न तेषां क्वापि, कथमपि, किमपि 'इदम्' इत्येवमात्मकः कश्चनापि प्रकाशो वा विमर्शो वा। प्रत्यक्षाद्वैतदर्शिनस्ते। शिवतत्त्वं शक्तितत्त्वं चोभयमभेदभूमिकानिष्ठम्। अत उभयत्र अकालानामेव स्थितिः। तेषु केचन स्वात्मनः शिवभावमेव विशेषतो रसयन्तः 'शाम्भवाः'-इत्युच्यन्ते। अपरे विशेषतया शक्तिभावरसास्वादनिष्ठाः पुनः 'शाक्ताः' इति। उभयेऽपि तावदकला एव। तत्त्वाध्वधारणोपयोगविशेष एवैतद् द्विधा विभाजनं तेषाम्। यथा—

"अत्र च तत्त्वेश्वराः शिव-शक्ति-सदाशिव-ईश्वर-अनन्ताः। ब्रह्मेव निवृत्तौ, एषां सामान्यरूपाणां विशेषा अनुगतिविषयाः पञ्च, तद्यथा-शाम्भवाः, शाक्ताः, मन्त्रमहेश्वराः, मन्त्रेश्वराः, मन्त्रा इति।

(तं०सा० पृ० 74, 75)

~परिभाषानुसारम्—— कलायास्तद्विकारेभ्यश्चोत्तीर्णाः प्रमातारः। कलापदेन शुद्धविद्याप्युपलक्ष्यते। तेन शुद्धविद्याक्षेत्रादप्युत्तीर्णाः सादाशिवादपि तत्त्वादुपरि शिवशक्तितत्त्वयोः स्थिताः प्रमातारः। यद्यपि तस्मिँस्तत्त्वद्वये न कश्चनापि भेदस्तथापि बुद्धिक्षेत्रे विधीयमाने सूक्ष्मतरे तत्त्वविश्लेषणे शिवतत्त्वं शक्तितत्त्वञ्च पृथक् पृथक् गण्येते। तनुदसारं शिवतत्त्वे स्थिताः प्रमातारः शाम्भवाः, शक्तितत्त्वे च स्थितास्ते शाक्ता इत्युक्तास्तन्त्रसारे। उभयेऽपि काश्मीरेषु पण्डितपरम्परायामकला इत्येवोच्यन्ते। अन्यथा सप्त एव प्रमातृवर्गाः इति परम्परा खण्ड्येत। यतः पृथग् गणने संख्याष्टाविति, द्र. (तं०सा० पृ० 74, 75)। ते चाकला द्विप्रकाराः। तत्र केचन स्वस्वातन्त्र्यमहिम्नैव कलायाः शुद्धविद्यायाश्च क्षेत्राभ्यामुपर्येव सदा विचरन्ति। ते च शाम्भवाः, शाक्ताश्चेति द्विप्रकाराः। इतरे कारणवशात् कञ्चित्कालं कलाया विकारेभ्यो मुक्तास्तिष्ठन्ति। ते च विज्ञानाकलाः प्रलयाकलाश्चेति द्विप्रकाराः। तेषां लक्षणे स्वे स्वे स्थाने द्रष्टव्ये।

~प्रयोगानुसारम्—— यद्यपि पण्डितपरम्परायामकलः शिव एव, तथापि शास्त्रेषु प्रलयाकलो विज्ञानाकलश्चाप्युच्येते 'अकल' इति पदेन सन्त्येकपदान्यवधारणानि, सत्या, भामा चापि 'सत्यभामा'-इति वैयाकरणन्यायतः।

"यथात्र सकले भेदो न तथा त्वकलादिके।"

(तं०आ० 10-128)

"ननु कोऽसौ सुस्फुटः सकले भेदो यः प्रलयाकलादौ नास्तीत्याशङ्क्याह—

अनन्तावान्तरेदृक्षयोनिभेदवतः स्फुटम्।
चतुर्दशविधस्यास्य सकलस्यास्ति भेदिता॥

ईदृक्षेति प्रत्यक्षोपलक्ष्यमाणः। भेदितेति देवमनुष्यादि भेदतत्त्वमित्यर्थः।"

(तं०आ०वि० खं० 7-5-92)

अत्र तन्त्रालोकवाक्ये 'अकलादिके' इत्यत्र प्रलयाकलादिरेवाकलादिपदेनाभिप्रेतोऽस्ति।

~शक्तिरस्य—— परमैश्वर्यात्मिका स्फुटस्वातन्त्र्यरूपा अनिरुद्धा इच्छा तावदकलस्य शक्तिर्यया सावभेदात्मकं स्वं शिवत्वं रसयति, सृष्टिसंहारादिकञ्च यथेच्छं सम्पादयितुं प्रभवति। यथा—

"........इच्छात्मिका स्फुटस्वातन्त्र्यात्मिका शिवस्येति शक्तिभेदाः सप्त मुख्याः।"

(तं०सा० पृ० 74)

अकलाः—— परिभाषानुसारम्

द्र० 'अकलः' (परिभाषानुसारम्)।

अकलौ—— कारणवशात् कलाविकारेभ्यः कञ्चित्कालं मुक्तौ प्राणिवर्गौ। तौ च (1) स्वात्मनः प्रकाशमात्रस्य साक्षात्कारेणावान्तरप्रलयकालान्तं यावत् कलाविकारेभ्यो मुक्तो विज्ञानाकलवर्गः, (2) प्रलयकालावधि वा प्रलयकारणाद्वा तथाभूतामवस्थां प्राप्तः प्रलयाकलवर्गः। तौ शास्त्रे प्रमातृवर्गगणनावसरे 'अकलौ' इति 'केवलिनौ' इति वोच्येते। यथा—

(क) "अकलौ द्वौ परिज्ञेयौ सम्यक् स्वप्नसुषुप्तयोः"

(मा०वि०तं० 2-28)

(ख) महेश्वरेशमन्त्राणां तथा केवलिनोर्द्वयोः।
अनन्तभेदतैकैकं स्थिता सकलवत्किल॥"

(तं०आ० 10-123, 24)

अकल्पितकल्पकः (~गुरुः)

द्र० 'गुरुः' (~अकल्पित कल्पकः) इति।

अकल्पितः (~गुरुः)

द्र० 'गुरुः' (~अकल्पितः) इति।

अकारः ——

द्र० 'अ' इति।

अकालता—— कालस्पर्शराहित्यम्। अतीते वर्तमान एव भूतता, कल्पिताऽऽगामिनि च वर्तमान एव तथैव भविष्यता। वर्तमानता च तदुभयपेक्षयैव कल्पिता। तत् त्रितयमिदं कल्पितमेव नाकल्पितं संवित्तत्त्वं स्पृशेत्। ततस्तदकालम्। यथा–

"......भूताद्यपेक्षया वर्तमानकालस्य तदभावे वस्तुतोऽप्रसक्तेरकालकलिततत्त्वमेव वस्तुतत्त्वम्"।

(प०त्री०वि० पृ० 246)

अकिञ्चिच्चिन्तनम्—— शाम्भवोपायः। यथा–

"अकिञ्चिच्चिन्तनं शाम्भवः॥"

(तं०आ०वि० खं० 3, पृ०-469)

प्रमेयोन्मुखे चिन्तनप्रवाहे कञ्चित् कालमभ्यासबलात् समुच्छेदिते सति प्रमाता शुद्धे स्वस्मिन् स्वरूपे स्थितः सन् स्वात्मानं शुद्धसंविन्मयं विमृशति 'अहम्' इति। तदेवंविधोऽयमभ्यासो यत्र स्वात्मा स्वात्मनैव स्वस्य साक्षात्कारं कुर्वन् कृतकृत्यतामुपैति, चेत् सुषुप्तौ न प्रलीयेत। सुषुप्तौ प्रलये सति 'ज़ेनबौद्धदर्शनप्रसिद्धा वा आधुनिकगुरुप्रवर्तिता। भावातीतध्यानगतिर्वा भवति। सा च प्रलयाकलतां प्रापयेन्न मोक्षम्।

अकुलः—— (1) शिवः। (2) सदाशिवादि-क्षित्यन्त-तत्त्वजातात्मकात् कुलादुत्तीर्णः शिवः। (3) स्वशक्त्या सदाशिवादिधरान्त-प्रपञ्चसृष्ट्यादिकर्ता शिवः। यथा–

"अकुलस्यास्य देवस्य कुलप्रथनशालिनी।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः॥"

(तं०आ० 3-67)

अत्र जयरथेन कृतमकुलपदस्य व्याख्यानं न सर्वथा समीचीनम्, उत्पथप्रवर्तकत्वेन तस्य। उक्तं हि तेन–

"पूर्णपरसंवित्तत्त्वलक्षणात् कुलाद् यदन्यदवभासितं शिवलक्षणमकुलं तस्य प्रकाशैकरूपत्वेन द्योतमानस्य....."

(तं०आ०वि० ख० 2, पृ० 75)

वस्तुतस्तु सृष्टमेव तत्त्वजातं सदाशिवादिधरान्तं कुलम्। शिव-शक्ति-परमशिवात्मकं तत्त्वत्रयं कुलादुत्तीर्णं सदकुलम्। तच्च तत्त्वत्रयं वस्तुत एकमेव तत्त्वम्। तदेवाकुलम्। तस्य शिवतया, शक्तितया, परमशिवतया च यत् प्रतिपादनमात्रं तत्तावत् केवलं शिष्यजनावबोधनार्थम्, तत्त्वाध्वधारणायाञ्च साक्षिरूपत्वेनावलम्बनार्थमेव कल्पितं गुरुभिः। ततो न तथा विभाजनं पारमार्थिकम्। ततः शिवस्य परसंविद्रूपत्वाद् यद् भिन्नत्वेन कथनं तन्न समीचीनम्। परैव संवित् 1- शिवरूपतया, 2- शक्तिरूपतया, 3- परमशिवरूपतया चोपदिश्यतेऽवबोधनोपासनसौकर्यार्थमेव, न वस्तुतो भेदप्रदर्शनार्थम्। ततस्त्रयमप्येतदकुलमेवैकं तत्त्वम् इति विदाङ्कुर्वन्तु सुधियः। कुलस्यापक्षेयाऽकुलं शिवतत्त्वमेव हि पूर्णम्। इत्यपि विचार्यं सुधीभिः।

अकुलम् ~ मूलतः——
विश्वोत्तीर्णमनुत्तरं परं तत्त्वम्। यथा–
"अनुत्तरं परं धाम तदेवाकुलमुच्यते"।

(तं०आ० 3-143)

अकुलपदम्—— लिङ्गमूलम्। यथा–

"लिङ्गमूलाख्यादकुलपदात्.......।"

(तं०आ०वि० खं० 12, पृ० 321)

अकुलपर्वाणि—— निज-निज-जन्मदीक्षावबोधादिदिनानि। यथा–

"योऽयं प्राणाश्रितः पूर्वं कालः प्रोक्तः सुविस्तरात्॥
स चक्रभेदसञ्चारे काञ्चित् सूते स्वसंविदम्।
स्वसंवित्पूर्णतालाभसमयः पर्व भण्यते॥"

(तं०आ० 28-15, 16)

अकुलकालिकात्रिंशिका—— श्रीभट्टज्योग्देवात्मजभट्टरम्यदेवस्य कृतिः कापि। यथा–

"उक्तञ्च मयैवाकुलकालिकात्रिंशिकायाम्–
स्वानन्दतस्त्रिभुवनं कवलं विधाय
स्वात्मानमप्यतितरां समदा ग्रसन्ती।
तृप्ता तथाप्यपरिखण्डितनित्यसिद्ध-
स्वातन्त्र्यपूर्णविभवा कृशमूर्तिरव्यात्"॥ इति।

(उद्ध०भा०वि० पृ० 38)

अयं ग्रन्थोऽकुलकौलिकाग्रन्थ एव स्याद्यद्वाक्यमत्रैव ग्रन्थेऽन्यत्रोद्धृतम्–यथा–

"त्वामजामकृतपञ्चकारणद्रावणोड्डमरधामभैरवीम्।
स्तौम्यनाहतहतव्यतिक्रमस्फाररावकृतवीरघट्टनाम्॥
इत्याद्यस्मद्विरचिताकुलकौलिकात्रिंशिकोक्तस्तवरूपः".......।

(उद्ध०भा०वि० पृ० 8)

अक्रमकल्लोलकारिका—— भावोपहारविवरणकारस्य रम्यदेवस्य कापि कृतिः। यथा–

तदुक्तं मयेवाक्रमकल्लोलकारिकासु–
कालः कालेन काल्यश्चेत्कालः काल्येत केन वा।
अकाल्य एव कालश्चेत्काल्य एव तथान किम्॥
मृत्युः स्फुरत्प्रकाशान्तर्निगीर्णो निगिरेत्कथम्।
अस्फुरन्न प्रकाशत्वान्नान्तर्ग्राह्योऽथवा न किम्।

(उद्ध०भा०वि० पृ० 4)

अकल्यकालः —— (1) विश्वकलनाकरः समनाख्यकलात्मको नित्योऽयं कालः। नास्य महाप्रलयेऽपि नाशः। इयं प्रभोः कालशक्तिरिति प्रत्यभिज्ञाकृत्। यथा–

"सक्रमत्वञ्च लौकिक्याः क्रियायाः कालशक्तिः।
घटते ननु शाश्वत्याः प्राभव्याः स्यात्प्रभोरिव॥"

(ई०क्र० 2-1-2)

"......आभासविच्छेदनप्रदर्शन-सामर्थ्यरूपात् पारमेश्वराच्छक्ति-विशेषात्"।

(ई०प्र०वि० 2-पृ० 6)

"पृथिव्यादेरनाश्रितान्तस्य विश्वस्याभेदात्मना साम्येनावस्थानात् साम्यर्शदाभिधेयः, अत एव भेदप्रथाया अभावाद् 'अकल्यः'-कलयितुमशक्यः"।

(तं०आ०वि० खं० 4 पृ०-140)

द्र० 'सामनसं पदम्' इति।

(2) गतिविक्षेपादिकलनाशून्या केवलमुपासनादौ भावनया स्थाप्यमाना या क्रमरूपता सा तावदकल्यः कालः। यथा—

"अस्मात् सामनस्यादकल्यात् कालान्निमेषोन्मेषमात्रया प्रोक्ताशेषकालप्रसरप्रविलयचक्रभ्रमोदयः॥"

(तं०सा० पृ० 56)

(3) स्पष्टीकरणप्रयोजनमेतद् व्याख्यानान्तरं न परस्पर-विरोधावहम्। सूक्ष्माणां शास्त्रतत्त्वानां दुर्विज्ञेयत्त्वादेवं कृतमाचार्यैः।

द्र० 'कालः' (~अकल्यः) इति।

अक्षसूत्रम्—— जपोपयोगिनी गुणनिका।

~अक्षसंख्यातः—— 115 इति वा, 108 इति वा, 54 इति वा, 27 इत्येव वा, अथवा 50 इत्येव। यथा—

"शतं तिथ्युत्तरं यद्वा साष्टं यद्वा तदर्धकम्।
तदर्धं वाथ पञ्चाशद्युक्तं तत्परिकल्पयेत्"॥

~तत्संस्कारः—— पूर्वं निर्माणम्, ततः स्नपनम्, ततो न्यासः संख्याक्रमेण, ततो मन्त्रन्यासः, ततः स्थण्डिलादिवत् सर्वं क्रियाजालं विधाय शिष्याय दीयतेऽक्षसूत्रं गुरुणा। यथा—

"कृत्वाक्षसूत्रं तस्यापि सर्वं स्थण्डिलवद्भवेत्॥
पूजितेन च तेनैव जपं कुर्यादतन्द्रितः॥"

(तं०आ० 27-37, 38)

~महात्म्यतारतम्यतः—— विशेषत उत्तमं (1) रुद्राक्षसूत्रम्, क्रमशश्चावरं (2) सौवर्णम्, (3) रत्नजम्, (4) मौक्तिकम्, (5) पद्माक्षजम् (तच्च पद्मबीजमयम्), (6) शङ्खजम् इति। यथा—

"अक्षसूत्रमथो कुर्यात्तत्रैवाभ्यर्चयेत्क्रमम्।
वीरधातुजलोद्भूतमुक्तारत्नसुवर्णजम्॥
अक्षसूत्रं क्रमात्कृष्टं रौद्राक्षं वा विशेषतः"।

(तं०आ० 27-30, 31)

"वीरधातुर्महाशङ्खः। जलोद्भूतं पद्माक्षम्।

(तं०आ०वि० खं० 10 पृ० 369)

उत्तरोत्तरमुत्कृष्टमत्र वेद्यम्।

~संख्यारहस्यदृष्ट्या—— शिवस्य पञ्च वक्त्राणि। तेषु प्रत्येकं पञ्च चिदानन्दाद्याः शक्तय इति गुणने 25, तथाद्यन्तागं चैक्यं द्विधा विमर्शनीयमिति सङ्कलने 27 संख्या अक्षाणाम्। शक्तिशक्तिमद्विवेकेन द्विगुणिता अक्षा 54 इति। ततोऽप्यारोहावरोहक्रमतः द्विगुणिता 108 इति भवन्ति। तथा मातृकावर्णाः संख्या 50 इति अक्षा अपि 50 इति च। यथा—

"वक्त्राणि पञ्च चित्स्पन्दज्ञानेच्छाकृतिसंगतेः॥
पञ्चधाद्यान्तगं चैक्यमित्युपान्त्याक्षगो विधिः।
शक्ति तद्वत्प्रभेदेन तत्र द्वैरूप्यमुच्यते॥
ततो द्विगुणमाने तु द्विरूपं न्यासमाचरेत्।
ततोऽपि द्विगुणो सृष्टिसंहृतिद्वितयेन तम्॥
मातृकां मालिनीं वाथ न्यसेत्खशरसंमिते।

(तं०आ० 27-32 तः 35)

'खशर सम्मिते' इति पञ्चाशत्संख्यके। ऐक्यञ्च द्विविधं स्पष्टीकृतं यथा—

"ऐक्यमिति उपाध्यतीतमेकं रूपमित्यर्थः, तद्धि द्विविधम्— 1. आदावुपाधीनामनुल्लासात्, 2. अन्ते चोपाधीनां प्रशमयोगत इति।"

(तं०आ०वि० खं० 10 पृ० 371)

अख्यातिः~ प्रामाण्यवाददृष्ट्या 1. भ्रान्तिः। 2. अपूर्णा ख्यातिः। उत्तरकालिकं विमर्शं यावदजीवन्ती या शुक्तौ प्राक्तना रजतख्यातिरसावत एवापूर्णा। तस्या अपूर्णत्वमेव नञर्थः। अल्पार्थत्वेन नञः। तत एव सा अपूर्णा अल्पा ख्यातिर-ख्यातिरित्युच्येते। पूर्णया ख्यात्या संस्काररूपतयोत्तरकालं यावदप्यक्षुण्णेन रूपेण स्थातव्यम्। यथा—

"ततो यावता पूर्णेन रूपेण प्रख्यातव्यम् विमर्शपर्यन्तं तावन्न प्रख्यातीत्यपूर्णख्यातिरूपाऽख्यातिरेव भ्रान्तितत्त्वम्।"

(ई०प्र०वि० खं० 2 पृ० 113)

~मूलतः—— स्वस्य स्वशक्तीनां स्वशक्त्यभिव्यक्ति-व्यवहाराणां च विषये यदपूर्णं सङ्कुचितमभिमननं-'देहप्राणादिरूप एवाहं, किञ्चिन्मात्रमेव ज्ञातुं कर्तुञ्च समर्थः' इत्यादिरूपम्, असावपूर्णख्यातिरेवाख्यातिः, न खलु ख्यातेरभावः। ततो नात्राप्यभावार्थीयो नञ्, अपि त्वल्पार्थीयोऽनुदरा कन्येति वत्। यथा—

1. "ननु चाविद्यारूपत्वं चिद्ब्रह्मणीव जडब्रह्मण्यपि समस्तोपालम्भसम्भारभञ्जनब्रह्मास्त्रं भविष्यति। मैवम्। संविदो हि स्वातन्त्र्यादतिदुर्घटकारित्वं नाम या शक्तिरपूर्णख्यातिपरमार्थामख्यातिं प्रकाशधामनि खण्डनारूपनञर्थोल्लेखनावेदनस्वभावामुल्लासयन्ती, सैव मायाभिधाना अविद्यासमुत्थापकत्वादविद्येत्युच्यताम्"

(ई०प्र०वि०वि० खं० 3 पृ० 237)

2- "अस्मद्दर्शनानभ्युपगमे ब्रह्मविवर्तवादो जडविवर्तवाद एव। तत्र चाविद्यापि विवर्ततत्त्वोपपादिका न समर्थयितुं शक्येति वितानितं शिवदृष्टौ"। (तदेव)

अग्निः—— शब्दादितन्मात्रत्रयपरिणामरूपं तत्त्वम्। शब्द-स्पर्शरूपतन्मात्राणि मिलित्वा क्षुभितानि सन्त्यग्निरूपतया परिणमन्ति। ततोऽग्निः शब्द-स्पर्श-रूप गुणः। यथा—

"तेजस्तत्त्वं त्रिभिर्धर्मैः प्राहुः पूर्ववदेव तत्"॥

(तं०आ० 9-288)

~कौलिके विधौ—— शिव-शक्ति-सङ्घट्टजो द्रवः। यथा–

"शुचिर्नामाग्निरुद्भूतः सङ्घट्टात्सूर्यसोमयोः।"

(उद्ध०तं०आ०वि० खं० 11/2 पृ० 106)

~बीजमन्त्रः—— (1) रकारः। यथा–

"अग्निः=रेकः"।

(तं०आ०वि० खं० 3 पृ० 463)

"अग्निः=रः"

(तं०आ०वि० खं० 12 पृ० 203)

(2) हकारोऽप्यग्निवर्ण इति। यथा–

"अग्निरूपेणेति हस्य शिवाभिधायितया प्रमातृरूपत्वात्।"

(तं०आ०वि० खं० 9 पृ० 223)

"चरौ हेत्यग्निरूपेण"………।

(तं०आ० 15-441)

(3) हकारोऽप्यग्निरूपतया प्रमातृतया वा सम्मतः प्रतिभाति दीक्षाप्रक्रियाविधिविशेषे।

~बुद्धिध्याने—— प्रमाता। यथा–

"तत्र प्रमातृ-प्रमाण-प्रमेयरूपस्य बह्न्यर्कसोमत्रितयस्य सङ्घट्टं ध्यायेद् यावत्……" इत्यादि

(तं०सा० पृ० 36)

~मातृकाक्रमे—— स्वराणामेव प्लुतरूपतायां 'वह्निः' इति संज्ञाऽऽगमिकी। यथा–

"यत्तत्परं प्लुतं नाम सोमानन्दात्परं स्थितम्॥
प्रकाशरूपं तत् प्राहुराग्नेयं शास्त्रकोविदाः।"

(तं०आ० 3-132, 33)

अग्निकुण्डम्—— यागोपयोगिन्या वेद्याः मध्यम्।

~तत्संस्क्रिया——(द्र० विस्तरतः तं०आ० 15-398 तः 408)

~(सुसंक्षिप्ता)—— स्पष्टमुक्ता यथा–

"नवाहुतीरथो दद्यान्नवात्मसहितेन तु।
शिवाग्नये तारपूर्वं स्वाहान्तं संस्क्रिया भवेत्॥
शिवचैतन्यसामान्य-व्योप (म) रूपेऽनले ततः।
प्राग्वदाधारमाधेयं देवीचक्रञ्च योजयेत्॥"

(तं०आ० 15-414, 15)

नवात्मा च मन्त्रः —— ह् र् क्ष् म् ल् व् य् ॐ इति तारः=प्रणवः। इति।

अग्न्यादिसृष्टिः —— रूपतन्मात्रं क्षुभितं सदग्निरूपतामाप्नोति। तत एवाग्निः रूपवान्। शब्दस्पर्शावस्य वाय्वाकाशाविरहात्। एवमेव जलतन्मात्रं गन्धतन्मात्रञ्च यदा क्षोभमायाति तदा तदेव क्रमेण सलिलरूपतया धरारूपतया च परिणमति। तत एव जलं रसवद्, धरा च गन्धवती। रूपादयोऽग्न्याद्यविरहात्। यथा–

"रूपं क्षुभितं तेजः, पूर्वगुणौ तु पूर्ववत्। रसः क्षुभित आपः, पूर्वे त्रयः पूर्ववत्। गन्धः क्षुभितो धरा, पूर्वे चत्वारः पूर्ववत्।"

(तं०सा० पृ० 90)

अघोरः —— भगवतः स्वच्छन्दनाथस्य क्रियाशक्तिप्रधानं वपु-'रघोर' इति। अघोरश्च प्रोद्यत्सृष्ट्यादिकृत्यप्रपञ्चः। परमेश्वरस्य विश्वसृष्ट्यादिपञ्चकृत्यप्रवरण पराशक्तिरत्र बहिर्मुखोन्मेषपरतया प्रकाशते प्रसरति च। स्वात्मनि चिद्रूपे अनन्तनाथादिब्रह्मान्तं देवाधिदेववर्गं सजडभावसमूहं धारयति भगवानघोरः। अघोरपदं प्राप्तैव भगवतोऽन्तःसृष्टिः स्फुटतां परिपूर्णतां चोपयाति। देशकालादिभिरसंसृष्टाऽस्य महासृष्टिरसंख्यसृष्ट्यन्तरोन्मेषस्थानभूता। एतस्यामेव महासृष्टावनन्तानन्तप्रकाराः सृष्टिसंहारा ब्रह्मरुद्रादिभिः सम्पाद्यमाना समाश्रितास्तिष्ठन्ति। इयं देवदेवस्योन्मेषमयी जाग्रदवस्था ब्रह्मस्थानीया। कृष्णवर्णं दक्षिणदिगुन्मुखं चाघोरस्य वदनम्। यथा–

(1) "तदलं प्रकृतं ब्रूमः क्रियाशक्तिरियं परा।
अघोरत्वेन देवस्य तत एव प्रकीर्तिता॥
दक्षिण्यमत एवास्या भावानां शिवसंश्रये।"

(मा०वि०वा० 1-347, 48)

(2) "देशकालक्रियाकारकल्पनापथवर्जितः।
देवदेवस्तथैवास्य शक्तिः सा विश्वरूपिणी॥
तत्स्वातन्त्र्यात्स्वतन्त्रं तत् स्वात्मनि प्रोच्छलत्स्थितम्"॥

(तदेव 1, 350-52)

(3) "अनन्तादिविधिश्चान्तपशुसङ्घातघस्मरः।
निजोदरदरीनीतचराचरजगद्व्रजः॥
स्वचैतन्यविमर्शान्तर्ग्रस्त पुद्गलसञ्चयः।
यावदुल्लसितस्तावत् क्रियाशक्तिस्वरूपतः॥"

(तदेव 1, 358-59)

(4) "पूर्णेयं परमेशस्य महासृष्टिरिह स्थिता॥
यस्यां संहारसृष्ट्यंशा विश्वे ते मध्यवर्तिनः।
सा चाद्या सृष्टिरित्येवं नैव वक्तुं भवेत्क्षमा॥
अदेशकाले तत्त्वे हि कथमाद्यादिसम्भवः॥"

(तदेव 1, 366-68)

~तत्कलाः —— देहे ताल्वन्तं व्याप्य स्फुरन्त्योऽघोरनाथस्य प्रवृत्तयः संहारोन्मुखाः कलाः मकारपरामृश्याः। एता रुद्रांशभूताः कला मकारपरामृश्या भवन्ति। यथा–

"तमो मोहा क्षुधा निद्रा मृत्युर्माया भया जरा।
अघोरस्य कला ह्येता रौद्रांशे तु व्यवस्थिताः॥
ताल्वन्तं यावत्तद् व्याप्तम्"……………………॥

(ने०तं० 22, 29-30)

द्र० (स्व०तं० 1, 56) अपि इति।

~तद्बीजमन्त्रः—— 'सौः' इति।

द्र० 'तृतीयं ब्रह्म' इति, 'महामन्त्रः' इति च।

~तद्भूमिः —— यथा—

"अशुद्धे पुनरध्वनि परमेश्वर एव स्वात्मप्रच्छादनक्रीडया अघोरभट्टारकभूमिं मन्त्रमहेश्वररूपां गृहीत्वा दुर्घटसम्पादनसामर्थ्येन मायाशक्त्या स्वतोऽन्योन्यतश्च भिन्नम् अणूनां भोगसिद्धये कलादिक्षित्यन्तं जडाजडवर्गं क्रमतोऽक्रमतोऽपि अवभासयति।"

(ष०त्रिं०त०सं०वि० पृ० 5)

~तन्मन्त्रः —— ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च सर्वतः शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यो नमः ॐ। इति यथा—

"ओंकारमुच्चरेत् पूर्वमघोरेभ्योऽनन्तरम्।
अथ घोरेभ्यो समालिख्य ततोऽन्यत्तु समालिखेत्॥
घोरघोरतरेभ्यश्च सर्वतः शर्व उच्चरेत्।
सर्वेभ्यः पदमन्यच्च नमस्ते रुद्र एव च॥
रूपेभ्यश्च समालिख्य नमस्कारावसानकम्।
मन्त्रराजः समाख्यातः 'अघोरः' सुरपूजितः॥"

(स्व०तं०प० 1, पृ० 35-36)

~संहारकः —— श्रीकण्ठनाथादूर्ध्वं सृष्टिसंहारकृत्। यथा—

"तदूर्ध्वे शुद्धमध्वानं यावच्छक्त्यन्तगोरम्।
तत्सर्वं संहरेद्धोरमघोरो घोरनाशनः।"

(स्व०तं० पृ० 11, 281-2)

अघोर~शक्तिः—— यथा—

"अघोरा साभवदिच्छा व्यापिका समवायिनी"

(ने०तं० 19, 159)

"न विद्यते घोरं भेदस्पर्शरूपं यस्याः सा अघोरा आसूत्रिताशेषविश्वाद्वयप्रकाशात्मा परा अनुग्रहप्रवणा, अत एव व्यापिका समवायिनी शिवाभिन्ना।"

(ने०तं०उ० खं० 2 पृ० 187)

अघोराः —— रुद्राः वामेश्वराद्याः। यथा—

"घोरेति पाशजालाख्यं पापयुक्तं भयानकम्।
तद्येषां तु न विद्येत ह्यघोराः परिकीर्तिताः॥
वामेश्वरादयो रुद्रा जालमूलोपरि स्थिताः।
ते ह्यघोराः समाख्याताः............॥"

(पं०प्र०उद्ध०स्व०तं०प० 1, पृ० 38)

~शक्तयः—— बद्धाञ्जीवान् शिवभावसमापत्तिं प्रति प्रेरयन्त्यः परमशिवस्य पराः शक्तयो यासामधिष्ठात्री मोक्षमार्गे प्रवर्तिनी भगवती ज्येष्ठा शक्तिः। यथा—

"पूर्ववज्जन्तुजातस्य शिवधामफलप्रदाः।
पराः प्रकथितास्तज्ज्ञैरघोराः शिवशक्तयः॥"

(मा०वि०तं० 3-33)

द्र० (शि०सू०वा०व० 3-19)

मातृकाक्रमे—— (1) इकाराभिव्यङ्ग्यायाः परमेश्वरस्येच्छाशक्तेः प्रसृता मोक्षदायिन्यः शक्तयः। यथा—

"इच्छाशक्तिरघोराणां शक्तीनां सा परा प्रभुः"

(तं०आ० 3-72)

"प्रभुप्रभवनिमित्तम्"।

(तं०आ०वि० खं० 2, पृ० 83)

(2) अकारादिविसर्गान्ताः षष्ठवर्जं या द्वादश वर्णकलास्ताभिर्यतः शिवशक्तयो व्यंग्या भवन्ति मातृकोपासनाक्रमे, ततस्ता वर्णकलास्तत्र क्रमे 'द्वादशकाल्य' इति स्वीक्रियन्ते ताश्च निर्मलाः शुद्धाश्च सतयोऽघोराः शिवशक्तय इत्यङ्गीक्रियन्ते। तत्र सकलप्राणिष्वधिष्ठिता या अघोराख्या देव्यस्तासां सर्वोऽपि व्रात एताभ्य एव मातृकाशक्तिभ्यः समुदेति। यथा—

"ता एव निर्मलाः शुद्धा अघोराः परिकीर्तिताः।"

(तं०आ० 3, 257)

एवमन्या अपि घोरघोरतराख्याः शक्तयो व्रातरूपेणावस्थिताः सत्य एताभ्य एव द्वादशशक्तिभ्यः प्रजायन्ते।

~लोके—— (1) परमेश्वरस्य ईशानख्यायाः शक्तेरुद्भूता जगत्सञ्चालने प्रवृत्ताः प्रतिजीवमधिष्ठिता असंख्याताः देव्यः जनान् मोक्षमार्गे प्रवर्तयन्त्यः। यथा—

"तदाऽघोराः परा देव्यो जाताः शैवाध्वदैशिकाः।"

(तं०आ० 3-73)

"अघोरं शिवदायकम्"।

(शि०सू०वा०व० पृ० 61)

~(तन्महिमा)

(2) परमेश्वरस्याघोराद्याः परापराः शक्तयो येषु प्रमातृष्वभिव्यक्ता भवन्ति त एव मन्त्रमहेश्वरादिस्थितिभाजः सम्भवन्ति। येष्वपराः ब्राह्मयाद्या अभिव्यज्यन्ते परमेश्वरेण ते ब्रह्माद्याः संभवन्ति। उक्तं तथा—

"यत्र भगवतीनामघोरादीनां शक्तीनां स्थितिः-यद्योगाद् विज्ञानाकलसाधकयोगिनो मन्त्रमहेशादिरूपेणाघोराद्याः सम्पन्नाः, ब्राह्मयादिशक्त्यनुग्रहेणैव साधकाणवो ब्रह्मविष्ण्वादयः।"

(पं०त्री०वि० पृ० 162-3)

अघोराद्याः (देव्यः)—— अष्टौ। यथा—

"यदुक्तं त्रिशिरोभैरवे—
अघोरा परमाघोरा घोररूपा तथा परा।
घोरवक्त्रा तथा भीमा भीषणा वमनी परा॥
पिवनी चाष्टमी प्रोक्ता..................।"

(उद्ध० तं०आ०वि० खं० 12, पृ० 341)

अघोरेशः —— (1) मायां प्रक्षोभ्य ततः कञ्चुकानां पुरुषप्रकृत्योश्च स्रष्टा। 'अनन्तनाथ' इत्यपरमस्य नाम। यथा—

"ईश्वरेच्छावशक्षुब्धभोगलोलिकचिद्गणान्।
संविभक्तुमघोरेशः सृजतीह सितेतरम्॥"

(तं०आ० 9, 61)

"अघोरेशो मन्त्रमहेश्वराणां प्रथमोऽन्यत्रानन्तशब्दवाच्यः।"

(तं०आ०वि०खं० 6, पृ० 55)

(2) आद्यो मन्त्रमहेश्वरः अशुद्धाध्वविधाता अघोरेशः। यथा अशुद्धाध्वविधाता यस्त्वाघो मन्त्रमहेश्वरः।

सोऽघोरेशः इति ख्यातः कथ्यतेऽनन्त इत्यपि।"

(पू०प्र० खं० 2, 370-71)

अङ्कुशः —(बीजम्)—— 'ऊ' इति स्वरस्य मात्रा इति। यथा–

"तदङ्कुशस्योकारस्य ऊर्ध्वेति उपरि विन्यस्तं कार्यम्"

(ने०तं०उ० खं० 1, पृ० 53)

'जूँ' इति बीजपिण्डेऽस्य दर्शनं भवतीति वेद्यम्।

अङ्कुशमुद्रा—— स्पष्टं वर्णिता स्वच्छन्दे। यथा–

"मुष्टिं बद्ध्वा तु देवेशि तर्जन्यूर्ध्वं तु कुञ्चयेत्।
अङ्कुशः कथितो ह्येष"..........॥

(स्व०तं० 14-6)

"दक्षिणपाणिं निर्वर्त्य। उक्तञ्च तत्रैव (श्रीभैरवानुकरणस्तोत्रे)–

"भेदमयमखिलमेतन्निजशक्त्यैवाक्षिपामि संहर्तुम्।
इत्यङ्कुशधारणतः स्फुटयति परभैरवोऽस्माकम्॥"

(स्व०तं०प० 14, पृ० 113)

अङ्गन्यासतत्त्वम्—— हस्तस्पर्शपूर्वकम् अङ्गानां शुद्धचिदात्मकपरमेश्वरमयतया विमर्शनम्। यथा–

"करचरणाद्युपलक्षितस्य विकल्पविक्षोभप्रपञ्चस्य पूर्णाहम्भावभावनास्वभावतया कयाचिदविकल्पतया विमर्शनम्।"

(म०मं०प० पृ० 113)

अचिद्रूपम्—— जडं तत्तत्त्वं यद् देशकालाकारवैचित्र्यरहितं नैवास्ति क्वापि। यथा–

"चिद्रूपस्य देशकालस्वरूपवैचित्र्यं हि न कदाचिद्, अचिद्रूपस्य तु न तद्वैचित्र्यविरहः कदाचित्"।

(ई०प्र०वि०वि० खं० 1 पृ० 91)

अजडप्रमातृसिद्धिः —— सिद्धित्रय्यामुत्पलदेवकृतायां प्रथमा पुस्तिकेयम्। अत्र विज्ञानवाद्यभिमतक्षणिकचित्तपरम्परातिरिक्तस्य तत्परम्परासाक्षिणः, क्षणिकचित्तविज्ञानानां च परस्परं सम्बन्धयोजकस्य शुद्धचिन्मात्ररूपस्यैकस्यात्मनः सिद्धिः प्रमाणपूर्वकं प्रतिपादितास्ति। अस्या उपरि आचार्येण संक्षिप्ता वृत्तिरपि निर्मिताऽभूत्। परमसाविदानीं नैव लभ्यते क्वापि। तत्स्थाने पण्डितहरभट्टकृता वृत्तिर्मुद्रितास्ति। सप्तविंशतिकारिकात्मिकेयं पुस्तिका।

अजडप्रमातृसिद्धिविमर्शिनी—— अस्य शास्त्रस्योल्लेखो महेश्वरानन्देन कृतोऽस्ति। अनुमातुं शक्यते यदाचार्याभिनवगुप्तकृत एष टीकाग्रन्थ स्यादिति। यथा–

"यदुक्तमजडप्रमातृसिद्धिविमर्शिन्याम्–"इदं मम ज्ञानमिति नाञ्जसा ज्ञानप्रकाशः। अपि तु जानाम्यहमिति ज्ञानस्यास्मदर्थविश्रान्ततैव" इति।

(म०मं०प० पृ० 133)

अजवीथिः—— सूर्यस्य दक्षिणायनसंक्रमणमार्गः। यथा–

"पितृदेवपथावस्योदग्दक्षिणगौ स्वजात्परे वीथ्यौ।
भानोरुत्तरदक्षिणमयनद्वयमेतदेव कथयन्ति॥"

(तं०आ० 8-109)

स्वजात् परे-इति सु+अजात् इति। सुवीथिरजवीथिश्चेति तात्पर्यम्।

"सुवीथी उत्तरे तस्य अजवीथी तु दक्षिणे।"

(स्व०तं०उद्धृ०तं०आ०वि० खं० 5 पृ० 83)

अजातवादः~शैवः—— शिव एव स्वयं स्वेच्छया तत्तदाकारतया भाति केवलम्, न तस्मादन्यत् किमपि जायते नश्यति वा क्वचिदित्येषोऽस्त्यास्तिकोऽद्वैतमयोऽजातवादः, अतोऽन्यो मायोपाध्याश्रितस्तु वैदान्तिको द्वैतमयोऽनीश्वरताप्रयोजकश्च। यथा–

"मणविन्द्रायुधे भास इव नीलादयः शिवे।
परमार्थत एषां तु नोदयो न व्ययः क्वचित्॥"

(तं०आ० 11-110)

सृष्ट्यादि सर्वं प्रतिबिम्बनीत्या भवति नारम्भनीत्या नापि च परिणामनीत्या। विवर्तरूपतापि परमेश्वरस्य शक्तिविलासमाश्रयते, नोपाधितया सम्मतां ततो भिन्नां मायाम्।

अज्ञानम्—— सीमितमल्पं ज्ञानम्। ज्ञानाभावस्तु नात्राज्ञानं शैवे नये, यत् संसृतेः कारणम्। तस्य जडेष्वपि सत्त्वात्। न च जडानां संसृतिः। ततोऽल्पार्थकोऽत्र नञ्। तेनाल्पं सङ्कुचितं ज्ञानमेवाज्ञानम्। यथा–

"अज्ञानमिति न ज्ञानाभावश्चातिप्रसङ्गतः।
स हि लोष्ठादिकेऽप्यस्ति न च तस्यास्ति संसृतिः॥
अतो ज्ञेयस्य तत्त्वस्य सामस्त्येनाऽप्रथात्मकम्।
ज्ञानमेव तदज्ञानं शिवसूत्रेषु भाषितम्॥"

(तं०आ० 1-25, 26)

~तद्भेदाः —— परिगणिता यथा–

"अतारमसुतारञ्च अतारणमथापि च॥
अतारकञ्च देवेशि चतुर्थं परिकीर्तितम्।
अप्रमोदोऽप्रमुदितं तदज्ञानं चैवमष्टधा।"

(स्व०तं० 11, 153-55)

"एता एव सांख्यैरूहादिसिद्धिविपरीता अष्टौ बुद्धेरशक्तय उक्ताः"

(स्व०तं०उद्धृ०प० 11, पृ० 87)

~द्विरूपम्——

(1) अनात्मनि देहादावात्मताभिमानः सुदृढः।
(2) आत्मरूपेऽपि विश्वस्मिञ्जगत्यनात्मताभिमानोऽशिथिलः।

एतद् द्विविधत्वं व्यावहारिकम्। यथा–

"यदनात्मन्यपि तद्रूपावभासनं तत्पुरा निराकृत्य।
आत्मन्यनात्मरूपां भ्रान्तिं विदलयति परमात्मा॥"

(प०सा० 39)

(आ)

पौरुष-बौद्ध-रूपत्वेनापि द्विविधम्। एतच्च द्विविधत्वं सैद्धान्तिकम्।

~पौरुषम्—– मलरूपं स्वात्मावरणम्। स्वात्मविषये स्वशक्तिविषये च दृढः सङ्कुचितत्वस्याभिमानः संस्काररूपतया सततप्रवहणशीलः। अविकल्पस्तावदयमसद्विश्वासश्च। "चैत्रोऽहममुकामुकविषयज्ञस्तत्तन्मात्रकरणे समर्थः" इतिवत्। यथा–

"तत्र पुम्सो यदज्ञानं मलाख्यं तज्जमप्यथ।
स्वपूर्णचित्क्रियारूप-शिवतावरणात्मकम्॥
सङ्कोचिदृक्क्रियारूपं तत्पशोरविकल्पकम्।"

(तं॰आ॰ 1, 37-38)

द्र॰-(तं॰सा॰ पृ॰ 3) चापि।

~बौद्धम्—– स्वात्मविषये जगद्विषये च बुद्धिगतोऽनिश्चयो वा विपरीतनिश्चयो वाऽशुद्धविकल्पज्ञानात्मकः। "अहं स्थूलस्तृषितः सुखी, सुखादिराहित्येन शान्तो वा"- इत्यादिरूपो विकल्पज्ञानात्मकोऽध्यवसायो निश्चयश्च प्रमेयांशविषये च "इदं सुखमिदं नीलमियं तृप्तिरियं शान्तिः" इत्यादिरूपा वा निश्चयाः, इति सर्वमेवंविधं बौद्धमज्ञानम्। अशुद्धो विकल्पः। यथा–

"(क) द्विविधञ्चाज्ञानम्, बुद्धिगतं पौरुषञ्च। तत्र बुद्धिगतमनिश्चयस्वभावं, विपरीतनिश्चयात्मकञ्च।"

(तं॰सा॰ पृ॰ 23)

"(ख) अहमित्थमिदं वेद्मीत्येवमध्यवसायिनी।
षट्कञ्चुकाबिलाणूत्थप्रतिबिम्बनतो यदा॥
धीर्जायते तदा तादृग्ज्ञानमज्ञानशब्दितम्।
बौद्धं..........................।"

(तं॰आ॰ 1, 37-40)

~मूलतः—– आणवं मलमेव मूलतोऽज्ञानम्, इतरस्य ज्ञानसङ्कोचजातस्य तदाश्रितत्वात्। यथा–

"मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्"

(मा॰वि॰तं॰ 1, 23)

~विस्तरतः—– (1) अपूर्णे जडे च देहादौ स्वात्मताभिमानः। (2) अल्पशक्तित्वाभिमानः स्वात्मविषये।

(3) भेददर्शित्वम्। (4) कर्मकर्तृत्वे सङ्कोचसंभिन्नोऽभिमानः। (5) तदाश्रितस्तदनुगुणश्च कर्मसंस्कारः। (6) स्वात्मरूपे जगत्यनात्मतादर्शनम्। (7) सङ्कुचिता ममता चेत्यादि। यथा–

(1) "अज्ञानं बन्धः"

(शि॰सू॰ 1-2)

(2) "द्वैतप्रथा तदज्ञानं तुच्छत्वाद्बन्ध उच्यते"।

(तं॰आ॰ 1, 30)

द्र॰ (स्प॰ वि॰ पृ॰ 118), (प॰सा॰ 39)

द्र॰ 'आणवमलः' इति, 'कार्ममलम्' इति, 'मायीयम्' इति च।

~शैव सिद्धान्तदृशा—– सर्वज्ञत्वसर्वकर्तृत्वादिशक्तीनां मलेनावृतत्वादप्रकाशनमज्ञानम्। तच्च जीवजातस्य स्वरूपभूतत्वेन चकासज्ज्ञानमावृणोति। एकञ्च तन्निखिलपशुप्रमातृषु तिष्ठति। यथा–

"तस्मादज्ञानशब्देन ज्ञत्वकर्तृत्वधर्मणाम्॥
चिदणूनामावरणं किञ्चिद्वाच्यं विपश्चिता।
आवरणात्मना सिद्धं तत्स्वरूपादभेदवत्।
भेदे प्रमाणाभावाच्च तदेकं निखिलात्मसु॥"

(तं॰आ॰ 13, 43-45)

अटनशास्त्रम्—– निशाटनाख्यमागमशास्त्रम्। यथा–

"श्रीसिद्धाटनसद्भावमालिनीसारशासने"

(तं॰आ॰ 28, 113)

अणिमाद्याः~अष्टौ—– परिगणिता यथा–

"अणिमा लघिमा चैव महिमा प्राप्तिरेव च।
प्राकाम्यञ्च तथेशित्वं वशित्वं यदुदाहृतम्।
यत्र कामावसायित्वमणिमाद्यष्टकं स्मृतम्॥"

(स्व॰तं॰ 10, 1072-73)

अणुः—– मायया सङ्कुचितः, पशुप्रमाता। यथा–

"पशुर्नित्यो ह्यमूर्तोऽज्ञो निर्गुणो निष्क्रियोऽप्रभुः।
व्यापी मायोदरान्तःस्थो भोगोपायविचिन्तकः।"

(उद्ध॰तं॰आ॰वि॰ खं॰ 6, पृ॰ 114)

~उच्चारयोगे—– खदशके द्वितीयं खम्। करणगणपरिशून्यः सङ्कुचितः प्रमाता केवलः। यथा–

"आत्माणुकुलमूलानि शक्तिर्भूतिश्चिती रतिः।
शक्तित्रयं द्रष्टृदृश्योपरक्तं तद्विवर्जितम्॥
एतत्खं दशधा प्रोक्तमुच्चारोच्चारलक्षणम्।"

(तं॰आ॰ 5, 93-94)

जीवः, पुद्गलः, मायीयप्रमाता, पशुः, इत्यादीन्यस्याभिधानान्तराणि प्रसिद्धानि।

~गुणत्रयस्पृष्टास्पृष्टः—– ईश्वरप्रत्यभिज्ञादौ गुणत्रयं मूलतः पुरुषधर्मत्वेनोक्तं तन्त्रालोके चाणोर्निर्गुणत्वमुक्तम्, तदत्रैत्तात्पर्यम् अणुर्वस्तुतः संकोचावभाससम्भिन्नः शिव एव, ततो मूलतो निर्गुणः परमसौ यदा षट्कञ्चुकसंवेष्टितोऽवभासते पुरुषतत्त्वरूपतया तदा सुखदुःखमोहसंभिन्नः संस्त्रिगुणः। ततः कञ्चुकवेष्टनादुपरि निर्गुणोऽणुः सङ्कोचमात्रसंभिन्नः, कञ्चुकाधस्तात् पुनस्त्रिगुणः पुरुषतत्त्वात्मक इति। यथा–

"स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया तृतीये त एव पशोः सत्त्वं रजस्तमः॥"

(ई॰प्र॰ 4-1-4)

"चिद्रूत्वाच्च स व्यापी निर्गुणो निष्क्रयस्ततः'।

(तं॰आ॰ 9, 145)

गुणवृत्तिशून्यः शून्यरूपत्वाच्चाकर्तेति तात्पर्यमत्र बोध्यम्

"पशुर्नित्यो ह्यमूर्तोऽज्ञो निर्गुणो निष्क्रियोऽप्रभुः।
व्यापी मायोदरान्तःस्थो भोगोपायविचिन्तकः"॥

(उद्ध॰तं॰आ॰वि॰ खं॰ 6, पृ॰ 114)

~तत्त्वतः—– शिव एव स्वेच्छया स्वात्मानं सङ्कुचित-

मवभास्य तथा स्थितः, तथावभासमानोऽपि च न शिवादन्यः। यथा–

"अणवो नाम नैवान्यत् प्रकाशात्मा महेश्वरः॥
चिदचिद्रूपताभासी पुद्‌गलः क्षेत्रवित्पशुः।
चिद्रूपत्वाच्च स व्यापी निर्गुणो निष्क्रियस्तथा॥"

(तं॰आ॰ 9, 144-45)

गुणवृत्तिशून्यः शून्यरूपत्वाच्चाकर्तेति तात्पर्यमत्र बोध्यम्।

~व्यवहारे—— परिमितः प्रमाता, जीवः, पुद्‌गलः, पुरुषः, देही, समलश्च मायीयः प्रमाता। देह-प्राण-बुद्धि-शून्यान् जडान् पदार्थान् स्वात्मत्वेनाहमित्यभिमन्वानः कञ्चुकषट्कपरिच्छिन्नो वेदकतया स्थितो मितः प्रमाता। यथा–

"देहपुर्यष्टकाद्येषु वेद्येषु किल वेदनम्।
एतत्षटकसङ्कोचं यदवेद्यमसावणुः॥"

(तं॰आ॰ 9, 205)

द्र॰-(ष॰त्रिं॰तं॰सं॰पृ॰ 5, तथा ने॰तं॰ 19, 151 तः 153) इति च।

~वैशेषिके—— जडः परमाणुरेव, न जीवात्मा इति।

अणुसञ्चयवादः—— वैशेषिकाणां मतेऽवयविद्रव्यं न किमपि, अपि तु परमाणुसञ्चयविशेषाणामेव घटकपालपटतन्त्वादिसंज्ञाः।

~बहुदोषदुष्टः—— यथा–

"अणुसञ्चयबाह्यवादेऽपि सञ्चयस्यान्यस्याभावे अणव एव, ते च यदि संयुज्यन्ते निरन्तरतया तदवश्यं दिग्भागभेदः। देवनाक्षे (षट्पार्श्वके त्रसरेण्वादौ) षट्सु दिक्षु संचीयमाणेषु षट्स्वणुषु मध्यमस्य परमाणोर्यत्रैव धाम्न्येको लग्नस्तत्रैव यद्यपरस्तदेकपरमाणुमात्रता। अथान्यत्रैकोऽन्यत्रापरस्तदवश्यं भागभेदापत्तिरिति भाग एव परमार्थसत्।"

(ई॰प्र॰वि॰ खं॰ 1, पृ॰ 179-80)

अण्डम्—— (1) अनेकेषां तत्त्वभुवनादीनां कोशस्थानीयं बृहत्तरं प्रमेयतत्त्वम्। अनेकेषां तत्त्वानां पिण्डीभूता स्थितिरण्ड इत्युच्यते। यथा पक्षिणामण्डेषु शावकास्तथैव प्राकृतपार्थिवाद्यण्डेषु तानि तानि तत्त्वानि। यथा–

(क) "व्यक्तेरभिमुखीभूतः, प्रच्युतः शक्तिरूपतः।
आवापवाननिर्भक्तो वस्तुपिण्डोऽण्ड उच्यते॥"

(उद्ध॰तं॰आ॰ 8, 169)

(ख) "चिदानन्दैकघनेन 'प्रभुणा' स्वतन्त्रेण भगवता महेश्वरेण अण्डचतुष्टयं विश्वाच्छादकत्वेन कोशरूपतया वस्तुपिण्डभूतमिदम् यदुक्तम्- 'वस्तुपिण्डोऽण्डमुच्यते'-इति।"

(प॰सा॰वि॰ पृ॰ 9)

भुवनविभागस्थितिकारकं शुद्धसंविदावरणम्। तच्च शक्त्यन्तमेव। शिवस्यानावृतप्रकाशरूपत्त्वात्। यथा–

"अण्डञ्च नाम भुवनविभागस्थितिकारणम्॥
प्राहुरावरणं तच्च शक्त्यन्तं यावदस्ति हि"।

(तं॰आ॰ 11, 12-13)

~चतुरात्मकम्—— पार्थिवं, प्राकृतं, मायीयं, शाक्तं चेत्यण्डचतुष्टयमात्मन आवरणभूतं प्राणिनां चाश्रयभूतम्। यथा–

"पार्थिवं प्राकृतञ्चैव मायीयं शाक्तमेव च।
इति संक्षेपतः प्रोक्तमेतदण्डचतुष्टयम्॥"

(मा॰वि॰तं॰ 2, 49)

"भूमूलनैशशक्तिस्थास्तदेवाण्डचतुष्टयम्।"

(तं॰आ॰ 6, 170)

द्र॰ (प॰सा॰ 4) चापि।

(2) निवृत्यादिकलाचतुष्टयमेवाण्डचतुष्टयम्। यथा–

"निवृत्तिः पथिवीतत्त्वे प्रतिष्ठाव्यक्तगोचरे।
विद्या निशान्ते शान्ता च शक्त्यन्तेऽण्डमिदं चतुः॥"

(तं॰आ॰ 11, 8)

"एतदेवाण्डचतुष्टयं-पार्थिव-प्राकृत-मायीय-शाक्ताभिधम्।"

(तं॰सा॰ पृ॰ 110)

~तत्पतयः —— उक्ता यथा–

"पार्थिवे ब्रह्म, प्राकृते विष्णुः, मायीये पदे रुद्रः।"

(ई॰प्र॰वि॰वि॰ खं॰ 3 पृ॰ 277)

अतत्त्ववित्—— स्वात्मनः शिवाभेदमसंविदन् साधकम्मन्यः प्राणी। यथा–

"अहमन्यः परात्मान्यः शिवोऽन्य इति चेन्मतिः।
न मोचयेन्न मुक्तश्च सर्वमात्ममयं यतः।"

(तं॰आ॰ 28, 254-55)

अतिभवः—— (1) भवो मायान्तोऽध्वा, अभवस्ततः सदा शिवान्तोऽतिभवश्च तदूर्ध्वं शिवान्तः। यथा–

"त्रिविध इति मायान्त-सदाशिवान्त-शिवान्त भवाभवातिभवरूपे"

(ने॰तं॰उद्ध॰ खं॰ 1, पृ॰ 177)

(2) भवाभवाभ्यामतिरिक्तं तत्त्वम्। य आपेक्षिककारणतारहितो यश्च तथाविधकार्यतारहितः सोऽतिभवः। स च शिवो वा शिव-शक्तितत्त्वस्थः प्राणिवर्गो वा शाम्भव-शाक्तरूपः। कारणतात्र नियोक्तृता कार्यता च नियोज्यतेति व्याख्याते जयरथेन। यथा–

"पत्युरपसर्पति यतः कारणता कार्यता च सिद्धेभ्यः।
कञ्चुकवच्छिवसिद्धौ तावति भव संज्ञयाति मध्यस्थौ।"

(तं॰आ॰ 8, 354-355)

"कारणता-नियोक्तृत्वं, कार्यता नियोज्यत्वं...........तदपि हि तथा निवर्तत एवेति भावः। यतस्तौ शिवसिद्धौ 'अतिभव' रूपत्वादतिमध्यस्थौ- अत्युदासीनौ नियोज्य नियोक्तृतादिक्षोभशून्यौ भवतः।"

(तं॰आ॰वि॰ खं॰ 5, पृ॰ 236)

अतिमार्गम्—— अन्यत्र कापालिककालमुखादिमार्गोऽतिमार्ग इह पुनः साधारणजनताऽविषय अत्युत्कृष्टोऽद्वैतसाधनाक्रमः। यथा–

अतीतं बुद्धिभावानामतिमार्गं प्रकीर्तितम्।
लोकातीतं तु तज्ज्ञानमतिमार्गमिति स्मृतम्॥
लोकाश्च पशवः प्रोक्ताः सृष्टिसंहारवर्त्मनि।
तेषामतीतास्ते ज्ञेया येऽतिमार्गे व्यवस्थिताः॥

(स्व०तं० 11/182, 83)

अत्रिगुप्तः —— अभिनवगुप्तस्यासौ पूर्वजो ययं ललितादित्याख्यः सम्राट् कान्यकुब्जदेशात् कश्मीरानानीय श्रीनगर्यां वासयामास। अगस्त्यगोत्रोऽसौ पङ्क्तिपावनो ब्राह्मणः। 'गोप्ता ग्रामशताध्यक्षः इति प्राशासनिकपरिभाषानुसारं तस्यापि कोऽपि पूर्वजो गोप्ताभवद्, यतः प्रभृति तद्वंशजा 'गोप्तार' इत्युच्यन्ते स्म। तद् 'गोप्तृ' पदमेवाग्रे विकारमुपयातं सद् 'गुप्त' इति रूपमधारयत्। एवमेव ब्रह्मगुप्तविष्णुगुप्तादयो ब्राह्मणा गुप्तोपाह्वाः ततो नैते वैश्या अपितु ब्राह्मणाः। यथा–

"निःशेषशास्त्रसदनं किल मध्यदेश-
स्तस्मिन्नजायत गुणाभ्यधिको द्विजन्मा।
कोऽप्यत्रिगुप्त इति नामनिरुक्तगोत्रः
शास्त्राब्धिचर्वणकलोद्यदगस्त्यगोत्रः॥
तमथ ललितादित्यो राजा निजं पुरमानयत्
प्रणयरभसात् कश्मीराख्यं हिमालयमूर्धगम्॥"

(तं०आ० 37, 38-39)

"तस्मिन् कुबेरपुरचारिसितांशुमौलि-
साम्मुख्यदर्शनविरूढपवित्रभावे।
वैतस्तरोधसि निवासममुष्य चक्रे
राजा द्विजस्य परिकल्पितभूरिसंपत्"

(तदेव 37, 52)

क्वेदं सितांशुमौलिमन्दिरमभूत्प्रवरसेनपुरे (वर्तमानश्रीनगरे) इतीदानीं निश्चेतुं न शक्यते।

~गोत्रतः—— संशयित इवैष विषयो यदत्रिगुप्तोऽत्रिगोत्रीयो वाऽगस्त्यगोत्रीयो वेति। यथा–

"कोऽप्यत्रिगुप्त इति नामनिरुक्तगोत्रः।
शास्त्राब्धिचर्वणकलोद्यदगस्त्यगोत्रः॥"

(तं०आ० 37, 38)

अत्र केचिन्मन्यन्ते यज्जन्मनात्रिगोत्रः शास्त्राब्धिचर्वणकलया चागस्त्यगोत्र इति। अस्माकं गुरुवरैराचार्यामृतवाग्भवैः सिद्धपरम्परातो यज्ज्ञातं तदनुसारमगस्त्यगोत्र एव। 'अत्रिगुप्त' इति नाम्ना निरुक्तं गोत्रं प्रसिद्धं नाम यस्येति, शास्त्राब्धिचर्वणमेव कला यस्य सोऽगस्त्यगोत्रश्चेति परिकरालङ्कारनीत्या तस्य विशेषण विशेषोपादानम्। इति वाक्यांशयोर्व्याख्या।

~ब्राह्मणः —— अभिनवगुप्तस्तं 'भट्ट इति कथयति। 'भट्ट' इति च कश्मीरेष्वद्यापि ब्राह्मणनामेव संज्ञा। यथा–

"भट्टात्रिगुप्तकुलजातवराहगुप्त..........।"

(ई०प्र०वि०वि० खं० 3 पृ० 405)

कश्मीरिकभट्टानां ब्राह्मणत्वविषये प्रसिद्धस्य शिवोपाध्यायाभिधस्य शैवगुरोः कथनं यथा–

"महाब्राह्मणजातिर्या सोद्दिष्टा भट्टसंज्ञिका।"

(उद्ध०श्री०वि०वि०)

असौ प्राग्र्यजन्मा इत्युक्तः, तेन ब्राह्मणेष्वपि श्रेष्ठः इति। यथा–

"अन्तर्वेद्यामत्रिगुप्ताभिधानः प्राप्योत्पत्तिं प्राविशत् प्राग्र्यजन्मा।
श्रीकश्मीरांश्चन्द्रचूडावतारैर्निःसंख्याकैः पवितोपान्तभागान्॥

(प०त्रीं०वि० पृ० 280)

अवधेयम्–कश्मीरेषु 'महाब्राह्मणः' इति पदं नोपहास' व्यञ्जकम्, अपि त्वादरभिव्यञ्जकमेव वर्तते। जोनराजेनापि निज-राजतङ्गिन्यां न भट्टोऽहम्" इत्यत्र "भट्टलुण्ठनम्" इत्यत्र च प्रयोगद्वये काश्मीरब्राह्मणा एव भट्टपदेनोक्ताः। इदानीमपि ते ब्राह्मणाः भाषाशास्त्रीयवर्णविपर्ययादिकारणाद् "बटाः" इमे इति कथ्यन्ते जनताया भाषायाम्।

अदिव्यः —— सम्बन्धविशेषः शास्त्रावतारविषये। द्र० 'सम्बन्धः'~ इतरेतरः - इति।

अद्वयम्—— सर्वथाऽभेदः। यथा–

"शुद्धचिदपेक्षया सर्वस्याव्यतिरेकादद्वयमित्याशयः। न संविदपेक्षया, नाप्यन्योन्यापेक्षया भावानां भेदो युज्यते।"

(ई०प्र०वि०वि० खं० 3 पृ० 372)

~द्वैतेऽपि—— यथा–

"न ह्यद्वयं द्वयावेशबाधेनास्माभिरुच्यते।
त्वत्पक्षोपगमो ह्येष स्याद् द्वयं तद्धि सुस्फुटम्॥"

(मा०वि०वा० 1, 618)

द्वयमत्र नास्तीत्यद्वयमेतदिति चेत्ततो द्वयातिरिक्तं किमप्यद्वद्वम्; ततो द्वयमपि तदतिरिक्तं किमपीति 'द्वैतवाद' एवायं सिद्धयति। ततः शैवे नये द्वयमपि वस्तुतोऽद्वयशिवात्मकमेव, न तस्माद्भिन्नं किमपि।

द्र० 'पराद्वैतम्' इति।

अद्वयवादः —— "एकस्यैव। परशिवस्य विश्वात्मकतयावभासः" इत्येष दर्शनसिद्धान्तः। यथा–

"एक एव आत्मा ग्राह्यग्राहकतया नानारूपस्वभावः सन्, पुनरपि सर्वानुभवितृतया सर्वस्य एकतया प्रथते–इति न काचिदद्वयवादक्षतिः।"

(प०सा०वि०पृ० 23-4)

अद्वयसम्पत्तिः —— ह्रस्वनाथविरचितः कश्चन शैवशास्त्रग्रन्थः समुद्धृतो विज्ञानभैरवोद्योते। यथा–

"श्रीह्रस्वनाथेन हर्षदत्तसूनुनापि- 'अहुंकारमयी भूमिः' इत्यादिना अद्वयसम्पत्तौ।"

(वि०भै०उद्०पृ० 90)

सम्भवतोऽस्यैव शास्त्रस्योपरि वामनदत्ताचार्यैः 'अद्वयसम्पत्तिवार्तिक'नामकस्य ग्रन्थस्य निर्माणं कृतं भवेत्। स ग्रन्थोऽन्यत्र

समुद्धृतः क्वचित्। परं वामनदत्ताचार्योऽभिनवगुप्तात् प्राचीनो ह्रस्वनाथस्य च कालो न ज्ञायते। अतो विचारणीयमेवेदम्।

द्र० **'ह्रस्वनाथः'** इति।

अद्वयसम्पत्तिवार्तिकम्—— वामनदत्ताचार्यकृतो दर्शन-शास्त्रग्रन्थविशेषो य इदानीं नोपलभ्यते।

द्र० **'वामनदत्ताचार्यः'** इति।

अद्वयद्वादशिका—— कोऽपि शैवग्रन्थः। यथा–

"अद्वयद्वादशिकायामपि–
यद्यतत्त्वपरिहारपूर्वकं
तत्त्वमेषि तदतत्त्वमेव हि।
यद्यतत्त्वमथ तत्त्वमेव वा
तत्त्वमेव ननु तत्त्वमीदृशम्"

(उद्ध०मा०वि० पृ० 41)

अद्वयोल्लासः—— किमपि पराद्वैतप्रधानं दर्शनशास्त्रं महार्थ-मञ्जरीपरिमले ससमुद्धरणं समुल्लिखितम्। यथा–

"....यथा चाद्वयोल्लासे–
भ्रमः संसारो यत् कथमिव भवेन्मुक्तिरमुत–
स्त्वितीयं या वाञ्छा बत जडधियां सा प्रसरति।
त्वदन्यन्नास्तीति प्रभवदविकल्पाद्वयमतेः
स्थिरीकारो मोक्षो द्वितयघटना संसृतिरतः॥"

(म०मं०प० पृ० 24-25)

अद्वैतम्—— सर्वस्य प्रकाशाभिन्नत्वेन प्रकाशात्मकमेव सर्वम्। प्रकाशात्मकत्वेन वस्तुतः सर्वं प्रकाश एवेत्यद्वैतं सिद्धं भवति। यथा–

"संविद्विश्रान्ता हि भावाः प्रकाशमाना भवन्ति। प्रकाशमानता चैषां संविदभेद एव, प्रकाश एव हि संविद्यतः।"

(ई०प्र०वि०वि० खं० 1 पृ० 5)

"वेद्यराशिर्हि समस्त एवं प्रकाशादभिन्नः। यत् प्रकाशते तत् प्रकाशाभिन्नं संवित्प्रकाश इव। नहि प्रकाशभिन्नस्याप्रकाशमानस्य प्रकाशमानता युक्ता, विरोधात्।"

(तदेव)

द्र० **'अद्वयम्'** इति, **'अद्वयवादः'** इति, **'पराद्वैतम्'** इति, **'परमाद्वयम्'** इति, **'प्रत्यक्षाद्वैतम्'** इति च।

~आत्मनः —— जगद्रूपतयावभासमानोऽपि सर्वत्र प्रमातृतया प्रकाशमानः शिव एव सर्वत्र प्रकाशते। प्रमेयमपि प्रमातृप्रकाशे प्रकाशमानं सत् प्रकाशात्मकमेव वस्तुतः। यथा–

"पूर्णस्वरूपतापरित्यागेन भोक्तृ-भोग्य-स्वभावं पशुभावमापन्नोऽपि सर्वप्रमातृणामनुभवितृतया स्वात्मनि प्रस्फुरन् चिदानन्दैकघनः शिव एव॥"

(प० सा० वि० पृ० 17)

~तर्कयुक्तिः —— यथा–

"यो ह्यपर्यन्तप्रकाशविमर्शात्मा 'अहमिति' वेद्या वा भासभित्तिभूतः, तस्य वेद्यतारूपेदन्ताऽभावाद् देशकालभेदाभावे स्वरूपभेदाभावे चैकत्वं व्यापित्वं नित्यत्वं न यत्नान्तरमवलम्बते।"

(ई०प्र०वि०वि० खं० 1, पृ० 54)

~व्यवहारे—— यथा–

"ज्ञेयस्य न पृथक् किमपि तत्त्वम्, अपितु ज्ञेयता नाम ज्ञानमेव। तदपि नापरं किञ्चित्, अपितु प्रकाशरूपमेव स्वतन्त्रतया अहमिति विमर्शात्मकप्रमातृतत्त्वमयम्।"

(ई०प्र०वि०वि० खं० 2 पृ० 320)

~सत्कार्यवादतः —— परमेश्वर एवं स्वयं तत्तत्कार्यरूप-तयाऽऽभासते स्वशक्त्या। नाविद्यमानं किमपि समुत्पद्यते, न चापि विद्यमानं नश्यति किमपीति सिद्धान्तः। यथा–

"मणाविन्द्रायुधे भास इव नीलादयः शिवे।
परमार्थत एषां तु नोदयो न व्ययः क्वचित्॥"

(तं०आ० 11, 110)

द्र० 'सत्कार्यवादः' इति।

~शङ्कासमाधानतः—— यास्ताः पूर्वपक्षिभिरुत्थापिताः शङ्का अद्वैतवादं प्रति तासामेकैकशो निरसनं शिवदृष्टौ तृतीय आह्निके त्रयस्त्रिंशत्तमां कारिकामारभ्य नवनवतितमां कारिकां यावत्तद्वृत्तौ च विस्तरतः कृतम्। तच्च तत्रैव द्रष्टव्यम्। तत्र विंशतिधा आक्षेपास्तत्संख्यानि च समाधानानि।

(शि०दृ०आ० 3-21 तः 99)

(शि०तृ०वृ०आ० 3 पृ० 107 तः 142)

अद्वैतयजनम्—— सकलेन्द्रियवृत्तिभिः स्वात्मशिवाय तत्तद्विषयजातार्पणम्, तेन च स्वात्मचिदानन्दोल्लासोत्तेजनम्। यथा–

"द्रवद्द्रव्यसमायोगात् स्नपनं तस्य जायते॥
गन्धपुष्पादिगन्धस्य ग्रहणं यजनं मतम्।
षड्रसास्वादनं तस्य नैवेद्याय प्रकल्पते॥
यमेकोच्चारयेद्वर्णं स जपः परिकीर्तितः।
तत्र चेतः समाधाय दह्यमानस्य वस्तुनः॥
ज्वालाक्रान्तस्तिष्ठते यावत्तावद्धोमः कृतो भवेत्।
यदेव पश्यते रूपं तदेव ध्यानमिष्यते॥
प्रसङ्गादिदमुद्दिष्टमद्वैतयजनं महत्।

(मा०वि०तं० 18, 44-48)

द्र० 'सवर्णस्तप' इति।

अद्वैतशैवदर्शनम्—— सौरभर्गशिख्यादिषडागमानुसारं प्रवृत्तं भैरवागमसंवादिरौद्रशैवागमसम्बद्धं मुख्यतः पराद्वैतसिद्धान्तप्रवणं, प्रयोगपक्षे त्रिकाख्यागमानुसारि पारमैश्वर्यसिद्धान्तपरिपोषकं पदागमिकं शैवदर्शनं यत् प्रागैतिहासकाद् युगादेव भारते वर्षे प्रवर्तमानं सन् मध्यकाले यदोच्छिन्नप्रायमभूत् पुनश्च यत् सिद्धेन त्र्यम्बकादित्येन शिष्यपरम्परायां प्रवर्तितं सत् क्रमेण कश्मीर-मण्डलं प्रविष्टं तत्रैव च सुप्रवृद्धमत एव हि वर्तमाने युगे

"कश्मीरशैवदर्शनम्" इति नाम्ना ख्यातं वर्तते। अस्याभिधानान्तराणि—त्रयम्बकमठिकादर्शनम्; पराद्वैतशैवदर्शनम्; त्रिकदर्शनम्; प्रत्यभिज्ञादर्शनम्; कश्मीरशैवदर्शनम् शिवाद्वैतदर्शनम्, ईश्वराद्वैतम् इत्यादीनि।

~इतिहासपक्षतः —— इतिहासतत्त्वविदां विदुषां मतमेतद् यन्मूलतः शैवधर्मस्तेषां भारतमूलनिवासिनां धर्मो ये सिन्धुनदीप्रदेशे तस्मिन् युगे निवसन्ति स्म यस्मिन् युगे ऋग्वेदीयाः आर्याः भारतभूमौ प्रविश्यात्रोपनिविष्टाः। तेषां भारतमूलनिवासिनां सभ्यताया येऽवशेषाः 'मोहञ्जोदडो' प्रभृतिषु बहुषु स्थानेषूत्खननेन लब्धः पुरातत्त्वान्वेषिभिस्तैरेतानीतिहासतत्त्वानि स्पष्टीभवन्ति—

1. प्रागैतिहासिकेषु युगेषु पश्चिमभारतनिवासिनो जनाः 'लिङ्गमुद्रापूजकाः; योनिमुद्रापूजकाः; शिवोपासकाः; विविधकारशक्तिप्रतिमापूजकाः; योगाभ्यासनिष्णाताः; यन्त्रोपासनापराः, दुर्गावृतेषु नगरेषु निवसन्तः; पशुधनधान्यादिसमृद्धाः; सुसभ्याश्च अभूवन्। तेषाञ्च सभ्यता नगरोचिता।

2. तत्राग्निपूजाया यज्ञपात्रादीनाञ्च न कोऽप्यवशेषः क्वापि लब्धोऽद्यावधि केनापि। पशुधनविषये तत्र गोमहिषबलिवर्दप्रभृतीनां बाहुल्यस्य प्रमाणानि भूयांसि लभ्यन्ते परमश्वस्य विद्यमानतायाः न किमपि चिह्नं क्वापि दृष्टं केनापि।

3. ऋग्वेदस्याध्ययनैतानीतिहासतत्त्वानि स्पष्टतामुपयान्ति—

1- वैदिका आर्याः बहुदेवतोपासका अभूवन् ऐकेश्वरवादस्तावद् ऋग्वेदस्य प्राचीनतरेषु भागेषु नैव क्वापि लभ्यते। ते च भागाः द्वितीयान्मण्डलादारभ्याष्टमं मण्डलं यावद् वंशमण्डलेति नाम्नेदानीं ख्याताः।

2- ऋग्वेदीयाः आर्याः योगासनभिज्ञा अभूवन् योगाभ्यासार्थे योगपदस्य प्रयोगो नैव क्वापि लभ्यते ऋग्वेदे, अद्वैतवादोऽपि तेषु मण्डलेषु न क्वापि प्रतिपादितो लभ्यते। तस्य स्फुटोपलब्धिदशमे मण्डले पुरुषसूक्ते वागम्भृणीये च सूक्ते निर्विवादा, प्रथममण्डली येऽस्यवामीये सूक्तेऽपि किञ्चिन्मात्रा लभ्यते।

4- ऋग्वेदीयानामार्याणां ये घोराः शत्रवस्ते लिङ्गपूजका; यतस्तत्र वेदे स्थानद्वये शिवदेवानां निन्दा कृता लभ्यते।

5- तेषां ते शत्रवो दुर्गपरिवेष्टितेषु महत्सु पुरेषु निवसन्ति स्म। तेषामेव पुराणां विध्वंसकत्वेनेन्द्रस्य प्राधान्यमृग्वेदीयेषु सूक्तेषु बहुधा गीतं वर्तते।

6- वैदिकानामार्याणां पशुसम्पदि तावदश्वानामपि तथा विधमेव महत्त्वं यथाविधं गवाम्। अश्वस्तु तेषां साङ्ग्रामिको पशुः। तद्दृष्ट्या तस्याधिकं महत्त्वम्।

उभयेषामितिहासतत्त्वानां तुलनात्मकेनाध्ययनेन निम्नाङ्किता-नीतिहासतत्त्वानि निर्मथ्यन्ते पुरातत्त्वविद्भिर्विद्वद्भिः—

1- ऋग्वेदस्यार्वाक्तनानां भागानां (प्रथमदशममण्डलसूक्तानाम्।) निर्माणकाले वैदिकानामार्याणां पश्चिमभारतस्य मूलनिवासिनाञ्च परस्परं पर्याप्तं सम्मिश्रणं सञ्जातमभूत्। तत्फलत्वेन मूलनिवासिभिर्निजधर्ममत्यजद्भि वैदिको धर्मो वैदिकी च समाजव्यवस्था स्वीकृता।

2-वैदिकैरार्यैस्तेषां सकाशादधोलिखितानि धर्मदर्शनतत्त्वानि गृहीतानि क्रमेण—

(क) योगाभ्यासः; (ख) एकेश्वरवादः, (ग) अद्वैतवादः, (घ) शिवशक्त्युपासना (ङ) (मूर्ति-लिङ्ग-यन्त्राद्युपासना।)

3- अनुमीयते यदश्वारोहिणां सैन्यानामेव बलेन वैदिकैरार्यैः सिन्धुसभ्यतासम्बन्धिनो मूलनिवासिनः पराजिताः, तत एव शूरवीरैर्यज्ञेषु, बलिपशुत्वेनाश्व एव विशेषेण वृतो येनाश्वमेधप्रथा तेषु प्रचलिताऽभवत्।

4- भारतमूलनिवासिनां सर्वेश्वरपदस्थितस्य पशुपतेरुपासना आर्यैरपि प्रारब्धा तस्य चैक्यं तैः ऋग्वेदीयेन रुद्रेण कृतम्। अत एव कालान्तरे यजुर्वेदीयो रुद्र एव वैदिकेषु देवेषु प्राधान्यं लब्धवान्, इन्द्रश्च गौणां स्थितिं प्राप्तवान्। एष प्रभावो मूलनिवासिनमेवासीधे प्रजासु बहुतरसंख्याका अभूवन् सभ्यतादृष्ट्या चोन्नत आसन्।

अत्र गृह्यसूत्रविधिविशेषे महाभारतीयञ्च दक्षोपाख्यानमपि प्रमाणदार्ढ्यसम्पादकत्वेनोदाह्रियेते, तथाहि—

'गृह्यसूत्रेषु देवत्वेन स्वीकृतस्यापि रुद्रस्यामाङ्गलिकत्वमेव मतं तैः सूत्रकारैः विनाशकारित्वात्तस्य। ततस्तस्मै पशुबलिर्यज्ञवेदिकाया बहिः पशुशालासु दीयते स्म। दक्षोपाख्यानानुसारमपि पूर्वं रुद्राय यज्ञबलिदानस्य न कोऽपि विधिरभूत्, परमनन्तरं रुद्रेण यदा स्वबलं प्रदर्शितं तदा प्रजापतिना तस्मै यज्ञभागदानस्य निर्णयः कृतः।

एतेनानुमीयते यत् पूर्वं विजयशीला आर्याः मूलनिवासिनां सर्वेश्वरत्वेन सम्मतस्य पशुपतेः शिवस्य वैदिकेषु देवेष्वमाङ्गलिकेन देवेन रुद्रेण साकमेकीकारं कृतवन्त इति। न च तदानीं वेदिषु तस्मै बलिं ददति स्म। परं पश्चान्मूलनिवासिनां प्रभवातिशयेन प्रभाविताः सन्तस्तस्य रुद्रस्यापि माङ्गलिकत्वमेव स्वीकृतवन्तो, वेद्यां यज्ञभागार्हत्वञ्च। अनन्तरं यजुर्वेदीये युगेऽसौ रुद्र एव वैदिकेषु देवेषु प्रधानतमं स्थानमलभत, किञ्च शिवः, शिवतरः, शङ्करः, मयस्करः इत्येवंविधैरतिमाङ्गलिकैनामभिरस्तूयत आर्यैर्मूलनिवासिभिश्च सर्वैरपि मिलित्वा।

एवंविधानामेतेषामितिहासतत्त्वानां सम्यग् विचारणेनाधस्तनानि तथ्यान्यनुमातुं शक्यन्ते—

(1) पश्चिमभारतस्य मूलनिवासिनां सभ्यता सुविकसिता नागरिकी सभ्यताऽभवत्। तदानीन्तनानाम् आर्याणां सभ्यता चरतां पशुपालानां सभ्यताऽभूत्।

(2) भारतस्य मूलनिवासिनः एकेश्वरवादिनः पाशुपताः शैवा अभूवन्।

(3) तैरुत्कृष्टतरस्य योगस्याभ्यासेन परमाद्वैत-दर्शनतत्त्वं साक्षात्कृतमभूत्।

(4) तान्त्रिकी साधना तेषु प्रचलन्त्यासीत्।

(5) आक्रमणकारिभिर्वैदिकैरार्यैरश्वरोहिणां सैन्यानां बलेन यदा ते विजितास्तदा ते तेषामाधिपत्यं स्वीकृतवन्तः। अश्वमेधप्रथा

च तदा प्रभृत्येव प्रवृत्ता रणशूरेष्वार्येषु।

(6) तदानीन्तना वैदिका आर्या बहुदेवतोपासका यज्ञैर्देवतार्चनं कुर्वन्ति स्म।

(7) जयशीलास्ते आर्याः अपि मूलनिवासिनां समुत्कृष्टतरायाः नागरसभ्यतायाः प्रभावेण तद्वशतामायाताः केनापि कालेन, स्वीकृतवन्तश्च सर्वेश्वरत्वेन भगवन्तं पशुपतिं शिवं परमेश्वरम्। पूर्वञ्च तं रुद्रनाम्ना व्यवाहरन्, परं पश्चात्तं शिवशङ्करादिपरममाङ्गलिकैर्नामभिरुपासितवन्तः इति। प्राचीनानां हिन्दुधर्मग्रन्थानाम् अध्ययनेन इमानि इतिहासतत्त्वानि भूयः स्पष्टतामुपयान्ति।

भारतमूलनिवासिभिः सहार्याणां सम्मिश्रणे सम्यक्सम्पन्ने सति पारस्परिकेण प्रभावेणाग्रेऽद्वैतवादपराः शैवदर्शनसिद्धान्ता एवौपनिषद्दर्शनतया प्रकटीभूताः योगाभ्यासतत्त्वमपि क्रमेणोपनिषत्सु प्रविष्टम्। महाभारतीये युगे विष्णुरुद्रयोर्द्वयोरेव देवयोर्विशेषं माहात्म्यं प्रख्यातमभवत्–

(1) जगद्विधानप्रशासकस्य, देवमानवरक्षकस्य, असुर-रक्षोविनाशकस्य च वासुदेवोपर पर्यायस्य विष्णोः; (2) सर्वतः स्वच्छन्दस्वभावस्य स्वभक्तेष्वसुर-सुर-मानवेषु सममनुग्रहकारिणः, दुष्टेषु समं निग्रहकारिणं दैवतविधानापराधीनस्य स्वतन्त्रस्य शिवस्य च। किञ्च महाभारते शिवोपासकानां चरितेषु पाशुपतपरम्परायाः सत्तापि प्रवहन्त्येव सिद्ध्यति।

कालान्तरे यदा क्रमेण शैवशास्त्रस्य प्रचारः प्रक्षीणताममुपयातस्तदा कैलासवासिनः श्रीकण्ठनाथस्याज्ञया काले-काले सिद्धजना अवातरन् भूमण्डलं शैवशास्त्रं पुनः प्रचारयितुम्। तदनुसारं भेददृष्टिप्रधाना दक्षशैवागमाः, भेदाभेददृष्टिप्रधाना अष्टादश रुद्रागमाः, सर्वथाऽभेदप्रधानाश्च चतुष्षष्टिर्भैरवागमाः प्रादुरभूवन्नत्र भूतले। कलौ युगे चात्यन्तसमुत्कृष्टानां साधकानां हिताय सरलराजयोगप्रधानान्, भक्तिप्रवणाँश्च शैवयोगविधीन् प्रकाशयितुं कैलासवासिनः शिवस्याज्ञया त्रयः सिद्धा भुवमवातरन्। तेषां मध्ये अमर्दकाचार्येण द्वैतदृष्ट्या, श्रीनाथाचार्येण द्वैताद्वैतदृष्ट्या, आचार्यत्र्यम्बकादित्येन च पराद्वैतदृष्ट्या शैवशास्त्राण्युपदिष्टानि। त्रयम्बकादित्यस्य स्थानं कैलासपर्वतम्। गुरुश्च तस्य भगवान्दुर्वासाः। तस्य वंशे षोडशकः पुत्रः सङ्गमादित्यः कश्मीरानागत्यात्रैव समुपनिविष्टः। तस्य शिष्यपरम्परायां पुत्रपरम्परायाञ्चाविरभूवंस्ते त्र्यम्बकमठिकांगुरवो यैरुर्ध्वोर्ध्वस्रोतःस्थाः षडागमाः श्रीकण्ठनाथानुग्रहेण प्राप्ताः। ते च सौरभर्गशिखाद्याः। तेषां मध्ये पूर्वाहेभागिनस्त्रयः। ते च सिद्धावामक-मालिन्याख्या आगमाः षडर्धसंज्ञया, त्रिक्संज्ञया च प्रसिद्धाः। तदाधारतयेव श्रीसोमानन्दादिभिराचार्यैः पराद्वैतदर्शनस्यास्य परिपूर्णं निरूपणं कृतं सिद्धान्तविषये, योगसाधनाविषये, क्रियाकलापविषये च। तदेवाद्वैतशैवदर्शनमिदानीं 'कश्मीर-शैव-दर्शनम्' इत्युच्यते, यतः कश्मीरेष्वेवास्य वाङ्मयस्य परिपूर्णो विकासः सञ्जातः।

~ग्रन्थकाराः (कालक्रमतः)––

सं०	आचार्यः	कालः	ग्रन्थादिकम्
1.	दुर्वासा मुनिः	चिरञ्जीवी	1-परशम्भुमहिम्नस्तवः, 2-त्रिपुरामहिम्नस्तोत्रम्, 3-ललिताम्बास्तवरत्नम्।
2.	आदिनाथः	?	1-अनुत्तरप्रकाशपञ्चाशिका।
3.	शिवानन्दनाथः	अष्टमं शतकम्	केयूरवतीप्रभृतीनां गुरुः, उत्तरपीठाधिपः, कालीनयसाधनाक्रमस्य प्रवर्त्तकः, अस्य वाक्यानि समुद्धृतानि तन्त्रालोकविवेके तृतीये खण्डे।
4.	वसुगुप्तः	नवमशतकारम्भः	शिवसूत्रस्य प्रकाशयिता स्पन्दसिद्धान्तस्य विकासयिता, भट्टकल्लटादीनां गुरुः।
5.	भट्टनारायणः	नवमशतकारम्भः	स्तवचिन्तामणिः।
6.	भट्टकल्लटः	नवमशतकमध्यम्	1-स्पन्दकारिका, 2-स्पन्दवृत्तिः, विनष्टा ग्रन्थाः- 1-तत्त्वार्थचिन्तामणिः, 2- मधुवाहिनी, 3-तत्त्वविचारः, 4-स्वस्वभावसम्बोधनम्।
7.	सोमानन्दः	नवमं शतकम्	1-शिवदृष्टिः, 2-परात्रींशिकाविवृत्तिः (विनष्टा)।
8.	उत्पलदेवः	नवमं शतकम्	1-ईश्वरप्रत्यभिज्ञा। 2-ईश्वरप्रत्यभिज्ञावृत्तिः। 3-ईश्वरप्रत्यभिज्ञाविवृत्तिः। (दुष्प्राप्या) 4-अजडप्रमातृसिद्धिः। 5-ईश्वरसिद्धिः। 6-सम्बन्धसिद्धिः। 7-अजडप्रमातृसिद्धिवृत्तिः। (विनष्टा) 8-ईश्वरसिद्धिवृत्तिः। 9-सम्बन्धसिद्धिवृत्तिः। 10-शिवदृष्टिवृत्तिः (खण्डशो नष्टा) 11-शिवस्तोत्रावलिः। 12-अज्ञातनामानोऽपि ग्रन्थाः।

9.	रामकण्ठः	नवमं शतकम्	1-स्पन्दविवृत्तिः। 2-भगवद्गीताभाष्यं सर्वतोभद्रम्।
10.	भट्टभास्करः	दशमं शतकम्	1-शिवसूत्रवार्तिकम्
11.	वामनदत्ताचार्यः	दशमं शतकम्	1-संवित्प्रकाशः (विनष्टः) 2-अद्वयसम्पत्तिवार्तिकम् (विनष्टम्)
12.	भट्टदिवाकरः वत्सः	दशमं शतकम्	1-विवेकाञ्जनम् (विनष्टम्) 2-कक्ष्यास्तोत्रम्। (विनष्टम्)
13.	उत्पलवैष्णवः	दशमं शतकम्	स्पन्दप्रदीपिका।
14.	अभिनवगुप्तः	950तः 1050	एतैर्बहवो ग्रन्था लिखिताः। तेषु मुख्या यथा— 1-ईश्वरप्रत्यभिज्ञाविमर्शिनी, 2-ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी, 3-तन्त्रालोकः, 4-तन्त्रासारः 5-मालिनीविजयवार्तिकम्, 6-परात्रींशिकाविवरणम्, 7-परमार्थसारः, 8-बोधपञ्चदशिका, 9-परमार्थचर्चा, 10-भैरवस्तोत्रम्, 11-अनुत्तराष्टिका, 12-क्रमस्तोत्रम्। विनष्टाः ग्रन्थाः यथा— 1-शिवदृष्ट्यालोचनम् 2-अजडप्रमातृसिद्धिविमर्शिनी, 3-ईश्वरसिद्धिविमर्शिनी 4-सम्बन्धसिद्धिविमर्शिनी, 5-क्रमकेलिः, 6-पूर्वपञ्चिका, 7-शिवशक्त्यविनाभावस्तोत्रम्।
15.	क्षेमराजः	एकादशं शतकम्	1-स्पन्दसंदोहः, 2-स्पन्दनिर्णयः, 3-शिवसूत्रविमर्शिनी, 4-स्तवचिन्तामणिविवृत्तिः, 5-स्वच्छन्दोद्द्योतः, 6-नेत्रतन्त्रोद्द्योतः, 7-शिवस्तोत्रावलिटीका, 8-प्रत्यभिज्ञाहृदयम्, 9-साम्बपञ्चाशिकाटीका, 10-पराप्रवेशिका।
16.	अभिनवगुप्त विशेषः	एकादशं शतकम्	1-तन्त्रवटधानिका।
17.	योगराजः	एकादशं शतकम्	1-परमार्थसारविवृत्तिः।
18.	जयरथः	द्वादशं शतकम्	1-तन्त्रालोकविवेकः।
19.	शितिकण्ठः	त्रयोदशं शतकम्	1-महानयप्रकाशः।
20.	नागार्जुनः	त्रयोदशं शतकम्	1-परमार्चनत्रिंशिका 2-चित्तसन्तोषत्रिंशिका।
21.	महेश्वरानन्दः	14 शतकम्	1-महार्थमञ्जरीपरिमलः।
22.	लल्लेश्वरी	14 शतकम्	1-लल्लवाक्यानि (कश्मीरभाषायाम्)
23.	साहिबकौलः	सप्तदशं शतकम्	1-शिवजीवदशकम्, 2-कल्पवृक्षप्रबन्धः, 3-सच्चिदानन्दकन्दली, 4-देवीनामविलासः।
24.	शिवोपाध्यायः	अष्टादशं शतकम्	1-विज्ञानभैरवोद्द्योतः, 2-श्रीविद्यानिर्णयः, 3-शिवरात्रिनिर्णयः।
25.	भास्करकण्ठः	अष्टादशं शतकम्	1-ईश्वरप्रत्यभिज्ञाविमर्शिन्याः 'भास्करी' नाम्नी विस्तृता व्याख्या।
26.	मनसारामः	एकोनविंशं शतकम्	1-स्वातन्त्र्यदीपिका।
27.	अमृतवाग्भवाचार्यः	विशं शतकम्	1-आत्मविलासः, 2-विंशतिका शास्त्रकम्, 3-सिद्धमहारहस्यम्, 4-वस्तुस्थितिप्रकाशः, 5-महानुभवशक्तिस्तोत्रम्।
28.	बलजिन्नाथः	विशं शतकम्	1-स्वातन्त्र्यदर्पणः।
29.	रामेश्वर झा	विशं शतकम्	1-पूर्णता प्रत्यभिज्ञा।

~ग्रन्थाः (मुख्याः)----

'क' आगमग्रन्थाः—

(1) मालिनीविजयोत्तरतन्त्रम्, (2) स्वच्छन्दतन्त्रम्, (3) नेत्रतन्त्रम्, (4) विज्ञानभैरवागमः, (5) परात्रींशिका, (6) शिवसूत्रम्।

'ख' दर्शनग्रन्थाः—

(1) शिवदृष्टिः (वृत्तिसहिता), (2) ईश्वरप्रत्यभिज्ञा (सवृत्तिका), (3) सिद्धित्रयी (वृत्तिसहिता), (4) ईश्वरप्रत्यभिज्ञाविमर्शिनी, (5) ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी, (6) मालिनीविजयवार्त्तिकम्, (7) महार्थमञ्जरीपरिमलः, (8) कल्पवृक्षप्रबन्धः।

'ग' साधनाग्रन्थाः—

(1) स्पन्दकारिका, (2) स्पन्दवृत्तिः, (3) स्पन्दविवृत्तिः, (4) स्पन्दप्रदीपिका, (5) स्पन्दनिर्णयः, (6) स्पन्दसन्दोहः, (7) शिवसूत्रविमर्शिनी, (8) शिवसूत्रवार्त्तिकम् (भास्करीयम्), (9) शिवसूत्रवार्त्तिकम् (वरदराजीयम्), (10) विरूपाक्षपञ्चाशिका।

'घ' त्रिकाचारग्रन्थाः—

(1) तन्त्रालोकः, (2) तन्त्रसारः, (3) तन्त्रवटधानिका, (4) विज्ञानभैरवोद्द्योतः, (5) परात्रींशिकाविवरणम्।

‘ङ’ शास्त्रप्रवेशकाः ग्रन्थाः–

(1) बोधपञ्चदशिका, (2) परमार्थचर्चा, (3) परमार्थसारः, (4) पराप्रावेशिका, (5) षट्त्रिंशत्तत्त्वसन्दोहः, (6) स्वातन्त्र्यदीपिका, (7) स्वातन्त्र्यदर्पणः, (8) पूर्णताप्रत्यभिज्ञा।

‘च’ स्तोत्रग्रन्थाः–

(1) परशम्भुमहिम्नस्तवः (न तु पुष्पदन्तकृतो महिम्नस्तवः), (2) त्रिपुरामहिम्नस्तोत्रम्, (3) ललितास्तवरत्नम्, (4) स्तवचिन्तामणिः, (5) शिवस्तोत्रावलिः, (6) भैरवस्तोत्रम्, (7) क्रमस्तोत्रम्, (8) अनुत्तराष्टिका, (9) देहस्थदेवताचक्रस्तोत्रम्, (10) अनुभवनिवेदनस्तोत्रम्, (11) भावोपहारः, (12) परमार्चनत्रिंशिका, (13) चित्तसन्तोषत्रिंशिका, (14) श्रीपञ्चस्तवी, (15) सुभगोदयस्तुतिः, (16) सौन्दर्यलहरी (वेदान्तनिर्मितत्त्वेऽप्यद्वैतशैवदर्शनानुसारित्वमस्यान्तिमस्तोत्रद्वयस्य 15, 16 इति), (17) मन्दाक्रान्तास्तोत्रम्, (18) महानुभवशक्तिस्तोत्रम्।

‘छ’ नूतनशैवग्रन्थाः–

(1) आत्मविलासः (सुन्दरीयुतः), (2) विंशतिकाशास्त्रम्, (3) सिद्धमहारहस्यम्, (4) वस्तुस्थितिप्रकाशः, (5) स्वातन्त्र्यदर्पणः।

‘ज’ कौलग्रन्थाः–

(1) कुलार्णवतन्त्रम्, (2) देवीरहस्यागमः, (3) महार्थमञ्जरी (परिमलसहिता), (4) कामकलाविलासः, (5) वातूलनाथसूत्रम्, (6) महानयप्रकाशः।

~विशेषपरिचयतः––

1- भारतीयदर्शनशास्त्रेषु षड् दर्शनानि वैदिकानि, बौद्धार्हतादीनि, श्रमणदर्शनानि, वैष्णवानि भक्तदर्शनानि, शैवदर्शनानि चागमिकानि दर्शनानि। तेष्वपि शुद्धमागमिकं दर्शनं कश्मीरशैवदर्शनम्। आगमिकं सदपि नैतद्दर्शनं वैदिकधर्मपरम्पराविघातकं वीरशैवदर्शनवद्वा, बौद्धजैनवद्वा, नाप्यैतद्दर्शनं स्वात्मानं वैदिकवेषावगुण्ठितमिव प्रकाशयति वैष्णवदर्शनशाखा भेदवत्, न चापि वेदाविरोधमात्रेण सन्तुष्टं सिद्धान्तशैववद्, अपि तु वैदिकधर्मपरम्परापरिपोषकं सदपि निजमागमिकमेव स्वरूपं प्रकटयदेव सुशोभते।

2- मीमांसावैशेषिकादीनि दर्शनानि प्रमेयजातस्य स्वभावस्यान्वेषणपराणि सन्ति प्रमेयदर्शनानि। न्याय-सांख्य-बौद्ध-वेदान्तादिदर्शनानि वस्तुतत्त्वविषये प्रामाणिकविवेचनप्रधानानि सन्ति प्रमाणदर्शनानि। पातञ्जलं योगदर्शनं प्रमातुः स्वरूपस्यान्वेषकं सत् प्रमातृदर्शनम्। परं जीवरूपस्यैव प्रमातुः स्वरूपं विवेचयत्तदमुख्यं प्रमातृदर्शनम्। मुख्यं च प्रमातृदर्शनमद्वैतशैवदर्शनमेव, यतस्तदेव प्रमातुः परिपूर्णशिवरूपताया दर्शनं प्रधानीकरोति। अत्र शाम्भवादियोगाभ्यासेन यत् स्वात्मनः परिपूर्णं परमेश्वरत्वमपरोक्षतया साक्षात्क्रियते, तदेव ह्यात्मदर्शनत्वेनाङ्गीक्रियेत मुख्यया वृत्त्या, यच्च शब्दात्मकं तस्य दर्शनस्य प्रतिपादनं, यच्च प्रमाणोपन्यासेन तद्विवेचनं तत् सर्वममुख्यतयैव दर्शनमिति स्वीक्रियते, साक्षात्कारात्मकस्य मुख्यस्य दर्शनस्योपायभूतत्त्वेनेति प्रमातृदर्शनमेतन्मुख्यम्।

3- अन्येषु, विशेषतः प्रमाणदर्शनेषु, तर्कस्य प्राधान्यम्, अत्र पुनराध्यात्मिक्या अपरोक्षरूपाया अनुभूतेः प्राधान्यं तर्कस्य च तदवबोधनमात्रे साहाय्यकरणेन, परेषाञ्च शङ्कानां निवारकत्वेनानुभूतेरधीनत्वमेव।

4- अन्येषां दर्शनानां दृष्टौ- “किं स्वीकार्यङ्किं न स्वीकार्यं, किं कल्पनीयं किं चाकल्पनीयत्वेन स्वीकार्यम्?” इत्येवंप्रकाराया विवेचनाया बाहुल्यम्। अत्र पुनर्दर्शने यद्वस्तुतोऽस्ति, यच्च स्वयं स्वमहिम्नैव प्रकाशते तस्यैव योऽपरोक्षः साक्षात्कारस्तदनुसारमेव कल्पिताकल्पितादिवस्तुजातवर्णनम्। ततः साक्षाद् दृष्टस्य वस्तुतत्त्वस्य तथाप्रतिपादनमेव प्राधान्यं भजतेऽत्र। तत इदं दर्शनं वस्तुतो दर्शनमेव मूलतो न तु कल्पनाश्रितं तर्कबहुलं वादविवादादि।

5- अद्वैतशैवदर्शनदृष्ट्या सर्वमपीदं जगद् वस्तुत एकमेव तत्त्वम्। तच्च तत्त्वं पारमैश्वर्यस्वभावं शुद्धमपरिच्छिन्नञ्च संवित्तत्त्वम्। तदेव स्वस्वभावभूतस्य पारमैश्वर्यस्य महिम्ना स्वयमेव स्वेच्छाया स्वलीलाविलासतो द्वैतरूपतयाऽद्वैतरूपतया, द्वैताद्वैतरूपतया, शुद्धतयाऽशुद्धतया, बन्धमोक्षरूपतया, स्वर्गनरकादितया, धर्माधर्मतया इत्यादिप्रकारकानन्तवैचित्र्यरूपतया सदा स्वयमेव नटवदाभासते। सैषा सर्वत्रैकमेव परमशिवात्मकं तत्त्वं साक्षात् पश्यन्ती सुप्रबुद्धानां शैवसिद्धानां दार्शनिकी दृष्टिः पराद्वैतमयी। अस्यां दृष्टौ शुद्धं ब्रह्म, अशुद्धञ्च मायाऽविद्यावासनाप्रभृति सर्वमेकमात्रपरमशिवतयैव दृश्यते। एतदभिप्रायेणैव सोमानन्दनाथकृतस्य दार्शनिकशैल्या विरचितस्य प्रथमस्य शैवदर्शनग्रन्थस्य नामकरणं शिवदृष्टिरिति।

6- पराद्वैतरूपं परं तत्त्वं तावच्चिदेकघनम्। असौ चिदपरिमिता, सर्वभावपरिपूर्णा, सर्वैश्वर्यस्वभावा, समस्तशक्त्येकघनस्वरूपा, सदा परिपूर्णा, स्वतन्त्रा सर्वथा च शुद्धा संवित्। चिद्रूपा सत्यसौ सदैव स्वेनैव प्रकाशेन प्रकाशमाना सती शुद्धचित्प्रकाशरूपा। चित्प्रकाशश्चासौ स्वस्वभावत एव विमर्शात्मकः। अतो विमर्शनस्वभावासौ स्वात्मानं स्वं च पारमैश्वर्यात्मकं स्वभावं विमृशति सततम् “अहम्” इति। सैषाऽपरिमितप्रकाशविमर्शात्मकता परस्य तत्त्वस्य शुद्धसंविद्रूपता।

7- मूलभूतस्य शुद्धसंवित्तत्त्वस्य प्रकाशरूपता तस्य ज्ञानात्मकता, विमर्शरूपता च क्रियात्मकता। ज्ञानमपि वस्तुतः क्रियात्मकमेव। तत एव जानातीत्यादौ तस्यापि पुरुष-वचन-लकारादिसम्बन्धः। तत्र ज्ञानात्मिका प्रकाशरूपता परस्य तत्त्वस्य शिवता, विमर्शात्मिका क्रियारूपता च तस्य शक्तिता। ततः परं तत्त्वं शिव-शक्त्येकघनम्। अन्तर्मुखतायां तत्तत्त्वं शिवरूपं, या च तस्य बहिर्मुखप्रसारोन्मुखता स्वाभाविकी सैव तस्य शक्तिरूपता। ततः परं तत्त्वं शिव-शक्त्येकघनम्।

8- परस्याश्चिद्रूपायाः संविदो नैसर्गिक एव निजः स्वभाव आनन्दः। ततः परं तत्त्वं चिदानन्दमयम्। यासौ तस्य स्वस्वभाव-

विमर्शनप्रवणता सैव हि तस्यानन्दमयता। आनन्दश्च सर्वत्र चमत्कारमय इति स्वसंवेदनसिद्धोऽयमर्थः सर्वस्य। चमत्कारश्च चेतनाया आन्तरी चिन्मयी समुच्छलत्ता। तामेवात्र दर्शने 'स्पन्द' इति वदन्ति। ततः स्पन्दनस्वभावं हि तत् परं तत्त्वम्। तस्यासौ स्पन्दोऽन्तर्बहिरुभयतोमुखी परिस्फुरत्ता। तत एव परस्य तत्त्वस्य शक्तिरूपताया बहिरन्तरुभयतोमुखी याऽभिव्यक्तिस्तद्वशादेव सृष्टिसंहारादेर्बन्धमोक्षादेश्च स्फुट आभासः क्रमेण।

स एव शुद्धश्चित्स्पन्दः सर्वस्य स्वात्मनि स्वयं परिस्फुरति, परं न तथा साक्षात्क्रियते जनैः। शैवयोगप्रक्रियाभिः स्वात्मनः शुद्धस्य चित्स्पन्दस्य यत् साक्षादनुभवात्मकं दर्शनं भवति तस्य दर्शनस्य पौनःपुन्येन क्रियमाणेनाभ्यासेन स्वात्मनः परमेश्वररूपतायाः साक्षात् प्रत्यभिज्ञा सम्पद्यते। सोऽयं चित्स्पन्दपरिशीलनाभ्यासः समुत्कृष्टः स्वात्मप्रत्यभिज्ञाया उपायः। ततो नैव स्पन्दशास्त्रं प्रत्यभिज्ञाशास्त्रं च शैवदर्शनस्य शाखाद्वयं, यथाऽद्यतनैः शोधविद्वद्भिरुद्घोष्यतेऽल्पज्ञतावशादिति विदाङ्कुर्वन्तु सुधियः।

9- परस्य तत्त्वस्य यः समुच्छलद्रूपशक्तिघनतामयः सारभूतः स्वभावोऽसावेव तस्य सा परमेश्वरता, परब्रह्मता च, यया तत् तत्त्वं परमेश्वरत्वेन सदा प्रकाशते। यच्च तन्मूलभूतस्य तत्त्वस्य स्वभावभूतं परमेश्वरत्वं तद् बहिरपि विलासलीलात्मकतयाऽवभासते सदा। तस्यासौ लीलाविलासमयी क्रीडा मूलतः आनन्दचमत्कारोद्भाविता, यतः आनन्दस्योच्छलत्तयैवासौ समुज्जृम्भिता, प्रसरन्ती चाप्यसावानन्दमयी, पर्यन्ते चाप्यानन्दचमत्कारप्रयोजना। एतस्या लीलायाः पञ्चाङ्गानि, तानि च सृष्टिः, स्थितिः, संहारः, विज्ञानमनुग्रहश्चेति।

वैष्णवाः परतत्त्वस्य परमेश्वरत्वं स्वीकुर्वन्ति, परं तथापि तत् तत्त्वमाधिदैविकात् क्षेत्रादुत्तीर्णं नैव पश्यन्ति, न चापि शुद्धां चिन्मात्रामाध्यात्मिकीं स्थितिं बहुमन्यन्ते। वेदान्तिन आत्मनः शुद्धां चिन्मयीं स्थिति स्वीकुर्वन्तस्तां बहुमन्यमाना अपि तस्य परस्याद्वैतात्मतत्त्वस्य स्वभावभूतां परमेश्वरतामस्वीकृत्य जगत्सृष्टि-संहारादिकाः पारमेश्वरीक्रियाः ब्रह्मणो भिन्नायाः उपाधिभूताया अविद्याया एव प्रभावत आभासन्तेऽज्ञानवशत एवेति प्रतिपादयन्ति। अद्वैतशैवाः परामुत्कृष्टां शुद्धां चाध्यात्मिकीं दृष्टिं बहुमन्यमाना एव परस्य तत्त्वस्य परमेश्वरतां तस्य स्वभावभूतामेव विशेषतां गणयन्ति। ततस्तेषां दृष्टौ मूलभूतं शुद्धं संवित्तत्त्वं स्वस्वभावत एव परमेश्वरत्वविभूतियुतं सत् स्वयं स्वेच्छया स्वस्वातन्त्र्यतश्च सृष्ट्यादिपञ्चकृत्यान्याभासयद्विजयते।

10- अद्वैतशैवदर्शनानुसारं परस्य तत्त्वस्य स्वात्मन्येव सर्वं जगत् संविन्मात्ररूपतया सदा विद्यते। सृष्ट्यादिपञ्चकृत्यैर्जगतो यदाभासनं तस्याभासनस्यानुकूला काऽप्यचिन्त्या पारमेश्वरी शक्तिस्तस्मिन्नभेदसम्बन्धेन सदा वर्तते ययाऽसौ निरुपादानसम्भारमेव विश्वं सृजति, स्वात्मनो भिन्नतयाऽवभासयतीति। सृष्टस्य जगतः सुचिरं स्थापनं प्रचालनञ्च नियत्यादिनियमानुसारं विदधाति। असावस्य स्थितिः काले काले चात्र तत्तत् कार्यजातं तस्मिंस्तस्मिन् निजे निजे कारणे लयं नयति संहारकृत्यतया। सृष्टान् प्राणिनोऽज्ञानगर्तेष्वधोऽधः पातयति, मोक्षमार्गाच्च कांश्चित् प्रच्यावयति, इत्येतत्पिधानकृत्यम्। कदाचिदनुग्रहं विदधानः कांश्चित् प्राणिनो योगादिमार्गे प्रवर्तयति, मोचयति चान्ततः- तदेतदस्यानुग्रहकृत्यम्। इत्येषा पञ्चाङ्गमयी परा नाट्यलीला यस्या आभासनं परस्य तत्त्वस्य स्वाभाविकात् स्वातन्त्र्यादेव सदा भवति। तेन स्वयं स्वेनैव स्वभावेन परं तत्त्वं परमेश्वरः। न तस्य परमेश्वरत्वमुपाध्यपेक्षमपि तु स्वतन्त्रं स्वस्वभावभूतमिति। स एषः स्वातन्त्र्यसिद्धान्तः पारमैश्वर्यसिद्धान्तापराभिधानोऽद्वैतशैवदर्शनस्य।

11- सत्कार्यवादीदं दर्शनम्, परमत्रत्यः सत्कार्यवाद आध्यात्मिको, नैव भौतिकः। तदनुसारं सर्वं भावरूपं प्रमेयजातं सदेव, तत्तद्विशेषविशेषार्थक्रियाकरणात्। ततो न जगद्वन्ध्यासुतकल्पं, न वापि गन्धर्वनगरसदृशम्। स्वप्नसंसारोऽपि तत्काले सन्नेवतत्तद्धर्षशोकादिकरणात्। परं शैवा एते जगतः सत्तां चिद्रूपाद् बहिर्नैव स्वीकुर्वन्ति। ततो नैषां सत्कार्यवादः सांख्यानामिव, न चापि सौत्रान्तिक-वैभाषिकाणामिव मते। अस्य जगतो या पारमार्थिकी सत्ता सा तु शिव-शक्ति-रूपता। शक्तिरूपेण सर्वं जगच्छिवे सदा तिष्ठति। अपरेयं तत्तदर्थक्रियाकारिणी जगद्भावना सत्ता व्यावहारिकी। एषापि शिव-शक्तेरेव बहिरवभासत आभासमाना सती सत्तैव। पारमार्थिकी वाऽस्तु सत्ता संवृतिसत्ता वास्तु; उभयं सत्तात्मकमेव, न शशशृङ्गकल्पम्। सत्ताया एव हि प्रकारद्वयं सांवृतत्वं, पारमार्थिकत्वञ्चेति। ततः शिवशक्तेराभासरूपं सर्वं भावजातं सदेव गणनीयं, विशेषतो व्यावहारिकभूमौ। व्यावहारिकस्य भावजातस्य वन्ध्यासुतकल्पत्वकथनं त्वात्मवञ्चना परवञ्चना चेति।

12- वेदान्तिनो विज्ञानशून्यवादिनश्चानाद्यज्ञानवशादेव 'जगदाभास' इति वदन्ति। ते च क्रमेण विवर्तवादिनो वासनाकारवादिनश्च। सांख्याः प्रकृतिपरिणामवादिनः। नैयायिकवैशेषिकाः परमाणुभ्यो जगत आरम्भस्य वादिनः। शैवा ह्येते सर्वानप्येतान् वादान् जगद्विकाससोपानत्रये स्वीकुर्वन्ति। भुवनभावशरीराद्यारम्भः सत्यं परमाणुभ्यो भवति। कार्यकरणरूपाणि त्रयोविंशतितत्त्वानि सत्यं प्रकृतेः परिणामतोऽभिव्यक्ततामुपयान्ति। स्वात्मा सत्यमनाद्यज्ञानवशत एव जीवरूपतयाऽऽभासते, विश्वं च तत एव स्वस्माद् भिन्नं पश्यति, परमारम्भवादः प्रकृतिपरिणाममपेक्षते। प्रकृतितत्त्वं पुरुषतत्त्वं च सत्यमविवेकात्मकादज्ञानादेव तथा तथा भासेते। परं तथाभासस्यापि यन्मूलकारणं न तदविवेकात्मकमज्ञानम्। तदपि हि स्वयं यतः कार्यं सत् किमपि कारणमपेक्षते। तस्यापि य आभासस्तस्य कारणं शैवदर्शनदृशा परमेश्वरस्य लीलामयं स्वभावभूतं च स्वातन्त्र्यम्। स्वस्वातन्त्र्यलीलाविलासत एव हि परमेश्वरः स्वस्य पारमेश्वरीणां शक्तीनां बहिर्मुखानि प्रतिबिम्बानि निज एव चित्-प्रकाशे तस्य प्रकाशस्यैव चिद्रूपया भासा बहिर्मुखतया यदाभासयति स्वलीलया, तदा बहिरिदन्ताभूमौ पारमेश्वरस्यैव चित्प्रकाशदर्पणस्यान्तरवभास-

मानानि, ततो भिन्नतया च प्रतीयमानानि सन्ति तत्तद्रूपतया सृज्यमानानीति व्यवह्रियन्ते। सैषा स्वशक्तिप्रतिबिम्बानां स्वस्माद् भिन्नतया याऽऽभासना सैव तासां तत्तत्तत्त्वादिरूपतया सृष्टिरित्युच्यते। स एष जगत्सृष्टिविषये शैवानां प्रतिबिम्बवादो य आरम्भादिविवर्तान्तेभ्यो वादेभ्यः उत्तीर्णस्तेषामाधारभूतश्च। प्रतिबिम्बन्यायेन जीवेश्वरजगदाभासे सत्येव विवर्तवादः सावकाशः, तथैव परिणामवाद आरम्भवादश्चेति। त्रयोऽप्येते वादा जीवसृष्टौ सत्यामेव सावकाशाः। सा च सृष्टिः प्रतिबिम्बन्यायत एवेति बोध्यम्।

13- अद्वैतशैवदर्शनस्य यन्मुख्यं प्रयोजनं तत् पराद्वैततत्त्वभूतस्य पारमैश्वर्यस्वभाववतश्च परस्य स्वात्मपरमेश्वराख्यस्य पराद्वैततत्त्वस्य तर्कयुक्तिभिर्यत् साधनं तन्नास्ति; यतस्तत्तत्त्वं सर्वस्यात्मभूतं सत् सदा सिद्धमेव। तथाभूतमपि च तत् केवलं पारमेश्वरलीलाविलासवशत एव मायाकृतेनावरणेनावृतम्। तस्य च वास्तविकं तत्त्वं तेन तिरोहितं वर्तते। ततः शास्त्रस्यास्य प्रयोजनं मायाकृतस्यावरणस्यापसारणं, तेन चोपायभूतेन प्राग्विस्मृतायाः स्वात्मपरमेश्वरतायाः पुनः साक्षात्करणं समकालमेव च तस्यास्तथा स्मरणम्। सैषा स्वरूपविषये साक्षात्कारस्मरणोभयमिश्रा, अनुसन्धानात्मिका स्वस्वरूपस्य प्रत्यभिज्ञैवास्य दर्शनशास्त्रस्य प्रयोजनम्। तत एव माधवाचार्यः सर्वदर्शनसंग्रहे प्रत्यभिज्ञादर्शनमित्यनेनैवाभिधानेन प्रतिपादितवानेतद्दर्शनम्।

14- बन्धमोक्षावुभौ पारमेश्वर्या लीलाया मुख्यमङ्गद्वयम्। परमेश्वर एव स्वयमात्मनो वास्तविकं स्वरूपं स्वभावञ्च तिरोधाय पाशबद्धप्रमातृतयाऽऽभासतेऽनन्तप्रकारकेण वैचित्र्येण। स एव स्वयमेव स्वेच्छास्वातन्त्र्येणानुग्रहप्रवणो भवन् कञ्चित् पशुप्रमातारं मोक्षमार्गे प्रवर्तयति, तस्य च पदे पदे सद्गुरुणा साहाय्यं कारयन्नतन्तो गत्वा तस्य स्वात्मप्रत्यभिज्ञामुद्भावयति। सैवंविधा शिवस्यानुग्रहलीलैव तस्य "शक्तिपात" इति कथ्यते। शक्तिपात एव हि मुक्तिलाभस्य मूलकारणम्। शक्तिपातप्रयोगकरणे शिवः सर्वथा स्वतन्त्रः। स्वेच्छास्वातन्त्र्येणासौ यं कञ्चिदपि प्रमातारमनुगृह्णाति। न तस्य पात्रतां विचारयति। पात्रतापि हि तदनुग्रहस्यैव फलविशेषः। एवं भक्तिः, श्रद्धा चाप्यनुग्रहत एव जनस्य चित्ते पदं कुरुतः। सुमलिनसंविदपि जनः शिवस्य तीव्रेणानुग्रहेण सत्वरं मुक्तो भवति।

15- सामान्यतः शक्तिपातस्य प्रभावतो जनस्य सद्गुरुणा सम्पर्को जायते, सच्छास्त्रेषु, प्रवृत्तिर्भवति, भक्तिपूर्वकं योगाद्यभ्यासे रुचिर्वर्धते। तदभ्यासफलत्वेन जीवन्मुक्तो वा भवति; शरीरान्ते वा मुक्तिं लभते; सत्यां वा भोगवासनायां देहान्ते ऊर्ध्वभुवनेषु दिव्यातिदिव्यान् भोगान् भुक्त्वा क्रमेण मुक्तो भवति। अपरिपक्वे योगाभ्यासे योगभ्रष्टो भूत्वा जन्मान्तरे पुनर्योगमभ्यस्याभीष्टां मुक्तिं लभते। बुभुक्षुरपि शैवशास्त्रे प्रवृत्तः सन्नन्ततोगत्वा मुक्तो भवत्येव, यतो मन्दातिमन्दोऽपि शैवः शक्तिपातः पर्यन्ते मुक्तिफलदो भवत्येव। शिवादवरैर्विष्ण्वादिभिः कृताः शक्तिपाताः भोगदा एव। शैवः पुनः शक्तिपातोऽभीष्ट-भोगमोक्षप्रदः इति। न हि शक्तिपातसमये शिष्यस्य योग्यताऽवश्यं विचार्यते। यः कश्चिदपि जनः शक्तिपातेनानुगृह्यते स्वतन्त्रेण शिवेन।

16- शैवदर्शने तत्त्वसंख्या तावत् षट्त्रिंशत्। षट्त्रिंशत्सु व्यापकत्वेन स्थितं तेषामाधारभूतं परं तत्त्वं न तत्त्वगणनासु प्रायो गण्यते। ततः षट्त्रिंशदेव तत्त्वसंख्या। यच्च सप्तविंशं तत्त्वं परमशिवाख्यं न हि तत् तत्त्वाध्वधारणास्वालम्बनत्वं नीयते। ततस्तत्तत्त्वं न गण्यते तत्त्वसंख्यागणनावसरे। षट्त्रिंशतां तत्त्वानां वर्गीकरणं तावत्–

1. धरादीनि पुरुषान्तानि सुप्रसिद्धानि पञ्चविंशतितत्त्वानि।
2. कालकलादितत्त्वपञ्चकसंयुता माया इति षट् तत्त्वानि कञ्चुकाख्यानि पुरुषतत्त्वे संलग्नानि।
3. शुद्धविद्या, ईश्वरः, सदाशिवः इति शुद्धतत्त्वानि त्रीणि।
4. शक्तिः शिवश्चेति द्वेऽभेदनिष्ठे तत्त्वे।

प्रपञ्चस्यास्य वर्गीकरणस्य प्रक्रियैव हि तत्त्वविश्लेषणप्रक्रिया इति।

17- शिवादिपशुप्रमातृपर्यन्तः प्राणिनिकायः सप्तवर्गेषु, विभज्यतेऽत्र शास्त्रे। तत्र मलत्रययुक्ताः संसृतिभाजः प्राणिनः सकलाः। केवलेनाणवेन मलेन मलिनाः प्राणिनो विज्ञानाकलाः। आणवेन कार्मेण च मलेनावृत्ताः प्रलयाकलाः। केवलमायीयमलभाजो विद्येश्वराः, मन्त्रापरपर्यायाः, ये शुद्धविद्याक्षेत्रस्याधस्तने सोपाने निवसन्ति। ध्वंसमानमलाः स्फुटमलसंस्कारमात्रयुताः प्राणिनो मन्त्रेश्वराः ये ईश्वरतत्त्वे निवसन्ति। ध्वस्तमलाः केवलं सूक्ष्मतरतत्संस्कारवन्तः प्राणिनो मन्त्रमहेश्वराः, येषां स्थितिः सदाशिवतत्त्वे। शिवशक्तितत्त्वस्थिताः सर्वथा शुद्धाः प्राणिनोऽकला ये शिवा इत्यप्युच्यन्ते। सर्वथा निर्मलास्ते प्राणिनः। तेषु शिवभावनिष्ठाः शाम्भवाः, शक्तिभावनिष्ठाश्च शाक्ता इत्यप्युच्यन्ते। उभयेऽप्येते प्रायः शिवा इत्युच्यन्ते।

18- शैवदर्शने मोक्षोपायतया स्वीकृताः पदार्थाः — (1) तत्त्वज्ञानं, (2) शैवयोगः, (3) शिवभक्तिश्चेति सर्वसामान्यतया मिलिता मोक्षोपायाः। मूलतो हि मोक्षकारणं शिवानुग्रहशक्तिपातः, तत्फलतया च गुरुकृपा, गुरुकृता च दीक्षा। केवलया दीक्षयापि साधको मुक्तो भवति, चेद्गुरुः सामर्थ्यशाली भवेत्। साधारणतो योग एव मोक्षोपायतया स्वीकृतः। नासौ पातञ्जलो योगो न चापि हठयोगोऽपि तु शैवयोगः त्रिकागमेषूपदिष्टः। असौ त्रिकयोगस्त्रिभूमिकः। तत्र सर्वोत्तरा भूमिका शाम्भवोपायमयी। स्वस्य वास्तविकं, शुद्धं, परिपूर्णमपरिमितं स्वातन्त्र्यशक्तिघनं च यदपरिमितचिदानन्दमयं स्वरूपं तस्मिन्नेव निजे वास्तविके स्वरूपे स्थितेरभ्यासः शाम्भवोपायः। असौ स्वस्वरूपस्य निर्विकल्पकं यत् स्वप्रकाशं विमर्शनं तस्याभ्यासः। इच्छाशक्तिप्रयोगवशतोऽभिव्यक्ततां नीयतेऽसौ शुद्धसंविद्रूपतास्थितिः। ततोऽवरश्च स्वात्मविषये यद्विकल्पात्मकं भावनामयं यथार्थं ज्ञानं यथा– "सर्वैश्वर्ययुक्तः शिवोऽहम्, अहं सर्वत्र, मयि सर्वं, मत्तः सर्वम्' इत्यादिरूपं विमर्शनम्। तस्यैव पौनःपुन्येनाभ्यासः शाक्तोपायः। 'ज्ञानयोग' इत्यस्याभिधानान्तरम्। प्रमेयात्मकस्य

जगतो मध्यात् यं कमपि पदार्थमादाय तस्य तस्य प्रमेयरूपस्य पदार्थस्य यद्वास्तविकं शिवमयं स्वरूपं तस्य यद्विकल्पात्मकं भावनामयं ज्ञानं तस्य पौनःपुन्येनाभ्यासः क्रियायोगोऽयमाणवोपाय इति वा, क्रियोपाय इति वा वदन्ति। उपायत्रयोपयोगिनी च दीक्षा तदङ्गभूतश्चान्यः क्रियाकलापात्मकोऽभ्यासोऽपि मोक्षोपायेषु गण्यते। सामर्थ्यशालिना गुरुणा कृता दीक्षादि क्वचिच्छिवभावाभिव्यक्तिकरी, विनैव योगाद्यभ्यासजातम्।

19- कश्मीरशैवदर्शने सर्वश्रेष्ठत्वेन स्वीकृतो यो योगक्रमोऽसौ पातञ्जलात् समाधियोगाद्, गोरक्षनाथीयाच्च हठयोगादुत्कृष्टतरस्त्रिकयोगः। न तत्र चित्तवृत्तिनिरोधो नापि वा शरीरकष्टकराणि षट्कर्माणि प्रशस्तानि। असौ योगस्तावत् सुखोपायतः स्वात्मदर्शनस्याभ्यासः। तत्र योगे चित्तस्य वासनानां वा बलान्निरोधो हानिकरत्वेन गण्यते। यथा खलु बालोऽश्वः प्रेम्णा निम्नोन्नतसमतलादिभूमिषु क्रमेण वादृश्यतेऽभ्यासतश्च केनापि कालेन यथेष्टगतिसमर्थतां याति, तथैव चित्तं क्रमेणभ्यासतो निर्विकल्पसाक्षात्कारमार्गे तथा प्रवर्त्यते यथा स्वात्मनश्चित्प्रकाशस्य, पुरतो विलीनतामिवोपयाति, स्वात्मा च व्यवधानराहित्येन स्वात्मानं साक्षात्कुरुते। असौ मार्गस्त्रिकयोगाख्यः सर्वेषु मोक्षमार्गेषु श्रेष्ठः। अपरे मार्गाः मत-कौल-दक्षिण-वामाद्या अवरेभ्योऽधिकारिभ्यो हिताः। त्रिकयोगस्य प्रकारत्रयेणापि निजस्य जीवात्मकस्य परिमितस्य प्रमातृभावस्यापरिमिते शिवात्मके निजे प्रमातृभावे कञ्चित् कालं निमज्जनं विधाय, तस्मिन्नपरिमिते एव प्रमातृभावेऽवस्थितेरभ्यासो विधीयते। तथाविधस्य शिवभावेऽवस्थानस्याभिधानं समावेश इति। समावेशेन साक्षात् स्वात्मस्वरूपप्रत्यभिज्ञा भवति, या शरीरान्ते मुक्तिदा। समावेशरसाभ्यासत इहैव जन्मनि स्वात्मनः शिवभावस्य स्फुटा संवेदना, सृष्ट्यादिसम्पादनसामर्थ्यलाभः, परापरसिद्धिसमृद्धिस्तथा सैश्वर्या च जीवन्मुक्तिरवाप्यते।

20- शिवस्य तिरोधानशक्त्याऽवृते तिरोहिते च वास्तविके स्वरूपे आत्मनो वास्तविकस्य शुद्धस्य स्वरूपस्य पारमैश्वर्यात्मकस्य च स्वभावस्य विस्मृतिर्जायते, यथा प्राणी शरीर-प्राण-चित्तादीञ्जडानेव पदार्थानात्मत्वेन मन्वानोऽन्यत्सर्वं स्वात्मसकाशाद् भिन्नं पश्यति, स्वात्मानं चाल्पज्ञमल्पशक्तिकञ्च संवेत्ति। एषा स्वात्मनः स्वरूपस्वभावयोर्विस्मृतिर्बन्धः। शिवस्यैवानुग्रहलीलया शाम्भवाद्युपायसरणौ लब्धे प्रवेशे तदभ्यासतोऽवाप्ता स्वस्वरूपस्वस्वभावयोः प्रत्यभिज्ञा मुक्तिः। प्रत्यभिज्ञातस्वस्वरूपः साधको विश्वान् लोकव्यवहारान् नाट्यदृश्यानीव पश्यन्न तैर्व्यामुह्यते। सैषा तस्य जीवन्मुक्तिः। समावेशरसाभ्यासेनेहैव देहे पारमैश्वर्यांशलाभः। प्रारब्धान्ते शरीरपाते सति परशिवैकतया यदवस्थानं सा विदेहमुक्तिः। अन्येषां दर्शनानामभ्यासेन प्राप्याः अपवर्ग-कैवल्य-निर्वाणरूपाः सुषुप्तिप्रायाः दशास्तु मुक्त्याभासा एव, तुर्यतदतीतयोरेव वास्तविकमुक्तिरूपत्वात्। सौषुप्ती मुक्तिरपूर्णा क्षयिणी च। तुर्यामयी पुनः पूर्णाऽक्षया च।

21- सर्वस्य हि स्वात्मा वस्तुतः शुद्धचिन्मात्ररूपः, सर्वथाऽभिन्नोऽपरिमितः परिपूर्णः, एकमात्रः, पूर्णस्वतन्त्रः प्रमाता, स्वेच्छानुसारं सृष्टि-संहार-क्रीडाकरः परमेश्वर एव। परं परमेश्वरेणैव निजयैव तिरोधानशक्त्या यदा यत्र निजं स्वरूपं निजश्च स्वभावांस्तिरोधीयते तत्र तदाऽसावेव मायाकृतोऽल्पज्ञोऽल्पशक्तिपरिमितःप्रमाता इत्येवमाभासते। असावणुरिति पशुरिति चाख्यायते। सुषुप्त्यादिषु दशासु विचरन् सङ्कुचितं संविद्रूपं वा, प्राणं वा, चित्तं वा, देहमेव वा स्थूलं स्वात्मत्वेन विमृशति 'अहम्' इति। स एष स्वरूपसङ्कोचोऽस्यैकप्रकारक आणवो मलो येनासौ 'अणुः' इति कथ्यते। स्वात्मनः पारमैश्वर्यरूपां शक्तिमपि विस्मरत्यसौ येन सुषुप्तौ क्रियाशक्तिहीनः, स्वप्नादौ च किञ्चिन्मात्रकरणसमर्थः प्रतिभाति। सैष स्वशक्तिसङ्कोचोऽस्यापर आणवो मलः। मायाप्रभावतो सर्वं स्वस्माद् भिन्नमेव पश्यति। सैषा भेददृष्टिरस्य मायीयो मलः। सङ्कुचिते कर्मकर्तृत्त्वाभिमानेन, पापपुण्यादिकर्तृत्त्वसंस्कारेण च युक्तः सन् कर्ममलभाग् भवति। कर्मफलभोगसिद्धये च नानायोनिषु नियतिकृतनियमानुसारं संसरति। एतत् संसरणमेव हि महाकष्टमयं बन्धनं मलत्रयफलभूतम्। इतरशास्त्राभ्यासिनोऽपवर्गादिदशासु कञ्चित् कालं कार्ममलप्रभावतो मुक्ताः सन्तः सुषुप्तिदशायां क्लेशशान्तिमनुभवन्तस्तामेव परं मोक्षं मन्वते। परमभिनवे मूलप्रकृतिप्रक्षोभे यदा पुनर्गुणवैषम्यं सम्पद्यते, तदा ते सुषुप्तेरवबुद्धाः सन्तः पुनर्लिङ्गशरीरैः संयुज्यन्ते, प्राक्तनकर्मवासनाभिश्चाक्रान्ता भवन्ति। त्रिभ्योऽपि मलेभ्यो या मुक्तिः सैव परा वास्तविकी च मुक्तिः।

22- ज्ञानक्रियास्वातन्त्र्यमीश्वरता। सा च बहुषु प्राणिषु बहुधा परिमितैव। केवलं परिपूर्णे परमेश्वर एव पूर्णा। ये पुनस्तेनैव वितीर्णैरैश्वर्यविप्रुड्भिरीश्वरतां प्राप्तास्तेषु मुख्या ब्रह्म-विष्णु-रुद्राः, येऽस्याः धरातत्त्वमय्याः स्थूलायाः सृष्टेः सर्ग-स्थिति-संहारकर्त्तारः। तदूर्ध्वं चोत्कृष्टमीश्वरपदं जलादितत्त्वाधिष्ठितानां रुद्राणाम्। तेषामुपरि श्रीकण्ठनाथस्यैश्वर्यम्। स एव स्वदिनादौ मूलप्रकृतौ क्षोभमुत्पाद्य गुणवैषम्यमुद्भावयति, समस्तकरणकार्यतत्त्वानां सृष्टिञ्चापि कुरुते। स एव स्वदिनान्ते संहारमपि कुरुते तेषाम्। तदूर्ध्वं मायायाः सकाशात् पञ्चकञ्चुकानां तत्सहितयोश्च प्रकृतिपुरुषयोः सृष्टयादिकर्त्ता भगवाननन्तनाथः उत्कृष्टतरः ईश्वरः। तयोर्मध्ये कञ्चुकतत्त्वाधिष्ठातृणामुत्कृष्टतराणां रुद्राणामधिकारः। अनन्तनाथोपर्यधिकार ईश्वरतत्त्वाधिष्ठातुरीश्वरभट्टारकस्य। तस्मादप्युपरि सदाशिवतत्त्वाधिष्ठातुर्भट्टारकसदाशिवस्येश्वरत्वम्। सर्व एवैते परिमितेश्वरा एव। सर्वथा परिपूर्णं यदैश्वर्यं तच्छिव-शक्ति-सामरस्यात्मकस्य परम- शिवाख्यस्य परमेश्वरस्यैव। असौ परमशिव एव विश्वोत्तीर्णतादृष्ट्या 'शिव' इति, विश्वात्मकप्रपञ्चसृष्टयाद्यैश्वर्याभिव्यक्तिं प्रत्युन्मुखताया दृष्टया 'शक्तिर्' इत्युच्यते। ततः परमशिवस्यैव कल्पितं नामद्वयं 'शिव' इति, 'शक्तिर्' इति च। तेन शक्तिः, शिवः परमशिव इत्येकमेव परं तत्त्वं वस्तुतः। ततो नैतेषामैश्वर्ये किमपि तारतम्यमुच्यतेऽङ्गी क्रियते वा।

23- अद्वैतशैवदर्शनदृष्ट्या सर्वाण्यपि दर्शनानि स्वे स्वे स्थाने तया तया परिमितया मात्रया सत्यान्येव नासत्यानि। आध्यात्मिक्यां प्रगतौ यानि यानि सुषुप्तेस्तुर्यायाश्च भिन्नभिन्नानि सोपानपदानि तानि तानि यावत् साधकं प्रापयितुं क्षमाणि सन्ति कथमसत्यानि स्युः। एकैकं सोपानमवाप्योत्कृष्टोत्कृष्टदर्शनाश्रयणेनोच्चतरसोपाना-

रोहणमेवोचितम्। तेनैकत्र क्वापि सोपाने विश्रम्याग्रे दर्शनान्तरसाहाय्येनारोढव्यं सुधियोत्कृष्टोत्कृष्टतरसोपानपदं क्रमेण वाऽक्रमेण वेति सिद्धान्तोऽद्वैतशैवदर्शनस्य। साधकानामधिकारभेदात् सर्वाणि बौद्धार्हतवैदिकवैष्णवशैवादीनि दर्शनशास्त्राणि शिवेनैव तेषां तेषां कृते समुद्भावितानि। उत्कृष्टतमञ्च तेषु पराद्वैतसिद्धान्तप्रवणं शैवदर्शनमेव यदद्यत्वे कश्मीरशैवदर्शनमित्युच्यते।

अधः—— केवलाप्रकाशरूपत्वेनाभासमानं जडं वस्तुजातम्। यथा—

"...............प्रकाशात्मस्पर्शायोग्यमधः पुनः॥"

(तं॰आ॰ 15-197)

अधः शून्यम्—— हृदयस्थं दहरमाकाशम्। यथा—

"अधः शून्यमनुल्लसितं प्रपञ्चं हृत्क्षेत्रं......... ।"

(स्व॰तं॰उ॰प॰ 4, पृ॰ 185)

अधरशास्त्रजातम्—— त्रिकाख्यात् पराद्वैताच्छैवशास्त्रादवराणि सर्वाण्यन्यानि शास्त्राणि। यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥"

(उद्ध॰प॰त्री॰वि॰ पृ॰ 92)

"सर्वज्ञानोत्तरादौ च भाषते स्म महेश्वरः ॥
नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम् ।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबाधकम् ॥"

(तं॰आ॰ 4, 247-48)

~तत्तारतम्यम्—— तत्र कर्मप्रधानानि लौकिकानि श्रुतिस्मृतिशास्त्राणि। ततः उत्कृष्टान्याध्यात्मिकानि योगप्रधानानि सांख्ययोगवेदान्तादीनि। ततोऽप्यतिमार्गिकाणि प्रसिद्धानि च पाशुपतकापालिककालमुखादीनि तावदुत्कृष्टतराणि यतस्तानि सम्बोधप्रधानानि। यथा—

"लोकाध्यात्मातिमार्गादिकर्मयोगविधानतः ॥
सम्बोधोत्कर्षबाहुल्यात् क्रमोत्कृष्टान् विभावयेत् ।"

(तं॰आ॰ 13, 346-47)

अत्र जयरथीया व्याख्या न समीचीना। उक्तं हि तत्र—

"लोकः श्रुतिस्मृत्यादिः, अध्यात्मं वेदान्तादिः, अतिमार्गो लौकिकमार्गातीतं सांख्यपातञ्जलादि, एवमादावग्निष्टोमादेः कर्मणश्चित्तवृत्तिनिरोधाद्यात्मनश्च योगस्य विधानतो हेतोः सम्यग्बोधस्य यथायथमुत्कर्षतारतम्यात् क्रमोत्कृष्टान् वैदिकादीन् गुरून् विभावयेज्जानीयादित्यर्थः।"

(तं॰आ॰वि॰ खं॰ 8, पृ॰ 207)

वस्तुतोऽत्र तात्पर्यम्—लौकिको गुरुः कर्मप्रधानः श्रौतस्मार्त्तमार्गे प्रेरकः। आध्यात्मिको गुरुः सांख्ययोगवेदान्तादौ प्रवर्तको लौकिकादुत्कृष्टः। अतिमार्गिको गुरुः पाशुपतकापालिकादिः सम्बोधोत्कर्षशालित्वात् ततोऽप्युत्कृष्टः। अतिमार्गपदस्य प्रसिद्धोऽर्थः कापालिककालमुखादिगुरुसेवितः पन्थाः, न सांख्यादिः। किञ्चात्र वेदान्ताद् यत् सांख्यस्योत्कृष्टत्वमुक्तं तदपि न युक्तियुक्तं, सांख्यस्य द्वैतरूपत्वादनीश्वरत्वाच्च। वेदान्तानां सेश्वरत्वादद्वैतरूपत्वाच्चेति।

~तत्प्रयोजनम्—— अवराणामधिकारिणां हिताय विष्ण्वादिभिस्तानि तानि शास्त्राण्युपदिष्टानि। यथा—

"तथाविधामेव मतिं सत्यसंस्पर्शनाक्षमाम् ।
दृष्ट्वैषां ब्रह्मविष्ण्वाद्यैर्बुद्धैरपि तथोदितम् ॥"

(तं॰आ॰ 13, 361)

बुद्धैरुत्कृष्टबोधवद्भिरिति।

~तत्स्रोतः —— यथा—

"(क) अतो वेदादयोऽप्येते मायीयाः शासनांशवः ॥
स्फुरन्ति भैरवादित्यप्रभावादेव नान्यतः ।"

(मा॰वि॰वा॰ 1, 415-16)

(ख) अतः समग्रशास्त्राणि संविद्रूपापरिच्युतेः ।
संविदः स्वप्रकाशत्वात् स्वप्रकाशानि वस्तुतः॥"

(तदेव, 1, 420)

भैरवरूपस्य परमशिवस्यैव प्रेरणया विष्णुविरिञ्च्यादिभिरधराणि शास्त्राण्युपदिष्टानीति परमशिव एव सर्वेषां शास्त्राणां मूलभूतं स्रोतः।

अधर्मभेदाः —— समयिनः कृते परिगणिताः। यथा—

"क्रोधश्चागुरुशुश्रूषा अशौचं च ततः परम् ॥
असन्तोषोऽनार्जवं च हिंसा चासत्यमेव च ।
स्तेयब्रह्मचर्यं च तथा चैव सकल्कता ॥
एवमेष समाख्यातो दशधा धर्मसंग्रहः ।"

(स्व॰तं॰ 11, 151-53)

अधरा दिक्—— वस्तुनः प्रकाशस्पर्शयोग्यताभावस्थितिरधरा दिक्। यथा—

"...................प्रकाशात्मस्पर्शायोग्यमधः पुनः ।"

(तं॰आ॰ 15, 197)

अधिकारिणः—— भगवदनुग्रहपात्रतां याताः दीक्षिता एव शिष्या रहस्यमयसाधनोपायोपदेशाधिकारिणो नान्ये यथा—

"......अन्येषां चैतदुपदेशानभिज्ञानां तदुपदेशनमप्यकिञ्चित्करम्।"

(प॰त्री॰वि॰ पृ॰ 101)

~अतिविरलाः—— अतीव दुर्लभास्ते। कश्चिदेव नाम शाम्भवानुग्रहशक्तिपातपवित्रितः साधकविशेषः शाम्भवशाक्तादिष्वभेदप्रधानासु साधनासु रुचिमान्भवति, न सर्वे। यथा—

"अत्राभिनवगुप्ते तु तत्त्वे केऽप्येव निश्चिताः।"

(मा॰वि॰वा॰ 2, 150)

"केतकीकुसुमसौरभे भृशं भृङ्ग एव रसिको न मक्षिका।
भैरवीयपरमाद्वयार्चने कोऽपि रज्यति न भेदमोहितः ॥

(मा॰वि॰वा॰ 2, 151)

~नावहेलनीयाः—— अधिकारिणं शिष्यं प्राप्याप्यवहेलनापरो गुरुर्दीक्षामकुर्वन् पापभाग्भवति। यथा—

अधिकारिणः

"न दीक्षेत गुरुः शिष्यं तत्त्वयुक्तस्तु गर्वतः ।
योऽस्य स्यान्नरके वास इह च व्याधितो भवेत् ॥"

(उद्ध०सि०, तं०आ० 23, 30)

अधिकारी~त्रिके—— शैवदर्शनेऽधिकारिता नैव जातिलिङ्गाश्रमादिप्रयुक्ताऽपि तु भक्तिर्जिज्ञासा चात्राधिकारिताप्रयोजिके, ते च शिवानुग्रहफले। ततोऽनुग्रहशक्तिपात एव मूलतोऽधिकारित्वप्रयोजकः। यथा–

"(क) यः कश्चिज्जननधर्मा, तस्यातः सिद्धिः, नत्वत्र जात्याचारादौ भर इति सर्वानुग्राहकत्वमुक्तम् ।"

(ई०प्र०वि०वि० खं० 3, पृ० 404)

"(ख) यस्य कस्यचिज्जन्तोरिति नात्र जात्याद्यपेक्षा काचित्, इति सर्वोपकारित्वमुक्तम्॥"

(ई०प्र०वि० खं० 2, पृ० 276)

जन्तुरित्यमानवः पशुपक्षिप्रभृतिरप्यत्राधिकारी। तत एव तन्त्रालोकादिषु तिर्यग्व्यामपि दीक्षाप्रकाराः उपवर्णिताः यथाशास्त्रम् ।

"(ग) तथा यः कश्चिदिति – जातिव्रतचर्यादिनैरपेक्ष्यमत्र वेदनमेव हि प्रधानम्"

(प०त्री०वि० पृ० 252-53)

येऽपि स्युः पापयोनयः

(भ०गी० 9-33)

पापयोनयः पशुपक्षिसरीसृपादयः

(भ०गी०सं०पृ० 108)

~वस्तुतः —— शिवानुग्रहपात्रतां यात एव जनस्त्रिके रुचिमान् भवति, तत्रत्यां च दीक्षां लब्ध्वा त्रिकयोगाभ्यासतः स्वात्मप्रत्यभिज्ञारसं रसयति। गथा--

"प्रधानेऽङ्गे कृतो यत्नः फलवान्वस्तुतो यतः ॥
अतोऽस्मिन्यत्नवान्कोऽपि भवेच्छम्भुप्रचोदितः ।
तत्र तत्र च शास्त्रेषु न्यरूप्यत महेशिना ॥
एतावत्यधिकारी यः स दुर्लभ इति स्फुटम् ।"

(तं०आ० 35, 42-44)

~व्यावहारिकदृष्ट्या—— उक्त आगमे यथा–

"शिष्यो दयान्वितो धीरो दम्भमायाविवर्जितः ॥
देवाग्निगुरुभक्तश्च शास्त्रभक्तो दृढव्रतः ।
गुरुशुश्रूषणपरः सुशान्तेन्द्रियसंयुतः ॥
ईदृशो वै भवेच्छिष्यः सोऽत्रानुग्रहभाजनम् ।"

(स्व०तं० 1/1, 18 तः 20)

अधिवासः—— अधिवासनं तदुचितवासनोत्पादनम्। दीक्षाविधेः प्राक् करणीयः शिष्यस्य कोऽपि संस्कारविशेषो येनासौ दीक्षायोग्यः सम्भवति। स च स्नानन्यासान्तर्बहिर्योगादिरूपकर्मजातात्मकः। यथा च शिष्यस्य, तथैव यागमण्डपस्य, द्रव्यादीनां चापि संस्करणमधिवास एव। यथा–

"अधिवासं प्रवक्ष्यामिं यथावदनुपूर्वशः ॥"

(स्व०तं० 3, 1)

"देव-गुरु-शिष्यद्रव्याणां भाविदीक्षोचितयोग्यतात्मकसंस्कारपरिग्रहो यागगृहाधिकरणवसनं चाधिवासः, स च गुरुणा कार्यः"

(स्व०तं०उ०प० 3, पृ० 153)

अधोदृष्टिः—— अधस्तनावरशास्त्रदृष्टिः। यथा–

"अधोदृष्टौ प्रपन्नस्तु..............................।"

(तं०आ० 23, 71)

अधोनिःश्वासिका—— द्र० 'मातरः' इति।

तथा–

(ने०तं०उ० खं० 2, पृ० 145-46)

अधोऽपाने~कालवैचित्र्यम्—— मलमूत्रविसर्गे प्राणी तावदपानप्रविकासेन धारात्मकं विसर्गमपानसङ्कोचेन च तस्य विसर्गस्य निरोधमपि कर्तुं शक्नोति। एतद्गतिद्वयमपानेऽपि प्राणापानरूपत्वम्। प्रवाहगतिः प्राणरूपता, निरोधगतिरपानात्मिकता। तत्र चित्तं सन्धार्य योगी रहस्यात्मकेन केनाप्यभ्यासेन सुविशालतरस्य कालमानविशेषस्यापानचारस्यान्तरेव साक्षात्कारं कर्तुं क्षमः। नैवंविधाः विषया वाचा सुस्पष्टतां नेतुं शक्यन्ते। यथा–

"मूलाभिधमहापीठसङ्कोचप्रविकासयोः ॥
ब्रह्माद्यानाश्रितान्तानां चिनुते सृष्टिसंहती।"

(तं०आ० 6, 186-87)

~योगिमात्रसंवेद्यम्—— यथा–

"शश्वद् यद्यप्यपानोऽयमित्थं वहति किन्त्वसौ ॥
अवेद्ययत्नो यत्नेन योगिभिः समुपास्यते ।

(तं०आ० 6, 187-88)

अधोवक्त्रः —— अर्धचन्द्रः प्रणवकलासु। स च शारदालिप्यामेवं लिख्यते–'⌒' इति। यथा–

"अधोवक्त्रश्चन्द्रखण्डोऽर्धचन्द्रः .....।"

(तं०आ०वि० खं० 12, पृ० 212)

अधोव्याप्तिः—— अधोगततत्त्वजातसृष्टिः। यथा–

"..........अधोव्याप्तिस्तथा सृष्टिरेवेति सूत्रार्थः।"

(ई०प्र०वि०वि० खं० 3, पृ० 257)

अध्यवसायः—— पशुप्रमातुर्बुद्धिवृत्तिरूपो निश्चयः। असौ बुद्धिनिष्ठः क्रियांशः। निश्चयात्मकं व्यावहारिकं बौद्धं ज्ञानम्। यथा–

"प्रत्यगात्मनो मनोवृत्तिः सङ्कल्पो, बुद्धिवृत्तिरध्यवसायः.....।"

(ई०प्र०वि०वि० खं० 2, पृ० 218)

अध्वा—— (1) बाह्यप्रमेयालम्बनको भावनाभ्यासमार्गः। (2) क्रमेण शिवत्वस्थितिप्राप्तये भुवनेशत्वादिभोगप्राप्तये च यो बाह्ययोगमार्गः सोऽध्वेति। यथा–

"अध्वा क्रमेण यातव्ये पदे सम्प्राप्तिकारणम्।"

(तं०आ० 6, 30)

(3) अमूर्तया अक्रमायाश्च संविदो यद्देशकालक्रमावभासनेन मूर्तिवैचित्र्यस्य क्रियावैचित्र्यस्य चावभासनं तदेवाध्वेति। यथा–

"अमूर्तायाः सर्वगत्वान्निष्क्रियायाश्च संविदः ।
मूर्तिक्रियाभासनं यत्स एवाध्वा महेशितुः ॥"

(तं०आ० 6, 29)

बहिः प्रसरमार्गः परमेश्वरस्येति तात्पर्यम्। (4) अद्यते भुज्यत इति, स्वात्मसात्क्रियत इति वाऽध्वा। बुभुक्षवो हि तत्तत्तत्वेश्वरत्वपदे लभ्यं भोगं भुञ्जते, अन्ते च मुमुक्षुतोदये तत्तत्तत्त्वजातं स्वात्मनि विलापयन्तः क्रमेण शिवपदमधिरोहन्ति। नैरुक्तव्युत्पत्त्यात्र 'अद्यत' इत्यध्वेति व्याख्या। यथा–

"द्वैतिनां भोग्यभावात्तु प्रबुद्धानां यतोऽद्यते।"

(तं०आ० 6, 30)

"भेददशायां हि तत्तत्तत्त्वोल्लङ्घनक्रमेण षट्त्रिंशं शिवतत्त्वं प्राप्यत्वेनोक्तम्। भोग्यभावादित्यदनीयत्वात्; अधिगतसंवित्तत्त्वा हि सर्वं स्वात्मसात्कुर्वन्तीति भावः। तेनाध्वैवाध्वा, अद्यत इत्यध्वा चेति।"

(तं०आ०वि० खं० 4/1, पृ० 31)

~अशुद्धः —– मायामारभ्य धरान्तं यज्जडं तत्त्वजातं तदेवाशुद्धोऽध्वेति कथ्यते। चिद्रूपताया तिरोहितत्वमेवात्राशुद्धत्वम्।

~तच्छोधकमन्त्राः —– द्रष्टव्यं विस्तरतः तं०आ० 16, 151 तः 163.

~तच्छोधनम्—– अध्वनां जालस्यातिविस्तृतत्त्वादेकमेवाध्वानं शिष्यस्य संशोधयन् गुरुः शेषमध्वविस्तारं तदन्तरेव भावयन् सर्वाध्वशुद्धिं तस्य करोति। यथा–

"एकेन वपुषा शुद्धौ तत्रैवान्यप्रकारताम् ॥
अन्तर्भाव्याचरेच्छुद्धिमनुसन्धानवान् गुरुः ।"

(तं०आ० 11, 83-84)

~तत्प्रतिष्ठास्थानम्—– यद्यपि प्राणचार एव कालाध्वनः प्रतिष्ठाया अभ्यासो विधीयते, तथापि प्राणस्यापि संवित्प्रसररूपत्वेन वस्तुतोऽध्वप्रतिष्ठा संविद्येव। यथा–

"अतः संविदि सर्वोऽयमध्वा विश्रम्य तिष्ठति॥"

(तं०आ० 6, 28)

~तच्छोधनप्रकारः—– शोध्यमध्वानं शिष्यशरीरे भावयित्वा मन्त्रप्रयोगसहितमनुग्रहशक्त्युपायतो गुरुर्वदति- "निवृत्तिकलां ते शोधयामि" इत्यादि क्रमशः। तेन गुरोः सङ्कल्पेन शिष्यस्तत्तदध्वनः सकाशान्मुक्तो भवति, केवलं संस्कारवशाच्छरीरं जीवति प्रारब्धभोगान्तम्, प्रारब्धस्याशोधनीयत्वात्।

~तत्सृष्टिः —– परमेश्वर एव स्वस्वभावतः स्वेच्छया स्वशक्तितः स्वयमेव प्रमेयात्मकाध्वषट्कतयाऽऽत्मानमवभासयन्नस्य सृष्टिं करोतीत्युच्यते। यथा–

"अध्वसृष्टिं महादेव कथयस्व प्रसादतः ।
योऽसौ सूक्ष्मः परो देवः कारणं सर्वगः शिवः ॥
निमित्तकारणं सोऽत्र कथितस्तव सुव्रते ।
अकामात्संसृजेत्सर्वं जगत्स्थावरजङ्गमम् ॥
स्वतेजसा वरारोहे व्योम संक्षोभ्य लीलया ।
उपादानं तु तत्प्रोक्तं संक्षुब्धं समवायतः ।"

(स्व०तं० 11, 2-4)

व्योमकल्पं शक्तिशून्यं संक्षोभ्य लीलया तदेवोपादाय सृजतीति तात्पर्यम् ।

~तत्स्थितिः —– सर्वोऽध्वा मूलतः संविदि स्थितः, तद्द्वारा शून्य-प्राण-बुद्धि-देह-नाडीचक्रानुचक्रेषु बहिश्चापि लिङ्गस्थण्डिलमूर्तिप्रभृतिपर्यन्तं सर्वत्र समस्तत्वेन व्यस्तत्वेनापि च स्थितः। यथा–

"इत्थमध्वा समस्तोऽयं यथा संविदि संस्थितः ।
तद्द्वारा शून्य-धी-प्राण-नाडीचक्र-तनुष्वथो ॥
बहिश्च लिङ्गमूर्त्यग्निस्थण्डिलादिषु सर्वतः ।
तथा स्थितः समस्तश्च व्यस्तश्चैष क्रमाक्रमात्॥"

(तं०आ० 12, 2-3)

"संविद्द्वारेण तत्सृष्टे शून्ये धियि मरुत्सु च ।
नाडीचक्रानुचक्रेषु बहिर्देहेऽध्वसंस्थितिः ॥"

(उद्ध०तं०आ०वि० खं० 7/2, पृ० 94)

"कुम्भमण्डलवह्निस्थश्चाध्वात्मस्थः शिशोश्च यः।
सूत्रस्थश्चापि चैकत्र अध्वसंधिः प्रकीर्तितः ॥"

(उद्ध०तं०आ०वि० खं० 7/2, पृ० 94)

~तदायतनं (मुख्यम्)—– चिद्रूपा संविदेव हि सर्वेषामध्वनां मुख्यमायतनम्। यथा–

"अध्वा समस्त एवायं चिन्मात्रे सम्प्रतिष्ठितः ।
य तत्र न हि विश्रान्तं तन्नभः कुसुमायते ॥"

(तं०आ० 8, 3)

~तदायतनानि (गौणानि)~—– संविद्द्वारेणैव शून्यं, बुद्धिः, प्राणः, नाडीचक्राणि, तेषामनुचक्राणि, शरीरं, बाह्यं चापि सर्वमध्वनामायतनतामुपैति। यथा–

"संविद्द्वारेण तत्सृष्टे शून्ये धियि मरुत्सु च ।.
नाडीचक्रानुचक्रेषु बहिर्देहेऽध्वसंस्थितिः ॥"

(तं०आ० 8, 4)

एतानि प्रमेयवस्तूनि भावनाभ्यासालम्बनतयोपादीयन्ते, तदेवायतनत्वं भावनालम्बनत्वमेषाम् ।

~तद्भेदमूलम्—– शिवस्य शक्तिस्पन्द एवाध्वभेदावभासकः। यथा–

"तत्र शक्तिपरिस्पन्दस्तावान्प्राक् च निरूपितः ॥"

(तं०आ० 11, 50)

~द्विविधः—– कालाध्वा देशाध्वा चेति द्विप्रकारका अध्वानो बाह्यालम्बने भावनायोगे। यथा–

"द्विधा च सोऽध्वा क्रियया मूर्त्या च प्रविभज्यते ।"

(तं०आ० 6, 22)

~बन्धकारणम्—– कस्मिँश्चिदप्यध्वनि दृढतरा वासना बन्धकारिण्येव भवति चेद्गुरुस्तां न शोधयेत्। यथा–

"अध्वमध्ये तु ये पाशा ज्ञेयाश्चानन्तकोटयः ॥
प्रधानगुणभेदेन यावच्चानाश्रितं पदम् ।
तस्मादेवं विजानीयादध्वा बन्धस्य कारणम् ॥"

(स्व०तं० 10, 357-8)

~शुद्धः —— शिवादिशुद्धविद्यान्तस्तत्त्ववर्गः शुद्धोऽध्वा। यथा–

"चित्प्राधान्ये शिवतत्त्वम्, आनन्दप्राधान्ये शक्तितत्त्वम्, इच्छाप्राधान्ये सदाशिवतत्त्वम्....... ज्ञानशक्तिप्राधान्ये ईश्वरतत्त्वम्, क्रियाशक्तिप्राधान्ये विद्यातत्त्वम्, ...इति शुद्धोऽध्वा।"

(तं०सा० पृ० 74)

~षड्विधः —— स्वात्मशिवत्वपरामर्शोपायभूतत्वेन वर्णमन्त्रपदानां, कला-तत्त्व-भुवनानां चाध्वेति संज्ञा। तत्र पूर्वं त्रयमभिधानरूपमपरं त्रयमभिधेयभूतम्। यथा–

"तत्र यदेकमर्धं भुवन-तत्त्व-कला-स्वभावम्, अन्यत्तु मन्त्र-पद-वर्णात्मकम्। प्रत्येकञ्च स्थूल-सूक्ष्म-परप्रक्रियया त्रैविध्यम्। तत्र प्रथममभिधेयभूतं, द्वितीयमभिधानकारकमिति विभागः।"

(म०मं०प० पृ० 69)

"स्वपरामर्शोपायभूतत्वाद् वर्णकलादीनामध्वशब्दव्यपदेशः।"

(तदेव पृ० 70)

परं तन्त्रसारे पदाध्वनः स्थूलत्वं मन्त्राध्वनश्च सूक्ष्मत्वं निर्दिष्टं 112तमे पृष्ठे।

~तदुपयोगः (देहे)~ —— यथा–

"एवं विश्वाध्वसम्पूर्णं कालव्यापारचित्रितम् ।
देशकालमयस्पन्दसद्म देहं विलोकयेत् ॥
तथा विलोक्यमानोऽसौ विश्वान्तर्देवतामयः ।
ध्येयः पूज्यश्च तर्प्यश्च तदाविष्टो विमुच्यते॥"

(तं०आ० 12, 6-7)

~(बाह्ये विषये) —— यथा–

"इत्थं घटं पटं लिङ्गं स्थण्डिलं पुस्तकं जलम् ।
यद्वा किञ्चित्क्वचित्पश्येत्तत्र तन्मयतां व्रजेत् ॥

(तं०आ० 12, 8)

~(सामान्यतः) —— शुद्धसंवित्तत्त्वमारभ्य बाह्यलिङ्ग- स्थण्डिलघटादिकं यावत् सर्वस्मिन् भावजाते धारणालम्बनतां नीते समस्तस्य व्यस्तस्यापि वाऽध्वनो भावनया पूर्णशिवत्वेन दर्शने कृते सति तत्र तत्र निजपारमैश्वर्यात्मकस्य स्वातन्त्र्यस्य साक्षात्कारो विधीयते येन सर्वमप्यालम्बनजातं स्वात्ममहेश्वरतया साक्षात् प्रथते। तेन चाणवसमावेश विशेषो जायते। इत्येष अध्वोपयोगः। यथा–

"आसंवित्तत्त्वमाबाह्यं योऽयमध्वा व्यवस्थितः ।
तत्र तत्रोचितं रूपं स्वं स्वातन्त्र्येण भासयेत् ॥"

(तं०आ० 12, 4)

अनङ्गद्वयम् (बीजम्) —— विसर्गः। यथा–

"......................अँनङ्गद्वयं विसर्गः॥"

(तं०आ०वि० खं० 12, पृ० 197)

अनच्कः —— द्वादशकलासु प्रणवस्य नादाख्या सप्तमी कला। यथा–

"अनच्को नादः इति ।"

(तं०आ०वि० खं० 12, पृ० 212)

अनधिकारिणः (1) —— अवरेषु शास्त्रेषु दीक्षिताः सामान्यतो नैव त्रिकशास्त्रेऽधिकारिणः अत्र शास्त्रे हस्तक्षेपं कुर्वतां तेषां पात एव निश्चितः। लिङ्गोद्धारेण त्रिकशास्त्रगुरुकृतेन तेषामप्यत्र शास्त्रेऽधिकारो नान्यथा। यथा–

"ज्ञप्तिश्च शिवतत्त्वस्य तत्संस्कारपुरःसरा ॥
अन्यथा प्रत्यवायः स्यादुपदेष्टुपदेश्ययोः ।
तत्संस्कारग्रहश्चेत्स्यात्कामं शास्त्रार्थ ईदृशः ॥
न तु वैष्णवता तस्य सांख्यता श्रौततापि वा।
अन्यसंस्कारमूर्ध्वोर्ध्वं गृहीत्वाप्यनुतिष्ठति ॥
वैष्णवाद्यैव तर्ह्यस्य प्रत्यवायो महत्तरः ।"

(मा०वि०वा० 2, 299-302)

"किञ्च तादात्म्ययोगेन देवता पूज्यते ततः ॥
विष्णुतादात्म्यमापन्नः कथं रुद्रं प्रपूजयेत् ।
गीतासु च ततो गीतं यो यच्छुद्धः स एव सः॥"

(तदेव 2, 305-6)

"मुख्यस्तावदयं कल्पो यो यत्रैव प्रतिष्ठितः ।
नित्यं तादात्म्यमापन्नः स तत्राधिकृतस्त्विति॥"

(तदेव 2, 309)

(2) वैष्णवादिदीक्षिताः शैवेऽनधिकारिणो लिङ्गोद्धृतिं विना। यथा–

"तस्माद्ये केचनान्ये स्युः पशुशासनवर्तिनः ।
वैष्णवाः सौगताः श्रौतास्तथा श्रुत्यन्तवादिनः ॥
इत्यादयो नाधिकृता जातुचित्पतिशासने ।
उक्तवान् यत्र शास्त्रेष्वप्यधिकारिविवेचने ॥
यो वैष्णवो मनुं दद्याच्छैवं मूढमतिः शिशोः।
तं पापं वञ्चकं मत्वा शिशुर्न्यायं समाचरेत् ॥"

(मा०वि०वा० 2, 325-27)

(3) यथा क्रमशः परिगणिताः——

"तन्न सैद्धान्तिको वामे नासौ दक्षे स नो मते ॥
कुलकौले त्रिके नासौ...................... ।"

(तं०आ० 13, 320-21)

"उत्तरोत्तरविज्ञाने नाधिकार्यधरोऽधरः ।"

(तदेव 325)

छद्मना गृहीतदीक्षास्तस्कराः। अन्तरनाश्वस्ता अपि बहिः शैवत्वं दर्शयन्तो धूर्त्ताः शिष्याः। यथा–

"तस्करं तु विजानीयात्सिद्धिहानिं करोति यः।
नाधिकारी भवेद्वै स तन्त्रेऽस्मिन्पारमेश्वरे ॥"

(ने०तं०अ० 16, 39)

अनधिकारी—— शैवदर्शने यो दीक्षादिकं नार्हति। तस्य लक्षणान्युक्तान्यागमे। यथा–

"मायान्वितः शठः क्रूरो निःसत्यः कलहप्रियः ।
कामी च लोभसम्पन्नः शिवभक्तिविवर्जितः ।
दूषको गुरुशास्त्राणां दीक्षितोऽपि न मुक्तिभाक्॥"

(स्व०तं०पं० 1, 20-21)

अनन्तकारिका—— पतञ्जलिकृतः परमार्थसारः। यथा–

"अनन्तकारिका चैषा प्राहेदं बन्धकं किल।"

(तं०आ० 28, 313)

अनन्तनाथः—— महामायाधीश्वरः, मायायाः सकाशादशुद्धस्याध्वनः सृष्टिकृत्, तस्यैव च संहारकृत्। भगवानीश्वरभट्टारक एव महामायायामवतीर्णः सन्ननन्तनाथः। श्रीकण्ठनाथस्य शिवस्य गुरुः। भगवच्छक्तेः शिष्यः, अघोरेशः। यथा–

"श्रीकण्ठनाथश्चाधिगततत्त्वः श्रीमदनन्तनाथात्, सोऽपि श्रीभगवच्छक्तितः इत्याद्यागमेषूक्तम्।"

(ई०प्र०वि०वि० खं० 3, पृ० 402)

"अशुद्धं पुनरध्वानमनन्तापरनामाघोरेशः सृजति, ईश्वरेच्छावशेन प्रक्षुब्धभोगलोलिकानामणूनां भोगसिद्ध्यर्थम् ।" अनन्तनाथस्यैव क्रियांशप्रधानमपरं शरीरमघोरेश इति नाम्ना प्रसिद्धम्।

(तं०सा० पृ० 75)

द्र० 'अघोरेशः' इति।

अनिकेतः—— सुविरक्तः साधकः। यथा–

"अनिकेतः– 'इदमेव मया कर्त्तव्यम्' इति यस्य नास्ति प्रतिज्ञा। यथाप्राप्तहेवाकितया सुखदुःखादिकमुपभुञ्जानः परमेश्वरसमावेशितहृदयः सुखेनैव प्राप्नोति परमकैवल्यमिति।

(गी०सं० पृ० 135)

अनिर्वाच्यत्वम्—— रहस्यभूतस्य तत्त्वस्य स्फुटव्याख्यानस्यासम्भवता। तच्च परब्रह्मणः एव, नाविधादेः कस्याप्यन्यस्य तत्त्वस्य। यथा–

सद्वा कार्यमसद्वा सम्भाव्यते। उभयात्मकमनुभयात्मकमनिर्वाच्यमिति तु स्ववाचैव विरुध्यते।

(ई०प्र०वि० खं० 2, पृ० 138-39)

अनिरुद्धः —— मातङ्गपारमेश्वरव्याख्याकारः। यथा–

"श्रीमताप्यनिरुद्धेन शक्तिमुन्मीलिनीं विभोः ॥
व्याचक्षाणेन मातङ्गे वर्णिता निरपेक्षता ।

(तं०आ० 13, पृ० 273-74)

अनुग्रहः —— जीवानां मोक्षस्य मूलकारणात्मिका परमेश्वरी कृपा। यथा–

एष चानुग्रहलक्षणोऽन्त्यः पञ्चमः पारमेश्वरः कृत्यविशेषः परपुरुषार्थप्रापकः, तन्निबन्धनत्वात् परमार्थमोक्षस्य।

(ई०प्र०वि० खं० 1, पृ० 11)

शक्तिपातवशाद्देवि नीयते सद्गुरुं प्रति ।
वीय................................. ॥

(उद्ध०प०सा०वि० पृ० 8)

~अवरः परञ्च—— शिवेनैव कृतोऽनुग्रहः परोऽनुग्रहो यो ज्ञानमोक्षप्रदः। शिवादवरेण केनापि देवेन कृतोऽनुग्रहोऽवरः। नासौ साक्षान्मोक्षस्य दाता। यथा–

वैष्णवादीनां तु राजानुग्रहवन्न मोक्षान्तता ।

(तं०सा० पृ० 124)

अत एव गुरुभूयस्त्वमुपदिष्टं शैवे ।

~कर्माद्यनपेक्षः~—— अनुग्रहशक्तिपातो हि कर्माणि नाशयति पर्यन्ते। ततः कर्मनाशकत्वान्नास्य कर्मापेक्षत्वम्। ततोऽनुग्रहः केवलं परमेश्वरेच्छाधीनः। यथा–

यत्तु कस्मिंश्चन शिवः स्वेन रूपेण भासते ॥
तत्रास्य नाणुगे तावदपेक्ष्ये मलकर्मणी ।
अणुस्वरूपताहानौ तद्गतं हेतुतां कथम् ॥
व्रजेन्मायानपेक्षत्वमत एवोपपादयेत् ।

(तं०आ० 13-114 तः 16)

अनुग्रहस्तु यः सोऽयं स्वस्वरूपे विकस्वरे ॥
ज्ञप्त्यात्मेति कथं कर्मनियत्यादि प्रतीक्षते ।
कर्मकालनियत्यादि यतः सङ्कोचजीवितम् ॥
सङ्कोचहानिरूपेऽस्मिन् कथं हेतुरनुग्रहे ।

(तं०आ० 28-233 तः 35)

~कृत्यपञ्चके—— सृष्टिस्थिति-संहार-पिधानानुग्रहा, इति पञ्चकृत्यानि परमेश्वरस्य। तत्रानुग्रहः पञ्चमं चरमं च कृत्यम्। यथा–

सृष्टिसंहारकर्तारं विलयस्थितिकारकम् ।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम् ॥

(स्व०तं० 1-3)

~तत्कारणम्—— शैवसिद्धान्तादौ प्रतिपादितानि कर्मसाम्यादीनि न शिवकृतस्यानुग्रहस्य कारणानि, तेषामपि कारणान्तरजन्यत्वात्, तर्कदोषबहुलत्वाच्च। ततः शिवस्य स्वातन्त्र्यमेवानुग्रहकृत्यस्य कारणम् । यथा–

"अनिमित्तस्तथा चायं शक्तिपातो महेशितुः ।"

(तन्मूलकारणम्) (मा०वि०वा० 1-688)

द्र० 'शक्तिपातः' इति ।

~तत्प्रकारशेषाः —— आर्तो वार्थार्थी वा सिद्धिप्रेप्सुरपि वा चेच्छिवभक्तौ प्रवृत्तो भवति तर्हि सोऽपि शिवकृतादनुग्रहादेव। इमे तावदवराः प्रकारास्तस्यानुग्रहस्य। एतेऽपि पर्यन्ते चिरादपवर्गप्रदाः। यथा–

आदिग्रहणेन सिद्धिप्रेप्सया धनादिकाम्ययाऽऽर्तिविवारयिषयापि च यत् परमेश्वरसमयप्रतिपालनं, तदप्यनुग्रहरूपमेवेत्याह............ तथापि सम्भाव्यत एवात्र विद्याशक्तिकृतो लेशेनावेशो, यः परिपाके मोक्षफलः।

(ई०प्र०वि०वि० खं० 3, पृ० 279)

~तत्प्रकारः––

द्र० शक्तिपातः– बहुप्रकारः, इति।

~तल्लक्षणम्–– अनुग्रहशक्तिपातपरिपूतः प्रबुद्धः साधको लोकव्यवहारं हेयं पश्यन्नपि प्राप्तकालं तं लोकवत् करोत्येव, न तत्र निजां ज्ञानितां प्रकटयति। योगाद्यभ्यासं च गुप्तं कुर्वन्नपि न तत्कर्तृत्त्वमात्मनः ख्यापयति। यथा–

यथा च बुद्धस्तां मूढचेष्टां कुर्वन्नपि द्विषन्।
ह्यास्ते.................................. ॥

(तं०आ० 14, 8-9)

~तीव्रः––द्र० शक्तिपातः – तीव्रः, इति।

~द्विविधः –– एकोऽनुग्रहः क्रमिको योऽभ्युदयप्रदानपूर्वकं क्रममुक्तिप्रदः, अक्रमिकश्चापरः दीक्षादि झटिति मोक्षप्रदः। यथा–

अनुग्रहश्चेति। सोऽपि क्रमिको वरदानात्मा तदीश्वरादिषु, अक्रमिकस्तु दीक्षाप्राप्त्यादिर्झटित्यपवर्गदः।

(ई०प्र०वि०वि० खं० 3, पृ० 279)

~पर्यन्ते–– शिवरूपताया प्रथममेवानुग्रहकृत्यं पर्यन्ते। यथा–

एवंरूपप्रभावानुग्रहः।

(ई०प्र०वि०वि० खं० 3, पृ० 27)

~भावनाभ्यासे–– योगी जडं विषयं प्रत्यक्षादिनावभासयत् तं प्रकाशाभेदमापादयंस्तदुपरि क्रियमाणां स्वामनुग्रहलीलामेव भावयति तत्र, तया च भावनया सम्यगभ्यस्तया स्वं परमेश्वरत्वमुद्द्योतयति। यथा–

देहप्राणादिपदमाविशंश्चिद्रूपो महेश्वरो बहिर्मुखीभावावसरे नीलादिकमर्थं नियतदेश-कालादितया यदाभासयति तदा..... प्रकाशैक्येन प्रकाशनेऽनुगृहीतृता।

(प्र०हृ० पृ० 23)

~मध्यः ––द्र० शक्तिपातः – मध्यः, इति।

~मन्दः ––द्र० शक्तिपातः – मन्दः, इति।

~विचित्रलीलः –– अनुगृहीतोऽपि साधकः न सदैव तीव्रगत्याऽग्रेसरति। असौ कदाचिदविश्वासमपि याति गुरुं, मन्त्रं, दीक्षां च प्रति। तेन परिभ्राम्यते मायीये मोहे पुनरपि। कश्चित् कालादानन्तरं पुनरनुगृह्यते तीव्रतया, येन पुनर्मोक्षमार्गेऽग्रेसरो भवति। अनुग्रहकृत्यस्य लीलात्मकत्वमेवैतद् वेद्यं सुधीभिः। अवैचित्र्ये नेयं क्रीडाऽभविष्यत्। यथा–

शक्तिपातसमये विचारणं प्राप्तमीश न करोषि कर्हिचित्।
अद्य मां प्रति किमागतं यतः स्वप्रकाशनविधौ विलम्बसे ॥

(शि०स्तो० 13-11)

सुखासुखयोर्बहिर्मननम्॥ (शि०सू० 3-34) मोहप्रतिसंहस्तु कर्मात्मा। (तदेव 3-35) अभिलाषाद् बहिर्गतिः सम्बाह्यस्य (तदेव 340) एतेषां सूत्राणां व्याख्याः विम्रष्टव्याः।

~तद्वैचित्र्यहेतुः –– शिवः स्वातन्त्र्येण जीवेष्वनुग्रहं वा निग्रहं वा करोति पारमेश्वरीं क्रीडामभिनयन्। अनुग्राह्येष्वपि तीव्रं वा, मध्यं वा, मन्दं वेत्यादिरूपतया बहुप्रकारकवैचित्र्ययुतमनुग्रहं करोति तद्वैचित्र्ये तस्य स्वातन्त्र्यमेव कारणं नान्यत् किमपि, कारणत्वेनाभिमतस्यापि भक्तिभावादेः कर्मसाम्यादेर्वा कारणान्तरोत्थत्वान्मूलतः पारमेश्वरस्वातन्त्र्यकारणत्वाच्च। यथा–

स च स्वाच्छन्द्यमात्रेण तारतम्यप्रकाशकः।

(तं०आ० 13-117)

द्र० मा०नि०वा० 1-689तः 92, 97, 98 इति।

~शिवस्वभावः –– निज स्वभावादेव शिवः कृत्यपञ्चककारी। ततोऽनुग्रहशीलता तस्य स्वाभाविकी, न कारणान्तरमपेक्षते। तस्य पारमैश्वर्यायाः लीलायाश्चरममिदमङ्गमनुग्रहाख्यम्। यथा–

स्वेच्छयैव भगवन् निजमार्गे कारितः पदमहं प्रभुणैव।

(शि०स्तो० 4-10)

एष चानुग्रहलक्षणोऽन्त्यः पञ्चमः पारमेश्वरः कृत्यविशेषः परपुरुषार्थप्रापकः।

(ई०प्र०वि० खं० 1, पृ० 11)

परमेश्वरः पञ्चविधकृत्यमयः, सततम् अनुग्रहमय्या परारूपया शक्त्याक्रान्तो वस्तुतोऽनुग्रहैकात्मैव।

(प०त्री०वि० पृ० 3)

~स्वातन्त्र्यतः –– शिवस्य स्वातन्त्र्यं विहाय न किमपि तस्यानुग्रहस्य कारणम्। स्वतन्त्रया स्वेच्छया यस्मिन् कस्मिन्नपि जनेऽनुग्रहं करोति शिवः, तीव्रं वा करोति, मध्यं वा, मन्दमपि वा। यथा–

तेन शुद्धः स्वप्रकाशः शिव एवात्र कारणम्।

(तं०आ० 13-116)

अनिमित्तस्तथा चायं शक्तिपातो महेशितुः॥

(मा०वि०वा० 1-688)

अनन्तभुवनम्–– देशाध्वयोगेऽनन्तस्य भुवनं ब्रह्माण्डादधोभागे बहिरेव। तत्र स्थितोऽनन्तो ब्रह्माण्डं धारयतीति। यथा–

"....... इदमत्र प्रतिपत्तव्यं–यदनन्तस्य बहिरवस्थानमिति।"

(तं०आ०वि० खं० 5, पृ० 17)

अनन्तम्–– योगिपरम्परासु स्वप्नसंपृक्तायास्तुर्यायाः पारिभाषिकं नाम। स्वप्नदशारूढा योगिनस्तत्र देशकालादिपरिच्छिन्नतां योगाभ्यासेन विगाल्यासीमताशालिनीं तुर्यां सङ्क्रामन्ति, ततस्तैरेतस्यै ''अनन्तम्'' इति पारिभाषिकी संज्ञा दत्ता। यथा–

"अनन्तमिति स्वप्ने विषयेऽन्द्रियाद्यनपेक्षणेन देशकालाद्यनियमात्।"

(तं०आ०वि० खं० 7, पृ० 188)

~तत्तदनुग्राहिका——सा तु तुर्यैव जाग्रदाद्यनुग्राहिका। यथा—

"जाग्रदाद्यास्तु सम्भाव्यास्तिस्रोऽस्याः प्राग्दशा यतः।
त्रितयानुग्रहात्सेयं तेनोक्ता त्रिकशासने॥
मनोन्मनमनन्तं च सर्वार्थमिति भेदतः।"

(तं॰आ॰ 10, 276-77)

"जाग्रदाद्यवस्थात्रयानुग्राहकत्वेन……………।"

(तं॰आ॰वि॰ खं॰ 7, पृ॰ 187)

अवस्थाः ~भेदप्रभेददृष्ट्या——इति।

अनन्तविजयशास्त्रम्——किमपि शैवसिद्धान्तशास्त्रं समुद्धृतपंक्तिजंयरथेन। यथा—

"नाराचास्त्रस्य च प्रयोगः कीदृक्? इत्यपेक्षायां समानकल्पेऽपि शास्त्रे तदनुपलम्भाद् अत्यन्तमसमानाद् अनन्तविजयाख्यात् सिद्धान्तशास्त्रात्—

"उत्तानं तु करं कृत्वा त्रिस्रोऽङ्गुल्यः प्रसारयेत्।
मध्यमाङ्गुष्ठकौ लग्नौ चालयेत मुहुर्मुहुः॥
नाराचः कीर्तितः ह्येवम्……………।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 280)

द्रष्टव्यं 'नाराचमुद्रा' इति।

अनलः——रकारः। यथा—

"अनलो 'र'।"

(तं॰आ॰वि॰ खं॰ 12, पृ॰ 203)

अनाख्या——संविद्व्यवहारस्यावस्थाविशेषो द्वादशकालीसिद्धान्ते गणनोपयोगी। अनिर्वचनीयस्वरूपता नाम स्थितिः संविदः। यथा—

(क) "संविच्च संवेद्यनिष्ठा, संवेद्यं नाम च स्वात्मातिरिक्तं न किञ्चिदप्यस्तीति, तथा व्यपदेशमप्यलभमाना सर्वत्रैवाव्यपदेश्येति, अनामकेति, अनाख्येति चोद्घोष्यते।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 133)

(ख) "अनुपाधिर्भजमाना विश्रामं धाम्नि शाम्भवे।
पुनराद्यैव सा शक्तिरनाख्येत्यभिधीयते॥"

(पू॰प्र॰ 1, 514)

~संवित्——सृष्ट्यादिपञ्चकृत्यकारिणी पारमेश्वरी परासंवित् यस्याः एव परमशिव इति प्रसिद्धा पारिभाषिकी संज्ञा। यथा—

"परैव ह्यनाख्या भगवती संवित् स्वस्वातन्त्र्यात् स्वात्मनि सृष्ट्याद्यवभासयति विलापयति च।"

(तं॰आ॰वि॰ खं॰ 1, पृ॰ 9)

अनादरविरक्तिः——अभिनवगुप्तस्य गुरोः श्रीशम्भुनामस्येयं मतिर्यद् बलात्कारेण विषयेभ्यो निरुद्धेष्विन्द्रियेषु बहुधा अवाञ्छनीयाः प्रतिक्रियाः सञ्जायन्ते। शैवयोगाभ्यासोपायतः पुनर्यदा योगी स्वात्मसाक्षात्कारस्यानन्दं मनागपि रसयति तदा तस्य योगिनश्चेतसीन्द्रियेषु च विषयेभ्यः स्वाभाविकी विरक्तिः स्वयमेवोपजायते, यतः स्वस्वरूपसाक्षात्काररसस्य पुरतो विषयसुखं तस्य कृते नीरसतामेवोपैति। सैषाऽनायाससिद्धा विषयविरक्तिरेवानादरविरक्तिः। विषयसुखस्य तत्रानादरदृष्ट्यैव दृश्यमानत्वात्। यथा—

(क) "तथाहि गुरुरादिक्षद् बहुधा स्वकशासने॥
अनादरविरक्त्यैव गलन्तीन्द्रियवृत्तयः।
यावत्तु विनियम्यन्ते तावत्तावद्विकुर्वते॥"

(मा॰वि॰वा॰ 2, 111-12)

(ख) "स्वं पन्थानं हयस्येव मनसो ये निरुन्धते॥
तेषां तत्खण्डनायोगाद् धावत्युन्मार्गकोटिभिः।

(तदेव 2, 109-10)

अनादित्वकल्पना——जगदाभासस्य कारणभूततया याऽसावनादि-प्रतिभासिकतत्त्वानां मायाऽविद्यादीनां कल्पना वेदान्तिभिर्बौद्धादिभिश्च कल्प्यते सैव सुप्रसिद्धाऽनादित्वकल्पना।

~न न्याय्या——उक्तमेतत्—

"अथानादित्वमात्रेण युक्तिहीनेन साध्यते।
व्यवस्थेयमलं तर्हि मलेनास्तु वृथामुना॥"

(तं॰आ॰ 13, 82)

अनामया——प्रमाणादित्रयविगलने सति परप्रमातृरूपा स्वरूपनिष्ठा प्रमात्मिका परा संवित्। यथा—

"वेद्यादिभेदगलनादुक्ता सेयमनामया।
मात्राद्यनुग्रहाधानात् सव्यापारेति भण्यते॥"

(तं॰आ॰ 10, 271-72)

तस्या एवानुग्रहेण प्रमाणादित्रयस्य सर्वे व्यापाराः, इति॥

अनाश्रितः——स्वशक्तावेवाश्रितो न पराश्रितः,—इत्यनाश्रितः शिवः। यथा—

"स्वशक्त्याश्रितः स भगवांस्तेन गीतस्त्वनाश्रितः।
तस्याश्रितं जगत्सर्वमुन्मन्यन्तं वरानने॥"

(स्व॰तं॰ 11, 23)

अनाश्रितम्~तत्त्वम्——शिवतत्त्वमेवानाश्रितं तत्त्वमिति। यथा—

'शिवतत्त्वमतः शून्यातिशून्यं स्यादनाश्रि(वृ)तम्।"

(तं॰आ॰ 11, 21)

अनाश्रितः शिवः——शिवतत्त्वाधिष्ठितः शिव एवोपास्यतया भावितः सन्ननाश्रितः। यथा—

"श्रीपरमशिवः स्वात्मैक्येन स्थितं विश्वं सदाशिवाद्युचितेन

रूपेणावबिभासयिषुः पूर्वं चिदैक्याख्यातिमयानाश्रितशिवपर्याय—शून्यातिशून्यात्मतया प्रकाशाभेदेन प्रकाशमानतया स्फुरति ।"

(प्र०हृ०पृ० 8-9)

~तत्पदम्——भावनात्मके साधनाक्रमेऽनाश्रितस्य स्थानं पश्यन्त्याः परमा कोटिस्तदूर्ध्वं च तिसृणां देवीनां स्थितिः । यथा—

"अनाश्रितशक्त्यात्मकपश्यन्तीपरमकोटिमतिक्रम्य पारमेश्वर्यां परसंविदि देवतास्तिस्रः ।"

(प०त्री०वि० पृ० 147)

~तदायुः——यथा—

"शक्तिकालेन परार्धकोटिगुणितेन अनाश्रितदिनम् ।"

(तं०सा०पृ० 56)

एतावता दिनमानेन वर्षशतमनाश्रितस्यायुरिति भाव्यते कालाध्वप्रक्रियाभ्यासे ।

~तद्भुवनम्——व्यापिन्याख्या शक्तिरेव । यथा—

"शक्तितत्त्वमित्यनाश्रितभुवनम्…… । तद्धि शक्तितत्त्वे एव व्यापिन्यामवस्थितमिति भावः ।"

(तं०आ०वि०खं० 5, पृ० 258)

अनास्था—अविश्वासो गुरौ, शास्त्रे, मन्त्रेऽभ्यासादौ वा । यथा—

"ज्ञानायतनदीक्षादावास्थाबन्धपरिच्युतिः ।
व्यापारव्याहृतैर्ज्ञेया………………… ॥"

(तं०आ० 28, 281)

~तद्वैविध्यम्——रोगादिपीडितः कश्चित् साधको यदि पीडाक्षणें कष्टावेशादायतनदीक्षामन्त्रादि निन्देत्, तत्तथाभूतमनास्थाचिह्नं न पातकारि । कष्टभोगसमकालस्थायितयाऽग्रे नश्यत्येव स्वास्थ्यलाभावसरे । परं स्वस्थचित्तः स्वस्थशरीरश्चेत् कोऽपि मन्त्रदीक्षायतनादि निन्देत् तदासौ पारमेश्वरपिधानकृत्यप्रभावितः इति ज्ञेयम् । यथा—

"………………तान्यपि द्विविधानि च ॥
यानि जातुचिदप्येव स्वास्थ्ये नोदमिषन्पुनः ।
अस्वास्थ्ये धातुदोषोत्थान्येव तद्भोगमात्रकम् ॥
धातुदोषाच्च संसारसंस्कारास्ते प्रबोधिताः ।
छिद्रगा अपि भूयिष्ठज्ञानदग्धा न रोहिणः ॥
ये तु कैवल्यभागीयाः स्वास्थ्येऽनुन्मिषिताः सदा ।
अस्वास्थ्ये चोन्मिषन्त्येते संस्काराः शक्तिपाततः ॥"

(तं०आ० 28, 281-84)

अनाहतः~(अनुस्वार-विसर्गोदयतः)——प्राणे षट्त्रिंशदङ्गुलायामो बिन्दुरपाने च तथाविधो विसर्गः । यथा—

"……… बिन्द्वर्णं विसर्गौ परितः स्थितौ ॥

(तं०आ० 6, 221)

"प्राणे बिन्दोः षट्त्रिंशदङ्गुलात्मन्युदयो विसर्गस्य त्वपाने, द्वयोरपि बिन्दुनादात्मकत्वात् ॥"

(तं०आ०वि० खं० 4/1, पृ० 180)

~नादः——स्वयमुच्चरणशीलः सर्ववर्णाविभाग एवानन्तस्तमितरूपो नादः ।

द्र० 'वर्णोदयः' (परतमः)——इति ।

~तन्माहात्म्यम्——अनाहतो नादोऽभ्यासिनो भैरवताभिव्यञ्जकः । तस्य नामान्तराणि-भैरवसद्भाव इति, मातृसद्भाव इति, एकाक्षरा देवीति च । यथा—

"स तु भैरवसद्भावो मातृसद्भाव एष सः ।
परा सैकाक्षरा देवी यत्र लीनं चराचरम् ॥"

(तं०आ० 6, 218)

~वर्णोदयः——अकाराद्यूकारान्तः । प्राणचारेऽनाहतनादे प्राणगतौ अ, इ, उ-इति ह्रस्वत्रयस्योदयः प्रत्येकं द्वादशाङ्गुलायामः, अपानगतौ च तथैव दीर्घत्रयस्य आ, ई, ऊ इत्यस्य । यथा—

"ह्रस्वार्णत्रयमेकैकं रव्यङ्गुलमथेतरत् ।
प्रवेश इति षट्वर्णाः सूर्येन्दुपथगाः क्रमात् ॥

(तं०आ० 6, 219)

रव्युङ्गुलम्=द्वादशाङ्गुलम् । इतरद्=दीर्घत्रयम् । सूर्येन्दुपथगाः=प्राणापानचारगाः । यथा—

"सूर्यपथे ह्रस्वानां त्रयमिन्दुपथे च दीर्घाणामिति ।"

(तं०आ०वि० खं० 4/1, पृ० 180)

~स-ह-रूपः——प्राणरूपस्य सकारस्य हृदये समुदयः षट्त्रिंशदङ्गुलः, अपानात्मकस्य च हकारस्य तथैव द्वादशान्ताद् हृदयं यावत् । तेन च "हंसः, हंसः" इति प्राणापानयोरुदयः सततगत्या । यथा—

"हृद्येष प्राणरूपस्तु सकारो जीवनात्मकः ।
बिन्दुः प्रकाशो हार्णश्च पूरणात्मतया स्थितः ॥

(तं०आ० 6, 223)

नायं वर्णस्थानव्यवस्थानुसारी समुदयः अस्य विशेषरूपत्वात् ।

~सन्ध्यक्षररूपः——अपाने ए, ओ इति सन्ध्यक्षरद्वयं प्रत्येकमष्टादशाङ्गुलम्, प्राणे च तथैव ऐ, औ इति । यथा—

"ए, ओ इति प्रवेशे तु ऐ, औ इति द्वयं विदुः ॥"

(तं०आ० 6, 220)

जयरथानुसारं युगलद्वयमपाने एव पृथक्-पृथक् यथा—

"प्रवेश इति न तु निर्गमेऽपि ।"

(तं०आ०वि० खं० 4/1, पृ० 180)

~षण्ठवर्णरूपः——अपाने एव क्रमेण बाह्यद्वादशान्ते, ललाटे, गले, हृदि च ऋ, ॠ, लृ, ॡ इति वर्णचतुष्टयस्योदयः । नात्र प्रत्येकं नवाङ्गुल आयामः । यथा—

"षष्ठार्णानि प्रवेशे द्वादशान्तललाटयोः ।
गले हृदि च… … … … ॥"

(तं०आ० 6, 221)

~(5) व्यञ्जनात्मकः——व्यञ्जनानां स्थितिः सवर्णस्वराणामन्तरेवेति न पृथग् निरूपणमावश्यकम् । यत्रैव स्वराणा-

मुदयस्तत्रैव तत्स्थानभाजां व्यञ्जनानामपि। यथा—

"कादिपञ्चकमाद्यस्य वर्णास्यान्तः सदोदितम्।
एवं सस्थानवर्णानामन्तः सा सार्णसन्ततिः॥"

(तं०आ० 6, 222)

~शब्दः——

द्र० 'नित्योदितः~मन्त्रः इति।

अनिकेतः——सुविरक्तः साधकः यथा—

"अनिकेतः—'इदमेव मया कर्त्तव्यम्'—इति यस्य नास्ति प्रतिज्ञा। यथाप्राप्तहेवाकितया सुख-दुःखादिकमुपभुञ्जानः परमेश्वरसमावेशितहृदयः सुखेनैव प्राप्नोति परमकैवल्यमिति।"

(गी०सं० पृ० 135)

अनिरुद्धः——मातङ्गपारमेश्वरव्याख्याकारः। यथा—

"श्रीमताप्यनिरुद्धेन शक्तिमुन्मीलिनीं विभोः॥
व्याचक्षाणेन मातङ्गे वर्णिता निरपेक्षता।"

(तं० आ०13, 293-94)

अनिर्वाच्यत्वम्——रहस्यभूतस्य तत्त्वस्य स्फुटव्याख्यानस्यासम्भवता। तच्च परब्रह्मणः एव, नाविद्यादेः कस्याप्यन्यस्य तत्त्वस्य। यथा—

"सद्वा कार्यमसद्वा सम्भाव्यते। उभयात्मकमनुभयात्मकमनिर्वाच्यमिति तु स्ववाचैव विरुध्यते॥

(ई०प्र०वि० खं० 2, पृ० 138-39)

अनुग्रहः——जीवानां मोक्षस्य मूलकारणात्मिका पारमेश्वरी कृपा। यथा—

"एष चानुग्रहलक्षणोऽन्त्यः पञ्चमः पारमेश्वरः कृत्यविशेषः परपुरुषार्थप्रापकः; तन्निबन्धनत्वात् परमार्थमोक्षस्य।".

(ई०प्र०वि० खं० 1, पृ० 11)

"शक्तिपातवशाद्देवि नीयते सद्गुरुं प्रति।
... ... ॥"

(उद्धृ०प०सा०वि० पृ० 8)

~अवरः परश्च——शिवेनैव कृतोऽनुग्रहः परोऽनुग्रहो यो ज्ञानमोक्षप्रदः। शिवावरेण केनापि देवेन कृतोऽनुग्रहोऽवरः। नासौ साक्षान्मोक्षस्य दाता। यथा—

"वैष्णवादीनां तु राजानुग्रहवन्न मोक्षान्तता।"

(तं०सा० पृ० 124)

अत एव गुरुभूयस्त्वमुपदिष्टं शैवे।

~कर्माद्यनपेक्षः——अनुग्रहशक्तिपातो हि कर्माणि नाशयति पर्यन्ते। ततः कर्मनाशकत्वान्नास्य कर्मापेक्षत्वम्। ततोऽनुग्रहः केवलं परमेश्वरेच्छाधीनः। यथा—

"यत्तु कस्मिंश्चन् शिवः स्वेन रूपेण भासते॥
तत्रास्य नाणुगे तावदपेक्ष्ये मलकर्मणी।
अणुस्वरूपताहानौ तद्गतं हेतुतां कथम्॥
व्रजेन्मायानपेक्षत्वमत एवोपपादयेत्।"

(तं०आ० 13, 114-16)

"अनुग्रहस्तु यः सोऽयं स्वस्वरूपे विकस्वरे॥
ज्ञप्त्यात्मेति कथं कर्मनियत्यादि प्रतीक्षते।
कर्मकालनियत्यादि यतः सङ्कोचजीवितम्॥
सङ्कोचहानिरूपेऽस्मिन्कथं हेतुरनुग्रहे।"

(तं०आ० 28, 233-35)

~कृत्यपञ्चके——सृष्टि--स्थिति--संहार--पिधान-अनुग्रहाः इति पञ्चकृत्यानि परमेश्वरस्य। तत्रानुग्रहः पञ्चमं चरमञ्च कृत्यम्। यथा—

"सृष्टिसंहारकर्तारं विलयस्थितिकारकम्।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम्।"

(स्व० तं० 1, 3)

~तत्कारणम्——शैवसिद्धान्तादौ प्रतिपादितानि कर्मसाम्यादीनि न शिवकृतस्यानुग्रहस्य कारणानि, तेषामपि कारणान्तरजन्यत्वात्, तर्कदोषबहुलत्वाच्च। ततः शिवस्य स्वातन्त्र्यमेवानुग्रहकृत्यस्य कारणम्। यथा—

"अनिमित्तस्तथा चायं शक्तिपातो महेशितुः।"

(मा० वि० वा० पृ० 1, 688)

द्र० 'शक्तिपातः'~(तन्मूलकारणम्) इति।

~तत्प्रकारशेषाः——आर्तो वार्थार्थी वा सिद्धिप्रेप्सुरपि वा चेच्छिवभक्तौ प्रवृत्तो भवति तर्हि सोऽपि शिवकृतादनुग्रहादेव। इमे तावदवराः प्रकारास्तस्यानुग्रहस्य। एतेऽपि पर्यन्ते चिरादपवर्गप्रदाः। यथा—

"आदिग्रहणेन सिद्धिप्रेप्सया धनादिकाम्ययाऽऽर्तिविवारयिषयापि च यत् परमेश्वरसमयप्रतिपालनं तदप्यनुग्रहरूपमेवेत्याह ·· तथापि सम्भाव्यत एवात्र विद्याशक्तिकृतो लेशेनावेशो, यः परिपाके मोक्षफलः। (ई०प्र०वि०वि० खं० 3, पृ० 279)

~तत्प्रकाराश्च

द्र० 'शक्तिपातः' (बहुप्रकारः) इति।

~तल्लक्षणम्——अनुग्रहशक्तिपातपरिपूतः प्रबुद्धः साधको लोकव्यवहारं हेयं पश्यन्नपि प्राप्तकालं तं लोकवत् करोत्येव, न तत्र निजां ज्ञानितां प्रकटयति। योगाद्यभ्यासञ्च गुप्तं कुर्वन्नपि न तत्कर्तृत्वमात्मनः ख्यापयति। यथा—

'यथा च बुद्धस्तां मूढचेष्टां कुर्वन्नपि द्विषन्।
हृद्यास्ते ... ... ॥"

(तं०आ० 14, 8-9)

~तीव्रः

द्र० 'शक्तिपातः'~तीव्रः इति।

~द्विविधः——एकोऽनुग्रहः क्रमिको योऽभ्युदयप्रदानपूर्वकं क्रममुक्तिप्रदः, अक्रमिकश्चापरो दीक्षाविर्भटिति मोक्षप्रदः। यथा—

"अनुग्रहश्चेति। सोऽपि क्रमिको वरदानात्मा नन्दीश्वरादिषु, अक्रमिकस्तु दीक्षाप्राप्त्यादिर्भगित्यपवर्गदः ॥"

(ई०प्र०वि०वि० खं० 3, पृ० 279)

~पर्यन्ते——शिवरूपतायाः सम्यक् प्रथनमेवानुग्रहकृत्यं पर्यन्ते। यथा—

" एवं रूपप्रथा चानुग्रहः।"

(ई०प्र०वि०वि० खं० 3, पृ० 27)

~भावनाभ्यासे——योगी जडं विषयं प्रत्यक्षादिनावभासयन् तं प्रकाशाभेदमापादयंस्तदुपरि क्रियमाणां स्वामनुग्रहलीलामेव भावयति तत्र, तया च भावनया सम्यगभ्यस्तया स्वं परमेश्वरत्वमुद्द्योतयति। यथा

"देहप्राणादिपदमाविशंश्चिद्रूपो महेश्वरो बहिर्मुखीभावावसरे नीलादिकमर्थं नियत-देश-कालादितया यदाभासयति, तदा··· प्रकाशैक्येन प्रकाशनेऽनुगृहीतृता।"

(प्र०हृ० पृ० 23)

साधनाप्रकारविशेषोऽयम्।

~मध्यः——

द्र० 'शक्तिपातः'~मध्यः इति।

~मन्दः——द्र० 'शक्तिपातः'~मन्दः इति।

~विचित्रलीलः——अनुगृहीतोऽपि साधको न सदैव तीव्रगत्याऽग्रे सरति। असौ कदाचिदविश्वासमपि याति गुरुं, मन्त्रं, दीक्षां च प्रति। तेन परिभ्राम्यते मायीये मोहे पुनरपि कञ्चित्कालम्। अनन्तरं पुनरनुगृह्यते तीव्रतया, येन पुनर्मोक्षमार्गेऽग्रेसरो भवति। अनुग्रहकृत्यस्य लीलात्मकत्वमेवैतद् वेद्यं सुधीभिः। अवैचित्र्ये नेयं क्रीडाऽभविष्यत्। यथा—

"शक्तिपातसमये विचारणं प्राप्तमीश न करोषि कर्हिचित्।
अद्य मां प्रति किमागतं यतः स्वप्रकाशनविधौ विलम्बसे ॥"

(शि०स्तो० 13, 11)

"सुखासुखयोर्बहिर्मननम्।" (शि०सू० 3, 34)
"मोहप्रतिसंहतस्तु कर्मात्मा।" (तदेव 3, 35)
"अभिलाषाद्बहिर्गतिः सम्वाह्यस्य।" (तदेव 3, 40)

एतेषां सूत्राणां व्याख्या विम्रष्टव्याः।

~तद्वैचित्र्यहेतुः——शिवः स्वातन्त्र्येण जीवेष्वनुग्रहं वा निग्रहं वा करोति पारमेश्वरीं क्रीडामभिनयन्। अनुग्राह्येष्वपि तीव्रं वा, मध्यं वा, मन्दं वेत्यादिरूपतया बहुप्रकारकवैचित्र्ययुतमनुग्रहं करोति तद्वैचित्र्ये तस्य स्वातन्त्र्यमेव कारणं नान्यत्किमपि, कारणत्वेनाभिमतस्यापि भक्तिभावादेः कर्मसाम्यादेर्वा कारणान्तरोत्थत्वान्मूलतः पारमेश्वरस्वातन्त्र्यकारणत्वाच्च। यथा—

"स च स्वाच्छन्द्यमात्रेण तारतम्यप्रकाशकः।"

(तं०आ० 13, 117)

द्र० (मा०वि०वा० 1, 689-92, 97-98) इति।

~शिवस्वभावः——निजस्वभावादेव शिवः कृत्यपञ्चककारी, ततोऽनुग्रहशीलता तस्य स्वाभाविकी, न कारणान्तरमपेक्षते। तस्याः पारमेश्वर्यायाः लीलायाश्चरममिदमङ्गमनुग्रहाख्यम्। यथा—

"स्वेच्छयैव भगवन्निजमार्गे कारितः पदमहं प्रभुणैव।"

(शि०स्तो० 4, 10)

'एष चानुग्रहलक्षणोऽन्त्यः पञ्चमः पारमेश्वरः कृत्यविशेषः परपुरुषार्थप्रापकः।"

(ई०प्र०वि० खं० 1, पृ० 11)

"परमेश्वरः पञ्चविधकृत्यमयः सततमनुग्रहमय्या परारूपया शक्त्याक्रान्तो वस्तुतोऽनुग्रहैकात्मैव।"

(प०त्री०वि०, पृ० 3)

~स्वातन्त्र्यतः——शिवस्य स्वातन्त्र्यं विहाय न किमपि तस्यानुग्रहस्य कारणम्। स्वतन्त्रया स्वेच्छया यस्मिन् कस्मिन्नपि जनेऽनुग्रहं करोति शिवः, तीव्रं वा करोति, मध्यं वा, मन्दमपि वा। यथा—

"तेन शुद्धः स्वप्रकाशः शिव एवात्र कारणम्।"

(तं०आ० 13, 116)

"अनिमितस्तथा चायं शक्तिपातो महेशितुः।"

(मा०वि०वा० 1, 688)

अनुग्रहकृत्यम्——

द्र० 'अनुग्रहः' इति।

अनुग्रहतिरोधानशक्ती——आरोहावरोहलीलामूलकारणभूते शिवस्य शक्ती। यथा—

'प्रकाशाप्रकाशरूपे—अनुग्रहतिरोधानशक्ती द्वे एव, ते मोक्षबन्धप्रविभागहेतू। यदुक्तमवधूतसिद्धपादैः—

बन्धाति काचिदपि शक्तिरनन्तशक्तेः
क्षेत्रज्ञमप्रतिहता भवपाशजालैः।
ज्ञानासिना च विनिकृत्य गुणानशेषा—
नन्या करोत्यभिमुखं पुरुषं विमुक्तौ ॥इति"

(प०सा०वि० पृ० 30)

अनुग्रहशक्तिः——परमेश्वरस्य सा शक्तिर्या पशुं मोक्षसाधनोन्मुखं विधायान्ततो परिपूर्णस्वात्मप्रत्यभिज्ञाभाजनं तं विधाय बन्धनान्मोचयति।

द्र० 'अनुग्रहतिरोधानशक्ती' इति।

अनुचक्रम्——अनुभूयमानानन्दसन्दोहदं चक्रम् इन्द्रियगणरूपम्। स्तनजघनाधरोष्ठकपोलादिरूपाणि शरीराङ्गानि वा। यथा—

"तत्प्रधानं भवेच्चक्रमनुचक्रमतोऽपरम्।"

(तं०आ० 29, 106)

"अतोऽपरं—न तथानन्दसन्दोहीत्यर्थः।"

(तं०आ०वि० खं० 11/2, पृ० 76)

'अनुचक्रेष्विति चक्षुरादीन्द्रियरूपेषु।

(तदेव पृ० 78)

कौलिकस्य विधेरयं विशेषः।

~तत्तर्पणम्——गन्धधूपस्रक्चन्दनादिद्रव्यैः कर्मभिश्चालिङ्गनचुम्बनमर्दनादिभिरानन्दोद्बोधनम्। यथा—

"इत्थं स्वोचितवस्त्वंशैरनुचक्रेषु तर्पणम् ।
कुर्वीयातामिहान्योन्यं मुख्यचक्रैकताकृते ॥"

(तं०आ० 29, 109-10)

कौलिकस्य विधेरयं विशेषः ।

अनुग्राहकाः——मूलतः शिव एव स्वयमनुग्रहकर्त्ता । तदिच्छातः भगवान् सदाशिवभट्टारक ईश्वरभट्टारकश्च । ईश्वरभट्टारक एवानुग्रहादिकृत्यानां सुस्फुटतया सम्पादनार्थं महामायादितत्वेषु भगवदनन्तनाथादिरूपतयावतीर्णो जीवानुद्धरति तस्य प्रेरणया रुद्रा अप्यनुग्रहकृत्यं तत्र तत्र कुर्वन्ति; तथैव ब्रह्माविष्णू अपि; तदनु देवा ऋषयो मानवा अपि तथा । यथा—

"एवं जगति सर्वत्र रुद्राणां योग्यतावशात् ।
अंगुष्ठमात्रपूर्वाणां. शतमष्टादशोत्तरम् ॥
अनुगृह्य शिवः साक्षान्मन्त्रेशत्वे नियुक्तवान् ।
ते स्वगोचरमासाद्य भुक्तिमुक्तिफलार्थिनाम् ॥
ब्रह्मादीनां प्रयच्छन्ति स्वबलेन समं फलम् ।
ऋषिभ्यस्तेऽपि ते चानुमन्वन्तेभ्यो महाधिपाः ॥
हेयोपादेयविज्ञानं कथयन्ति शिवोदितम् ।"

(मा०वि०तं० 1, 37-40)

अनुज उद्देशः——प्रतिप्रकरणं प्रतिपाद्यमानस्य विषयजातस्य नामकीर्तनं विस्तरतः । यथा—

"तत्रोच्यते पुरोद्देशः पूर्वजानुजभेदवान् ।"

(तं०आ० 1, 277)

"विशेषसंज्ञया कीर्तनमनुज उद्देशः ।"

(तं०आ०वि० खं० 1, पृ० 287)

द्र० (तं०आ० 1, 284-328)

अनुत्तरम्——परात् परतरं तत्त्वम्, विश्वस्य सृष्टि-संहारस्थानं, विश्वत्र च पदार्थजातेऽनावृतत्वेन प्रकाशमानं शुद्धमनवच्छिन्नं च चित्तत्त्वम् । यथा—

"यत इदं प्रसृतं यत्र च विश्रान्तं तदेव नित्यमनावृतस्वभावं स्वयं प्रथमानमनपह्नवनीयमनुत्तरम् ।"

(प०त्री०वि० पृ० 87-88)

"यतोऽयं कौलिको विधिः प्रभवति, यत्र च प्रतिष्ठापदवीं भजते, यन्मयं चेदं कौलिकं, तदेवानुत्तरमित्युक्तम् ।"

(तदेव पृ० 95)

~अलिङ्गरूपम्——लिङ्गत्रयोत्तीर्णं तत्त्वम् । उच्चारयोगेऽभिव्यक्ततां गच्छल्लिङ्गत्रयमपि यदाधारतयावभासमानं सत्तत्स्फलप्रसवभूमितामाप्नोप्ति तदनुत्तरं परात्परं तत्त्वं नैव लिङ्गतयोपास्यम्, तस्योपास्तिव्यापारातीतत्वात् । यथा—

"नानुत्तरे त्वियं चर्चा ।" (तं०आ० 5, 117)
"नानुत्तरधामगा त्वियं चर्चा ।" (तदेव 119)

~अवस्थाद्वयातीतम्——जीवदशातः शिवदशातश्च भिन्नम्, अनिर्वचनीयं सच्चिदानन्दकन्दस्वरूपम्, अहन्तत्त्वम् । यथा—

"अवस्थाद्वितयाऽतीतं परिपूर्णं किमप्यहो ।
सच्चिदानन्दस्वरूपमहन्तत्त्वं तदस्म्यहम् ।"

(आ०वि० 3, 9)

उपासनादृष्टया——अनिर्वचनीयं किमपि सर्वोत्तीर्णतत्त्वम् । यथा—

"नैष शक्तिर्महादेवी न परत्राश्रितो यतः ।
न चैष शक्तिमान्देवो न कस्याप्याश्रयो यतः ॥
नैष ध्येयो ध्यात्रभावान्न ध्याता ध्येयवर्जनात् ।
न पूज्यः पूजकाभावात् पूज्याभावान्न पूजकः ॥
न मन्त्रो न च मन्त्र्योऽसौ न च मन्त्रयिता प्रभुः ।
न दीक्षा दीक्षको वापि न दीक्षावान्महेश्वरः ॥
± ± ± ± ±
न सन्न चासत् सदसन्न च तन्नोभयोज्झितम् ।
दुर्विज्ञेया हि सावस्था किमप्येतदनुत्तरम् ॥"

(तं०आ० 2, 24-28)

~तात्पर्यतः——शिव-शक्ति-सामरस्यात्मकं स्वतन्त्रं चिन्मयं परिपूर्णमहमिति पारमैश्वर्यस्वभावं परमास्पदं परमं तत्त्वमनुत्तरम् । यथा—

"तदेतच्छिवशक्त्यात्मैव सामान्य-विशेषरूपमेकात्मकमपि परमेश्वरेणैवोपदेशोपायप्रवेशाय पृथक्कृत्य निरूप्यमाणं वस्तुतः पुनरेकमेव स्वतन्त्र चिन्मयमहमित्यैश्वर्यशक्तिसारमनुत्तरम् ।"

(प०त्री०वि० पृ० 86)

~परिभाषानुसारम्——परमशिवाख्यं सर्वोत्तीर्णं सर्वस्योदयलयस्थानभूतं पारमेश्वर्याख्यशक्त्येकघनमवर्णद्योत्यं परं तत्त्वम् । अनुत्तरपदं च परात्रीशिकायां षोडशधा व्याख्यातम् । यथा—

"तद्व्याख्यातमिदमनुत्तरं षोडशधा । यदुक्तं सारशास्त्रे—
'अनुत्तरं तद् हृदयं हृदये ग्रन्थिरूपता ।
ग्रन्थिं षोडशधा ज्ञात्वा कुर्यात्कर्म यथासुखम् ॥"इति॥

(प०त्री०वि०, पृ० 31)

षोडशप्रकारकं निर्वचनमनुत्तरपदस्य निर्दिष्टं तत्र परात्रीशिकाविवरणे पृ० 19 तः 31 यावत् ।

~व्याख्यानुसारं (षोडशधा) (1)——न विद्यते उत्तरमधिकं यतस्तत् । यस्य साक्षिभूतं तत्त्वान्तरं नास्ति तत् सततस्वप्रकाशं परं तत्त्वम् । यथा—

"न विद्यते उत्तरमधिकं यतः, यथा हि तत्त्वान्तराणि षट्त्रिंशत् अनाश्रितशिवपर्यन्तानि परभैरवबोधानुप्रवेशासादिततथाभावसिद्धीनि संविदमधिकयन्ति, नैवं परा परिपूर्णा परभैरवसंवित्,

तस्याः सदा स्वयमनर्गलानपेक्षप्रथाचमत्कारसारत्वात् ।"

(प०त्री०वि० पृ० 19)

(2) न विद्यत उत्तरं प्रश्नप्रतिवचोरूपं यत्र तदनुत्तरम् । यथा—

"यत एव हि महासंवित्सिन्धोरुल्लसदनन्तप्रतिभापर्यन्तधाम्न उल्लास्यप्रश्नप्रतिभानादिपात्रं भवति शिष्यस्तदेव वस्तुतस्तत्त्वं सततोदितमिति किमित्याचार्यीयमुत्तरमन्यत् स्यात् ॥"

(तदेव पृ० 19-20)

(3) उत्तरणमुत्तरः, उत्तरोत्तरसक्रमणं, तत्तदवरदर्शनोपदिष्टापेक्षिकमोक्षसोपानक्रमेण । स उत्तरो यत्र नास्ति तदनुत्तरं सकृद्विभातत्वेन प्रकाशमानम् । यथा—

"उत्तरणमुत्तरो भेदवादाभिमतोऽपवर्गः स हि वस्तुतो नियतिप्राणतां नातिक्रामति । तथाहि प्रथमं शरीरात्प्राणभूमावनुप्रविश्य, ततोऽपि बुद्धिभुवमधिशय्य, ततोऽपि स्पन्दनाख्यां जीवनरूपतामध्यास्य, ततोऽपि सकलमलतानवतारतम्यातिशयधाराप्राप्तौ शिवत्वव्यक्त्या अणुरपवृज्यते, आरोपव्यर्थत्वादिति ।" (तदेव पृ० 20)

(4) सौषुम्नेऽध्वन्यूर्ध्वोर्ध्वचक्रसंक्रमणमुत्तरः, स यत्र नास्ति, न चापेक्ष्यते तदनुत्तरम् । यथा—

"नाभिहृत्कण्ठतालुब्रह्मभैरवबिलाद्यधिष्ठानक्रमप्राप्त ऊर्ध्वंतरणक्रम उत्तरः, (स यत्र नास्ति तदनुत्तरम्) ।"

(तदेव पृ० 20-21)

(5, 6) उत्तरन्त्यत इत्युत्तरो बन्धः, उत्तरणं चोत्तरो मोक्षः, तौ यत्र न स्तस्तदनुत्तरम्, सर्वस्य तत्र परशिवैकरूपत्वात् । यथा—

"उत्तरन्त्यत इति उत्तरो बन्धः, उत्तरणमुत्तरो मोक्षः तदेवंविधा उत्तरा यत्र न सन्ति ।" (तदेव पृ० 21)

(7) उत्तरमवच्छेदकारि शब्दनम् ईदृशं तादृशमित्यादिरूपं, तद्यत्र नास्ति तदनुत्तरम् । यथा—

"उत्तरञ्च शब्दनं, तत्सर्वथा ईदृशं तादृशमिति व्यवच्छेदं कुर्यात् । तद् यत्र न भवति अव्यवच्छिन्नमिदमनुत्तरम् ।"

(तदेव पृ० 21)

8. निर्विकल्पानन्तरभावि व्यवच्छेदात्मकं विकल्परूपं इदमितिरूपं ज्ञानमुत्तरं, तद् यत्र नास्ति तदनुत्तरम् । यथा—

"इदमित्यपि हि व्यवच्छेदकत्वाद् विकल्पात्मैव, अत एव यावदनुत्तरे रूपे प्रविविक्षुर्मायीयः प्रमाता तावत्कल्पित एव विशेषात्मनि । तत्र त्वविकल्पितं यदविनाभावि तद्विना कल्पितरूपास्फुरणात्, तदेव वस्तुतोऽनुत्तरम् ॥" (तदेव पृ० 21-22)

(9) उत्तरस्य भावनादेरुपायवर्गस्यापि यत्र नावकाशस्तदनुत्तरम् । यथा—

"तत्र हि भावनादेरनुपपत्तिरेव वस्तुतः, इति भावना-करणोज्झितत्वमुक्तम्, न त्वनुपयुक्तित एव । तदीदृशमनुत्तरं व्यवहारवृत्तिष्वप्येवमेव ।" (तदेव पृ० 22)

(10) पञ्चाशदादिभेदभिन्नस्याणवशाक्तशाम्भवसमावेशजातस्य क्रमेण पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्तरत्वमुत्कृष्टतरत्वम् । सर्वोत्तीर्णे च परशिवात्मनि परे तत्त्वे न किमप्येवंविधमुत्तरत्वमित्यनुत्तरं तत् ।

एवमेव जाग्रदादीनां मध्येऽपि परस्परमधरोत्तरत्वम् । एकैकस्यापि जाग्रदादेःस्वगत भेदेष्वधरोत्तरत्वम् । तदेवंविधमधरोत्तरत्वं यत्र नास्ति तदनुत्तरम् । उत्तरपदमत्राधरताया अप्युपलक्षणमापेक्षिकत्वात् । भावप्राधान्येन च प्रयुक्तं मन्तव्यम् । उत्तरम् उत्तरत्वमिति । यथा—

"नरात्मनः शाक्तमुत्तरं, ततोऽपि शाम्भवं, तथा तेष्वपि भूततत्त्वात्म-मन्त्रेश्वर-शक्त्यादिभेदेन स्वात्मन्येवोत्तरत्वं, भूतादिष्वपि पृथिव्यादिरूपतया । जाग्रत उत्तरं स्वप्नः, ततः सुप्तं, ततस्तुर्यं, ततोऽपि तदतीतम् । जाग्रदादिष्वपि स्वात्मन्येव चतुरादिभेदतयोत्तरोत्तरत्वम् ।··तदीदृशमौत्तराधर्यद्वैतसम्मोहाधायि उत्तरत्वम् ··।"

(तदेव पृ० 23-24)

(11) ब्राह्मणादिजातिकृतमधरोत्तरत्वं यत्र नास्ति, तदनुत्तरम् । तस्य सर्वथा समानैकरूपत्वात् । अत्रापि भावप्रधानत्वमुत्तरपदस्य । यथा—

"तथा विप्रराजन्यवैश्यशूद्रान्त्यजातिविभागमयम् ऊनाधिकत्वं यत्र न स्यात् । भावप्राधान्यमुत्तरशब्दस्य ।" (तदेव पृ० 24)

(12) उत्तराः पश्यन्त्याद्या, अघोराद्याश्च यत्र नावभासन्ते, तदनुत्तरम् । यथा—

"उत्तराः पश्यन्त्याधाः शक्तयः, अघोराद्याः, पराधाः, ता यत्र न स्युः ।" (तदेव पृ० 24)

(13) दीक्षाक्रमात्मकेन नोदनेन तरणं, नुदातरणं=नुत्तरम्, तद् यत्र नास्ति तदनुत्तरम् । तत्र का दीक्षा कश्च दीक्षकः । यथा—

"नोदनं नुत्, तया तरणं दीक्षाक्रमेण तरः, शिष्यचैतन्ये गुरुश्चैतन्यं प्रेरयते ···· मोक्षदां दीक्षां विधत्ते । तदत्र चैतन्यस्य स्वप्रकाशस्य व्यापिनो देशकालाकारविशेषाविशेषितस्य कथङ्कारम् इमा विडम्बनाः । तदेवंविधो 'नुदा' प्रेरणेन 'तरः' तरणं यत्र न भवति तदनुत्तरम् । (तदेव पृ० 24-25)

(14) अनितीत्यन् प्राणी, प्रमाता, अननं चाप्यन्-प्राणनं, जीवनव्यापारः । तच्च ज्ञानक्रियारूपम् । तस्यानः एवोत्तरत्वं प्रधानत्वं यस्मिंस्तदनुत्तरम् । परतत्त्वं हि शुद्धपरिपूर्णासीमप्रमातृरूपम् । तस्य च प्रकाश-विमर्शात्मक ज्ञानक्रियासमरसंरूपत्वम् । अतः ज्ञानक्रियात्मकस्याननस्यैव तस्मिन्नुत्तरत्वं प्राधान्यम् । अतस्तदनुत्तरम् । यथा—

"अणिति श्वसिति इति क्विपि अन्, अणुरात्मा देहपुर्यष्टकादिः, तथा अननं जीवनमन् देहाद्यन्तर्गतैव भिन्नभिन्नशक्त्याद्यहन्ताशून्यप्राया जीवनाख्या वृत्तिः, यः शून्यप्रमाता इत्यभिहितः । तस्यैवोत्तरत्वं सर्वतः परमार्थतयाधिक्यं यत्र, भैरवैकमयत्वात् ।" (तदेव 25-26)

(15) 'अ' इति या कला, तस्या एव नुत्, प्रसररूपा विसर्गान्तता, तस्या एव तरः प्लवनं सर्वोपरिवर्तनं यत्र तदनुत्तरम् । यथा—

"अ इति च येयममायीयाश्रौतनैसर्गिकमहाप्रकाशविश्रान्तनिस्तरङ्गचिदुदधिस्वात्मचमत्काररूपा शाक्तोल्लासमयविश्वामर्शनरूपपरिपूर्णाहंभावप्रथमपर्यवसानोभयभूमिगा कला तस्या एव वक्ष्यमाणनयेन येयं नुत् विसर्गान्तता, तस्या एव तरः प्लवनं सर्वोपरिवृत्तित्वं यत्र।" (तदेव पृ॰ 27)

(16) नुत्-क्रमात्मिका क्रियामयी प्रेरणा, सा यस्य नास्ति सोऽनुत्। स च आकाशादिः। ततोऽपि सातिशयं, सर्वथा क्रमरूपक्रियाविहीनं यत्तदेवानुत्तरम्। तत्र या क्रिया सा त्वक्रमैव। यथा—

"अविद्यमाना देशकालगमनागमनादिद्वैतसापेक्षा नुत्-प्रेरणा क्रमात्मकक्रियामयी यत्र तदनुत्-आकाशादि लोकप्रसिद्ध्या। ततोऽपि सातिशयमनुत्तरम्। संवित्तत्त्वे तु सर्वतोऽनवच्छिन्नपूर्णस्वातन्त्र्यैश्वर्यसारे अक्रमैव स्वात्मविमर्शसंरम्भमयी मत्स्योदरीमतादिप्रसिद्धा विमर्शाभिधा क्रिया, इति तदेवानुत्तरम्।

(तदेव पृ॰ 28)

~व्याख्यान्तरानुसारम्——

"अनुत्तरं रूपम्, उत्तरम् उत्कृष्टमुपरिवर्ति, तच्च जडापेक्षया ग्राहकरूपम्। तस्य तु चिदात्मनः स्वप्रकाशस्य न ग्राहकान्तरमस्तीत्यनुत्तरत्वम्। तेन अनुत्तरं संविद्रूपं सदा सर्वत्रावभासितं पूर्वापरदेशकालविहीनमनपह्नवनीयम्।" (प॰त्री॰ल॰वृ॰ पृ॰ 1-2)

~सदसदुत्तीर्णम्——घटादिवदापेक्षिकसत्तया नावभासतेऽपि तु महासत्तया सर्वतः प्रकाशते। यथा—

"अयमित्यवभासो हि यो भावोऽवच्छिदात्मकः।
स एव घटवल्लोके संस्तथा नैष भैरवः॥"

(तं॰आ॰ 2, 29)

अनुत्तरतत्त्व विमर्शिनी——
द्र॰ 'परात्रीशिकालघुवृत्तिः' इति।

अनुत्तरप्रकाशपञ्चाशिका——आदिनाथविरचितः कारिकाबद्धोऽतीवोत्कृष्टः शैवदर्शनग्रन्थविशेषः महार्थमञ्जरीपरिमले "परापञ्चाशिका" इति नाम्ना बहुधा समुद्धृतः। तत्र पुष्पिका यथा—

"इति श्रीमदाद्यनाथविरचितानुत्तरप्रकाश पञ्चाशिका···।.'

(अ॰प्र॰पं॰ पृ॰ 8)

अत्र पुष्पिकायाम् "अद्यनाथ" इति पदं सम्पादकप्रमादाद्वा, प्रतिलिपिलेखकप्रमादाद्वैवं लिखितं मुद्रितञ्च प्रतिभाति। शुद्धञ्च पदम् 'आदिनाथ' इत्येव। अथवा आदिनाथमेव केचन जना "आद्यनाथ" इति वदन्ति स्मेत्यनुमातुं शक्यते। अस्यादिनाथस्य कः कालः का चास्य शिष्यपरम्परेति न सम्यङ् निश्चेतुं शक्यते। गोरक्षपद्धतीयाः सिद्धा अपि स्वपरम्पराप्रवर्तकमादिनाथं कथयन्ति। असावादिनाथोऽस्मादादिनाथाद्विभिन्नो वाऽभिन्नो वेत्यत्र न किमपि निश्चेतुं शक्यते। गोरक्ष मार्गानुयायिषु केचनोमापतिनाथं शिवमेवादिनाथं मन्यन्ते। इत्थमनिश्चय एवात्र विषये वर्तते अद्य यावत्।

अनुत्तरप्रक्रिया——परात्रीशिकाविवरणस्य नामान्तरमेतत्। यथा—

"अनुत्तरप्रक्रियायां वैतत्येन प्रदर्शितम्।"

(तं॰आ॰ 9, 313)

"अनुत्तरप्रक्रियायामिति श्रीपरात्रीशिकाविवरणादावित्यर्थः।"

(तं॰आ॰वि॰ खं॰ 6, पृ॰ 249)

अनुत्तरभट्टारकः——कश्चनागमिको ग्रन्थः सपंक्तिसमुद्धरणं कृतनामनिर्देशो विज्ञानभैरवोद्द्योते। यथा—

"उक्तं च भैरवस्रोतस्यनुत्तरभट्टारके।"

(वि॰भै॰उ॰ पृ॰ 124)

अनुत्तरसूत्रम्——परात्रीशिकाशास्त्रस्यापरं नामधेयम् अनुत्तरसूत्रमिति। यथा—

"त्रिशका च चानुत्तरसूत्रम् इति गुरवः।"

(प॰त्री॰वि॰ पृ॰ 276)

अनुपायः——आनन्दोपायः। आनन्दयोगः। अनुत्तरं ज्ञानम्। क्रियाज्ञानेच्छायोगाभ्यासान् विनैव स्वत एव वा, सिद्धजनदर्शनस्पर्शन चरुदानादि-मात्रेण वा, गुरुपदेशमात्रतो वा, एवमेवोदीयमानः स्वस्वरूपसाक्षात्कारः। यथा—

"इच्छाशक्त्युन्मेषाभ्यासदशायां शाम्भवः, तदुन्मेषाभ्यासं विनैवैवमेव स्वरूपप्रथनमनुपायः।"

(शि॰सू॰वि॰ 1, 5)

"ततोऽपि परमं ज्ञानमुपायादिविवर्जितम्।
आनन्दशक्तिविश्रान्तमनुत्तरमिहोच्यते॥

(तं॰आ॰ 1, 242)

"एषां न मन्त्रो न ध्यानं न पूजा नापि कल्पना।
न समय्यादिकाचार्यपर्यन्तः कोऽपि विभ्रमः॥"

(तदेव 2, 37)

"नास्य मण्डलकुण्डादि किञ्चिदप्युपयुज्यते।
न च न्यासादिकं पूर्वं स्नानादि च यथेच्छया॥"

(उद्ध॰तं॰आ॰वि॰ खं॰ 1/2, पृ॰ 35)

द्र॰ (शिवदृष्टिः 7, 5-6) चापि।

शाम्भवोपायाभ्यास एव परिपूर्णपरिपक्वतायामनुपायतामुपयातीत्यस्मद्गुरवः श्रीमदमृतवाग्भवाचार्याः।

~तत्प्रभावः——क्रियाज्ञानेच्छायोगान् विनैव स्वत एव वा गुरूपदेशमात्रतो वा सिद्धदर्शनस्पर्शनचरुदानादिना वा स्वस्य स्वरूपस्य साक्षात्कारो भवति शिष्यस्य। यथा—

उपायजालं न शिवं प्रकाशयेद्
घटेन किं भाति सहस्रदीधितिः।

विवेचन्नित्थमुदारदर्शनः
स्वयंप्रकाशं शिवमाविशेत्क्षणात् ॥

(तं०सा०पृ० 9)

~तदधिकारी——(1) तीव्रेण शक्तिपातेन पवित्रीकृतसंवित् साधकोऽनुपाय देशनाधिकारी सामान्यतः। यथा –

"नाऽनिर्मलचितः पुंसोऽनुग्रहस्त्वनुपायकः।"

(तं०आ० 2, 47)

(2) योगसिद्धसद्गुरुकृपाकटाक्षितोऽनिर्मलसंविदपि कदाचिदनुपाययोगदीक्षापात्रतां याति, परं तस्य संविन्नैर्मल्यसम्पादनाय पूर्वमाणवादिदेशना विधीयते ततोऽनुपायदेशना। यथा—

"सोऽपि स्वतन्त्र्यधाम्ना चेदप्यनिर्मलसंविदाम्।
अनुग्रहं चिकीर्षुस्तद्भाविनं विधिमाश्रयेत् ॥
अनुग्राह्यानुसारेण विचित्रः स च कथ्यते।
परापराद्युपायौघसङ्कीर्णत्वविभेदतः।
तदर्थमेव चास्यापि परमेश्वररूपिणः।
तदभ्युपायशास्त्रादि-श्रवणाध्ययनादरः ॥

(तदेव 2, 44-46)

~तदनुपायता——सकृदुपदेशमात्रतः स्वरूपसाक्षात्कारे सम्पन्ने सति पुनरुपदेशाभ्यासादेरनपेक्षता। यथा—

"उपायैर्न शिवो भाति भान्ति ते तत्प्रसादतः।
स एवाहं स्वप्रकाशो भासे विश्वस्वरूपकः ॥
इत्याकर्ण्य गुरोर्वाक्यं सकृत्केचन निश्चिताः।
विना भूयोऽनुसन्धानं भान्ति संविन्मयाः स्थिताः ॥"

(उद्ध०तं०आ०वि० खं० 1/2, पृ० 3)

"अनुपायं हि यद्रूपं कोऽर्थो देशनयात्र वै।
सकृत् स्याद् देशना पश्चादनुपायत्वमुच्यते ॥

(तं०आ० 2, 2)

~तद्देशना——यथा—

"नीलं पीतं सुखमिति प्रकाशः केवलः शिवः।
अमुष्मिन्परमाद्वैते प्रकाशात्मनि कोऽपरः ॥
उपायोपेयभावः स्यात् प्रकाशः केवलं हि सः।

(तं०आ० 2, 16-17)

"यथा स्थितस्तथैवास्व मा गा बाह्यमथान्तरम्।
केवलं चिद्विकासेन विकारनिकराञ्जहि ॥

(उद्ध०तं०आ०वि० खं० 1/2, पृ० 27)

~तद्विधिः——(1) पारमेश्वरेणानुग्रहेण पूतः शिष्यो यदैवानुपायदेशनासमर्थं गुरुम्— "अयमनुपायसाक्षात्कारवान् सशरीरः शिव एव" इत्यनया दृष्ट्या पश्यति तदासौ स्वयमपि गुरुदर्शनमात्रेण विनाप्यभ्यासप्रपञ्चं सद्य एव स्वात्मसाक्षात्कारवान् सञ्जायते, यतोऽसौ प्रागेव निर्मलसंवित्। यथा—

"तं ये पश्यन्ति ताद्रूप्यक्रमेणामलसंविदः।
तेऽपि तद्रूपिणस्तावत्येवास्यानुग्रहात्मता ॥"

(तं०आ० 2, 40)

(2) कृपार्द्रचित्तो गुरुरनिर्मलसंविदमपि शिष्यमनुपायविधिमुपदेष्टुमलम्। (तं०आ० 2, 44-46)

द्र० 'तदाधिकारी' इति।

(3) दर्शन-स्पर्शन-चरुप्रदानादिना गुरुः शिष्ये स्वीयामनुग्रहशक्तिं सञ्चारयति ययासौ विनापि योगाद्यभ्यासमेवमेव प्रातिभं स्वात्मसाक्षात्कारं लभते। यथा—

"सिद्धानां योगिनीनाञ्च दर्शनं चरुभोजनम्।
कथनं संक्रमः शास्त्रे साधनं गुरुसेवनम् ॥
इत्याद्यो निरुपायस्य संक्षेपोऽयं वरानने।"

(उद्ध० तं०आ०वि० खं० 1/2, पृ० 2)

~योगत्वम् (तस्य)——तद्धि स्वात्मपरशिवयोरैक्यस्य स्फुटीभावमात्रम्। तथाविधस्यैकत्वस्यैव मालिन्यां योगलक्षणत्वेनोक्तत्वात्। यथा—

"योगमेकत्वमिच्छन्ति वस्तुनोऽन्येन वस्तुना।"

(मा०वि०तं० 4, 4)

~स्वल्पोपायः——जयरथोऽनुपायपदेऽल्पार्थीयो नञ् इति मन्यते। तेन दर्शन-स्पर्शन-चरुदानादिरूपेण स्वल्पेनोपायेनात्र स्वात्मसाक्षात्कारो भवति। यथा—

"आणवादावसकृद् भाव्यमानो हि देशनादिः उपेयप्राप्तिं विदधाति, इति तत्र तथात्वमुक्तम्, इह तु न तथा, इत्यनुपायत्वम्। पर्युदासस्यानुदरा कन्येत्यल्पार्थत्वेऽपि भावादल्पोपायत्वमित्यर्थः।"

(तं०आ० 2, पृ० 3)

परमाचार्यामृतवाग्मधानामुपदेशानुसारं प्रारम्भ एव शाम्भव्यादिमुद्राभ्यासो विधीयते शाम्भवोपाये; अभ्यासदार्ढ्ये च सति न मुद्राद्यपेक्षा काचित्। सिद्धे च शाम्भवोपाये परिपक्वतां च याते तस्मिन् स्वत एव साक्षात्कारो भवति पार्यन्तिकस्य स्वरूपस्येति शाम्भवोपाय एव परिपक्वतायामिच्छाशक्तिप्रयोगमुपायत्वेन नापेक्षते, अतोऽनुपायतामुपयाति। तेन शाम्भवोपायस्य परिपक्वतैवानुपायता यत्र व्यवहारे प्रचलत्यपि निर्व्युत्थानः समावेशो विजृम्भते।

प्रकृष्टं यत् प्रातिभं स्वात्मदर्शनं तदप्यनुपायदर्शनं वेदितव्यम्।

अनुपायज्ञानम् ~ प्रातिभम्——योगाद्यभ्यासं विनैव स्वयमेव शिवानुग्रहप्रभावतः स्वस्मिन् समुदितं स्वात्मपरमेश्वरतायाः सुदृढं प्रातिभं ज्ञानम्। यथा—

"उपाययोगक्रमतो निरुपायमथाक्रमम्।
यद्रूपं तत्परं तत्त्वं तत्र तत्र सुनिश्चितम् ॥"

(तं०आ० 13, 157)

"निरुपायमत एवाक्रमं यत् प्रतिभात्मकम्।"

(तं०आ०वि० खं० 8, पृ० 100)

द्र० 'प्रातिभं'~ज्ञानम् इति।

अनुपायस्थः——अनुपायसाक्षात्कारनिष्ठः सुप्रबुद्धो योगी।

~तद्दृष्टिः——अनुपायनिष्ठो योगी सर्वमपि वस्तुजातं

संविद्रूपतायां विलापितमिव विमृशति—'अहम्' इति। बाह्यव्यवहारेऽपि तस्य स्वात्मशिवत्वदृष्टि: सर्वत्र विकसन्त्येव दीव्यति। यथा—

"यथा रुमायां पतिता: काष्ठपर्णोपलादय:।
लवणत्वाय कल्पन्ते तथा भावाश्चिदात्मनि ॥"

(उद्ध०तं०आ०वि० खं० 1/2, पृ० 30)

"तेषामिदं समाभाति सर्वतो भावमण्डलम्।
पुर:स्थमेव संवित्तिभैरवाग्निविलापितम् ।"

(तं०आ० 2, 35)

एवैव शिवदृष्टि: श्रीसोमानन्दनाथस्य, प्रत्यक्षाद्वैतदृष्टिश्च श्रीनरसिंहगुप्तस्य।

~शेषवर्तनम् (तस्य)——असावुपदेश-दीक्षा - ग्रन्थ-निर्माणादिभि: परोपकारमात्रं करोति तेन नान्यत् किमपि समयाचार-पूजन-जप-होम-धारणादि कर्तव्यं भवति। यथा—

"समस्तयन्त्रणा तन्त्र-त्रोटना-टङ्क-धार्मिण:
नानुग्रहात्परं किञ्चिच्छेषवृत्तौ प्रयोजनम् ॥"

(तं०आ० 2, 38)

"अत एव चास्य स्वात्मनि कृतकृत्यत्वात् परानुग्रहार्थमेव वर्तनम्। (तं०आ०वि० खं० 1/2, पृ० 31)

अनुप्रत्यभिज्ञा——ईश्वरप्रत्यभिज्ञानुसारी कश्चन ग्रन्थ इदानीमलभ्य:। यथा—

"यथा—अनुप्रत्यभिज्ञाकृताप्यनेनैवाभिप्रायेण—

"नाथ त्वया बिना बिम्बं स्वच्छे स्वात्मनि दर्शितम्।
प्रसेनादर्पणेनेव प्रभावाद् भावमण्डलम् ॥"

(उद्ध०तं०आ०वि० खं० 2, पृ० 73)

अनुप्रविष्टत्वम्—अनुप्राणकतयान्त: प्रविष्टत्वम्। यथा—

"अनुप्राणकतया प्रविष्टमनुप्रविष्टमिति····· स्वस्य देहादे: प्रमातृत्वेन यत्संवेदनं तदनुप्राणकत्वेन प्रविष्टोऽवश्यं निर्भासनयोग्य इति।" (ई०प्र०वि०वि० खं० 1, पृ० 225)

अनुमानम्——प्रथमं हि लौकिकं प्रमाणं प्रत्यक्षम्। तदनुसारं कार्योपयोगी प्रमाणमनुमानम्। मानम् अनु-पश्चात् कार्यकारि मानम् 'अनुमानम्' मानसदृशम् इति। यथा—

"अत एव हि मुख्यस्य मानस्य सदृशत्वत:।
अनुमानमिति प्रोक्तं व्यवहार प्रवर्तनम् ॥"

(मा०वि०वा० 1, 771-72)

~तत्प्रामाण्यम्——यथा—

"अनुमानजा तु प्रतीतिराभासान्तरात् कार्यरूपात् स्वभावभूताद् वा आभासान्तरे प्रतिपत्ति: वस्त्वन्तरस्य च तेन साकं कार्यकारणभावनियम:, समानाधिकरण्यनियमश्चेश्वरनियतिशक्त्युपजीवन एवावधार्यो भवति। तेन यावति नियतिर्ज्ञाता तावति देशे काले वानुमानं प्रमाणम् ।"

(ई०प्र०वि०खं० 2, पृ० 79-80)

तेन सुनियतमेव तत्।

अन्त:स्था:——पुरुषतत्त्वस्यान्तरेव विद्यमानानां कञ्चुकतत्त्वानामभिव्यञ्जका वर्णा अप्यन्त:स्था इत्युच्यन्ते। यथा—

"शिक्षोक्तसंज्ञानुसारेण अन्त:- पुंभूमौ नियत्यादिकञ्चुकत्वेन अवस्थानाद् अन्त:स्थाख्यान्प्रमातृभूमिधारणेन विश्वधारणात् 'धारणा' शब्देनाम्नायेषूक्तान् . ...।"

(शि० सू० वि० पृ० 31)

एते वर्णा वस्तुत 'अन्त:स्था' एवोपदेशक्रमे परम्परायां विस्मृतमध्यविसर्गतया 'अन्तस्था' इत्युच्यन्ते। अत्र इ ई उ ऊ+अ-आ इति स्वरांशानां परस्परौन्मुख्ये सति तयोरन्तरेव व्यञ्जनांशस्य स्थितिरत एवान्त:स्था इमे। अन्तरेव व्यञ्जनांशं धारयन्त इति। स्वरांशानामन्तरेवात्र व्यञ्जनानां स्थित्या व्यञ्जनरूपतायामेते वर्णा 'अन्त:स्था' इति। तत एव भाषाविज्ञानविद् एनानर्धस्वरान् मन्यन्ते (Semi Vowels) इति।

~अन्त:स्थता (तेषाम्)——इ उ इतीच्छोन्मेषयोर् अ-आ इत्यनुत्तरानन्दयोरन्त: प्रवेशात् क्रमशो यकारस्तथा वकारश्च, तथा ऋकार-लृकारयोरपि वस्तुत इकारात्मकत्वे (इच्छारूपत्वे) अ आ इत्यनुत्तरानन्दयोरन्त: प्रवेशात् क्रमशो रकारस्तथा लकारश्चेति चत्वारोऽन्त:स्था:। तेषां यादीनां यत एवं स्वरान्तरेव सृष्टिस्तत इमेऽन्त:स्था इत्युच्यन्ते। इच्छोन्मेषयोश्च यादीनामन्तरवस्थानादप्येषामन्त:स्था इति संज्ञागमिकी। यादिवान्तं च कञ्चुकमायाभिव्यञ्जकम्। तच्च तत्त्वजातं पुरुषतत्त्वस्यान्तरङ्गमेव तत्त्वान्तररूपम्। अतश्चाप्येतेषां कञ्चुकव्यञ्जकानां वर्णानामन्त:स्था इति समाख्या। यथा—

"इदं चतुष्कमन्त:स्थमत एव निगद्यते ।
इच्छाद्यन्तर्गतत्वेन स्वसमाप्तौ च संस्थिते: ॥"

(तं० आ० 3, 158)

"····· इच्छोन्मेषयोरन्तरभेदेनावस्थानात्, तथा स्वस्य प्रमात्रैकरूपस्यात्मन: सम्यगाप्ति:—ऐकात्म्येनावभासस्तत्र संस्थिते:—प्रमात्रैकात्म्येन वर्तमानत्वादिदं-यादि-वान्तं चतुष्कमन्त:स्थं निगद्यते।"

(तं० आ० वि० खं० 2, पृ० 159)

"इच्छाद्यन्त: प्रवेशेन तेऽन्त:स्था इति कीर्तिता:।"

(उद्धृ० तदेव)

तत्र हि व्यञ्जनांश: स्वरांशस्यान्तर्गत इव श्रूयते।

~सृष्टि: (तेषाम्)——शुद्धेच्छा द्विप्रकारकैषणीयसम्भिन्ना सती यदा विजातीयाभिश्शक्तिभि: संघट्टमासादयति तदा शुद्धाया इच्छाया यकारस्य, चलस्वभाववह्निरूपैषणीयसम्भिन्नाया रकारस्य, स्थिरस्वभावधरारूपैषणीयसम्भिन्नायाश्च लकारस्य सृष्टि:। एवमुन्मेषो विजातीयशक्तिसंघट्टवशाद्वकाररूपतामासादयति। यथा—

"सैव शीघ्रतरोपात्तज्ञेयकालुष्यरूषिता।
विजातीयोन्मुखत्वेन रत्वं लत्वं च गच्छति ॥

तद्वदुन्मेषशक्तिर्द्विरूपा वैजात्यशक्तिगा ।
वकारत्वं प्रपद्येत सृष्टिसारप्रवर्षकम् ॥"

(तं॰ आ॰ 3, 155-56)

"इच्छाया एव त्रिविधाया य-र-लाः, उन्मेषाद् वकारः।"

(तं॰ सा॰ पृ॰ 16)

अनुयागः— —मूर्तियागः, चक्रयागः, इत्यस्यापरे नाम्नी। तान्त्रिको विधिविशेषः पर्वदिवसेषु क्रियमाणः । यथा—

"अनुयागो, मूर्तियागः, चक्रयाग इति पर्यायाः ।"

(तं॰ सा॰ पृ॰ 184)

द्र॰ (तं॰ आ॰ 26, 55-61)

अनुव्यवसायः— —विकल्पात्मकं ज्ञानम्, निर्विकल्पकपृष्ठपातित्वात्, तदनुसारित्वाच्च । यथा—

"अविकल्पकबोधाबहिर्भूतविमर्शव्यापारस्य पश्चाद्भाविनं व्यवसायं निश्चयात्मकं विकल्पकमनुव्यवसायशब्दवाच्यम्······।"

(ई॰ प्र॰ वि॰ खं 2, पृ॰ 39)

नैयायिकमते ज्ञानविषयकं ज्ञानं 'घटज्ञानवानहमिति' तावदनुव्यवसायः। इह तु ज्ञानं सदैव स्वप्रकाशम्। ततो न ज्ञानविषयकं ज्ञानं भवितुमर्हति । ततो निर्विकल्पानन्तरमुदयज्ज्ञानमनुव्यवसायः ॥

अनुसन्धानम्——भिन्नानां ज्ञानानामेकीकारात्मकं विमर्शनमेकचिद्रूपत्वम्। यथा—

"तत्त्वानुसंधानमेकविषयतालक्षणं प्रकारान्तरेणोक्तनीत्या न सम्भवतीति परिशेषत एकचिद्रूपतामात्रायत्तं सम्पद्यते।"

(ई॰ प्र॰ वि॰ वि॰ खं 1, पृ॰ 276)

अनुस्वारः——(1) क्रियाशक्त्याविष्ठे पारमेश्वरेऽनुत्तरे तत्त्वे यदा सर्वं कार्यभूतं तत्त्वजातमनुप्रविशति, तदा तत्र विन्दुरूपतया चकासदनुत्तरस्यानुस्वाररूपतां प्रकाशयति । यथा—

"ततः पुनः क्रियाशक्त्यन्ते सर्वं कार्यभूतं यावदनुत्तरे प्रवेक्ष्यति, तावदेव पूर्वं संवेदनसारतया प्रकाशमात्रत्वेन विन्दुतया आस्ते 'अं' इति।"

(तं॰ सा॰ पृ॰ 24)

~पृथग्वर्णः——अकारे मकारस्य सम्भेदादन्यस्य वर्णस्य सृष्टिः, स एवानुस्वारः। एवमेव तत्र हकारस्यानुप्रवेशे सति विसर्गवर्णस्य सृष्टिः। ततो मकारहकारांशप्रवेशादकार एव विन्दुविसर्गौ। यथा—

"इकार एव रेफांशच्छायायाऽन्यो यथा स्वरः।
तथैव महलेशादः सोऽन्यो द्वेधा स्वरोऽपि सन् ॥"

(तं॰ आ॰3, 135-36)

'म+ह+लेशाद्+अः'—इत्यत्र सन्धिच्छेदः।

~लेखनप्रकारे——शारदालिप्यां बीजपिण्डेषु बिन्दुरर्धचन्द्रश्चोपरि लिख्येते, तदनन्तरवर्तिनो वर्णाश्च क्रमादधोऽधः। तत एव पिण्डमन्त्रसङ्केतविषये बिन्दोः प्रथममुल्लेखस्तदनन्तरमन्येषां वर्णानाम्। यथा—

"बिन्दुप्राणामृतजलं मरुत्षष्ठस्वरान्वितम् ॥"

(तं॰ आ॰ 30, 91-92)

इति सङ्केतः 'ह्स्व्यूं' इति मन्त्रस्य। अनुमीयते यदस्य लिपिरूपं

हं
स इत्याकारं शारदालिपौ च  इति।
व्यू

क्वचित् क्वचिद् वर्तमानमुद्रणविध्यनुकूलोऽपि वामतो दक्षिणं प्रति मन्त्रवर्णानां सङ्केतः। यथा—

"जीवः प्राणपुटान्तस्थः कालानलसमद्युतिः ।
अतिदीप्तस्तु वामांघ्रिर्भूषितो मूर्ध्नि विन्दुना ॥"

(तं॰ आ॰ 30, 47)

इति 'ह्स्ह्फ्रें'- इति मन्त्रस्य । क्वचित्क्वचिदन्यथान्यथापि सङ्केतो रहस्यसंरक्षणार्थं, स च गुरुमुखादेव ज्ञेयो भवति। स्फुटेऽपि सङ्केते प्रयोगरहस्यविधिर्गुरुमुखादेव लभ्यः ।

(2) अं इति मातृकावर्णः। प्रमाणरूपं सूर्यं प्रमेयरूपं च सोमं स्वात्मसात्कृत्य प्रकाशमानः प्रमातृरूपो वह्निरनुस्वारः। सर्वमपि सिसृक्षाविषयभूतं विश्वं स्रष्टव्यत्वेनान्तःकृत्य प्रकाशमानः शिवः एव 'अं' इत्यनेन बिन्दुरूपेण मातृकावर्णेनाभिव्यज्यते शाम्भवोपायमये मातृकाभ्यासे। यथा—

"सूर्यं प्रमाणमित्याहुः सोमं मेयं प्रचक्षते ।
अन्योन्यमवियुक्तौ तौ स्वतन्त्रावप्युभौ स्थितौ ॥
भोक्तृभोग्योभयात्मैतदन्योन्योन्मुखतां गतम् ।
ततो ज्वलनचिद्रूपं चित्रभानुः प्रकीर्तितः ॥
योऽयं वह्नेः परं तत्त्वं प्रमातुरिदमेव तत् ।
संविदेव तु विज्ञेय-तादात्म्यादनपेक्षिणी ॥
स्वतन्त्रत्वात् प्रमातोक्ता विचित्रो ज्ञेयभेदतः"

(तं॰ आ॰ 3-121-24)

"इत्थं प्रकाशतत्त्वस्य सोमसूर्याग्निता स्थिता।
अपि मुख्यं तत्प्रकाशमात्रत्वं न व्यपोह्यते ॥"

(तं॰ आ॰ 3-130-131)

"अत्र प्रकाशमात्रं यत्स्थिते धामत्रये सति।
उक्तं विन्दुतया शास्त्रे शिवविन्दुरसौ मतः॥"

(तदेव-3-133-134)

मकारादन्य एव हि वर्णोऽयमनुस्वारः। यथा—
"मकारादन्य एवायं तच्छायामात्रधृद्यथा ॥"

(तदेव 3-134)

अनैश्वर्यम् अष्टधा द्र॰ 'अनैश्वर्यभेदाः' इति।

अनैश्वर्यं भेदाः——अणिमाद्यभावाः। यथा—

~संज्ञान्तरतः——ते चाष्टावनम्भाप्रभृतयः। यथा—

"अनम्भा असलिला च अनोधावृष्टिरेव च ।
(अनम्भाऽसलिला चैवानोद्यानावृष्टिरेव च) ॥
असुतारमसुपारमसुनेत्रमतः परम् ।
अकुमारी च विज्ञेयानुत्तमाम्भसिका तथा ॥

अनणिमाऽलघिमा चैवामहिमा महेश्वरि ।
अप्राप्तिरप्राकाम्यं चानीशित्वं च तथैव च ॥
अवशित्वं तथा चैवायत्रकामावसायिता ।
अनैश्वर्यं च देवेशि अष्टधा परिकीर्तितम् ॥"

(स्व० तं० प० 11, 156-58)

अन्तःकरणम्~एकम्——तच्च मुख्यतया मन इति । यथा—

"संविदमपेक्ष्य या विकल्पनशक्तिः सा भेददृष्ट्या तत्त्वरूपतामापन्ना मनोऽन्तःकरणम् । तच्च प्रतियोग्यपोहनसहितार्थविमर्शनव्यापारम् ॥"

(ई० प्र० वि० वि० खं० 3, पृ० 379)

~प्रकारतः——सङ्कल्पकं मनोऽध्यवसायात्मिका बुद्धिरभिमननरूपश्चाहङ्कार इति त्रिप्रकारकम् । यथा—

"मनोऽहङ्कारबुद्धयाख्यं त्रिधान्तःकरणं स्मृतम् ।"

(स्व० तं० 11, 133)

द्र० (प० सा० वि० पृ० 51)

~मूलतः——बुद्धिर्मनोऽहङ्कार इत्यन्तःकरणत्रयम् । एतच्च पशोरिच्छाज्ञानक्रियाशक्तिस्थानीयम् । यथा—

"शाक्तोऽथ भण्यते चेतो-धीमनोहंकृति स्फुटम् ।
सविकल्पतया मायामयमिच्छादि वस्तुतः ॥"

(तं० आ० 1, 214)

"एतदिच्छाज्ञानक्रियात्मकमित्युक्तम् 'इच्छादि वस्तुतः' इति । यथा खलु पतिरिच्छाद्याभिः शक्तिभिर्विश्वं निर्मिमीते, तथैव विकल्पाद्यपि बुद्ध्याद्यन्तः-करणत्रयेण पशुरित्याशयः, विकल्पादौ हि प्रायः क्षेत्रज्ञस्यैव स्वातन्त्र्यम् ।"

(तं० आ० वि० खं० 1, पृ० 237)

~विश्लेषणतस्त्रिधैव——अन्तःकरणं त्रिविधमन्तःकार्यत्रयकरणत्वात् पृथक् पृथक् । यथा—

"अवसायोऽभिमानश्च कल्पना चेति न क्रिया ।
एकरूपा ततस्त्रित्वं युक्तमन्तःकृतौ स्फुटम् ॥

(तं० आ० 9, 238)

~संख्यातः——केचन दार्शनिका मन एवैकमन्तःकरणं स्वीकुर्वन्ति, परं शैवा मनोबुद्धिरहङ्कारश्चेति त्रीण्यन्तः करणानि प्रतिपादयन्ति । केचन चित्ताख्यं चतुर्थमपि योजयन्ति । यथा—

"अन्ये इति विन्ध्यवासिप्रभृतयः । ते ह्यहङ्कारबुद्ध्योः कारणस्कन्धतामेवाहुः, न करणस्कन्धताम् । स्वदर्शनस्य युक्तिमाह—इह तु द्वित्वेनोक्तमन्तःकरणं भिन्नवृत्तिवशात्, योजनायतस्त्रिधैव, अन्यथा ह्येकमेव तत्त्वमित्युक्तम् । अत एवोक्तमागमे—

मनो गर्वस्तथा बुद्धिर्द्वारमेतत् सदात्मनः ।
भूतये भूतनाथेन निर्मितं करणं त्रिधा ॥

(म० तं० 18, 83, उद्ध० ई० प्र० वि० वि० खं० 3, पृ० 302)

अन्तःसृष्टिः——यथा कुम्भकारः प्रथमं स्वबुद्धौ विशेषाकारं घटं सृजति, पश्चात्तदाकारमेव बहिर्निर्मिमीते, तथैव परमेश्वरः पूर्वमहमात्मन्येव तत्त्वषट्त्रिंशकमाभासयति स्रष्टव्यत्वेन स्वया ज्ञानशक्त्या, ततः क्रियाशक्त्या तदेवेदंरूपतया पूर्वमन्तः पश्चाच्च बहिरपि सृजति । यथा—

"शक्तित्रिशूलपरिगमयोगेन समस्तमपि परमेशे ।
शिवनामनि परमार्थे विसृज्यते देवदेवेन ॥"

(प० सा० 45)

अन्तःस्थितिः~जगतः——भावा वस्तुतः सदैव चिद्रूपतया परमेश्वरे तिष्ठन्ति । असौ तेषां पारमार्थिकी सत्तैव तेषामन्तः स्थितिरित्युच्यते । असौ स्थितिस्तेषां सदातनी । यथा—

"चिन्मयत्वेऽवभासानामन्तरेव स्थितिः सदा"

(ई० प्र० 1, 8, 7)

अन्तकः——मकारः । यथा—

"अन्तको 'म' ।"

(तं० आ० वि० खं० 11/2, पृ० 137)

अन्तकोटिः——प्राणचारस्य बाह्यं निवृत्तिस्थानं बाह्यद्वादशान्तः । यथा—

" 'अन्तकोटिः'—द्वादशान्तः ।"

(प्र० हृ० पृ० 44)

अन्तरङ्गशक्तयः——परमेश्वरस्य नैसर्गिकस्वभावभूताः पञ्च मुख्याः शक्तयः । ताश्च—चिच्छक्तिः, आनन्दशक्तिः, इच्छाशक्तिः, ज्ञानशक्तिः, क्रियाशक्तिर् इति । केचिदानन्देच्छयोर्मध्ये औन्मुख्यशक्तिमपि स्वीकुर्वन्ति । यथा—

"आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्विभुः ।
अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिवः ॥"

(शि० दृ० 1,2)

"यदा तु तस्य चिद्धर्मविभवामोदजृम्भया ॥
विचित्ररचनानानाकार्यसृष्टिप्रवर्तने ।
भवत्युन्मुखिता चित्ता सेच्छाया प्रथमा तुटिः ॥"

(तदेव 1,7-8)

द्र० 'शक्तयः'~अन्तरङ्गाः——इति

~शुद्धतत्त्वसमन्वयतः——चिदानन्दशक्तिसामरस्यमयः परमेश्वरः । स एव प्रकाशप्राधान्यदृष्ट्या शिवः, विमर्शप्राधान्यदृष्ट्या च शक्तिरित्यभिधीयते । औन्मुख्यशक्ति स्तस्यानाश्रितशिवरूपता । यथा—

"स्वरूपानुप्रविष्टचिन्निर्वृतिरूपशक्तिद्वयः, प्रकाशानन्दमयः, पूर्णः, परमेश्वरः शिवः प्रसृतः, कदाचित् प्रथमतः शक्तिमात्रके—औन्मुख्ये विषयाननुषक्ते निर्वृतिमये इच्छापूर्वभागे परापरावस्था-

रम्भदशायां तदनुरूपं रूपं बिभर्ति ध्यायिनां ध्येयम् (अनाश्रिताख्यम्) ।" (शि०दृ०वृ०पृ० 23-24)

इच्छाशक्त्युद्रेकावस्था 'शक्तितत्त्वम्' । यथा—

"कदाचिदिच्छातः—इच्छाशक्तिरूपत्वान्निमित्तात्, अथवा इच्छारूपमासाद्य तदनुरूपं पूर्ववद्रूपं बिभर्ति ।" (तदेव पृ० 24)

ज्ञानशक्तेरुद्रेकावस्था 'सदाशिवदशा', क्रियाशक्तेरेव च प्रधानता 'ईश्वरदशा' । यथा—

"कदाचित् पुनर्ज्ञानशक्तिरूपत्वात् सदाशिवरूपं बिभर्ति । क्रियातो ज्ञाने तु प्रागुक्तनयेनाधिक्यात् । ऐश्वरीवं तु स्थिति कदाचित् क्रियाशक्तेः समाभोगात् पर्यन्तप्राप्तविस्तारात् बिभर्ति । कदाचित् परापरावस्थान्तरभिन्नाशेषवेद्यवेदकरूपबोधात्मप्रमात्रवस्थया मन्त्रादिरूपतां बिभर्ति ।" (शि०दृ०वृ०पृ० 24)

द्र० 'शक्तिपञ्चकम्'——इति ।

अन्तरात्मा——लिङ्गशरीरयुक्तः संसारी जीवः । यथा—

"पुर्यष्टकसमायोगात्पर्यटेत्सर्वयोनिषु ॥
अन्तरात्मा स विज्ञेयो निबद्धस्तु शुभाशुभैः ।"

(स्व०तं० 11,85-86)

असावेव प्रत्यगात्मेत्युच्यते ।

अन्तरालसम्बन्धः——

द्र० 'सम्बन्धः'~अन्तरालः——इति ।

अन्तर्मुखत्वम्——प्राणबुद्धिशून्यान्यतीत्य तेषां साक्षिभूतत्वेन स्थितः संविदात्मको भावः सर्वान्तरः । तदुन्मुखत्वमेवान्तर्मुखत्वम् । यथा—

"अन्तर्मुख इति—अन्तः पूर्णाहन्तात्मकं मुखं प्रधानं यस्येति ।"

(स्प०नि०पृ०33)

अन्तर्मुखो भावः——सर्वशक्तिमाननवच्छिन्नसंविदात्मकः परिपूर्णोऽहमिति । यथा—

"अन्तर्मुखोऽन्तश्चक्रारूढ स्वभावः सर्वज्ञत्वादिगुणाश्रयः ॥"

(स्प०सं०पृ०14)

"……अन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदम्"

(स्पं०का०16)

अन्तर्यागः——मूलाधाराद्र्ध्वद्वादशान्तं भावनया याज्यदेवतापीठासनादि प्रकल्प्य तत्र स्थितामभिमतां देवतां प्रति भावनया विश्वभावार्पणं पूजनम्, तन्मयीभवनं ध्यानं, तथाविधान्तःपरामर्शपरम्परा जपः, तत्परामर्शोद्दीपितसंवित्तेजसा विश्वात्मीकरणं होमः,- इत्येषोऽन्तर्यागः शैवे दीक्षाक्रमे यथा—

"एतस्मिन् विश्वमये भेदे आसनीकृतेऽधिष्ठातृतया व्यापकभावेनाधेयभूतां यथाभिमतां देवतां कल्पयित्वा यत्तत्रैव समस्वभावनिर्भरात्मनि विश्वभावार्पणं तदेव पूजनं, यदेव तन्मयीभवनं तद्ध्यानं, यत् तथाविधान्तःपरामर्शक्रमप्रबुद्धमहातेजसा तथा बलादेव विश्वात्मीकरणं स होमः ।" (तं० सा० पृ० 142)

"एवमन्तर्यागमात्रादेव वस्तुतः कृतकृत्यता ।"

(तदेव पृ० 143)

अन्तर्यागबहिर्यागफलम्——यथा—

"इत्थं प्राणाद् व्योमपदपर्यन्तं चेतनं निजम् ।
शिवीभाव्यार्चनायोगात् ततो बाह्यं विधिं चरेत् ।
बहिर्यागस्य मुख्यत्वे सिद्ध्यादिपरिकल्पिते ।
अन्तर्यागः संस्क्रियायै ह्यन्यथार्चयिता पशुः ॥
यस्तु सिद्ध्यादिविमुखः स बहिर्यजति प्रभुम् ।
अन्तर्महायागरूढयै तयैवासौ कृतार्थकः ॥"

(तं० आ० 15, 366-68)

बहिर्यजनमपि तस्यान्तर्यागरूढिसिद्धये एव भवति ।

अन्त्येष्टिः~दीक्षा——अधरशासनस्थानां मातृपितृगुरुप्रभृतीनां स्वशासनस्थानामपि वा लुप्तसमयानामुद्धाराय शवशरीरे परोक्षदीक्षाविधिः क्रियते सर्वोऽपि, विहाय दार्भादिशरीरकलनाम् । तेन मृतोऽपि शिवमार्गं याति । बुभुक्षोस्तत्रापि योजनिकाविधिः । यथा—

"अथाधरशासनस्थानां गुर्वन्तानामपि मरणसमनन्तरं मृतोद्धारोदितशक्तिपातयोगादेवान्त्यसंस्काराख्यां दीक्षां कुर्यात् । ऊर्ध्वशासनस्थानामपि लुप्तसमयानाम् अकृतप्रायश्चित्तानामपीति परमेश्वराज्ञा……" ॥ (तं० सा० पृ० 175)

~अन्यत्र मृतानाम्——यथा—

"मन्त्रयोगादिभिर्ये च मारिता नरके तु ते ॥
कार्या तेषामिहान्त्येष्टिर्गुरुणातिकृपालुना ।"

(तं० आ० 24, 9-10)

अपरोक्षैषाऽन्त्येष्टिदीक्षा सप्रत्ययेति द्रष्टव्यं विस्तरतस्तत्रैव ।

~दीक्षणीयाः (तया)——अधरशासनाभ्यासिनो गुरवोऽपि, ऊर्ध्वशासनस्थाः कृतसमयलोपाश्च अन्त्येष्टिदीक्षयाऽनुग्राह्याः शिवगुरुणा । यथा—

"सर्वेषामधरस्थानां गुर्वन्तानामपि स्फुटम् ।
शक्तिपातात् पुरा प्रोक्तात् कुर्यादन्त्येष्टिदीक्षणम् ॥
ऊर्ध्वशासनगानाञ्च समयोपहतात्मनाम् ।
अन्त्येष्टिदीक्षा कर्तव्या गुरुणा तत्त्ववेदिना ॥
समयाचारदोषेषु प्रमादात् स्खलितस्य हि ।
अन्त्येष्टिदीक्षा कार्येति श्रीदीक्षोत्तरशासने ॥"

(तं० आ० 24, 2-4)

~जालाकृष्टया——यथा

"इह खल्वाचार्यो बिन्दुना प्राणेन महाजालयोगक्रमेण आकृष्टं पाशवं तत्त्वमात्मानं स्वाभेदेन हृदि रोधयेत् ॥"

(तं० आ० वि० खं० 10, पृ० 311)

एतेन प्रतीयते यज्जालाकृष्ट्यापि विधीयत अन्त्येष्ठिदीक्षेति।
द्र० 'जालप्रयोगदीक्षा'——इति

~निषेधस्तस्याः——यथा—

"आचार्ये तत्त्वसम्पन्ने यत्र तत्र मृते सति।
अन्त्येष्टिर्नैव विद्येत शुद्धचेतस्यमूर्धनि ॥"

(तं० आ० 24, 8-9)

देहात्मभावशून्यस्य तत्त्वविद आचार्यस्य नैव विधेया अन्त्येष्टिक्रियेति तात्पर्यम्।

~पिण्डदानहीना——न ह्यन्त्येष्टिदीक्षाविधौ पिण्डदानादि विधीयते। मुक्तिमार्गेऽग्रगामिनां कृते पिण्डदानादेर्निष्फलत्वात्। यथा—

"उक्तं श्रीमाधवकुले शासनस्थो मृतेष्वपि।
पिण्डपातोदकास्नादिलौकिकं परिवर्जयेत् ॥"

(तं० आ० 24, 22)

अन्यशास्त्राणि (ग्राह्याणि)——वेद-वैष्णव-द्वैतशैव-धर्मशास्त्र-षड्दर्शन-बौद्ध-आर्हतानि।

~उपादेयानि——अपेक्षानुसारं तत्तत्क्रियाप्रतिपादकं वस्तुजातमन्यशास्त्रेभ्यो ग्राह्यं यत् स्वकीये तन्त्रे न लभेत योगी। यथा नाराचास्त्रप्रयोगे विधिः यथा—

"एवमपेक्षायां सत्यां समानादसमानाद्वा शास्त्रान्तरात् तावदपेक्षणीयं यावदपेक्षाया निवृत्तिःस्यात्……… यदाहुः—

"सापेक्षत्वेऽप्यपेक्ष्यैव मानं यावदपेक्षते।
तावदेवान्यतः कार्यं नान्यत्स्यादनवस्थितेः ॥"

(उद्धृ० तं० आ० वि० खं० 3, पृ० 281)

~प्रामाण्यम् (तेषाम्)——यथा—

"लौकिकं वैदिकं सांख्यं योगादि पाञ्चरात्रकम्।
बौद्धार्हतन्यायशास्त्रं पदार्थक्रमतन्त्रणम् ॥
सिद्धान्ततन्त्रशाक्तादि सर्वं ब्रह्मोद्भवं यतः।
श्रीस्वच्छन्दादिषु प्रोक्तं सद्योजातादिभेदतः ॥"

(तं० आ० 35, 26-27)

अन्योन्यः (सम्बन्धः)——
द्र० 'सम्बन्धः'~इतरेतरः——इति।

अपरत्वम्——प्रमेयतावभासः। मायापदम्। यथा—

"अपरत्वमपूर्णतान्यापेक्षा, इदमिति।"

(ई० प्र० वि० खं० 2, पृ० 199)

"अपरत्वमपूर्णता, अन्याकाङ्क्षत्वम्, इदमिति।"

(ई० प्र० वि० वि० खं० 3, पृ० 274)

अपरम् (त्रिकम्)——
द्र० 'त्रिकम्'~अपरम्——इति

अपरसिद्धिलाभः——धराजलादितत्त्वधारणया, तत्तल्लोकधारणया च तत्तत्तत्त्ववशीकारस्तत्तद्भुवनाधिपतित्वलाभश्च सर्वोऽपरसिद्धिलाभः। यथा—

"जलेन जलरूपी स्यात् स्थलेन स्थलतां व्रजेत्"
इत्यादियुक्तिभिरपरसिद्धिलाभः ॥"

(ई० प्र० वि० वि० खं० 2, पृ० 136)

अपराजितः——स्तवचिन्तामणिकर्तुः श्रीमद्भट्टनारायणस्य जनकस्य नाम 'अपराजितः' इति। यथा—

"विद्योद्द्योतितमाहात्म्यः स जयत्यपराजितः"

(स्त० चि० श्लो० 2)

अपराजितः—पिता।

(स्त० चि० वि० पृ० 10)

अपरा (देवी)——परमेश्वरस्य क्रियाशक्तिः। यथा—

"क्रमप्राप्तां परापरां देवी परिहृत्य, प्रथमं तावदपरां देवीमभिमुखयति"।

(तं० आ० वि० खं० 1, पृ० 17)

"नौमि देवीं शरीरस्थां नृत्यतो भैरवाकृतेः।
प्रावृण्मेघघनव्योमविद्युल्लेखाविलासिनीम् ॥"

(तं० आ० 1, 3)

"देवीं जगदुल्लासनक्रीडाकारिणीम्।"

(तं० आ० वि० खं० 1, पृ० 17)

अपरादेवीमन्त्रः——न स्पष्टीकृतो जयरथेन। तन्त्रालोके सङ्क्षेपत उक्तः। यथा—

"माया विसर्गिणी हुं फट् चेति मन्त्रोऽपरात्मकः।"

(तं० आ० 30, 26)

अन्येषां वर्णानामूहोऽत्र स्यादनुवृत्तिर्वा। अत्रोक्ता वर्णाः="ह्रीः हुं फट्" इति। यतो विसर्गिणी माया=ह्रीः। चकारो वर्णान्तरानुवृत्तिमभिव्यनक्ति।

अपरादेवीविद्या——
द्र० 'अपरादेवीमन्त्रः'——इति।

अपरामुक्तिः——द्विरूपासौ—(1) प्रलयाकल—विज्ञानाकलानाम् (2) विद्येश्वराणाञ्चेति। (1) तत्र शून्यरूपता, प्राणरूपता, बुद्धिरूपता चापरामुक्तिः। नैषा वास्तविकी मुक्तिरपि तु मायाभ्रमितबुद्धयोऽमोक्षे मोक्षदर्शिन एनां मुक्तिं मन्यन्ते। यथा—

"अन्यस्तु धी-प्राण-शून्यधियो जन्मक्षयोचिताः ॥
शून्यं धीः प्राण इत्येतत्सृज्यते क्षीयतेऽपि च।
स्थैर्यमस्य परं देहापेक्षया न तु तत्त्वतः ॥"

(तं० व० धा० 1, 34-35)

(2) विद्येश्वरता। यथा—

"एवञ्च विद्येशत्वं त्वपरा मुक्तिः।"

(तं० आ० वि० खं० 5, पृ० 202)

परशिवत्वापेक्षयाऽपरेयम् । परं विद्येश्वराः कञ्चित्कालं विद्येश्वरत्वचमत्कारं भुक्त्वा पर्यन्ते शिवेनानुगृहीताः सन्तः शिवत्वमेव यान्ति । असौ शिवत्वासादनदशा तु परा मुक्तिः ।

द्र० 'मुक्तिः'—इति ।

अथवा—जयरथस्य मतमिदं भ्रान्तमेव स्यात् । तन्त्रवटधनिकायामुक्तमपरमुक्तिलक्षणं तु प्रलयाकलविज्ञानाकलविषयमेव, न विद्येश्वरविषयम् । विद्येश्वराणां नैव पुनरावृत्तिरत्र मायीयसंसृतौ ।

अपराशक्तिः——सा शक्तिर्यया परमेश्वरः सर्वं प्रपञ्चं भेदभावेन धारयति, पश्यति, प्रकाशयति च । यथा—

"यया परस्परविविक्तात्मना भेदेनैव (शिवादिधरण्यन्तं बिभर्ति च पश्यति च भासयति च परमेश्वरः) सास्य श्रीमदपराशक्तिः ।"

(तं० सा० पृ० 28)

~शक्तयः——

द्र० 'घोरतर्यः शिवशक्तयः'——इति ।

अपराः सिद्धयः——मोक्षमार्गात्प्रच्यावयन्त्यः साधकस्य क्षोभकारिण्यो बिन्दुनादरूपरसादिसाक्षात्कारतः सम्पद्यमानाः सिद्धयः । यथा—

"अतो बिन्दुरतो नादो रूपमस्मादतो रसः ।
प्रवर्तन्तेऽचिरेणैव क्षोभकत्वेन देहिनः ।"

(स्पं०का०42)

अपरिच्छिन्नत्वम्——परिच्छेदराहित्यम्, असङ्कुचितत्वम्, सर्वसामान्यत्वम् ।

अपरोक्षता——इन्द्रियमनोग्राह्यत्वाभावेऽपि साक्षात्प्रकाशमानता । न प्रत्यक्षता न चापि परोक्षता । तथा सत्यपि प्रकाशमानता । ततः स्वप्रकाशमानताऽसौ । यथा—

"न च सर्वथा निःस्वभाव एवेति अपरोक्ष आत्मा, इति तदित्यपरोक्षताभिधानमेव · युक्तमस्मदुक्त्या स्वप्रकाशात्मतया न त्वन्यथा ।"

(ई०प्र०वि०वि०खं 1,पृ०219)

"प्रसिद्धं यदैन्द्रियमानसप्रत्यक्षसंवेद्यं तदिदमिति प्रमातुर्भेदेन भातीति-अक्षप्रतिगमादस्तु प्रत्यक्षम्, नैवं प्रमाता । तन्न प्रत्यक्षो न च न भावीति न परोक्षः ।

(तदेव)

अपवेद्यसौषुप्तम्——सूक्ष्मतरेणापि प्रमेयाभासेन शून्या सुषुप्तिः । शून्यमात्रे स्थितिः प्राणिनः । यथा—

"तत्र शून्यसौषुप्ते न किञ्चिद् व्यतिरिक्तं वेद्यम्, इति मायीयमलाभावादपवेद्यं तत्" ।

(ई० प्र० वि० खं० 2, पृ० 237-38)

अपानः—उच्चारयोगे——

द्र० 'प्राणापानौ'~उच्चारयोगे——इति ।

~प्रतिद्वन्द्वी——

द्र० 'प्राणापानौ'——इति ।

~व्याप्तिदृष्टया——हृदयादधो मूलाधारचक्रं यावदपानस्य व्याप्तिः । एषोऽपानः स्थूलप्राणचाराभ्यासे । उच्चारयोगे त्वन्यः सिद्धान्तदृष्टया चान्यो यस्तन्त्रालोके ईश्वरप्रत्यभिज्ञातद्विमर्शिन्यादौ च प्रतिपादितः । यथा—

"एवं प्राणे यथा कालः क्रियावैचित्र्यशक्तिजः ॥
तथापानेऽपि हृदयान्मूलपीठविसर्पिणि ।"

(तं०आ०6, 185-86)

अन्यस्तूच्चारयोगे तत्र—बाह्यद्वादशान्ताद् हृदयं यावदेका अपानव्याप्तिः, हृदयान्मूलचक्रं यावच्चापरा, योगिमात्रवेद्या । यथा—

"यद्यपि द्वादशान्ताद् हृदयान्तमपाने कालवैचित्र्यमुक्तं तथापि हृदयान्मत्तगन्धपर्यन्तं प्रसरणेऽस्यैव प्राधान्यमित्येवमुक्तम् ।"

(तं०आ०वि०खं०4/1, पृ०155)

अधिष्ठातारः (तत्र)~यथा—

"हृत्कन्दानन्दसङ्कोचविकासद्वादशान्तगाः ॥
ब्रह्मादयोऽनाश्रितान्ताः सेव्यन्तेऽत्र सुयोगिभिः ।

(तं०आ० 6, 188-89)

तत्र—हृदि-ब्रह्मा, कन्दे विष्णुः, आनन्दचक्रे रुद्रः, सङ्कोचे ईश्वरो, विकासे सदाशिवो, द्वादशान्ते चानाश्रितः इति ।

~मणिपूरादिसञ्चारी——यथा—

"अपानश्च अपकर्षेण तनावधोगमनेन अननात्, अपान इति"

(म० प्र० वि० प्र० 34)

अपिधानकृत्यम्——

द्र० 'पिधानकृत्यम्'——इति ।

अपूर्णा मुक्तिः——कस्माच्चिदेव बन्धनामुक्तो न सर्वस्माद्यस्तस्य मुक्तिरपूर्णैव । यथा—

"तस्मानमुक्तोऽप्यवच्छेदादवच्छेदान्तरस्थितेः ।
अमुक्त एव...................... ॥"

(तं०आ० 1, 34)

असौ मुक्तिः प्रलयाकलादीनां, न्यायवैशेषिकसांख्ययोगबौद्धजैनवेदान्तादिशास्त्रानुसारिणाम् ।

अपोहनम्——अतद्व्यावृत्यात्मकोऽन्ययोगव्यवच्छेदः । यथा—

"अन्यव्यवच्छेदात्मेत्यपोहनव्यापार उच्यते ॥"

(ई०प्र०वि०वि०खं० 1, पृ० 292)

अश्वोऽयमिति विकल्पबुद्धावश्वस्यैव निश्चयोऽनश्वभूतानां च गवंभावीनां निषेधः । इत्येवं तन्निश्चयनमतन्निषेधनं—(तद्भिन्न-

निषेधनम्) चोभयं मिलित्वाऽपोहो वाऽपोहनं वेति भण्यते । अपोहपूर्वक एव हि सर्वमपि विकल्पजालमुदेति । यथा—

"तदतत्-प्रतिभाभाजा मात्रैवातद्व्यपोहनात् ।
तन्निश्चयनमुक्तो हि विकल्पो घट इत्ययम् ।"

(ई० प्र० वि० 1-6-3)

अपोहनशक्तिः ~ शिवस्य——अभिन्नेऽखण्डे च विश्वात्मके बोधगगने बहुप्रकारक विच्छेदनावभासनोन्मुख्यसम्पादिनी पारमेश्वरी शक्तिः । यथा—

"यत् किल तदाभास्यते तत् संविदो विच्छिद्यते, संविच्च ततः, संविच्च संविदन्तरात्, संवेद्यं च संवेद्यान्तरात् । न च विच्छेदनं वस्तुतः सम्भवति, इति विच्छेदनस्यावभासमात्रमुच्यते ।········ तदवभासनसामर्थ्यमपोहनशक्तिः ।"

(ई० प्र० वि० खं० 1, पृ० 110)

~ व्यावहारिकी——परमेश्वरस्य सा शक्तिर्यंयाऽसावभिन्नेऽपि निजे स्वरूपे भेदावभासनार्थमुन्मुखो जायते,—भेदावभासनपूर्वकञ्च विकल्पात्मकज्ञानावभासेऽपोहनात्मिकामतद्व्यावृत्तिमवभासयति, सांसारिक व्यवहारसिद्धये । अवभात एव च भेदे ज्ञातृज्ञेयभावः स्मर्तृस्मार्यभावश्चाभासविषयतामुपयाति । यथा—

"सम्पादितं मायीयप्रमातृनिष्ठं विकल्परूपं विज्ञानं यया भगवतः स्वातन्त्र्यशक्त्या साऽपोहनशब्दवाच्या" ।

(ई० प्र० वि० वि० खं०1, पृ० 290)

"सा शक्तिर्विकल्पजनिकाऽपोहनप्रधानतद्रूपजननादपोहनशक्तिरिति" ॥

(तदेव पृ०291)

अप्रबुद्धः——सांसारिको बद्धः प्रमाता । न स्वात्मज्ञानविषये प्रबोधवान् । अप्रत्यभिज्ञातात्मस्वरूपस्वभावोऽज्ञानी जीवः । यथा—

"गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥
अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः ।
पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि ॥"

(स्प०का०19-20)

"अप्रबुद्धधियः प्रायः सर्वानप्रत्यभिज्ञातपारमेश्वरशक्त्यात्मकनिजस्पन्दतत्त्वान्; देहात्ममानिनो लौकिकान् प्राणाद्यात्माभिमानिनश्च······।"

(स्प०नि०पृ०37)

अप्रबुद्धा पारमेश्वरपरानुग्रहविरहादविगलितगाढाज्ञाननिद्रा-धीः प्रज्ञा येषां ते तथा" ।

(स्प०वि०पृ०67)

"अप्रबुद्धस्य सर्वकर्तृत्वादिलक्षणं निजं महिमानं सामान्यस्पन्दरूपं विद्यमानमपि अप्रतिबुद्ध्यमानस्य सर्वकार्यपरतन्त्रं देहादिसर्गमेवात्मत्वेनावगच्छत एते लब्धप्रसराः सुखितोऽहम् इत्यादयो गुणप्रधानाः प्रत्ययप्रवाहाः सत्ये स्वात्मनि स्थितिं व्यवधाय संसारमेवासादयन्ति, आ प्रबोधप्राप्तेः ॥"

(तदेव पृ०68)

अबुद्धम्——जाग्रज्जाग्रदवस्था, जाग्रदवस्थाया अवरतमो भेदः । यथा—

"जाग्रज्जाग्रदबुद्धं तद्······ ········।"

(तं०आ०10, 338)

अबुधः——(1) सौषुम्नमार्गे प्रसरन्नपि शक्तेरधो मायायां विचरन् बद्धः साधक । यथा—

"शक्त्या चाधो यदा गच्छेदबुधस्तु तदा भवेत् ।"

(स्व०तं०4, 238)

शक्तिरत्र कौण्डली ज्ञेया प्रणवकलासु प्रसिद्धा ।

"तत्त्वभूतात्मसंहारे कलाक्षित्यन्तगोचरे ॥
मायासाम्यनिशायां वै संहृत्य परमेश्वरः ।
निर्व्यापारो भवेत्तावद्यावद्वै नोदयः पुनः ॥
सुखदुःखाद्यभावश्च ह्यात्मवर्गस्य कर्मणः ।
मलनिद्राविमूढात्मा रुद्धचैतन्यदृक्क्रियः ॥
न विजानाति शब्दादीनात्मानं च वरानने ।
कारणं न विजानाति न च स्थानं स्वकं प्रिये ॥
सर्वमेतन्न जानाति यतो लुप्ताक्षदृक्क्रियः ।
अबुधस्तिष्ठते तत्र यावन्माया अहर्मुखम् ॥

(स्व०तं०11, 91-95)

"हृत्पद्माद्यावदयनं भागमेकं त्यजेत्तु सः ।
नासिकाग्रे द्वितीयं तु शक्त्यन्ते तु तृतीयकम् ॥"

(स्व०तं०4, 236)

"शक्त्याश्चाधो यदा गच्छेदबुधस्तु तदा भवेत् ॥,'

(तदेव पृ० 4, 238)

उदानाख्ये प्राणचारे विशेषोऽयं शिवयोगिमात्रवेद्यः ।

"यस्तु पूर्वं—प्रधानसाम्यमाश्रित्य······। (स्व०तं०11,84)
इति ग्रन्थेन आत्मा उक्तः, स प्रकृतिलीन इति विशेषः ।"

(स्व० तं० उ० खं०11, पृ०66)

द्र० 'आत्मा'——इति

(2) सुषुप्तावस्थः प्रलयाकलः प्राणी, बद्धः प्रमाता । यथा—

"मलनिद्राविमूढात्मा रुद्धचैतन्यदृक्क्रियः ।
अबुधस्तिष्ठते तत्र यावन्माया अहर्मुखम् ॥"

(स्व०तं०11, 93-95)

अभयमुद्रा——दक्षहस्तस्य सन्निवेशविशेषः । यथा—

"अग्रप्रसारितो हस्तः श्लिष्टशाखो वरानने ।
पराङ्मुखं तु तं कृत्वा त्वभयः परिकीर्तितः ॥"

(स्व० तं 14,

"पताकहस्तो दक्षिणः स्वशरीरपराङ्मुख उत्थित इत्यर्थः।
उक्तं च तत्रैव (श्रीभैरवानुकरणस्तोत्रे—
"अभयेन च भयान्युन्मूलयता प्रकाश्यते सततम्।
विश्वानुग्रहकरणस्वभावता तव करेण तेन॥"
(स्व० तं० उ० प० 14, पृ० 115)

अभवः——विद्यादशाक्षेत्रं महामायादि सदाशिवान्तम्। अनन्त भुवनादारभ्यानाश्रित पदान्तः शुद्धोऽध्वाऽभवः। न बोभूयतेऽत्र नवनवशरीरतयेति। यथा—

"मायादिरवीच्यन्तो भवस्त्वनन्तादिरुच्यतेऽप्यभवः।
शिवशुद्धगुणाधीकारान्तः सोऽप्येष हेयश्च॥
(तं० आ० 8, 352-53)

~**हेय एव**——अभावाख्ये शुद्धेऽप्यध्वन्युपास्यपारतन्त्र्यं नियोज्यता च, ततो हेय एवायमपि। परमभवपदाधराध्वगतिर्न भवति। तत एवाभव इति समाख्यास्य। यथा—

"……सोऽप्येष हेयश्च।
अत्रापि यतो दृष्टानुग्राह्याणां नियोज्यता शैवी।
इष्टा च तन्निवृत्तिर्ह्य भवस्त्वधरे न भूयते यस्मात्॥"
(तं० आ० 8, 353-54)

अभावः~**आगमशास्त्रे**——प्रमाणप्रमेयप्रपञ्चशून्यं केवलं तत् प्रमातृतत्त्वम् यत्र सर्वे भावाः क्षयं गताः। यथा—

"अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते।
अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः॥
(स्व० तं० 4, 292-93)

"अभावश्च—न विद्यते भावः सर्वः प्रमेयादिप्रपञ्चो यत्रेति"॥
(स्व० तं० उ० प० 4, पृ० 188)

सूक्ष्मोऽत्यन्तं परो भावस्त्वभावः स विधीयते॥"
(स्व० तं० 4, 268)

"परो भावः परा सत्ता परमशिवेऽत्यन्तं सूक्ष्मो विज्ञेयः सर्वकारणं चेत्यर्थः। स चाशेषभावप्रक्षयात्मकत्वादभावः॥"
(स्व० तं० उ० प० 4, पृ० 171)

"सर्वेन्द्रियमनोतीतस्त्वलक्ष्योऽभाव उच्यते॥"
(स्व० तं० प० 4, 277)

"सर्वाणीन्द्रियाणि मनश्चातीतोऽतिनिष्क्रान्तः समनापदादूर्ध्वंस्य वेदित्रेकरूपत्वाद्, अत एवालक्ष्यः। अतश्च न विद्यन्ते वेद्यादिरूपा भावा यत्रेति व्युत्पत्याऽभाव उच्यते, वस्तुतस्त्वसौ चिदानन्दघन एव॥" (स्व० तं० उ० प० 4, पृ० 177)

~**तत्त्वदृष्टया**——अभावोऽपि प्रकाशमानः सन् प्रकाश एव तद्रूपतयावभासते। अप्रकाशस्य प्रकाशनाभावान्नाप्रकाशोऽभावोऽपि। यथा—

"घटाद्यभावोऽपि बुद्धयमानत्वात् परमानन्दैकघनबोधात्मकशिवस्वभाव एवेत्यर्थः। तदाहुः—

"अबोधोऽपि बुद्ध्यमानो बोधात्मभूत ईश्वर एव" इति।
(तं० आ० वि खं० 1, पृ० 91)

~**व्यवहारे**——भावस्य भावान्तरे संस्कारशेषतयावस्थानम्। यथा—

"इयमेव संस्कारशेषता भावान्तरे भावान्तराणां सर्वत्र अभाव उच्यते, न तु सर्वात्मना सतां विनाश इति।"
(ई० प्र० वि० वि० खं० 3, पृ० 332)

प्रागभाव-प्रध्वंसाभावविषय एवायं न्यायो नात्यन्ताभावान्योन्याभाव विषय इति प्रतिभाति।

~**शिवरूपः**——यथा—

"अभावोऽपि ज्ञायमानो बोधात्मैव, तदात्मकत्वाच्च विश्वरूप एव। तस्मान्नास्त्यभावात्मकमशिवरूपं क्वचिदपि विश्वमध्ये।"
(शि० दृ० वृ० पृ० 160)

अभाव-भावना——बौद्धा अभावभावनां मोक्षसाधनत्वेनोपदिशन्ति। परं न तत् सम्भवति, यतो हि यद्यद् भाव्यते तत्तद् भावनाविषयत्वेन तत्कालं भावात्मकमेव, नाभावरूपम्। ततोऽभावो नैव भावयितुं शक्यते। केवलं प्रमेय-प्रमाणप्रपञ्चशून्यं सङ्कुचितं प्रमातृरूपमेव भावयितुं शक्यते तथाविधेऽभ्यासे। तदुक्तम्—

"नाभावो भाव्यतामेति न च तत्रास्त्यमूढता।
यतोऽभियोगसंस्पर्शात्तदासीदिति निश्चयः॥
अतस्तत्कृत्रिमं ज्ञेयं सौषुप्तपदवत्सदा।
न त्वेवं स्मर्यमाणत्वं तत्तत्त्वं प्रतिपद्यते॥
अवस्थायुगलं चात्र कार्यकर्तृत्व शब्दितम्।
कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम्॥
कार्योन्मुखः प्रयत्नो यः केवलं सोऽत्र लुप्यते।
तस्मिंल्लुप्ते विलुप्तोऽस्मीत्यबुधः प्रतिपद्यते॥
न तु योऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदम्।
तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात्।"
(स्पं०का० 12 तः 16)

स्पष्टमेवोक्तम्। यथा—

"श्रुत्यन्तविदाद्यभिमतोऽभावो भाव्यतां नैति, भावनाया भाव्यवस्तुविषयत्वादभावस्य न किंचित्त्वाद्भाव्यमानतायां वा किंचित्त्वे सत्यभावत्वाभावात्, किञ्चं भावकस्यापि यत्राभावः स विश्वोच्छेदः कथं भावनीयः, भावकाभ्युपगमे तु न विश्वोच्छेदो भावकस्यावशिष्यमाणत्वादिति, न विश्वाभाव एव तत्त्वम्। अथ कल्पितोऽयं भावको, विश्वोच्छेदं विकल्पकल्प्यमानं भावयन् भावनापरिनिष्पत्तौ भाव्यतादात्म्यादभावरूपः संपद्यत इति पक्षः।"
(स्प० नि० पृ० 27)

तद्यथा—

'न त्वभावो भावनीयो यथा अन्यैर्योगिभिरुपदिश्यते—'अभावं भावयेत्तावद्यावत्तन्मयतां व्रजेत्' इति। न चैतद् युक्तं, यस्मान् नाभावे भावना युज्यते, मूढावस्थैव सा, यस्माद् उत्तरकालम् अभियोगसंस्पर्शाद् अभिलापसंयोगात्—"सा शून्यावस्था अतीता मम" इति स्मर्यते। न च आत्मस्वभाव एषः, यस्मान्न त्वेवं चिद्रूपत्व

मूढावस्थावत् स्मर्यते, तस्य सर्वकालमनुभवितृत्वेनानुभवो नित्योदितत्वात् ।"

(स्पं० सं० पृ० 11)

अभिजित्कालः——कालाध्वयोगे मध्याह्नं मध्यरात्रिश्चाभिजित् । यथा—

"मध्याह्नमध्यनिशयोरभिजिन्मोक्षभोगदा ।।

(तं० आ० 6, 68)

अभिजित्स्थानम् ~कालाध्वनि——तालुन्यभिजित्कालभावना भाव्यते कालाध्वयोगे । यथा—

"स च तालुनि, इत्यधिगन्तव्यम् । यदुक्तम्—
'……… मध्याह्नस्तालुमध्यतः'

(उद्ध० तं० आ० वि० खं० 4/1, पृ० 60)

अभिनवगुप्तः——कश्मीर शैवदर्शनस्य प्रयोगपक्षे सिद्धान्तपक्षे चोभयत्र "यथोत्तरं मुनीनां प्रामाण्यम्' इति न्यायानुसारं सर्वोत्तीर्णं प्रामाण्यं भजमानो गुरुः । अस्य निर्णयः पक्षद्वयेऽपि चरमः ।

~आश्रमः (तस्य)——विस्तरेण वर्णितो मधुराजेन गुरुनाथपरामर्शे ।

~कालः (तस्य)——ख्रीस्त-दशमशताब्दिमध्येऽस्य जन्म, एकादशशताब्दिमध्ये च शिवत्वगतिः । ग्रन्थत्रयेऽनेन स्वयं निर्माणकालो निर्दिष्टः सप्तर्षिसंवत्सरानुसारम् । यथा—

"षट्षष्टिनामके वर्षे…………………।"

(क्र० स्तो० 30)

स च कालः 4066 सप्तर्षि-सं०, 990 ख्रीस्त वर्षं इति ।

"वसुरसपौषे कृष्णदशम्याम्…………………।"

(भै० स्तो० 10)

स च कालः 4068 सप्तर्षि सं०, 992 ख्रीस्तवर्षं इति ।

"इति नवतितमेऽस्मिन् वत्सरेऽन्त्ये युगांशे ।।
तिथिशशिजलधिस्थे…………………।।"

(ई० प्र० वि० वि० खं० 3, पृ० 407)

स च कालः 4090 सप्तर्षि सं०, 4115 कलि सं०, 1014 ख्रीस्तवर्षं इति । अस्य शैशवं कौमारं वा तदाभूद् यदोत्पलदेवः सशरीरोऽवर्ततात्र लोके । तेनैव स्वशिष्यस्य लक्ष्मणगुप्तस्य पादयोरयं घटितः प्रत्यभिज्ञाशास्त्रदीक्षाविषये । यथा—

"श्रीशास्त्रकृद्घटितलक्ष्मणगुप्तपाद—
मत्योपदर्शितशिवाद्वयवाददृप्तः ।"

(ई० प्र० वि० वि० खं० 3, पृ० 406)

सिद्धसम्प्रदाये मौखिकी या परम्परा तदनुसारमभिनवगुप्तस्य जन्म 981 तमे वैक्रमे संवत्सरे, तदनुसारं 924 तमे ख्रीस्ते वर्षे समभवत् ।

~किंवदन्त्यः (तद्विषये)——दन्तकथाचतुष्टयं प्रचलितं श्रूयतेऽभिनवगुप्तस्य विषये । एका तावदभिनवगुप्तेन साकं शङ्कराचार्यस्य शास्त्रार्थविषयिणी कश्मीरेषु प्रसिद्धा, यदुल्लेखः शिवोपाध्यायेनापि कृतो निजायां श्रीविद्यायाम् । उभयोरप्यनयोर्भिन्नकालत्वात् कपोलकल्पितैवासौ सर्वथा । यच्च शङ्कराचार्यमन्दिरं श्रीनगरे तस्येदं नामकरणं डोगरमहाराजस्य रणवीरसिंहस्य, प्रतापसिंहस्य वा शासनकाले केनापि शाङ्करमठाधीशेन तस्मिन्समये कृतं यस्मिन्समये बहुवर्षशतानि प्रतिमारहितत्वेन स्थितेऽत्र मन्दिरे वर्तमानस्य शिवलिङ्गस्य प्रतिष्ठा व्यधीयत । ततः पूर्वं मन्दिरमिदं नामद्वयेन प्रसिद्धमभूत् । हिन्दव इदं 'ज्येष्ठरुद्रमन्दिरं' मौसुलाश्च 'तख्ते-सुलेमानं' वदन्ति स्म । ततो नानेन कोऽपि सम्बन्ध आद्यस्य शङ्कराचार्यस्य ।

द्वितीया किंवदन्ती माधवीये शङ्करदिग्विजये वर्णितास्ति । तदनुसारमभिनवगुप्तः कामरूपनिवासी तान्त्रिकः शाक्तभाष्यकारो ब्रह्मसूत्राणामिति कथितः । असौ किंवदन्त्यपि सर्वथाऽप्रामाणिकी कविकल्पनामात्रकल्पिता चेति बोद्धव्यम् । न हि कामरूपदेशस्थस्य कस्यापि शाक्तभाष्यकारस्य स्थितिः केनापि प्रमाणेन स्थापयितुं शक्यते ।

तृतीया दन्तकथा केनापि काव्यप्रकाशटीकाकृताऽभिनवगुप्तस्य नाम्नो व्याख्यानं विदधता स्वबुद्धयैव कल्पिता । नास्याः प्रामाणिकतायाः किमपि परिपोषकं वस्तु क्वाप्यन्यत्र लभ्यते । तेनाभिनवगुप्तस्य 'बालवलभीभुजङ्ग' इत्याख्या कविकपोलकल्पितैव ।

चतुर्थी किंवदन्ती कश्मीरेषु प्रचलिता, यदनुसारं सशिष्येणाभिनवगुप्तेन मर्त्यजीवनान्ते गुहाप्रवेशः कृत इति । न ह्यस्यां किंवदन्त्यां किमपि लिखितं प्रमाणं क्वापि लभ्यते । न चापि गुहाप्रवेशविधिस्त्रिके वा, कुले वा, कौले वापि क्वापि निरूपिता वर्तते । अभिनवगुप्तेन निज इतिहासो निजेषु ग्रन्थेषु स्वयं वर्णितोऽस्ति । न हि तत्रैवंविधानां किंवदन्तीनां सत्यताया विषये किमपि प्रमाणं क्वापि लभ्यते । देहस्थोऽसौ साक्षाच्छिवः किमर्थं गुहाप्रवेशमकरिष्यत् ?

एतन्मात्रं प्रमाणिकतया सम्भावयितुं शक्यते यत्तत्र गुहामध्येऽभिनवगुप्ताचार्येण कौलप्रक्रियानुसारं चक्रयागस्यानुष्ठानं कृतं भवेत् । अद्यापि सन्ति गुहामध्ये बह्व्यः प्रस्तरमूर्तयः । चक्रयागः सदैव सुगुप्तं क्रियते स्म कौलैः । आचार्यमहोदयोऽपि कौलोपासनाप्रवीणोऽभवत् । तस्य दूतीद्वयमत्र विषये प्रमाणम् । तदाधारत एव गुहाया अभिधानमभिनवगुप्तगुहेति प्रसिद्धम् तत्रत्येषु ग्रामीणेषु । नैव हि लोकप्रसिद्धिः कदाचिन्निराधारा भवति । तत एव च 'भैरवगुहा'—इति नामाभूदस्या गुहायाः, यस्यैवापभ्रंशमयं रूपं ग्रामस्य 'भीरव'—इति नामाद्यापि प्रचलति ।

~कृतिश्चरमा——चरमा तस्य महत्त्वमण्डिता कृतिरीश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी । उक्तं हि तत्र—

"विश्राम्यामहमीश्वराद्वयकथाकान्तासखः साम्प्रतम्"।

(ई० प्र० वि० नि० खं० 1, पृ० 2)

तद्गुरवः——

(क)

~शैवशास्त्रे——

((1) अर्द्धत्र्यम्बके शैवे)——

श्रीशम्भुनाथः, काङ्कड़ायां जालन्धरपीठे पीठाधिपः, कौलत्रिकोभयरहस्यपारङ्गतः,अभिनवगुप्तस्य हृदये स्थितानां सर्वासामपि शङ्कानामपनेता सिद्धान्तपक्षेऽपि प्रयोगपक्षेऽपि । आसीच्चासावर्धत्र्यम्बकमठिकाधीश्वरः—

"तुर्याख्यसन्ततिमहोदधिपूर्णचन्द्रः
श्रीसोमतः सकलवित् किल शम्भुनाथः ।"

(तं० आ० 37, 61)

द्र० 'शम्भुनाथः'——इति ।

~(2) (आमर्दके शैवे)—एरकनाथपुत्रः श्रीवामनाथः । यथा—

"आमर्दसन्ततिमहार्णवकर्णधारः
सद्दैशिकैरकवरात्मजवामनाथः ॥"

(तं० आ० 37, 60)

~(3) (कालीनये)—उद्भटः, श्रीभानुकाचार्यपरम्परायामाविमूर्तः । यथा—

"श्रीमदुज्जटोद्भटादिनानागुरुपरिपाटीसन्ततिर्यत्प्रसादासादितमहिमभिरस्माभिरेतत् प्रदर्शितम् ।"

(उद्ध० क्रमकेलितः, तं०आ०वि०खं० 3, पृ० 192)

~(4) (कौलिके विधौ)——श्रीशम्भुनाथो जालन्धरपीठाधिपः । तन्त्रालोकस्यैकोनत्रिंश अह्निकेऽनेकधा तस्यैव नाम्नः कीर्तनात् । तदेवाह्निकं कौलिकविधिप्रतिपादकम् । यथा—

"अथ सप्रत्ययां दीक्षां वक्ष्ये तुष्टेन धीमता ।
शम्भुनाथेनोपदिष्टां दृष्टां सद्भावशासने ॥"

(तं० आ० 29, 211-12)

"इति दीक्षोत्तरे दृष्टो विधिर्मे शम्भुनोदितः ॥

(तदेव 243)

~(5) (तुर्याख्यसन्ततिरूपे शैवे)——श्री शम्भुनाथः । अर्धत्र्यम्बकसन्ततिरेव हि तुर्याख्या सन्ततिः । यथा—

"तुर्याख्यसन्ततिमहोदधिपूर्णचन्द्रः
श्रीसोमतः सकलवित् किल शम्भुनाथः ॥

(तं० आ० 37, 61)

~(6) (त्रिकप्रक्रियासु)—तासु बहवोऽस्य गुरवस्ते च लक्ष्मणगुप्तः, शम्भुनाथः, भूतिराजः, महेश्वरः, भट्टेन्दुराजः, वामनदत्ताचार्यः, धर्मशिवः, भास्करः इत्याद्याः । यथा—

"अन्येऽपि धर्मशिववामनकोद्भट्टश्री-
भूतेशभास्करमुखप्रमुखा महान्तः ॥"

(तं०आ० 37, 62)

एतेषां परिचयः स्वे स्वे स्थाने द्रष्टव्यः ।

~(7) (त्र्यम्बकीये शैवे)——लक्ष्मणगुप्तोऽस्य गुरुः, उत्पलदेवः परमगुरुः, सोमानन्दः परमेष्ठी गुरुः । यथा—

"त्रैयम्बकप्रसरसागरशायिसोमा-
नन्दात्मजोत्पलजलल्मणगुप्तनाथः ॥"

(तं० आ० 37, 61)

सोमानन्दात्मज इति तस्य शिष्यः, उत्पलज इति तस्य शिष्यः । पुत्रकदीक्षया दीक्षितः शिष्योऽपि पुत्र इत्युच्यते त्रिकक्रमे ।

~(8) (प्रत्यभिज्ञाशास्त्रे)—लक्ष्मणगुप्तः । यथा—

"श्रीमल्लक्ष्मणगुप्तदर्शितपथः श्रीप्रत्यभिज्ञाविधौ ।"

(ई० प्र० वि० वि० खं० 1, पृ० 1)

~(9) (मतङ्गशास्त्रे)—मातङ्गपारमेश्वरागमो मतङ्गशास्त्रम् । तत्रास्य गुरुराचार्यानिरुद्धः । यथा—

"तस्मात् कर्मेन्द्रियाण्याहुस्त्वग्वद् व्याप्तृ णि मुख्यतः ।
तत्स्थाने वृत्तिमन्तीति मतङ्गे गुरवो मम ॥"

(तं० आ० 9, 260-61)

"श्रीमतङ्गशास्त्रव्याख्यातारः श्रीमदनिरुद्धप्रभृतयः ।"

(तं० आ० वि० खं० 6, पृ० 210)

एते साक्षादुपदेशेन किमस्य गुरवः, शास्त्रव्याख्यातृत्वेन वाऽऽदरार्थं "गुरवो मम" इत्युक्ता इति न निश्चेतुं शक्यते ।

~(10) (श्रीनाथीये शैवे)—भट्टभूतिराजपुत्रो भट्टेन्दुराजः । यथा—

"श्रीनाथसन्ततिमहाम्बरधर्मकान्तिः ।
श्रीभूतिराजतनयः स्वपितृप्रसादः ।"

(तं० आ० 37, 60)

(ख)

~शैवेतरेषु शास्त्रेषु——

(1) (भगवद्गीतासु)– —भट्टेन्दुराजः । यथा—

"भट्टेन्दुराजादाम्नाय विविच्य च चिरं धिया
कृतोऽभिनवगुप्तेन सोऽयं गीतार्थसङ्ग्रहः ॥"

(भ० गी० सं० पृ० 2)

~(2) (व्याकरणादौ)—व्याकरण-न्याय-साहित्यादावस्य पिता नरसिंहगुप्त एव गुरुः । यथा—

"पित्रा स शब्द-गहने कृतसम्प्रवेश-
स्तर्कार्णवोर्मि-पृषतामल-पूतचित्तः ।
साहित्य-सान्द्ररसभोगपरो महेश-
भक्त्या स्वयंग्रहणदुर्मदया गृहीतः ॥"

(तं० आ० 37, 58)

अलंकारशास्त्रस्य गुरुर्भट्टेन्दुराजोऽपि, नाट्यशास्त्रे च भट्टतौतोऽपीति सुविदितमेव सुधियाम् ।

~(3) (विविधेषु शास्त्रेषु)——श्रीचन्द्रशर्मादयः । यथा—

"श्रीचन्द्रशर्म-भवभक्ति-विलासयोगा-
नन्दाभिनन्दशिवशक्तिविचित्रनाथाः ।"

(तं० आ० 37, 62)

~तद्गोत्रम्——वंशपरम्परातोऽगस्त्यगोत्रः । यथा—

"शास्त्राब्धिचर्वणकलोद्यदगस्त्यगोत्रः ॥"

(तं० आ० 37, 38)

सिद्धपरम्परानुसारमप्यगस्त्यगोत्र एव।

~तद्ग्रन्थाः (क) टीकात्मकाः——

(1) (कालीनये)——क्रमकेलिः (इदानीमलभ्या)।

(2) (त्रिकसाधनाविषये)——पराशीशिकाविवरणम्।

(3) (प्रत्यभिज्ञाशास्त्रे)——(1) ईश्वरप्रत्यभिज्ञाविमर्शिनी, (2) ईश्वर प्रत्यभिज्ञाविवृतिविर्शिनी।

~(ख) मौलिकाः——

(1) (आगमशास्त्रविषये)—मालिनीविजयवार्तिकम्।

(2) (त्रिकसाधनाविषये)—(1) तन्त्रालोकः, (2) तन्त्रसारः।

(3) (नवं प्रकाशनम्)——पर्यन्तपञ्चाशिका।

(4) (शास्त्रप्रवेशप्रयोजनाः)—(1) अनुत्तराष्टिका, (2) परमार्थचर्चा, (3) परमार्थसारः (4) बोधपञ्चदशिका।

~(ग) स्तोत्रात्मकाः——(1) अनुभवनिवेदनस्तोत्रम् (2) क्रमस्तोत्रम्, (3) देहस्थदेवताचक्रस्तोत्रम्, (4) भैरवस्तोत्रम्।

~(घ) विनष्टा ग्रन्थाः——

(1) कालीनये)—क्रमकेलिः (क्रमस्तोत्रस्य व्याख्या)।

(2) (त्रिके)—(1) पूर्वपञ्चिका नाम्नी मालिनीविजयतन्त्रस्य पूर्वभागस्य व्याख्या, (2) लघ्वी-प्रक्रिया। यथा—

'अमुमेवाशयमाश्रित्य लघुप्रक्रियायां मयैवोक्तम्
ऊनाधिकमविज्ञातं ………… इत्यारभ्य
'……… दुःखानां नैमि पात्रताम्'—इत्यन्तम्।

(भ० गी० सं० पृ० 133)

(3) (प्रत्यभिज्ञाशास्त्रे)—(1) अजडप्रमातृसिद्धिविमर्शिनी, (2) ईश्वरसिद्धिविमर्शिनी, (3) शिवदृष्ट्यालोचनम्, (4) सम्बन्धसिद्धिविमर्शिनी।

(4) (न्यायशास्त्रे)——कथामुखतिलकम्। यथा—

"एतच्च मदीयादेव कथामुखतिलकाद् विततमवधार्यम्।"

(ई० प्र० वि० वि० खं० 3, पृ० 182)

द्र० गुरुनाथ परामर्शः प० 21। कथापदेनात्र वाद-जल्प-वितण्डाःग्राह्याः।

~(शास्त्रान्तरे)——प्रकीर्णकविवरणाख्यः कोऽपि ग्रन्थोऽभूदस्य। यथा—

इत्थं जडेन सम्बन्धे न मुख्या व्यर्थसङ्गतिः।
आस्तामन्यत्र विततमेतद्विस्तरतो मया।

(तं० आ० 10-44)

अन्यत्रेति—प्रकीर्णकविवरणादौ।

(तं० आ० वि० खं० 7, पृ० 33)

~(स्तोत्रकाव्ये)——

बहवस्तावत्स्तोत्रग्रन्थाऽऽचार्यस्य विनष्टाः। अतीव हृदयस्पर्शि मनोहरं च यद्विनष्टं स्तोत्रं तत्तु 'शिवशक्त्यविनाभावस्तोत्रम्।' तस्य केवलं पद्यद्वयमेव लभ्यते समुद्धृतं सद् गीतार्थसंग्रहे। यथा—

तव न काचन न स्तुतिरम्बिके
सकलशब्दमयी किल ते तनुः।
निखिलमूर्तिषु मे भवदन्वयो
मनसिजासु बहिष्प्रसरासु च॥
इति विचिन्त्य शिवे शमिताशिवे
जगति जातमयत्नवशादिदम्।
स्तुतिजपार्चनचिन्तनवर्जिता
न खलु काचन कालकलास्ति मे॥

(भ० गी० सं० पृ० 156)

अत्र मुद्रितेषु पुस्तकेषु यः पाठः
"तव च काचन न स्तुतिरम्बिके" इति,

असावपपाठः। चकारस्य तत्रानुपयुक्तत्वात्। तत्स्थाने नकारपाठ एव शोभनः। द्वौ नञावर्थपरिपोषकारौ यतः। काचन शब्दावली तव स्तुतिर्नास्तीति न सम्भवति। यतस्तव तनुः सकलशब्दमयीति। अत्रावधेयं सुधीभिः।

~(ङ) विनष्टनामानः——स्वकीयेषु तैर्नैवंविधेभ्योऽपि ग्रन्थेभ्य उद्धरणानि प्रदत्तानि येषां ग्रन्थानां नामोल्लेखो नैव कृतः। न च ते श्लोका विद्यमानेषु ग्रन्थेषु लभ्यन्ते यथा—

"यदुक्तं मयैव—
वेदान् वेद न वेद शाम्भवपदं दूयेत निर्वेदवान्
स्वर्गार्थी यजमानतां प्रतिजहज्जातो यजन् याजकः।
सर्वाः कर्मरसप्रवाहप्रसराः संवित् स्रवंत्योऽखिला-
स्त्वामानन्दमहाम्बुधिं विदधते ना प्राप्य पूर्णां स्थितिम्।"

(उद्ध० भ० गी० सं० पृ० 106)

(च) शास्त्रान्तरीयाः)——तेषु महत्वशालिनौ तावन् नाट्यशास्त्रटीका (अभिनवभारती), ध्वन्यालोकलोचनञ्च। केषाञ्चन् च नामोल्लेखमात्रं लभ्यते। अन्येऽपि केचन विद्यन्ते।

~दारपुत्राद्यभावः——यथा—

"दारात्मजप्रभृतिबन्धुकथामनाप्त॥"

(ई० प्र० वि० वि० खं० 3, पृ० 405)

~निवासस्थानम्——तस्य पूर्वजस्यात्रिगुप्तस्य गृहं श्रीनगरे वितस्तायास्तटे सितांशुमौलिमन्दिरस्य पुरतोऽभवत्। यथा—

"तस्मिन् कुवेरपुरचारुसितांशुमौलि-
साम्मुख्यदर्शनविरूढपवित्रभावे।
वैतस्तरोधसि निवासममुष्य चक्रे
राजा द्विजस्य परिकल्पितभूरिसम्पत्॥"

(तं० आ० 37, 52)

स्वीयं तस्य गृहं द्राक्षारामस्य मध्ये स्थितमभूद्यत्रासौ सिंहासनस्थः सन् शिष्येभ्यो ज्ञानविज्ञानदानं कुर्वन्नभूत्। वर्णितं च तद्गेहं दाक्षिणात्येन मधुराजेन गुरुनाथपरामर्शे सविस्तरम्। यथा—

"द्राक्षारामस्य मध्ये स्फाटकमणिमये मण्डपे चित्ररम्ये
पुष्पस्रग्धूपदीपैर्बहलपरिमले चर्चिते चन्दनाद्यैः।
वाद्यैर्गीतैः सनृत्तैः सततमुखरिते योगिनीसिद्धसंघै-
राकीर्णे स्वर्णपीठे मृदुतमविलसद्बद्धमुक्तावितान॥" इत्यादि

(गु० ना० प० पद्य 3)

अस्ति तावद् वर्तमानश्रीनगरस्य प्राचीनतरे भागे शारिकापर्वतस्योदीच्यां दिशि 'गत⌣--पूर' इति नाम्ना प्रसिद्धं स्थानम्। परं न तद् तस्तरोधसि वर्तते, अपि तु 'डल्' ह्रदात् प्रवहन्त्या महासरिदाख्यायाः ('मारी' इति लोकप्रसिद्धायाः) नद्या उभयोस्तटयोर् 'भौटकदल' समीपे। साम्प्रतमेषा सरिन् 'नालयि-अमिरखान' इत्युच्यते। एतत्सम्भाव्यते यत् कालान्तरेऽत्रिगुप्तस्य केचन वंशजास्तत्र गृहनिर्माणं विधायोपनिविष्टा इति। आचार्य उत्पलदेवस्तत्र 'गत⌣-पूरे' न्यवसदिति श्रूयते श्रीनगरे वृद्धजनपरम्परासु। सम्भाव्यते यदुत्पलदेवस्य काले ततः प्रागेव वा गुप्तवंशीया विद्वांसो यदा बहुसंख्यया तत्रैव निवासं कृतवन्तस्तदाप्रभृति स्थानं तद् "गुप्त-पुरम्' इति नाम्ना ख्यातमभवत्। तदेव च लोके 'गत⌣पूर' इति देशभाषायामुच्यते, इति। अपरञ्च—सप्तदशे शतके साहिब्कौलानन्दनाथेन तात्कालिक काश्मीरभाषायां यदात्मचरितं लिखितमभूत् तस्य मातृकातः इदं ज्ञायते यत्तत्रैव 'गत⌣पूरे' पुरा वसुगुप्तोत्पलदेवाभिनवगुप्तप्रभृतयः शैवदर्शनाचार्या न्यवसन्निति। यथा—

"काबोलपुरि गेलीकदल सावसीत्, भियि डियो खुशालसरि यत् मञ्जिमि वति गुलशन कुनो खसीथ्, गोल थलन बागरयित्, पासीपूरिस् अपोरो तरिथ्, मुटकदल प्यठियि तरियित् मेव बाग मधुरो मुटन हुन्दो, आथि मुटिञि राछि, मुटि वदन शूभवञि छुटि छुटि तिम मुटनरयित्, भागवानपूरि वाती गुतपूर केन ओक्षेत् लालबाजार यित, गुतपूरि कियि गुरो कम् कस् वञिज़े, यति तिम मुक्ती गोर वरयित्, वसुगुप्त निंशेत् तिम महापुरुष, आयस् शोमानन्द जू तिहिन्दी सोदुम श्रीभट्ट परनाम घारिथ, शिवदृष्टि इत्यादिक नानाशास्तर करीथ् कासोन् वोन्दुक अन्धकार, अद् अपनोख अभिनवगुप्त आचारी, वुज़ित् गव भैरव वरयित्, कम कम ग्रन्थ, न कम शास्तर कियि करिथ आयस ⁚ ·········॥"

(ज० च० सा० पृ० 61-62)

एताः पुरातन कश्मीरीय भाषा पङ्क्त्यो यथा मातृकापृष्ठयोर्दृष्टास्तथावतारिताः सन्ति।

तन्त्रालोकस्य रचना तेन मन्द्रस्य प्रार्थनया वत्सलिकावितीर्णे तस्या गृहे कृता। यथा—

"मन्द्रः स्वके पुरवरे स्थितिमस्य वव्रे।"

(तं० आ० 37, 72)

"इत्थं गृहे वत्सलिकावितीर्णे············।"

(तदेव 37, 82)

~योगिनीभूः——रहस्यचर्यात्मके कौलयागविधावेव योगिनीभुवः सुतस्य मातृगर्भे आधानं भवति, नान्यत्र। अभिनवगुप्तस्य पिता नरसिंहगुप्तस्त्वेकतो भट्टभूतिराजशिष्यः, तेनासावामर्दसन्तत्यनुयायी, न कौलोपासकः। अपरतश्चसावतीव विरक्तचित्तः सन् न भुक्तिकामः। कौलमार्गः पुनर्भुक्तिमुक्ति कामानामेव प्रियः। ततः कथमतिविरक्तात् पितुर्जातस्याभिनवगुप्तस्य योगिनीभूत्वमिति संशयित एवायं विषयो जयरथेनोत्थापितः— तथा हि—

"श्रीभूतिराजवदनोदितशम्भुशास्त्रः।"

(ई० प्र० वि० वि० खं० 3, पृ० 405)

"तारुण्यसागरतरङ्गभरानपोह्य-
वैराग्यपोतमधिरुह्य दृढं हठेन॥"

(तं० आ० 37, 55)

इत्युक्तमस्ति नरसिंहगुप्तस्य विषये।

~वेषभूषाकृतिप्रभृति (तस्य)——स्पष्टमुक्तमत्र विषये मधुराजेन यथा—

"आनन्दान्दोलिताक्षः स्फुटकृततिलको भस्मना भालमध्ये
रुद्राक्षोल्लासिकर्णः कलितकचभरो मालया लम्बकूर्चः।
रक्तांगो यक्षपङ्कोल्लसदसितगलो लम्बमुक्तोपवीतः
क्षौमं वासो वसानः शशिकरधवलं वीरयोगासनस्थः॥
जान्वासक्तैकहस्तः स्फुटपरमशिवज्ञानमुद्राक्षसूत्रो
वामश्रीपाणिपद्मस्फुरितनखमुखैर्वादयन्नादवीणाम्।"

(गु० ना० प० 5-6)

~शिष्याः (तस्य)——

(क) अतिप्रियास्तस्य शिष्यास्त्रयो येषां नामोल्लेखोऽनेकेषु ग्रन्थेषु तेन कृतः। ते च (1) मनोरथगुप्ताख्यस्तस्यानुजः, (2) कर्णः, (3) मन्द्रः, इति।

(ख) प्रियशिष्यास्तस्य बहवो येषां नामोल्लेखस्तेन तन्त्रालोके सप्तत्रिंश आह्निके 64 तः 69 यावत्कारिकाभिः कृतः। केषामपि प्रशंसापि कृता तत्र। ते च शिष्याः—क्षेमगुप्ताद्याः पञ्च—पितृव्यतनयाः। तेषां परिचयः सम्बन्धिषु प्रदत्तोऽग्रे। 6—शौरिः (वत्सलिकायाः भ्राता), 7—रामगुप्तः, 8—लुम्पकः, 9—अभिनवः (अपरः), 10—वत्सलिका, 11—अम्बाचेति।

(ग) तस्य प्रसिद्धतमः शिष्यः क्षेमराजः। असौ बहुधा स्वात्मानं तस्य शिष्यं कथयति। मधुराजेन तस्यैव प्रधानशिष्यत्वं सूचितं गुरुनाथपरामर्शे। परमाचार्येण तस्य नाम न क्वापि संकीर्तितम्। अनुमीयते यत्तस्यात्यन्तमभिमानित्वं, भट्टकल्लटादिपूर्वगुरुविद्वेषित्वं च लक्षयन्नेवाचार्यस्तदुपरि न प्रसन्नोऽभूत्, अत एव तस्य नामकीर्तनं न क्वापि कृतमिति। यश्च पितृव्यतनय आचार्यस्य क्षेमो, असौ क्षेमगुप्तो, न क्षेमराजः:। क्षेमराजो नैव गुप्तवंशीयः। तस्य सम्बन्धो भूतिराजादित्यराजादीनां वंशेनासीन्न गुप्तवंशेनेति प्रतिभाति।

~सम्बन्धिनः (तस्य)——(क) (पूर्वजाः)——

कान्यकुब्जदेशनिवासिनोऽगस्त्यगोत्रीया विद्वांसो ब्राह्मणा अस्य पूर्वजाः। तेषां वंशे अत्रिगुप्तनामा कोऽपि सकलशास्त्रवित् पण्डितोऽभूद् यं कश्मीरनरेशो ललितादित्यः स्वकीयं देशं सादरं नीतवानष्टमे ख्रीस्ते शतके, तत्र चावासवृत्तिप्रभृतिप्रबन्धेन ससत्कारं तं

सुवासितवान् । तस्यैव वंशे तत्र जातोऽभिनवगुप्तः । अनुमीयते यद्वसुगुप्तो लक्ष्मणगुप्तश्चापि तद्वंशीयावेव । यतो नान्यस्य कस्यापि गुप्तवंशस्य परिचयस्तात्कालिके कश्मीरदेशे लभ्यते ।

~वर्णस्तेषाम्)——गुप्ताह्वया अभिनवगुप्तस्य पूर्वजा नैव वैश्या अपि तूत्कृष्टतरा ब्राह्मणाः । प्राचीनेषु युगेषु ग्रामशताध्यक्षस्य प्रशासनतन्त्रीयं नाम 'गोप्ता' इत्यभूत् । अत्रिगुप्तस्य कश्चन पूर्वजस्तथाविधः सुयोग्यः प्रभावशाली च गोप्ताऽभूद् येन तद्वंशीया अग्रे सर्वेऽपि 'गोप्ता' इत्युपनामभाजोऽभवन् लोकप्रसिद्धौ । तथाविधो गोप्तैवात्रिगुप्तः । 'गोप्ता' इत्यस्य पदस्यैव लौकिके प्रयोगे विकृतिरूपतामायाते सति 'गुप्तः' इति रूपं लोके प्रचलितम् । तत एवासावत्रिगुप्त इति । एवंविधा एव गुप्तोपनामानो विद्वांसो ब्राह्मणा अन्येऽप्यासन् । तद्यथा—चाणक्यो विष्णुगुप्तः, गणितशास्त्रगुरुर्ब्रह्मगुप्तः । समुद्रगुप्तस्य पिता चन्द्रगुप्तः । असावपि मूलतो ब्राह्मण एवाभूदिति तर्क्यते तद्वंशस्य वाकाटकवंशेन साकं वैवाहिकसम्बन्धतः । ततोऽभिनवगुप्तस्य पूर्वजा ब्राह्मणाः । अत एवात्रिगुप्तस्य 'प्राग्र्यजन्मा' इति विशेषणम् । उक्तं यथा—

"अन्तर्वेद्यामत्रिगुप्ताभिधानः प्राप्योत्पत्तिं प्राविशत् प्राग्र्यजन्मा ।
श्रीकश्मीरांश्चन्द्रचूडावतारैर्निःसंख्याकैः पावितोपान्तभागान् ॥"

(प० त्री० वि० पृ० 280)

सिद्धपरम्परानुसारं ते अश्वत्थपुरे वसन्ति स्म कान्यकुब्जदेशे ।

(ख) (समीपसम्बन्धिनः)——

अस्य पितामहो—वराहगुप्तः; पिता—नरसिंहगुप्तः (चुखलकेत्यथवा भिन्नभिन्नमातृकापाठानुसारं चुखुलकेति वा, चुखलेति वा प्रसिद्धनामान्तरः); माता—विमलकला; कनीयान् भ्राता—मनोरथगुप्तः; पितृव्यतनयाः पञ्च—क्षेमगुप्तः, उत्पलगुप्तः, अभिनवगुप्तः (अपरस्तन्त्रवटधानिकायानिर्माता), चक्रगुप्तः, पद्मगुप्तश्चेति; भगिनीप्राया-अम्बा । तस्या भ्रातरौ लुम्पकोऽभिनवश्चेति । अनुमानतस्त्वेतेऽप्येतेऽभिनवगुप्तस्य पितृव्यतनया वा मातुलादितनया वा । सर्वमेतद् विस्तरतो वर्णितं स्वयमेवाचार्येण । दृश्यताम् (तं०आ० 37, 65 तः 81 कारिकाः ।*

~साधनाक्रमः (तस्य)——अभिनवगुप्तस्य गुरुपरम्पराप्राप्तः साधनाक्रमस्तु त्रिकक्रम एव । तत्रापि विशेषतः शाम्भवशाक्तोपायौ । सूचितं तेन शाक्तोपायात्मकयागविषये—

"अलं वातिप्रसङ्गेन भूयसातिप्रपञ्चिते ।
योग्योऽभिनवगुप्तोऽस्मिन्कोऽपि यागविधौ बुधः ॥"

(तं० आ० 4, 278)

शाम्भवविषयेऽप्युक्तम्—

"तदस्मिन् परमोपाये शाम्भवाद्वैतशालिनि ।
केऽप्येव यान्ति विश्वासं परमेशेन भाविताः ॥

(तं० आ० 3, 288)

त्रिकक्रमस्यैव सर्वोत्कृष्टत्वं तेन स्वीकृतम्—(तं० आ० 1, 18) । अभिनवगुप्तः कौलसाधनाभ्यासेऽपि रुचिमानासीत् । तत्र प्रमाणानि—(1) गुरुनाथपरामर्शे तस्य वृतीद्वयं वर्णितमस्ति (गु० ना० प० 4), (2) कौलाचारे सिद्धहस्तं श्रीशम्भुनाथं पुनः पुनः स्मृतवान् स्वेषु ग्रन्थेषु, (3) तस्य त्रिकसाधनापरम्परायामुत्पलदेवः, सोमानन्दो, भट्टकल्लटश्चेति त्रयोऽपि गुरुवर्गीयाः सिद्धाः कौलसाधनायामपि निष्णाता अभूवन, (4) तन्त्रालोकस्यारम्भे त्र्यम्बकमठिकागुरुभिः साकमेव कुलप्रक्रियागुरुः श्रीमच्छन्दनाथस्तेन नुतः—(तं० आ० 1, 7) । परं तथापि नासौ मन्दादरः श्रौतस्मार्ते लोकधर्मे । एतच्च तस्य 'लम्बमुक्तोपवीत.' इति विशेषणेन (गुरुनाथपरामर्शस्थेन) सूच्यते । गीतार्थसंग्रहेऽप्युक्तं तेन—

वेदादन्यस्य स्वधर्मनिश्चायकत्वाभावात् ।"

(भ० गी० सं० पृ० 23)

तेन कुलादपि त्रिकस्योत्तमत्वं प्रतिपादितम्—

"अस्येदानीं त्रिकार्थस्य यदुक्तं 'कुलात्परतरं त्रिकम्' इति सर्वोत्तरत्वमनुत्तरत्वं तन्निरूपयति ॥"

(प० त्री० वि० पृ० 251)

~समुदाचारः (तस्य)——शास्त्राभ्यासे रममाणः शिवशक्तिमयताया रसस्यास्वादचमत्कारेण माद्यन्, लोकव्यवहारमगणयन्, शास्त्रतत्त्वज्ञानं च सर्वतो विचिन्वत्, शाक्तशाम्भवरसावेशरसं समास्वादयन्नसौ जिज्ञासूनां ज्ञानविज्ञानपिपासाः प्रशमयन्, स्वातन्त्र्येण च विहरन् सारस्वतलोकोपकारायाप्रलयान्तं तिष्ठतां विविधानां ग्रन्थानां निर्माणं कुर्वञ्जीवनं व्यतीतवानत्र लोके-—

"भक्त्या स्वयंग्रहणदुर्मदया गृहीतः ॥
स तन्मयीभूय न लोकवर्तनीम्
अजीगणत् कामपि केवलं पुनः ।
तदीयसम्भोगविवृद्धये पुरा
करोति दास्यं गुरुवेश्मसु स्वयम् ।"

(तं० आ० 37, 58-59)

~समुद्धृतपद्यानि (तस्य)——इदानीमलभ्येभ्योऽज्ञातनामभ्यश्च ग्रन्थेभ्यः समुद्धृतानि— यथा कानिचित् संगृहीतान्यध:—

"यन्मया स्तुतम्—

आत्मन्येव न मामि नाम विसरद्रोमाञ्चरेखाङ्कुर—
क्रान्त्या किञ्चिदणीयसीरपि दिशो जानामि रुन्धे हठात् ।
यन्मे भैरव भैरवेति रटते हृद्ग्रन्थिविस्फोटन-
त्रुट्यत्पाशवपाशपञ्जरभरः कायोऽपि मोक्षायते ॥"

(ई० प्र० वि० वि० खं० 2, पृ० 137)

"आभासप्रतिभासतद्विरहयोश्चित्रात्मनोदञ्चला
स्वातन्त्र्यादवभास्वरस्वपुषोस्त्यक्तक्रमं या स्थितिः ।
तत्संवेदनसागरस्य विलसच्चन्द्रार्घंश्शोभामृतो
रूपं भावनिभातृतामयमहं नित्योदितं संस्तुवे ॥"

(ई० प्र० वि० वि० खं० 3, पृ० 23)

"यदुक्तमनेनैव—

इत्यागमं सकलशास्त्रमहानिधाना-
च्छ्रीशम्भुनाथवदनादधिगम्य सम्यक् ।
शास्त्रे रहस्यरससंततिसुन्दरेऽस्मिन्
गम्भीरवाचि रचिता विवृतिर्ममेयम् ।।"

(तं॰ आ॰ वि॰ खं॰ 1, पृ॰ 42)

कस्मिन्नाम शास्त्रे विरचितासौ विवृतिरिति न ज्ञायतेऽधुना ।

"यन्ममैव—

जलात्-स्फूर्जज्ज्वालाजटिलवडवावह्निनिवहः
सुधाधाम्न; पूर्णादिभरदनदम्भोलिदलना ।
विकल्पादैश्वर्यप्रसरसरणेः संसृतिदरः
कियच्चित्रं चित्रं हतविधिविघातात् प्रसरति ।।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 3, पृ॰ 155)

"तदुक्तं मयैव—

कर्तृ कर्मोभयश्लेषशालिना येन तु क्रियाम् ।
कर्ता करोति करणं तत्··················।।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 2, पृ॰ 253)

"यद्विज्ञप्तं मया—

ब्रह्मादि कीटान्तमनन्तकं यल्लोकत्रये वेदकचक्रवालम् ।
तद् द्वैतदृष्ट्यैव स्ववर्णमित्थं तदीयचक्षुर्युगलं व्यनक्ति ।।
इत्थं विमृश्याहमनन्तशक्ति विश्रान्तधीर्द्वैतदृशं जिहासुः ।
त्वद्भक्तिसन्दर्शितशुद्धमार्गे निरर्गलीभावितभूरिभावः ।।
समं समग्रोद्गतवेदनाख्यविन्दुस्थनेत्रान्तरशोभमानम् ।
भवन्तमन्तःकृतविश्वरूपमद्वैतदृष्टि शिव संश्रितोऽस्मि ।।
यत्तत्परं धाम यदन्यधामविध्वंसनाधायि ···········।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 3, पृ॰ 350)

"मयापि व्याख्यातमेतत्-

संसारजीर्णतरुमूलकलापकल्प-
सङ्कल्पसान्तरतया परमार्थवह्नेः।
स्युर्विस्फुलिंगकणिका अपि चेत्तदन्त-
र्देदीप्यते विमलबोधहुताशराशिः ।।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 3, पृ॰ 183)

अभिनवगुप्तविशेषः——अयं सम्भवतो मूख्यस्याभिनवगुप्तस्य पितृव्यतनयो यस्य नाम तेन तन्त्रालोके निजशिष्यमध्ये परिगणितम् । अयमेव निर्माता तन्त्रवटधानिकायाः, तत्र पुष्पिकायाम् अभिनवगुप्ताचार्यविशेषविरचितत्वं यतः प्रतिपादितम् । तद्यथा—

"इति श्रीमंदभिनवगुप्ताचार्यविशेषविरचितायां तन्त्रवटधानिकायां तृतीयमाह्निकम् ।।"

(तं॰ व॰ धा॰ पृ॰ 90)

अभिनवगुप्तः(द्वितीयः)——तन्त्रवटधानिकायाः प्रणेता ॰ 'अभिनवगुप्तविशेषः—इति ।

अभिनवभारतीनिर्माणकालः——ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्याः प्रागेव निर्मिताभिनवभारती यतस्तत्र विवृतिविमर्शिन्यामभिनवभारत्या उल्लेखः पंक्तिसमुद्धरणं च—यथा—

"यदभिनवभारती-—

'प्रभुपरिचयाद्धर्मं धैर्यं धियं च पराक्रमं
परिजनजनो धत्ते नास्य स्वकं स्फुरितं क्वचित् ।
रजनिशरणाः शोच्यत्यं ये तमोभिरशिश्रय-
न्नहरभिसृताः पश्यैते किं भवन्ति मुहूर्तकाः ।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 3, पृ॰ 138)

"तच्चोत्पन्नं सुखदुःखादि तैः साक्षात्क्रियते, अन्यग्राहकवत्संवेद्यते, यथोक्तमभिनवभारत्याम्—"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 1, पृ॰ 48)

अभिनवशैवदर्शनम् ——
द्र॰ 'नूतनशैवदर्शनम्-—इति ।

अभिनिवेशः——सत्येवाऽसत्ये वा वस्तुनि दृढतरो यो विश्वासोऽसावभिनिवेशः, स एव सदसत्कर्मसु प्रवृत्तिकारी जनानाम् । स च द्विप्रकारकः—सदभिनिवेशोऽसदभिनिवेशश्चेति । तत्र योगभाष्यकृताऽसदभिनिवेश एव प्रतिपादितो मरणत्रासश्च तदुदाहरणतया समुपात्तः । अग्रे गतानुगतिकतया सर्वे मरणत्रासमात्रमभिनिवेशतया प्रतिपादितवन्तः । परमाचार्याभिनवगुप्तेनोभयविधोऽसौ व्याख्यातः । यथा—

"ननु यद्यत्र नाभिनिवेशस्तर्हि किमियता प्रबन्धेनोच्यते ।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 2, पृ॰ 429)

~ असद्रूपः——यथा—

(क)—"वेद्यप्रतिविम्बनवती वा बुद्धिरभिनिविश्यते—अन्तरहं वेद्भि, दुःख्यहमिति, चिन्ताद्यवस्थ्यासु ।"

(तदेव खं 2, पृ॰ 205)

(ख)—"अभावसमाधौ च यद् व्योमकल्पनात्मरूपमिवाभाति, तदनुस्मर्यमाणत्वेन वेद्यं सदहमिति आत्मत्वेन स्वातन्त्र्येणाभिनिविश्यते, उच्छ्वसिमि, निःश्वसिमि, इत्यत्र प्राणो वायुकल्पः, बुभुक्षे पिपासामि इति प्रत्यये, मन्युज्वलनादौ च स एव तेजः समुपबृंहितः । अन्तरहं वेद्मि, सुखी, दुःखी, मूढोऽहम् इत्याद्यवस्थासु, स्वच्छसलिलाशयसदृशी बुद्धिः, कृशः, स्थूलो, गौरोऽहम् इत्यादौ शरीरमेव पृथ्वीप्रायम् ।"

(तदेव खं॰ 3, पृ॰ 394)

(ग)—"तथाविधमेव नु सदहमिति संविद्रूपताभिनिवेशस्थानं सम्पादितमप्रशान्तजडभावमेव ।।"

(तदेव पृ॰ 206)

(घ)—"नन्वचिद्रुपत्वादनात्मा यदि शून्यादिस्तदात्मतयासावभिनिविश्यमानश्चिद्रूप एव··········।"

(तदेव पृ॰ 206)

(ङ)—"तदत्र विवरणकारैर्दुरभिनिवेशवशेन विप्रतारितो जनः।"

(तदेव खं 3, पृ० 405)

बद्धानां जीवानामेवम्प्राया अभिनिवेशा भवन्ति।

~ सद्रूपः——यथा—

(क)—"तेनैव कर्तृताद्वारेण देशकालधर्माकारा-नवच्छिन्न-बोधस्वभावत्वमभीतितल्लक्षणीयाभिमुख्येन निविशते अभिनिवेश्यते—अभिनिवेशपूर्वकं प्राप्यते—इति द्विकर्मकं वा तथाभिनिवेश्यमानं विश्वात्मकत्वं यतो बोधस्य।"

(तदेव खं० 3, पृ० 330-31)

(ख)—"श्रीमत्सादाख्यपदात् प्रभृत्याक्रिमि यो मातृवर्गस्तदधिष्ठातृ यदहमिति रूपं, तदेवात्मतया मुक्तोऽभिनिविशते।"

(तदेव खं० 3, पृ० 394)

मोक्षमार्गपराणामेवंविधा अभिनिवेशा भवन्ति। असद्रूपाः पुनर्मरणत्रासाद्याः सुखदुःखाद्यभिमननसहाया वा।

अभिन्नत्वम्——स्वरूपविशेषावच्छेदरहितत्वम्।
यथा—

"स्वरूपविशेषायोगेन चाभिन्नत्वम्"

(ई० प्र० वि० वि० खं० 1, पृ० 136)

अभिलापः——नामरूपसम्भेदेनार्थस्य विमर्शनमभिलापः। शब्दविमर्शसम्भिन्नोऽर्थविमर्शो यः सविकल्पज्ञाने चकास्ति। यथा—

"अभिलप्यते—आभिमुख्येन विषयिविषयपरवशतात्यागेन बोधस्वातन्त्र्ये शब्देन च विषयस्य तादात्म्यापादनेन व्यक्तया प्रमातृसात्कार पर्यन्ततयोच्यते परामृश्यते येन सोऽभिलापः, आन्तरशब्दन-लक्षणः सञ्जल्पः।"

(ई० प्र० वि० वि० खं० 1, पृ० 115)

~ द्विप्रकारः——शुद्धः परिपूर्णश्च योऽहमिति विमर्शः सोऽपि सूक्ष्मतरशब्दनात्मकत्वेनाभिलाप एव। परं तत्रातद्व्यपोहन-पूर्विकायास्तन्निश्चयनक्रियाया अभावान्न विकल्पात्मकता। ततो निर्विकल्पोऽसावभिलापः शुद्धविमर्शात्मकपरावाग्रूपः। यथा—

"अहम्प्रत्यवमर्शो यः प्रकाशात्मापि वाग्वपुः।
नासौ विकल्पः, स ह्युक्तो द्वयाक्षेपी विनिश्चयः॥"

(ई० प्र० 1-6-1)

विकल्पे हि तद्रूपं घटादि निश्चीयतेऽतद्रूपं चाघटादि सर्वं निरस्यते, इति तद्रूपस्यातद्रूपस्य च द्वयस्यापि पूर्वमाक्षेपः क्रियते तदनन्तरमेव चातदो निरसनपूर्वकं तदो निश्चयो विधीयते। इत्थं विकल्पो द्वयाक्षेपी विनिश्चयः। स च शुद्धे परिपूर्णे चाहम्विमर्शे नास्तीत्यविकल्पोऽसावभिलापः परावाग्रूपः। अपरस्तु विकल्पात्मकोऽभिलापो मध्यमा-वैखरीमयः। मध्यगश्चाहमिदमिति भेदाभेद-विमर्शात्मकोऽभिलापः पश्यन्त्यात्मकः। तत्र विकल्पस्योन्मेषोन्मुख्य-सामात्रं न स्फुट उन्मेषः। ततस्तत्राप्यविकल्पतैव स्वीक्रियते।

~ सूक्ष्मतरः——अस्फुटतरा अङ्गुलिनिर्देशकल्पा विमर्शात्मिका कलना या निर्विकल्पज्ञानेऽपि वर्तते। यथा—

"इह तावच्चैतन्यस्यात्मभूतोऽङ्गुलिनिर्देशादि-प्रख्योऽभिलाप-योगोऽन्यथा बालस्य प्रथमव्यवहारे दृश्यमाने व्युत्पत्तिरेव न स्यात्……।"

(ई० प्र० वि० वि० खं० 1, पृ० 225)

~ स्थूलः——सांकेतिकशब्दसहायो विकल्पः। यथा—

"संवर्तिता हि शब्दभावना प्रसारेण विवर्त्यमाना स्थूलो विकल्पः, यथेदमित्यस्य प्रसारणा घटः, शुक्ल इत्यादिः, तस्यापि पृथुबुध्नोदराकारः, शुक्लत्वजातियुक्तगुणसमवायी इत्यादिः।"

(ई० प्र० वि० खं० 1, पृ० 230-31)

इत्यादिः=प्रसारणेति।

अभिलाषः——अणोरीश्वरेच्छोद्भाविता लोलिका। विषय-विशेषोन्मुख्यरहितोऽभिलाषः। आणवमलस्वभावविशेषः।
यथा—

"अभिलाषो मलोऽत्र तु।"

(स्व० तं० 4, 105)

" 'अभिलाष' इति अपूर्णमन्यतात्मा लोलिकारूपः"

(स्व० तं० उ० प० 4, पृ० 61)

द्र० 'लोलिका' चेति।

अभिव्यक्तिवाद:——परस्यैव तत्त्वस्य शक्तयो बहिर्मुखतया प्रतिबिम्बिताः सत्यो जगद्रूपतयाभिव्यक्ता भवन्तीति सिद्ध-सिद्धान्तः। यथा—

"सत एव चित्प्रकाशस्य तेन तेन आत्मनावस्थानमित्यभि-व्यक्तिवादिना सत्कार्यवाद उक्तो भवति।"

(शि० दृ० वृ० पृ० 165)

अभिषिक्तः (गुरुः)——
द्र० 'गुरुः' ~ अभिषिक्तः इति।

अभिषेकः——(1) सम्यक् प्रत्यभिज्ञातस्वरूपेण ज्ञानिना प्रबुद्धस्य साधकस्य गुरुत्वे प्रतिष्ठापनार्थं क्रियमाणः संस्कारविशेषोऽभिषेकः। तेन विधिनाभिषिक्तो महानुभावो दीक्षाकरणेऽधिकारी भवति।

(2) साधकस्य शिष्यस्य शैवयोगसाधनार्थं शिष्यत्वेन क्रियमाणो विधिरप्यभिषेक इत्युच्यते। दीक्षाङ्गभूतोऽयं विधिः। यथा—

"स्वभ्यस्तज्ञानिनं साधकत्वे गुरुत्वे वाऽभिषिञ्चेत्'॥

(तं०सा०पृ० 173)

"स्वभ्यस्तज्ञानिनं सन्तं बुभूषुमथ भाविनम्।
योग्यं ज्ञात्वा स्वाधिकारं गुरुस्तस्मै समर्पयेत्॥"

(तं०आ०23, 3)

~तदनधिकारिणः (यामलमते) ——यथा—

"न स्वयंभूस्तस्य चोक्तं लक्षण्ं परमेशिना।
अभक्तो जीवितधिया कुर्वन्नीशानधिष्ठितः ॥
पश्वात्मना स्वयंभूष्णुर्नाधिकारी स कुत्रचित्।
भस्माङ्कुरो व्रतिसुतो दुःशीलातनयस्तथा ॥
कुण्डो गोलश्च ते दुष्टा उक्तं देव्याख्ययामले।
पुनर्भूश्चान्यलिङ्गो यः पुनः शैवे प्रतिष्ठनः ॥"
(तं०आ०23, 8-10)

पुनर्भूरत्र दीक्षाविषये न जनिविषये।

अभिषेकद्वैविध्यम्———कश्चिच्छिष्यः साधकत्वेऽभिषिच्यते, कश्चिच्च दीक्षकत्वे। ततो द्विप्रकारोऽभिषेकविधिः। यथा—

"स एव मन्त्रजातिज्ञो जपहोमादितत्त्ववित्।
निर्वाणकलशेनादौ तत ईश्वरसंज्ञिना ॥
अभिषिक्तः साधकः स्याद्भोगान्तेऽस्य परे लयः ॥"
(तं०आ०15, 465-66)

द्र० (तं०आ०23,3)

द्र० 'अभिषेकः' इति।

अभिषेकविधिः———त्रिकशास्त्रोक्तः क्रियाकलापो येन संस्कृतः साधकः शिष्याणां दीक्षणकर्मण्यधिकारं लभते। सुविस्तरतो निरूपितः—(तं०आ०23, 17तः24) इत्यत्र। अन्यश्च विधिः शिष्यस्य समयदीक्षावसरे येनासौ शैव्यां साधनायामधिकारवान् भवति।

~कौले———गुरुरात्मानं ब्रह्मादिकारणषट्कमयं परमशिवमयं भैरवमयं च पश्यंस्तत्संस्कारसंस्कृतया दृष्ट्या शिष्यस्य सर्वाङ्गेष्वनुग्रहवर्षिणीं वृष्टिं पातयेद् इत्येष एव तस्य पूर्णाभिषेको विना तीर्थजलघटसमूहैः। यथा—

"षट्कं कारणसंज्ञं यत् तथा यः परमः शिवः।
साकं भैरवनाथेन तदष्टकमुदाहृतम् ॥
प्रत्येकं तत्स सार्वात्म्यं पश्यंस्तां वृत्तिमात्मगाम्।
चक्षुरादौ संक्रामयेद् यत्र यत्रेन्द्रिये गुरुः ॥
स एव पूर्णैः कलशैरभिषेकः परः स्मृतः।
विना बाह्यै रपीत्युक्तं श्रीवीरावलिभैरवे ॥"
(तं०आ०29, 233-35)

~क्रियाभेदतः———केवलमभ्यासेऽधिकाराय योऽभिषेकस्तत्र दीक्षकस्याधिकारार्पणस्य विद्याव्रतस्य चाभावोऽधिकञ्च तत्र साध्यमन्त्रार्पणादि। यथा—

"अधिकारार्पणं नात्र न च विद्याव्रतं किल।
साध्यमन्त्रार्पणं त्वत्र स्वोपयोगिक्रियाक्रमे ॥
समस्तेऽप्युपदेशः स्यान्निजोपकरणार्पणम् ॥"
(तं०आ०23, 102-3)

"साधकस्याधिकारार्थमक्षमालादि कल्पयेत्।
मन्त्रकल्पाक्षसूत्रञ्च खटिकां छत्रपादुके ॥
उष्णीषरहितं दत्वा प्रविश्य शिवसन्निधौ।
साध्यमन्त्रं ददेत्पश्चात्पुष्पोदकसमन्वितम् ॥
(उद्ध०तं०आ०वि०खं०10, पृ०305)

~निष्फलः———स्वभ्यस्तज्ञानरहितेन गुरुणा क्रियमाणाऽभिषेकक्रिया निष्फलैव भवति। नासौ परेषां मोचनायालम्। यथा—

"यो नैवं वेद नैवासावभिषिक्तोऽपि दैशिकः।
समय्यादिक्रमेणेति श्रीमत्कामिक उच्यते ॥
(तं०आ०23, 4)

~साधकविषये———यो विधिराचार्यपदेऽभिषेकस्य स एव हि साधकपदाभिषेकेऽपि मन्तव्यः। यथा—

"साधकस्याभिषेकेऽपि सर्वोऽयं कथ्यते विधिः ॥"
(तं०आ०23, 101)

अभिषेचकः——

द्र० 'गुरुः'~अभिषेकक्रृत् (अधिकारदृष्ट्या) इति।

अभिषेचनम्———अभिषेक एव विशेषकर्मणि। स च मलदाहादिक्रियाविध्यनुष्ठानजनितशरीरकार्श्यं सन्तापादिनिवारणार्थं गुरुणा मन्त्रोच्चारपूर्वकं विधेयोऽभिषेचनविधिः शिष्यस्य। यथा—

"मन्त्रशक्तिभिरुग्राभिः शोषनिर्दहनादिभिः।
शरीरं शोष्यते ताभिस्तदर्थमभिषेचनम् ॥
(स्व०तं०4, 450)

~मन्त्रः (तदुचितः)———स च 'वौषट्' इति। यथा—

"(क) अभिषेचनम् वौषट्कारेण।"
(ने०तं०उ०खं०2, पृ०75)

"(ख) तदुक्तं श्रीमदुच्छुष्मतन्त्रे—
वौषडन्तर्गतं मन्त्रमभिषेके नियोजयेत्"। इति
(ने०तं०उ०खं०2, पृ०75)

अभिषेच्यः———परेषां शिष्याणां दीक्षाकर्मण्यधिकारप्राप्तयेऽभिषेकक्रियासम्पादने पात्रभूतः साधकः।

~परीक्षणीयः———दीक्षाकाले शिष्यः सामान्यत एव परीक्षणीयः, परमाचार्यपदाभिषेककाले ज्ञानप्रदानसमर्थ एव साधकोऽभिषेचनीयः, क्रियादीक्षकत्वपदाभिषेके च शरीरजात्याविशेषविचारणमपि विधेयं, न तदीयक्रियादीक्षाकाले। तदेवमुक्तम्—

"उक्तं ज्ञानोत्तरे चैतद् ब्राह्मणः क्षत्रिया विशः।
नपुंसकाः स्त्रियः शूद्रा ये चान्येऽपि तदर्थिनः ॥
ते दीक्षायां न मीमांस्या ज्ञानकाले विचारयेत्।
ज्ञानमूलो गुरुः प्रोक्तः························ ॥
(तं०आ०23, 20-22)

साधकत्वे ये केऽपि शिवभक्ता दीक्षणीयाः, परमाचार्यपदे ज्ञानवानेव दीक्षणीय इति तात्पर्यम् ।

अभेदः——वस्तुतोऽभेद एव सर्वत्र, यतः सर्वेऽपि सृष्टिसंहारप्रपञ्चाः शिवमया एव, तत एते तस्य विश्वात्मकस्वरूपत्वेन स्थिताः । परमेश्वरो विश्वोत्तीर्णतायां केवलं प्रकाशरूपो, विश्वात्मतायाञ्च सर्वमयः । यथा—

"एवमस्य स्वतन्त्रस्य निजशक्त्युपभेदिनः ।
स्वात्मगाः सृष्टिसंहाराः स्वरूपत्वेन संस्थिताः ।"

(बो॰पं॰द॰9)

~**भेदावभासः**—(तत्र)——यद्यपि वस्तुतः परमशुद्धः परमेश्वर एवैकं तत्त्वं वास्तविकम् यद्यपि च निखिलं भावाभावजातं विश्वमपि वस्तुत स एव तथापि तदिच्छयैव मायाख्यया तच्छक्त्या भेदावभासनमपि स्वीकार्यमेव । तत एव गुरुशास्त्राभ्यासादीनां सप्रयोजनत्वं, स्ववचनविरोधाभावञ्चाद्वैते शैवदर्शने । यथा—

ननु शुद्धेतरत्वाख्यो यदि भेदो न वास्तवः ।
व्याचिकीर्षितमेवैतच्छास्त्रं विवदते ततः ॥
अशुद्धत्वं हि तत्त्वानां दीक्षया शोधनं ततः ।
इत्यादि बहुधा भेदप्रधानात्र यतः स्थितिः ॥
उच्यते नाद्वयेऽमुष्मिन् द्वैतं वास्त्येव सर्वथा ।
उक्तं हि भेदवन्ध्येऽपि विभौ भेदावभासनम् ॥

(मा॰वि॰वा॰1, 106तः 108)

अभेदार्थकारिकाः——इदानीमलभ्यमानः श्रीसिद्धनाथविरचितो दर्शनग्रन्थविशेषः । यथा—

"वस्तुतस्तु निर्नामिक एव सः । प्रोक्तञ्चैतत्सिद्धनाथेन अभेदार्थकारिकासु—

'वस्तुनो भावशून्यस्य स्वग्राह्यस्य निराकृतेः ।
कल्पनामात्रमेवैतद् यच्छिवव्यपदेशनम् ॥
नेत्थं विभोर्विवर्त्तोऽस्ति परिणामश्च न क्वचित् ।
अथवा द्वयमप्यस्तु तथाप्यस्य न खण्डना ॥

(स्प॰प्र॰पृ॰4)

द्र॰ च 'सिद्धनाथः' इति ।

अभेदभावना——निखिलस्याध्वनः स्वात्मपरशिवतया विकल्पनाभ्यासः । यथा—

"अनेन चानुजोद्देशोद्दिष्टमभेद-भावनाख्यमपि प्रमेयमासूत्रितम् ।"

(तं॰आ॰वि॰खं॰ 7/2, पृ॰96)

~**तत्फलम्**——अभेदभावनापूर्वकं पूजाभ्यासपाटवेन लोकव्यवहारेऽपि शिवभावभावना प्रचलत्येव साधकस्य । यथा—

"यथाहि वाहकटकभ्रमस्वातन्त्र्यमागतः ।
अश्वः संग्रामरूढोऽपि तां शिक्षां नातिवर्तते ॥
तथार्चनक्रियाभ्यासशिवीभावितकारकः ।
गच्छँस्तिष्ठन्नपि द्वैतं कारकाणां व्यपोज्झति ॥"

(तं॰ आ॰ 15, 149-51)

"विनापि ज्ञानयोगाभ्यां क्रिया न्यासार्चनादिका ॥
इत्थमैक्यसमापत्तिदानात्परफलप्रदा ।"

(तं॰ आ॰ 15, 154-55)

अभेदोपायः——शाम्भवोपायः । तत्र प्रमातुः स्वात्मन एव साक्षात्कारस्याभ्यासो विधीयते । यथा—

"अभेदोपायमत्रोक्तं शाम्भवं…………।"

(तं॰ आ॰ 1, 230)

द्र॰ 'उपायत्रयविशेषाः' इति ।

अभ्यनुज्ञानम्~लिङ्गोद्धारे——
द्र॰ 'लिङ्गोद्धारः अभ्यनुज्ञानेन' इति ।

अमाकला——

परावागात्मको नादरूपोऽकारो यः सर्वेषु वर्णेष्वन्तर्यामितया तिष्ठन् सर्वप्राणिषु तत्तद्वर्णरूपतया नदन्नवतिष्ठते सर्वत्र यथा—

योऽसौ नादात्मकः शब्दः सर्वप्राणिष्ववस्थितः ॥
अधऊर्ध्वविभागेन निष्क्रियेणावतिष्ठते ।

(तं॰ आ॰ 3, 113-14)

नादो हकारार्धार्धरूपिणी अमाकला यैव मुख्यया वृत्त्या सर्वत्रास्वरत्वेन व्यपदिश्यते ।

(तं॰ आ॰ वि॰ खं॰ 2, पृ॰ 119)

अकारः सर्ववर्णानामन्तर्यामितया स्थितः । इत्याद्युक्त्या—
…………हकारपर्यन्तं वा प्राणनरूपत्वेनावस्थितः ।"

(तं॰ आ॰ वि॰ खं॰ 2, पृ॰ 119-120)

हकारार्धो विसर्गस्तदर्धो ऽकारः इति ।

~**अपरा**——(1)हकारस्यार्द्धं=विसर्गः, तस्यार्द्धं—विन्दुः । तस्यैव रहस्यात्मिकागमिकी संज्ञा 'अमाकला'—इति । सैव परा जीवकला । यथा—

"हकारार्धार्धरूपिणी अमाकला, यैव मुख्यया वृत्त्या सर्वत्र अस्वरत्वेन व्यपदिश्यते ।"

(तं॰ आ॰ वि॰ खं॰ 2, पृ॰ 119)

स्वरातिरिक्तेन व्यञ्जनरूपेण विन्दुनेत्यत्र तात्पर्यम् ।

"अकारः सर्ववर्णानामन्तर्यामितया स्थितः ।"

(उद्ध॰ तं॰ आ॰ वि॰ खं॰ 2, पृ॰ 120)

"सैव हि परा जीवकला ।" परैव नावरेति ।

(तदेव)

सुसूक्ष्मरहस्यात्मकमिदं सिद्धयोगिभिरेव वेद्यं यथार्थतः ।

(2) चैतन्यात्मिका संवित् । सर्वेषामपि तत्त्वादीनां प्रकाशात्मकता या प्राकाश्यमिति कथिता । क्वचित् सा सप्तदशी कलापि

कथ्यते। सैव कुण्डलिनीत्रयरूपिणीति भण्यते। वस्तुनो ह्यसौ षोडशस्वरव्यापिनी परमेश्वरस्य पराशक्तिः। यथा—

"अमाख्यकलाकलास्वरूपस्फारसिद्धान्तविचारावसर इत्यर्थः।

तत्र हि—'कलाव्याप्तिर्महादेव पदसंज्ञा महेश्वर।
अतिसंक्षेपतो ब्रूहि·····'············॥"

· इति भगवत्या पृष्टे तन्निर्णयार्थं—'कला सप्तदशी यासौ···॥' इत्यादि भगवतोक्तम्। यदिह क्वच्छिब्दद्वारेण क्वचिदर्थद्वारेण च संवादितम्। तत्र 'पुरुषे षोडशकले तामाहुरमृतां कलाम्'।

अमृताकाररूपिणी येयं चिन्मात्रस्वभावा 'कौलिकीति परेति' ······हकारार्द्धार्द्धरूपिणी अमाख्या सप्तदशी कला, परस्यानन्दात्मनो विसर्गस्य उक्तत्वादपरस्य च हकारात्मनो वक्ष्माणत्वात् परापरो विसर्गः॥"

(तं० आ० वि० खं० 2, पृ० 141)

~परा——विश्वस्याप्यायनकारिणी सर्वाधारभूता संविस्कला। यथा—

"येयममा सह यौगपद्येन पञ्चदशानां कलानां वसनाद् अमावस्या—तद्व्यपदेश्येत्यर्थः। तिथौ पुनस्तदधिष्ठितत्वादौपचारिकस्तद्व्यपदेशः।"

(तं० आ० वि० खं० 4/1, पृ० 83)

यथा—

"कला सप्तदशी तस्मादमृताकाररूपिणी।
परापरस्वरूपबिन्दुगत्या विसर्पिता॥
प्रकाश्यं सर्ववस्तूनां विसर्गरहिता तु सा।
शक्तिकुण्डलिका चैव प्राणकुण्डलिका तथा॥
विसर्गप्रान्तदेशे तु परा कुण्डलिनीति च।
शिवव्योमेति परमं ब्रह्मात्मस्थानमुच्यते
विसर्गमात्रं नाथस्य सृष्टिसंहारविभ्रमाः॥
(उद्धरणं त्रिशिरोभैरवात्)

(तं० आ० 3, 138-141)

अमलसारकं—(कः)——न स्पष्टीकृतं मूले वा टीकायां वा। नामोल्लेखो बहुधा कृतोऽस्य। पीतवर्णः पिण्डविशेषोऽयं मण्डलविद्यावुपयोगीति प्रतीयते। यथा—

"········तदधोऽमलसारकम्।

(तं० आ० 31, 72)

"चत्वार्यङ्गुलान्यायतमामलसारकम्।"

(तं० आ० वि० खं० 12, पृ० 261)

"पीतमामलसारकम्।"

(तं० आ० 31, 82)

'अत्रैवामलसारकं वर्तयति।"

(तं० आ० वि० खं० 12; पृ० 268)

"भागं भागं गृहीत्वा तु उभयोरथ गोचरात्।
भ्राम्यं पिप्पलवत्पत्रं वर्तनैषा त्वधो भवेत्॥
षोडशांशे लिखेत्पद्मं द्वादशाङ्गुललोपनात्।"

(तं० आ० 31, 91-92)

"षड्गुलविस्तृतस्य अमलसारकस्याधः।"

(तं आ० वि० खं० 12, पृ० 269)

अमितः~प्रमाता——केवले निजप्राणदेहादावेव य आत्मताभिमानस्तेन रहितो विश्वं स्वशरीरतया पश्यन् प्रमाता। ते च (1) मन्त्रेश्वरादारभ्य शिवान्ताः शुद्धाः प्रमातारः, (2) प्रत्यभिज्ञातस्वात्मशिवभावाः प्रबुद्धाः सुप्रबुद्धाश्च योगिनः।

~कालस्पर्शाभाववान्——यथा—

"न तु यः 'सकृद्विभात'—इत्यनया वाचोयुक्त्या अविच्छिन्नभासनः प्रमाता संविद्रूपस्तस्य स्वात्मनि कालक्रमः। नापि तदपेक्षया वेद्ये भावजाते। तद्धि तत्राभेदेन भाति।" -

(ई० प्र० वि० खं० 2, पृ० 20)

अमृतकन्दलम्——अमृतम्=विन्दुः, कन्दलम्=अर्धचन्द्रः। यथा—

"अमृतमशेषविश्ववेद्याभेदवेदनात्मा विन्दुः, कन्दलमर्धचन्द्रः।"

(ने० तं० उ० खं० 1, पृ० 51)

अमृतप्राप्तिः——उद्यमाख्येनोपायेन शिवेन साकमात्मनोऽभेदस्य साक्षादनुभवः।

द्र० 'आत्मनो ग्रहः' इति।

अमृतम्——(1) सकारः। यथा—

"अमृतं सः।"

(तं० आ० वि० खं० 12, पृ० 197)

(2) संवेदनं विषयस्य, संवेद्यमानतामापन्ना वा विषयाः। यथा—

"उक्तेन प्रकारेणोल्लसितमेतन्नीलसुखाद्यात्मना चिरस्य लब्धप्ररोहममृतम्।"

(तं० आ० वि० खं० 3, पृ० 370)

(3) व्याख्यातं जयरथेन। यथा—

"आप्यायकारि धातुविशेषः, इति"

(तं० आ० वि० खं० 3, पृ० 370)

तच्च संवेदनरूपमेवात्र भवितुमर्हतीति तर्क्यते।

(4) बिन्दुः। यथा—

"अमृतम्—अशेषविश्ववेद्याभेदवेदनात्मा बिन्दुः।"

(ने० तं० उ० खं० 1, पृ० 51)

अमृतबीजम्——"सौः" इति बीजमन्त्रः। एष एव परा-

बीजमित्युच्यते । 'हृदयबीजम्, हार्दबीजम्',—इत्यादीन्यप्यस्य नामान्तराणि । यथा—

"चतुर्दशयुतं भद्रे तिथीशान्तसमन्वितम् ।
तृतीयं ब्रह्म सुश्रोणि हृदयं भैरवात्मनः ॥"
(प० त्री० 9-10)

चतुर्दशः औकारः, तिथीशान्तो विसर्गः, तृतीयं ब्रह्म सकारः, इति ।

"सार्णेन त्रितयं व्याप्तं त्रिशूलेन चतुर्थकम् ।
सर्वातीतं विसर्गेण पराया व्याप्तिरिष्यते ॥"
(मा० वि० तं० 4, 25)

सार्णः सकारः, त्रिशूलमौकार, इति ।

"कालाग्निमादितः कृत्वा मायान्तं ब्रह्मदेहगम् ।
शिवो विश्वाद्यनन्तान्तः परं शक्तित्रयं मतम् ॥"
(प० त्री० वि० 21)

"कालाग्नेर्धरातत्त्वादिभुवनान्मायातत्त्वं यावद् ब्रह्मणः सकारस्य देहे, विश्वभुवनाद् विद्यातत्त्वादेरारभ्य यावत् शिवोऽनाश्रित शक्तिरूपः, अनन्तस्य-अकारस्य, अन्तः परं विसर्गात्मकं शक्तित्रयं, तच्च परम्, उक्तञ्च 'सार्णेन' इत्यादि ॥"
(प० त्री० विं० पृ० 255)

द्र० 'हृदयबीजम्' इति ।

अमृतवर्णः——(1) सकारः । 'सौः' इति पराबीजस्याद्यो वर्णः । यथा—

"इति पराबीजगतस्यामृतवर्णस्यापि तत्त्वं दर्शितम् ।"
(तं० आ० वि० खं० 3, पृ० 457)

(2) सकारो वकारश्चापि । यथा—

"स्वा इत्यमृतवर्णेन · ··।"
(तं० आ० 15, 440)

"अमृतवर्णेनेति सवयोराप्यायकारित्वात् ॥"
(तं० आ० वि० खं० 9, पृ० 223)

"सोमं चामृतनाथं च सुधासारं सुधानिधिम् ।
सकारं षड्रसाधारं नामभिः परिकीर्तितम् ॥"
(उद्ध० तं० आ० वि० खं० 2, पृ० 164)

"तत एव सकारेऽस्मिन् स्फुटं विश्वं प्रकाशते ।
अमृतं च परं धाम योगिनस्तत् प्रचक्षते ।"
(उद्धृ० तदेव खं० 3, पृ० 224)

"अमृतं स ।"
(तदेव खं० 12, पृ० 197)

~तच्चतुष्कम्——ऋ, ॠ, ऌ, ॡ, इति षण्ठवर्णचतुष्कमप्यमृतवर्णसंज्ञया प्रसिद्धम्, लौकिकसुखेषु महाशून्यात्मकस्वात्मविश्रान्तिसामान्यात् । यथा—

"लौकिकसुखादिषु चैवंविधैव विश्रान्तिरानन्दरूपेति, तदेवामृतबीजचतुष्कमित्युक्तम् ॥"
(प० त्री० वि० पृ० 174)

साधनारहस्यसंकेतोऽयं कश्चन ।

वर्णचतुष्टयमेतन्न वर्णान्तरसृष्टौ प्रवृत्तम्, अपि तु स्वात्मन्येव विश्रान्तत्वेनामृतवर्णचतुष्टयम् । यथा—

"आत्मन्येव च विश्रान्त्या तत्प्रोक्तममृतात्मकम् ।"
(तं० आ० 3, 92)

"इच्छाशक्तेरतः प्राहुश्चातूरूप्यं परामृतम् ।"
(तं० आ० 3, 81)

~तदभिव्यक्तिः (चर्यायाम्)——चर्याक्रमाभ्यासिनां महायोगिनां शक्तिसङ्गमक्रियायामादावन्ते विरामे च सीत्कारादिध्वनिश्रवणसमकालमेव सकारस्यानवच्छिन्नानन्दाभिव्यञ्जकत्वमनुभवविषयतामायाति । यथा—

"क्षोभाद्यन्तविरामेषु तदेव च परामृतम् ॥
सीत्कारसुखसद्भावसमावेशसमाधिषु ॥"
(तं० आ० 3, 166-67)

सकारस्य विषय उक्तमेतदमृतवर्णत्वमिति ज्ञेयम् ।

तत्र क्षोभारम्भे सीत्-कारादिध्वनिः, क्षोभान्ते परमसामरस्यपदे सुखस्य सद्भावः, विरामे समुच्छलने च ब्रह्मभावसमावेशो यः स एव परः समाधिः । रहस्यमयाभ्यासविशेषोऽयं न स्फुटं क्वापि प्रतिपाद्यते । नास्याधिकारिणः क्वापि लभ्या इदानीम् ।

द्र० 'हृदयबीजम्' इति ।

अमृतवाग्भवाचार्यः——अद्वैतशैवदर्शनस्याधुनिको गुरुः । तेन प्रवर्तिता शैवदर्शनविद्या "नूतनं शैवदर्शनम्" (NEO-SAIVISM) इत्युच्यते । एते महाभागाः काशीनिवासिनां कौण्डिन्यगोत्राणां विद्यातपोधर्मनिष्ठानां वैदर्भब्राह्मणानां कुले प्रयागपुरे 1960 वैक्रमे, तदनुसारं 1903 ई० वत्सरे समुत्पन्नाः । वैद्यनाथ 'वरकले' इति तेषामभिधानमभूत् । वाराणस्यां संस्कृतमहाविद्यालये Queen's College इत्यत्र संस्कृते प्रथमं व्याकरणशास्त्रेऽनन्तरं च धर्मशास्त्रविषये उच्चशिक्षां प्राप्तवन्तः । कञ्चित्कालं तत्रैव सरस्वतीभवनपुस्तकालये तैः शोधकारत्वेन केषामपि ग्रन्थानां सम्पादनमपि कृतम् । पं० गोपीनाथकविराजमहोदयास्तदा संस्कृतमहाविद्यालयस्य प्रधानाध्यापका अभूवन् । ते वैद्यनाथस्यानुपमया प्रतिभया परं सन्तोषं प्राप्नुवन्तस्तेषामुपरि विशेषतया स्निह्यन्तिस्म । तेषामेव प्रेरणया तैः शोधकार्यं तत्रारब्धम् । शैवशास्त्रस्याध्ययनं ते श्रीगोपीनाथकविराजमहोदयानामेव प्रेरणया प्रारब्धवन्तः । तत्र तैः परमार्थसारः, महार्थमञ्जरीपरिमलः, तत्त्वप्रकाशश्चेति ग्रन्था अधीताः । तत्रैव कतिपयवर्षपूर्वं कस्या अपि साधनायाः फलत्वेन भगवता महामुनिना दुर्वाससा तेभ्यः प्रत्यक्षं दर्शनं दत्त्वा परिपूर्णस्य शाम्भवयोगस्योत्तमा साधनप्रक्रिया प्रदत्ता, सम्यक् च प्रशिक्षिताऽभूत् । तस्या अभ्यासतस्तैः स्वानुभवेनैवाद्वैतशैवदर्शनसिद्धान्तानां परं तत्त्वं साक्षात्कृतमभूत् । ततः शैवदर्शनग्रन्थानामध्ययने नैव कोऽप्यायासस्तैरनुभूतः । 1928 ई० वत्सरे पूर्वे यौवने गृहं परित्यज्य तैः परिव्राजकत्वं स्वीकृतम् । उत्तरप्रदेशस्य पर्वतीयानां केषामपि तीर्थानां, वृन्दावनादिक्षेत्राणां, कुरुक्षेत्र-

स्थानामपि च तीर्थानां दर्शनं कृत्वा ते हरिद्वारं प्राप्ताः। ततश्च प्रविष्टा हिमाचलप्रदेशम्। तत्रत्यानां देवस्थानानां दर्शनं कृत्वा कांगडातः जम्मूप्रदेशस्य कतिचित् स्थानान्यपश्यन्। ततः प्रयाताः कश्मीरान्। तत्र तैर्बहुषु तीर्थस्थलेषु तीर्थदेवतानां दर्शनानि लब्धानि। विशेषतश्च ते अमरेश्वरस्य दर्शनेनातीव प्रभाविता अभूवन्। शैलपुत्रीतीर्थे (वराहमूले-बारामुला) तैर्भगवत्या विश्वात्मकतापि साक्षाद्दृष्टा। तेषां दर्शनानां मध्ये सुप्रभूतानां वर्णनं तैः सिद्धमहारहस्याख्ये ग्रन्थे कृतम्। असौ ग्रन्थस्तैः पं० गोपीनाथकविराजानां प्रेरणया वाराणस्यां 1966 ई० वर्षे प्रकाशितः। इत्थं स्थाने स्थाने भ्रमद्भिस्तत्तद्देवतानां दर्शनपूजनादि कुर्वद्भिर्, विविधान् ग्रन्थान् रचयद्भिर् योग्यानां शिष्याणां पथप्रदर्शनं कुर्वद्भिर्निजं मर्त्यजीवनं सफलं कृत्वा सन् 1982 ई० वत्सरे दिल्ल्यां मर्त्यशरीरं त्यक्त्वा तैः सिद्धलोकान् प्रति सङ्क्रमणं कृतम्। तेषां पूज्याः पितृपितामहप्रपितामहाः क्रमेण श्रीकृष्ण-वैद्यनाथ-रामकृष्णा अभूवन्। कश्मीरेष्वटद्भिस्तैः कश्मीरशैवदर्शनस्य मुख्यानां ग्रन्थानामध्ययनं कृतम्। कश्मीरेष्वेव तैरतिगम्भीरस्यात्मविलासाख्यस्य ग्रन्थस्य निर्माणं हेलयैव कृतम्। तद्ग्रन्थानुसारं तेषां दर्शनविद्या बहुधा काश्मीरशैवदर्शनानुसारिणी, परं कैश्चन नूतनैर्दर्शनसिद्धान्तप्रतिपादनप्रकारैर्युक्ता सती सा नूतनशैवदर्शनविद्येति मन्यते तस्या अभ्यासं कुर्वद्भिर्विद्वद्भिः। असौ नूतनता तेषां सिद्धमहारहस्ये विशेषतया स्फुटतां यातास्ति। नूतनताया लक्षणद्वयं तावदतीव सुस्पष्टम्। तद्यथा—प्रथमतस्तेषां विचारोऽयं यज्जीवनस्य व्यावहारिक्यः समस्याः प्रथमं निर्दलनीयास्तदनन्तरमाध्यात्मिकोत्कर्षाय मानवैर्यतनीयम्। अत एव तैरात्मविलासानन्तरमेव राष्ट्रालोकस्य निर्माणं कृतम्। असौ ग्रन्थो राष्ट्रवादप्रधानो नीतिशास्त्रग्रन्थः। तद्विषये तेषामयं विचारो यत् प्रथमं जनैः स्वस्मिन् राष्ट्र आर्यजुष्ट्या सद्राजनीत्याऽऽर्यजुष्टा तथाविधा सच्छासनपद्धतिः स्थाप्या प्रचालनीया च यन्महिम्ना भूयसां राष्ट्रनिवासिनां कृते चतुर्वर्गफलप्राप्तिः सुलभतां यायादिति। यतस्तथाविधे सत्प्रशासने सफलतया प्रचलत्येव धर्मार्थमोक्षादिशास्त्राणि यथार्थतया सफलतां लब्धुमलं भवन्ति। अत्र विषये ते बारं बारम् ईशावास्योपनिषद्वाक्यं स्मारयन्ति स्म—

"अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय एव ते तमो य उ विद्यायाꣳ रताः॥
अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥
विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥"
(ई० वा० उ० 9, 11)

राजधर्मप्राधान्यविषये मनुस्मृतिवाक्यानि, भगवच्छ्रीकृष्णोपदेशांश्चोदाहरन्ति स्म। एतदभिप्रेत्य तैरार्यजुष्टाया राष्ट्रक्रान्तेर्वर्णनं संक्रान्तिपञ्चदशिकया कृतम्। राष्ट्रालोकस्य राष्ट्रसञ्जीवनाख्यं भाष्यं तैर्नूतनशैवदर्शनदृष्ट्यनुसारमेव निर्मितम्। राष्ट्रवादप्रधानाया नीतिशास्त्रविद्याया, अद्वैतशैवदर्शनविद्यायाश्चातीव मनोहरं सामञ्जस्यं तत्र लभ्यते। तेषामुपदेशानुसारं बहुभिः पुरातनैर्दर्शनशास्त्रकृद्भिर्धर्मदर्शनविकासाधारभूतायाः सच्छासनपद्धतेः स्थापनाविषये भूयस्यवहेलना कृता, येन भारतवर्षः पराधीनतां, दरिद्रतां, निर्बलतां चानुभूतवान् सुचिरम्। तेषां दर्शनविद्या तावत् पराद्वैतशैवदर्शनानुसारिणी, परं तस्यां परशिवस्य यच्छक्तिघनत्वं तस्य महिम्नः प्रतिपादनं प्राधान्येन कृतं वर्तते। अत एव तैः सिद्धमहारहस्ये परस्याद्वैततत्त्वस्य नाम 'शाकः' इत्येव कृतम्। तत्र शकनं शाकः, शकेर्भावे घञ्। इत्येवं समस्तपारमैश्वर्यशक्तीनामेकघनस्वरूपं परं तत्त्वमित्यभिप्रायस्तैः सुविशदीकृतः। अत एवास्या नूतनशैवविद्याया नाम तैः 'शाकदर्शनम्' इत्यपि कृतम्। एषा द्वितीया विलक्षणता तेषां नूतनस्य शैवदर्शनस्य। अपराश्चापि काश्चनावरप्राया विशेषतास्तेषामात्मविलासादिग्रन्थाध्ययनतो दृष्टिगोचरतां यान्ति। ताः प्रायो विषयाणां स्फुटतया प्रतिपादनेन साकं सम्बद्धाः। स्फुटीकरणयुक्तीनामेव तत्र तत्र नवीनता। परिव्रजनात्प्राक् तैः स्तोत्रद्वयस्य निर्माणं कृतम्। तच्च स्तोत्रद्वयं (1) परमशिवस्तोत्रम्, (2) दुर्गास्तवश्चेति। अनन्तरं तैः शैवदर्शनविषये निम्नाङ्किता ग्रन्था निर्मिताः—

(1) आत्मविलासः—(कारिकाबद्धः संस्कृतभाषामयः)।
(2) महानुभवशक्तिस्तवः—संस्कृतम्।
(3) मन्दाक्रान्तास्तोत्रम्— ,,
(4) विंशतिकाशास्त्रम्— ,,
(5) सिद्धमहारहस्यम्— ,,

सर्वेऽप्येते ग्रन्थाः संस्कृतभाषामया एव। इतोऽधिकं तैर्हिन्दीभाषायां ग्रन्थद्वयरचना कृता। तच्च ग्रन्थद्वयम्—(1) आत्मविलासस्य सुन्दरीनाम्नी सुविस्तृता व्याख्या, (2) वस्तुस्थितिप्रकाशश्चेति। राष्ट्रसञ्जीवनभाष्यं विहाय सर्वेऽप्युपरि समुल्लिखिता ग्रन्थाः प्रकाशिताः सन्ति। धर्मप्रतिपादनविषयाः, तत्तद्देवतास्तोत्रविषयाः, काव्यविषयाश्चान्येऽपि केचन ग्रन्थास्तैर्निर्मिताः।

अमृता-कला——पराकुण्डलिनी-समाख्या पारमेश्वरी पराशक्तिर्यन्महिम्नाऽसौ 'परमेश्वर' इति, यद्वशाच्चानुत्तरेच्छोन्मेषादीनां तत्तदाकारतयाऽभिव्यक्तिः। समस्तसृष्टिबीजभूता कला। स्वरषोडशकस्यापि बीजभूतत्वादेषा सप्तदशी कलेत्यप्युच्यते। यथा—

"कला सप्तदशी तस्मादमृताकाररूपिणी।
परापरस्वरूपबिन्दुगत्या विसर्पिता।" इत्यादि
(तं० आ० 3, 138)

अमृतेशः——अमृतत्वप्रदानकृत् सदाशिवः। यथा—

"अमृतत्वं ददात्येवममृतेश इति स्मृतः।"
(ने० तं० खं० 1, पृ० 216)

"अमृतत्वं रुद्रशक्तिसमावेशं (ददाति)॥"
(ने० तं० वि० खं० 1, पृ० 216)

अमृतेश शिखा——किमपि शैवं शास्त्रम्, कृतपंक्त्युद्धरणं जन्ममरणविचारे । यथा—

"श्रीमदमृतेशशिखायामपि—
ते तु तत्त्वावतीर्णानां शङ्कराज्ञानुवर्तिनाम् ।
स्वयंभूर्मुनिदेवर्षिमनुजादिभुवां गृहे ॥
मृतास्ते तत्पुरं प्राप्य पुरेशैर्दीक्षिताः क्रमात् ।
मर्त्येऽवतीर्य वा नो वा प्रयान्ति परमं पदम् ॥
तत्र स्वयंभुवो द्वेधा केऽप्यनुग्रहतत्पराः ।
केऽपि स्वकार्येणायाताः पूर्वे निर्वाणदायिनः ॥"

(ज० म० वि० पृ० 20)

अमृतानन्दनाथः——पुण्यानन्दनाथस्य शिष्यः । श्रीविद्योपासकः कौलसम्प्रदायानुयायी शैवदर्शनगुरुः । अस्य ग्रन्थाः— (1) कामकलाविलासटीका, (2) सौभाग्यसुभगोदयः, (3) अष्टाङ्गनिर्णयामृतचषकम्, इत्याद्याः । यथा—

(1) "तत्त्वानां लक्षणानि मयैव सौभाग्यसुभगोदये निरूपितानि, यथा—'यदयमनुत्तरमूर्तिर् ·····।"

(यो० हृ० दी० पृ० 124-6)

(2) "सरस्वतीभवनपुस्तकालये अमृतानन्दनाथविरचितस्याष्टाङ्गनिर्णयामृतचषकस्य मातृकाद्वयमुपलभ्यते ।"

(तदेव पृ० ङ—भूमिका)

अमोक्षः——अधरशास्त्रेष्वभिनिवेशवतां सौषुप्तप्राया स्थितिः ।

द्र० 'मायाशक्तिः' इति ।

अम्बा——

असौ पारमेश्वरी पराशक्तिर्यया परमेश्वरः, पञ्चकृत्यानि सततं कुरुते । सा पराशक्तिः शिवस्य या ज्येष्ठा-रौद्री-वामेति रूपैः प्रकटीभूय जीवानां मोक्ष-भोगबन्धलीलाः प्रचालयति । सा पराशक्तिर्याऽघोर-घोर-घोरतरात्मकशक्तिव्रातरूपैः प्रकटीभूय जीवान् यथा यथा मोक्षं, भोगं, बन्धनं वा प्रति प्रेरयत्यस्मिन् संसारे । एषाऽम्बैव हि वस्तुतः शिवस्य शिवता । यथा—

यस्या निरूपधिज्योतीरूपायाः शिवसंज्ञया ।
व्यपदेशः परां तां त्वामम्बां नित्यमुपास्महे ॥

उद्ध०—(शि० दृ० वृ०, पृ० 94)

योनयः शक्तयो ज्ञेयाश्चतस्रः सर्वकारणम् ।
अम्बा ज्येष्ठाभिधा रौद्री वामा च शिवमूर्त्तयः ॥

(शि० सू० वा० भा०, पृ० 6)

द्र० तत्त्वगर्भस्तोत्रम् इति ।

(2) अभिनवगुप्तस्य प्रधानेषु शिष्येषु गणनीया, प्रियस्य शिष्यस्य कर्णस्य पत्नी, शौरिनाम्नो मन्त्रिणः स्नुषा । असावभिनवगुप्तस्य भगिनी-प्राया (पितृव्यतनया) शारीरेण सम्बन्धेन । यथा—

तस्य स्नुषा कर्णवधूर्विधूत-संसारवृत्तिः सुतमेकमेव ।
याऽसूत योगेश्वरिदत्त-संज्ञं नामानुरूपस्फुरदर्थतत्त्वम् ॥
यामग्रगे वयसि भर्तृवियोग-दीना-
मन्वग्रहीत् त्रिनयनः स्वयमेवभक्त्या ।
अम्बाभिधाना किल सा गुरुं तं,
स्वं भ्रातरं शम्भुदृशाऽभ्यपश्यत् ॥

(तं० आ० 37, 76-79)

अम्बुजम् (उच्चारयोगे)——स्पष्टीकृतं यथा—

"भ्रूमध्यवर्ती विद्याकमलं नामाधारः ॥"

(तं० आ० वि० खं० 3, पृ० 359)

अरिः—मन्त्रः——असौ मन्त्रो यः कथमपि शुभफलप्रदत्वेन नैव सिद्ध्यति, मूलमेव च निकृन्तति ।

द्र० 'मन्त्रदीक्षा'~चक्रविधिना इति ।

द्र० 'रिपुमन्त्राः' इति ।

अरुणादित्यः——सङ्गमादित्यस्य पौत्रो वर्षादित्यस्य पुत्रस्त्र्यम्बकमठिकाया अष्टादशो गुरुः, सोमानन्दस्य पितामहः । यथा—

"तस्याप्यभूत् स भगवानरुणादित्यसंज्ञकः ।"

(शि० दृ० 7, 119)

अर्घः——पूजोपयोगि द्रव्याष्टकम् । अर्घ्यदानपूजाङ्गम् । यथा—

"अर्घोऽष्टाङ्गः ।"

(तं० आ० 2, 27)

"आपः क्षीरं कुशाग्राणि घृतञ्च दधि तण्डुलाः ।
यवाः सिद्धार्थकाश्चेति ह्यर्घ्यमष्टाङ्गमुच्यते ॥"

(पूजापद्धतिः-कश्मीरिकी)

~कौलिके यागे——परस्परसङ्गमोद्भूतं कुण्डगोलाख्यं द्रव्यम् । यथा—

"तत्रार्घः शक्तिसङ्गमात् ।"

(तं० आ० 29, 15)

"अर्घ इति कुण्डगोलाख्यो द्रव्यविशेषः ।"

(तं० आ० वि० खं० 11/2, पृ० 14)

अर्घपात्रम्——पूजाङ्गविशेषोपयोगिनो जलस्य पात्रम् ।

~तदुपयोगः——पूजारम्भे न्यासं सम्यग्विधायार्घपात्रस्थजलस्य विप्रुड्भिरखिलं यागोपकरणं प्रोक्षणीयं भवति । एतेन तत्र शिवभावभावनया शुद्धिर्जायते । यथा—

"प्रकृतं ब्रूमहे कृत्वा न्यासं देहार्घपात्रयोः ॥

सामान्यमर्घपात्राम्भोविप्रुड्भिः प्रोक्ष्य चाखिलम् ।
यागोपकरणं पश्चाद् बाह्ययागं समाचरेत् ॥"

(तं॰ आ॰ 15, 179-80)

~**तद्दोषाः**——दूरप्रयोजनपात्रे ये दोषा वर्ज्यास्त एवार्घपात्र विषयेऽपि वर्ज्या एव । यथा—

"एतदेवानुसर्तव्यमर्घपात्रेऽपि लक्षणम् ।"

(तं॰ आ॰ 27, 28)

~**तत्पूरणप्रकारः** (कौलयागे)——रहस्यचर्यामियोऽसौ नैव शब्दैः प्रतिपादयितव्यो, गुरमुखादेव वेदितव्यः । यथा—

"यश्चात्रैतत्पूरणे सम्प्रदायः स रहस्यत्वात् समयभङ्ग भयाच्च नेहास्माभिः प्रदर्शितः ।"

(तं॰ आ॰ वि॰ खं॰ 11/2, पृ॰ 19)

~**तत्प्रयोजनम्**——अर्घपात्रं हि पूजायामुपादेयम् । तत्स्थं जलं कारकेषु षिच्यते । तेन सर्वं कारकजा तं शुद्धं सच्छिवीभवति, तथाविघशिवभावनया । यथा—

"अर्घपात्राम्बुविप्रुड्भिः स्पृष्टं सर्वं हि शुध्यति ।
शिवार्ककरसंस्पर्शात् कान्या शुद्धिर्भविष्यति ॥"

(तं॰ आ॰.15, 161)

~**तत्संस्कारः**——यथा—

"अथवार्घमहापात्रं कुर्यात्तच्चोत्तरं परम् ।
नारिकेलमथो बैल्वं सौवर्णं राजतं च वा ॥
तस्याप्येष विधिः सर्वः प्रतिष्ठादौ प्रकीर्तितः ।

(तं॰ आ॰ 27, 40-41)

एष विधिः= संस्कारविधिः ।

अर्चनम्—अध्वोपयोगे——अर्पणीयानां वस्तूनां पूजालम्बनभूतदेवताभेदेन यद्विमर्शनं तदेव तत्त्वोपयोगप्रक्रियायामर्चनम् । यथा—

"तत्रार्पणं हि वस्तूनामभेदेनार्चनं मतम् ॥"

(तं॰ आ॰ 12, 9)

अर्चनात्रिंशिका——महामाहेश्वरनागार्जुनविरचिता परमार्चनात्रिंशिका सश्लोकोद्धरणं कृतनामनिर्देशा महार्थमञ्जरीपरिमले । यथा—

"यदुक्तमर्चनात्रिंशिकायाम्—
"बालिकारचितवस्त्रपुत्रिकाक्रीडितेन सदृशं तदर्चनम् ।
यत्र शाम्यति मनो न निर्मलं स्फीतचिज्जलधिमध्यमाश्रितम् ॥"

(म॰ मं॰ प॰, पृ॰ 108)

अर्चाप्रकारः——यथा—

"पूर्वं तावत् पीठतया देहमभ्यर्च्य तन्मध्ये हृदयव्योमरूपे स्वात्मरूपमहाप्रकाशलक्षणं परमेश्वरमनुसंधाय, तमभितः प्रसरन्तीरिन्द्रियशक्तीश्च विचिन्त्य, तदनु सर्वान्तःकरणसमष्टिलक्षणे स्वचित्ते विश्ववेद्यविलासलक्षणमर्घ्यद्रव्यमापूर्य, तच्च परमेश्वरपरामर्शमय्या मन्त्रशक्त्या संस्कृत्य, तेनैव कुलामृतेन निजावरणदेवतापरिमण्डलितोऽयं परमेश्वरः पूजनीय, इति ।"

(म॰ मं॰ प॰, पृ॰ 82)

अर्थक्रिया——व्यावहारिकप्रयोजनानुकूला क्रिया ।

~**तदाभासः**——वस्तूनां प्रयोजनानुकूलत्वस्य प्रथनम् ।

~**तदुपयोगः**——ईश्वरसिद्ध्यनुकूलेऽनुमाने तस्य हेतुतयोपादानम् । तद्यथा-सुविचित्रा-अर्थक्रियानुकूला या प्रधानस्य परिणामे प्रवृत्तिः सेश्वरकृतां प्रेरणां विना न सिद्ध्यतीति । यथा—

"तदत्र बुद्धिमत् कर्तृसिद्ध्या सिद्धेश्वरक्रिया ।
न हि तादृशवैचित्र्यविदुषः स्यादनीशिता ॥"

(ई॰ सि॰ 7)

~**भेदनियता**——'घट' इत्यनेनाभासेन जलाहरणरूपाऽर्थक्रियासाध्या । 'काञ्चनो घट' इत्यनेन बहुमूल्यत्वाधारा तत्स्वामित्वाभिमानिताख्या सन्तोषविशेषात्मिकाऽर्थक्रिया सिद्ध्यति । तथैवोज्ज्वलः पृथुरित्यादिभिराभासैरपि भिन्नभिन्नार्थक्रिया । सर्वेषां पुनरेषां मिलितानामाभासानामेकघनेनाभासेनापरैव काचनार्थक्रिया । यथा—

"अभेदिन एकस्वलक्षणतामाप्ता न तु स्वरूपभेदमुज्झन्तः (य आभासाः) तेषामन्या विशिष्टा समुदितरूपार्थक्रिया, आभासविमर्शभेदे पुनरन्या नियता एकैकमात्ररूपा ॥"

(ई॰ प्र॰ वि॰ खं॰ 2, पृ॰ 95)

अर्थप्रकाशाभेदः——अर्थः प्रकाशात्मक एवेति । यथा—

"उक्तं हि भिन्नः प्रकाशोऽर्थस्य सम्बन्धी भवतीति सम्भावनैव नास्ति । अतश्चेदमुपपत्त्यायातम्-अर्थस्य स्वरूपं प्रकाशमानत्वं प्रकाशाभिन्नत्वमिति ॥"

(ई॰ प्र॰ वि॰ खं॰ 1, पृ॰ 158)

अर्थव्यवस्था——अर्थस्य विषये प्रख्योपाख्योभयात्मिका विचारणा । यथा—

"प्रख्यानं हि केवलं निर्विकल्परूपमुपाख्यारूपशून्यम् । न तद्व्यवस्थानमर्थस्य । नाप्युपाख्या केवला प्रकाशशून्येति····· अर्थव्यवस्था ···· सा हि प्रख्योपाख्यामयी । त एव च प्रकाशविमर्शावर्थस्येति तदात्मको बोधः कथमर्थव्यवस्थारूपो न भवेत् ।"

(ई॰ प्र॰ वि॰ खं॰ 1, पृ॰ 252)

~**तदाधारः**——परमेश्वरेच्छाप्रेरणानुसारमेव सर्वेषां जीवानां सर्वे व्यवहारास्तेन प्रतिष्ठापितायां नियतैर्नियमाननुसृत्यैव चलन्ति । ततो मूलतः स एव सर्वासामर्थस्थितीनामाधारभूतः । यथा—

"यद्यप्यर्थस्थितिः प्राणपुर्यष्टकनियन्त्रिते ।
जीवे निरुद्धा तत्रापि परमात्मनि सा स्थिता ॥"

(अ॰ प्र॰ सि॰ 20

अर्थवादाभावः~त्रिके——त्रिकशास्त्रेषु विधिवाक्यान्येव नार्थवादवाक्यानि । यथा—

"नार्थवादादिशङ्का च वाक्ये माहेश्वरे भवेत् ॥"

(तं॰ आ॰ 4, 232)

"विधिवाक्यमिदं तन्त्रं नार्थवादः कदाचन ।
झगिति प्रत्यवायेषु सत्क्रियाणां फलेष्वपि ॥" इति

तथा—

"······नार्थवादः शिवागमः ।" इति

(उद्ध॰ तं॰ आ॰ वि॰ खं॰ 3, पृ॰ 257)

अर्थसत्ता (पारमार्थिकी)——सा च शुद्धसंविन्मयी। तद्रूपतयैव परमेश्वरस्तान् विमृशन् स्वविलासतो बहीरूपतयाप्यवभासयति । संविद्रूपत्वेन सदा विद्यमानानामेवार्थानां बाह्यरूपतयावभासः परमेश्वरेण क्रियते । यथा—

"ईश्वरस्य हि शुद्धविमर्शविषयाः सर्वेऽर्थाः, न तु विकल्पा पशोरिव ।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 3, पृ॰ 369)

~प्रकाशरूपता——प्रकाश एवार्थस्य रूपमादाय स्वयं प्रकाशते। ततोऽर्थो नैव प्रकाशाद्भिन्नः । प्रकाशाद्भिन्नत्वे तस्य प्रकाशनमेव न भवेत् । यथा—

"यत एव पूर्ववदप्रकाशता स्यात्, प्रकाशमानता नामार्थस्य न भिन्ना । तत एवायातं—प्रकाश एवार्थस्यात्मा । तथा च वृत्तिः—स्वरूपभूतो यः प्रकाशः सोऽर्थस्य प्रकाशमानता; न तु तस्मादर्थाद्भिन्नः ।"

(ई॰ प्र॰ वि॰ वि॰ खं॰ 2, पृ॰ 68)

अर्धचन्द्रः~प्रणवकला——शैव्यामुपासनायां द्वादशसु प्रणवकलासु पञ्चमी कला, बिन्दोरूर्ध्वं निरोध्याश्चाधः स्थिता। यथा—

"अकारश्च उकारश्च मकारो बिन्दुरेव च ।
अर्द्धचन्द्रो निरोधी च नादो नादान्त एव च ॥

(स्व॰ तं॰ 4, 255)

"बिन्दूर्ध्वेऽर्धेन्दुरेतस्य·····················॥"

(तं॰ आ॰ 8, 383)

~आरोहक्रमे——विश्वात्मकप्रमेयप्रकाशस्य विश्वात्मकविमर्शरूपां नाददशां प्रत्यारुरुक्षतो यत् किञ्चिन्मात्रमेव प्रमेयांशशैथिल्यं सा दशार्धचन्द्रकलेति नाम्ना व्यवह्रियते शास्त्रे । यथा—

"सर्ववाच्याभिन्नप्रकाशात्मनो बिन्दोर्नादीभवतः किञ्चिद्वाच्यप्राधान्यशान्तावर्धचन्द्ररूपता ।"

(वि॰ भै॰ उ॰ पृ॰ 5)

~कलास्तस्य——रहस्योपायफलभूते स्वात्मसाक्षात्कारे या अर्द्धचन्द्राख्या प्रणवकला सापि सूक्ष्मतरविचारशीलधिषणाधनैः पञ्चस्ववान्तरदशान्तरेषु विश्लिष्यते । अवान्तरदशापञ्चकंयत्तदर्द्धचन्द्रकलापञ्चकमिति परिभाष्यते । आत्मसाक्षात्कारसोपानविशेषस्यापि पञ्चावस्थान्तराणीमानि नामनिर्देशमात्रत उल्लिखितानि, नैव च लक्षणतो विशदीकृतानि तन्त्रालोके तद्विवेकेऽपि वा । यथा—

"····· एतस्य कला ज्योत्स्ना च तद्वती ।
कान्तिः प्रभा च विमला पञ्चैताः······॥"

(तं॰ आ॰ 8, 383)

"तद्वती=ज्योत्स्नावती, इति ।"

(तं॰ आ॰ वि॰ खं॰ 5, पृ॰ 251)

~प्रसरक्रमे——बिन्दुस्तावदीश्वरः । तस्य मूर्ध्नि यदा सृष्टिकारणभूतं शिवामृतं प्रवर्ष्यते शिवेन तदा तद्बलेन खण्डत्वेन स्फुरन्नीश्वर एवार्धचन्द्र इत्युच्यते उपासनक्रमे । यथा—

"(क) ····· बिन्दुश्चैवेश्वरः स्मृतः ॥"

(ने॰ तं॰ 21, 66)

"(ख) यदा शिवामृतं मूर्ध्नि पतति सृष्टिकारणम् ।
आप्यायस्तु भवेत्तेन सोऽर्धचन्द्र इति स्मृतः ॥"

(तदेव 66-67)

आप्यायकारित्वमेव चन्द्राख्यया सूच्यतेऽत्र ।

~सृष्टिक्रमे——या प्रणवकला मूर्ध्नि शिवामृतं स्रवयन्ती योगिनो नाडीचक्रानुचक्राण्याप्याययति सा 'अर्धचन्द्र' इत्युच्यते । यथा—

"यदा शिवामृतं मूर्ध्नि पतति सृष्टिकारणम् ।
आप्यायस्तु भवेत्तेन सोऽर्धचन्द्र इति स्मृतः ॥

(उद्ध॰ नेत्रतन्त्रतः– वि॰ भै॰ उ॰ पृ॰ 38)

~संहारक्रमे——बिन्दुरूपाया ईश्वरावस्थाया उपरि स्थिता नादाख्या सदाशिवावस्था । मध्ये चाद शान्तरद्वयम् । प्रथमा तयोरर्धचन्द्राख्या द्वितीया च निरोधीति नामिका । ईश्वरावस्थायां वेद्यप्राधान्यं सदाशिवावस्थायां च वेदकप्राधान्यम् । अर्द्धचन्द्रावस्थायां वेद्यप्राधान्यस्य किञ्चिन्मात्रमेव शैथिल्यमत एव वेद्यप्राधान्यसंस्कारव्यञ्जकं कौटिल्यं तत्र '⌓' इति । निरोधिन्यां तत्संस्कारशेषतामात्रमिति न तत्र कौटिल्यम् । तस्या समरेखाकारता एवं '⊥' इति । यथा—

"सर्ववाच्याभिन्नप्रकाशात्मनो बिन्दोर्नादीभवतः किञ्चिद्वाच्यप्राधान्यशान्तावर्धचन्द्ररूपता, ततोऽपि वेद्यकौटिल्यविगमे स्पष्टरेखात्मा निरोधिका ।"

(वि॰ भै॰ उ॰ पृ॰ 5)

~साक्षात्कारक्रमे——साक्षात्कारक्रमे स्वरूपस्यान्तरन्तः—प्रवेशक्रमे बिन्दोरनन्तरमर्द्धचन्द्रदशा । सा चोपास्तिक्रमे कुटिलरेखाकारतया लिख्यते '.⌒' इति शारदालिप्याम् । तदधश्च स्थानं बिन्दोर्यदेवं लिख्यते '$\overset{\frown}{\circ}$' इति । तदुपरि च निरोधिकायाः स्थानम् एवं '$\overset{|}{\overset{\frown}{\circ}}$' इति शारदालिपिसंकेताः ।

द्र॰ 'संहारक्रमे' इति ।

अर्धचन्द्रकला:——योगिभिरेवानुभवितुं शक्याः सूक्ष्माः कलाः, यथा—

"यश्चार्धचन्द्रः कथितः प्लावको बिन्दुमूर्धनि।
तच्छक्त्यमृतमुच्छिष्टं कलायुक्तं महेश्वरि॥
ज्योत्स्ना ज्योत्स्नावती चैव सुप्रभा विमला शिवा।
अर्धचन्द्रकलाह्येताः सर्वज्ञपदसंस्थिताः॥
विद्यावरणसम्बद्धा मन्त्रकोटिविभूषिताः।
क्रियाशक्तिस्वरूपास्तु संस्थिता विमलाः शुभाः॥"

(ने० तं० 22, 36-38)

आत्मस्वरूपस्य याः सूक्ष्मसूक्ष्मतरा विशेषता योगाभ्यासेन साक्षात्कार्यास्तासामेव प्रतिपादनं प्रणवस्य द्वादशकलाभिस्तासां चावान्तराभिः कलाभिः कृतं सिद्धगुरुभिः सैद्धेऽत्र दर्शन इति वेद्यं सुधीभिः।

अर्धमात्राः (81)——कादिहान्तानां व्यञ्जनानां त्रयस्त्रिंशत् (33) अर्धमात्राः। ह्रस्वस्वर-पञ्चकस्य 5×2=10 दश, दीर्घाष्टकस्य 8×4=32 द्वात्रिंशत्। लृकारस्य दीर्घत्वाभावात् प्लुतत्वम्। ततस्तस्य प्लुतस्य षट्-6। इति संकलनया=33 +10+32+6=81 इति। दीर्घाष्टकस्य दीर्घत्वमेव स्वाभाविकम्, न पुनः प्लुतत्वम्। ततस्तन्न गण्येत। लृकारस्य प्लुतत्वं स्वाभाविकमेव। यथा—

"कालोऽर्धमात्रः कादीनां त्रयस्त्रिंशत उच्यते।
मात्रा ह्रस्वाः पञ्च दीर्घाष्टकं द्विस्त्रिः प्लुतं तु लृ।"

(तं० आ० 6,225-26)

"दीर्घाणां च प्लुतत्वेऽपि तन्नोक्तं, तस्योच्चारणापेक्षत्वात्, न ह्येषां दीर्घत्ववत् प्लुतत्वमपि स्वाभाविकमिति भावः। एवं लृकारस्यापि प्लुतत्वमेव स्वभावः, इति दीर्घत्वापरिगणनेन तदेवेहास्य प्राधान्येनोक्तम्।"

(तं० आ० वि० खं० 4/1, पृ० 183)

मातृकालेखने आदीनां दीर्घत्वमेव लिख्यते आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ, इति। प्लुतत्वद्योतनाय 3 इति संख्या निबद्ध्यते। लृ इति यल्लिख्यते तत् प्लुतमेव स्वभावतः, लृकारस्य दीर्घत्वाभावात्। तत एव तत्र 3 इति संख्या न लिख्यते। तदयमाशयो जयरथस्य मातृकोपासनाविशेषज्ञस्य।

~तदुदयः (प्राणे)——चतुर्षु चतुर्षु, तावदङ्गुलेषु नवनवार्धमात्रोदयः प्राणचारे। यथा—

"अर्धमात्रा नव नव स्युश्चतुर्षु चतुर्षु यत्।
अंगुलेष्विति षट्त्रिंशत्येकाशीतिपदोदयः॥"

(तं० आ० 6, 231-32)

प्रहरचतुष्टयात्मके दिन एकैकस्मिन्नर्धप्रहरे एकैकस्य वर्णवर्गस्योदयः। वर्णं वर्गा अष्टौ—अ, क, च, ट, त, प, य, श, इत्येषां वर्गाः। एवमेव रात्रावपि वर्णवर्गाष्टकस्योदयः प्रतिवर्गमुभयत्रार्द्धप्रहरात्मकः कालः। यथा—

"एकैकमर्धप्रहरं दिने वर्गाष्टकोदयः।
रात्रौ च ह्रासवृद्ध्यत्र केचिदाहुर्न केऽपि तु॥
एष वर्गोदयो रात्रौ दिवा चाप्यर्धयामगः।"

(तं० आ० 6, 241-42)

रहस्योपासनाविषयोऽयम्। नास्य विधानं बुद्धौ सम्यक् प्रकाशते॥

अलंग्रासक्रमः——चर्याभ्यासनीत्या सर्वस्य प्रमातृप्रमाणप्रमेयात्मकस्य विश्वस्य सद्यः अक्रममेवाविकल्पमेव च स्वात्मवह्निसात्करणस्याभ्यासः। स च शाम्भवोऽविकल्पः सद्यश्च, शाक्तः सविकल्पः क्रमशश्च। तत एवासौ शाक्तोपाये क्रमनय इति परिभाषितः। हठपाकक्रमः इति चाप्यस्य क्रमस्य नामान्तरम्। यथा—

"अलमत्यर्थं सार्वात्म्येन यः सृष्ट्यादीनां ग्रासः स्वात्मसात्कारः।"

(तं० आ० वि० खं० 2, पृ० 240)

अलिङ्गम्—अनुत्तरम्——
द्र० 'अनुत्तरम्' (अलिङ्गरूपम्) इति।

अवकाशदा (कला)——शान्त्यतीता कला। यथा—

"शिवतत्त्वं परं शान्तं कला तत्रावकाशदा।
स्वरषोडशकं मन्त्रं पदं चैकं विलक्षयेत्॥"

(मा० वि० तं० 2, 56-57)

अवतारकनाथः——(1) भूलोकेऽत्र कालीनयस्यावतारकः श्रीशिवानन्दनाथः। यथा—

"श्रीमदवतारकनाथेन श्रीककारदेवीवत् श्रीमदनिकाश्रीकल्याणिके चानुगृहीते।"

(तं० आ० वि० खं० 3, पृ० 195)

(2) गोविन्दराजादीनां परमगुरुः श्रीशिवानन्दनाथ एव। यथा—

"श्रीमदवतारकनाथस्य (श्रीशिवानन्दनाथस्य) अप्यत्र त्रयोदशैव विवक्षिताः, यः श्रीगोविन्दराजादीनामपि परमगुरुत्वेन स्थितः।"

(तं० आ० वि० खं० 3, पृ० 197)

द्र० 'शिवानन्दनाथः' इति।

अवधूतः——आचार्यः कोऽपि ग्रन्थकृत्; अवधूतसिद्धपाद एवायं भवितुमर्हति। यथा—

"तथा चावधूतः
येनामलस्फुरिता……।" इत्यादि।

(शि० स्तो० वि० पृ० 227)

सम्भवतोऽवधूताचार्य एवायम्।

अवधूतसिद्धपाद:——आचार्य: कोऽपि शैवदर्शनग्रन्थकार:। यथा—

"यदुक्तम्—(अवधूतसिद्धपादै:)
वध्नाति काचिदपि शक्तिरनन्तशक्ते:
क्षेत्रज्ञमप्रतिहता भवपाशजालै:।
ज्ञानासिना च विनिकृत्य गुणानशेषान्
अन्या करोत्यभिमुखं पुरुषं विमुक्तौ ॥" इति

(प० सा० वि० पृ० 30)

सम्भवतोऽवधूताचार्य एवायम्।

अवधूताचार्य:——कोऽपि दर्शनविद्यागुरु:। कदाचिदवधूतसिद्धपाद एव भवेदयम्। तथाहि तद्वाक्यम्—

"यथाह्यवधूताचार्य:—
प्राकाम्यमात्मनि यदा प्रकटीकरोषि
व्यक्ती: प्रतिक्षणमनेकविधा दधान:।
त्वय्येव सोऽपि भगवन् भजतेऽर्थवत्तां
प्रायोऽविदग्धरचित: क्षणभङ्गवाद: ॥

(उद्धृ० ई० प्र० वि० वि० खं० 2, पृ० 173)

अवधूतिका——अज्ञानावधूननकरी स्वात्मसाक्षात्कारमयी शिवस्योन्मना नाम्नी शक्ति:। यथा—

"उन्मना तु परा शक्तिर्ज्ञानरूपावधूतिका।"

(ने० तं० 16, 78)

अवयवी——क्रमविशेषानुसारं परस्परं मिलिता एकत्वेनावभासमाना अवयवा एवावयवी। यथा हि—

"उक्तं हि—
अवयवानां यदैक्यं वैतत्यं च देशत: सोऽवयवी।"

(ई० प्र० वि० खं० 2, पृ० 43)

अवरा: आगमा:——
द्र० 'आगमा:~अवरा:' इति।

अविद्यावाद:——अद्वैतवेदान्तिभिर्बौद्धैश्च संसाराभासमूलकारणतया कल्पितं किमपि साररहितं तत्त्वमविद्याभिधानम्। तच्च तैरनिर्वाच्यमिति स्वीकृतम्। तदेव च तैर्जगदाभासमूलकारणतया सम्मतम्। वेदान्तवादानुसारमेकं शुद्धं चिन्मात्रं ब्रह्म वाविद्यावशादीश्वरतया, जीवतया, जगद्रूपतया च भ्रमात्मकेन ज्ञानेनाभासते। वस्तुत: स्वप्नसंसारवत् त्रयमप्येतन्नास्त्येव। ततोऽसत्यस्यैव योऽयमाभासस्तत्प्रतिपादनमविद्यावाद:।

~**आलोचित:**——अविद्याया अवस्तुभूतत्वात् सुविचित्रस्य जगदाभासस्य कारणत्वमनुपपन्नम्। भासमानायाश्च तस्या अनिर्वाच्यत्वमप्यनुपपन्नम्। यथा—

"(1) अत एव भेदाभेदयोर्विरोधं दु:समर्थमभिमन्यमानैरेकैरविद्यात्वेनानिर्वाच्यत्वमपरैश्चाभासलग्नतया सांवृतत्वमभिदधद्भिरात्मा परश्च वञ्चित:।"

(ई० प्र० वि० खं० 2, पृ० 118)

"(2) अनिर्वाच्येयमविद्या—इति चेत्? कस्यानिर्वाच्येति न विद्म:। स्वरूपेण च भाति न च निर्वाच्येति किमेतत्? युक्त्या नोपपद्यत-इति चेत्? संवेदनतिरस्कारिणी का खलु युक्तिर्नाम? अनुपपत्तिश्च भासमानस्य कान्या भविष्यति?"

(ई० प्र० वि० खं० 2, पृ० 179)

"(3) अनाद्यविद्यावशादप्यसत्यदर्शने मिथ्यात्वं तावदस्या:[1] स्थितम्। अविद्ययापि च सम्बन्धो न तस्या[2] घटते। अविद्या ह्यविद्यात्वाभ्युपगमादेवासत्या, न चासत्यया सम्बन्धो रूपश्लेषमयो युक्त:।"

(शि० दृ० वृ० पृ० 50)

(1) अस्या:=पश्यन्त्या:, (2) तस्या:=पश्यन्त्या:।

"(4) वास्तवं स्वभावसिद्धं जडस्येव घटस्य घटत्वं चितो यद्येकत्वमुच्यते, भेदस्त्वविद्येति, तदा निरूप्यं कस्य सेति? न हि विद्यैकरूपस्य ब्रह्मणस्तदभावरूपमविद्या नाम, न चान्ये जीवादय: केचिद्, अविद्ययैव हि त उत्थाप्या:। अनिर्वाच्या सेति चेत्? कस्येति न विद्म:। भाति चानिर्वाच्येति च यक्षभाषा। युक्त्या नोपपद्यत इति चेत्? भासमानातिक्रमणे का युक्ति:? अविकल्पे शुद्धमेव ब्रह्माभाति, सविकल्पे च सेति चेत्? साऽपि कस्येति पूर्ववद्वाच्यम्। अविकल्पकञ्च सत्यं, नेतरदिति भासमानत्वाविशेषे कुतो विभाग:? बाधादिति चेत्? विपरीतत्वे परस्परवस्तुतुल्यो बाध:। प्रतीतिनिरूढिस्तु भेदे यथा तथा नाभेदे इति भेदस्यैव सत्यता युक्ता। बाधोऽपि भासमानत्वादेव सन्, तथा भेदोऽपीति, सोऽपि कथमविद्या? बाधोऽपि च भेद एवेति सोऽप्यविद्या। तदिदं शशशृङ्गं गगनकुसुमस्य छेदकमुक्तं स्यात्। आगमात् सर्वमिति नाभासनादितिचेत्? आगमोऽप्यविद्येति सर्वमालजालम्। यद्वक्ष्यति—ब्रह्मापीष्टमविद्यया सह ततो नैकान्तवादोऽप्ययम्," इति।

(ई० प्र० वि० वि० खं० 3, पृ० 247-48)

"(5) अविद्यया इत्यनिर्वाच्यरूपया। अयं ब्रह्मवादोऽपि नैकान्तवादो, न निश्चिताद्वैतवाद, इति।"

(तदेव पृ० 404)

"(6) तेन पशुप्रमातॄणामख्यातिरूपो मोह:। कारणं चास्येश्वरशक्तिरिति स्वरूपत: कारणतश्च निर्वाच्यतैव। न खल्वनिर्वाच्याकार: कश्चिदविद्यात्मा मोहोऽवस्तुत्वेनास्येयद्वैचित्र्यप्रथनसामर्थ्याभावात्। सम्भवे वा पूर्णमेव वस्तुत्वं नानिर्वाच्यता……तस्मात्परमेश्वरस्वातन्त्र्यमेव मायाख्यम्।"

(ई० प्र० वि० वि० खं० 1, पृ० 80)

द्र० (ई० प्र० वि० खं० 2, पृ० 179-80) तथा

(स्प० प्र० पृ० 45)

अवर्गः——अकारादिविसर्गान्तो वर्णसमुदायः। मातृकाक्रमे षोडशशक्तिविशेषविशिष्टः शिवोऽवर्णेनाभिव्यक्ततां याति।

~तद्देवता——यथा—

"अवर्गे तु महालक्ष्मी ·····।"

(स्व॰ तं॰ 1, 34)

~शिवरूपः——अकारादि-विसर्गान्तस्य स्वरवर्गस्य सर्वैः शिवरूपतैवाङ्गीकृता। यथा—

"पूर्ववर्गे भैरवता संस्थितैवानपायिनी ॥"

(शि॰ सू॰ वा॰ व॰ 3, 29)

अवलम्बनम् (जपात्मकम्)——
द्र॰ 'जपः~चतुर्विधः' इति।

अवस्थाः (आपाततः)——जीवनव्यवहारप्रकारभेदा भिन्न-भिन्नेषु स्तरेषु। ताश्च जाग्रदाद्याश्चतस्रः। वेद्यवेदकभावो यः प्रमातॄणां स बहुविधो भवति। तदनुसारमेवावस्थापञ्चकं व्यवस्थापितं शास्त्रे। जीवनव्यापारस्य मूलभूतं चिद्रूपत्वमवस्थातीतत्वात्तुर्यातीतमित्युच्यते। तच्च केचित्सिद्धजना मूलतत्त्वस्वभावभूतत्वेन चतुर्णां तुर्यादि-जाग्रदन्तानामवस्थानामुद्गमविलयस्थानं मन्यमाना अवस्थासु न गणयन्ति। न हि तत्र वेद्यवेदकभावोऽपि कश्चन। केचित् पुनस्तदपि पञ्चमावस्थारूपतया गणयन्ति, तत्रापि स्वस्य, स्वयं, स्वात्मना विमृश्यमानत्वात्। अवस्थाचतुष्टये तु स्फुटो वेद्यवेदकभावश्चतुर्धा भवति। यथा—

"तत्र वेद्यस्य तद्विषयायाश्च संविदो यद्वैचित्र्यमन्योन्यापेक्षं सत् सा अवस्था, न वेद्यस्य केवलस्य न चापि केवलायाः संविदो न चापि पृथक् पृथक् द्वे।"

(तं॰ सा॰ पृ॰ 105)

~चतस्रः (कालाध्वनि)——वेदितृदशा=जाग्रत्, पूर्वाऽवेत्तृता=स्वप्नः, पराऽवेत्तृता=सुषुप्तिः, दिनरात्र्यद्वयम्=तुर्या। प्रमेयप्रमात्र्यद्वयं तु तुर्येति तात्पर्यम्। यथा—

"जाग्रद्वेदितृता, स्वप्नो वेत्तृभावः पुरातनः'
परः सुप्तं, क्षये रात्रिदिनयोस्तुर्यमद्वयम् ॥"

(तं॰ आ॰ 6, 83-84)

~तत्त्वतः——जाग्रदाद्यवस्थाचतुष्टयमपि तदतीततापि च शिवस्य स्वातन्त्र्यविलसितमात्रं नान्यत्। ततस्तत्रत्यः पञ्चप्रकारः सर्वोऽपि प्रपञ्चः शिवात्मक एव। यथा—

"जाग्रत्स्वप्नसुषुप्तान्य-तदतीतानि यान्यपि।
तान्यप्यमुष्य नाथस्य स्वातन्त्र्यलहरीभरः ॥"

(तं॰ आ॰ 1, 80)

~तत्त्वभेदने——पाञ्चदश्यादिस्थितौ तत्तत्प्रमातृवेद्यस्य प्रमेयतत्त्वस्य विषये या भिन्नभिन्नप्रमातृनिष्ठाः भिन्नभिन्नप्रकारा वेत्तृतास्ता एव जाग्रदाद्या अवस्थाः। संविदेवात्र यतो वेत्तृभावेन स्थिता ततः संविद एव विशेषता अवस्थाः। यथा—

"अत्रैवाध्वनि वेद्यत्वं प्राप्ते या संविदुद्भवेत्।
तस्याः स्वकं यद्वैचित्र्यं तदवस्थापदाभिधम् ॥"

(तं॰ आ॰ 10, 227-28)

एवंविधस्य प्रमेयस्य एवंविधप्रमातृवेद्यता, इति अवस्थाभेदस्य मर्म इति तात्पर्यम्।

~पञ्च——एकस्यापि प्रमातुरवस्थाः पञ्च भवन्ति। ताश्च जाग्रत्, स्वप्नः, सुषुप्तिः, तुर्या, तुर्यातीता चेति। यथा—

"जाग्रत् स्वप्नः सुषुप्तं च तुर्यं च तदतीतकम्।
इति पञ्च पदान्याहुरेकस्मिन्वेदके सति ॥"

(तं॰ आ॰ 10, 228-29)

यतस्तुर्यातीतस्य प्रमातृमात्रप्रकाशतया स्थितिस्ततस्तत्पदमपि क्वचित् क्वचिदवस्थासु गण्यते।

~बहुभेदाः——प्रलयाकलादिप्रमात्रन्तराणां विषयेऽपि जाग्रदादिदशाकलना विधीयते। तद्यथा—प्रलयाकलस्य सकलापेक्षया सौषुप्तमपि स्वं स्वरूपं जाग्रत्। ततः पूर्वतनाश्चावस्थाः स्वप्नसुषुप्तितुर्याख्याः। तुर्यातीतं तु मूलभूतं परं पूर्णं संवित्तत्त्वमेव सर्वत्र। तुर्यमपि स्वसंविदात्मकं सर्वत्रानुस्यूतमहमिति। यथा—

"लयाकले हि स्वं रूपं जाग्रत्तत्पूर्ववृत्ति तु।
स्वप्नादीति क्रमं सर्वं सर्वत्रानुसरेद्बुधः ॥"

(मा॰ वि॰ वा॰ 1, 1008)

~भेदनप्रामाण्यतः——शिव एवैकः सर्वत्र प्रमाता। न चैकस्य परस्परभिन्नं वैचित्र्यमुचितम्। ततोऽवस्था भेदमाधायैवासौ तत्र तत्र तत्त्वेषु बहुविधविचित्रतया स्वयं प्रकाशते। यथा—

"तत्र चैषा धरातत्त्वाच्छिवान्ता तत्त्वपद्धतिः।
तस्यामेकः प्रमाता चेदवश्यं जाग्रदादिकम्।
तद्दृश्यंते शम्भुनाथप्रसादाद्विदितं मया ॥"

(तं॰ आ॰ 10, 229-30)

सकलोऽपि प्रमाता पाञ्चदश्यादिधारणाभ्यासे जाग्रदाद्याः सर्वा अवस्थाः समासादयति, नान्यथोत्तरोत्तरधारणाभ्याससम्भवः।

~भेदप्रभेददृष्ट्या——आपेक्षिकप्रमेय - प्रमाण-प्रमातृप्रधानास्तिस्रो जाग्रत्-स्वप्न-सुषुप्त्यवस्थाः, परं शुद्धसंवित्प्रधाना तुर्या। ताश्च प्रत्येकं पुनर्जाग्रदादिभेदाच्चतुर्विधाः। तद्यथा जाग्रज्जाग्रत्, स्वप्नजाग्रत्, सुषुप्तिजाग्रत्, तुर्यजाग्रत् इति। यथा—

"इमा एव तिस्रः प्रमेय-प्रमाण-प्रमात्रवस्थाः प्रत्येकं जाग्रदादिभेदाच्चतुर्विधा उक्ताः।"

(तं॰ सा॰ पृ॰ 106)

~संज्ञाभेदतः——लोकव्यवहारे, ज्ञानिनां परम्परासु, योगिनां च परम्परासु चतसॄणामपि जीवनावस्थानां भिन्नभिन्नानि नामान्तराणि। तद्यथा—

संख्या	लोकव्यवहारे	ज्ञानिपरम्परासु	योगिपरम्परासु।
1	जाग्रत्	सर्वतोभद्रम्	पिण्डस्थम्।
2	स्वप्नः	व्याप्तिः	पदस्थम्।
3	सुषुप्तिः	महाव्याप्तिः	रूपस्थम्।

4	तुर्या	प्रचयः	रूपातीतम्।
5	तुर्यातीतं पदम्	महाप्रचयः	××× ।

तुर्यातीतस्य योगधारणालम्बनीकरणस्याशक्यत्वाद्योगिपरम्परासु न तस्य योगधारणोचितं किमपि विशेषरूपमभिधानम्।

पृथक् पृथक् लक्षणानि स्वे स्वे स्थाने द्रष्टव्यानि। यथा—

"लोकयोगप्रसंख्यानत्रैरूप्यवशतः किल।
नामानि त्रीणि भण्यन्ते स्वप्नादिष्वप्ययं विधिः॥"

(तं० आ० 10, 246)

"स्वप्नादिष्वप्ययं विधिरिति—तेन लौकिकी संज्ञा स्वप्नः, सुषुप्तं, तुर्यं च, यौगिकी-पदस्थं, रूपं (रूपस्थम्), रूपातीतं च, ज्ञानीया व्याप्तिर्महाव्याप्तिः प्रचयश्चेति।"

(तं० आ० वि० खं० 7, पृ० 167)

जागरस्य संज्ञात्रयं—जाग्रत्, पिण्डस्थं, सर्वतोभद्रमिति।

"भूयोऽप्यासामवस्थानां संज्ञाभेदः प्रकाश्यते।
पिण्डस्थः सर्वतोभद्रो जाग्रन्नामद्वयं मतम्॥
द्विसंज्ञं स्वप्नमिच्छन्ति पदस्थं व्याप्तिरित्यपि।
रूपस्थं तु महाव्याप्तिः सुषुप्तस्यापि तद्द्वयम्॥
प्रचयं रूपातीतं च सम्यक् तुर्यमुदाहृतम्।
महाप्रचयमिच्छन्ति तुर्यातीतं विचक्षणाः॥"

(मा० वि० तं० 2, 36-38)

~सामान्यलक्षणतः——मायायां शुद्धविद्यायां, शक्तौ च भिन्नभिन्नप्रकारकोऽवस्थापञ्चकस्य व्यवहारः। तत्र जीवनवृत्तिषु यत्र यत्र यद्यत् स्थिरमनुबन्धि च तत्तज्जाग्रदिति। यत्र यत्र यद्यदस्फुटमननुबन्धि च तत्तत्स्वप्नाख्यम्। यच्च सर्वस्यावेदनं यत्र तत्र तत्सौषुप्तम्। भोग्यस्य भोक्त्राभिन्नीकरणत्वं यत् तदेव तुर्यम्। शिवेन सहाभेदस्तुर्यातीतम्। जाग्रति सकलस्य भोक्तृत्वम्। स्वप्ने प्रलयाकलस्य, सौषुप्ते विज्ञानाकलस्य, तुर्ये मन्त्र-मन्त्रेश-मन्त्रमहेशानामकलस्य च। तुर्यातीते नैव भोगः। यथा—

"(1) किञ्च यस्य यद्यदा रूपं स्फुटं स्थिरमनुबन्धि तज्जाग्रत्। तस्यैव तद्विपर्ययः स्वप्नः, यो लयाकलस्य भोगः। सर्वावेदनं सुषुप्तं, यो विज्ञानाकलस्य भोगः। भोग्याभिन्नीकरणं तुर्यम्, मन्त्रादीनां स भोगः। भावानां शिवाभेदस्तुर्यातीतं सर्वातीतम्।"

(तं० सा० पृ० 107)

"(2) यस्य यद्यत्स्फुटं रूपं तज्जाग्रदिति मन्यताम्॥
तदेवास्थिरमाभाति स्वरूपं स्वप्न ईदृशः।
अस्फुटं तु यदाभाति सुप्तं तत्तत्पुरोऽपि यत्॥
त्रितयस्यानुसन्धिस्तु यादृशादुपजायते।
स्रक्सूत्रतुल्यं तत्तुर्यं सर्वभेदेषु गृह्यताम्॥
यत्त्वद्वैतभरोल्लासि द्राविताशेषभेदकम्।
तुर्यातीतं तु तत्प्राहुरित्थं सर्वत्र योजयेत्॥"

(मा० वि० वा० 1, 1004-7)

अवस्थाभेदविस्तरः——तत्र भिन्नभिन्नेषु तत्त्ववर्गेषु यद्यत् भिन्नप्रकारकमवस्थाभेदवैचित्र्यं तदत्र पृथक् पृथग् वर्ण्यते। यथा—

~एकादशात्मकभेदे——

द्र० 'अवस्थाभेदविस्तरः~प्रलयाकले।

~त्रयोदशात्मकभेदे——

(1) तत्र पुमादिकलान्तानि तत्त्वानि सकलश्च प्रमातृवर्गो जाग्रदवस्था।
(2) प्रलयाकलस्तच्छक्तिश्च स्वप्नः।
(3) विज्ञानाकलस्तच्छक्तिश्च सुषुप्तिः।
(4) मन्त्राद्यास्त्रयो वर्गास्तेषां च शक्तयस्तुर्या।
(5) शक्तिशिवौ तुर्यातीता।

सकलापेक्षया भेदोऽयम्।

"..........त्रयोदशाभिधे पुनः।
स्वरूपं जाग्रदन्यत्तु प्राग्वत्......।"

(तं० आ० 10, 303-4)

प्राग्वदिति=पञ्चदशात्मकभेदवदिति।

~त्र्यात्मकभेदे——

द्र० 'अवस्थाभेदविस्तरः'~मन्त्रमहेश्वरे इति।

~नवात्मकभेदे——विज्ञानाकलेऽवस्थापञ्चकम्।

"नवधा कीर्तिते भेदे स्वं मन्त्रा मन्त्रनायकाः।
तदीशाः शक्तिशम्भू च पञ्चावस्थाः प्रकीर्तिताः॥"

(मा० वि० तं० 2, 31-32)

द्र० 'अवस्थाभेदविस्तरः'~विज्ञानाकले इति।

~पञ्चात्मकभेदे——

द्र० 'अवस्थाभेदविस्तरः'~मन्त्रेश्वरे इति।

~पाञ्चदश्यविधौ——

(1) पाञ्चदश्ये तावद्वस्तुनः स्वरूपं सकलस्तस्य शक्तिश्चेति =जाग्रत्प्रपञ्चः।
(2) प्रलयाकलेन तच्छक्त्या च वेद्यत्वमनुस्यूतत्वं च तत्र स्वप्नावस्था।
(3) सशक्तिकेन विज्ञानाकलेनानुस्यूतत्वं तद्वेद्यतयात्र सुषुप्तिः।
(4) मन्त्रैः मन्त्रेश्वरैर्मन्त्रमहेश्वरैश्च तच्छक्तिभिश्च वेद्यत्वमनुस्यूतत्वं चात्र तुर्यरूपत्वम्।
(5) सशक्तिकेन शिवेन वेद्यत्वमनुस्यूतत्वं चात्र तुर्यातीतरूपत्वम्।

"स्वं रूपं तत्र शक्तिश्च सकलश्चेति तत् त्रयम्।
इति जाग्रदवस्थेयं भेदे पञ्चदशात्मके॥
अकलौ द्वौ परिज्ञेयौ सम्यक् स्वप्नसुषुप्तयोः।
मन्त्रादितत्पतीशानवर्गस्तुर्यं इति स्मृतः॥
शक्तिशम्भू परिज्ञेयौ तुर्यातीते वरानने।

(मा० वि० तं० 2, 27-29)

~पूर्णे परमशिवे——

द्र० अवस्थाभेदविस्तरः'~शिवतत्त्वे इति।

~प्रलयाकले——

(1) सशक्तिकस्य प्रलयाकलस्य स्वं रूपं जाग्रत्।
(2) विज्ञानाकलस्य शक्तिः स्वप्नः।
(3) विज्ञानाकलः सुषुप्तिः।
(4) मन्त्राद्यास्त्रयस्तच्छक्तयश्च तुर्या।
(5) शिवशक्ती तुर्यातीतम्।

"स्वं जाग्रत् स्वप्नसुप्ते द्वे तुर्याद्यत्र च पूर्ववत्।
(तं० आ० 10, 304)

"द्वे इति विज्ञानाकल-तच्छक्ती। तेन विज्ञानाकलशक्तिः स्वप्ने, विज्ञानाकलस्तु सुषुप्ते इति।"
(तं० आ० वि० खं० 7, पृ० 205)

~मन्त्रमहेश्वरे——तत्त्वभेदने तस्मिन् भावनालम्बनीकृते सत्यवस्थापञ्चकं यथा—

(1) स्वशक्तियुतं मन्त्रमहेश्वरस्वरूपं जाग्रत्।
(2) क्रियाशक्तिः स्वप्नः।
(3) ज्ञानशक्तिः सुषुप्तिः।
(4) इच्छाशक्तिस्तुर्या।
(5) शिवस्तुर्यातीतं पदम्।

"स्वं क्रिया ज्ञानमिच्छा च शम्भुरत्र च पञ्चमः।
महेशभेदे त्रिविधे जाग्रदादि निरूपितम्॥"
(तं० आ० 10, 308)

"त्रिके स्वं शक्तिशक्तीच्छाशिवभेदं विलक्षयेत्।"
(मा० वि० तं० 2, 33-34)

~मन्त्रे——मन्त्रप्रमातरि तत्त्वभेदनाभ्यासालम्बनीकृते सति पञ्चावस्थाः। यथा—

(1) मन्त्रस्य स्वरूपं तच्छक्तिश्चेति जाग्रत्।
(2) मन्त्रेश्वर-तच्छक्ती स्वप्नस्थानीये।
(3) मन्त्रमहेश्वरस्तस्य च शक्तिः सुषुप्तिः।
(4) शिवस्य शक्तिस्तुर्या।
(5) स्वयं शिवस्तुर्यातीतम्।

"सप्तभेदे तु मन्त्राख्ये स्वं मन्त्रेशा महेश्वराः।
शक्तिः शम्भुश्च पञ्चोक्ता अवस्था जाग्रदादयः॥"
(तं० आ० 10, 306)

पूर्ववत् सप्तभेदेऽपि स्वं मन्त्रेशेशशक्तयः।
शिवश्चेति परिज्ञेया पञ्चैव वरवर्णिनि॥"
(मा०वि०तं० 2, 32-33)

~मन्त्रेश्वरे——तत्त्वभेदने मन्त्रेश्वरे धारणाविषयतामुपनीते सति पञ्चावस्था एताः—

1. मन्त्रेश्वरस्य सशक्तिकं स्वं स्वरूपं जाग्रत्।
2. मन्त्रमहेश्वरशक्तिः स्वप्नः।
3. मन्त्रमहेश्वरः सुषुप्तिः।
4. शिवस्य शक्तिस्तुर्या।
5. शिवः-तुर्यातीतम्।

यथा—

"स्वरूपं मन्त्रमाहेशी शक्तिर्मन्त्रमहेश्वरः।
शक्तिः शम्भुरिमाः पञ्च मन्त्रेशे पञ्चभेदके॥"
(तं० आ० 10, 307)

"स्वं शक्तिः स्वा निजेशानः शक्तिशम्भू च पञ्चके॥"
(मा०वि०तं० 2, 33)

~विज्ञानाकले——

(1) सशक्तिकस्य विज्ञानाकलस्य स्वरूपं जाग्रत्।
(2) मन्त्रस्तच्छक्तिश्चेति स्वप्नः।
(3) मन्त्रेश्वरस्तच्छक्तिश्चेति सुषुप्तिः।
(4) मन्त्रमहेश्वरस्तच्छक्तिश्चेति तुर्या।
(5) शिवः शक्तिश्चेति तुर्यातीतम्।

यथा—

"विज्ञानाकलभेदेऽपि स्वं मन्त्रा मन्त्रनायकाः।
तदीशाः शक्तिशम्भ्वित्थं पञ्च स्युर्जाग्रदादयः॥"
(तं०आ० 10, 305)

~शिवतत्त्वे——

(1) क्रियाशक्तिः=जाग्रत्।
(2) ज्ञानशक्तिः=स्वप्नः।
(3) इच्छाशक्तिः=सुषुप्तिः।
(4) आनन्दशक्तिः=तुर्या।
(5) चिच्छक्तिः=तुर्यातीतं पदम्।

यथा—

"एकत्रापि प्रभौ पूर्णे चित्तुर्यातीतमुच्यते।
आनन्दस्तुर्यमिच्छैव बीजभूमिः सुषुप्तता॥
ज्ञानशक्तिःस्वप्न उक्तःक्रियाशक्तिस्तु जागृतिः।
न चैवमुपचारः स्यात् सर्वं तत्रैव वस्तुतः॥
(तं०आ० 10, 299-300)

"स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम्।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते॥"
(ई०प्र० 1-5-10)

पञ्चाप्यवस्थाः बीजभावेन शिवे पञ्चशक्तिरूपतया स्थिताः इति।

"व्यापारादाधिपत्याच्च तद्धान्या प्रेरकत्वतः।
इच्छानिवृत्तेः स्वस्थत्वाच्छिव एकोऽपि पञ्चधा॥"
(तं०आ० 10, 309)

सृष्ट्यादिव्यापारवत्त्वं जाग्रत्, तदाधिपत्यं स्वप्नः, तत्प्रशमः सुषुप्तिः, तत्प्रेरकत्वं तुर्या, स्वस्मिन् स्थितिः तुर्यातीता इति।

~सप्तात्मकभेदे——

द्र० 'अवस्थाभेदविस्तरः'~मन्त्रे इति।

अवस्थाभेदषोडशकम्——जाग्रदाद्याश्चतस्रोऽवस्थाः परस्परं मिश्रिताः सत्यः प्रत्येकं चातुर्विध्येन सङ्कलिताः षोडशभेदभिन्ना भवन्ति। तासां भेदप्रभेदसिद्धान्तोऽयं मनाक् सङ्केतितः शास्त्रेषु, विशेषतश्चास्माभिर्गुरूपदेशानुसारं सम्यक् विचिन्त्यैवं स्पष्टीकृतो यथा—

अवस्था	तद्भागिनः प्राणिनः
(1) जाग्रज्जाग्रत्	तिर्यञ्चः प्राणिनः, लोकव्यवहारनिमग्नाश्चार्थकामपरा मानवाः।
(2) जाग्रत्स्वप्नः	मनीषिणो, विद्वांसः, कवयः, शास्त्रकृतः, कलाकाराः, वैज्ञानिकाद्याश्च।
(3) जाग्रत्सुषुप्तिः	समाधिनिष्ठा योगिनः।
(4) जाग्रत्तुर्या	समावेशभाजः शिवयोगिनः।
(5) स्वप्नजाग्रत्	स्वर्गादिलोकेषु निवासिनः, अष्टविधा देवयोनयः, सालोक्यभावस्थाश्च भक्तसाधकाः।
(6) स्वप्नस्वप्नः	सामीप्यनिष्ठाः भक्ताः।
(7) स्वप्नसुषुप्तिः	सारूप्यनिष्ठाः भक्ताः।
(8) स्वप्नतुर्या	सायुज्यपदभाजो भक्ताः।
(9) सुषुप्तिजाग्रत्	अपवर्गपदस्था नैयायिकाद्याः।
(10) सुषुप्तिस्वप्नः	कैवल्यपदभाजः सांख्यादिनिष्ठाः।
(11) सुषुप्तिसुषुप्तिः	निर्वाणपदस्थाः बौद्धाः।
(12) सुषुप्तितुर्या	ब्रह्मनिर्वाणभाजोऽद्वैतवेदान्तिनो, विज्ञानाकलाश्च शैवाः।
(13) तुर्यजाग्रत्	मन्त्राख्याः प्रमातारो (विद्येश्वराः)।
(14) तुर्यस्वप्नः	मन्त्रेश्वराः।
(15) तुर्यसुषुप्तिः	मन्त्रमहेश्वराः।
(16) तुर्यतुर्या	शाक्तशाम्भवा अकलाः प्राणिनः।
(17) तुर्यातीतंपदम्	परमशिव एव केवलः।

यथा—

"किन्तु जाग्रत्पदादीनां प्रत्येकं बहुभेदता।"
(मा०वि०वा० 1, 265)

"एकैकत्र चतूरूपसद्भावाद् वितते ततः"
(तदेव 1, 1011)

"इत्थं तिस्रस्त्रिप्रकाराः प्रत्येकान्योन्ययोगतः॥
मुख्यगौणत्वभेदेन ज्ञेयाः सम्यक् चिदात्मना.
(शि०सू०वा०भा० पृ० 13)

तिसृणां त्रिप्रकारत्वमत्रोपलक्षणं चतसृणां चतुष्प्रकारतायाः। इदं तावदत्रावधेयं सुधीभिः—

(1) वस्तुतो हि जाग्रद्दशाप्राणिनः स्थूलदेहा बाह्यान्तरोभयेन्द्रियैर्व्यवहरन्तः। ते च तिर्यगादिमानवान्ताः, तेष्वेव तारतम्यतश्चत्वारोऽवान्तरभेदा ये उपरि निर्दिष्टाः।

(2) लिङ्गदेहैरेव सर्वानपि व्यवहारान् निभालयन्तः प्राणिनो वास्तविकस्य स्वप्नसंसारस्य जीवाः। ते च विविधा देवयोनयो, गन्धर्वयक्षाप्सरोविद्याधराद्याः, दिक्पालाः, देवर्षिप्रभृतयश्च सर्वे स्वरादिलोकेषु निवासिनः सिद्धाश्चेति।

(3) वास्तविकी मूलभूता च सौषुप्तस्थितिः प्रलयाकलविज्ञानाकलप्राणिनाम्। त एव तारतम्येन चतुर्वर्गमया यथोपरि प्रतिपादिताः।

(4) तुर्यदशा तु मुख्या मन्त्रादीनामेव शुद्धानां प्रमातृवर्गाणाम्। तेषामपि शुद्धितारतम्यमुपरिनिर्दिष्टानुसारं वेदितव्यम्, इति।

अवादनम्~**समयविशेषः**——कथनस्य निषेधोऽनुशासनात्मकः। अकथनमष्टधा। समयदीक्षायां नियमविशेषः। यथा—

"स्वभावं मन्त्रतन्त्राणां समयाचारमेलकम्।
असत्प्रलापं परुषमनृतं नाष्टधा वदेत्॥
(उद्ध० देवीयामलतः तं०आ० 15, 523-24)

अवान्तरप्रलयः——श्रीकण्ठनाथः स्वदिनस्यान्ते बुद्धितत्त्वं तदधिष्ठितांश्च प्राणिनः संहरति। एषोऽवान्तरप्रलयो यस्मिन् करणकार्यतत्त्वसमेतं महत्तत्त्वं मूलप्रकृतौ लयं याति। यथा—

"तथा श्रीकण्ठ एव स्यात् साक्षात्संहारकृत्प्रभुः।"
(तं०आ० 6, 149)

"स एषोऽवान्तरलयस्तत्क्षये सृष्टिरुच्यते॥"
(तदेव 151)

"श्रीकण्ठनाथस्तदा संहर्ता। एषोऽवान्तरप्रलयः। तत्क्षये सृष्टिः।" (तं०सा० पृ० 55)

अवान्तरसम्बन्धः——

द्र० 'सम्बन्धः'~अवान्तरः इति।

अविकल्पाहंविमर्शः——

द्र० 'शुद्धोऽहंविमर्शः' इति।

अविद्या——(1) मूलभूतमज्ञानं प्राणिनाम्। (2) जीवानामवास्तविकं ज्ञानं स्वात्मविषये जगद्विषये च।

~**वेदान्तानुसारम्**——ब्रह्मणोऽतिरिक्तं कल्पितमनादिप्रातिभासिकं तत्त्वं यद्वशाद् भ्रमात्मकतया जगदादिद्वैतावभासः यच्चाभासमानमप्यनिर्वचनीयम्।

शैवपरिभाषानुसारम्——न खलु विद्याया अभावो अविद्या, अपि स्वल्पार्थीयोऽत्र नञ्। तेनापूर्णख्यातिरूपाख्यातिरेवाविद्या। सा च पारमेश्वरस्वातन्त्र्योत्थापिता, यतस्तत् स्वातन्त्र्यं लीलाविलासशीलं सत् स्वलीलया स्वीयमपरिमितविज्ञानस्वरूपत्वं तिरोधत्ते।

द्र० 'अख्यातिः' इति।

अवैराग्यम्——यद् बुद्धिधर्माष्टके परिगणितमवैराग्यं तद् रागतत्त्वाद् भिन्नम। वैराग्ये वाऽप्यवैराग्येऽपि वाऽप्यणोः प्राणिन

उपरचितं दृश्यते यतस्ततोऽवैराग्यस्य बुद्धिधर्मत्वमेव रागतत्त्वस्य चाणुधर्मत्वमिति नामार्थसादृश्यान्न परस्परं भ्रमितव्यम् । यथा—

"न चावैराग्यमात्रं तत् तत्राप्यासक्तिवृत्तितः ॥
विरक्तावपि तृप्तस्य सूक्ष्मरागव्यवस्थितेः ।"
(तं०आ० 9, 200-201)

द्र० 'रागतत्त्वम्' इति ।

अवैराग्यभेदाः (नामतः)——परिगणिताः स्वच्छन्दतन्त्रे यथा—

अनम्भा असलिला च अनोघावृष्टिरेव च॥
असुतारमसुपारमसुनेत्रमतः परम् ।
अकुमारी च विज्ञेयानुत्तमाम्भसिका तथा ॥"
(स्व० तं० 11, 155-56)

अव्यक्ततत्त्वम्——मूलप्रकृतिः ।

द्र० 'प्रकृतितत्त्वम्' इति ।

अव्यक्तलिङ्गम्~उच्चारयोगे——उच्चारविश्रान्तिहृदयं योगिनीहृदयाख्यम्, अपरिमिताहंपरामर्शमयं परस्पन्दरूपं नरशक्ति-शिवाभेदात्मकं परं तत्त्वम् 'अव्यक्तलिङ्गम्' । एतच्च परमोक्षमात्रफलदं शिवत्वप्रधानं च । साक्षात्कार्यं चोच्चारयोगाभ्यासपरिणतौ । यथा—

"एतदव्यक्तलिङ्गं तन्नरशक्तिशिवात्मकम् ।
यत्र विश्वमिदं लीनं यदन्तःस्थं च गम्यते ॥"
(मा०वि०वा० 2, 61)

"एवं प्रदर्शितोच्चारविश्रान्तिहृदयं परम् ॥
यत्तदव्यक्तलिङ्गं नृ-शिव-शक्त्यविभागवत् ।"
(तं०आ० 5, 112-13)

"योगिनीहृदयादिशब्दव्यपदेश्यमहम्परामर्शमयं संवित्स्पन्दात्मकं प्रकृष्टं सत्तत्वं, तन्नरशक्तिशिवाविभागवत्वादव्यक्तलिङ्गमुच्यते ॥" (तं०आ०वि०खं० 3, पृ० 422)

(2) उच्चारयोगाभ्यासे शुद्धसंवित्तत्वान्तः प्रवेशारम्भे समुदितायां निद्रालुताभ्यामवस्थायां साक्षात्कार्यमेतन्नर-शक्ति-शिवात्मकं तत्त्वम्, जगतो लयागमनस्थानभूतत्वेन लिङ्गाभिधानम् । यथा—

"भेदाख्यमायारहिते परिपूर्णचिदात्मनि ।
प्रविशेत्प्रथमं यावत् स्वबलाक्रमणक्रमात् ॥
भवेन्निद्रास्य सा देहावेशशैथिल्यदायिनी ।
कम्प्ररूपैव यावन्नो रूढिर्जाता परात्मनि ॥"
(मा०वि०वा० 2, 57 ता 67)

~उपास्यम्——बाह्यं लिङ्गं विहाय योगिनीहृदयाख्यमव्यक्तलिङ्गमेव हि परयोगिनः कृते उपास्यम् । यथा—

"अत्र लिङ्गे सदा तिष्ठेत् पूजाविश्रान्तितत्परः ।"
(तं०आ० 5, 120)

"मृच्छैलधातुरत्नादिभवं लिङ्गं न पूजयेत् ।
यजेदाध्यात्मिकं लिङ्गं यत्र लीनं चराचरम् ॥"
(मा०वि०तं० 18-2)

परयोगिनः कृत उक्तमेतन्न जनसाधारणकृते ।

"बहिर्लिङ्गस्य ¦ लिङ्गत्वमनेनाधिष्ठितं यतः ।"
(मा०वि०तं० 18, 13)

द्र० 'लिङ्गम्' इति ।

अव्यक्तहकला——विसर्गात्मको वर्णः । स एवाव्यक्तहकारः । यथा——

"अतः एव विसर्गोऽयमव्यक्तहकलात्मकः ।"
(तं०आ० 3, 146)

अव्यतिरेकतुर्यातीतसमता——

द्र० 'तुर्यातीतता~व्यतिरेकसंस्कारशेषा' इति ।

अशुद्धाः~प्रमातारः——ग्राह्यविषयाकारैरुपरक्ताः प्रमातारोऽशुद्धा इति गण्यन्ते । ते च (1) विज्ञानाकलः, (2) प्रलयाकलः, (3) सकलश्चेति । आणवादिमलांशसम्भिन्नत्वमेषामशुद्धताया बीजम् । मन्त्राख्या विद्येश्वराः प्रमातारो मायीयमलसम्भेदवन्तोऽपि शुद्धेष्वेव गण्यन्ते; तेषां शुद्धे सैश्वर्ये च चिन्मात्र एव यतोऽहंभावः । यथा—

"ग्राह्याकारोपरागात्तु ग्रहीत्राकारतावशात् ॥
सकलान्तास्तु तास्त्रिस्त्रः इच्छाज्ञानक्रिया मताः ।"
(तं०आ० 10, 180-81)

अशुद्धा सृष्टिः——मायामारभ्य धरातत्त्वं यावद्या तत्त्वसृष्टिरसौ चिद्रूपतायास्तिरोधानतोऽशुद्धा सृष्टिरिति गण्यते ।

~सप्रयोजना——भोगवासनाविष्टानामणूनां भोगसिद्धयेऽनन्तनाथो मायां प्रक्षोभ्य ततोऽशुद्धां कञ्चुकादिमयीं सृष्टिं विधत्ते । यथा—

"तद्भोगवासनानुविद्धानामणूनां भोगसिद्धये श्रीमानघोरेशः सृजति-इति युक्तमुक्तम् ।"
(तं०सा० पृ० 76)

"भोगसाधनसंद्धियै भोगेच्छोरस्य मन्त्रराट् ।
जगदुत्पादयामास मायामाविश्य शक्तिभिः ॥"
(मा० वि० तं० 1, 25)

अशुद्धिः——कार्मादिमलत्रयसम्भेदवत्त्वम् ।

द्र० 'कालुष्यम्' इति ।

अशुद्धोऽध्वा——मायीयस्तत्त्वभुवनादिप्रपञ्चोऽशुद्धोऽध्वा । अस्मिन्नशुद्धेऽप्यध्वनि विद्यमानेषु पदार्थेषु सर्वव्यापिकायाः परिपूर्णशिवरूपताया भावना विधीयते आणवोपायनीत्या । तस्या भाव-

नाया अभ्यासेन जडमपि जगत् स्वात्मशिवतया साक्षात्कर्तुं शक्यते। तदस्याशुद्धेषु तत्त्वेषु विधीयमानस्य भावनाभ्यासस्यायं योगमार्गोऽशुद्धोऽध्वेति ज्ञेयम्। तदुपयोगितया सर्वैवैषा मायीयाऽशुद्धा सृष्टिरशुद्धोऽध्वेति भण्यते। अस्याध्वनः स्रष्टा भगवाननन्तनाथः। यथा

"अशुद्धं पुनरध्वानमनन्तापरनामाघोरेशः सृजतीश्वरेच्छावशेन प्रक्षुब्धभोगलोलिकानामणूनां भोगसिद्ध्यर्थम्।"

(तं० सा० पृ० 75)

"भोगेच्छोरुपकारार्थमाद्यो मन्त्रमहेश्वरः ॥
मायां विक्षोभ्य संसारं निर्मिमीते विचित्रकम्।"

(तं० आ० 9, 148-49)

भगवान्सदाशिव एव महामायाभूमिकामवतीर्णः सन् मन्त्रप्रमातॄणामीश्वरो भगवाननन्तनाथः। अत एव 'आद्यो मन्त्रमहेश्वरः' इत्युक्तः।

द्र० (ष० त्रिं० त० सं० वि० पृ० 5)

अश्वः ~वर्णः——णकार इति। यथा—

"अश्वो णः।"

(तं० आ० वि० खं० 12, पृ० 220)

अष्टकम्——अघोरादिरूपम्। यथा—

"अष्टकेनाघोरादिना।"

(तं० आ० वि० खं० 1, पृ० 154)

अष्टन्यासः——षोढान्यासमध्ये चतुर्थोऽघोरादिन्यासः। यथा—

"अष्टावघोराद्या यदुपर्यघोर्याद्यष्टकम्।"

(तं० आ० वि० खं० 9, पृ० 923)

अष्टसिद्धयः——अणिमाद्या एव प्रसिद्धा।

~अष्टात्रिंशं-तत्त्वम्——उपदेशादौ भावनाभ्यासे च सप्तत्रिंशेऽपि भावनाविषयतया वेद्यतामापन्ने सति यद् वेत्तृमात्रं साक्षिभूतं तदष्टात्रिंशमिति साधनाक्रमे व्यवहारः। अष्टात्रिंशस्योपदेशविषयत्वे सप्तत्रिंशमेव साक्षिभूतम्—उभयोः समानरूपत्वात्। ततो नानवस्था, नाप्यन्योन्याश्रयता, अपि त्वेकाश्रयतैव। यथा—

"तस्याप्युक्तनयाद्वेद्यभावेऽत्र परिकल्पिते।
यदास्ते ह्यनवच्छिन्नं तदष्टात्रिंशमुच्यते ॥"

(तं० आ० 11, 22-23)

"तच्चापि क्लृप्तवेद्यत्वं यत्र भाति स चिन्मयः।
अष्टात्रिंशत्तमः सोऽपि भावनायोपदिश्यते।
यदि नाम ततः सप्तत्रिंश एव पुनर्भवेत्।
अविभागस्वतन्त्रत्व - चिन्मयत्वादिधर्मता ।
समैव वेद्यीकरणं केवलं त्वधिकं ततः ॥"

(तदेव 11, 26-28)

"षट्त्रिंशस्यैव शिवस्य स्वप्रकाशत्वेऽप्युपदेशभावनादौ कल्पितायामपि प्रमेयतायां, तथाहि—'यादृशो यक्षस्तादृशो बलिरप्यस्य' इतिवत्तादृशेनैव प्रमात्रा भाव्यमिति सप्तत्रिंशं रूपं कल्पितं, तस्याप्येवंरूपतायामष्टात्रिंशं, तस्याप्येवंरूपतायामनवस्थापरिहाराय पुनः सप्तत्रिंशमेव रूपं प्रमातृत्वेन कल्पितम्, इति त्रयस्याप्यस्य प्रत्येकं प्रमातृत्वमेयत्वरूपत्वे शिवतत्त्वस्य षट्चक्रत्वम्।"

(तं०आ०वि० खं० 7/2, पृ० 25)

"सर्वावच्छेदशून्यं शिवतत्त्वं षट्त्रिंशम्। तद्यदोपदिश्यते भाव्यते वा, यत् तत्प्रतिष्ठास्पदं तत्सप्तत्रिंशं, तस्मिन्नपि भाव्यमाने अष्टात्रिंशं, न चानवस्था-तस्य भाव्यमानस्यानवच्छिन्नस्वातन्त्र्ययोगिनो वेद्यीकरणे सप्तत्रिंश एव पर्यवसानात्।"

(तं०सा० पृ० 110)

अष्टादशतत्त्वविधिः——तत्त्वाध्वधारणास्वेका धारणा। यथा—

"एवमष्टादशाख्येऽपि विधौ न्यायं वदेत्सुधीः।"

(तं०आ० 11, 38)

"शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
मनो बुद्धिरहङ्कारो गुणाः प्रकृतिरेव च ॥
पुरुषो नियतिश्चैव कालो माया तथैव च।
विद्या चैवेश्वरं तत्त्वं सादाख्यं शक्तिगोचरः ॥
अष्टादशैवं तत्त्वानि··· ··· ··· ··· ··· ···।"

(तं०आ०वि० खं० 7/2, पृ० 33)

अष्टारं-चक्रम्——भैरवत्रयं, देवीत्रयं, कुलेश्वरः, कुलेश्वरी चेति। यथा—

"प्रमाणस्य प्रमातरि विश्रान्तेस्तद्गतस्यापि रूपचतुष्टयस्य पृथगभावात् संहारात्मप्रमातृप्रधानं भैरवत्रयं, देवीत्रयं, कुलेश्वरः, कुलेश्वरी चेत्यष्टारं चक्रमुच्यते।"

(तं०आ०वि० खं० 3, पृ० 138)

अष्टारदेव्यः——ब्राह्म्याद्या अष्टौ मातरः। यथा—

"माहेशी ब्राह्मणी स्कान्दी वैष्णव्यैन्द्री यमात्मिका।
चामुण्डा चैव योगेशीत्यष्टाघोर्यादयोऽथ वा ॥"

(तं०आ० 33, 3)

ब्राह्मणीति ब्रह्माणी।

अष्टाष्टकं-चक्रम्——

द्र० 'सादाशिवं चक्रम्' इति।

द्र० (तं०आ०वि० खं० 1, पृ० 41-43) इति च।

असद्गुरुः——

द्र० 'गुरुः'~असद्रूपः इति।

असाधारणी~सृष्टिः——ईश्वरकृतां सृष्टिमाधारीकृत्य एकैकेन जीवेन स्वप्नसङ्कल्पादौ क्रियमाणस्तत्तद्भावजातावभासः। निजाऽसौ जीवस्य सृष्टिरसाधारणी, नान्येन जीवेन वेद्या। यथा—

" 'तस्यासाधारणी सृष्टिरीशसृष्ट्युपजीविनी' इत्यनेन त्वसाधारणी पशुप्रमातृकर्तृका, यत्र न मिश्रतापत्तिः प्रमातॄणाम् ।"

(ई०प्र०वि०वि० खं० 2, पृ० 198)

द्र० 'सृष्टिः'~असाधारणी इति।

असामयिकीदन्ता——(1) ईश्वरसदाशिवदशयोः संवित्प्रकाशेनैव प्रकाशमानाया, अहन्तानिषेधमात्रस्वरूपायाः, अविकल्पायाः, सामान्याकाराया, विशेषरूपताहीनाया, इदन्ताया अवभासो भवति। असौ सूक्ष्माविकल्पा सामान्याकारेदन्ताऽहन्ताप्रकाशान्तर्गतत्वेनासामयिकीदन्ता, यतो नैव तत्र सङ्केतात्मकस्य, मायीयस्य समयस्य कोऽप्यवकाशः। यथा—

"ईश्वरदशायां भावोल्लासनान्तरीयकत्वेन संवित्सङ्कोचरूपं निषेध्यानुपरक्तनअर्थमात्ररूपं शून्यं संवित्प्रकाशेनैव प्रकाशमानमहन्तानिषेधरूपामसामयिकीमिदन्तामुल्लासयति।"

(ई०प्र०वि० खं० 2, पृ० 260-61)

(2) सामान्यं प्रमेयतामात्रं सङ्केतग्रहरहितम्। यथा—

"इहाभासा एव तावदर्थास्ते च परामर्शैक्येन कदाचिन्मिश्रीक्रियन्ते, यत्र स्वलक्षणता, मिश्रताभवन एव तु कदाचिदनामिश्रा एवावमृश्यन्ते, यत्र सामान्यलक्षणता। उभयात्मनोऽप्यसामयिकेनाकृतकेनाङ्गुल्यादिनिर्देश्यप्रख्येनेदम्भावेन सहजभेदावमर्शनरूपेण··· अवभासनशीलाः। ईश्वरदशायां हि भावोल्लासनान्तरीयकतया संवित्सङ्कोचरूपं निषेध्यानुपरक्तनअर्थमात्ररूपं शून्यं रुद्राधिष्ठातृकं संवित्प्रकाशेनैव प्रकाशमानमहन्तानिषेधरूपामसामयिकीमिदन्तामुल्लासयति।"

(ई०प्र०वि०वि खं० 3, पृ० 367)

असुः——हकारः। यथा—

"असुः-'हः' "

(तं०आ०वि० खं० 11/2, पृ० 137)

अस्त्रम्~बीजमन्त्ररूपम्——फट् इति। यथा—

(क) "अस्त्रमिति फट्"

(तं०आ०वि० खं० 12, पृ० 186)

द्रष्टव्यतां च (तदेव खं० 7/2, पृ० 71 तथा तं०आ० 15, 233)

(ख) "ततोऽपि 'फट्, फट्', 'फट्', इत्यस्त्रजप्तपुष्पं प्रक्षिप्य विघ्नानपसारितान् ध्यात्वा·····॥"

(तं०सा० पृ० 137)

अस्त्रमन्त्रः——

द्र० 'अस्त्रम्'~'बीजमन्त्ररूपम्' इति।

अस्फुटः~भोगः——

द्र० 'भोगः'~'अस्फुटः' इति।

अहम्——(1) विश्वात्मकः शुद्धसंवित्स्वरूपस्य स्वात्मनः परामर्शः। यथा—

"अनुत्तराकुलस्वरूपाद् अकारादारभ्य शक्तिस्फाररूपहकलापर्यन्तं यद्विश्वं प्रसृतं·····तदकार-हकाराभ्यामेव सम्पुटीकारयुक्त्या प्रत्याहारन्यायेन अन्तः स्वीकृतं सद् अविभागवेदनात्मकबिन्दुरूपतया स्फुरितम् अनुत्तर एव विश्राम्यति ॥"

(प्र०हृ० पृ० 50)

(2) प्रमातुः स्वात्मविमर्शः। यथा—

"अहमिति अपरो वेदकरूपः, स च पूर्वापरावस्थाव्यापकत्वेन समस्तप्रमातृप्रसिद्धः, सकलव्यवहारहेतोः अनुसन्धानस्य कर्ता, नित्यमुपलब्धृमात्ररूपत्वाद् एक एव प्रकाशते ॥"

(स्पं०वि० पृ० 28)

(3) स्वात्मपरमेश्वरः। यथा—

"अत एवाकृत्रिमाहमिति-सतत्वः, स्वयंप्रकाशरूपः परमेश्वरः पारमेश्वर्या शक्त्या शिवादि-धरण्यन्तजगदात्मना स्फुरति प्रकाशते च। एतदेव अस्य जगतः कर्तृत्वमजडत्वं च, जगतः कार्यत्वमपि एतदधीनप्रकाशत्वमेव ॥"

(प०प्रा० पृ० 3)

~प्रत्यवमर्शः——अविकल्पः शुद्धः परिपूर्णश्चिदात्मकोऽहंपरामर्शः, परमेश्वरस्य परमेश्वरताबीजभूतः स्वभावः। यथा—

(क) "अहंप्रत्यवमर्शो यः प्रकाशात्मापि वाग्वपुः।
नासौ विकल्पः ··· ··· ··· ··· ··· ··· ॥"

(ख) "प्रकाशस्य विशुद्धसंविद्रूपस्य देहादिसंस्पर्शैरनाविलीभूतस्य य आत्मा जीवितभूतः सारस्वभावो विच्छेदशून्योऽन्तरभ्युपगमकल्पोऽनन्यमुखप्रेक्षित्वस्वातन्त्र्यविश्रान्तिरूपोऽहमिति प्रत्यवमर्शः, असौ विकल्पो न भवति ॥"

(ई० प्र० वि० खं० 1, पृ० 239)

(ग) "अहमिति शुद्धचिद्विमर्शो न विकल्पः, प्रतियोग्याभासनाद्यनुपलब्धेः।"

(तदेव पृ० 290)

प्रतीपं स्वात्माभिमुखतयाऽहमिति विमर्शः।

~प्रकाशः—अनन्यमुखत्वेन स्वत एव प्रकाशमानः प्रकाशोऽहम्प्रकाशः ॥यथा—

"अहम्प्रकाशमयत्वमेतदुच्यते—प्रकाश्यतायां स्वातन्त्र्यमनन्यमुखप्रेक्षित्वम् ।"

(ई०प्र०वि०वि०खं० 1, पृ० 261)

~बीजरहस्यम्— अकारोऽत्रानुत्तरपरमशिवाभिव्यञ्जकः, हकारश्च विश्वात्मकतच्छक्तिद्योतकः। अनुस्वारोऽत्रैतद्व्यनक्ति यद्विश्वं संविदैव सदा द्योतत इति। यथा—

"संवित्तौ भाति यद्विश्वं तत्रापि खलु संविदा।
तदेतत् त्रितयं द्वन्द्वयोगात् संघाततां गतम् ॥
एकमेव परं रूपं भैरवस्याहमात्मकम् ।"

(तं०आ०3, 207-8)

संवित्तौ = अकारे, विश्वं = हकारः, संविदा = अनुस्वाररूपतया प्रसृतेनाकारेणैव इति ।

अहंस्वरूपिणी——अहमिति स्वरूपविशिष्टा, पूर्णाहन्तास्वरूपिणी, प्रकाश-विमर्श-सामरस्याकारा परा-संवित् । यथा—

"बालारुणा विजयतेऽज्ञानदाऽहंसरूपिणी ।
अहंस्वरूपिणी इति ।।"

(आ॰वि॰सु॰ पृ॰ 22)

अहम्भावः——अहमो भावः । स च शुद्धचैतन्यात्मके आत्म तत्त्व एव विश्रान्तो वस्तुतो, न पुनर्मायाकल्पिते देहप्राणादौ । तत्रापि योऽहन्ताविमर्शोऽसौ मायाकृतस्वरूपतिरोधानकारणक एवाज्ञानरूपः । ज्ञाते च वास्तविके स्वरूपे देहादिनिष्टस्याहमिति प्रत्ययस्य विलयो भवति । तदसौ मायाकल्पितोऽहमिति सङ्कुचितः स्वात्मविमर्शोऽभिमननात्मकोऽहङ्कार इति । शुद्धश्चाहंविमर्शः संविन्मात्रनिष्ठोऽहम्भाव इति वा केवलमहमिति वा व्यवह्रियते । यथा—

"नार्थव्यवस्था प्राणादावहम्भावनिरोधतः ।
प्रकाशस्यात्मविश्रान्तिरहम्भावो हि कीर्तितः ।।"

(अ॰प्र॰सि॰ 22)

अहंकारः~आपाततः——जडे वस्तुनि स्वात्मताविमर्शः स्वीयताविमर्शश्च । यथा—

"अहं ममेदमित्येतद्बुद्धिहेतुरहंकृतिः ।"

(अ॰प्र॰पं॰ 26)

~करणस्कन्धतः—स्कन्धद्वयं ह्यहङ्कारस्य । तत्र करणस्कन्धतोऽहङ्कारोऽन्तःकरणत्रयमध्ये गण्यते । प्रकृतिस्कन्धतश्चासौ सर्वेषां करणतत्त्वानां तन्मात्रतत्त्वानां चोपादानकारणमिव संस्तदाकारतया परिणमते तथा, यथा सांख्यशास्त्रे प्रतिपादितम् । परं न स्वयं परिणमते, अपितु श्रीकण्ठनाथेन तथा परिणामरूपतां नीयत इति । यथा—

"इत्ययं करणस्कन्धोऽहङ्कारस्य निरूपितः ।
त्रिधास्य प्रकृतिस्कन्धः सत्त्व-राजस-तामसः ।।" इत्यादि ।

(तं॰ आ॰ 9, 233)

द्र॰ 'प्रकृतिस्कन्धतः' इति ।

~करणात्मकः——कर्त्रंशस्पर्शित्वादहङ्कारस्य करणत्वं सिद्ध्यति । यथा—

"करणत्वमथो युक्तं कर्त्रंशस्पृक्त्वयोगतः"

(तं॰ आ॰ 9, 242)

~तत्त्वविशेषः——बुद्धितत्त्वपर्यायस्य महत्तत्त्वस्य प्रथमं बहिर्मुखपरिणामविशेषतोऽहङ्कारस्य सृष्टिः । तेन च वेद्यच्छायाकलुषेऽपि पुरुषप्रकाशानुग्रहीते बुद्धिवृत्तिरूपे वस्तुनि सततमहमित्यभिमननम् । तदेतदभिमननसामर्थ्यमभिमानो नामान्तःकरणविशेषोऽहङ्कारः । यथा—

"बुद्धेरहंकृत् तादृक्षे प्रतिबिम्बितपुंस्कृतेः ।
प्रकाशे वेद्यकलुषे यदहंमननात्मता ।।"

(तं॰आ॰ 9, 230)

"बुद्धितत्त्वादहंकारो येन बुद्धिप्रतिबिम्बिते वेद्यसम्पर्ककलुषे पुंप्रकाशे अनात्मन्यात्माभिमानः, शुक्तौ रजताभिमानवत् ।"

(तं॰सा॰पृ॰ 86)

द्र॰ (मा॰वि॰वा॰ 1, 875) चापि ।

~तैजसः——सत्त्वगुणप्रधानोऽहङ्कारः ।

~त्रिप्रकारः——तैजसो, वैकृतो भूतादिश्चेति-प्रकृतिस्कन्ध रूपतायाम् अहङ्कारस्त्रिविधानां तत्त्वानां प्रकृतिर्यतः । यथा—

"तैजसो वैकृताख्यश्च भूतादिश्च तृतीयकः ।
अहंकारस्त्रिधा प्रोक्तो मया ते वरवर्णिनि ।।"

(स्व॰तं॰ 11, 136)

स च क्रमेण सत्त्वगुणप्रधानो, रजोगुणप्रधानस्तमोगुणप्रधानश्चेति । यथा—

"त्रिधास्य प्रकृतिस्कन्धः सात्त्वराजसतामसः ।।

(तं॰आ॰ 9, 233)

तत्र सत्त्वप्रधानस्तैजसो, रजःप्रधानो वैकृताख्यस्तमःप्रधानश्च भूतादिः ।

~पदव्युत्पत्तितः——संविद्रूप आत्मनि योऽहमिति विमर्शोऽसौ वास्तविकोऽहम्, शिवात्मकश्च । यः पुनः शरीरप्राणादौ जडे वस्तुनि स कृत्रिमोऽहं सन् कृत्रिमत्वादेव 'कार' इत्युपपदयुक्तोऽहङ्कारः । यथा—

"अत एव विशुद्धात्मस्वातन्त्र्याहंस्वभावतः ।
अकृत्रिमादिदं त्वन्यदित्युक्तं कृतिशब्दतः ।।"

(तं॰आ॰ 9, 232)

~प्रकृतिस्कन्धतः——अहङ्कारो ह्यभिमननात्मकः । तद्रूपत्वञ्च तस्य करणस्कन्धत्वम् । अहङ्कार एव बाह्यान्तःकरणवर्गरूपतया तन्मात्ररूपतया च परिणमते । स एष तस्य प्रकृतिस्कन्धः । करणतन्मात्रवर्गयोरहङ्कारपरिणामरूपत्वात्, तद्विकाररूपत्वात्, तस्य च तत्तत्प्रकृतिभूतत्वात् ।

द्र॰ 'करणस्कन्धतः' इति ।

~भूतादिः——पञ्चभूतप्रकृतिभूतानां तन्मात्राणां प्रकृतिभूतस्तमोगुणप्रधानोऽहङ्कारः । यथा

"भूतादिनाम्नस्तन्मात्रपञ्चकं भूतकारणम् ।।'

(तं॰आ॰ 9, 272)

"शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः ।
गुणा विशिष्टास्तन्मात्रास्तन्मात्रपदयोजिताः ।।
प्रकाशकर्मकृद्वर्गवैलक्षण्यात् तमोभवाः ।
प्रकाश्यत्वाच्च भूतादिरहङ्कारोऽत्र तामसः ।।"

(उद्ध॰तं॰आ॰वि॰ खं॰6, पृ॰298)

~वैकारिकः——रजोगुणप्रधानोऽहङ्कारः, विकारान् प्रति तस्यैव प्रवर्तकत्वात् । तत्र हि—

अनेकेषां स्रष्टव्यानां तत्वानां प्रकृतिरहङ्कारः, यासो विशेषतास्य प्रकृतिस्कन्ध उक्तासौ सृष्टिर्विविधाभिदृष्टिभिः। यथा—

(क) "तत्र सात्त्विको यस्मान्मनश्च बुद्धीन्द्रियपञ्चकञ्च।"

(तं॰सा॰पृ॰ 87)

(ख) "उद्रिक्ततन्मात्रभागाविष्टात्तु सात्त्विकादेवाहंकारात् कर्मेन्द्रियपञ्चकम्।"

(तदेव पृ॰ 88)

(ग) भोक्त्रंशाच्छादकात्तु तमःप्रधानादहंकारात् तन्मात्राणि वेद्यैकरूपाणीति॥"

(तदेव पृ॰ 89)

~(मतान्तरतः)——यथा—

1. अन्ये तु राजसान्मन इत्याहुः। अन्ये तु सात्त्विकान्मनो राजसाच्चेन्द्रियाणीति॥"

(तं॰ सा॰ पृ॰ 89)

2. "उक्त इन्द्रियवर्गोऽयमहङ्कारात्तु राजसात्।
तमः प्रधानाहङ्काराद् भोक्त्रंशच्छादनात्मनः॥
भूतादिनाम्नस्तन्मात्रपञ्चकं भूतकारणम्।"

(तं॰आ॰ 9, 271-2)

3. "अन्ये त्वाहुर्मनो जातं राजसाहंकृतेर्यतः।
समस्तेन्द्रियसञ्चारचतुरं लघु वेगवत्।
अन्ये तु सात्त्विकात् स्वान्तं बुद्धिकर्मेन्द्रियाणि तु॥
राजसाद् ग्राहकग्राह्यभागस्पर्शीनि मन्वते।
खेटपालास्तु मन्यन्ते कर्मेन्द्रियगणः स्फुटम्॥
राजसाहंकृतेर्जातो रजसः कर्मता यतः।"

(तं॰आ॰ 9, 273-75)

सृष्टिक्रमे भेदोऽपि स्वीकृतोऽभिनवगुप्तपादैः। यथा—

"क्रमश्च विद्यारागादीनां विचित्रोऽपि दृष्ट········तेन भिन्नक्रमनिरूपणमपि रौरवादिशास्त्रेष्वविरुद्धं मन्तव्यम्।"

(तं॰सा॰ पृ॰ 84)

4. "अहङ्कारस्तैजस-वैकारिक-भूतादिभेदेन त्रिविधः। तत्र तैजसत्वेन मनसः कारणम्, वैकारिकत्वेनेन्द्रियाणाम्, भूतादित्वेन च तन्मात्राणाम्।"

(भ॰गी॰रा॰ पृ॰ 280)

सांख्यैरिदं मतमनुसृतम्।

~(मालिनीमतमत्रैव)——

5. "श्रीपूर्वशास्त्रे तु मनो राजसात्सात्विकात्पुनः॥
इन्द्रियाणि समस्तानि युक्तं चैतद्विभाति नः।
तथाहि बाह्यवृत्तीनामक्षाणां वृत्तिभासने॥
आलोचने शक्तिरन्तर्योजने मनसः पुनः।
उक्तञ्च गुरुणा कुर्यान् मनोऽनुव्यवसायि सत्॥
तद्द्वयालम्बना मातृव्यापारात्मक्रिया इति।

(तं॰आ॰9, 276-79)

वृत्तिभासने सत्त्वगुणस्य प्राधान्यम्, योजनक्रियायां च रजोगुणस्येति।

~(विरोधाभावतः)——तन्त्रालोकोक्तैरेतैर्वाक्यैः साकं मालिनीवाक्यस्य विरोध इवाभाति। उक्तं हि यतो मालिन्याम्—

"तत्त्रिधा तैजसात्तस्मान्मनोऽक्षेशमजायत।
वैकारिकात्ततोऽक्षाणि तन्मात्राणि तृतीयकात्॥"

(मा॰वि॰तं॰1, 31)

विरोधोऽयं जयरथेन नैव प्रकटितः, न चापि तस्य परिहाराय यत्नः कृतः। पाठभेदो वा स्यादत्राभिप्रायभेदो वा। मायीयेयं सृष्टिरन्यथाऽन्यथा च भवति पुरुषभेदमादायेति सिद्धान्तो वात्र शरणत्वेन ग्राह्यः। स चोपरि तन्त्रसारपङ्क्त्याश्रयतः प्रदर्शित एव।

~स्कन्धद्वयदृष्टया—— अहङ्कारोऽन्तःकरणविशेषो जडेऽपि शरीरादावहमिति विमर्शस्याधायकः। इत्येष करणस्कन्धस्तस्य। अहङ्कार एव मनसो, बाह्यकरणानां, तन्मात्राणां चोपादानत्वेन तेषां प्रकृतिः। इत्येषोऽस्य प्रकृतिस्कन्धः। यथा—

(क) "इत्ययं करणस्कन्धोऽहंकारस्य निरूपितः।
त्रिधास्य प्रकृतिस्कन्धः सात्त्वराजसतामसः॥"

(तं॰आ॰9, 233)

(ख) "प्रकृतिस्कन्धस्तु तस्यैव त्रिविधः—सत्त्वादिभेदात्।"

(तं॰सा॰ पृ॰ 86)

~(रजोगुणापेक्षः)——सत्त्वगुणप्रधानात्तमोगुणप्रधानाद्वाहङ्काराद् या सृष्टिर्भवति तत्रोभयत्र रजोगुणकृतायाः प्रवृत्तेरुपयोगितया तस्योभयत्राप्युपष्टम्भकत्वं वेद्यम्। यथा—

"मनोबुद्ध्यक्षकर्माक्षवर्गस्तन्मात्रवर्गकः॥
इत्यत्र राजसाहंकृद्योगः संश्लेषको द्वये।"

(तं॰[illegible]॰9, 272-73)

अहङ्कृतिः——अहङ्कार एव।

अहन्ता——1. स्वाभाविकः स्वात्मविमर्शो न कृत्रिमः।

"अहन्ता—अकृत्रिमः स्वात्मचमत्कारः"

(प्र॰हृ॰ पृ॰ 48)

~तत्परामर्शः——स्वाभाविकः स्वात्मविमर्शः।

"अहन्तापरामर्शात्मकं सर्ववेद्यं किमपि परमं हृदयं रहस्यभूतं देवदेवस्य चिदात्मनः।"

(प॰त्री॰वि॰ पृ॰ 8)

2. अहमित्येवं परामृश्यमानता भावराशेः। यथा—

"तच्चेहान्तःस्थितत्वमहमित्येतावता चित्समुचितेनैव वपुषा परामर्शनम्।"

(ई॰प्र॰वि॰खं 1, पृ॰ 193)

"सर्वोऽयं भावराशिश्चिदात्मनि अहमित्येव वपुषा सततावभासुरवपुः, ऐश्वर्यरूपाच्च स्वातन्त्र्यलक्षणत् स्वामिभावाद् विचित्रेण वपुषा क्रमाक्रमादिना संविद् एनं बहिष्करोति प्रमातृभेदप्रथनपूर्वकम्।"

(तदेव पृ॰ 194)

अहम्भावः——अहमो भावः । स च वस्तुतश्शुद्धचैतन्यात्मके आत्मतत्त्वे एव विश्रान्तो, न पुनर्मायाकल्पिते देहप्राणादौ । तत्रापि यो व्यावहारिकोऽहन्ताविमर्शोऽसौ मायाकृतस्वरूपतिरोधानकारणक एवाज्ञानरूपः । ज्ञाते च वास्तविके स्वरूपे देहादिनिष्ठस्याहमिति प्रत्ययस्य विलयो भवति । तदसौ मायाकल्पितोऽहमिति सङ्कुचितः स्वात्मविमर्शोऽभिमननात्मकोऽहङ्कार इति । शुद्धश्चाहंविमर्शः संविन्मात्रनिष्ठोऽहम्भाव इति वा केवलमहमिति वा व्यवह्रियते । यथा—

"नार्थव्यवस्था प्राणादावहम्भावनिरोधतः ।
प्रकाशस्यात्मविश्रान्तिरहम्भावो हि कीर्त्तितः ।।"

(अ०प्र०सि० 22)

अहोरात्रम्~प्राणचारे—हृदयाद्बहिः प्रसरन् प्राणो दिनं बाह्याच्च हृदयं प्रति प्रविशन्नपानो निशा । यथा—

"क्षपा शशी तथापानो… … … … ।
… … … … … … … … ।।
… … … … … … … … ।
ऊर्ध्ववक्त्रो रविश्चन्द्रोऽधोमुखो … … ।।

(तं०आ०6, 24-25)

आ

आ——1. अनुत्तरस्य परमशिवस्यानन्दशक्त्यभिव्यञ्जको वर्णो मातृकाक्रमे । 2. अनुत्तरे निजे स्वरूपे या विश्रान्तिर्योगिनस्तद्विमर्शो निर्विकल्पको योऽसौ 'आ' इति । न चायं विमर्शः साङ्केतिकोऽपि तु चित्स्वरूपस्य स्वात्मविमर्श एवासाङ्केतिकः सद्योजातस्य बालकस्येव । परं बालकस्यासौ विमर्शो मायीयः सुपरिमितो, योगिनश्च शुद्धविद्यामयोऽपरिमितः—इति विशेषः । यथा—

"आमर्शश्चायं नं साङ्केतिकोऽपि तु चित्स्वभावतामात्रनान्तरीयकः परनादगर्भः……अनुत्तरे एव विश्रान्तिरानन्दः ।"

(तं०सा० पृ० 12)

"परमेश्वरस्यानन्दशक्तिर् 'आ' ।"

(प०त्री०विवृ० पृ० 5)

3. भैरवात्मकपारमेश्वरशक्तिविमर्शनिर्भरं परमशिवस्य स्वरूपमानन्दशक्त्यैकघनतया स्फुरद् 'आ' इत्यनेन मातृकावर्णेनाभिव्यज्यते शाम्भवोपायाभ्यासतः । यथा—

"भैरवशक्तिमद्विमर्शसत्तेयं तादृश्येव पुनः प्रसरन्ती आनन्दशक्तिर् 'आ' इति ।"

(प०त्री०वि० पृ० 168)

आ, ई, ऊ——अनुत्तरः आकारः, इच्छात्मक इकारः, उन्मेषश्च उकारः,—इति मूलभूतं बीजत्रयं क्षोभात्मकतामापन्नं सत् क्रमेण आ, ई, ऊ—इति रूपतामापद्यते ।

1. तत्र 'आ' इत्यत्र परमेश्वरतात्म्येन चित्स्वभावेन कृत आन्तरः पारमैश्वर्यात्मकः परिस्पन्द एव क्षोभः ।
2. 'ई' इत्यत्रैषणीयस्यानुवेधेन कृतः क्षोभः ।
3. 'ऊ' इत्यत्र च ज्ञातव्यस्यानुवेधेनेति । यथा—

(क) "तयोर्यद्यामलं रूपं स संघट्ट इति स्मृतः ।
आनन्दशक्तिः सैवोक्ता यतो विश्वं विसृज्यते ।।"

(तं०आ० 3, 68)

(ख) "संघट्टेऽस्मिश्चिदात्मत्वाद्यत्तत्प्रत्यवमर्शनम् ।।
इच्छाशक्तिरघोराणां शक्तीनां सा परा प्रभुः ।
सैव प्रक्षुब्धरूपा चेदीशित्री संप्रजायते ।।"

(तदेव 3, 71-72)

(ग) "स्वात्मप्रत्यवमर्शो यः प्रागभूदेकवीरकः ।
ज्ञातव्यविश्वोन्मेषात्मा ज्ञानशक्तितया स्थितः ।।"

(तदेव 3, 73-74)

(घ) "ज्ञेयांशः प्रोन्मिषन्क्षोभं यदैति बलवत्त्वतः ।।
ऊनताभासनं संविन्मात्रत्वे जायते तदा ।
रूढं तज्ज्ञेयवर्गस्य स्थितिप्रारम्भ उच्यते ।।"

(तदेव, 3, 75-76)

ईशित्री चात्र एषणा 'ई' इति, ऊनता च 'ऊ' इति ।

आकाशः——1. क्षुभितं शब्दतन्मात्रमेवाकाशनामकं पञ्चमहाभूतेषु गणितं तत्त्वम् । तत एव तच्छब्दगुणकम् । यथा—

"क्षुभितं शब्दतन्मात्रं चित्राकाराः श्रुतीर्दधत् ।
नभः शब्दोऽवकाशात्मा वाच्याध्याससहो यतः ।।"

(तं०आ० 9, 283-84)

2. शब्दस्तावदर्थायावकाशं ददाति । तेनैव शब्दश्रवणत एव सङ्केतस्मृत्यार्थावबोधः । यतश्च शब्दतन्मात्रमवकाशदानक्षमं तत एव सुप्रक्षुभितं सत्तदवकाशदानसमर्थस्याकाशस्य रूपं धारयति यदा भगवाञ्छ्रीकण्ठनाथस्तत् प्रक्षोभयति । यथा—

"तत्र शब्दतन्मात्रात् क्षुभितादवकाशदानव्यापारं नभः, शब्दस्य वाच्याध्यासावकाशसहत्वात् ।"

(तं०सा० पृ० 90)

आकाशबीजम्——हकारः । यथा—

"खेति—आकाशबीजं 'ह' ।"

(तं०आ०वि०खं० 12, पृ० 197)

आक्रान्तिः~त्रैशिरसे——प्रणवकलानां द्वादशके गणे सप्तमी कला यां 'नाद' इति वदन्ति । स च नाद आन्तरो विमर्शः सदाशिवदशोचितः । यथा—

"नादस्य च……

बहिरुल्लसितस्य विश्वस्यान्तराक्रमणमेव रूपमित्याक्रान्तिरिति ।"

(तं०आ०वि०खं० 12 पृ० 179-180)

इदमंशस्याहमंशे विश्रमणमहन्ताप्राधान्येन 'अहमिदम्' इति विमर्शः । आरोहक्रमदृष्ट्येदं लक्षणमुक्तं नादस्य स्वरूपसाक्षात्कार-

विधौ। अस्यां भूमौ साधकः स्वस्मिन् स्वरूपभूते चैतन्ये पदं न्यस्यतीत्यत आक्रान्तिरित्युच्यते।

आक्षेपः~करणयोगे——सर्वस्यापि त्याज्यस्य जडस्य संविदेकात्मतया पुनः स्वात्मसात्करणमाक्षेपः। तमाक्षेपमिह करणयोगे त्याज्येन साकमेव न्यग्भाव्य शुद्धे स्वस्वरूपे विश्रान्तिरासाद्यते करणयोगप्रक्रियाविशेषेणातिरहस्यभूततया नातितरां स्पष्टीकृतेन। यथा—

(क) "पदस्थस्त्यागभागी च संवृतात्मपरस्य च।
आक्षेपं तं विजानीयात् सर्वत्रावस्थितं प्रिये॥"

(उद्ध०तं०आ०वि०खं० 3, पृ० 441)

(ख) "यत्र सर्वे लयं यान्ति दह्यन्ते तत्त्वसञ्चयाः।
तां चितिं पश्य कायस्थां कालानलसमप्रभाम्॥"

(तं०आं० 29, 182)

"इत्यादिना चैकान्नविंशाह्निके·····आक्षेपस्य ···· स्वरूपं वक्ष्यति।"

(तं०आ०वि०खं० 3, पृ० 443)

आगमः——प्रत्यक्षादिभिः प्रमाणैरवेद्यप्रायमर्थमासमन्ताद् गमयतीति परप्रमाणात्मक आगमः। स च लोकशास्त्रगतप्रसिद्धिरूपः। यथा—

"आ समन्तादर्थं गमयतीत्यागमसंज्ञकं प्रमाणं सर्वस्य तावद्भवति।"

(ई०प्र०वि०खं० 2, पृ० 2)

~अपरिच्छिन्नः——न ह्यागमो प्रत्यक्षादिवत् परिमितसामर्थ्योऽपि त्वपरिच्छिन्नप्रकाशात्मकः पारमेश्वरो विमर्शः। यथा—

'न हि प्रत्यक्षं मायाप्रमातुः सर्वत्र क्रमते; अनुमानमप्येवम्। न हि यद्यदस्ति तत्र तत्र लिङ्गव्याप्त्यादिग्रहण-सम्भवः। आगमस्त्वपरिच्छिन्नप्रकाशात्मकमाहेश्वरविमर्शपरमार्थः किं न पश्येत्।"

(ई०प्र०वि०खं० 2, पृ० 186)

~अर्थविमर्शनार्हः——केचिन्मन्यन्ते यन्न भगवदुक्ता आगमा अर्थतो विचारणीया इति। परं न तन्मतमभिनवगुप्तसम्मतम्। तेषां विचारानुसारं भगवदिच्छैवानुग्रहात्मा साधकमागमशास्त्रार्थविचारसरणौ प्रेरयति। ततो विमर्शनक्रियाकुशलैः प्रबुद्धैः सुप्रबुद्धैश्च महानुभावैः सार्धं शास्त्रतत्त्वविमर्शने योजयति। यथा—

"अविकला भगवदिच्छा न विचारपदवीमधिशेते इति चेत्—अलं ग्रन्थधारण-वाचन-व्याख्यान-विचारणादि-मिथ्याऽऽयासेन; परित्याज्य एवायं गुरुभारः; तूष्णींभावशरणैरेव स्थेयम्; भगवदिच्छैवोत्तारणीयमुत्तारयेत्।"

इत्येषा पूर्वपक्षीया शङ्का। अस्या उत्तरमिदम्—

'तदिच्छैवानुग्रहात्मा एवं विचारणायां पर्यवसाययति। न खलु पादप्रसारिकयैव सुखं शयानैर्भुञ्जानैश्च स्वयमविमृशद्भिः स्वापेक्षतीव्रतरादिपरमेश्वरानुग्रहोत्पन्नाधिकाधिकसूक्ष्मतमविमर्शकुशलधिषणापरिशीलनपराङ्मुखैर्वा स्थातव्यमिति। तत् सर्वदा विमृश्यमिदं वर्तते।"

(प०त्री०वि० पृ० 126-27)

~गौणः——वैखर्यात्मकशब्दमयः पुस्तकरूपो वेदसिद्धान्तादिः। अपरोक्षसाक्षात्कारात्मकस्य मुख्यस्यागमस्यानुसारित्वादेवास्यागमत्वम्। तच्च गौणमेवापरोक्षसाक्षात्कारापेक्षया। यथा—

"तथाविधे शब्दनात्मनि विमर्शे आनुकूल्यं यो भजते शब्दराशिः सोऽपि प्रमाणम्, यथा वेदसिद्धान्तादिः, अन्योऽपि वा बौद्धार्हतागमादिः ·····। तत्र न विपर्यय उदेति।"

(ई०प्र०वि०खं० 2, पृ० 81)

~ग्रन्थात्मकः—— अपरोक्षात्मसाक्षात्कारानुसारी यो ग्रन्थात्मक आगमो यथा वेदसिद्धान्तादिरसौ गौणतयैवागमः।

द्र० 'आगमः'~गौण इति।

~चतुर्विधः—तत्र प्रथमकोटिक आगमः प्रतिभं ज्ञानम्, प्रतिभेति प्रसिद्धम्। अपरोक्षः स्वात्मसाक्षात्कारोऽप्यत्रैव कोटौ गण्यते। ततोऽवर आगमो वेदादिग्रन्थेषु निबद्धा प्रसिद्धिः। तृतीय आगमस्तु परम्परया श्रुता मौखिकी प्रसिद्धि। चतुर्थश्च साधारणाप्तवाक्यात्मकः। चतुर्णामपि प्रामाण्यं निजे निजे क्षेत्रे। प्रथमत्रयस्य प्रमाणान्तरानपेक्षत्वम्। चतुर्थस्य पुनस्तदपेक्षत्वम्।

द्र० 'आगमः'~त्रिविधः इति।

~चित्रः —— अधिकारिवैचित्र्यादागमस्याप्यधरोत्तरतारतम्यकृतं सुप्रसूतं वैचित्र्यम्। यथा—

"तदेक एवागमोऽयं चित्रश्चित्रेऽधिकारिणि।
तथैव सा प्रसिद्धिर्हि स्वयूथ्यपरयूथ्यगा॥"

(तं०आ० 35, 35)

~तत्त्वतः——ऐहिकामुष्मिकभोगदाऽपवर्गदा च वृद्धव्यवहारे याऽविगीता प्रसिद्धिः सैव लोकपरम्परारूपा वा शास्त्रपरम्परारूपा वा वैखरीशब्दात्मिका प्रसरन्ती 'आगम' इति। यथा—

(क) "स एव चागमो नाम वृद्धव्यवहृतिक्रमः।"

(मा०वि०वा० 1, 765)

(ख) "सा प्रसिद्धिरेवागमः। सा कदाचिद् दृष्टफला 'बुभुक्षितो भुङ्क्ते' इति। बालस्य प्रसिद्धित एव तत्र तत्र प्रवृत्तिः, नान्वयव्यतिरेकाभ्याम्, तदा तयोरभावात्।"

(तं०सा० पृ० 196)

~त्रिविधः—— प्रथमस्तावदागमोऽपरोक्षः साक्षात्कारो यं प्रतिभेति वदन्ति। तदाश्रित्य प्रवृत्ता प्रसिद्धिरप्यागमः। असौ प्रसिद्धिर्द्विविधा—मौखिकपरम्परारूपा वा, लिखितग्रन्थरूपा वेति संकलनया त्रिविधत्वमागमस्य मुख्यतः।

"एवं प्रतिभारूपेण निबद्धप्रसिद्धिद्वयात्मना च त्रिविधमागमं प्रदर्श्य रूपान्तरमप्यस्य दर्शयति। "अन्योऽपीति" एतासु तिसृषु प्रसिद्धिषु प्रमाणान्तरमूलत्वं नान्वेष्यम्।"

(ई०प्र०वि०वि०खं० 3, पृ० 102)

एतेन द्योत्यते यत् प्रमाणान्तरमूलोऽपि चतुर्थ आप्तवादो नाम आगमप्रकार इति।

~परमप्रमाणभूतः——असौ शैवागम एव। यथा—

"पारमेश्वरस्य तावदागमस्याखण्डितप्रामाण्यमुपपादितम्।"

(ई०प्र०वि०वि०खं० 3, पृ० 304)

"शैवः सिद्धो भाति मूर्ध्नीतरेषां।
मुक्तः सृष्टौ पुनरभ्येति नाधः॥"

"सर्वाध्वनो विनिष्क्रान्तं शैवानां तु परं पदम्"

(उद्धृ०तं०आ०वि०खं० 1, पृ० 72)

~पुस्तकात्मकः——अपरोक्षसाक्षात्कारात्मको यो मुख्य आगमस्तदनुसारित्वादेव वेदादिग्रन्थानामागमत्वम्।

द्र० 'आगमः'~गौणः इति।

~प्रमाणम्——सर्वज्ञैः श्रीकण्ठनाथादिभिरुपदिष्टत्वेनैव शैववैष्णववेदाद्यागमानां प्रामाण्यम्। तच्च प्रामाण्यं तत्र विश्वासभाजामेव साधकानां कृते। तेषामेव कृते तदनुसारिणः क्रियाकलापस्य सफलत्वम्। यथा—

"तत्र न विपर्यय उदेति। तदाश्वस्तस्यैव तत्रानुष्ठानयोग्यत्वात्। अन्यस्य तु दृढप्रतिपत्तिरूपवत्वाभावादप्रमाणमेव तथाविमर्शनात्कं शब्दनम्।"

(ई०प्र०वि० खं० 2, पृ० 81-82)

~अखण्डितम्——सर्वासु भूमिकासु यदखण्डितं प्रामाण्यं तत्तु पारमेश्वरस्यैवागमस्य। यथा—

"पारमेश्वरस्य तावदागमस्याखण्डितप्रामाण्यमुपपादितं पूर्वम्।"

(ई०प्र०वि०वि० खं० 3, पृ० 304)

~प्रामाण्यतारतम्यतः —— आगमोपदेष्टृणामुत्तरोत्तरं प्रामाण्यतारतम्यत आगमप्रामाण्यस्यापि तारतम्यं येनोत्तरोत्तरागमापेक्षयाऽधराधराणामागमानामप्रामाण्यम्। उत्तरोत्तरत्वे चोपदेष्टृणामयं क्रमः—मानवः, ऋषिः, देवः, ब्रह्मा, विष्णुः, रुद्रः, ईश्वरः, सदाशिवः, शक्तिशिवौ। पूर्वंपूर्वमत्रोत्तरोत्तरापेक्षयाऽप्रमाणम्, परं परं च पूर्वंपूर्वापेक्षया प्रमाणम्। यथा—सर्वज्ञानोत्तरागमानुसारम्—

"नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम्।
उत्तरोत्तरवैशिष्ट्यात् पूर्वंपूर्वप्रबाधकम्॥"

(उद्ध०तं०आ० 4, 248)

लकुलीशश्रीकण्ठयोरीश्वरभट्टारकावतारत्वेन तत्तुल्यप्रमाणत्वमवगन्तव्यम्।

~प्रामाण्यनियमतः——अधिकारभेदानुसारमेवागमप्रामाण्यप्रवृत्तिर्लोके। यथा—

"सर्व एव ह्यागमो नियताधिकारिदेशकालसहकार्यादिनियन्त्रितमेव विमर्शं विधत्ते, विधिरूपो निषेधात्मा वा।"

(ई०प्र०वि० खं० 2, पृ० 83)

द्र० (ई०प्र०वि०वि खं० 3, पृ० 85) इति च।

~मुख्यः अपरोक्षस्वात्मसाक्षात्कारात्मकस्वानुभूतिसमुत्थः स्वात्मपरमेश्वरतायाः सुस्पष्टो विमर्श एव मुख्य आगमः, सत्यस्यासमन्ताद् गमकत्वात्, लिखितानां ग्रन्थानामुक्तानां चोपदेशानां तत एव प्रसूतेः। यथा—

"आगमस्तु नामान्तरः शब्दनरूपो द्रढीयस्तमविमर्शात्मा, चित्स्वभावस्येश्वरस्यान्तरङ्ग एव व्यापारः, प्रत्यक्षादेरपि जीवितकल्पः। तेन यद् यथाऽऽमृष्टं तत्तथैव।"

(ई०प्र०वि० खं० 2, पृ० 80)

"पारमेश्वरः परामर्श एव ह्यागम इति।"

(म०मं०प० पृ० 22)

~मुख्यस्वरूपतः——अपरोक्षसाक्षात्कारमूलं परिपक्वसुदृढ-विमर्शात्मकत्वमेवागमस्य मुख्यं स्वरूपम्। यथा—

"तथाहि दृढविमर्शरूपं शब्दनमागमः। आ=समन्तादर्थं गमयतीति॥"

(ई०प्र०वि०वि० खं० 3, पृ० 85)

~मौलं स्रोतः——पूर्वंपूर्वप्रसिद्धिमूलत्वेन पर्यन्ते सर्वज्ञस्यात्मदेवस्य मूलप्रसिद्धिप्रवर्तकस्य सिद्धिर्भवति। यथा—

"पूर्वंपूर्वोपजीवित्वमार्गणे सा क्वचित्स्वयम्॥
सर्वज्ञरूपे ह्येकस्मिन्निःशङ्कं भासते पुरा।"

(तं०आ०35, 11-12)

~याथार्थ्यतः——यस्यैव हि यमागमं प्रति पूर्णतयाऽऽश्वस्तत्वं तमेव प्रति तस्य याथार्थ्येन धर्मभोगमोक्षाद्यर्थगमकत्वम्। अविश्वस्तं प्रति नागमस्यागमत्वम्।

द्र० '~प्रामाण्यनियमतः' इति।

~लोकप्रसिद्धः——लोक उत्कृष्टानि शास्त्राणि मुख्यतया द्विवर्गाणि। तत्र वेदादिवर्गो निगमः, शैव-शाक्त-वैष्णवादिवर्ग आगम इति प्रसिद्धोऽत्र शब्दप्रयोगः बौद्धजैनादिशास्त्राण्यवरेष्वागमेषु गण्यन्ते। ततो पूर्वसिद्धैर्ज्ञानिभिर्गुरुजनैः प्रवर्तितं शाब्दं धर्ममोक्षादिज्ञानमागमः। निगमा अप्यागमेषु गण्यन्ते पारदर्शिभिराचार्यैः। यथा—

"आगमो ज्ञानमित्युक्तमनन्ताः शास्त्रकोटयः॥
शास्त्रं शब्दात्मकं सर्वं शब्दो हंसः प्रकीर्तितः।"

(स्व०तं० 4, 340-41)

~विशेषरूपः——यद्यपि सर्वा अप्यबाधिता लोकप्रसिद्धय आगमात्मिकाः, तथापि लोके विशेषतः शिवशक्तिप्रोक्तान्येव शास्त्राण्यागमसंज्ञयाऽवबुध्यन्ते, ततोऽवरतया च पाञ्चरात्रशास्त्राणामप्यागमसंज्ञत्वं प्रसिद्धम्।

~विस्तारात्मकः —— सौषुप्ताद्यवस्थानां योऽपरोक्षः साक्षात्कारस्तमाश्रित्य प्रवर्तमानस्य वैखर्यात्मकस्य शब्दसमूहस्यावरं गौणं चागमत्वं शैवशाक्तागमापेक्षया, स एष ह्यागमविस्तारः। यथा—

"सोऽपि प्रमाणम्। यथा वेदसिद्धान्तादिः, अन्योऽपि वा बौद्धार्हतागमादिः।"

(ई०प्र०वि०वि० खं० 2, पृ० 81)

तुर्यात्मकसाक्षात्कारसमाश्रितस्यैवागमवर्गस्य मूलत आगमत्वमिति वेद्यम्।

~तत्फलम्——ऐहिक आमुष्मिकश्च भोगः, मोक्षश्चेत्युभयमागमशास्त्रफलम्। लोके जना बुभुक्षवो मुमुक्षवश्चापि भवन्ति। तत एवागम उभयप्रकारकाणां तेषां कृते हितः।

~(पार्यन्तिकम्)——स्वात्मनो त्रिकात्मकत्वस्य साक्षादनुभूतिः। तच्च त्रिकात्मकत्वं शिवशक्तिसामरस्यरूपत्वम्। यथा—

“तस्य यत्तत् परं प्राप्यं धाम तत्त्रिकशब्दितम्।”

(तं०आ० 35, 31)

~वाक्चतुष्टयस्थः——परस्यां वाचि शास्त्रतत्त्वमन्तरहंविमर्शेऽविभागतया स्पन्दमानं सत् परिस्फुरति सदा। पश्यन्तीमवतीर्णं सत् तदेव प्रविविभाजयिषयाऽनुस्यूतं सद् भेदाभेदात्मकशुद्धविद्यारूपतया परिस्फुरति। तदेव यदा मध्यमापदमवतरति तदा वर्ण-पद-वाक्य-तदर्थ-प्रविभागाभाससंभिन्नतया बुद्धिदर्पणस्यान्तरेव प्रस्फुरति। तदेव शास्त्रतत्त्वमग्रे वैखर्यां बहिरपि प्रस्फुटप्रविभागात्मतया प्रकाश्यते वक्त्रा। इदमेव हि शास्त्रतत्त्वस्य शिव-शक्तिसंवादात्मकतामारभ्य सदाशिवादिक्रमेण लौकिकाचार्यपर्यन्तमवतरणरूपत्वेनोक्तं तत्र तत्रागमेषु। इदमेव च शास्त्रावतारे सम्बन्धषट्कतया प्रतिपादितं त्रिकशास्त्रे। यथा—

“यदेवाविभागेनान्तर्वस्तु स्फुरति, तदेव पश्यन्तीभुवि वर्णपद-वाक्य-प्रविविभाजयिषया परामृष्टम्, मध्यमापदे च भेदेन स्थितं वस्तुपूर्वकं सम्पन्नं, यावद्वैखर्यन्तम्।”

(प०त्री०वि० पृ० 13)

आगमाः——(1) शिव-शक्तिसंवादरूपाणि रहस्यमयानि शास्त्राणि मुख्यतया आगमाः। ते च भैरव-लकुलीश-स्वच्छन्दादिभिः शिवावतारैरुपदिष्टाः। विशेषतश्च भैरवभैरवीसंवादरूपाः। ब्रह्मविष्णुप्रभृतिभिर्वाग्वादिभिर्देवैश्चापि प्रोक्तानि शास्त्राण्यागमेषु गण्यन्ते। यथा—

“आगतं पञ्चवक्त्रात्तु गतं च गिरिजानने।
मतं च वासुदेवस्य तस्मादागम उच्यते॥”

(उद्धृ० स्वच्छन्दात् भास्क० खं० 2, पृ० 85)

~अवतरणक्रमतः

द्र० ‘सम्बन्धः (षड्विधः)’ इति।

~अवराः——वैष्णव-ब्राह्म-वायव्याद्यास्तैस्तैर्देवैरुपदिष्टाः। ते च शैवागमान्तःप्रवेशोपायतयोपयुक्ताः, सेव्याश्च। तत एव तेषामपि साफल्यं सप्रयोजनत्वञ्च। ये प्रथमत एव शिवोक्तागममार्गेणोपासनकर्मण्यशक्तास्तेषां कृतेऽवरा आगमा अवतीर्णा लोकमिमम्। यथा—

“उपजीवन्ति यावत्तु तावत्तत्फलभागिनः।”

(तं०आ० 35, 17)

एतेन प्रतीयते यदवरा आगमा उपजीविनः शैवाश्चोपजीव्याः, इति।

~उत्तरोत्तराः——अधराधरेभ्य आगमेभ्य उत्तरोत्तराणामागमानामाश्रयणं श्रेयस्करम्। उत्तरोत्तरागमप्रयोजनं नाधराधरा आगमाः स्वयं साधयितुमलम्। सर्वोत्तरत्वं च पराद्वैतशैवागमानां, तेषां पार्यन्तिकपुरुषार्थ-साधन-भूतत्वात्। यथा—

“यथैकत्रापि वेदादौ तत्तदाश्रमगामिनः।
संस्कारान्तरमत्रापि तथा लिङ्गोद्धृतादिकम्॥
यथा च तत्र पूर्वस्मिन्नाश्रमे नोत्तराश्रमात्।
फलमेति तथा पाञ्चरात्रादौ न शिवात्मताम्॥”

(तं०आ० 35, 28-29)

~ऊर्ध्वाम्नायाः——पञ्चभ्यः शिवस्येशानादिमुखेभ्यः समुद्भूता भेद-भेदाभेद-अभेदप्रधाना आगमाः शैवाः। तेषु भेदप्रधाना दश शिवागमाः, भेदाभेदप्रधानाश्चाष्टादश रुद्रागमाः। अभेदप्रधानाश्च चतुःषष्टिर्भैरवागमाः। यथा—

(1) “स्रोतस्यूर्ध्वे भवेज्ज्ञानं शिवरुद्राभिधं द्विधा।
इत्यारभ्य—
अष्टाविंशतिरित्येवमूर्ध्वस्रोतोविनिर्गताः” इत्यन्तम्।

(उद्धृ०तं०आ०वि खं० 1, पृ० 40)

(2) “यच्चान्ते दक्षिणं हार्दं लिङ्गं हृत् परमं मतम्।
इत्यारभ्य—
अष्टाष्टकात्म तच्छास्त्रं युगपद्भैरवाभिधम्।”
इत्यन्तम्।

(उद्धृ० तदेव पृ० 41)

(3) “अन्यत्सङ्क्षेपतो वक्ष्ये गीतं यत्परमेष्ठिना।
इत्यारभ्य—
एतत्सादाशिवं चक्रमष्टाष्टकविभेदतः।” इत्यन्तम्।

(उद्धृ० तदेव पृ० 41-43)

~ऊर्ध्वोर्ध्वाः——ते च पराद्वैतदृष्टिप्रधानाः सौरभर्गशिखाद्याः षडागमाः। तेषामेव मध्ये पूर्वे त्रयस्त्रिकाख्या आगमाः। तेषां मध्ये मालिनीविजयोत्तरमेव लभ्यत इदानीम्, अन्ये लुप्ताः। यथा—

“प्रकृतं ब्रूमहे देवीविस्सृष्टाश्चित्रसंविदः।
यावत्तावत्तदूर्ध्वोर्ध्वं स्रोतो यद्भेदवर्जितम्॥
सौरभर्गशिखादीनि ततः शास्त्राणि तेनिरे।
उक्तं भर्गशिखायाञ्च देवेन परमेष्ठिना॥
ऊर्ध्वस्रोतोद्भवं ज्ञानमिदं तत् परमं प्रिये।
परमध्वनिनोर्ध्वोर्ध्वं संविद्रूपाभिधायिना॥
ईशानवक्त्रान्निर्यातात् सिद्धान्ताद्भेदमादिशत्।”

(मा०वि०वा० 1, 160-63)

द्र० ‘आगमाः~त्रिकाख्याः’ इति।

~गौणतराः—

द्र० ‘आगमाः~प्रामाण्यतारतम्यतः’ इति।

~गौणाः

द्र० 'आगमाः~प्रामाण्यतारतम्यतः' इति।

~तन्त्राख्याः——प्रायः सर्वेऽपि शैवशाक्ता आगमास्तन्त्राणीत्युच्यन्ते। अपरोक्षो यस्तत्त्वसाक्षात्कारः स एव—'आ' समन्तात्, अर्थं गमयतीत्यागमः। स एवोपदेशेन शिष्यप्रशिष्यक्रमेणाग्रे तन्यमानः सन् लोकव्यवहारे तन्त्रनाम्ना प्रसिद्धः। ततः साक्षात्कारात्मका आगमा एवोपदेशक्रमगतत्वेन तन्त्राणि। सैषा कश्मीरेषु व्याख्याऽनयोः पदयोः प्रचलति परम्परागता।

~त्रिकाख्याः——ऊर्ध्वोर्ध्वात् स्वच्छन्दनाथस्यादृश्यान् मुखात् समुद्भूता आगमाः सौरभर्गशिखाद्याः षट्। तेषां पूर्वे त्रयस्त्रिकागमाः। अत एव ते षडर्धसंज्ञया प्रसिद्धाः। ते च सिद्धातन्त्रम्, वामक (नामक) तन्त्रम्. मालिनीतन्त्रम्, चेति। यथा—

"इह यावत्तु मुख्येयं षडात्मा शास्त्रसन्ततिः॥
एतत्पूर्वार्धभागीनि त्रिकशास्त्राणि यानि तु।
षडर्धसंज्ञया तानि गुरुभिर्भाषितान्यलम्॥"
(मा०वि०वा० 1, 164-65)

तन्त्रालोकविवेके जयरथेन द्विवारं तेषां त्रयाणां नामोल्लेखः कृतः। तत्रैकं "नामकतन्त्रम्" इत्युक्तम्। शारदालिप्यां वकारनकारयोः स्वल्पमेव यतोऽन्तरं ततोऽनुमातुं शक्यते यन्मातृकासु लेखकप्रमादतः "वामक" इत्यस्य स्थाने "नामक" इत्यक्षरैः पदं कृतं भवेदिति। यथा—

"तच्च सिद्धा-ना (वा) मक-मालिन्याख्य-खण्डत्रयात्मकत्वात् त्रिविधम्। तत्र क्रियाप्रधानं सिद्धातन्त्रं, ज्ञान-प्रधानं ना (वा) मक तन्त्रं, तदुभयमयं मालिनीमतमिति।"
(तं०आ०वि० खं० 1, पृ० 49)

द्र० (तदेव खं० 7/2, पृ० 70) चेति।

~पञ्चस्रोतोमयाः——स्वच्छन्दनाथस्य पञ्च मुखानि। तानि च—ईशानः, तत्पुरुषः, सद्योजातो, वामदेवोऽघोरश्चेति। तेभ्यः समुद्गता आगमाः पञ्चस्रोतः-शब्देन प्रसिद्धाः। तेषु दश शिवागमाः, अष्टादश रुद्रागमाः, चतुष्षष्टिश्च भैरवागमा इति। पञ्चभिरीशान तत्पुरुषादिभिरुक्तत्वेनैतेषां पञ्चस्रोत इत्याख्या। यथा—

"तत्र हि परमेश्वर एव चिदानन्देच्छाज्ञानक्रियात्मक-वक्त्र-पञ्चकमेलनया पञ्चस्रोतोमयम्—अभेद-भेदाभेद-भेददशोट्टङ्कनेन तत्तद्भेदप्रभेदवैचित्र्यात्म निखिलं शास्त्रमवतारयति।"
(तं०आ०वि० खं० 1, पृ० 36)

~बहुभेदाः——तत्रैकैकस्याप्यनेकभेदत्वेनागमसंख्या सुप्रभूता। यथा—

"एकैकं पञ्चवक्त्रञ्च वक्त्रं यस्मात्प्रगीयते।
दशाष्टादशभेदस्य ततो भेदेष्वसंख्यता॥"
(उद्धृ० तं०आ०वि० खं० 1, पृ० 40)

~भैरवात्मकाः——स्वच्छन्दतन्त्राद्या अष्टाष्टकाः शैवागमविशेषाणां, सङ्कलनया च ते चतुष्षष्टिः। एतेऽभेददृष्टिप्रधानाः। विशेषत एत एवोर्ध्वस्रोतोमया इत्युच्यन्ते। परिगणितास्ते श्रीकण्ठीसंहितायाम्। तस्या वाक्यान्युद्धृतानि तन्त्रालोकविवेके। यथा—

"तच्च भेदैः प्रवक्ष्यामि चतुष्षष्टिं विभागशः॥

इत्यारभ्य—

"एतत्सादाशिवं चक्रमष्टाष्टकविभागतः।" इत्यन्तम्।
(तं०आ०वि० खं० 1, पृ० 41-43)

~मुख्याः——ते च शैवागमा एव। तेष्वपि सिद्धान्तशैवागमेभ्यो वामाचारप्रधानाः, वामेभ्यो दक्षिणाः, तेभ्यः कौलागमाः, ततोऽपि मतसंज्ञाः, ततश्चापि त्रिकाख्याः सर्वोत्तमाः। यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्॥"
"वाममार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित्।
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः॥"
(निशाटनवाक्यम् उद्ध० प०त्री०वि० पृ० 92)

द्र० 'कुलकौले' इति।

~रुद्रात्मकाः——भेदाभेददृष्टिप्रधाना विजयाद्या अष्टादशागमाः। यथा—

" .. .. रुद्रभेदांस्त्विमान् शृणु॥
विजयञ्चैव निःश्वासमुद्गीतं पारमेश्वरम्।
मुखबिम्बं च सिद्धं च सन्तानं नारसिंहकम्॥
चन्द्रांशुं वीरभद्रं च आग्नेयं च स्वयम्भुवम्।
विसरं रौरवं चैव विमलं किरणं तथा॥
ललितं सौरभेयं च तन्त्राण्याहुर्महेश्वरि।
अष्टाविंशतिरित्येवं ... ...॥"
(उद्धृ०तं०आ०वि० खं० 1, पृ० 40)

दश शिवागमसहितेयं संख्याऽष्टाविंशतिः।

~विस्तरतः——

द्र० 'बहुभेदाः' इति।

किञ्च—उपागमानामपि बहूनां विद्यमानत्वेन नितरां बहुभेदताऽभूदागमानाम्।

~शिवात्मकाः——भेददृष्टिप्रधाना दश कामजाद्याः। यथा—

"कामजं योगजं चिन्त्यं मौकुटं चांशुमत्पुनः।
इत्यारभ्य—
शिवभेदाः समाख्याताः... ... ...॥" इत्यन्तम्।
(तं०आ०वि० खं० 1, पृ० 40)

~षडर्धाख्याः——

द्र० 'आगमाः~त्रिकाख्याः' इति।

~सकर्तृकाः——वैदिका वेदादीन् निगमानकर्तृकान् मन्यन्ते। परं शैवदर्शनदृष्टौ वेदादयोऽपि शैवागमवत् परमेश्वरकृता एव। तत एव च तेषां प्रामाण्यम्। अन्यथा चार्वाकजल्पितादिवदप्रामाण्यं स्यात्। यथा—

"आप्तं तमेव भगवन्तमनादिमीश-
माश्रित्य विश्वसिति वेदवच:सु लोक: ।
तेषामकर्तृकतया तु न किञ्चिदेव
विस्रम्भमेति मतिमानिति वर्णितं प्राक् ।।"

(उद्धृ० तं०आ०वि० खं० 3, पृ० 258 59)

~संवादतात्पर्यंत:——परो योगी यदा योगाभ्यासोत्कर्ष-दशारूढस्य स्वात्मन एव परावाग्रूपस्याभेदविमर्शस्य विषये तत्संस्कारबलेन मध्यमया वाचा विमर्शनं करोति, तदाऽसौ परावाग्विमर्शो भूततया परोक्षतया च विमृश्यते—'सुप्तोऽहं किल विललाप'—इतिवत् । तथा कुर्वन्नागमस्य ऋषिरित्थं विमृशति—'देव्युवाच'—इति शङ्काविषये, 'भैरव उवाच'—इति समाधान-विषये । ततो 'देव्युवाच'—इति पदयोरिदं तात्पर्यं यद्—'अहमेव परावाग्देवीरूपतायामिदमेवमुक्तवान्'—इति । इत्थमेव—'भैरव उवाच'—इत्यनयो: पदयोरेतत्तात्पर्यं यद्—'अहमेव भैरवदशा-वेशावस्थायामेवं विमृष्टवान्'—इति । इत्थमेवाग्रे योग्यसौ स्वयमेव भैरवी-नन्दिकेश्वरकार्त्तिकेय-श्रीकण्ठ-लकुलीशादिदशा-स्ववस्थाय दर्शनतत्त्वशङ्कासमाधाने विचिन्तयति । तच्च शास्त्र-विमर्शनं तत्तद्देवतासंवादात्मकमिति प्रख्यापयति सिद्धयोगी । तत्राधराधरा देवा: प्रष्टार उत्तरोत्तराश्चोपदेष्टार इति । एतत्सर्वं शास्त्रतत्त्वविचिन्तनमेव वैखर्या वाचा विमृश्यते—'नन्दी प्रोवाच'—इत्यादिप्रश्नशङ्कादिविषये, 'श्रीकण्ठ उवाच' इत्यादि चोत्तर-समाधानादिविषये ।

ततो योगी स्वयमेवाधराधरावस्थासमावेशेषु प्रश्नकर्ता, स्वयमेव चोत्तरोत्तरावस्थासमावेशेषु प्रतिवचनरूपोपदेशकर्ता । इत्थमनेनैव समावेशन्यायेन तानि तान्यागमशास्त्राणि कार्त्तिकेय-नन्दि-स्वच्छन्द-श्रीकण्ठ-अघोरेश-सदाशिव-भैरवी-भैरवादिभिर्योगि-शरीरान्त: समाविश्य विमृष्टानि, योगिभिरेव वा तत्तद्देवताभूमिका समावेशरूढैर्विमृष्टानि तत:श्च तथैव वैखर्योपदिष्टानि मन्तव्यानि-यथा—

"अहमेव सा परावाग्देवीरूपैव सर्ववाच्यवाचकाविभक्त-तयैवमुवाच—इति तात्पर्यम् । "सुप्तोऽहं किल विललाप"—इति हि एवमेवोपपत्ति: ।······· केवलमत्र वेदकतादात्म्यप्रतिपत्त्या तुर्यरूपत्वात् (स्वाप) मदादिषु तु मोहावेशप्राधान्यात् इतीयान् विशेष: । परोक्षता तु समानैव······· 'देवी उवाच'—इति यावदुक्तं स्यात्—'अहमेव सततं सर्वमभेदेन विमृशामि पराभूमौ, अन्यथा पश्यन्तीमध्यमाभूमिगं स्फुटमिदं प्रथनं न स्यात् । तावदेवोक्तं भवति 'देवी उवाच'—इति । एवमेव पुरस्ताद् 'भैरव उवाच'—इति मन्तव्यम् । तत्रापि हि स्वपरशक्त्यविभागमयो भैरवात्मैवाहमुवाच इत्यर्थ: । उक्तं च स्वच्छन्दतन्त्रे—

'गुरुशिष्यपदे स्थित्वा स्वयं देव: सदाशिव: ।
पूर्वोत्तरपदैर्वाक्यैस्तन्त्रं समवतारयत् ।।'

(स्व०तं० 8, 31-32)

तादात्म्यप्रतिपत्त्या तुर्यरूपत्वात्, (स्वाप) मदादिषु तु मोहा-वेशप्राधान्यात्, इतीयान्विशेष: । परोक्षता तु समानैव ।।"

(प०त्री०वि० पृ० 9-11)

आगमाधिकार:——ईश्वरप्रत्यभिज्ञायास्तृतीयोऽधिकार: । अत्राधिकारे शैवागमोक्तानां षट्त्रिंशत्तत्त्वानां निरूपणमेकेनाह्निकेन कृतं वर्ततेऽपरेण चागमोक्तानामेव सप्तप्रमातृवर्गाणां निरूपणं विस्तरत: प्रणीतमस्ति । तत्रैवावस्थाचतुष्टयस्यापि प्रतिपादनं कृतमाचार्योत्पलदेवपादै: । अह्निकविभागस्त्वाचार्याभिनवगुप्त-पादैर्विमर्शिन्यां विवृतिविमर्शिन्यां च कृत: । तथैवात्र प्राणापानादीनां प्राणीशानां पञ्च वृत्तीनामपि सिद्धपरम्परासु प्रख्यातं स्वरूपं प्रकटीकृतं वर्तते ।

आगमाभासा:— —म्लेच्छाद्यागमा आगमाभासत्वेन गणिता: शैवदर्शनाचार्यै: । यथा—

"म्लेच्छाद्यागमो हि तावति प्रमाणं भवन्नपि अनार्यसम्पर्क-सम्भाव्यमानम्लानिरागमाभास: ।"

(ई०प्र०वि०वि० खं० 3, पृ० 96)

आग्नेयी धारणा——भावनाभ्यासविशेष: । यथा—

"कालाग्निना कालपदादुत्थितेन पुरं स्वकम् ।
प्लुष्टं विचिन्तयेदन्ते शान्ताभासस्तदा भवेत् ।।"

(वि०भै० 52)

"दक्षिणपादाङ्गुष्ठोत्थितकालाग्निज्वालाभिर्बाह्यान्तरदेहस्य भस्मीभूतत्वभावना आग्नेयी ।"

(प०त्री०विवृ० पृ० 5)

आचारा:——भिन्नभिन्ना: साधनामार्गा: । तत्र तावन्मुख्या: (1) वेदाचार:, (2) शैवाचार:, (3) वामाचार:, (4) दक्षिणाचार:,(5) कुलाचार:, (6) मताचार:, (7) कौला-चार:, (8) त्रिकाचार:,—इति । यथा—

"दक्षिणाचारसाराय वामाचाराभिलाषिणे ।
सर्वाचाराय शर्वाय निराचाराय ते नम: ।।"

(शि०स्तो० 2, 19)

अद्यतनीया: केचन शोधविद्वांस: क्रमाख्यमपरमाचारं पृथगाचारतया समुद्घोषयन्ति । परं तन्त्रालोकादौ क्रमाख्या साधनपद्धतिर्मुख्यतया त्रिकाचाराङ्गभूतस्य शाक्तोपायस्यैवाङ्गतया निरूपिता वर्तते । किञ्च तत्र क्रमसाधनाङ्गभूतो द्वादशकाली-सिद्धान्त: शाम्भवोपायोपयोगितया, आणवोपायरूपस्य बुद्धिध्यानस्य च प्रधानाङ्गत्वेन निरूपितो वर्तते । तत्कथं क्रममार्गस्त्रिकमार्गात् पृथक्तया स्वीकर्तुं शक्यते । जयरथस्य कालेऽसौ द्वादशकालिका-क्रमोपास्तिरत्यन्तं लोकप्रियतां प्राप्ताऽभूत् । तत एव तेन क्वचित् क्रमनयस्य त्रिकनयात् पृथक्त्वेन नामोल्लेख: कृतोऽस्ति । त्रिकनयस्य सुविशिष्ट: प्रकार: क्रमनय इति तेन व्यज्यते, न पुनस्तयो: सर्वथा

परस्परं भिन्नतेति विज्ञेयम्ः । अनेनैवाभिप्रायेण तन्त्रालोकस्य त्रिंश अह्निके पृथक्-पृथक् कुल-क्रम-त्रिकाणां नामोल्लेखः इति वेद्यं सुधीभिः ।

~माहात्म्यतारतम्यतः —— वैदिकाद्यास्त्रिकान्ता आचारविशेषा उत्तरोत्तरमुत्कृष्टतरमाहात्म्ययुताः । यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥"

(उद्धृ०तं०आ०वि० खं० 3, पृ० 56)

"वाममार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित् ।
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः ।"

(प०त्री०विवृ० पृ० 92)

आचार्यः——त्रिकादिसाधनाया दीक्षाकरणेऽधिकारवान् शैवदर्शनगुरुः । स चैकतः समवाप्तस्वात्मप्रत्यभिज्ञः, अपरतः शास्त्रतत्त्ववित्, अन्यतश्च भुक्तिमुक्तिप्रदानसमर्थः, इतरतश्च साधनाभ्यासरहस्यवेत्ता । यथा —

"शिवतत्त्वमविज्ञाय दीक्षां प्रकुरते तु यः ॥
अन्धेनैव यथान्धास्तु सर्वे ते श्वभ्रपातिनः ।
आत्मानञ्च तथा शिष्यान्नयेन्निरयसङ्कटम् ॥
तस्मात्तत्त्वविदाचार्यः श्रीमान् सर्वप्रदो भवेत् ।
यावन्न तत्त्वविच्छैवे कथं कर्माणि कारयेत् ॥
मन्त्रज्ञो मन्त्रयागे तु परस्यैवात्मनोऽपि वा ।"

(ने०तं० 16, 41-44)

~क्रियाज्ञानसामर्थ्यवान् —— स्वात्मशिवभावसाक्षात्कारवानेवाचार्यः शिष्यं बन्धनेभ्यो मोचयितुं क्षमः । अतो ज्ञानित्वे सत्येवासावाचार्यपदेऽभिषिच्यते नान्यथा । तत एव सफलो दीक्षणे । तत एव च क्रियया दीक्षामात्रेणापि भुक्तिमुक्तिप्रदः । यथा—

"यद्यत् प्रकुरुते ज्ञानी शिवशक्तिसमाश्रयात् ।
तत्तन्निष्पद्यते तस्य शिवशक्तिप्रभावतः ॥
तस्य वै सम्मुखा मन्त्रा दृष्टप्रत्ययकारकाः ।
शान्तिकादीनि कर्माणि विषभूतग्रहादिषु ॥
क्षणेन कुरुते सर्वं शिवः परमकारणम् ।
तं प्रबोधयते यस्तु ज्ञानयोगबलान्वितः ॥
मन्त्रशक्तिप्रभावेण स दीक्ष्यान्दीक्षयेत्प्रिये ।
क्षयं नयत्यसौ पाशान् ददात्येव परं पदम् ॥
योजन्या योजने शक्तः शिवशक्तिप्रभावतः ।"

(ने०तं० 16, 71-75)

"न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया ।
क्रियाज्ञानविनिष्पन्न आचार्यः पशुपाशहा ॥"

(उद्धृ०ने०तं०उ० खं० 2, पृ० 42)

~तत्त्ववेत्ता——वस्तुतत्त्वज्ञानवान्, मन्त्रप्रयोगविधिज्ञः, स्वात्मशिवत्वविज्ञानवान्, भुक्तिमुक्तिप्रदाग्रा-क्रियादीक्षाया मर्मज्ञ, एव गुरुराचार्यपदवीं साफल्येन निर्वोढुं, भुक्तिमुक्तिलाभार्थञ्च शिष्याननुग्रहीतुं क्षमो, नान्यः । यथा—

"यावन्न तत्त्वविन्मन्त्री गुरुर्वा साधकोऽपि वा ।
तावन्न फलदो देवि सत्यमेतद्ब्रवीमि ते ॥
अन्यथा भोगसंयुक्त आचार्यः फलदो न हि ।
तस्मात्तु तत्त्वविच्छ्रेष्ठः सर्वदा सर्वकर्मसु ॥
तेन यो दीक्षितो जन्तुर्ब्रह्महापि शिवो भवेत् ।
यत्र यत्र स्थितो देशे यश्चैवं तु विधिं यजेत् ॥
येन येनोपचारेण भावभेदेन येन वा ।
सामान्येन विशेषेण कौलिकेनाथ सुव्रते ॥
तत्तत् साधयते शीघ्रं यथा देवः सदाशिवः ॥"

(ने०तं० 16, 48-51)

~प्रधानलक्षणतः——साक्षात्कृतात्मशिवभावत्वं हि प्रधानं लक्षणमाचार्यस्य । तथाविध आचार्यो हि सशरीरः शिवः । यथा—

"अधिष्ठितं शिवेनैव तमाचार्यं विनिर्दिशेत् ।

(स्व०तं० 3, 34)

~मन्त्रप्रयोगरहस्यवित्—— मन्त्रादिसाधनतत्त्वरहस्यज्ञः शिवरूपतायामधिष्ठितो गुरुराचार्यपदवीयोग्यः । यथा—

"मन्त्राः करणरूपास्तु पशुकार्यस्य साधने ।
आचार्यः करणं तत्र शिवरूपो यतः स्मृतः ॥"

(स्व०तं० 3, 160)

~समस्तशिवशास्त्रज्ञः——दशाष्टादशशैवागमज्ञानवान्, आगमिकपादचतुष्टयार्थतत्त्वविद्, अतिमार्गसाधनाभिज्ञश्चाचार्यो भवितुमर्हति । यथा—

"एतैर्गुणैः समायुक्तो दीक्षितः शिवशासने ॥
चतुष्पात्संहिताभिज्ञस्तन्त्राष्टादशतत्परः ।
दशतन्त्रातिमार्गज्ञ आचार्यः स विधीयते ॥"

(तं०आ० 15, 466-67)

~योगसिद्धिभाक्——परिपूरितसाधनः सृष्ट्यादिसम्पादनसामर्थ्यवान् गुरुराचार्यपदवीयोग्यः । यथा—

"कश्चित् सम्पूर्णकर्तव्यः कृत्यपञ्चकभागिनि ।
रूपे स्थितो गुरुः ………………… ॥"

(तं०आ० 13, 298)

"आदौ समयी, ततः पुत्रकः, तत आचार्यः ।" इति

(तं०आ०वि० खं० 8, पृ० 181)

~योग्यतात्रयवान्——मुख्या योग्यता आचार्यस्य तिस्रः (1) आत्मसाक्षात्काररूपं ज्ञानम्, (2) सिद्धयोगत्वम्, (3) दीक्षादिकर्मकौशलम्, इति । यथा—

"तस्माच्छिवसमाः सर्वे द्रष्टव्यास्तत्त्ववेदिनः ।
कर्मी योगी तथा ज्ञानी आचार्यस्त्रिविधः स्मृतः ॥
कर्मयोगौ तु देवेशि ज्ञानमूलौ फलप्रदौ ।
पृथग्भेदो न दृश्येत ज्ञानाद्वै योगकर्मणोः ॥

तस्मादाचार्यमुख्यस्तु ज्ञानवान्सर्वदो भवेत् ।
शिवाश्रयः शिवस्थस्तु शिवशक्तिप्रचोदितः ॥
निर्मिमीते जगत्सर्वं शिवरूपो यतः स्मृतः ।
इच्छाज्ञानक्रियायोगशिवशक्तिविशारदः ॥
यः करोति शिवेच्छातो ज्ञात्वा चाप्यध्वसंस्थितिम् ।"

(ने०तं० 16, 66-69)

~योजनिकासमर्थः——पुत्रकोऽपि दीक्षामात्रं विधातुमधिकारवात्, परमुत्तरभुवनयोजनिकामाचार्य एव कर्तुमधिकारं वहति, न पुत्रको नापि साधकः । यथा—

"पुत्रको दैशिकत्वे तु तुल्ययोजनिको भवेत् ।
अधिकारी स न पुनः साधने भिन्नयोजने ॥"

(तं०आ० 15, 470)

निजेऽधिकारे यद्भुवनं तत्रैव योजयितुं समर्थः पुत्रको, नोत्तरभुवनस्थेषु पदेष्विति तात्पर्यम् ॥

आचार्यत्वानर्हता——स्वयम्भूपुनर्भूप्रभृतयः साधकाः, काणखञ्जबधिराद्याश्च ते ये तत्र तत्रागमेष्वाचार्यपदानर्हत्वेनोक्ताः, ते सत्यं तदनर्हाः परं क्रियाप्रधानदीक्षादिविषय एव । न च ज्ञानदीक्षाविषयेऽयं नियमः । परिपूर्णसत्यस्वात्मज्ञानवान् गुरुः कर्मादिविधीनजानन्नप्यङ्गविकलोऽपि वा, पुनर्भूप्रभृतिरपि वा सर्वथा ज्ञानदीक्षां विधातुमधिकारवान्, मोचकश्च शिष्यजनानाम् । यथा—

"गुरवस्तु स्वयम्भ्वादिवर्ज्यं यद्यामलादिषु ।
कर्म्यभिप्रायतः सर्वं तदिति व्याचचक्षिरे ॥"

(तं०आ० 23, 15-16)

आज्ञादिनम्——शिष्यस्य स्वात्मनोऽभिषेकदिनम् । यथा—
"आज्ञा—स्वाभिषेकदिनम् ।"

(तं०आ०वि० खं० 11, पृ० 6)

आणवाद्याः——मोक्षोपायाः । ते च—
(1) आणवः, (2) शाक्तः, (3) शाम्भवः, इति मुख्याः

~विचित्राः (परस्परम्)——आणवे भेदनिष्ठस्य विकल्पज्ञानाभ्यासस्यात्यन्तं प्राधान्यम्, शाक्ते विकल्पस्य स्फुरत्तामात्रं स्वात्मनिष्ठम्, शाम्भवे पुनस्तस्य लय एव, शाम्भवस्य निर्विकल्पस्वात्मसाक्षात्काराभ्यासरूपत्वात् । तदुक्तम्—

"आणवे विकल्पोल्बण्यम्, शाक्ते तस्य स्फुरत्तामात्रम्, शाम्भवे तु निर्विकल्पत्वमित्युत्तरोत्तरपर्वानुशीलनादुक्तरूपमेषां नैश्चिन्त्यमव्याहतम् ।"

(म०मं०प० पृ० 161)

नैश्चिन्त्यमकिञ्चिच्चिन्तनं सर्वेषामपि शाक्तानामाणवानां च योगप्रकाराणां सारमिति तात्पर्यम् । सर्वेषां तत्रैव यतो विश्रान्तिः ।

~वीर्यवन्तः——वीर्यं तावत्सारः । तस्य चाणवादिष्वयं क्रमः—स्थानकल्पनायाः सारं ध्वनियोगस्तस्य करणयोगस्तस्योच्चारयोगस्तस्य बुद्धिध्यानयोगस्तस्य शाक्तोपायस्तस्य च शाम्भवोपायः, इति । तस्य तस्योपायस्य तत्तद्वीर्यराहित्ये निष्फलत्वम् । यथा—

"अकिञ्चिच्चिन्तनं वीर्यं भावनायाञ्च सा पुनः ॥
ध्याने तदपि चोच्चारे करणे सोऽपि तद्ध्वनौ ।
स स्थानकल्पने बाह्यमिति क्रममुपाश्रयेत् ॥
वीर्यं विना यथा षण्ठस्तस्याप्यस्त्यथवा बलम् ।
मृतदेह इवेयं स्याद् बाह्यान्तःपरिकल्पना ॥"

(तं०आ० 5, 156-58)

भावनात्र शाक्तोपायरूपा ।

आणवोपायः——परिमितान् प्रमेयपदार्थानुपायत्वेनालम्बनीकृत्य तत्तदालम्बनविषये परिपूर्णशिवभावनाभ्यासपूर्वकं समभ्यस्यमानः स्वात्ममहेश्वरभावस्यैव भावनाभ्यासः । प्रमेयमधिकृत्य शुद्धविकल्पनाभ्यासोऽयम् । यथा—

'यदा तूपायान्तरमसौ स्वसंस्कारार्थं विकल्पोऽपेक्षेत तदा बुद्धि-प्राण-देह-घटादिकान् परिमितरूपानुपायत्वेन गृह्णन्नणुत्वं प्राप्त आणवं ज्ञानमाविर्भावयति ।"

(तं०सा० पृ० 35)

विकल्पसंस्कारोऽत्राशुद्धविकल्पजालप्रशमनपूर्वकं स्वात्मविषये शुद्धस्य विकल्पज्ञानस्य क्रमेण विकासनम् ।

~बुद्ध्याद्यालम्बनः——आणवोपाये स्वात्मनो भिन्नत्वेनाभासमाना देहप्राणबुद्ध्यादयो वा, बाह्या वा तत्त्वभुवनाद्याः, लिङ्गस्थण्डिलाद्या अपि वाऽऽलम्बनत्वेनोपादीयन्ते । तत्र स्वात्मनः समीपतमो ग्राह्यो विषयो बुद्धिः; ततो किञ्चिद्दूरे स्थिताः प्राणोच्चाररूपाः प्राणापानादिवृत्तयः पञ्च; ततोऽपि दूरतरः प्राणोच्चारे स्फुरन्नव्यक्तो ध्वनिरनाहतः, तस्मादपि दूरतरं स्थूलं शरीरं तदन्तःस्थानि च नाडीचक्रानुचक्राणिः, ततोऽपि दूरतरं बाह्यं विषयजातं देशकालात्मकं षडध्वरूपम् । एतान्यालम्बनान्याश्रित्याभ्यस्यमाना आणवोपाया अपि क्रमेणोत्तराधरपदवीभाजः । यथा—

"विकल्पः कस्यापि स्वयमनुपयन् पूर्णमयता—
मुपायात्संस्कारं व्रजति स उपायोऽत्र बहुधा ॥
धियि प्राणे देहे तदनु बहिरित्याणवतया ।
स निर्णीतो नैषां परफलविधौ कापि हि भिदा ॥"

(तं०सा० पृ० 43)

शून्यन्तु नालम्बनमाणवोपाये; तस्य ध्यानादिविषयत्वोपगमाभावात् । यथा—

"बुद्धि-प्राण-शरीरेषु पारमेश्वर्यमञ्जसा ॥
विकल्पं शून्यरूपे न प्रमातरि विकल्पनम् ।"

(तं०आ० 5, 16-17)

~भेदविस्तरतः——बुद्धिध्यानादारभ्य बाह्यपूजापर्यन्ता उपासनाविषय आणवोपाया एव सर्वे । यथा—

"एवं धी-प्राणसम्बन्धादान्तराद् बाह्यतोऽपि च ।
चर्यया यः समावेशः स इहाणव उच्यते ॥"

(तं०व०धा० 3, 38)

पूजाहोमजपाद्या अप्याणवोपायस्य पुच्छभूतो विस्तारः।

~रहस्यं (तस्य)——आणवोपायालम्बनानि देहप्राणादीनि। तेषु सर्वेष्वालम्बनत्वेनोपात्तेषु तेषां मूलस्वरूपभूतायाश्चिद्रूपताया उन्मज्जनस्याचिद्रूपतायाश्च निमज्जनस्याभ्यासो विधीयते। तेन चाद्वयस्वात्मसंवित्साक्षात्कारस्तत्समावेशश्चानायासमेव सम्पद्यते। यथा—

"तस्य चिद्रूपतां सत्यां स्वातन्त्र्योल्लासकल्पिताम्।
पश्यञ्जडात्मताभागं तिरोधायाद्वयो भवेत् ॥"

(तं०आ० 5, 10-11)

बुद्धौ प्राणे तथा देहे देशे वा जडता स्थिता।
तां तिरोधाय मेधावी संविद्रश्मिमयो भवेत् ॥

(उद्धृ०तं०आ०वि०खं 3, पृ० 319)

~शाम्भवपर्यवसानः——आणवोपायोऽपि यदा सुपरिपक्वो भवति तदा शाक्तोपायत्ववदारोहणपूर्वं वा, तत्पदोल्लङ्घनेनापि वा, पर्यन्ते निर्विकल्पस्वात्मशिवत्वसाक्षात्कारात्मिकां शाम्भवीं स्थितिमारूढो भवति। यथा—

"अणुर्नाम स्फुटो भेदस्तदुपाय इहाणवः।
विकल्पनिश्चयात्मैव पर्यन्ते निर्विकल्पकः ॥"

(तं०आ० 1, 221)

आणवमलः——अपूर्णम्मन्यता। अणूनामणुत्वप्रयोजकः पारमेश्वरेच्छाप्रसरावभासितः स्वात्मनः स्वरूपस्य स्वभावस्य च सङ्कोचः। यथा—

"अणूनामयमाणवः, अपूर्णम्मन्यतात्मा लोलिकारूपः, इति"

(उद्ध०स्व०तं० उ० खं० 1, पृ० 233)

~द्विप्रकारकः——मायीयः प्रमाता शुद्धं परिपूर्णञ्च चैतन्यं स्वात्मतया न विमृशति 'अहम्' इति; अपि तु परिमितं जडं देहादिमेव मायीयकर्तृत्वयुतं स्वात्मतयाभिमनुते 'अहम्' इति। स तावदेकः प्रकार आणवस्य मलस्य यः सकलसमाख्येषु प्रलयाकलेषु च प्राणिषु स्फुटं विजृम्भते।

केचित् प्रमातारः स्वात्मानं देहादेर्जडादर्थादुत्तीर्णं शुद्धचिद्रूपमेव पश्यन्ति परं तथापि स्वात्मनः स्वातन्त्र्यात्मकमैश्वर्यं न संविदन्ति, प्रत्युत सांख्यपुरुषप्रायाः सन्तः कर्तृत्वहीनं चिद्रूपम् 'अहम्' इति स्वात्मतया विमृशन्ति। स एष द्वितीयः प्रकार आणवस्य मलस्य। तयोरेकः स्वात्मस्वरूप सङ्कोचात्मकोऽपरश्च स्वशक्तिसङ्कोचात्मकः। एकः स्वस्वरूपतिरोभावोऽपरश्च स्वस्वभावतिरोभावः। द्वितीयोऽयं प्रकारो विज्ञानाकलेषु विजृम्भते। प्रथमः पुनः प्रलयाकलेषु, तेष्वपरोऽपि। तथैव हि सकलेषूभयम्। यथा—

"स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता।
द्विधाणवं मलमिदं स्वस्वरूपापहानितः ॥"

(ई० प्र० 3-2-4)

द्र० (ई०प्र०वि०वि० 3, 2, 4, पृ० 221, तथा ई०प्र०वि०वि० 3, 2, 4 पृ० 313 त० 317) चापि विस्तरतः।

~मूलतः——परमेश्वरस्य या स्वात्मप्रच्छादनात्मिका क्रीडा, तद्विलास एवाणवो मलो मूलतः। न तस्योदयोऽपरतः कुतश्चिदविद्यादिरूपात् कारणान्तरात्। ततः पारमेश्वरी स्वतन्त्रा येच्छा सैवाणवस्य मलस्याभासिका। यथा—

"स्वात्मप्रच्छादनक्रीडामात्रमेव मलं विदुः।
स्वतन्त्रो हि विभुः किञ्चित् किं न स्वात्मनि भासयेत् ॥"

(मा०वि०वा० 2, 186)

किं नाम किञ्चिन्न भासयेद्, अपितु सर्वं किञ्चिद्भासयेदिति तात्पर्यम्।

द्र० च (स्वं०नि०पृ० 23)

~लोलिकात्मा——ईश्वरेच्छावशादणौ प्रमातरि याऽपूर्णम्मन्यता तदाश्रिता या तस्य परैर्भावैः साधनभूतैः स्वात्मपूरणेच्छानाम भोगलोलिका साप्याणवमलस्याभासविशेष एव। यथा—

"आणवोऽयं मलः सूक्ष्मः कार्यतो ह्युपपद्यते।
अभिलाषस्ततः कार्यो भोगादौ स प्रवर्तकः ॥"

(ने०तं० 19, 149)

~व्यवहारे——व्यावहारिकं यदाभासमानं रूपमाणवस्य मलस्य तच्चाणुप्रमातुः पूर्णाहम्भावविमर्शाभावः, तत्फलं चात्मन्यनात्मताभिमानोऽनात्मन्येव चात्मताभिमानः। किञ्च परिपूर्णस्य ज्ञातृत्वस्य कर्तृत्वस्य च यदनामर्शनं तदेव व्यावहारिकं रूपमाणवस्य मलस्य। यथा—

"अणुर्नाम पूर्णाहम्भावपरामर्शशून्यत्वात् संकुचितम्मन्यो जीवः। तद्भाव एवाणवम्। तच्चानात्मन्यात्मज्ञानमात्मन्यनात्मज्ञानं च।"

(म०मं०प० पृ० 39)

"परमेश्वरो हि ज्ञानक्रियारूपतया प्रकाशविमर्शस्वभावः, तस्य च ज्ञातृत्वे विमृष्टृत्वे चैकतरस्मिन्नप्यपरामृश्यमाने मलमाणवम्।"

(तदेव)

एतेन परिपूर्णज्ञातृत्वकर्तृत्वहानिरेवाणवमलस्य व्यावहारिकं स्वरूपं जगद्व्यवहाराभासे ॥

आणवयोगः——

द्र० 'आणवोपायः' इति।

आणवसमावेशः——ग्राह्यविषयान् प्राणोच्चारादीन् बाह्यांश्च देशकालभेदानालम्ब्य विधीयमानाया: परिपूर्णशिवत्वभावनाया अभ्यासेन लभ्यः स्वात्मशिवभावसमावेशः। यथा—

"उच्चाकरणध्यानवर्णस्थानप्रकल्पनैः।
यो भवेत्स समावेशः सम्यगाणव उच्यते ॥"

(मा०वि०तं० 2, 21)

उच्चारकरणादय आणवोपायस्य भेदाः, इति।

आत्मज्ञानम्——शिवरूपतया स्वात्मनः साक्षादनुभूतिरात्मज्ञानम्। एकत आत्मज्ञानी स्वात्मानं विश्वोत्तीर्णशिवात्म-

कतया प्रत्यभिजानात्यपरतश्च विश्वात्मकोऽहमेवेति विश्वं स्वात्मन संवित्स्वरूपस्य क्रीडात्मकं विलासमेव पश्यति । यथा –

"विश्वात्मा 'शिव' एवास्मीति यो वितर्को विचारः, एतदेवात्मज्ञानम् ।।"

(शि०सू०वृ० 1, 17)

आत्मतत्त्वम्~त्रितत्त्वविधौ —— शैवदर्शने पृथ्वीतत्त्वान्मायातत्त्वपर्यन्तो यः प्रपञ्चोऽसावात्मतत्त्वं त्रितत्त्वकल्पनायाम् । यतो हि मायान्तानि तत्त्वानि जीवात्मकं जनानामात्मानमावेष्टयन्ति, ततस्तेषां समष्टिरात्मतत्त्वमिति परिभाष्यते । यथा—

"विज्ञानाकलपर्यन्तमात्मकला, ईशान्तं विद्याकला, शिष्टं शिवकला, इति त्रितत्त्वविधिः ।"

(तं०सा० पृ० 111)

~वस्तुतः——पूर्णं पारमेश्वरं तत्त्वमेव हि वास्तविकतयाऽऽत्मतत्त्वम् । यथा—

"विश्वोत्तीर्णं विश्वमयञ्च (आत्मतत्त्वम्) इति त्रिकादिदर्शनविदः ।।"

(प्र०हृ० पृ० 18)

आत्मबलम्——आत्मनोऽनिरुद्धेच्छाप्रसरसामर्थ्यं, सर्वज्ञत्वं, सर्वकर्तृत्वम्, इत्याद्याः शक्तय आत्मबलम् । यथा—

"आत्मनः परस्य प्रमातुः सर्वकर्तुरीश्वरस्यैव, स्वभावस्यैव यद्बलं सामर्थ्यं, कारणान्तरनैरपेक्ष्येणाखिलवस्तुसम्पादनशक्तता ।।"

(स्प०वि० पृ० 36-37)

~जडसङ्क्रान्तम्——संविद्रूपस्यात्मन एव बलं यदा जडेषु शरीरेन्द्रियादिषु संक्रमणं करोति, तदा ते चेतनवद् व्यवहरन्ति । यथा—

"यतः करणवर्गोऽयं विमूढोऽमूढवत् स्वयम् ।
सहान्तरेण चक्रेण प्रवृत्तिस्थितिसंहृतीः ।।
लभते, तत्प्रयत्नेन परीक्ष्यं तत्त्वमादरात् ।
यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा ।।"

(स्पं०का० 6-7)

"तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः ।
प्रवर्तन्तेऽधिकाराय करणानीव देहिनाम् ।।"

(तदेव 33)

आत्ममलविवेकः ——— शुद्ध परिपूर्णसंविद्रूपस्यात्मनो मलैरस्पृष्टत्वेन दर्शनं तदनुकूलं च विमर्शनम् । तस्मिन् सति साधको देहे तिष्ठन्नेव शिवतां व्रजेत् । यथा—

"मलाद्विविक्तमात्मानं पश्यंस्तु शिवतां व्रजेत् ।।"

(तं०आ० 9, 188)

आत्मविलासः——भगवता श्रीदुर्वाससोपविष्टस्य शाम्भवोपायस्य योऽभ्यासस्तत्फलत्वेनाचार्यामृतवाग्भवानां यः स्वस्वरूपसाक्षात्कारः समभवत् तदनुसारमेव तैः कश्मीरमण्डले पर्यटद्भिर्विरचितोऽतीव परिमार्जितस्तर्कयुक्तिसम्पन्नश्च सैद्धदर्शनशास्त्रग्रन्थः पराद्वैतशैवविद्याप्रतिपादकः । नूतनशैवग्रन्थेष्वयं मुख्यो ग्रन्थः । हिन्दीभाषाव्याख्यायुतश्च द्विवारं प्रकाशितः, संस्कृतव्याख्यासहितश्चापि 1991 तमे वर्षे प्रकाशयिष्यते । ग्रन्थस्य नाम्नैव प्रतिपाद्यो विषयः संसूचितः । विलासो हि पारमैश्वर्यलीलात्मकोऽभिनय इति । सर्वमपि जगदेतत् परमेश्वरस्य शक्तेर्विलास एवं लीलात्मक इति दर्शनस्यास्य मुख्यः सिद्धान्तः । यथा—

'सोऽयं विलास एवास्य शक्तिरित्युदितो बुधैः ।
शिवशक्तिस्वरूपाभ्यां व्यवहाराय कल्पते ।।
विलासो न स्वतो भिन्नो विलासादपि न स्वयम् ।
तदेतत् सच्चिदानन्दमद्वैतं पारमार्थिकम् ।।"

(आ०वि० 2, 2-3)

~तद्विमर्शिनी—— आचार्यामृतवाग्भवप्रणीतस्यात्मविलासस्य नूतनशैवदर्शनग्रन्थस्य सुविस्तृता संस्कृतभाषामयी व्याख्या बलजिन्नाथाख्येन शिष्येण विरचिता याऽधुनाऽचिरादेव प्रकाशिता सती लभ्या भवेत् ।

~सुन्दरीयुतः——आत्मविलासोपरि ग्रन्थकृद्भिः स्वयमेव हिन्दीभाषायां विरचितास्ति सुविस्तृता सुन्दरीसमाख्या व्याख्या । यथा—

"…… …… … निर्मितेयं व्याख्या भाषामयी शुभा ।
स्वोपज्ञात्मविलासस्य सुन्दरीत्यन्विताभिधा ।।"

(आ०वि० पृ० 209)

द्विवारं प्रकाशितेयम् ।

आत्मलिङ्गम्——(1) उच्चारयोगपरिणतौ साक्षात्कार्यस्य लिङ्गत्रयस्य मध्ये यन्नररूपं लिङ्गं तदात्मलिङ्गम् । व्यक्तलिङ्गमित्यस्यापरं पारिभाषिकमभिधानम् । यथा—

"आत्माख्यं यद्व्यक्तं नरलिङ्गम् …… ……, तेनात्मलिङ्गमेतत् ……… ।"

(तं०आ० 5, 118, 119)

"नरप्रधानं व्यक्तमात्मलिङ्गम् ……… ।"

(तं०आ०वि० खं० 3, पृ० 428)

"यद्व्यक्तमात्मलिङ्गाख्यं नररूपसमाश्रयि ।।"

(मा०वि०वा० 2-67)

(2) एतल्लिङ्गमुन्मिषितवेद्यम् । यथा—

"एवमुच्चारविश्रान्तौ यत्परं स्पन्दनं ……
…… यश्चोन्मिषितवेद्यं तदेव लिङ्गत्रयम् ।।"

(तं० सा० पृ० 40-41)

द्र० 'लिङ्गम्~उन्मिषितवेद्यम्' इति~व्यक्तम्' इति च ।

आत्मव्याप्तिः——विश्वस्मिन्भावमण्डले तत्तत्प्रमेयभावबृन्दे

न्यग्भावं विधाय स्वात्मन एव यत् सर्वत्र दर्शनमसावात्मव्याप्तिः । यथा—

"पाशावलोकनं त्यक्त्वा स्वरूपालोकनं हि यत् ।
आत्मव्याप्तिर्भवेदेषा··· ··· ··· ··· ······ ॥"

(स्व॰तं॰ 4, 434)

~तत्क्षेत्रम्——सा च धरातत्त्वात् समनान्तं भवति, बिन्दोरुपरि समनान्तं सङ्कोचः सूक्ष्मसूक्ष्मतरै रूपैस्तिष्ठत्येव । ततस्तदन्तमात्मव्याप्तिरेव न शिवव्याप्ति । यथा—

"आत्मव्याप्त्यन्तस्य मोहस्य जयादुन्मनाशिवव्याप्त्यात्मनः सहजविद्यायाः प्राप्तिरुक्ता ॥"

शि॰सू॰वि॰ पृ॰ 41-42)

औन्मनस्येव पदे शिवव्याप्तिस्तदध आत्मव्याप्तिरेवेति तात्पर्यम् ।

आत्मसप्ततिः——ग्रन्थविशेषोऽद्वैतशैवदर्शनस्य । तद्यथा—

"(क) आत्मसप्ततौ च—
वस्तुस्थित्या न बन्धोऽस्ति तदभावान्न मुक्तता ।
विकल्पघटितावेतावुभावपि न किञ्चन ॥"

(स्पं॰प्र॰ पृ॰ 8)

"(ख) तथात्मसप्ततौ—
यदिदं दृश्यते किञ्चिद्दर्शनात्तन्न भिद्यते ।
दर्शनं द्रष्टृतो नान्यद् द्रष्टैव हि ततो जगत् ॥"

(स्व॰प्र॰ पृ॰ 39)

आत्मसमावेशः——आत्मपदेनात्र प्रमातृतत्त्वमभिप्रेतम् । तत्र सकल-प्रलयाकल-विज्ञानाकलान् स्वात्मनि प्रतिबिम्बितान् पश्यन् भैरवसमावेशभाग्भवति योगी । मन्त्राद्यास्तु प्रमातारः शुद्धाः सन्तो नैव तदभ्यासालम्बनतां नीयन्ते । यथा—

"आत्मा चतुर्विधो ह्येषः—इत्याद्युक्त्या अम्भोधिभिः—सकल-प्रलयाकल-विज्ञानाकल-शुद्धलक्षणैश्चतुर्भिर्भेदैर्भिन्नः ।"

(तं॰आ॰वि॰ खं॰ 1, पृ॰ 216)

तत्र शुद्धाः प्रमातारो नैवास्याभ्यासस्यालम्बनतां नीयन्ते । तत एवात्माख्यस्त्रिविध एवोक्तो मालिनीविजयोत्तरे । यथा—

आत्माख्यस्त्रिविधः प्रोक्तो दशधा मन्त्रसंज्ञकः ॥

(मा॰वि॰तं॰ 2-18)

आत्मस्वरूपम्——ज्ञानक्रियाशक्तिमयं चिद्रूपत्वम् । तदुक्तम्—

"चिद्रूपत्वं तु आत्मनः स्वरूपं नित्यसन्निहितम् ॥"

(स्पं॰सं॰ पृ॰ 12)

"सर्वत्रैवात्मस्वरूपस्य कार्यकारणसंपादनसामर्थ्यमविलम्बम् ॥"

(तदेव पृ॰ 31-32)

आत्मनो ग्रहः——इच्छाशक्तिप्रयोगवशात उद्यमाख्येनोपायेन साधकः शिवेन साकं स्वस्य तादात्म्यं स्वसंवेदनत एवानुभवति । असौ साक्षादनुभव एवात्मनो ग्रहः । तद्यथा—

"अयमेवोदयस्तस्य ध्येयस्य ध्यायिचेतसि ।
तदात्मतासमापत्तिरिच्छतः साधकस्य या ॥
इयमेवामृतप्राप्तिरयमेवात्मनो ग्रहः ।
इयं निर्वाणदीक्षा च शिवसद्भावदायिनी ॥

(स्पं॰ का॰ 31-32)

आत्मसाक्षात्कारः——आत्मनो विश्वाधारभूतशुद्धचैतन्यरूपतया दर्शनं, स्वस्याश्च स्वभावभूतायाः परमेश्वरतायाः साक्षात्करणम् । यथा—

"मय्येव भाति विश्वं दर्पण इव निर्मले घटादीनि ।
मत्तः प्रसरति सर्वं स्वप्नविचित्रत्वमिव सुप्तात् ॥"

(प॰सा॰का॰ 48)

आत्मसम्बोधः——शैवदर्शनस्य ग्रन्थविशेष इदानीमलभ्यः । तद्यथा—

"आत्मसम्बोधे च—
भवेद्भवानामभयाय नूनं स्वभाव-संविद्विदितैव पुंसाम् ।
अमर्त्यतां मर्त्यजने करोति सकृत्सुधाप्राशनमात्रमेव ॥ इति"

(उद्ध॰स्पं॰प्र॰ पृ॰ 42)

आत्मस्वभावः (वास्तविकः)——उक्तो यथा—

"सर्वानुस्यूतः सर्वसामर्थ्ययुक्तश्च आत्मस्वभावः ॥"

(स्पं॰सं॰ पृ॰ 10)

आत्मा——(1) निरवच्छिन्नमसीमं तच्चैतन्यं यद्विश्वसृष्टिसंहाराविकरम् । यथा—

"चैतन्यमात्मा ।"

(शि॰सू॰ 1, 1)

परोऽयमात्मा ।

(2) पुर्यष्टकाधिष्ठितं जीवचैतन्यम् । यथा—

"आत्मा चित्तम् ।"

(शि॰सू॰ 3, 1)

अयमपर आत्मा ।

(3) अहमिति स्वयं स्वेनैव प्रकाशेन सदा प्रकाशमानः, स्वात्मभूतेन च विमर्शेनाहमित्येवं विमर्शनपरश्चेतनः प्रमाता । यथा—

"अहंप्रकाशप्रतिभास्यो हि प्रमाताऽऽत्मा ।"

(ई॰प्र॰वि॰वि॰ खं॰ 1, पृ॰ 259)

अपर एवायमात्मा ।

(4) देहाद्यहमतनशीलो माया-प्रमाता । यथा—

"तदेव अतति सत्त्वादिवृत्त्यालम्बनेन योनीः सञ्चरतीत्यात्मा, अणुरित्यर्थः ।"

(शि॰सू॰वृ॰ 3, 1)

लिङ्गशरीरधारी जीवरूपोऽयमात्मा। यथा—

"अतति-सर्वंगो भवति, सर्वाकारतां प्राप्नोतीत्यात्मा। माति-सर्वं व्याप्नोतीत्यात्मा। सर्वंव्यापक: सर्वंगतश्च चित्प्रकाश आत्मा। तस्य लक्षणं परिपूर्णज्ञानक्रियास्वातन्त्र्यम्। यच्चापरिपूर्णं तत्क्वापि चैत्र-मैत्रादौ मायीय आत्मनि दृश्यते तदवभासनमप्यात्म-परमेश्वरस्यैव ॥"

(शि०सू०वि० 1, 2)

~अष्टगुणा: (तस्य) —— अहमित्यभिमानेनात्मीकृतस्य पुर्यष्टकस्य वाञ्छनीया विशेषता: लक्षणयाऽऽत्मगुणा अष्टौ। यथा—

"अत आत्मगुणानष्टौ कथयामि समासत:।
दया सर्वेषु भूतेषु क्षान्तिश्चाप्यनसूयता ॥
शौचं चैवमनायासो मङ्गलं चाप्यत: परम्।
अकार्पण्यं चास्पृहा चेत्यष्टावात्मगुणा: स्मृता: ॥"

(स्व०तं० 10, 409-11)

"इत्येत आत्मन आत्मसन्निकृष्टस्यान्त:करणवर्गादेर्गुणा न तु आत्मनस्तस्य चिदेकरूपत्वात्।"

(स्व०तं०उ० 10, पृ० 172-3)

~उच्चारयोगे——परमात्मा। प्रथमं खं खदशके। तदुक्तम्—

"आत्माणु कुलमूलानि इत्यादि ॥"

(तं०आ० 5, 93)

"आत्मा परमात्मा" (तं०आ०वि० खं० 3, पृ० 404)

~एक:——उपाधिभेदाद्भिन्न एव दृश्यमानोऽपि वस्तुत एक एव आत्मा। तदुक्तम्—

(क) "स्वात्मैव सर्वजन्तूनामेक एव महेश्वर:।
विश्वरूपोऽहमिदमित्यखण्डामर्शबृंहित: ॥"

(ई०प्र० 4-1-1)

(ख) "जन्तव एव जीवा: सात्मानस्तेषां च महेश्वर एव स्वात्मा, स एव महेश्वरा न त्वन्य: कश्चित्। यत: संवित्स्वभावोऽसौ, संविदश्च न देशेन न कालेन न स्वरूपेण कोऽपि भेद:।"

(ई०प्र०वि० खं० 2, पृ० 250-51)

~जीवरूप:——लोकव्यवहारे पुरुषतत्त्वरूपो जीव आत्मेत्युच्यते। यथा—

"प्रधानसाम्यमाश्रित्य सुखदु:खविवर्जित:।
यदा तस्मिन् स्थितो देवि तदात्मा तु स उच्यते ॥"

(स्व०तं० 11, 84-5)

"एवमेष कञ्चुकमात्रशरीर: प्रकृतिलीन आत्मेत्युक्त: ॥"

(स्व०तं०उ० 11, पृ० 60)

~ज्ञानी—वास्तविकनिजस्वरूपसाक्षात्कारवान्। तद्यथा—

"सर्वज्ञ-सर्वकर्तृ-स्वतन्त्र-शिवरूपतया प्रत्यभिज्ञानमात्मनो ज्ञानम्।" (स्पं०नि० पृ० 52)

~परमेश्वर:——(1) सृष्ट्यादि-पञ्चकृत्यप्रवण-शक्ति-पञ्चकैकघनस्वरूपं परिपूर्णमपरिच्छिन्नमहमितिविमर्शमयं शुद्धं चैतन्यमात्मत्वेनाभिमन्वानो जीवन्मुक्त: प्राणी स्वात्मानं परमशिवमेव मन्यते। तदुक्तम्—

"इति शक्तिचक्रयन्त्रं क्रीडायोगेन वाहयन्देव:।
अहमेव शुद्धरूप: शक्तिमहाचक्रनायकपदस्थ: ॥"

(प०सा० 47)

(2) पारमैश्वर्यविलासत आत्मैव स्वस्वभावत एक स्वात्मनि स्वस्य विश्वरूपतां दर्पणनगरन्यायेन सदाऽऽभासयति। यथा—

"अहमेव विश्वरूप: करचरणादिस्वभाव इव देह:।
सर्वस्मिन्नहमेव स्फुरामि भावेषु भास्वरूपमिव ॥"

(प०सा० 49)

(3) सर्वज्ञ: सर्वकर्ता च परमेश्वर एव वस्तुत सर्वेषामात्मा। यथा—

"एक एव चिदात्मा स्वातन्त्र्येण स्वात्मनि यतो वैश्वरूप्यं भासयति, ततो महेश्वरोऽन्तर्नीतामिदन्तां कृत्वा परानुन्मुखस्वात्मविश्रान्तिरूपाहंविमर्शपरिपूर्ण:। अत एव सर्वज्ञत्वसर्वकर्तृत्वे नास्य यत्नोपपाद्ये। विचित्रबुद्धिकर्मेन्द्रियविषये हि यथा ज्ञातृत्वकर्तृत्वे एकस्यैवात्मनस्तथेन्द्रिय-स्थानीयरुद्रक्षेत्रज्ञसहस्रविषयस्य भावराशेर्यज्ज्ञानं करणञ्च तदेकत्र चिदात्मनि।"

(ई०प्र०वि० खं० 2, पृ० 251)

~मतभेदत:——ते ते लौकिकादिशैवान्ता दर्शनविद: क्रमेण स्थूलशरीरादारभ्य परमशिवतत्त्वान्तान् पदार्थान् आत्मत्वेन मन्यन्ते। तद्यथा—

"तत्र लौकिकाश्चैतन्यविशिष्टं शरीरम्। नैयायिका ज्ञानादिगुणिनं बुद्धितत्त्वप्रायं, मीमांसका पुर्यष्टकम्, सौगता ज्ञानसन्तानम्, केचिच्छ्रुतिविद: शून्यमभावब्रह्मात्मकम्, माध्यमिका अप्येवम्, पाञ्चरात्रा अव्यक्तम्, सांख्या विज्ञानाकलावस्थं, केचिद्वेदविद ईश्वरतत्त्वम्, वैयाकरणा: सदाशिवतत्त्वम्, विश्वोत्तीर्ण-तन्मयतादिस्वभावं त्रिकादिदर्शिन आत्मानं प्रतिपद्यन्ते।"

(शि०सू०वा०भा०टि० 1-6)

~लोकव्यवहारे——मायामयो जीव: कर्मणां कर्ता भोक्ता चेति। यथा—

"आत्मा संकुचितसंविद्रूपस्तत्तत्कर्मानुष्ठाता तत्फलभोक्ता च ॥"

(स्व०तं०उ०प० 7, पृ० 172)

~वस्तुत:——प्राणयोगप्रक्रियासु 'हंस' इति परिभाषितश्चैतन्यस्वरूप: शिव एव जीवभावेऽपि स्थितस्तथोच्यते। यथा—

(क) "आत्मा वै हंस इत्युक्त……।"

(स्व०तं०प० 7, 30)

(ख) "शिव एव स्वातन्त्र्यावभासितसंकुचितचिद्रूप 'आत्मा'। तत: सोऽपि करणोन्मीलननिमीलनादि-क्रमेण हानसमादानधर्मा 'हंस' इत्युक्त इति।"

(स्व०तं०उ०प० 7, पृ० 188)

द्र० 'हंस:' इति।

(ग) "नात्मा देहो न च प्राणो न मनः खं न शून्यभूः ।
किन्तु चैतन्यमेवात्मेत्यादिष्टं परमेष्ठिना ।"

(शि०सू०वा०व० पृ० 2)

(घ) "अयमात्मा महेशानः स्वतन्त्रः सर्वस्वात्मप्रत्यवमर्शस्वभावः सर्वप्रमातॄणाम् अनुभवितृतया प्रथमानः, ततस्तत्तदवस्थाविप्रलोपे समुत्पत्तौ वा स्वस्वरूप एव ।"

(प०सा०वि० पृ० 22-23)

~शिव एव——वस्तुत शिव एव जीवात्मतयात्मानं स्वविलासलीलयावभासयति । तदुक्तम्—

"आत्मानं स्वविलासेन विश्वरूपेण भासयन् ।
नित्योदितः कोऽपि देवो जयत्यात्मा परः शिवः ॥"

(आ०वि०प्र० 2, श्लो० 1)

~सुनिर्मलः——आत्मा स्वस्वभावभूतान्नैर्मल्यात् सततं प्रकाशमानः सन् कृत्रिमैर्मलैरावृतो न भवति । यथा स्वभावस्वच्छ आकाशो मेघैर्न मलिनीकर्तुं पार्यते, अतोऽयमात्मा निसर्गत एव निर्मलः । तदुक्तम्—

"कृत्रिमान्मलिनीभावाज्जातु किं मालिनीकृतम् ।
नैसर्गिकं सुनैर्मल्यं स्वीयं स्वात्मा समुज्झति ॥
यथाऽऽकाशो नीलंनीलैर्मेघैर्नीलीकृतोऽपि सन् ।
मेघाऽपाये पुनः स्वच्छस्तद्वदात्मापि निर्मलः ॥"

(आ०वि० 5, 5-6)

आत्माणवः——अनुग्राह्या जीवाः । यथा—

"आत्माणवो ह्यनन्ताश्च मलेनैव निरोधिताः ।
तेऽनुगृहीताः परमा परमेशस्य चेच्छया ॥"

(ने०तं० 21, 46-7)

आत्मोपासकाः——पुरुषतत्त्वोपासकाः । उक्तं यथा—

(क) "दीक्षाज्ञानादिना शोध्यमात्मानं चैव निर्मलम् ।
ये वदन्ति न चैवान्यं विन्दन्ति परमं शिवम् ।
त आत्मोपासकाः शैवे न गच्छन्ति परं पदम् ॥"

(ने०तं० 8, 29-30)

(ख) "अविदित्वा परं तत्त्वं शिवत्वं कल्पितं तु यैः ।
त आत्मोपासकाः शैवे न गच्छन्ति परं शिवम् ॥"

(स्व० तं० 4, 391-2)

आदिकोटिः~प्राणचारे——हृदयम् । तदुक्तम्—

"आदिकोटिः हृदयम् ।"

(प्र०हृ० पृ० 44)

आदित्यराजः——आचार्योत्पलदेवस्य मुखारविन्दनिर्गतानां सूक्तीनां क्रमविशेषैर्भिन्नभिन्नस्तोत्ररूपतायां निवेशकस्तेषां शिष्य आदित्यराज आसीत् । तदुक्तम्—

"अथ कदाचित्तान्येव तद्व्यामिश्राणि लब्ध्वा श्रीराम आदित्यराजश्च पृथक् पृथक् स्तोत्रशय्यायां न्यवेशयत् ।"

(शि०स्तो०विवृ० 1-2)

भूतिराजादिगुरूणां वंशेन सम्बद्धः प्रतिभाति नामाक्षरसामान्यात् ।

आदिमध्यान्तता——परस्य संवित्तत्त्वस्य नैव काध्यादिमध्यान्तरूपता, परं केवलमुपासनार्थं भावनया तथा सा परिकल्प्यते । तथाविधया भावनया भाव्यमानः सन्नसौ वाञ्छितभुक्तिमुक्तिफलप्रदो भवति । तदुक्तम्—

"यद्यप्यमुष्य नाथस्य संवित्त्यनतिरेकिणः ॥
पूर्णस्योर्ध्वादिमध्यान्तव्यवस्था नास्ति वास्तवी ।
तथापि प्रतिपत्तॄणां प्रतिपादयितुस्तथा ॥
स्वस्वरूपानुसारेण मध्यादित्वादिकल्पनाः ।

(तं०आ० 8, 17-19)

आदियागः——कौलिके विधौ शिव-शक्ति-संघट्टात्मकं यत् परस्परमेलनं तदेवादियाग इति । सामान्यतो गर्भाधानकर्माप्यादियाग इत्युच्यते क्वचित् क्वचित् कौलपरम्परासु । तदुक्तम्—

"आदीयते यतः सारं तस्य मुख्यस्य चैष यत् ।
मुख्यश्च यागस्तेनायमादियाग इति स्मृतः ॥

(तं०आ० 29, 164)

"आदिश्चासौ याग इति, आदेर्मुख्यचक्रस्य याग इति च ।"

(तं०आ०वि० 11/2, पृ० 113)

द्र० 'आद्ययागः' इति ।

आद्यनाथः——अनुत्तरप्रकाशपञ्चाशिकाया निर्माता कोऽपि सिद्धः । कदाचित् कालीनयप्रवर्तकः शिवानन्दनाथ एवायं स्यात् । न निश्चेतुं शक्यते निःसंशयं किमपि । तद्यथा—

"इति श्रीमदाद्यनाथविरचिता अनुत्तरप्रकाशपञ्चाशिका ।"

(अ०प्र०पं० पृ० 8)

आद्ययागः——आदियाग एव । शक्तिसंङ्गमः । तदुक्तम्—

"शक्तिसङ्गमादित्याद्ययागतया वक्ष्यमाणात् ।"

(तं०आ०वि०खं०11/2, पृ० 15)

द्र० 'आदियागः' इति ।

आद्याः कलाः——प्रतिपादिता यथा—

"तिथयः प्रतिपत्पूर्वाः पञ्चदशेति मायया ॥
सूर्याचन्द्रमसौ स्वान्तश्चरन्तौ स्थितिहेतवे ।
यथा विमर्शवपुषः सर्गस्याद्याः कलाः स्मृताः ॥"

(अ०प्र०पं० 38-9)

आद्याशक्तिः——व्यापिनी-समना-उन्मना-रूपैरवतिष्ठन्ती पराशक्तिः । यथा—

"व्यापिनी सृष्टिकार्यस्था समना संस्थिता स्थितौ ।
संहारे चोन्मना ज्ञेया शक्तिराद्या तु सर्वगा ।।"

उद्ध० (म०प्र०त्रि०पृ० 42)

आनन्दः (उच्चारयोगे)——उच्चारयोगाभ्यासे पारमैश्वर्यमण्डितामनवच्छिन्नां पूर्णां संविदं प्रविविक्षोर्योगिनस्तत्र प्रवेशात् प्राक् पूर्णतास्पर्शमात्रत आनन्दस्याभिव्यक्तिर्भवति । असावुच्चारादियोगसाफल्यस्य प्रथमं चिह्नम् । तदुक्तम्—

"अत्र भावनया, देहगतोपायैः परे पथि ।
विविक्षोः पूर्णतास्पर्शात् प्रागानन्दः प्रजायते ।।"

(तं०आ० 5, 100-1)

"तत्र प्रागानन्दः पूर्णतास्पर्शात्' ।।

(तं०सा०, पृ० 40-41)

~मातृकाक्रमे——(1) 'आ' इति वर्णः । अनुत्तरस्याकारस्य स्वात्मविश्रान्तिरूपोऽवस्थाविशेषः । स च 'आ' इति वर्णेनाभिव्यंग्यो निर्विकल्पतया । तदुक्तम्—

"अनुत्तर एव (अकार एव) विश्रान्तिरानन्दः (आ इति) ।'

(तं०सा० पृ० 12)

(2) परशिव-पराशक्ति-संघट्टात्मको विमर्शः । स एव हि 'आ' इति । आनन्दशक्तिसंघट्टस्थः शिवः । तदुक्तम्—

(क) "अकुलस्यास्य देवस्य कुलप्रथनशालिनी ।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः ।।
तयोर्यद्यामलं रूपं स संघट्ट इति स्मृतः ।
आनन्दशक्तिः सैवोक्ता यतो विश्वं विसृज्यते ।।"

(तं०आ० 3, 67-68)

(ख) "प्रकाशविमर्शात्मनोरनुत्तरयोरेव संघट्टादानन्दशक्त्यात्मनो द्वितीयवर्णस्योदयो, यत इच्छाद्यात्मनो विश्वस्य सर्गः ।

(तं०आ०वि० खं० 2, पृ० 81)

~दार्शनिकदृष्ट्या——अन्यनैरपेक्ष्येण स्वात्मचमत्करणम् । तदुक्तम्—

"अन्यनिरपेक्षतैव परमार्थत आनन्दः, ऐश्वर्यम्, स्वातन्त्र्यम्, चैतन्यञ्च ।"

(ई०प्र०वि० खं० 1, पृ० 207)

~स्वभावभूतः——आत्मनः पारिपूर्ण्यस्य विमर्श एव स्वभावभूतस्तस्यानन्दः । तदुक्तम्—

"पूर्णत्वादहमित्यन्तर्ज्ञानमानन्द उच्यते'—इति स्थित्या पूर्णाहन्तानुसन्धानात्मकस्वात्मविश्रान्तिसतत्त्वो य आनन्दः ।"

(म०मं०प० पृ० 136)

"चैतन्यस्य च स्वविश्रान्तत्वमेवानन्द इत्युक्तम् ।"

(तदेव पृ० 137)

आनन्दकन्दः——वेदान्तिनः सच्चिदानन्दरूपत्वं ब्रह्मणो वदन्ति, परमभिनवाः शैवाः सत्तायाश्चित्ताया आनन्दतायाश्च कन्दस्थानीयं मूलतत्त्वं ब्रह्मेति प्रतिपादयन्ति । यथोक्तम्—

"अभिनवरमणीयं सच्चिदानन्दकन्दं
स्वनवनवविलासोल्लासनैकप्रवीणम् ।
अनुभवसुरहस्यं मङ्गलं मङ्गलाना-
मधिहृदि परमेशं मौनमेवाश्रयेऽहम् ।।

(आ०वि० 1, 1)

आनन्दगह्वरम्——किमपि शैवागमशास्त्रम् । उक्तमेतद्विषये—

"यदुक्तं परमेशेन श्रीमदानन्दगह्वरे ।
समयोल्लङ्घनाद्देवि क्रव्यादत्वं शतं समाः ।।"

(उद्धृ०तं०आ० 14, 18-19)

आनन्दचक्रम् (मुख्यम्)——कौलिके विधौ शिव-शक्ति-भावना-भावितस्य मिथुनस्यानन्देन्द्रिययुग्मम् । तदुक्तम्—

"यदेवानन्दसन्दोहि संविदो ह्यन्तरङ्गकम् ।।
तत्प्रधानं भवेच्चक्रमनुचक्रमतोऽपरम् ।"

(तं०आ० 29, 105-6)

~मुख्येतरम्——तत्तदिन्द्रियाधिष्ठानं यद्यत् स्पर्शादिनाऽऽनन्दोद्बोधकं भवति, एवमेवाधरकपोलस्तनजघनादिशरीराङ्गजातम् । उक्तं यथा—

"इत्थं स्वोचित-वस्त्वंशैरनुचक्रेषु तर्पणम् ।।"

(तं०आ० 29, 109)

"अनुचक्रेष्विति चक्षुरादीन्द्रियरूपेषु ।।"

(तं०आ०वि० 11/2 पृ० 78)

द्र० 'अनुचक्रम्' इति ।

आनन्दताण्डवविलासः——महेश्वरानन्दगुरुणा महाप्रकाशेन निर्मितं स्तोत्रं किमपि ।

द्र० (म०मं०प० पृ० 159)

आनन्दभूमिकाः (उच्चारादावाणवोपाये)——प्राणादिरूपाः पञ्चजीवनवृत्तीरालम्ब्य कृतेन भावनात्मकेन योगेन विधीयमाने विकल्पसंसारक्रमे यदा शून्यात्मके मायीये प्रमातृतत्त्वे तत्स्वभावभूतासु चैतासु प्राणवृत्तिषु योगिना विश्रान्तिर्लभ्यते तदा तस्योत्तरोत्तरमुत्कृष्टोत्कृष्टतरभूमिकाभाजामात्मानन्दानां चमत्कारस्यानुभूतिर्भवति । तस्यात्मानन्दस्याभिव्यक्तेरेव तासां भूमिकानां क्रमशो नामानि—(1) निजानन्दो, (2) निरानन्दः, (3) परानन्दो, (4) ब्रह्मानन्दो, (5) महानन्दश्, (6) चिदानन्द इति । ता एताः षडानन्दभूमयः केवलं कश्मीरशैवदर्शनस्य त्रिकयोगग्रन्थेष्वेव प्रतिपादिताः सन्ति । तद्यथा—

"एवं शून्यात्प्रभृति व्यानान्तं या एता विश्रान्तयस्ता एव निजानन्दो, निरानन्दः, परानन्दो, ब्रह्मानन्दो, महानन्दश्, चिदानन्द इति षड् आनन्दभूमय उपदिष्टाः ।"

(तं०सा० पृ० 38)

~पञ्च——परानन्द-ब्रह्मानन्दयोरेकीकारे पञ्च एव भूमिका आत्मानन्दस्य—

1. निजानन्दः=शून्यप्रायसंविन्मात्ररूपतायामीशानभूमौ ।
2. निरानन्दः=तत्पुरुषोचितभूमिकायाम् ।
3. परानन्दः=सद्योजातभूमिकायाम् ।
4. महानन्दः=वामदेवोचितायां स्थितौ ।
5. चिदानन्दः=अघोराख्यायां भैरवीयायामवस्थायां साक्षात्करणीयो निजस्वरूपभूतोऽनुपाधिक आनन्दः ।

तदुक्तम्—

(क) "यतो निजानन्दमयी भूमिः शान्तपदानुगा ॥
निरानन्दपरानन्दौ पुरुषाजातसङ्गतौ ।
अभेदभिन्नभोग्यौघजनितानन्दजृम्भणात् ॥
महानन्दः स्थितिः कापि वामाचारा चिदुल्लसेत् ।
भैरवीयमहाधाम्नि स्वीकृताशेषसंविदि ॥
महानन्दश्चिदानन्दीभूय भूयः प्रवर्तते ।"
(मा०वि०वा० 2, 29-32)

परं विपरीत एवात्र क्रमोऽयं कथं केनाभिप्रायेण प्रतिपादित इति न स्पष्टतां याति । ईशानादारभ्याघोरान्तं ह्यन्यत्रावरोहक्रम एव प्रतिपादित इह पुनरारोहक्रमः । यथा—

"सद्योजातश्च यद्रुद्रः पुरुश्चेश्वरात्मकः ॥
श्रीमान् सदाशिवो देव ईशानश्चेति गीयते ।
विष्णुर्वामः कजोऽघोर इति चैतद्भविष्यति ॥"
(तदेव 1, 251-52)

(ख) "निजानन्दः प्रमात्रंशमात्रनिष्ठनिबन्धनः ।
शून्यतामात्रविश्रान्तेर्निरानन्दात्मिका स्थितिः ॥
प्रमेयपदविश्रान्तेः परानन्दोऽभ्युदेत्यलम् ।
अनन्तमेयसङ्घट्टपूर्णे मेये तु सर्वतः ॥
प्रमाणाच्चर्वणायोगान्महानन्द इति स्थितिः ।
समस्तमानमेयौघकलनाग्रासकोविदः ॥
यदा विश्रान्तिमभ्येति निरुपाधिसुनिर्भराम् ।
तदा खलु चिदानदो यो जडानुपबृंहितः ॥"
(मा०वि०वा० 2, 35-38)

तन्त्रालोके परानन्दमहानन्दयोर्मध्ये ब्रह्मानन्दस्यापि भूमिका वर्णिता । विश्लेषण-संश्लेषणानीत्योभयमुपपन्नम् ।

~शाक्तोपाये——शाक्तोपायाभ्यासेऽपि षण्णामानन्दभूमीनां चर्वणा भवत्येव । परं सा स्वात्ममात्रालम्बनेन भावनाभ्यासेन । उच्चारयोगे पुनः प्राणवृत्तिषु विश्रान्त्योपायभूतयेति विशेषः । यथा—

"इह तु पुरोक्ताद्युक्तिकलापाद्
यः प्रविशेत् सद्यो नाशक्तः ।
तं प्रति शाक्तोपायपथेन—
प्रकटीक्रियते हृदयस्पन्दः ॥"
(मा०वि०वा० 2, 26)

इत्यत्रैव प्रकरणे जगदानन्दसहितानां षण्णामानन्दभूमीनां पञ्चमन्त्रसहकृतत्वेन वर्णनं कृतमस्ति विस्तरतः । अग्रे चर्याक्रमचर्चनेनैतत्प्रतीयते यद्रहस्यचर्याभ्याससचिवेन शाक्तोपायाभ्यासेनैतासामानन्दभूमिकानां सद्यः सञ्चर्वणा सम्भवतीति । तत आणवोपायसचिवोऽयं शाक्तोपाय इति वेद्यम् ।

~षट्——(1) निजानन्दो, (2) निरानन्दः, (3) परानन्दो, (4) ब्रह्मानन्दो, (5) महानन्दः, (6) चिदानन्द इति । सूक्ष्मविश्लेषणतः संख्यावृद्धिरत्र ज्ञेया । उक्तं यथा—

"निजानन्दे प्रमात्रंशमात्रे हृदि पुरा स्थितः ।
शून्यतामात्रविश्रान्तेर्निरानन्दं विभावयेत् ॥
प्राणोदये प्रमेये तु परानन्दं विभावयेत् ।
तत्रानन्तप्रमेयांशपूरणापाननिर्वृतः ॥
परानन्दगतस्तिष्ठेदपानशशिशोभितः ।
ततोऽनन्तस्फुरन्मेयसंघट्टैकान्तनिर्वृतः ॥
समानभूमिमागत्य ब्रह्मानन्दमयो भवेत् ।
ततोऽपि मानमेयौघकलनाग्रासतत्परः ॥
उदानवह्नौ विश्रान्तो महानन्दं विभावयेत् ।
तत्र विश्रान्तिमभ्येत्य शाम्यत्यस्मिन्महार्चिषि ॥
निरुपाधिर्महाव्याप्तिर्व्यानाख्योपाधिवर्जिता ।
तदा खलु चिदानन्दो यो जडानुपबृंहितः ॥
न ह्यत्र संस्थितिः कापि विभक्ता जडरूपिणः ।"
(तं०आ० 5, 44-50)

एतासामानन्दभूमिकानां लक्षणानि स्वे स्वे स्थाने द्रष्टव्यानि पृथक् पृथक् ।

आनन्दभैरवः——आगमविशेषः । तदुक्तम्—

"यथा श्रीमदानन्दभैरवे—
वामया विसृजेत्सर्वं ज्येष्ठया पालयेत्पुनः ।
रौद्र्या लोकोपसंहारं कुरुते स्वेच्छया प्रभुः ॥
काल्या कलति भूतानि विकरण्या किरेत्कलाः ।
बलमप्यन्यया सर्वं बलं मथ्नाति चान्यया ॥
दमन्या दमयित्वा तु मनः सङ्कल्परूपकम् ।
नयते परमं स्थानमुन्मन्या तु महेश्वरः ॥ इति
(स्व०तं०उ० 10, पृ० 484-85)

आनन्दयोगः——अनुपाययोग एव । तदुक्तम्—

"ततोऽपि परमं ज्ञानमुपायादिविवर्जितम् ।
आनन्दशक्तिविश्रान्तमनुत्तरमिहोच्यते ॥"
(तं०आ० 1, 242)

~कौले——रहस्यचर्यात्मकः सद्यः समकालं च भुक्ति-मुक्ति-प्रद उपायः नासौ प्रायः स्पष्टं व्याख्यायते तदधिकारिणामतिदुर्लभत्वात्, अनधिकारिणाञ्च सन्मार्गाद् भ्रंशस्याऽऽशङ्कातः । संकेतमात्रतः प्रतिपादितस्तन्त्रालोके तद्विवेके चैकोनत्रिंश आह्निके ।

इदमत्र रहस्यम्—कामसुखानन्दचर्वणाकाल एव तीव्रतरमा-

यथानशक्त्या गुरूपदेशमात्रगम्येन विधिना शिव-शक्ति-संघट्टात्मके जगदानन्दे प्रवेशयुक्तिरेष योग इति मनागुच्यते। उक्तं यथा—

"शक्तिसङ्गमसंक्षुब्ध-शक्त्यावेशावसानिकम् ।
यत्सुखं ब्रह्मतत्त्वस्य तत्सुखं स्वाक्यमुच्यते ॥
(वि० भै० 69)

द्र० (मा०वि०वा० 1, 893-899)

द्र० 'हृदयपूजा' इत्यपि च।

~त्रिके——

आनन्दशक्त्युद्रेकयुतोऽनुपाययोगः।

द्र० "अनुपायोयोगः' इति।

आनन्दशक्तिः——शिवस्यान्तरङ्गशक्तिषु द्वितीया, चिच्छक्तेः स्वभावमयी इच्छायाश्चोद्‌गमस्थानभूता।

~अन्तरङ्गा——अनुत्तरस्य मूलतत्त्वस्य नैसर्गिकस्वभावभूताऽऽनन्दोच्छलत्तात्मिका शक्तिः। शिवतत्त्वे प्रस्फुटतया दीव्यन्ती, शक्तितत्त्वोन्मेषरसिका परमशिवस्यान्तरङ्गा शक्तिर्भावनादौ भाव्यमानतायाम्।

वस्तुतस्तु न शिव-शक्त्योः परस्परं कोऽपि भेदः, एकमेव परं तत्त्वं भावनोपदेशव्याख्यानादौ शिवतया शक्तितया चोपदिश्यते। तदनुसारमेवान्तरङ्गशक्तिस्थितिः प्रतिपाद्यते।

~अभिव्यक्तौ——अनुत्तरस्य परमशिवस्य नैसर्गिकस्वभावभूताऽऽनन्दोच्छलत्तात्मिका स्थितिः। शिवतत्त्वे प्राधान्येनाभिव्यक्ततामुपयान्ती शक्तितत्त्वोन्मेषं प्रत्यौन्मुख्यरूपा स्थितिः। अत एव क्वचित् सिद्धान्तदृष्ट्या शिवतत्त्वमेवानन्दशक्तिमयं क्वचिच्चोपासनादृशा शक्तितत्त्वमेव तच्छक्तिमयमुक्तम्।

यथा—

(क) "आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्विभुः।"
(शि० दृ० 1, 2)

(ख) "निर्वृतचित्त्वाद्येव च शिवत्वमित्यर्थाच्छिवलक्षणमपि दर्शितम्·········।
निर्वृता वेद्यनिराकांक्षा पूर्णा चिद्यस्य सः।······
·· तथा लक्षणः शिवः·········।"
(शि०दृ०वृ०पृ० 5-6)

"शिवशक्तिसदाशिवतामीश्वरविद्यामयी च तत्त्वदशाम्।
शक्तीनां पञ्चानां विभक्तभावेन भासयति॥"
(प०सा० 14)

अत्र शिवतत्त्वं चित्, शक्तितत्त्वञ्च आनन्द इत्युक्तम्। यतश्चिदेव बहिर्मुखतायाः स्थितौ शिवः, आनन्दस्य च बहिर्मुखो विकासः शक्तितत्त्वम्। ततः शिवः, शक्तिः, सदाशिवः, ईश्वरः, विद्या च क्रमेण। चिदानन्देच्छाज्ञानक्रियाणां पञ्चानां शक्तीनां बहिर्मुखो विकासः। उत्तरोत्तरमारोहद्भिः साधकैरेव एष क्रमः स्वीकृतः साधनाक्रमानुसारम्। उपरितनः क्रमश्च सिद्धान्तदृशोक्तः, इति न कोऽपि विरोधः।

~उच्चाराद्यभ्यासे——पूर्णतास्पर्शवशादनुभूतिगोचरतां गच्छन्त्यानन्दमयी चमत्कृतिः। यथा—

"अत्र भावनया देहगतोपायैः परे पथि।
विवक्षोः पूर्णतायोगात्प्रागानन्दः प्रजायते॥"
(तं०आ० 5, 100)

उच्चारयोगसिद्धिलक्षणेषु प्रथमं लक्षणमेतत्।

~उपास्तौ——शिवात्मिकाऽऽनन्दशक्तिरेव बहिः सृष्टौ प्रसरन्ती शक्तितत्त्वदशारूपतामापद्यते। तत एवोपासका आनन्दशक्तिमेव शक्तितत्त्वस्य बीजं पश्यन्तस्तत्त्वोपासनक्रमे शक्तितत्त्वमानन्दशक्तिरूपतयोपासते। तत एवोक्तम्—

"चित्प्राधान्ये शिवतत्त्वम्, आनन्दप्राधान्ये शक्तितत्त्वम्।"
(तं०सा० पृ० 74)

आनन्दशक्तेर्बहिरुल्लास एव यतः शक्तितत्त्वं तत उपास्तौ शक्तितत्त्वमानन्दशक्तिप्रधानतयैव भाव्यतेः इति न कोऽपि विरोधस्तन्त्रसारतन्त्रालोकयोः शिवदृष्टिप्रत्यभिज्ञाशास्त्राभ्यां सहेति विदाङ्कुर्वन्तु सुधियः।

द्र० च (ष०त्रि०त०सं० पृ० 3) इति।

~प्रभोः——स्पष्टमुक्ता यथा—

"अन्यापेक्षावैकल्याच्च विश्रान्तिरूपत्वेनानन्दशक्तिरिति।"
(ई०प्र०वि०वि० खं० 3, पृ० 363)

पञ्चकृत्योल्लासकरी स्वात्ममात्रविश्रान्तिः परस्य तत्त्वस्य सुसमर्थ-परिपूर्णाहं-विमर्श-रूपिणी शिवशक्तिसंघट्टात्मिका स्थितिरानन्दशक्तिरिति तात्पर्यम्। इयमेव विसिसृक्षात्मकेच्छाशक्तिरूपतां धारयत्यग्रे।

~प्रसरे——सर्वं तत्त्वभुवनादिरूपं विश्वमानन्दशक्तेरेव बहिर्मुखः प्रसरः। सैव स्पन्दमाना सृष्ट्यौन्मुख्यदशां प्रकटयन्ती सिसृक्षारूपतामापद्यते। सिसृक्षात्मिका पारमेश्वरीच्छा ज्ञान-क्रियाशक्तिद्वयप्रसरतः क्रमेण विश्वात्मकत्वेनाभाति। ततः सर्वमिदमानन्दशक्तिविजृम्भितमेव मूलतः। ध्वनितमेतदुत्पलदेवपादैस्तथा—

"यत्स्वयं निजरसेन घूर्णसे तत्समुल्लसति भावमण्डलम्।"
(शि०स्तो० 13, 15)

निजरसोऽत्रानन्दशक्तिरेवेति।

~लोकव्यवहारे——भोग्यविषयोपभोगकालेऽनुभवितुर्या ताटस्थ्यविगमेन चमत्कारमयता सैव लोकव्यवहारे आनन्दशक्तेरभिव्यक्तिः। तामेवादाय तीव्रावधाना योगिनः शिवस्वभावभूतामनवच्छिन्नामानन्दशक्तिं प्रविशन्ति रहस्योपायबलेन। उक्तञ्च—

"तथाहि मधुरे गीते स्पर्शे वा चन्दनादिके।
माध्यस्थ्यविगमे यासौ हृदये स्पन्दमानता॥
आनन्दशक्तिः सैवोक्ता यतः सहृदयो जनः।"
(तं०आ० 3, 209-10)

"यद्यपि सर्व एवायं विश्वप्रपञ्चः आनन्दशक्तिस्फारस्तथापि स्फुटोपलम्भादत्र तस्या एवमुक्तम् ।"

(तं०आ०वि०खं० 2, पृ० 201)

आनन्दशास्त्रम्——(1) किमप्यागमशास्त्रमुपजीव्यत्वेन मतं तन्त्रालोके । कौलाम्नायग्रन्थविशेषः ।

द्र० (तं०आ० 13, 354 तथा 15, 590-91 तथा 36, 18) इति ।

~तद्वाक्यम्——उद्धृतं हि तन्त्रालोके यथा—

"श्रीमदानन्दशास्त्रे च नाशुद्धिः स्याद्विपश्चितः ।
किन्तु स्नानं सुवस्त्रत्वं तुष्टि-संजननं भवेत् ॥"

(तं०आ० 15, 45)

आनन्दाचार्यः——अरुणादित्यस्य पुत्रः सोमानन्दस्य च पिता एकोनविंशो मठिकागुरुस्त्र्यम्बकसन्ताने । तदुक्तम्—

"आनन्दसंज्ञकस्तस्मादुद्बभूव तथाविधः ।
तस्मादस्मि समुद्भूतः सोमानन्दाख्य ईदृशः ॥"

(शि०दृ० 7, 120)

आनन्दादिपञ्चकम् (उच्चारयोगे)——उच्चारांघ्राणवयोगाभ्यासस्य यत्साफल्यं तस्य द्योतकानि पञ्च बाह्यचिह्नान्याविर्भवन्ति साधके । तानि च क्रमेण (1) आनन्दानुभूतिः, (2) शरीरोत्प्लुतिरूप उद्भवः, (3) शरीरस्य कम्पः, (4) निद्रा, (5) घूर्णिश्चेति । तदुक्तम् —

"अनया शोध्यमानस्य शिष्यस्यास्य महामतिः ।
लक्षयेच्चिह्नसंघातमानन्दादिकमादरात् ॥
आनन्द उद्भवः कम्पो निद्रा घूर्णिश्च पञ्चमी ।

(मा०वि०तं० 11, 34-35)

तानि च क्रमेण (1) पूर्णतास्पर्शमात्रतः स्वात्मानन्दानुभूतिः । (2) विद्युद्विलासवत् क्षणदृष्टे देहवर्जिते पदे क्षणं समावेशात् शरीरस्योत्प्लुतिरूप उद्भवः । (3) सुचिरादभ्यस्ते देहात्मभावे क्षणं विलीयमाने सति देहलतायाः कम्पः । (4) अन्तर्मुखतया परिपूर्णसंविदन्तःप्रवेशे सति निद्रालुताया अभिव्यक्तिः । (5) विश्वात्मिकायां पूर्णायां संविदि प्रतिष्ठितत्वे सति घूर्णमानताया अभिव्यक्तिः । तदुक्तम्—

"अत्र भावनया देहगतोपायैः परे पथि ।
विविक्षोः पूर्णतास्पर्शात् प्रागानन्दः प्रजायते ॥
ततोऽपि विद्युदापातसदृशे देहवर्जिते ।
धाम्नि क्षणं समावेशादुद्भवः प्रस्फुटं प्लुतिः ।
जलपांसुवदभ्यस्तसंविद्देहैक्यहानितः ॥
स्वबलाक्रमणाद्देहशैथिल्यात्कम्पमाप्नुयात् ।
गलिते देहतादात्म्यनिश्चयेऽन्तर्मुखत्वतः ॥
निद्रायते पुरा यावन्न रूढः संविदात्मनि ।
ततः सत्यपदे रूढो विश्वात्मत्वेन संविदम् ॥
संविदन् घूर्णते घूर्णिर्महाव्याप्तिर्यतः स्मृता ।"

(तं०आ० 5, 100-105)

द्र० च (तं०सा० पृ० 40) इति ।

आनन्दादीनां पृथक्-पृथक् व्याख्या अत्र कोशे यथास्थानं द्रष्टव्याः ।

~करणयोगादौ——आनन्दादिपञ्चकं यदुच्चारयोगसिद्धिलक्षणजातं, तत् करणयोगादिसिद्धावप्यभिव्यक्तं भवति । वस्तुतो देहगतोपायसाफल्यलक्षणान्येतानि । उच्चारयोगेऽपि प्राणोच्चाराभ्यासो देहाश्रयत एव विधीयते, ततोऽत्रापि देहगतोपायविशेषताः प्रकटीभवन्ति । तत एवोक्तम्—

"अत्र भावनया" इत्यादि यथा प्राक् ।

(तं०आ० 5, 100-101)

"तथोक्तवक्ष्यमाणैरुच्चारकरणादिभिः "देहगतैरुपायैः परे पथि" परतत्त्वान्तर्वेष्टुमिच्छोः······इत्यादि ।"

(तं०आ०वि० खं० 3, पृ० 412)

~समावेशे——न केवलमुच्चारयोगे स्वानन्दादिपञ्चकस्याभिव्यक्तिर्यावद् येन केनाप्युपायेन लब्धात् समावेशरसास्वादात् तेषां पञ्चानामभिव्यक्तिर्जायते । उक्तमेतद्यथा—

"अनभ्यासेऽपि तु तत्क्षणावेश एवानन्दोद्भवकम्पनिद्राव्याप्तिरूपघूर्ण्याविर्भावनक्रमेण जीवन्मुक्ततालाभः ।"

(ई०प्र०वि०वि० खं० 3, पृ० 330)

~स्थानंतेषाम्——मूलाधारस्थे त्रिकोणे आनन्दस्याभिव्यक्तिः, कन्दे उद्भवस्य, हृदि कम्पस्य, तालुनि निद्राया ऊर्ध्वकुण्डलिनीचक्रे च घूर्णेः । तदुक्तम्—

"आनन्दचक्रं वह्न्यश्रि-कन्द उद्भव उच्यते ।
कम्पो हृत्तालु निद्रा च घूर्णिः स्यादूर्ध्वकुण्डली ॥"

(तं०आ० 5, 111)

आनन्देश्वरः——(1) कौलिकः शास्त्रविशेषः । तदुक्तम्—

"सिद्धिपात्रमितिश्रीमदानन्देश्वर उच्यते ॥"

(तं०आ० 29, 200)

(2) तान्त्रिकं योगशास्त्रं किमपि यस्य पंक्तयः समुद्धृता जयरथेन । यथा—

"तथा च द्वादशसाहस्रे श्रीमदानन्देश्वरे—
दिव्यं तेजः सुगन्धाढ्यं प्रददेन्मातृमण्डले ।
मध्यमाङ्गुष्टयोगेन वामहस्तेन भैरवि ॥
तदा सिद्धिं लभेताशु तन्त्रोक्तां नात्र संशयः ॥"

(उद्ध०तं०आ०वि०खं० 9, पृ० 139)

आनन्दोपायः——

द्र० 'अनुपायः~योगः' इति ।

आन्तरत्वम्——(1) भावजातस्य मूलतश्चिदेकरूपतया 'अहम्'-इत्येवंरूपा प्रकाशमानता। तदुक्तम्—

"पूर्वं स्वसंविदैकात्म्येन परिस्फुरतोऽर्थस्यान्तरत्वम्।"
(तं०आ०वि० खं० 6, पृ० 10)

(2) प्रमात्रा सहैकत्वम्। तच्च शिवे, सदाशिवेश्वरयोश्च चकास्ति भावानां शक्तिपदे विद्यापदे च। यथा—

"प्रमात्रैकात्म्यमान्तर्यं ततो भेदो हि बाह्यता।"
(ई०प्र० 1-8-8)

आन्तर-स्नानम्——सहस्रारचक्रस्थचन्द्रमण्डलतः स्रवताऽमृतेनाप्यायनं प्राणमार्गस्य। तदुक्तम्—

"आन्तरं तद् यथोर्ध्वेन्दुधारामृतपरिप्लवः।"
(तं०आ० 15, 77)

आन्तरो यागः——उक्तमेतद्विषये यथा—

"यत्किञ्चिद्भावजातं तदेषणीयतासमासादनपुरःसरम् इन्द्रियद्वारोपारोहेण ज्ञेयतामासाद्य तत्तदर्थक्रियाकारितया स्वात्ममात्रविश्रान्त्युपजननेन संविदः पूर्णतामावहतीति।"
(तं०आ०वि० खं० 3, पृ० 370-71)

आपूरणम्——(1) स्वात्मसात्करणं परस्य प्रमेयादेः। (2) प्रमेयादिभ्यः भेदमयसत्ताप्रदानं, तल्लक्षणं ततो भरणं पूरणं च। प्रकाश एव पूरयति सर्वमपि प्रमाणप्रमेयादिकम्, भेदेनावभासयतीति। उक्तं यथा—

"आपूरणं-स्वात्मसात्कारो भेदोल्लासश्च।"
(तं०आ०वि० खं० 3, पृ० 365)

आपूरणी शक्तिः——आनन्दशक्तिः।
दृश्यताम्—'शक्तिपञ्चकम्' इति।

आप्तः——यथार्थवक्ता, प्रामाणिको वक्ता।

आप्यायकं बीजम्——वकारः।
दृश्यताम्—'वरुणबीजम्' इति।

आप्यायनम्——मन्त्रैः साध्यं पुष्टिप्रदं कर्म। यथा—

"आप्यायनं पुनर्जातबलस्य पुष्ट्याधानं तच्च वांकारेण प्रतिवर्णसम्पुटीकारात्। यदुक्तम्—

एकान्तरितयोगेन वांकारेण तु सर्वदा।
भवेदाप्यायितो मन्त्रः ··· ··· ··· ···।" इति
(ने०तं०उ० खं० 2, पृ० 75-6)

आप्यायिनी——पञ्च कलासु द्वितीया प्रतिष्ठा कला। उक्तं च—

"आप्यायिन्या द्वितीयं च तत्र तत्त्वानि लक्षयेत्॥
त्रयोविंशत्यबादीनि तद्वट्टाद्यक्षराणि च।
पदानि पञ्च मन्त्राश्च षट् पञ्चाशत्पुराणि च॥"
(मा०वि०तं० 2, 52-53)

आप्लावनम्——नाडीशोधनकर्मणि स्थूलसूक्ष्मादिशरीराणां चिन्मयतया दर्शनम्। एतदेवाप्यायनमित्यपि समाख्यायते। तदुक्तम्—

"आप्लावनं तनूनां ज्ञानसुधासेकनिर्मिता शुद्धिः।"
(म०मं०प० 44, पृ० 111)

आभासः——अनवच्छिन्न - शुद्ध-परिपूर्ण - चिदानन्दमात्रस्वरूपत्वेन सततं प्रकाशमानस्यैव परस्य तत्त्वस्य स्वशक्तीनां बहिर्मुखतया प्रतिबिम्बनेनैव तत्तत्-कला-तत्त्व-भुवन-भाव-अभाव-शरीर-प्रमातृ-प्रमाण-प्रमेयादिरूपतया प्रकटीभावः। तेन सदाशिवादीनि धरान्तानि सर्वाणि तत्त्वान्याभासा एव। केवलं शिव एव नाभासो, अपि तु स्वप्रकाशेन प्रकाशमानं पारमार्थिकं तत्त्वं सः।

~क्षयधर्मी——यो च आभासः स स लयशीलः। तद्यथा—

"यावच्च किञ्चिदाभासयति तत्सर्वमाभास्यमानत्वादेव बहिर्मुखेन रूपेण क्षयधर्मकं, क्षयश्चास्येदन्ताभासनिमज्जनेनाहन्तारूपतयावस्थानम्।"
(स्पं०नि०, पृ० 32)

~मिश्रीकरणतः——यच्च घटादिरूपं स्वलक्षणात्मकं वस्तु तदनेकाभासमिश्रीकरणाभासरूपम्।

द्र० आभासः~मेलनं (तेषाम्)' इति।

~मूलधारतः——सर्वेषामाभासानां मूलाधारः स्वयं परमेश्वर एव। उक्तं हि—

"विश्ववैचित्र्यं हि तत्र परमेश्वरे प्रकाशैकात्मनि सति भाति, यथा चित्रं भित्तौ······एकप्रकाशभित्तिलग्नत्वेन वैचित्र्यात्मकभेदोपपत्तिः।"
(ई०प्र०वि० खं० 2, पृ० 122-23)

~मेलनं (तेषाम्)——नियतिशक्त्यनुसारं ये परस्परमविरुद्धा आभासभेदास्तेषां मिश्रितरूपा एकावभासताऽपि भवति। तदुक्तम्—

"अविरुद्धा ये आभासा घटलोहितकाञ्चनादयस्तेषां सम्बन्धि यदेकं स्वलक्षणं तत्कार्या ऐक्यधीरिति सम्बन्धः। ऐक्यधिया प्रतिभासो विमर्शोऽर्थक्रिया चेति।"
(ई०प्र०वि० खं० 2, पृ० 98-99)

~नियत्यधीनतया——ये तावत् परस्परमविरुद्धा आभासास्ते एव परस्परं मिश्रीभवन्ति, तथाभूतानि च विशिष्टामेकामर्थक्रियां सम्पादयन्ति, न पुनः परस्परं ये विरुद्धास्ते आभासा मिश्रीभवितुमर्हन्ति। यथा—

"येषामविरोधस्त एवाभासा मिश्रीभवन्ति। न हि रूपाभासो

मारुताभासेन मिश्रीभवति विरोधात्, सोऽपि च नियतिशक्त्युत्थापितः।"

(ई०प्र०वि० खं० 2, पृ० 97-98)

आभासनम्——(1) बाह्यतया व्यावहारिकतया च प्रकटनम्, बहिः सत्तया प्रकाशनम्। यथा—

"बहिः सत्तादानं यद्यप्याभासनमेव।"

(ई०प्र०वि०वि० खं० 3, पृ० 258)

~भावनाभ्यासे——साधकेन वस्तुदर्शनकाले तद्विषयिणी स्वसम्पादिता सृष्टिभावना विधीयते। तया च शिवभावसमावेशो भवति। तद्यथा—

"याश्च विचित्रा एव सृष्टिसंहारलीला आभासन-रक्ति-विमर्शन-बीजावस्थापन-विलापनात्मकपञ्चविधकृत्यानि प्रख्यापयति।"

(स्प०सं० टिप्प० पृ० 1)

आभासवादः~तर्कदृष्ट्या——(1) यद्यद् यदा ज्ञायते, क्रियते, वाऽस्तीतिरूपतया वा विमृश्यते तत्सर्वं तदा चित्प्रकाशैक्यमापन्नमेव सत्तथा भवति। तेन चित्प्रकाश एव नीलादिसुखादिरूपतया तत्तदभावात्मकतयापि वाभासमानः सन्नेव स्वयं तथा-तथा प्रकाशत इति सिद्धान्तः शैवानाम्। तदनुसारं चित्प्रकाशादतिरिक्तस्याप्रकाशस्य बाह्यपदार्थस्य सत्तैव नास्ति। तत्त्वभुवनादिकं सर्वं स्वमहिम्ना नैव सत्तां भजते, अपि तु चित्प्रकाश एव तथा तथाऽऽभासमानः सन्नेतत् सर्वं सत्त्वेनाभासयति। तथाऽऽभासनसिद्धान्त एवाभासवादः। यथोक्तम्—

(क) "आभासमात्रं हि भावस्य स्वरूपम्, प्रत्याभासं प्रमाणस्य व्यापारात्। तदेवाभासान्तरव्यामिश्रणया दीपसहस्रप्रभासम्मूर्च्छनवत् स्फुटीभवति।"

(ई०प्र०वि० खं० 1, पृ० 124)

(ख) "आभासभेदा एव वस्तु, आभासमानतासारत्वाद् वस्तुतायाः। योऽप्याभासस्य प्राणभूतो विमर्शः, सोऽपि प्रत्याभासमेव, शब्दस्याभिजल्पात्मनो बोधजीवितप्रख्यस्य प्रत्याभासमेव विश्रान्तेः। ..... एवं येन येन मुखेनार्थो विचार्यते तेन तेनाभासमात्रात्मैव, तथैव प्रतिभासनाद्, विमर्शनाद्, अर्थक्रियाकरणच्चेति सिद्धम्।"

(ई०प्र०वि० खं० 2, पृ० 92-93)

~अत्रायमभिप्रायः——'घटः' इति घटरूपं वस्तु तद्रूपं च शब्दनम्। उभयञ्च वस्तुतः घटप्रकाश एव, घटरूपस्य वस्तुन प्रकाशमानतासारत्वात्। अप्रकाशमानतायां घटो वाऽघटो वा न किञ्चिदपि वेति नैव कथमपि निश्चेतुं शक्यम्। यच्च घट इति शब्दनं, तदपि प्रकाशानान्तरीयकविमर्शनमेव मूलतः। ततस्तदपि प्रकाशाभिन्नम्। तदेवं प्रकाशात्मको विषयस्यावभास एव वस्तुतः प्रकाशते, ज्ञायते, विमृश्यते, अभिलप्यते, अर्थ्यते, अर्थक्रियायां चोपयुज्यते; न खल्वनाभासस्य विषयस्य सिद्धिः क्वापि। तत आभासरूपमेव विश्वम्। परं नाविद्यावासनादिकारणकं, न चापि स्वप्नसंसारवदसत्यम्। सत्यस्यैव परमेश्वरस्य, सद्रूपाणामेव शक्तीनां प्रतिबिम्बात्मकाभासरूपत्वादस्य; संसारेऽस्य स्थिररूपतायाः कारणात् सर्वजनोपयोगितायाश्चापिहेतोर्न स्वप्नकल्पत्वम्, अपि त्वाभासरूपत्वम्। ततो न वन्ध्यासुतकल्पं जगत् नापि जीवस्य मनःसङ्कल्पजम्, अपि तु परमेश्वरस्य शक्तीनां बहिराभासरूपमेतत्। तदेतन्महदन्तरं शैवस्याभासवादस्य वेदान्ताभिमताद् वैवर्त्तिकादाभासवादात्, पाश्चात्यदार्शनिकाभिमताच्च मनःसङ्कल्पजन्यतारूपादाभासवादात्, बौद्धसम्मताच्च संवृतिसत्यत्वात्।

~सिद्धान्ततः——(2) चिदेकरूपस्य परतत्त्वस्यैव पारमेश्वरीणां शक्तीनां बहिर्मुखप्रतिबिम्बरूपा आभासा एव भावा इति सिद्धान्ताः शैवानाम्। तदुक्तम्—

"यथैतत् प्रतिबिम्बितं भाति तथैव विश्वं परमेश्वरप्रकाशे। नन्वत्र बिम्बं किं स्यात्। माभूत् किञ्चित्। ननु किमकारणकं तत्? हन्त तर्हि हेतुप्रश्नः—तत् किं बिम्बवाचोयुक्त्या? हेतुश्च परमेश्वरशक्तिरेव स्वातन्त्र्यापरपर्याया भविष्यति। विश्वप्रतिबिम्बधारित्वाच्च विश्वात्मकत्वं भगवतः।"

(तं०सा० पृ० 11)

आभ्यन्तरस्नानम्——मूलाधारादिचक्रेषु भावनया धरादिरूपधारणापूर्वकस्तन्मयीभावः। यथा—

"आभ्यन्तरं यथा—तत्तद्धरादिरूपधारणया तत्र तत्र पार्थिवादौ चक्रे तन्मयीभावः।"

(तं०सा० पृ० 131)

आयतनम्——तथाविधं तीर्थविशेषं यत्र शिवस्य वा तदाज्ञावर्तिनो देवान्तरस्य वा प्रतिष्ठा सुप्रसिद्धाऽत्र लोके। तत्रैव देहत्यागेन भक्तानां सद्गतिर्भवति भुक्तिमुक्तिप्रदा। परं योगिनां कृते नेदमावश्यकम्। ते तु योगबलेनैव स्वयमेव मुक्ता भवन्ति। तदुक्तम्—

"उक्तं श्रीरत्नमालायां ज्ञात्वा कालमुपस्थितम् ॥
मोक्षार्थी न भयं गच्छेत् त्यजेद्देहमशङ्कितः।
तीर्थायतनपुण्येषु कालं वा वञ्चयेत् प्रिये ॥
अयोगिनामयं पन्था योगी योगेन वञ्चयेत्।
वञ्चने त्वसमर्थः सन् क्षेत्रमायतनं व्रजेत् ॥
तीर्थे समाश्रयात्तस्य वञ्चनं तु विजायते।"

(तं०आ० 28—256 तः 259)

~उत्कृष्टम्——तत्वविदा योगिना स्थापितं यल्लिङ्गं तन्मन्दिरमेवोत्कृष्टमायतनम्। उक्तं स्पष्टं यथा—

"तस्मात्तत्त्वविदा यद्यत् स्थापितं लिङ्गमुत्तमम्।
तदेवायतनत्वेन संश्रयेद् भुक्तिमुक्तये ॥"

(तं०आ० 28, 255-56)

~क्षेत्रमानतः——लिङ्गस्थापकानां शक्तितारतम्यानुसारं स्थापितस्य लिङ्गस्यायतनमपि विविधपरिमाणं भवति। तद्यथा—

"क्षेत्रमाणं ब्रुवे श्रीमत्सर्वज्ञानादिषूदितम् ॥
लिङ्गाद्धस्तशतं क्षेत्रमाचार्यस्थापिते सति ।
स्वयम्भूते सहस्रं तु तदर्धमृषियोजिते ॥
तत्त्ववित्स्थापिते लिङ्गे स्वयम्भूसदृशं फलम् ।
अतत्त्वविद्यदाचार्यो लिङ्गं स्थापयते तदा ॥
पुनर्विधिर्भवेद्दोषो ह्यन्यथोभयदूषकः ।"

(तं०आ० 28, 251-54)

~दीक्षितविषये——अज्ञानिनामेव कृत आयतनसेवनमावश्यकम् । न ज्ञानिनां न चाप्यूर्ध्वशासनस्थानां कृते । यथा—

(क) "पशूनामेष वृत्तान्तो ये तु तत्त्वदीक्षिताः ।
ते तदीशसमीपत्वं यान्ति स्वौचित्ययोगतः ॥"

(तं०आ० 28, 261)

(ख) "यस्त्वूर्ध्वशास्त्रगस्तत्र त्यक्तास्थः संशयेन सः ।
व्रजन्नायतनं नैव फलं किञ्चित्समश्नुते ॥"

(तं०आ० 28, 274)

दीक्षितस्य यदि संशयः समुदेति हृदये तर्हि तस्य क्षेत्रसेवनेनापि न किमपि फलम् ।

~द्विविधम्——(1) स्वयम्भ्वादिलोकस्थदेवा भूरादिलोकानवतरन्ति । यत्र तेऽवतीर्य तिष्ठन्ति तान्यायतनानि भवन्ति । तत्र केचन ब्रह्माद्यंशाः केवलं लोकानुग्रहार्थमेवायतनेषु सदा तिष्ठन्ति, केचन पुनः स्वकार्यमपि कुर्वाणाः, इति तेषां द्वैविध्यमायतनानि द्विविधानि स्वकार्यञ्च तेषां तपःप्रभृति । तदुक्तम्—

"तत्र स्वयम्भुवो द्वेधा केऽप्यनुग्रहतत्पराः ।
केऽपि स्वकृत्यायातांशस्थानमात्रोपसेविनः ॥"

(तं० आ० 28, 239-40)

(2) स्वकार्यं चायतनदेवतानां तपःप्रभृति । यथा—

"यस्तु स्वकार्यं कुर्वाणस्तत्स्थानं नांशतस्त्यजेत् ॥
यथा गौरी तपस्यन्ती कश्मीरेषु गुहागता ।
तत्रैव वा यथा ध्यानोड्डारे नरहरिर्विभुः ॥
वितस्तां नयतो दैत्यांस्त्रासयन्दृप्त उत्थितः ।
सालिग्रामे यथा विष्णुः शिवो वा स्वोपभोगिनः ॥
तपस्यन्तौ बदर्यां च नरनारायणौ तथा ।
इत्येवमादयो देवाः स्वकृत्यांशस्थितास्तथा ॥
आराधिताः स्वोचितं तच्छीघ्रं विदधते फलम् ।"

(तं०आ० 28, 241-45)

~सर्वोत्कृष्टम्——पाशुपताः शैवा देवगृह-गुरुगृह-श्मशानाद्यायतनवासिनो भवन्ति । त्रैयम्बकाः शैवाः शिवालयेषु देहत्यागं कुर्वन्ति । परं तेषु साक्षात्कृत-स्वात्मशिवभावस्य योगिनः पुनरिदं त्वगस्थिप्रभृतिबहुलं स्थूलं शरीरमेवायतनम् । न तस्य श्मशानप्रवेशापेक्षा कापि । तदुक्तम्—

"षट्त्रिंशत्तत्त्वभृतं विग्रहरचनागवाक्षपरिपूर्णम् ।
निजमन्यदथ शरीरं घटादि वा तस्य देवगृहम् ॥"

(प०सा०का० 74,

आयतनमरणगतिः——लोकानुग्रहार्थं शिवेन भूरादिलोकान् अवतारितानां स्वयम्भू-मुनि-देवादीनामायतनेषु ये साधका म्रियन्ते ते शरीरपातानन्तरं तेषां तेषां स्वयम्भ्वादीनां लोकं प्राप्य तत्तल्लोकपतिभिर्दीक्षिताः सन्तो वा पुनर्भुवमवतीर्य वा क्रमेणैव मुक्ता भवन्ति । तदेवमुक्तम्—

"येऽपि तत्त्वावतीर्णानां शङ्कराज्ञानुवर्तिनाम् ॥
स्वयम्भू-मुनि-देवर्षि-मनुजादि-भुवां गृहे ।
मृतास्ते तत्पुरं प्राप्य पुरेशैर्दीक्षिताः क्रमात् ॥
मर्त्येऽवतीर्य वा नो वा शिवं यान्त्यपुनर्भवाः ।"

(तं०आ० 28, 237-239)

~अपरा——स्वकार्यार्थं भुवमवतीर्णानां तत्र वा सदा तिष्ठतां देवानामायतनेषु ये जना म्रियन्ते ते तत्तद्देवतालोकं प्राप्य तत्र भोगान् भुक्त्वा पुनरत्र भूलोके जन्म लभन्ते । ततो योगमभ्यस्य क्रमेण मुक्तिमाप्नुवन्ति । उक्तमेतत्—

"स्वकृत्यांशस्थितानाञ्च धाम्नि येऽन्तं व्रजन्ति ते ॥
तत्र भोगांस्तथा भुक्त्वा मर्त्येष्ववतरन्त्यपि ।
मर्त्यावतीर्णास्ते तत्तदंशकास्तन्मयाः पुनः ॥
तद्दीक्षाज्ञानचर्यादिक्रमाद्यान्ति शिवात्मताम् ।"

(तं०आ० 28, 245-47)

~उत्तमा——ये पुनर्देवाः शिवाज्ञयानुग्रहार्थं भुवमवतीर्णाः सन्तोऽत्र तिष्ठन्ति तेषामायतनेषु मृता जनास्तदनुग्रहेण पुनर्मर्त्यावतारं विनैव तत्तद्देवलोकत एवाग्रे सरन्तः क्रमेण शिवतां यान्ति । तदुक्तम्—

"येऽनुग्रहार्थमाज्ञप्तास्तेषु यो म्रियते नरः ।
सोऽनुग्रहं स्फुटं याति विना मर्त्यावतारतः ॥"

(तं०आ० 28, 240-41)

~तिर्यञ्चाम्——ब्रह्म-विष्णु-रुद्राद्यायतनेषु मृताः पशवः स्थावराश्चापि सालोक्यं लभन्ते । उक्तमेतत्—

"स्थावराद्यास्तिर्यगन्ताः पशवोऽस्मिन्द्वये मृताः ।
स्वकर्मसंस्क्रियावेधात्तल्लोके चित्रताजुषः ॥"

(तं०आ० 28, 247-48)

~मानवानाम्——आयतने मृता विवेकिनो मानवाः सायुज्यमपि लभन्ते, तिर्यञ्च अविवेकिनश्च पुनः सालोक्यमात्रम् । तदुक्तम्—

(क) "पुंसाञ्च पशुमात्राणां सालोक्यमविवेकतः ।"

(तं०आ० 28, 248)

(ख) "पशुमात्राणामिति अन्येषां पुनः सायुज्याद्यपि भवेदिति भावः ।"

(तं०आ०वि० खं० 11, पृ० 248)

आर्यप्रज्ञाकरगुप्तः——बौद्धाचार्यविशेषो यस्य मतमुल्लिखितं विवृतिविमर्शिन्याम् । तद्यथा—

"अमुनैवाशयेन आर्यप्रज्ञाकरगुप्तो भाविनोऽपि स्वकालावस्थानेन कारणतामवोचत् ।"

(ई०प्र०वि०वि० खं० 2, पृ० 227)

आलोकमाला——ग्रन्थविशेष इदानीं नोपलभ्यः । तद्यथा—

"सावस्था काप्यविज्ञेया मादृशां शून्यतोच्यते ।
न पुनर्लोकरूढ्येव नास्तिक्यार्थानुपातिनी ॥
इत्यालोकमालायामुक्तम्··· ······ ·········।"

(स्पं०नि० पृ० 229)

द्र० (म०न०प्र०वि० पृ० 5) चापि ।

आवरणम्——शुद्धचेतनाया आवरणकरम् आणवादिमलं तत्फलभूतञ्च देहादिकम् ।

~त्रिस्तरम्——चिद्रूपस्यात्मनश्चिदात्मकताया आच्छादकं पदार्थत्रयम् । तच्च परमावरणं, सूक्ष्मावरणं, स्थूलं चावरणं क्रमेण आणवमलः, कञ्चुकपञ्चकम्, स्थूलं च शरीरम् । यथा—

"परमावरणं मल इह सूक्ष्मं मायादि कञ्चुकं स्थूलम् ।
बाह्यं विग्रहरूपं कोषत्रयवेष्टितो ह्यात्मा ॥"
एतदेवावरणत्रयम्"

(प०सा०का० 24)

~तद्विशेषाः——पृथिव्यावरणं, प्राकृतावरणं च प्रतिपुरुषं भिन्नभिन्नमसंख्यं च, एवं कलाद्यावरणमपि । परं मायावरणमेकमेव सर्वपशुप्राणिगणस्वरूपावरकम् । तदुक्तम्—

"तेन कलादिधरान्तं यदुक्तमावरणजालमखिलं तत् ।
निःसंख्यं च विचित्रं मायैवैका त्वभिन्नेयम् ॥"

(तं०आ० 8, 324)

आवर्तनम्——विच्छिद्य विच्छिद्योच्चारणम् । तदुक्तम्—

"आवर्तनस्य हि विच्छिद्य विच्छिद्य यदुदीरणं तदेव रूपम् ।"

(ई०प्र०वि०वि० खं० 2, पृ० 262)

~व्याख्याविधौ——पुनः पुनर्व्याख्यानम् । लक्षितं यथा—

"अवघातादेरिव यावद्द्रव्यमसकृत् प्रयुक्तिरावर्तनम् ।"

(तं०आ०वि० खं० 11, पृ० 172)

आवापः——वस्त्वन्तरप्रक्षेपः । उक्तं यथा—

"आवापो वस्त्वन्तरप्रक्षेपो विद्यते·········।"

(तं०आ०वि० खं० 5, पृ० 125)

आवाहनम्——पूजाङ्गविशेषः । तदुक्तम्—

"अनभिमुखस्याभिमुखीकरणम् ।"

(तं०आ०वि० खं० 1, आ० 2, पृ० 22)

आवाहनादिरहस्यम्——पूजादौ यद्देवतानां साम्मुख्यादिकं तत्सर्वं तत्तद्देवतासंस्काराणामुद्बोधनं भावनया, एतदेवावाहनविसर्जनादिक्रियाणां रहस्यम् । उक्तं हि स्पष्टमेव निर्मर्यादशास्त्रानुसारम्—

"देवः सर्वगतो देव निर्मर्यादः कथं शिवः ।
आवाह्यते क्षम्यते वेत्येवं पृष्टोऽब्रवीद्विभुः ॥
वासनावाह्यते देवि वासना च विसृज्यते ।
परमार्थेन देवस्य नावाहनविसर्जने ॥
प्राणिनामप्रबुद्धानां सन्तोषजननाय वै ।
आवाहनादिकं तेषां प्रवृत्तिः कथमन्यथा ॥

(तं०आ० 26, 45-48)

आवृतिः——आवरणम् ।
द्र० 'आवरणम्' इति ।

आवेशः——वास्तविके स्वरूपे प्रवेशः । यथा—

"जडरूपतान्यक्क्रियया चिद्रूपताप्राधान्येनावेशः,
आ—समन्तात् स्वरूपप्रवेश इत्यर्थः ।"

(ई०प्र०वि०वि० खं० 3, पृ० 315)

द्र० 'समावेशः' इति ।

आवेशत्रयम्——कौलदृष्ट्या शाम्भवादिसमावेशत्रये परस्परमस्ति कोऽपि विशेषः । तदुक्तं यथा—

"आवेशश्च प्राणावेशमय आणवः, द्वितीयश्च प्राणक्षोभवर्जितः सानन्दः शाक्तः, तृतीयश्च आनन्दानुभवोत्तीर्णः स्वस्वरूपविश्रान्तिनेदीयानावेशः शाम्भवः ।

(म०प्र०वि० पृ० 22)

अयं टीकाकारो विश्वसनीयो न वेति विमृश्यं सुधीभिः ।

आश्यानता——स्थूलता घनतेव, यथा जलस्य हिमरूपता तथा विसर्गस्य हकारतावाप्तिः । तदुक्तम्—

"विसर्ग एवमुत्सृष्ट आश्यानत्वमुपागतः ।
हंसः प्राणो व्यञ्जनञ्च स्पर्शश्च परिभाष्यते ॥

(तं०आ० 3, 142)

आश्वासः——साधकस्य जिज्ञासोश्च परमः संतोषः । तदुक्तम्—

"प्रमात्राश्वासपर्यन्तो यतोऽधिगम उच्यते ॥
आश्वासश्च विचित्रोऽसौ शक्तिपातवशात्तथा ।
प्रमितेऽपि प्रमाणानामवकाशोऽस्त्यतः स्फुटः ॥"

(तं०आ० 4, 82-83)

आसनपूजामन्त्राः~तत्त्वविषये——यथा—

1 ह्रीं = आधारशक्तौ ।
2 क्लां
3 क्ष्वीं = धरादिचतुष्टये ।
4 वं
5 क्षं
6 हं = नाले=प्राणे ।
7 यं = धर्मे
8 रं = अधर्मे

9 लं = कामे
10 वं = मोक्षे
11 ऋं = अधर्मे ।
12 ॠं = अनर्थे ।
13 लृं = अकामे ।
14 ॡं = अमोक्षे ।
15 ओं = विद्यायाम् ।
16 औं = मायायाम् ।
17 हः = कलायाम् ।
18 ∸ = ईश्वरतत्त्वे ।
19 —: = सदाशिवतत्त्वे ।

तदुक्तम्—

"आधारशक्तौ ह्रीं पृथ्वीप्रभृतौ तु चतुष्टये ।
क्ष्लां क्ष्वीं वं क्षमिति प्राहुः क्रमाद्वर्णचतुष्टयम् ॥
हुं नाले यं तथा रं लं वं धर्मादिचतुष्टये ।
ऋं ॠं लृं ॡं चतुष्के च विपरीतक्रमाद्भवेत् ॥
ओं औं हस्त्रयमित्येतद्विद्यामायाकलात्रये ।
अनुस्वारविसर्गौ च विद्येशेश्वरतत्त्वयोः ॥"
(तं०आ० 30, 4-6)

~पद्मे——कं खं गं इत्यारभ्य भं इत्यन्तं चतुर्विंशतिमन्त्राः केसरेषु, हं हां हिं हीं हुं हूं हें हैं इत्यष्टौ मन्त्राः दलेषु, कर्णिकायां च हौं इति । तदुक्तम्—

"कादिभान्ता केसरेषु प्राणोऽष्टस्वरसंयुतः ।
सबिन्दुको दलेष्वष्टस्वथ स्वं नाम दीपितम् ॥
शक्तीनां नवकस्य स्यात् ……।"
(तं०आ० 30, 7-8)

केसरेषु भकारान्ताः हं हां हिं हीं च हुं तथा ।
हूं हें हैं हों दलेष्वेवं स्वसंज्ञाभिश्च शक्तयः ॥
(उद्धृ०तं०आ०वि० खं० 12, पृ० 178)

~मण्डलत्रये——शं षं सं इति मन्त्रत्रयं मण्डलत्रये ।
यथा—

"शषसा मण्डलत्रये सबिन्दुकाः………॥"
(तं०आ०वि०खं० 12, पृ० 178)

"आग्नेये मण्डले गुह्यं, सौरे उदरं, चान्द्रे जीव इति ।"
(तं०आ०वि० खं० 12, पृ० 178)

~शेषाङ्गेषु——क्ष्मं इति प्रेते (ओजसि),
ज्रं इति शूलशृंगेषु । यथा—

"सबिन्दुकाः क्ष्मं प्रेते ज्रं शूलशृंगेषु कल्पयेत् ।
पृथगासनपूजायां क्रमान्मन्त्रा इमे स्मृताः ।"
(तं०आ० 30, 8-9)

"प्रेते च ओजःसंभिन्ने नाभिकटी
शूलशृंगेषु च सबिन्दुदंडशूलम् ।"
(तं०आ०वि०खं० 12, पृ० 178)

~संक्षिप्तपूजने——उक्तं यथा—

"संक्षेपपूजने तु प्रागाद्यमन्त्यं च बीजकम् ।
आदायाधारशक्त्यादिशूलशृङ्गान्तमर्चयेत् ।
(तं०आ० 30, 9-10)

"आद्यमित्याधारशक्तिवाचकं मायाबीजम् । अन्त्यमिति शूलारवाचकं जूंकारम् । तेन ह्रीं जूं आसनपक्षाय नमः । इत्यूहः ।"
(तं०आ०वि० खं० 12, पृ० 176)

आसनम्——पूजाङ्गविशेषो भावनात्मकः । यथा—

"सन्निधानमुद्रया पूजां प्रत्यौन्मुख्यम् ।"
(तं०आ०वि०आ० 2, पृ० 22)

~डामरे यागे——सकलादारभ्य सदाशिवान्तमासनम् । सकलाद्याश्च प्रमातारोऽनेकविधस्वरूपाणां क्रियाज्ञानेच्छानां शक्तीनां सम्मिलिताधारत्वेन भावनीयास्तत्र । तदुक्तम्—

"इह खलु दृक्कर्मेच्छा……इत्यारभ्य
तदिदं स्यादासनत्वेन ……इत्यन्तम् ।"
(तं०आ० 15, 339-43)

~तत्तच्छास्त्रेषु——तत्तत्तत्त्वं यत्र यत्र धारणां धृत्वा साधको ध्येयस्य प्राप्यस्य चोत्तरोत्तरस्य तत्त्वस्य साक्षात्कारं लभते । तच्च भिन्नभिन्नेषु साधनाक्रमेषु भिन्नभिन्नमेव । तदुक्तम्—

द्र० '~तत्तदुपासनाक्रमेषु' इति ।

~तत्तदुपासनाक्रमेषु——उत्तरोत्तरेषु शास्त्रेषूत्तरोत्तरं तत्त्वं यावदासनपरिकल्पना । तत्र शैवाचारे (सिद्धान्तशैवे) विद्यातत्त्वान्तं, वामाचार-दक्षिणाचारयोः सदाशिवान्तं, मतसहिते यामले शास्त्रे समनान्तं, त्रिकशास्त्रे पुनरुन्मनान्तमासनं परिकल्पितं वेदितव्यम् । तदुक्तम्—

"विद्याकलान्तं सिद्धान्ते वामदक्षिणशास्त्रयोः ।
सदाशिवान्तं समनापर्यन्तं मतयामले ॥
उन्मनान्तमिहाख्यातमित्येतत्परमासनम् ।"
(तं०आ० 15, 319-20)

तत्तदासनोपरि प्रतिष्ठित एवोपास्यदेवो भावनया तथा तथा पूज्यते ।

~दर्शनसिद्धान्ते——जगदाधारभूतं शाक्तं बलम् । तदुक्तम्—

"आस्यते नित्यमैकात्म्येन स्थीयतेऽस्मिन्निति परं शाक्तं बलम् ।"
(शि०सू०वृ० 3, 16)

~प्राणधारणासु——मध्यनाड्यां प्रवहन्ती ज्ञानशक्तिमय्युदानवृत्तिरेवासनम् । तदुपरि व्यानाख्यस्य सर्वव्यापिनश्चित्स्वरूपस्य भावना । यथा—

"मध्यमं प्राणमाश्रित्य प्राणापानपथान्तरम् ।
आलम्ब्य ज्ञानशक्तिं च तत्स्थं चैवासनं लभेत् ॥"
(ने०तं० 8, 11)

~शाम्भवोपाये——शाक्तं बलं वा उदानाख्यो वा प्राण आसनम् । तदुक्तम्—

"प्राप्तसहजविद्योदयो योगी परे वा शाक्तबलात्मके आसने उदानाख्यप्राणरूपे वाऽऽसने स्थितो विश्रान्तः सन् ·····।"

(शि०सू०विवृ० 3, 16)

आहङ्कारिकी सृष्टिः——अहङ्कारान्मनः, पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, पञ्च च तन्मात्राणीति षोडश तत्त्वानि सृज्यन्ते भगवता। नैयायिकाः पञ्चभूतेभ्यः पञ्च ज्ञानेन्द्रियाणां गुणाख्यानाञ्च तन्मात्राणां सृष्टिं प्रतिपादयन्ति। परम्—'अहं पश्यामि, अहं जिघ्रामि"—इत्यादिव्यवहारे चक्षुरादीनामहङ्कारेणैव घनतरः सम्बन्धस्ततोऽहङ्कारस्यैव विस्तरोऽयं न भूतानामिति शैवानां मतम्। सूक्ष्मसूक्ष्माद्धि स्थूलस्थूलतराणां सृष्टिर्न्याय्या।

द्र० 'इन्द्रियवर्गः'~अभौतिक' इति।

द्र० 'इन्द्रियवर्गः'~आहङ्कारिकः' इति च।

~त्रिवर्गी——

1 (क) सत्त्वगुणप्रधानादहङ्कारान्मनसो ज्ञानेन्द्रियपञ्चकस्य च सृष्टिः।

(ख) रजोगुणप्रधानात् कर्मेन्द्रियपञ्चकस्य।

(ग) तमोगुणप्रधानाच्च तन्मात्रपञ्चकस्य।

यथा—

"(क) सत्त्वप्रधानाहङ्काराद् भोक्त्रंशस्पर्शिनः स्फुटम्।
मनोबुद्ध्यक्षषट्कं तु जातं भेदस्तु कथ्यते॥"

(तं०आ० 9, 234)

(ख) उक्त इन्द्रियवर्गोऽयमहंकारात् तु राजसात्।
तमः प्रधानाहङ्काराद् भोक्त्रंशच्छादनात्मनः॥
भूतादिनाम्नस्तन्मात्रपञ्चकं भूतकारणम्।"

(तदेव 9, 71-72)

उभयेन्द्रियवर्गसृष्टौ तन्मात्रवर्गसृष्टौ च राजसोऽहङ्कार उपष्टम्भकः। तदुक्तम्—

"मनोबुद्ध्यक्षकर्माक्षवर्गस्तन्मात्रवर्गकः।
इत्यत्र राजसाहंकृद्योगः संश्लेषको द्वये॥"

(तदेव 9, 272-73)

~मतान्तरतः——

(1) राजसाहङ्काराद् वेगवतो मनसः सृष्टिः।

(2) सत्त्विकान्मनसः, राजसाच्च ज्ञान-कर्मेन्द्रियाणाम्।

उक्तं हि—

"अन्ये त्वाहुर्मनो जातं राजसाहंकृतेर्यतः॥
समस्तेन्द्रियसञ्चारचतुरं लघुवेगवत्।
अन्ये तु सात्त्विकात्स्वान्तं बुद्धिकर्मेन्द्रियाणि तु॥
राजसाद्ग्राहकग्राह्यभागस्पर्शीनि मन्वते।"

(तं०आ० 9, 273-75)

(3) खेटपालस्य मतेन कर्मेन्द्रियसृष्टी राजसादेव। उक्तं हि—

"खेटपालास्तु मन्यन्ते कर्मेन्द्रियगणः स्फुटम्।
राजसाहंकृतेर्जातो रजसः कर्मता यतः॥"

(तदेव 9, 275-76)

(4) मालिनीमतानुसारम्—

(I) मनसः सृष्टी राजसादहङ्कारात्, सात्त्विकाच्च सर्वासामिन्द्रियाणामिति। यथा—

"श्रीपूर्वशास्त्रे तु मनो राजसात् सात्त्विकात्पुनः॥
इन्द्रियाणि समस्तानि·····················।

(तदेव 9, 276-77)

~युक्तियुक्ता——अत्र भिन्नभिन्नैराचार्यैः स्वमतिकल्पनयैवोपदिष्टोऽयं विषयः। परं युक्तियुक्तं मतं हि मालिनीमतमेव। यत 'आगमिकं सदेतन्न पुरुषबुद्धिसमाश्रितं विशिष्टतर्कयुक्त्या च संसिद्धमाचार्याभिनवगुप्तसम्मतञ्च। यथा—

"·······················युक्तं चैतद्विभाति नः।
तथाहि बाह्यवृत्तीनामक्षाणां वृत्तिभासने॥
आलोचने शक्तिरन्तर्योजने मनसः पुनः।
उक्तञ्च गुरुणा कुर्यान्मनोऽनुव्यवसायि सत्॥
तद्द्वयालम्बना मातृव्यापारात्मक्रिया इति।

(तं० आ० 9, 277-279)

गुरुरत्रोत्पलदेवाचार्यः।

"तद्द्वयालम्बना एता मनोऽनुव्यवसायि सत्।
करोति मातृव्यापारमयीः कर्मादिकल्पनाः॥

(ई०प्र० 2-2-3)

इत्येषा तस्योक्तिः।

इ

इ——(1) इच्छाशक्तिसाक्षात्कारकारको मातृकावर्णः शाम्भवोपाये। इच्छाशक्तिविशिष्टस्य शिवतत्त्वस्याभिव्यञ्जको वर्णः। यथा—

"तत्र मुख्यास्तावत् परमेश्वरस्य तिस्रः शक्तयः—अनुत्तरः, इच्छा, उन्मेषः, इति। तदेव परामर्शत्रयम्—'अ', 'इ', 'उ', इति।

(तं०सा० पृ० 12)

(2) मातृकाक्रमे तृतीयो वर्णः, शुद्धाया इच्छाशक्तेरभिव्यञ्जकः। 'आ' इत्यनेनाभिव्यज्यमानं शिव-शक्ति-संघट्टं प्रत्यवमृशन्ती शिवस्य पराशक्तिः। इयमघोराणां शक्तीनां स्वामिनी प्रभवनिमित्तं च। यथा—

"संघट्टेऽस्मिंश्चिदात्मत्वाद्यत्तत्प्रत्यवमर्शनम्।
इच्छाशक्तिरघोराणां शक्तीनां सा परा प्रभुः॥"

(तं०आ० 3, 71-72)

"प्रभुः-प्रभवनिमित्तं=गर्भीकृतानन्तशक्तिव्राता, इति यावत्"

(तं०आ०वि० खं० 2, पृ० 83)

प्रत्यवमर्शश्च प्रतीपतयाऽन्तर्मुखतया विमर्शनम् ।

(3) शिवदृष्टावुक्ता (शि० दृ० 1, 8-16) इच्छायाः प्रथमेयं तुटिरौन्मुख्यसंज्ञा । यथा—

"सा च······ आद्यस्पन्दात्मिका बहिरौन्मुख्यमात्ररूपिणी स्रष्टव्यानारूषितेच्छामात्ररूपा ।"

(तं०आ०वि० खं० 2, पृ० 84)

(4) एषणीयविषयानारूषिता शुद्धैवेच्छा सिसृक्षामात्ररूपा । मातृकाक्रमे चास्याः स्थितिरिकार इति । यथा—

"आद्यस्पन्दात्मिका बहिरौन्मुख्यमात्ररूपिणी स्रष्टव्यानारूषितेच्छामात्ररूपा ।"

(तं०आ०वि० खं० 2, पृ० 84)

~साक्षात्कारदृष्ट्या——पूर्णामिच्छात्मकतामाप्ता प्रसृता पारमेश्वरी शक्तिः । मातृकात्मकस्य शाम्भवोपायस्याभ्यासे 'इ' इत्यनेन मातृकावर्णेन द्योत्यते । तदुक्तम्—

"परिपूर्णेच्छा 'इ' इति ।"

(प०त्री०वि० पृ० 168)

एषणीयावभासराहित्येन परिपूर्णाहंरूपचिदानन्दघनत्वमेवास्याः परिपूर्णत्वं न विकासक्रमेण पूर्णताप्राप्तिरिति वेदितव्यम् । ततोऽन्तःकृतविश्वा सतीयं पूर्णा ॥

इच्छा——(1) चिदानन्दरूपस्य विश्वभावजातपूर्णस्य च परमेश्वरस्य स्वानन्दातिरेकवशाद् या समुच्छलत्तात्मिका भावव्रातविषया च बहिः सिसृक्षात्मिका परिस्पन्दनरूपा विशेषता सैव तस्येच्छा । तदुक्तम्—

(क) "स्वरूपपरिपूरणरूपत्वात् पूर्णा चान्द्रमसीशक्त्यव्यतिरेकाच्च—'सहोमया वर्तते'—इति सोमरूपा स्वानन्दविश्रान्तिभावा इच्छाख्या कलना महासृष्टिव्यपदेश्या ।"

(प०त्री०वि० पृ० 169)

इत्येवं सङ्केततो निर्दिष्टमत्रेच्छायाः स्वरूपम् ।

स्पष्टतयाप्युच्यते यथा—

(ख) "अन्तःस्थविश्वाभिन्नैकबीजांशविसिसृक्षुता ।
क्षोभोऽस्तदिच्छे तत्त्वेच्छाभासनं क्षोभणां विदुः ॥"

(तं०आ० 3, 834)

(2) चिदानन्दरूपायाः संविदः स्वभावभूतमेव सिसृक्षादिरूपतामाप्तं तस्या बहिर्विकासोन्मुखं परिस्पन्दनम् । स एष परमेश्वरस्येच्छास्पन्दो नैवापूर्णम्मन्यताप्राणोऽभिलाषः कोऽपि; अपि त्वानन्दोद्रेकोच्छलत्ताप्राणा निजैश्वर्यात्मकस्वभावाभिव्यक्त्यौन्मुख्यस्य स्फुटीभावरूपा परमेश्वरस्य परब्रह्मता, या विश्वात्मकबहिर्भावबृंहणबीजभूता सती तस्य स्वात्मीयैव मुख्या विशेषता । यथा—

(क) "यदा तु तेस्य चिद्धर्मविभवामोदजृम्भया ।
विचित्ररचनानानाकार्यसृष्टिप्रवर्तने ॥
भवत्युन्मुखिता चित्ता सेच्छायाः प्रथमा तुटिः ।"

(शि०दृ० 1, 7-8)

"औन्मुख्यस्य य आभोगः स्थूलः सेच्छा व्यवस्थिता ॥"

(ख) "संविद एव स्वातन्त्र्यं भावोज्जिगमिषात्मकमीशनं स्वसंवित्प्रमाणलब्धमेव । तद्भावानुपचयरूपा संविद्घना परिपूर्णा स्वातन्त्र्यसत्तापि संवेद्या । स्वात्मन्यानन्दघनो भवंस्तथा स्वतन्त्रः स्यात् । इत्यानन्दोऽपि नापह्नवनीयः । अनुत्तरश्च शक्तिमानऽव्यपदेश्यपरचमत्कारसारो भैरवभट्टारकः सर्वत्र कर्तृत्वेन भासत एव ।"

(प०त्री०वि० पृ० 170)

(ग) "यस्याः स्वतन्त्रकलनाऽकलिताऽविचित्रा
ज्ञानावलीवलयमूलमतीव सूक्ष्मा ।
इच्छाभिधा हृदि झगित्यवभासमाना
नित्या विराजतितरां शिवभूतिभूता ॥"

(म०श० स्तो० 4)

~चमत्कारमयी——

द्र० 'चमत्कारः~इच्छात्मकः' इति ।

~बीजम्—— विसर्गः । यथोक्तम्—

"इच्छा अः"

(तं०आ०वि० खं० 12, पृ० 197)

~मातृकाक्रमे——इकारः । एषणीयानारूषितमक्षुब्धमिच्छामात्रम् । बहिर्भावस्याभिव्यक्तिं प्रत्यौन्मुख्यं स्फुरत्तात्मकं परमशिवस्य । चिदानन्दपरिस्पन्दनमात्रता । प्रथमोऽयं स्पन्दश्चिदानन्दस्य । तदुक्तम्—

"प्रसरन्त्यानन्दशक्तिः 'आ' इति, परिपूर्णेच्छा 'इ' इति ।"

(प०त्री०वि० पृ० 168)

द्र० 'अघोराः'~शक्तयः' इति ।

~सोमरूपा——चिदानन्दरूपस्य विश्वात्मकभावजातपरिपूर्णस्य परमेश्वरस्य भावव्रातसिसृक्षात्मकपरिस्पन्दनरूपा विशेषता या साधनाक्रमे सोमपदेनोच्यते । यथा—

"प्रथमा स्वरूपपरिपूरणरूपत्वात् पूर्णा चान्द्रमसी शक्त्यव्यतिरेकाच्च 'सहोमया वर्तत'—इति सोमरूपा स्वानन्दविश्रान्तिभावा इच्छाख्या कलना 'महासृष्टि'—व्यपदेश्या ।"

(प०त्री०वि० पृ० 169)

इच्छात्मकं~ज्ञानम्——

द्र० 'ज्ञानं'~इच्छात्मकम्' इति ।

इच्छायोगः——इच्छाशक्त्युपयोगप्रधानः शाम्भवोपायः ।

द्र० 'शाम्भवोपायः' इति ।

इच्छाशक्तिः—— (1) परमेश्वरस्य परैव शक्तिः सिसृक्षारूपतयावभासमाना सती इच्छाशक्तिरिति परिभाष्यते । यथा—

"या सा शक्तिर्जगद्धातुः कथिता समवायिनी ।
इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते ॥"

(मा०वि०तं० 3, 5)

(2) परमेश्वरे स्वान्तर्वर्तिनो विश्वस्य बहिरुल्लासनं प्रति या स्वाभाविकी परिस्फुरत्ता सैव तस्येच्छाशक्तिः। यथा—

(क) "आद्योच्छलत्तात्मकत्वेन बहिरुल्लिलसिषास्वभावाम्।"
(तं॰आ॰वि॰ खं॰ 1, पृ॰ 17)

(ख) "इच्छा सैव स्वच्छा सन्ततसमवायिनी सती शक्तिः।
सचराचरस्य जगतो बीजं निखिलस्य निजनिलीनस्य॥"
(ष॰त्रि॰त॰ सं॰ 2)

द्रष्टव्यञ्च (प॰प्रा॰ पृ॰ 6-7) तथा (ने॰तं॰ 1, 22-29) इति।

(3) ज्ञान-क्रिया-विद्या-मायादिरूपतां स्वात्मनः प्रकटयन्ती शिवस्य शिवताप्रयोजिका शक्तिः। यथा—

"सार्वज्ञ्यादिगुणा ये च शिवस्य परमात्मनः।
शाक्तास्ते नान्यतो दृष्टा ह्यन्यथानुपपत्तितः॥
एकः शिवस्तथैका तु शक्तिरेव हि शाश्वती।
अभिन्ना द्वैतसंस्थाना सैवेका समुदायिनी॥
इच्छारूपा शिवस्यैषा ह्यभिन्ना सर्वतोमुखी।
किञ्चिदुच्छूनतापत्तेः सार्वज्ञ्यादिगुणास्ततः॥"
(ने॰तं॰ 21, 33-35)

~अपरा~प्रणवोपासनायाम्——समना-व्यापिनी-कौण्डलीशक्तिरूपा चिच्छक्तिः।

द्र॰ 'इच्छैव'~त्रिशाखा' इति।

~त्रिविधा——तत्राक्षुब्धायास्त्रैविध्यम्—

(1) शुद्धा='इ' इति।
(2) तरलस्वाभावेनेष्यमाणेनानुविद्धा='ऋ' इति।
(3) स्थिरस्वभावेनेष्यमाणेनानुविद्धा='लृ' इति।

यथा—

"इच्छाशक्तिर्द्विरूपोक्ता क्षुभिताऽक्षुभिता च या।
इष्यमाणं हि सा वस्तु द्वैरूप्येणात्मनि श्रयेत्॥
अचिरद्युतिभासिन्या शक्त्या ज्वलनरूपया।
इष्यमाणसमापत्तिः स्थैर्येणाथ धरात्मना॥"
(तं॰आ॰ 3, 78-79)

क्षुब्धायाश्चाप्येवमेव त्रैविध्यम्। तच्च क्रमेण—(1) शुद्धा='ई' इति, (2) तरलस्वभावेनेष्टव्येनानुविद्धा='ॠ' इति, (3) स्थिरस्वभावेनेष्टव्येनानुविद्धा='ॡ' इति।

~त्रिशाखा——इच्छाशक्तेः शाखात्रयं—समना, व्यापिनी, शक्तिरिति। तच्च क्रमेण पर-सूक्ष्म-स्थूलरूपम्। तदुक्तम्—

"एकैव परमेशेच्छाशक्तिः पर-सूक्ष्म-स्थूलरूपतया मेयाभासासूत्रणामयी समना, व्यापिनी, शक्तिरिति चोच्यते। एकस्या अपीच्छायाः सूक्ष्मरूपज्ञानक्रियाशक्तिसम्भेदेन त्रित्वात्।"
(स्व॰ उद् 11, पृ॰ 7)

तत्र परा शुद्धा इच्छैव, सूक्ष्मा ज्ञानेन संभिन्ना, स्थूलरूपा च क्रियासम्भेदयुक्तेति भेदः। आसु तृतीयस्याः कौण्डलीत्यपि नामान्तरम्।

~धारणाक्रमे——जगदुत्पत्तिस्थितिप्रभृति-पारमैश्वर्यात्मक-परिस्पन्दनहेतुभूता परमेश्वरस्य स्वभावविषये बहिरभिव्यक्तिप्रवणा स्फुरत्तात्मिका ध्यानधारणासु देवीरूपतयोपास्या शक्तिरेव। उक्तमत्र विषये सविस्तरम्—

"इच्छाशक्तिः परादेवी यया सर्वमधिष्ठितम्।
उत्पत्तिस्थितिसंहारांस्तिरोभावमनुग्रहम्॥
यया करोति देवेशः सर्वदा सर्वमध्वनि।
तस्योत्सङ्गगता सा तु नित्यं चैवात्मवर्त्तिनी॥
सा चेच्छा देवदेवस्य शिवस्य परमात्मनः।
स एवापररूपेण पञ्चमन्त्रमहातनुः॥
इच्छारूपधरः श्रीमान् देवदेवः सदाशिवः॥"
(स्व॰तं॰ 10, 1204-7)

~परा——

द्र॰ 'त्रिशाखा' इति।

~परापरा——

द्र॰ अत्रैव 'त्रिशाखा' इति।

~बहिरभिव्यक्तौ——सृष्टिक्रमेण बहिरभिव्यक्ताविच्छाशक्तिः शक्तितत्त्वम्। यथा—

"तदेवं प्रसृतो देवः कदाचिच्छक्तिमात्रके।
बिभर्ति रूपमिच्छातः…… … … … …॥"
(शि॰दृ॰ 1, 29-30)

~भावनाभ्यासे——तत्त्वाध्वधारणासु सदाशिवतत्त्वमिच्छाशक्तेर्बहिः परिस्पन्दत आभासितं सत्तत्सारमेव। ततस्तथैव भावनाभ्यासविषयतां नेयम्। ततं एव तत्र सदाशिवतत्त्वमिच्छाशक्तिमयत्वेन भाव्यं भवति। यथा—

"इच्छाप्राधान्ये सदाशिवतत्त्वम्"
(तं॰सा॰ पृ॰ 74)

"चिदानन्देषणाज्ञानक्रियाणां सुस्फुटत्वतः।
शिवशक्तिसदेशानविद्याख्यं तत्त्वपञ्चकम्॥"
(तं॰आ॰ 9, 50-51)

द्र॰ (प॰सा॰ 14) तथा (ष॰त्रि॰त॰सं॰वि॰ पृ॰ 3) इति।

~मन्त्ररूपत्वे——'ह्रां' इति। उक्तं यथा—

"क्षादिं द्विस्वरसंभिन्नं त्रिपञ्चेन तु मूर्च्छितम्।
इच्छाशक्तिः समाख्याता भैरवस्यामितात्मिका॥"
(स्व॰तं॰ 1, 68)

क्षादिः= हकारः, द्विस्वरः=आकारः, त्रिपञ्चः=पञ्चदशो वर्णः अनुस्वारः।

~मातृकाक्रमे——परमशिवस्य शिव-शक्ति-संघट्टात्मके चिन्मये स्वरूपे ('अ' इति वर्णे) यत्प्रत्यवमर्शनं सेच्छाशक्तिरिकारो मातृकाक्रमे। सिसृक्षात्मा प्रत्यवमर्शोऽसौ शिवस्य=तृतीयः स्वरः 'इ' इति। तदुक्तम्—

"संघट्टेस्मिँश्चिदात्मत्वाद्यत्तत्प्रत्यवमर्शनम् ।
इच्छाशक्तिरघोराणां शक्तीनां सा परा प्रभुः ॥"

(तं०आ० 3, 71-72)

"योऽयं परस्य प्रमातुः सिसृक्षात्मा परामर्शं उदेति सेयमिच्छाख्या शक्तिः ।"

(तं०आ०वि० खं० 2, पृ० 83)

मातृकासु तावदिकारेण व्यङ्ग्येयम् ।

~विभूतिविस्तरतः——यथा—

"यत्स्वरूपं निजं रूपं व्यापकं सर्वतोमुखम् ।
सर्वभूतान्तरावस्थं सर्वप्राणिषु जीवनम् ॥
योगगम्यं दुरासारं दुष्प्रापमकृतात्मभिः ।
स्वं स्ववीर्यं स्वसंवेद्यं ममैव परमं पदम् ॥
तद्वीर्यं सर्ववीर्याणां तद्वै बलवतां बलम् ।
तदोजश्चोजसां सर्वं शाश्वतं ह्यचलं ध्रुवम् ॥
सा ममेच्छा पराशक्तिः शक्तियुक्ता स्वभावजा ।
वह्नेरूष्मेव विज्ञेया रश्मिरूपा रवेरिव ॥
सर्वस्य जगतो वापि स्वा शक्तिः कारणात्मिका ।
सर्वज्ञादिगुणास्तत्र व्यक्ताव्यक्ताश्च संस्थिताः ॥
सैवेच्छा ज्ञानरूपा च क्रियादिगुणविस्तृता ।
ज्ञानादिषड्गुणा ये ते तत्रस्थाः प्रभवन्ति हि ॥
सा वै महाक्रियारूपा संस्थितैका क्रिया मता ।
अणिमादिगुणानष्टौ करोति विकरोति सा ॥
एवं ममेच्छा ज्ञानाख्या क्रियाख्या शक्तिरुच्यते ।"

(ने०तं० 1, 22-29)

~संकुचिता——तथा सती स्पष्टमुदाहृता—

"अप्रतिहतस्वातन्त्र्यरूपा इच्छाशक्तिः संकुचिता सती अपूर्णंमन्यतारूपमाणवं मलम् ।"

(प्र०हृ० पृ० 21)

इच्छाशक्त्युद्भावित एव खल्वाणवो मल इति स्यादभिप्रायोऽत्र ग्रन्थकर्तुः । अथवा—शिव-जीवयोः परस्परवैपरीत्यकथनाभिप्रायेणैकतः शिवोऽप्रतिहतस्वातन्त्र्यः परिपूर्णोऽपरतश्च जीवः संकुचितोऽणुः ।

~सूक्ष्मा——

द्र० अत्रैव 'त्रिशाखा' इति ।

~स्थूला——

द्र० अत्रैव 'त्रिशाखा' इति ।

~स्वरूपतः——विश्वसिसृक्षास्याः स्वरूपम् । ततो परमेश्वरस्य परैव शक्तिः सिसृक्षारूपतयावभासमाना सती इच्छाशक्तिरिति परिभाष्यते । यथा—

"या सा शक्तिर्जगद्धातुः कथिता समवायिनी ।
इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते ॥"

(मा०वि०तं० 3, 5)

स्वान्तर्वर्तिनो विश्वस्य बहिरुल्लासनानुकूला परा स्पन्दात्मकता परिस्फुरत्ता परमेश्वरस्य । तदुक्तम्—

"आद्योच्छलत्तात्मकत्वेन बहिरुल्लिलसिषास्वभावाम् ।"

(तं०आ०वि० खं० 1, पृ० 17)

"इच्छा सैव स्वच्छा सन्ततसमवायिनी सती शक्तिः ।
सचराचरस्य जगतो बीजं निखिलस्य निजनिलीनस्य ॥"

(ष०त्रि०त० सं० 2)

इच्छास्वातन्त्र्यम्——शिवस्य ज्ञातुं कर्तुमैष्टुं च सर्वथा परिपूर्णं स्वातन्त्र्यम् । तच्च परविमर्शरूपत्वं तस्य । यथा—

"तदमी प्रकाश एव तावद्विश्रान्ता भावाः, प्रकाशश्च विमर्शशून्यो न भवति । ततश्च विमर्श एव भगवत इच्छा, नित्यैव रुद्रक्षेत्रज्ञ-प्रमातृवर्ग-सुख-दुःख-नील-पीतादि-प्रमेयसञ्चयं चावभासयतीति ।"

(ई०प्र०वि०वि० खं० 1, पृ० 5)

'तदिदमेव भगवतः स्वाच्छन्द्यम्—यत् संविदात्मक एव भवन् विचित्रप्रमातृप्रमेयात्मना संविद्रूपानधिकेनापि संविद्रूपाधिकतया निर्भासमानवपुषा प्रकाशते च तथा विमृशति च । अनधिकस्याप्यधिकस्येव भासनं स्वच्छभाव उच्यते दर्पणस्येव ·····केवलमस्य तथा विमर्शाभावादस्वाच्छन्द्यं जडत्वम् । परमेश्वरस्तु तथा भासमानमात्मानं विमृशत्येव, संविदो विमर्शपर्यन्तत्वात् ।

(तदेव पृ० 6)

इच्छोपायं ज्ञानम्——
द्र० 'इच्छात्मकं ज्ञानम्' इति ।

इच्छोपायः——
द्र० 'शाम्भवोपायः' इति ।

इतरेतरसम्बन्धः——
द्र० 'सम्बन्धः'~इतरेतरः' इति ।

इन्दता——विषयता, प्रमेयता ।

~असामयिकी——मायाया उपरि शुद्धविद्याभूमौ प्रवर्तमाना भेदाभेददृष्टिप्रवणा सङ्केतग्रहसाहाय्यहीना विकल्पनारहिता विमर्शमयी सामान्याकारा प्रमेयता ।

द्र० 'असामयिकीदन्ता' इति ।

~सामयिकी——मायीये क्षेत्रे प्रवर्तमाना सङ्केतग्रहाश्रिता प्रमेयता, विकल्पज्ञानात्मिका प्रमाणविषयता । उदाहरणं—यथा—

"इदमस्तु सन्निकृष्टे-समीपतरवर्ति चैतदो रूपम् ।"
इति (व्याकरणसमयः)

इदम्——जडत्वेन स्वीकृतं प्रमेयजातं सामान्येन "इदम्" इत्युच्यते ।

~तत्प्रतिष्ठास्थानम्——अहंविमर्शमये प्रमातरि विमृश्य-

मानस्यैवेदंरूपस्य प्रमेयस्य प्रतिष्ठा भवति—'घटोऽयम्, सुखमिदम्', —इत्यादि। अहमि प्रतिष्ठामलभमानस्य इदमो न कथमपि सिद्धिः। यथा—

"इदमित्युचितः संवित्प्रकाशोऽन्यस्य वस्तुनः।
प्रतिष्ठात्मकतां गच्छेदहमित्यात्मना पुनः॥"
(अ॰प्र॰सि॰, 11)

"तथाहि जडभूतानां प्रतिष्ठा जीवदाश्रया।"
(ई॰प्र॰ 1, 4)

इन्दुः——देहादिप्रमेयतत्त्वजातम्। तदुक्तम्—
"देहादिप्रमेयरूपः इन्दुः।"
(तं॰आ॰वि॰खं॰ 3, पृ॰ 370)

~बीजम्——सकारः। तदुक्तम्—
"इन्दुः स"
(तं॰आ॰वि॰खं॰ 12, पृ॰ 203)

इन्दुराजः——
द्र॰ 'भट्टेन्दुराजः' इति।

इन्द्रः~बीजमन्त्रः——स हि लकारः यथा—
"इन्द्रो='ल' इति।"
(तं॰आ॰वि॰खं॰ 12, पृ॰ 178)

इन्द्रियम्——'इदि पारमैश्वर्ये'—इति धातोरर्थतः प्रमातुरैश्वर्याभिव्यञ्जकं ज्ञान-क्रिया-साधनम्। तच्च कर्मेन्द्रियपञ्चकं, ज्ञानेन्द्रियपञ्चकं, मनश्चेति।

इन्द्रियवर्गः——स च श्रोत्रादिमयो ज्ञानेन्द्रियवर्गः, वागादिमयः कर्मेन्द्रियवर्गः, मनश्चान्तरमिन्द्रियमिति।

~अधिष्ठानतः——पादादीनि तावद् भिन्नभिन्नानि मुख्यानि तस्य तस्येन्द्रियस्याधिष्ठानानि देहे। अङ्गान्तरैश्चापि गमनादानादिक्रियाणां सम्भवात् तत्रापि गमनादिसामर्थ्यरूपेण पादादीन्द्रियेणैव गमनादिकम्—इति सर्वशरीरव्यापकानि कर्मेन्द्रियाणि। ज्ञानेन्द्रियरूपा त्वगपि तथाविधा, अन्यस्य ज्ञानेन्द्रियचतुष्टयस्य नियतमधिष्ठानं श्रोत्रच्छिद्रादि। यथा—

(क) "तस्य (पादस्य) मुख्याधिष्ठानं बाह्यम् (पादरूपम्) अन्यत्रापि तदस्त्येव इति रुग्णस्यापि न गतिविच्छेदः।"
(तं॰ सा॰ पृ॰ 88)

(ख) "सर्वदेहव्यापकानि च कर्मेन्द्रियाण्यहङ्कारविशेषात्मकानि। तेन च्छिन्नहस्तो बाहुभ्यामादधानः पाणिनैवादत्ते एवमन्यत्। केवलं तत्तत्स्फुटपूर्वकवृत्तिलाभस्थानत्वात् मञ्चांगुलिरूपमधिष्ठानमस्योच्यते।
(ई॰प्र॰वि॰ खं॰ 2, पृ॰ 213)

(ग) "तस्मात्कर्मेन्द्रियाण्याहुस्त्वग्वद् व्याप्तृणि मुख्यतः।
तत्स्थाने वृत्तिमन्तीति मतङ्गे गुरवो मम॥"
(तं॰आ॰ 9, 260-61)

~अभौतिकः——नैयायिकाद्या इन्द्रियाणां भौतिकत्वमुद्घोषयन्ति। शैवानां मते आहङ्कारिकत्वमेव तेषां न भौतिकत्वम्—कर्त्रंशस्पर्शित्वं यतस्तेषाम्। यथा—

(क) "भौतिकत्वमपि न युक्तं "अहं शृणोमि"—इत्याद्यनुगमाच्च स्फुटं "आहङ्कारिकत्वम्"। कारणत्वेन चावश्यं कर्त्रंशस्पर्शित्वम्। अन्यथा कारणान्तरयोजनायामनवस्थाद्यापातात्। कर्त्रंशश्चाहङ्कार एव।"
(तं॰सा॰ पृ॰ 87)

(ख) "अहं शृणोमि पश्यामि जिघ्रामीत्यादि संविदि।
अहन्तानुगमादाहङ्कारिकत्वं स्फुटं स्थितम्।"
(तं॰आ॰ 9, 241-42)

(ग) "तस्मादिन्द्रियसङ्घातो भौतिको नोपपद्यते।"
(मा॰वि॰वा॰ 1, 522

~आहङ्कारिकः——अहङ्कारस्यैव परिणामविशेषरूपाणीन्द्रियाणि न भूतपञ्चकस्य कार्याणि।
द्र॰ 'अभौतिकः' इति।

~उत्पत्तिक्रमतः——केचिदुद्रिक्ततन्मात्रभागविशिष्टात् सात्त्विकादेवाहंकारात्कर्मेन्द्रियाणां सृष्टिं मन्यन्ते। यथा—

(क) "उद्रिक्ततन्मात्रभागविशिष्टात्तु सात्त्विकादेवाहङ्कारात्कर्मेन्द्रियपञ्चकम्। 'अहं गच्छामि'—इत्यहङ्कारविशिष्टः कार्यकरणक्षमः पादेन्द्रियम्।"
(तं॰सा॰ पृ॰ 88)

(ख) द्र॰ 'आहङ्कारिकी सृष्टिः' इति।

~तत्प्रकृतिः——अहङ्कार एवेन्द्रियवर्गस्य प्रकृतिः।
द्र॰ इन्द्रियवर्ग आहङ्कारिकः' इति।

~तदधिष्ठातृदेव्यः——इन्द्रियाधिष्ठानाधिष्ठात्र्यः परमेश्वरस्य विशेषशक्तयो या ज्ञानयोगाभ्यासे साधकैर्भावनयाऽर्च्यन्ते, चर्याक्रमे च स्थूलैर्द्रव्यैस्तर्प्यन्ते।
द्र॰ 'देहस्थदेवताचक्रस्तोत्रम्' इति।

~तद्वधाः——स्वकार्यकरणेऽसमर्थत्वं तेषाम्। यथा—

"मूकता कौण्यपंगुत्वं तथानुत्सर्गतापि च॥
निरानन्दश्च विज्ञेयो बधिरत्वं तथैव च।
शीर्णता चैव गात्रस्य तथा चान्धत्वमेव च॥
अनास्वादस्त्वगन्धश्च अनवस्था मनस्यथ।
इतीन्द्रियवधाः ख्याता एकादश तु तत्क्रमात्॥"
(स्व॰तं॰ 11, 133-35)

~तद्विमुक्तिः——नैव क्वापि परिमिते विषय इन्द्रियवर्गस्यैकाग्रीकरणमुचितम्, अपि तु युगपत् सर्वग्राहित्वमेकदैव यत्, सा मुक्तिरस्य चर्याक्रमे। यथा—

"बन्धमोक्षावुभावेताविन्द्रियाणि जगुर्बुधाः।
निगृहीतानि बन्धाय विमुक्तानि विमुक्तये॥
एतानि व्यापके भावे यदा स्युर्मनसा सह।
मुक्तानि क्वापि विषये रोधाद् बन्धाय तानि तु।
(तं॰आ॰ 17, 112-13)

एतच्च रहस्योपायदृष्ट्योक्तम् ।

~तन्निग्रहः——तन्निग्रहः यथापि विषयविशेष एवेन्द्रियाणामेकाग्रीकरणम् । तच्च बलात्कारतः कृतं सद् बन्धनवृद्धये भवति । स्वयमेव सम्भवन्निन्द्रियवृत्तिप्रशमः मोक्षोपकारी । यथा—

"द्र० तद्विमुक्तिः इति ।

द्र० अनादरविरक्तिः' इति ।

~तन्नैसर्गिकस्वभावः——इन्द्रियाणि हि कदाचिदवाञ्छनीयेऽपि वस्तुनि कौतुकवशात् प्रवर्तन्ते, कदाचिच्च प्रागनुभूतत्वाद् वाञ्छनीयादपि वस्तुनो निवर्तन्ते । यथा—

"किमेतदिति धावन्ति दुःखेऽपीन्द्रियवृत्तयः ।
एतदेवमिति प्रायो विरज्यन्ते सुखादपि ॥
(मा०वि०वा० 1, 235)

ततो नेन्द्रियनिग्रहो विहितः शैवे ।

~तत्संयमः——तेषां विषयेषु स्वाभाविक्या गतेर्निरोधनं बलात्कारेण, न च तद्धितं साधकाय ।

द्र० 'अनादरविरक्तिः' इति ।

~बलिस्ताभ्यः——इन्द्रियदेव्यः प्रायो मकाराख्यबलिदानेनैव तृप्यन्ति तुष्यन्ति च, तत्रैव यतस्तासां रुचिः । यथा—

"धीकर्माक्षगता देवीर्निषिद्धैरेव तर्पयेत् ॥
वीरव्रतं चाभिनन्देत्··························।
(तं०आ० 12, 19-20)

~संख्यातः——मनोऽन्तरिन्द्रियम्; श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च; वागादीनि कर्मेन्द्रियाणि पञ्च; संकलनयैकादशसंख्याक इन्द्रियवर्गः ।

द्र० 'कर्मेन्द्रियाणि'~शैवे (त्रैयम्बके) इति ।

इन्धनम्——पाशदहनोपायभूतो मन्त्रादिप्रयोगः । यथा—

(क) "तदुक्तं श्रीमदुच्छुष्मतन्त्रे—
आद्यन्तं चैव हुंकारमिन्धने विनियोजयेत् । इति ।"
(ने०तं०उ०खं० 2, पृ० 75)

(ख) "इन्धननिवेशनं दाह्यपाशविषादिदहने
विनियोजनं हुंकारेण संपुटीकरणम् ।"
(ने०तं०उ०खं० 2, पृ० 75)

इषुः-बीजम्——'फट्' इति । यथा—

"इषुः फट् ।"
(तं०आ०वि० खं० 12, पृ० 220)

इष्टोपदेशः——ग्रन्थविशेषः । यथा—

"उक्तं हीष्टोपदेशे—
यदिदं दृश्यते दृष्ट्याग्रहं पुत्राऽत्र सन्त्यज ।
येन पश्यसि तं पश्य यं दृष्ट्वा पश्यसेऽखिलम् ॥"
(उद्ध०स्प०प्र०पृ० 23)

ई

ई——(1) इच्छैव ज्ञानशक्तिरूपतां जिघृक्षन्ती ईशनात्मकतां च परमेश्वरस्य द्योतयन्ती 'ई' इति मातृकावर्णेनाभिव्यज्यते । तदुक्तम्—

"इच्छैव भाविज्ञानशक्त्यात्मकस्वातन्त्र्येण जिघृक्षन्ती ईशनरूपा 'ई' इति ॥
(प०त्री०विवृ० पृ० 168)

"परमेश्वरस्य·························इच्छा ज्ञानोन्मुखमीशनम् 'ई' इति ।"
(प०त्री०विवृ० पृ० 5)

(2) एषणीयेणासम्पृक्ता तावदिच्छैव प्रक्षुब्धरूपतामाप्ता सती ईशनामयतां गता 'ई' इति भवति मातृकाक्रमे । अघोराणां शक्तीनामियं प्रादुर्भावकेन्द्रम् । यथा—

"सैव प्रक्षुब्धरूपा चेदीशित्री सम्प्रजायते ।
तदाऽघोरा परा देव्यो जाताः शैवाध्वदैशिकाः ॥"
(तं०आ० 3, 72-73)

स्वात्मशिवस्यानवच्छिन्नमैश्वर्यमीश्वरत्वं च मातृकोपास्तिक्रमेऽभिव्यञ्जयन् वर्णः 'ई' इति ।

ईशना——प्रक्षोभरहिता येच्छा, प्रथमस्पन्दरूपा, सैव स्पन्दकृतप्रक्षोभवशात् प्रक्षुब्धतामाप्नुवन्ती विश्वोन्मेषं प्रति परिस्फुरन्ती सती 'ईशना' इति परिभाष्यते । इयं मातृकाक्रमे चतुर्थेन वर्णेन—'ईकारेण'—अभिव्यंग्या भवति, परं स्रष्टव्यानारूषितैवेयम् । तदारूषणं तु षण्ठवर्णैर् (ऋ, ॠ, लृ, ॡ) अभिव्यंग्यं भवति ।

द्र० 'ई' इति ।

ईशानः——पञ्चमुखस्य भगवतः स्वच्छन्दनाथस्येशानाख्ये स्वरूपे जगत्सृष्टिक्रियां प्रत्युन्मेषमात्रं प्रकाशते । अत्र भगवतः स्वस्मिन्नेव स्वरूपेऽन्तःस्थस्यैव भावौघस्योन्मेषणम् । अन्तः संरम्भरूपायाः क्रियाशक्तेर्विजृम्भणमत्र । एषा भगवतः सादाशिवीव दशा । भगवतः पञ्चस्वपि वक्त्रेषु सर्वोत्कृष्टत्वादूर्ध्ववक्त्ररूपत्वमीशानस्य । ऊर्ध्वतास्य सर्वोत्कृष्टत्वेनैव, न पुनर्दिग्विभागमेवितत्वेन-यतो नात्र दिक्कालकलना कापि, तस्या मायायामेव सम्भवात् । क्रियाशक्तेर्विजृम्भणस्योन्मिमिषामात्रमत्रावभासते भगवतः स्वच्छन्दनाथस्य । अत्र स्रष्टव्यविशेषानुसन्धानं विनैव केवलायाः सिसृक्षाया एव चमत्कारः । ततः शुद्धात्र सिसृक्षा स्रष्टव्यासंकीर्णा । तुर्यदशेयम् । नैवास्येशानमुखस्य कोऽप्येको नीलश्वेतादिरूपो विशेषो वर्णः, अपि तु वर्णचतुष्टयसम्मिश्रितात्र कान्तिर्ध्यानधारणोपयोगिनी ।

"तथाहि प्रागनन्तान्तःस्थितभावौघजृम्भणम् ।
यावत्करोति भगवांस्तावदीशमुखस्थितिः ॥
अन्तस्थाया अभिन्नायाः क्रियाशक्तेर्विजृम्भणे ।
क्रमादुन्मिषिते तावानेष स्फारः प्रतायते ॥
क्रियाशक्तेः स्फुटः स्फारः मायात्वं प्रतिपद्यते ।
(मा०वि०वा० 1, 171-73)

"सर्वतश्च गुणोत्कर्षादीशानस्योर्ध्ववक्त्रता ।
दिक्कालकलनाशून्ये न तु दिग्भेदकल्पना ॥
यो हि यस्मात्गुणोत्कृष्ट इति चोर्ध्वो भविष्यति ॥"

(तदेव 1, 211-13)

श्रीमान्सदाशिवो देव ईशानश्चेति गीयते ।"

(तदेव 1, 252)

ईशानशिवगुरुः——अभिनवगुप्तविचारानुसारमसौ देवीयामलतन्त्ररहस्यवेत्ता कोऽपि शैवाचार्यो, यत्कृतपद्धत्यनुसारं लिङ्गोद्धारपूर्वकं लब्धदीक्षोऽपि शिष्यो ज्ञानेद्धो भवन् मोक्षप्रदाचार्यपदवीमधिरोढुमलम् । साधारणतो योजनिकादीक्षां विधातुं नैवास्याधिकारः, परं मन्त्र-जप-होमादि-क्रियासाहाय्येनोत्तमलोकभोगार्थं योजनिकामपि कर्तुं समर्थो भवति कदाचित् कश्चिदेवंविधोऽपि गुरुः । तदुक्तम्—

"पुनर्भुवोऽपि ज्ञानेद्धा भवन्ति गुरुतास्पदम् ॥
मोक्षायैव न भोगाय भोगायाप्यभ्युपायतः ।
इत्युक्तवान् स्वपद्धत्यामीशानशिवदैशिकः ॥
श्रीदेव्या यामलीयोक्तितत्त्वसम्यक्प्रवेदकः ।

(तं०आ० 22, 29-31)

ईशानकलाः——तुर्यदशायामेवाभिव्यक्तियोग्या ईशानस्य कलाः साधकस्यान्तः स्फुरन्त्यः शक्तयः । यथा—

"व्याप्तिः सादाशिवी सा तु व्योमाख्या शून्यरूपिणी ॥
तारा सुतारा तरणी तारयन्ती सुतारिणी ॥
द्वादशान्तपदारूढास्तुर्यान्तास्तु कलाः स्मृताः ।
ईशानस्य कला ह्येताः पञ्च वै कारणात्मिकाः ॥"

(ने०तं० 22, 33-34)

"तारा सुतारा तरणी तारयन्ती सुतारिणी ।
ईशानस्य कलाः पञ्च निरञ्जनपदानुगाः ॥"

(स्व०तं० 1, 54)

ईशानाद्याः——महामायातत्त्वेऽधिकृता मन्त्राभिधानाः पञ्चाधिकारिणः । ते च ईशानस्तत्पुरुषः सद्योजातो वामदेवोऽघोरश्चेति ।

~एकैकशक्तिप्रधानाः——पञ्चापीशानाद्याः सृष्ट्यादिपञ्चकृत्यसम्पादनसमर्थाः सन्त एकैकस्याः शक्तेः प्राधान्यात् शक्त्यन्तराणां च गौणत्वेन तेन तेन ब्रह्मादिरूपेणोपदिश्यन्ते शुद्धेऽध्वनि । तदुक्तम्—

"तदन्यशक्त्युद्रेकांशे ह्यत एव विवक्षिते ।
प्रत्येकमस्ति ब्रह्मादिहेतुपञ्चकयोगिता ॥"

(मा०वि०वा० 1, 254)

~कारणपञ्चकप्रायाः——ईशानाद्याः पञ्च सदाशिवादिकारणपञ्चकप्राया उपदिष्टाः । यथा—

"सद्योजातश्च यद्रुद्रः पुरुषश्चेश्वरात्मकः ॥
श्रीमान् सदाशिवो देव ईशानश्चेति गीयते ।
विष्णुर्वामः कजोऽघोर इति चैतद्भविष्यति ॥

(मा०वि०वा० 1, 251-52)

~तत्स्थितिः——ऊर्ध्वे दिक्चतुष्टये च स्थितिरीशानादीनां पूजोपासादिविधौ—

'तत्र मध्ये भगवान्, ऊर्ध्वेऽस्यैशानं वक्त्रम्, अधः पातालवक्त्रम्, पूर्वादिदिक्चतुष्के श्रीतत्पुरुषाघोरसद्योवामाख्यम्" ॥

(तं०सा०पृ० 138)

अत्र वक्त्रषट्कयुक्तो भगवान् स्वच्छन्दनाथ उक्तः । षष्ठं च तस्य वक्त्रमधः ।

ईशानी शक्तिः—चिच्छक्तिः ।
द्र० 'शक्तिपञ्चकम्' इति ।

ईश्वरः——(1) सामान्यतः सृष्ट्यादिकारी विश्वशासको भगवान् । (2) क्षेत्रविशेषे सर्वं ज्ञातुं कर्तुं च समर्थोऽधिकारी ।

(3) शैवपरिभाषानुसारं च भेदाभेददृष्ट्या विश्वं पश्यन् क्रियाशक्तिसमाविष्टः शुद्धविद्याभूमाववतीर्णः शिवः ।
द्र० 'ईश्वरभट्टारकः' इति ।

(4) ईश्वरतत्त्वे स्थितानां मन्त्रेशप्राणिनां प्रशासकस्तैरुपास्यो देवाधिदेवः । यथा—

"अत्र च तत्त्वेश्वराः शिव-शक्ति-सदाशिवेश्वरानन्ताः; ब्रह्मेव निवृत्तौ । एषां सामान्यरूपाणां विशेषानुगतिरूपाः पञ्च, तद्यथा—शाम्भवाः, शाक्ताः, मन्त्रमहेश्वराः, मन्त्रेश्वराः, मन्त्राः, इति ।"

(तं०सा० पृ० 74-75)

(5) परमशिवस्य परमेश्वरताया या सुस्पष्टा बहिरभिव्यक्तिस्तत्राधितिष्ठन् शिव एवेश्वरभट्टारकः । यथा—

"बहिर्भावपरत्वे च परतः पारमेश्वरम् ।"

(ई० प्र० 3-1-2)

"ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः ।"

(तदेव 3-1-3)

द्र० 'ईश्वरभट्टारकः' इति ।

~अर्थतः——ईशनशीलः प्रशास्ता, निजे क्षेत्रे सर्वत्र सर्वं ज्ञातुं कर्तुमकर्तुमन्यथा च कर्तुं शक्तः स्वतन्त्रः प्रमाता । यथा—

"वैचित्र्यकारी यो यत्र स तत्रेश्वर उच्यते ।

(ई०सि० 36)

~तत्त्वसृष्टिक्रमे——विश्वं प्रमेयतत्त्वम् इदन्तया स्पष्टं विमृशन्ती शुद्धाऽपरिमिता च संवित् । यथा —

"विश्वं पश्चात्पश्यन्निदन्तया निखिलमीश्वरो जातः ॥"

(ष०त्रि०त०सं० 4)

~तत्सिद्धिः——उपादानकारणानां नैतत् सामर्थ्यं यत् सन्निवेशविशेषत्वेन परस्परं संयोगमाप्नुयुः, तेषां जडत्वात् । ताथ

तथा सन्निवेशसिद्धये तेषां प्रेरकत्वेनेश्वरस्य चेतनस्य सिद्धिः । उक्तं च—

"अस्ति चार्थंक्रियायोगे शरीरभुवनादिषु ।
सन्निवेशविशेषोऽयमनुपादानसम्भवी ।।"

(ई०सि० 6)

द्वैतभूमिकायामेवोपयोगी तर्कोऽयं नाद्वैतदृष्टाविति न विस्मार्यं सुधीभिः ।

~त्रिके——ईश्वरतत्त्वाधिप ईश्वरभट्टारकः । शिव एवेश्वरतत्त्वेऽवरूढः ।

द्र० 'ईश्वरभट्टारकः' इति ।

~दर्शनशास्त्रेषु——सृष्टिसंहारादिकर्ता । यथा—

"प्रवर्ततेश्वरात्सर्वं निवर्तेत तथेश्वरात् ।।" इति ।

(ने०तं०उ०खं० 2, पृ० 39)

~पातञ्जलाद्भिन्नः—पातञ्जले दर्शने सृष्ट्यादिशक्तिशून्यः, क्लेशादिरहितः, सदामुक्तो, भेदृष्ट्यैव पश्यन् पुरुषविशेषः कपिलादीनां गुरुणामपि गुरुरीश्वरो, यः प्रणवार्थभूतः । शैवे पुनः सृष्ट्यादिसामर्थ्ययुतो भेदाभेददृष्ट्या पश्यन् पुरुषतत्त्वाद्दूरमुत्तीर्णो योगभिरुपास्यः प्रमातेश्वरः ।

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः । तत्र निरतिशयं सर्वज्ञबीजम् । पूर्वेषामपि गुरुः कालेनानवच्छेदात् । तस्य वाचकः प्रणवः । तज्जपस्तदर्थभावनम् ।

(यो०सू० 1—24 तः 27)

नात्र किमपि क्रियास्वातन्त्र्यमीश्वरस्योक्तं, न चापि सृष्टिसंहारादिस्वातन्त्र्यम् । ततो नित्यमुक्तप्रायः पुरुषविशेष एव सः योगदर्शने ।

~प्रकृतिपरिणामनियन्ता —— ईश्वरभट्टारकप्रेरितैव तदावेशनियतैव च स्वयं जडा मूलप्रकृतिर्विशेषविशेषपरिणामशीलतां याति-रथ इव सारथिचोदितः, इति शैवी दृष्टिः ।

द्र० 'प्रकृतिपरिणामः'~ईश्वरापेक्षः इति ।

~प्रणवकलासु——बिन्दुरूपा चतुर्थी कलाऽर्धचन्द्रकलां यावत्प्रसरन्ती । यथा—

"नादस्वरूपस्य प्रकाशैकवपुषः सदाशिवभट्टारकस्य नान्तरीयको विमर्श ईश्वरः=बिन्दुः ।।"

(म०प्र०वि० पृ० 26)

"स बिन्दुश्चैवेश्वरः स्मृतः ।।"

(ने०तं० 21, 66)

"बिन्दुश्चैवेश्वरः स्वयम् ।।"

(स्व०तं० 4, 264)

~लोकव्यवहारे——(1) यो यो यावति क्षेत्रे कर्तुं ज्ञातुं च स्वतन्त्रः स स तावति क्षेत्र ईश्वरः । यथा—

"यो यावति ज्ञाता कर्ता च स तावतीश्वरो राजेव, अनीश्वरस्य ज्ञातृत्व-कर्तृत्वे स्वभावविरुद्धे यतः ।।"

(ई०प्र०वि०खं० 1, पृ० 44)

"वैचित्र्यकारी यो यत्र स तत्रेश्वर इष्यते ।"

(ई०सि० 36)

(2) यत् क्षेत्रं यस्यायत्तं तत्क्षेत्रेऽसावीश्वरः । यथा—

"यस्मिन् यदायत्तं स तत्रेश्वरो-राजेव स्वमण्डले" ।।

(ई०प्र०वि० खं० 2, पृ० 130)

~वैशेषिकाद्भिन्नः——वैशेषिके हीश्वरो भेददृष्ट्यैव विश्वं पश्यन् शास्ति न शैवे, तत्र भेदाभेददृष्ट्यैव पश्यत्यसौ विश्वम् । वैशेषिके जीवव्रातकर्माधीनमीश्वरस्य जगत्सृष्ट्यादिकारित्वं, सर्वथा नियतिशक्त्यधीनत्वं च, परं शैव ईश्वरस्य स्वतन्त्रत्वं नियत्यनुवर्तनोल्लङ्घनोभयसम्पादने समर्थत्वं वास्तविकमीश्वरत्वं कर्तुमकर्तुमन्यथाकर्तुं च स्वातन्त्र्यम् । तस्य नियत्युत्तीर्णत्वात् । यदुक्तम्—

"पातञ्जलेन पुरुषविशेषेणेश्वरेण, तथा वैशेषिकादिस्थितेन न साम्यं—तत्र भेदाभ्युपगमाद्, इह त्वभेदः ।।"

(शि०दृ०वृ० पृ० 142)

~शक्तित्रयेशः—शैवे——इच्छाशक्तिः, ज्ञानशक्तिः, क्रियाशक्तिश्चेश्वरस्य शक्तित्रयम् । यथा—

"इच्छा ज्ञान-क्रियाशक्त्यैवास्ति युक्तः स वस्तुतः ।
स्वाभाविकी स्फुरत्ता या विमर्शाख्या पराभिधा ।।
अक्रमाक्रमरूपेव सेच्छाज्ञानक्रियात्मिका ।।"

(पू०प्र०श्लो० 54-55)

एतच्छक्तित्रयं त्रिशूलपदेनापि विमृश्यत आगमिकया शैल्या ।

~शास्त्रीयव्यवहारे——(1) यद्यपि सर्वस्य प्राणिजातस्य किञ्चित् किञ्चिन्मात्रमीश्वरत्वं, तथापि शास्त्रव्यवहारे स एवेश्वरो यः सर्वशक्तिमान्, विश्वसंचालकः, सर्वोपरि स्थितः, सर्वत्र कर्ता ज्ञाता प्रशासकश्चेति । यथा—

(क) "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ।।"

(श्री०भ०गी० 18, 61)

(ख) "·· एष तर्ह्येकः कर्ता ज्ञाता स चेश्वरः ।।"

(ई०सि० 42)

(ग) "अथ सामान्यरूपेणैव सर्वज्ञेन च पुरुषविशेषेण सामान्यप्रधानवृत्ते संवेद्यमानता । तत् स एवेश्वरोऽस्तु, तस्यैव विश्वनिर्मित्सा संवेद्या सती सम्बन्धिनी भवति, इति प्रधानवत् तस्यापि निमित्तकारणतायोगात्, सर्वज्ञत्वात्, सर्वकर्तृत्वाच्च ।।"

(ई सि०वृ० पृ 24)

(घ) सर्वैरेवेश्वरस्य लक्षणैर्नित्यत्व-विभुत्व-सर्वकर्तृत्वसर्वज्ञत्व-सर्वशक्तित्व प्रभृतिभिरनीश्वरासाधारणैर्धर्मैः ···········।।"

(ई०प्र०वि०वि०खं० 1, पृ० 85)

(2) अद्वैतभूमौ तु स्वात्मैव कर्तृत्व-ज्ञातृत्वस्वभावतयेश्वर इति प्रतिपादितमीश्वरप्रत्यभिज्ञायामादावेवेत्यवधातव्यम् । यथा—

"कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे ।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः ।"

(ई०प्र० 1-1-2)

“आत्मैव सर्वभावेषु स्फुरन्निर्वृ तचिद्विभुः ।
अनिरुद्धेच्छाप्रसरः · प्रसरद्दृक्क्रियः शिवः ॥

(शि॰दृ॰ 1, 2)

(3) ईश्वरसिद्धावाचार्योत्पलदेवोक्तो द्वैतभूमावीश्वरसिद्धिप्रकारोऽसाविति न विस्मर्तव्यम् । अद्वैतदृष्ट्या तु स्वात्मैवेश्वरः स्वत एव च तथा सिद्धः ॥

ईश्वरतत्त्वम्——(1) सामान्याकारस्य विश्वस्य स्फुटेदन्तया विमर्शस्य भूमिः । यथा—

(क) “स एवेश्वरतत्त्वं स्यात्पश्यन्विश्वमिदन्तया ॥”

(अ॰प्र॰पं॰ 20)

(ख) “अंकुरितं जगदहन्तयावृत्य स्थितमीश्वरतत्त्वम् ॥”

(प॰प्रा॰ पृ॰ 7)

(2) ईश्वरतायाः स्फुटतयावभासो यत्र तत्तत्त्वमीश्वरतत्त्वम् । पारमैश्वर्यस्य तथावभासकत्वमेव तत्तत्त्वाधिष्ठातुरीश्वरस्येश्वरत्वम् । यथा—

“बहिर्भावपरत्वे तु परतः पारमेश्वरम् (तत्त्वम्) ॥”

(ई॰प्र॰ 3-1-2)

“बहिर्भावस्य क्रियाशक्तिरूपस्य परत्वे उद्रेकावभासने भगवतोऽत्यन्तदुर्घटकारिता-परिपोषणौचित्यात् परमेश्वरशब्दवाच्यमीश्वरतत्त्वं सादाख्यस्य पश्चान्निरूपणार्हम् ॥”

(ई॰प्र॰वि॰वि॰ खं॰ 3, पृ॰ 264)

शिवतत्त्वे सादाशिवे च तत्त्वे न तथेश्वरत्वस्याभिव्यक्तिर्यथैश्वरे तत्त्वे । तत एव तस्यैव तथाभिधानम्, न तयोः ।

(3) प्रमातृ-प्रमाण-प्रमेयमयस्य विश्वस्य सृष्टेरारम्भे या तथाविधा स्थितिर्यस्यां शुद्धेऽहमितिरूपे प्रमातरि सामान्याकारं प्रमेयमिदमितिरूपेण स्फुटतया भासतेऽसौ स्थितिरीश्वरतत्त्वम् । अत्र तत्त्वे प्रमातृ-प्रमेययोरुभयोराभासाद्भेदः, द्वयोश्च सामान्याधिकरण्येन विमर्शनीयत्वादभेदोऽपि । तदियं भेदाभेदभूमिका । प्रमेयस्यात्र स्फुटत्वेन भासनात्तन्निर्माणम् । ततोऽत्रं क्रियाशक्तेः प्राधान्येनाभिव्यक्तिः । अत्राधिष्ठाता भगवानीश्वरभट्टारक उपास्यः; उपासकाश्च ‘इदमहम्’ इति विमर्शभाजः प्राणिनो मन्त्रेश्वराः । सृष्टिक्रमे इतः प्रभृत्येव पारमेश्वरस्यैश्वर्यस्य बहिरभिव्यक्तिः स्फुटा । यथा —

(क) “ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः ॥”

(ई॰प्र॰ 3-1-2)

(ख) “मन्त्रेश्वरादिरूपस्य तु चैतन्यराशेः स्फुटीभूतमस्मद्बहिष्करणसम्प्राप्तभाववर्गप्रतिमं विश्वं प्रतिबिम्बतया भाति तस्य तु तत् तथाप्रथनमीश्वरतत्त्वम् ॥’

(ई॰प्र॰वि॰ खं॰ 2, पृ॰ 193)

(ग) “अहमिदमिति समधृततुलापुटन्यायेन यो विमर्शः स सदाशिवनाथे ईश्वरभट्टारके च, इदंभावस्य तु ध्यामलाध्यामलताकृतो विशेषः ॥”

(तदेव पृ॰ 196)

(घ) “ ‘इदमहम्’ इति त्विदमित्यंशे स्फुटीभूतेऽधिकरणे यदाऽहमंशविमर्शं निषिञ्चति तदेश्वरता ॥”

(तदेव पृ॰ 197)

(4) शिवशक्तेर्बहिरुन्मेषणमीश्वरतत्त्वम् । यथा—

“ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः ।”

(ई॰प्र॰ 3-1-2)

“यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शङ्करं स्तुम. ॥”

(स्पं॰ का॰ 1)

~कालमानतः——परार्धशतगुणितो मायाकाल ईश्वरतत्त्वे दिनम्, तावती च रात्रिः । तेनैव क्रमेण वर्षशतमीश्वरभट्टारकस्यायुः । यथा—

“मायाकालः परार्धशतेन गुणित ऐश्वरे तत्त्वे दिनं, तावती रात्रिः ॥”

(तं॰सा॰ पृ॰ 55-56)

~योगराजमतेन——अहमिदमिति समकक्षतया प्रमातृप्रमेयांशविमर्शमयी दशा परमार्थसारटीकाकृता ईश्वरतत्त्वत्वेन प्रतिपादिता । तदुक्तम्—

“तथा—अत्रैव ‘अहमिदम्’ इत्यभेदेनाहन्तेदन्तयोः समधृततुलापुटन्यायेन यः स्वात्मचमत्कारः, सैषा तस्येश्वरावस्था ।”

(प॰सा॰वि॰ पृ॰ 42)

परमन्यत्र समधृततुलापुटन्यायेन या स्थितिरसौ शुद्धविद्येति प्रोक्ता । स्फुटप्रमेयावभासखचितश्च प्रमातृप्रकाश ईश्वरतत्त्वतया प्रतिपादितः। योगराजेन क्षेमराजपदचिह्नान्यनुसरतैवं प्रतिपादितम् । क्षेमराजेन च सुप्रवृत्ते शास्त्रज्ञाने कामपि नवीनतामानीय स्वस्य विशिष्टं वैदुष्यं प्रकटयितुमेवं कृतमिति न विस्मर्तव्यम् । ततो नैतत् साधु यतो नोत्पलदेवाभिनवगुप्तादिमतानुसारि ।

~सादाशिवादवरम्——ईश्वरतत्त्व इदमंशस्य सदाशिवतत्त्वे चाहमंशस्य प्रधानतयाऽवभासः । तदुक्तम्—

“तत्र यदा अहमित्यस्य यदधिकरणं चिन्मात्ररूपं तत्रैवेदमंशमुल्लासयति तस्यास्फुटत्वात् सदाशिवता ‘अहमिदम्’ इति । ‘इदमहम्’ इति तु इदमित्यंशे स्फुटीभूतेऽधिकरणे यदाहमंशविमर्शं निषिञ्चति तदेश्वरता इति विभागः ।

(ई॰प्र॰वि॰ खं॰ 2, पृ॰ 197)

ततः सादाशिवं तत्त्वमूर्ध्वं तदधश्चैश्वरम् ।

~सृष्टिक्रमे——सामान्याकारं विश्वं प्रमेयतत्त्वमिदन्तामात्रतया सुस्पष्टम् ‘इदमहम्’ इति भेदाभेददृष्ट्या विमृशन्ती शुद्धा संवित् । यथा—

“विश्वं पश्चात्पश्यन्निदन्तया निखिलमीश्वरो जातः ।”

(ष॰त्रि॰त॰ सं॰ 4)

द्र॰ (प॰प्रा॰ पृ॰ 7) तथा (अ॰प्र॰प॰ 20) इति ।

ईश्वरत्वम्——सर्वकर्तृत्वम् । न हि कुम्भकृतः कर्तृत्वम्, अपि तु तत्रापीश्वरस्यैव। यतः कुम्भकारो ह्यीश्वरयंयैव व्यवस्थया, ईश्वरेच्छानुसारमेव प्रवर्तमानः कर्तृत्वं भजते। ततो वस्तुत ईश्वर एव सर्वत्र कर्ता, तस्यैव स्वतन्त्रत्वात्। अन्येषां तु सर्वेषां तदधीनत्वात्। तदुक्तम्—

> “न हि कुम्भकृतः क्वापि कदाचित्कर्तृता भवेत् ।
> यदि नासौ महेशाख्यात् कर्तुरव्यतिरेकभाक् ॥”

(मा०वि०वा० 1, 310-311)

~परम्——न ह्यनीश्वरः कोऽपि निरुपादानसंम्भारं जगदुत्पादयेत्, इति जगत्कर्तुरीश्वरत्वं सिद्ध्यति। योग्यपि निरुपादानं किमप्युत्पादयति चेत्तर्हीश्वरत्वेनैव, स्वस्मिन् योगबलतः समुद्बोधितेन। तदेतत्सूचितं यथा—

> “इयता चेतनस्य कर्तृत्वमिति प्रसाध्य तस्याप्यनीश्वरतायां तन्न निर्वहति ।”

(ई०प्र०वि०वि० खं० 3, पृ० 184)

ततश्चैत्रादौ परिमितमीश्वरत्वं परमेश्वरे च परमपरिमितमनवच्छिन्नञ्च तत्।

ईश्वरदशा——(1) इदंरूपतया गृहीतोन्मेषायाः परमेश्वरस्य शक्तेर् अहम्भाव एव या विश्रान्तिरसौ स्फुटभेदसम्भिन्ना भेदाभेदमयी दशा। ‘इदमहम्’ इति विमर्शमयी दशासौ। यथा—

> “यत्र पुनः शक्तेः क्रियाप्राधान्येन बहिर्गृहीतोन्मेषायाः पराहम्भावविश्रान्तिः, सा ईश्वरदशा ॥”

(स्पं०वि० पृ० 130)

ईश्वरदशायां यः स्वात्मविमर्शस्तत्रेदमात्मकस्य प्रमेयस्यैव सिद्धत्वमुद्देशरूपत्वम्, अहमात्मकस्य प्रमातुर्विधेयकोटावेव विमर्शनम्। तत एव साध्यत्वेन गौणत्वं तस्य।

(2) बहिर्भावप्रसरस्यावसरे पारमेश्वरी पराशक्तिर्यस्यां दशायां स्फुटं बहिर्भावमवभासयन्ती क्रियाप्रधानतां स्वात्मनः प्रकटयति सा तस्या दशेश्वरदशा। तद्यथा—

> “यत्र पुनः शक्तेः क्रियाप्राधान्येन बहिर्गृहीतोन्मेषायाः पराहंभावविश्रान्तिः सा ईश्वरदशा ।”

(स्प०वि० पृ० 130)

ईश्वरदशायां यः स्वात्मविमर्शस्तत्रेदमात्मकस्य प्रमेयस्यैव सिद्धत्वमुद्देशरूपत्वम्; अहमात्मकस्य प्रमातुर्विधेयकोटावेव विमर्शनम्। तत एव साध्यत्वेन गौणत्वं तस्येति वेद्यं सुधीभिः।

ईश्वरप्रत्यभिज्ञा——काश्मीरशैवदर्शनस्य कारिकाबद्धस्तर्कयुक्तिप्रधानो मुख्यो दर्शनसिद्धान्तसूत्रग्रन्थः उत्पलदेवाचार्यकृतः। स्वात्मनः परिपूर्णपरशिवरूपतायाः प्रत्यभिज्ञा तावदस्य ग्रन्थस्य मुख्यं प्रयोजनमित्यन्वर्थेयमस्य संज्ञा। अस्य कारिकाः सूत्रपदेन निर्दिष्टा बहुशो विवृत्तिविमर्शिन्याम्। अस्योपरि चाभिनवगुप्ताचार्यकृता विमर्शिनी नाम व्याख्या महामहिममण्डिता सकलदर्शनशास्त्रमौलिमणिवत् प्रकाशते। ग्रन्थे चत्वारः खण्डा अधिकारनामधेयाः। प्रथमे ज्ञानाधिकारेऽष्टावाह्निकानि विमर्शिन्याम्, द्वितीये क्रियाधिकारे चत्वारि, तृतीये आगमाधिकारे द्वे, चतुर्थे तत्त्वसंग्रहाधिकार एकमेवाह्निकम्। विवृतिविमर्शिन्यां चतुर्थोऽधिकार आह्निकद्वये विभक्तः। तदनुकृत्य कैरपि ग्रन्थलिपिकारैर्विमर्शिन्यामपि तथैवाह्निकविभागः कृतः, सम्पादकमण्डलेन च तथैवासौ प्रकाशितः। परं नैतदुचितम्। न खल्वाचार्येणात्र स्वयं तथा कृतम्। तस्याधिकारस्य द्वितीये आह्निके मङ्गलाचरणस्याभावात्। न ह्याचार्यमहोदयस्तथा कथञ्चिदप्यकरिष्यदित्याह्निकान्तरशैली स्फुटं व्यनक्ति।

~कौमुदी——केनापि सुन्दरकनाम्ना कौलसम्प्रदायानुयायिना निर्मिता ईश्वरप्रत्यभिज्ञाकारिकाणां सुविस्तृता व्याख्या याऽद्यावधि न केनापि मुद्रिता, नापि प्रकाशिता। अस्याष्टीकाया अशुद्धिबहुला एकैव मातृका वर्तते काश्मीरविश्वविद्यालयस्थस्य ‘रिसर्च् एण्ड पब्लिकेशनज्’ इति नामकस्य राजकीयकार्यालयस्य पाण्डुलिपिसंग्रहे।

~तत्पाठभेदाः——ईश्वरप्रत्यभिज्ञाविमर्शिन्याः मुख्यं संस्करणद्वयं मुद्रितं वर्तते। एकं तावत् काश्मीरग्रन्थावल्याम्अपरञ्च भास्करीटीकायुतम्। तयोश्च बहुषु स्थलेषु पाठभेदाः वर्तन्ते। तात्पर्यविमर्शनेनैतत् सिद्धं भवति यत् काश्मीरग्रन्थावल्यां प्रकाशितः पाठोऽधिकतरं शुद्धः समीचीनश्च। तत्र या अशुद्धयः क्वापि, ता मातृकालेखकप्रमादमूलाः। परं भास्कर्यां दुर्भेदग्रन्थिनिर्दलनार्थं पाठो बहुधा परिवर्तितो लभ्यते। प्राचीनतमपाण्डुलिप्यनुसारमपि कश्मीरग्रन्थावलिपाठ एव बहुधा शुद्धः। असौ प्राचीनतमा मातृका राजानकशङ्करकण्ठेन लिखिता सतीदानीं काश्मीरविश्वविद्यालयस्थे पूर्वोक्ते सर्वकारीयमातृकासंग्रहे विद्यते। पूर्वमसौ शिवोपाध्यायवंशजस्य श्रीमदानन्दपण्डितस्य ग्रन्थसंग्रहेऽभूत्।

~तद्गाम्भीर्यम्——(1) अतीव गम्भीरचिन्तनपूर्णोऽयं टीकाग्रन्थः यथा—

> “कल्पान्ताम्बुनिधेः प्रचण्डपवनप्रक्षोभितौर्वानल—
> ज्वालाजालमिलत्तरङ्गवलनानश्यत्-कुलक्ष्माभृतः ।
> भूयानप्यवगाहनाय विभवेन्नत्वीश्वराभिज्ञया
> निर्णीतस्य विधेर्विमर्शविधये शक्तः परः शङ्करात् ।”

(ई०प्र०वि०वि० खं० 3, पृ० 406)

(2) एतेन व्यक्तं यदभिनवगुप्तमहोदयैः स्वात्मपरमेश्वरभावसाक्षात्कारबलादेव विमृष्टमिदं शास्त्रम्। विशेषतो विवृतिसहिताया ईश्वरप्रत्यभिज्ञाया अयमीदृशो महिमा।

~टीका——ईश्वरप्रत्यभिज्ञाविवृतिरेवेश्वरप्रत्यभिज्ञाटीकेति नाम्नापि प्रसिद्धा। इदानीमेषाऽलभ्या। ईश्वरप्रत्यभिज्ञावृत्तेः पदान्यादाय शास्त्रसिद्धान्ता अस्यां सुविमृष्टा अभूवन् पदवाक्यप्रमाणशास्त्रदृष्ट्या। अस्या लोपो नाम सुमहती क्षतिः कश्मीरशैवदर्शनस्य—

(क) "टीकाकारेणापि वृत्तिमात्रं व्याख्यातुमुद्यतेन नेदं स्पृष्टम् ।"

(ई०प्र०वि० खं० 1, पृ० 23)

(ख) "वृत्त्या तात्पर्यं टीकया तद्विचारः ।
सूत्रेष्वेतेषु ग्रन्थकारेण दृब्धम् ॥"

(तदेव खं० 1, पृ० 3)

(ग) "सूत्रं वृत्तिं टीकां चेश्वरप्रत्यभिज्ञानसिद्धये कृतवान् ॥"

(ई०प्र०वि०वि० खं० 1, पृ० 2)

(घ) "एवमियता टीकापि ग्रन्थकारेणैव कृतेत्युक्तं भवति । न ह्यन्यप्रमातृतत्त्वगे पश्यन्तीमध्यमे, प्रमात्रन्तरविश्रान्ता च वैखरीति सम्भवति ।"

(तदेव खं० 1, पृ० 17)

~परिपूर्णा——आचार्योत्पलदेवविरचितया विवृत्यभिधानया टीकया सहिता ईश्वरप्रत्यभिज्ञैव पूर्णेति, परिपूर्णेति वा प्रत्यभिज्ञोच्यते स्म । शिवदृष्टिवृत्तावपि स्थले स्थले यद् "उक्तमेतदीश्वरप्रत्यभिज्ञायाम्"--- इत्युक्तं तत्रेयं पूर्णा प्रत्यभिज्ञैवाभिप्रेता । अत एव विवृतिविमर्शिन्यन्ते उक्तम्—

"जगति विहितबोधामीश्वरप्रत्यभिज्ञां
व्यवृणुत परिपूर्णां प्रेरितः शम्भुपादैः ॥"

(ई०प्र०वि०वि० खं० 3, पृ० 407)

~भास्करी——अष्टादशस्य शतकस्य चरमे पादे भास्करकण्ठनाम्ना विदुषा निर्मिता ईश्वरप्रत्यभिज्ञाविमर्शिन्याष्टीका । इयं विमर्शिनीमवबोद्धुमतीव साहाय्यकरी, परं क्वचित् क्वचिद् दुर्भेदग्रन्थिदलनाकुलेन व्याख्याकृता विमर्शिन्याः पाठ एव परिवर्तित इति विवृतिविमर्शिन्या सह राजानकशंकरकण्ठलिखितमातृकया च सह तुलनया स्पष्टीभवति । एषापीदानीं दुरवापतां याता, न पुनर्मुद्रिता केनापि । काश्मीर-राजकीय-रिसर्चकार्यालयस्य मातृकागारेष्वस्याः सम्पूर्णा मातृकाद्वयी शारदालिप्यां सुरक्षिता विद्यतेऽतोतिरिक्तं तत्रास्याः प्रकीर्णांशा अप्युपलभ्यन्ते ।

~मातृकाः——ईश्वरप्रत्यभिज्ञायाः शारदालिप्यां लिखिता बह्व्यो मातृकाः श्रीनगर्यां पण्डितानां गृहेषु, ग्रामेषु तथान्येषु मातृकासंग्रहेषु चापि लभ्यन्ते बहुषु स्थानेषु । तेषु प्राचीनतमा सुपरिशुद्धा च मातृका राजानकशंकरकण्ठेन लिखिता । असौ शिवोपाध्यायस्य वंशजानां सकाशेऽभवत् । इदानीं कश्मीरविश्वविद्यालयस्थे "रिसर्च् एण्ड पब्लिकेशन्ज्" इत्याख्यस्य सर्वकारीयशोधसंस्थानस्य मातृकासंग्रहालये सुरक्षिता वर्तते । तदाधारतया ईश्वरप्रत्यभिज्ञाविमर्शिन्या आलोचनात्मकं शुद्धं संस्करणं सम्पाद्य प्रकाशयितुं शक्यते ।

~विमर्शिनी——आ० अभिनवगुप्तविरचिता ईश्वरप्रत्यभिज्ञाकारिकाणां विस्तृता स्वतन्त्रा च व्याख्या । यत्स्थानं व्याकरणशास्त्रे पातञ्जलस्य भाष्यस्य, वेदान्ते वा शांकरभाष्यस्य, मीमांसादर्शने वा शाबरभाष्यस्य तदेव स्थानं पराद्वैतशैवदर्शने ईश्वरप्रत्यभिज्ञाविमर्शिन्याः । एनां सावधानं बहुशोऽधीत्य सुविमृश्य च विद्वान् कश्मीरशैवदर्शनस्य सिद्धान्तपक्षं सम्यगवबुध्यते । व्याख्यातेयं विमर्शिनी भास्करकण्ठेनापरेण च केनापि सुन्दरकनाम्ना टीकाकृता । भास्कर्यां टीकायां विमर्शिन्याः पाठो बहुषु स्थलेष्वशुद्धः । अपरा टीका नैव मुद्रिताऽद्यावधि केनापि । समस्तशस्त्रान्तरसारग्राहित्वमस्या विमर्शिन्या इत्युक्तमाचार्याभिनवगुप्तपादैर्यथा—

"वाक्यप्रमाणपदतत्त्वसदागमार्थाः
स्वात्मोपयोगमुपयान्त्यमुतः स्वशास्त्रात् ।
भौमान् रसाञ्जलमयांश्च न सस्यपुष्टौ
मुक्त्वार्कमेकमिह योजयितुं क्षमोऽन्यः ॥"

(ई०प्र०वि खं० 2, पृ० 277)

~विवृतिः——ईश्वरप्रत्यभिज्ञाटीका येदानीं न लभ्यते क्वापि । अतीव महत्वपूर्णं एष टीकाग्रन्थोऽभूत् । अस्य पदान्यादाय निर्मितेश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी मुद्रिता लभ्यते, परन्तु मूलभूता विवृतिरलभ्यैव । तस्याः काश्चन पंक्तयः क्वचित् क्वचिदुद्धृता वर्तन्ते । तद्यथा—

"न चैवं वक्तव्यम्—विश्वात्मसात्काररूपा समावेशभूः कादाचित्की कथमुपादेयेयं स्यादिति; यतो देहाद्युन्मज्जन-निमज्जनवशेन इदमस्याः कादाचित्कत्वमिवाभाति । वस्तुतस्तु चितिस्वातन्त्र्यावभासित-देहाद्युन्मज्जनादेव कादाचित्कत्वम् । एषा तु सदैव प्रकाशमाना, अन्यथा तद्देहाद्यपि न प्रकाशेत । अत एव देहादिप्रमातृताभिमाननिमज्जनायाभ्यासः, न तु सदाप्रथमानतासारप्रमातृताप्राप्त्यर्थम्--- इति श्रीप्रत्यभिज्ञाकाराः ।"

(प्र० हृ० पृ० 36)

पाठोऽयं पूर्णायाः प्रत्यभिज्ञाया उद्धृतोऽत्र क्षेमराजेन । विवृतावत्र पूर्वपक्षीया वादाः सम्यक् प्रतिपाद्य निरस्ता वर्तन्ते । उक्तं हि सोमानन्दपादैः—

"स्वपक्षान् परपक्षांश्च निःशेषेण न वेद यः ।
स्वयं स संशयाम्बोधौ निमज्जंस्तारयेत्कथम् ॥"

(उद्धृ०प०त्री०वि० पृ० 117)

तदनुसारं तेन शिवदृष्टेश्चतुर्थ-पञ्चम-षष्ठेषु त्रिष्वाप्याह्निकेषु विज्ञानवादस्य सम्यगुपपादनं विधाय तन्मतं समुचिततराभिस्तर्कयुक्तिभिर्निरस्तम् । एवमेव तस्य शिष्येणोत्पलदेवेनात्र धर्मकीर्तिप्रभृतीनां विज्ञानवादिनां मतं भूरिशः प्रतिपाद्य निरस्तमीश्वरप्रत्यभिज्ञाविवृतौ, विशेषतः प्रथमे द्वितीये चाधिकारे । स्पष्टीकृताश्च ते वादविवादा आचार्याभिनवगुप्तेन विवृतिविमर्शिन्याम् । तदेतद्विशेषमहत्त्वं विवृतेस्तद्विमर्शिन्याश्च । वेदान्तिकैराचार्यैर्बौद्धवादस्य तर्कयुक्तीस्तत्त्वतः समवबोद्धुं यत्नोऽपि नैव कृतः, न चापि कृतोऽसौ नैयायिकैः । शैवदर्शनस्य मुनित्रयेणैव बौद्धवादः सम्यक् परीक्षितः समुचिताभिश्च युक्तिभिर्निरस्तः ।

~विवृतिकारः——स्वयमुत्पलदेव एव ।
द्र० अत्रैव '—टीका' इति ।

~विवृतिविमर्शिनी——ईश्वरप्रत्यभिज्ञायाः संक्षिप्ता

वृत्तिर्व्याख्याता स्वयमुत्पलदेवाचार्येण विवृत्याख्यया व्याख्यया। तामेव व्याख्यां "टीका" इत्यपि वदन्ति स्माचार्याः। तस्या विवृतेः पदान्यादायातिविस्तृता व्याख्या निर्मिताऽऽचार्याभिनवगुप्तेन, या खण्डत्रयात्मिका मुद्रिता लभ्यते। परं मूलभूताया विवृतेरभावेन न तथोपकारिणी यथाभीष्टाभूदाचार्यस्य। 1014 तमे ख्रीस्ते वर्षे निर्माणमस्या जातम्। तदुक्तम्—

"इति नवतितमेऽस्मिन् वत्सरेऽन्त्ये युगांशे
तिथिशशिजलधिस्थे मार्गशीर्षावसाने।
जगति विहितबोधामीश्वरप्रत्यभिज्ञां
व्यवृणुत परिपूर्णां प्रेरितः शम्भुपादैः॥"

(ई०प्र०वि०वि० खं० 3, पृ० 407)

अत्र सप्तर्षिवत्सरे 4090 तम इति, कलिवत्सरे च 4115 तम इति निर्देशः। तेन ख्रीस्ते 1014 वर्ष इति लभ्यतेऽर्थः।

~**वृत्तिः**——ईश्वरप्रत्यभिज्ञाकारिकाणां तात्पर्यमात्रस्य निर्देशकरी श्लोकान्वयप्राया लघ्वी टीका या ग्रन्थकृता स्वयं विरचिता। तदुक्तम्—

"वृत्त्या तात्पर्यं टीकया तद्विचारः
सूत्रेष्वेतेषु ग्रन्थकारेण दृब्धम्॥"

(ई०प्र०वि० खं० 1, पृ० 3)

~**वृत्तिकारः**—उत्पलदेव एव।

द्र० अत्रैव'—वृत्तिः' इति।

~**व्याख्यान्तराणि**——एवं प्रतीयते यदाचार्याभिनवगुप्तकाले ईश्वरप्रत्यभिज्ञाया अन्या अपि काश्चन व्याख्या अभूवन्निति। तत एवाचार्येण तेषां व्याख्यातॄणां विचारान्प्रति निर्देशः कृतोऽस्ति। तद्यथा—

"अन्ये तु भिन्नक्रमत्वेन योजयन्ति—दृक् आसीत्सा मे इत्येवम्, मया दृष्टमिति च यत् स्मरणं तद् व्याकरणमस्या इति, अनन्तरोक्तान्वभूवमित्युचितपरामर्शायाः स्मृतेः—इति।"

(ई०प्र०वि० खं० 1, पृ० 141)

~**सूत्राणि**——उत्पलदेवकृताः कारिका एवाल्पाक्षरत्वे सति बह्वर्थप्रतिपादकत्वेन सूत्राणीत्युक्तानि सद्भिः।

~**सूत्रकारः**——उत्पलदेवः।

द्र० अत्रैव'—टीकाकारः' इति।

~**सूत्रादिकर्ता**——ईश्वरप्रत्यभिज्ञायाः सूत्राणि, वृत्तिं, विवृतिं (टीकां) च स्वयमुत्पलदेव एव निर्मितवान्। ततः स एव तत्तन्निर्मातृत्वविमर्शतः सूत्रकारो, वृत्तिकारो, विवृत्तिकारश्चेति त्रिभिर्भिन्नैर्नामभिरुक्तो व्याख्यास्वभिनवगुप्ताचार्यवर्यैस्तत्र तत्रेति ज्ञेयं सुधीभिः। न च शब्दभेदेनानेन भ्रमितव्यम्।

ईश्वरप्रत्यभिज्ञाविमर्शिनी——ईश्वरप्रत्यभिज्ञायाः सूत्राणां सुविस्तृतातीव महिममण्डिता चाभिनवगुप्ताचार्यविरचितात्यन्तवैदुष्यपूर्णा गहनरहस्यप्रकाशनकरी च व्याख्या।

द्र० 'ईश्वरप्रत्यभिज्ञा' इति।

~**उपयोगिनी**——आचार्याभिनवगुप्तोदितानुसारं पदवाक्य-प्रमाणादीनि सर्वाण्यपूर्णानि शास्त्राणि। तेषां पूर्णता तावदीश्वरप्रत्यभिज्ञाविमर्शिन्या सम्पाद्यते। यद्द्वारैव ते स्वात्मोपयोगं सम्यगुपयान्ति, नान्यथा पृथगधीतानि। यथा—

"वाक्यप्रमाणपदतत्त्वसदागमार्थाः
स्वात्मोपयोगमुपयान्त्यमुतः स्वशास्त्रात्।
भौमान् रसाञ्जलमयांश्च न सस्यपुष्टौ
मुक्त्वार्कमेकमिह योजयितुं क्षमोऽन्यः॥"

(ई०प्र०वि० खं० 2, पृ० 277)

~**विषयसूचिः**——ईश्वरप्रत्यभिज्ञाविमर्शिन्यां ज्ञानाधिकारोऽष्टाह्निकः। तत्र प्रथमं संक्षेपतः स्वसिद्धान्तकथनम्, ततः प्रधानमल्लनिबर्हणन्यायेन पूर्वपक्षतया विज्ञानवादिबौद्धमतस्थापनम्, ततो युक्तिभिस्तन्निबर्हणं, विज्ञानसन्तानपरम्परासाक्षिरूपस्य पूर्वापरविज्ञानक्षणसंयोजनसमर्थस्य चात्मनः सत्तायाः सिद्धिः, ततस्तस्य स्मृति-ज्ञान-अपोहनाभिधानां व्यावहारिकीणां शक्तीनां प्रतिपादनम्। ततस्तासामेकस्याश्रयभूतस्यात्मतत्त्वस्य स्थापनम्। अन्त्ये चाह्निके आत्मनः परमेश्वरत्वप्रतिपादनमिति ज्ञानाधिकार एते विषयाः।

क्रियाधिकार आह्निकचतुष्टयम्। तत्र प्रथम आह्निके बौद्धनिरस्तायाः क्रियायाः सत्तायाः सिद्धिः। द्वितीये क्रिया-सम्बन्ध-सामान्य-द्रव्य-दिक्-काल-बुद्धीनां सत्यत्वं सप्रमाणं स्थापितं वर्तते। तृतीये ज्ञातृ-ज्ञेय-भावमयस्य प्रमाणव्यवहारस्य, चतुर्थे च शैवस्य कार्य-कारण-भावस्य शास्त्ररहस्यगर्भं प्रतिपादनं कृतं वर्तते।

तृतीयेऽधिकार आह्निकद्वयम्। तत्रागमशास्त्रोपदेशानुसारं षट्त्रिंशत्प्रमेयतत्त्वानां, सप्त प्रमातृवर्गाणां च क्रमेण प्रतिपादनं कृतं वर्तते। तत्रैवावस्थाचतुष्टयस्य, प्राणादिपञ्चकस्य च रहस्यान्युद्घाटितानि वर्तन्ते। चतुर्थे तत्त्वसंग्रहाधिकारे सिंहावलोकनन्यायेन प्राक्प्रतिपादितदर्शनतत्त्व-स्मारणपूर्वकं गुणत्रयनिरूपणपुरःसरं च शास्त्रसिद्धान्तनिगमनं कृतं वर्तते। इत्येषा संक्षिप्ता विषयसूचिरीश्वरप्रत्यभिज्ञायास्तद्विमर्शिन्याश्च।

ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी——उत्पलदेवकृताया ईश्वरप्रत्यभिज्ञाविवृतेर्बृहती व्याख्याऽभिनवगुप्तकृता। अतीव गहनोऽयं व्याख्याग्रन्थोऽतिविस्तृतश्च। चरमोऽयं महत्त्वपूर्णो ग्रन्थोऽभिनवगुप्तपादानाम्। अतोऽग्रे विश्रामस्य प्रतिज्ञातत्वात्। तदुक्तम्—

"विश्राम्याम्यहमीश्वराद्वयकथाकान्तासखः साम्प्रतम्।"

(ई०प्र०वि०वि० खं० 1, पृ० 2)

अत्र विवृतिग्रन्थे तद्विमर्शिनीग्रन्थे च समस्तेतरशास्त्रसिद्धान्तदृष्टयोऽपि सम्यक् परीक्षिताः सप्रमाणं, स्वकीयाश्च सिद्धान्ताः सम्यक् स्थापिताः। सूक्ष्मतरविचारबहुलोऽयं ग्रन्थोऽतीवोपयोगी भवेत्सुधियां कृते चेदुत्पलदेवकृता विवृतिरुपलभ्येत।

ईश्वरभट्टारकः——ईश्वरतत्त्वेऽधिष्ठातृत्वं भजमानो मन्त्रेश्वरैरुपास्यो भगवान् । तदुक्तम् —

"यस्तु सदाशिवभट्टारक ईश्वरभट्टारकश्च ध्येयोपास्यादिरूपतया ब्रह्म-विष्णु-तुल्यः पृथगेव मन्तव्यो न नामसारूप्याद् भ्रमितव्यम् ।।"

(ई०प्र०वि० खं० 2, पृ० 193)

शिव एव हीश्वरतत्त्वेऽवतीर्णः सन्नीश्वरभट्टारकः; पञ्चसु कारणाख्येषु भगवत्सु चतुर्थ आरोहक्रमे। ईश्वरतत्त्वमन्यद् ईश्वरभट्टारकश्चान्य इत्यत्र न नामसादृश्येन भ्रमितव्यम् ।

~**सत्यमीश्वरः**——सत्यं हीश्वरत्वमीश्वरभट्टारकस्यैव प्रसिद्धम् । शिवे, सदाशिवे चैश्वर्ये विद्यमानेऽपि न "ईश्वर" इति पदस्य प्रयोगस्तत्रेश्वरत्वस्य स्फुटाया बहिरभिव्यक्तेरपूर्णत्वात् । पूर्णा साभिव्यक्तिरीश्वरभट्टारक एव । अतोऽसावेवेश्वर इति परिभाष्यते । उक्तमेतत् —

"अत्र (ईश्वरपदे) ऐश्वर्यस्य पूर्णत्वादीश्वरता ।"

(ई०प्र०वि०वि० खं० 3, पृ० 267)

ईश्वरशिवाचार्यः——त्रिपुरोपासनाविषये (वामकेश्वरीमते) श्रीरसमहोदधिनामकस्य ग्रन्थस्य कर्ता । तदुक्तम् —

"श्रीमदीश्वरशिवाचार्यमतस्य बलवत्त्वं लक्ष्यते, यतः स एव श्रीरसमहोदधिश्लोकानां साक्षात् प्रवर्तयितेति सर्वत्राविगीता प्रसिद्धिः ।"

(वा०म० पृ० 48)

ईश्वरसिद्धिः——ग्रन्थविशेष उत्पलदेवकृतः । सिद्धित्रय्यां ग्रथिता द्वितीयेयं पुस्तिका षट्पञ्चाशत्कारिकामयी । अत्र द्वैतवादोचितैरपि तर्कैर्यथेश्वरस्य सत्ताया सिद्धिस्तथा विस्तरतः प्रतिपादितं सांख्याभिमतस्य च केवलप्रकृतिकारणतावादस्य सप्रमाणं निरसनम् । ईश्वरकृतप्रेरणाया आवश्यकत्वं च प्रतिपादितं तर्कयुक्तिभिः ।

ईश्वरसिद्धिविमर्शिनी——पंक्तयोऽस्याष्टीकायाः समुद्धृता महेश्वरानन्देन । अनुमातं शक्यते यदभिनवगुप्तविरचितैवेयं विमर्शिन्यभवदिति । इदानीं नैव लभ्यते क्वापि । तदुक्तम्—

"एवमभिप्रेत्य खल्वीश्वरसिद्धिविमर्शिन्यामुक्तम्-'गृहपतिरिव कुटुम्बवर्गे, नरपतिरिव गृहपतिवर्गे, चक्रवर्तीव राजवर्गे, लोकपाल इव चक्रवर्तिवर्गे, ब्रह्मादिरिव लोकपालवर्गे ब्रह्मादिवर्गेऽप्यधिष्ठाता ।" इति ।

(म०मं०प० पृ० 142)

ईश्वरसिद्धिवृत्तिः——आचार्योत्पलदेवेन स्वयं विरचिता निजाया ईश्वरसिद्धेरतिसंक्षिप्ता तात्पर्यमात्रप्रकाशिका टीका याऽद्यतनीयप्रथानुसारं 'PARAPHRASE' इति वक्तुं शक्या । सिद्धित्रय्यां प्रकाशितेयं वर्तते ।

ईश्वराद्वयदर्शनम्——काश्मीरशैवदर्शनमेव । स्पष्टमुक्तं क्षेमराजेन । यथा—

"इह ईश्वराद्वयदर्शनस्य ब्रह्मवादिभ्य अयमेव विशेषो यत्—

सृष्टिसंहारकर्तारं विलयस्थितिकारकम् ।
अनुग्रहकरं देवं प्रणतार्तिविनाशनम् ॥

इति श्रीमत्स्वच्छन्दादिशासनोक्तनीत्या सदा पञ्चविधकृत्यकारित्वं चिदात्मनो भगवतः । यथा च भगवान् शुद्धेतराध्वस्फारणक्रमेण स्वरूपविकासरूपाणि सृष्ट्यादीनि करोति, तथा सङ्कुचितचिच्छक्तितया संसारभूमिकायामपि पञ्चकृत्यानि विधत्ते ।"

(प्र०हृ० पृ० 22-23)

ईश्वराद्वयवादः——शाङ्करो ब्रह्मवादः शून्यकल्पचिदद्वयवादः । तत्र वादे ब्रह्मणि शून्य इवैश्वर्यचमत्कारस्याभावः । ऐश्वर्यमीश्वरता वाऽविद्योपाधिवशादल्पज्ञजीवदृष्ट्या तत्र कल्पिता व्यवह्रियते । ततो न तस्येश्वरता पारमार्थिकी, अपि तु विवर्तरूपैव । ततोऽसौ शून्यवादकल्पोऽद्वयवादः । शैवः पुनरद्वयवादः पारमैश्वर्यचमत्कारसरसो, यतस्तत्र पारमैश्वर्यमद्वयतत्त्वस्यात्मनो नैसर्गिकस्वभावभूतत्वेनाङ्गीक्रियते । इत्यसावद्वयवाद ईश्वराद्वयवाद इति व्यपदिष्ट उत्पलदेवादिगुरुभिः। तदुक्तम्—

(क) "ईश्वराद्वयवाद एव युक्तियुक्तः····· ।"

(शि०दृ०वृ० पृ० 36)

(ख) "ईश्वराद्वयवादं·········।"

(ई०प्र०वि०वि० खं० 2, पृ० 92)

(ग) "न ईश्वराद्वयवादे दर्शितम् ।"

(तदेव पृ० 108)

(घ) "···· लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।"

(तं०आ०वि० खं० 12, पृ० 429)

द्र० 'अद्वैतशैवदर्शनम्' इति ।

उ

उ——(1) मातृकाक्रमे तृतीयो वर्ण 'उन्मेषाख्यः' । अयं वर्णः शाम्भवोपास्तिक्रमे सृष्ट्यादिक्रियोन्मेषयुक्तं शिवस्य स्वरूपमभिव्यनक्ति । ततः पूर्वमीशनाशक्तेरभिव्यक्तिः ।

(2) इष्यमाणभावजातोन्मेषमयी, उन्मिषन्ती ज्ञानशक्तिः 'उ' इति मातृकावर्णेन द्योत्या । यथा—

(क) "उन्मिषन्ती तु ज्ञानशक्तिरिष्यमाणसकलभावोन्मेषमयी 'उ' इति ।"

(प०त्री०वि० पृ० 168)

(ख) "परमेश्वरस्य······भावोन्मेषोन्मुखं ज्ञानं 'उ' इति ।"

(प०त्री०विवृ० पृ० 5)

उकारः~प्रणवकला——(1) प्रतिष्ठाकलाधिष्ठातुर्विष्णोः स्थितिः । यथा—

(क) "उकारो विष्णुवाचकः ।"

(स्व०तं० 4, 263)

(ख) "यदा स्थितिञ्च लभते स्वोन्मुखं सृष्टिकारणम् ।
प्रतिष्ठाख्य उकारस्तु विष्णुः साक्षाद्भवत्यसौ ।।"

(ने०तं० 21, 689)

अस्याः प्रणवकलायाः साक्षात्कारे साधकः स्थितिकृत्य-सामर्थ्यमयं विष्णुत्वमात्मनोऽनुभवतीति ।

(2) साक्षाद्विष्णुः, साधकस्य स्वात्मनो विष्णुत्वस्याभिव्यञ्जकत्वात् । यथा—

"···· उकाराख्यो मन्त्रावयव उच्यते । स च प्रतिष्ठायां गर्भीकृता ·····अत एव तत्पदाधिष्ठातृस्थितिसंविन्मयविष्णुभट्टारकामर्शित्वात्साक्षाद्विष्णुः ।।"

(ने०तं०उ० खं० 2, पृ० 293)

उच्चारः~आणवोपाये——(1) प्राणशक्तेः प्राणनापाननादिवृत्तय 'उच्चार' इति परिभाष्यन्ते । यथा –

"सामान्यविशेषरूपतया षट्प्रकारस्य प्राणस्य यः प्राणनापाननाद्यात्मोच्चारः ।"

(तं०आ०वि० खं० 3, पृ० 357)

"प्राणः स्थूलः सूक्ष्मश्च । आद्य उच्चारणात्मा । उच्चारणञ्च नाम पञ्च प्राणाद्या वृत्तयः ।

(तं०सा० पृ० 35)

(2) असौ जीवनात्मकः प्राणनव्यापारो यद्बलेन जडमपि शरीरादि चेतनवच्चेष्टाः करोति—

"प्राणव्यापार उच्चार उच्यते जीवनात्मकः ।
देहाद्यचेतनस्यापि चैतन्यप्रतिभासकः ।।"

(पू०प्र० श्लो० 78)

~जपात्मकः——

द्र० 'जपः—चतुर्विधः' इति ।

उच्चारयोगः——(1) प्राणादिवृत्तिपञ्चकावलम्बनो भावनात्मकानुसन्धानमयो योगः । तदभ्यासे साधकः क्रमेण प्राणापानादिषु प्राणनक्रियावृत्तिषु विश्रान्तः सन् षडानन्दभूमिकास्वादं रसयन्नाणवसमावेश-विशेषान् लभते । तदुक्तम्—

"·········· ·····प्राण उच्चारणात्मकः ।
उच्चारणं च प्राणाद्या व्यानान्ताः पञ्च वृत्तयः ।।

(तं०आ० 5, 17-18)

द्र० 'प्राणः, अपानः, समानः, उदानः, व्यानः' इति ।

(2) प्रबुद्धः साधको मत्तगन्धे मूलाधारसङ्कोचं विधाय प्राणवृत्तिं सौषुम्नमार्गेणोर्ध्वं सारयन् क्रमेण तां तत्तच्चक्रपरम्परया सहस्रारपर्यन्तं नयंस्तत्र तत्र चक्रेषु तां तामानन्दभूमिकामनुभवन्नन्तेऽनवच्छिन्नां जगदानन्दमयतां रसयन् कृतकृत्यो भवति । यतस्तत्रासाविच्छा-ज्ञान-क्रिया शक्तित्रयसामरस्यं साक्षात्कुर्वंश्चिदानन्दमयतायां विश्रान्तो भवति । यथा—

"प्राणदण्डप्रयोगेण पूर्वापरसमीकृतेः ।
चतुष्किकाम्बुजालम्बि-लम्बिकासौधमाश्रयेत् ।।
त्रिशूलभूमिं क्रान्त्वातो नाडित्रितयसङ्गताम् ।
इच्छा-ज्ञान-क्रिया-शक्ति-समत्वे प्रविशेत्सुधीः ।।

(तं०आ० 5, 54-56)

"यथा—एवं शून्यात्प्रभृति व्यानान्तं या एता विश्रान्तयस्ता एव निजानन्दो, निरानन्दः, परानन्दो, ब्रह्मानन्दो, महानन्दः, चिदानन्द इति षडानन्दभूमय उपदिष्टाः । यासामेकोऽनुसंधाता, उदयास्तमयविहीनोऽन्तर्विश्रान्ति-परमार्थरूपो जगदानन्दः ।"

(तं०सा० पृ० 38-39)

(3) अत्राभ्यासे केनापि रहस्यात्मकेन प्रकारेण सृष्टि-संहार बीजमन्त्रोच्चारोऽपि सहायतां याति । यथा—

"तदेव सृष्टिसंहारवीजोच्चारणरहस्यम् ।"

(तदेव पृ० 39)

(4) एतासामानन्दभूमिकानां प्रत्येकं पञ्च पञ्चावस्था भवन्ति । ताश्च—(1) आनन्दः, (2) उद्भवः, (3) कम्पः, (4) निद्रा, (5) घूर्णिः—इति । एतासामपि लक्षणानि स्वे स्वे स्थाने द्रष्टव्यानि । यथा—

"आसु च विश्रान्तिषु प्रत्येकं पञ्चावस्था भवन्ति प्रवेशतारतम्यात् । इत्यादि ।"

(तदेव पृ० 39)

(5) एता आनन्दोद्भवाद्या जाग्रदाद्यवस्थोचिताः प्राणवृत्तय इति वेद्यम् । आसां च साक्षात्कारस्थानानि क्रमेण मूलाधारादूर्ध्वंकुण्डलिनीपर्यन्तानि चक्राणि । यथा—

"ता एता जाग्रदादिभूमयस्तुर्यातीतान्ताः । एताश्च भूमयस्त्रिकोण-कन्द-हृत्-तालु-ऊर्ध्वंकुण्डलिनी चक्रप्रवेशे भवन्ति ।"

(तदेव पृ० 40)

(6) अत्राभ्यासे विश्रान्तिदशायां त्रिप्रकारकं स्पन्दनं नर-शक्ति-शिवात्मकं लिङ्गत्रयाख्यं साक्षादनुभूयते । तेषु नरलिङ्गमुन्मिषितवेद्यं, शक्तिलिङ्गमुन्मिषद्वेद्यं, शिवलिङ्गं च विगलिताशेषवेद्यम्—

"एवमुच्चारविश्रान्तौ यत्परं स्पन्दनं—गलिताशेषवेद्यं, यच्चोन्मिषद्वेद्यं, यच्चोन्मिषितवेद्यं तदेव लिङ्गत्रयम् ।"

(तदेव पृ० 40-41)

गलितवेद्ये स्पन्दे चिदानन्दमात्रताचमत्कारः, उन्मिषद्वेद्ये शुद्धविद्योचितश्चमत्कारः, उन्मिषितवेद्ये च स्पन्दे जगत्सृष्ट्यादिपञ्चकृत्य-कारित्वचमत्कार—इति वेद्यं सुधीभिः ।

~अपानेन——

द्र० 'उच्चारयोगः—प्राणापानतः' इति ।

~उदानेन---

द्र० 'उदानः—उच्चारयोगे' इति ।

~कुण्डलिनीगत्या——आनन्दभूमिकासु षट्स्वपि याः

प्रत्येकं पञ्च पञ्चावस्था आन्दोद्भवाद्यास्ताः प्राणशक्तेरूर्ध्वंगत्यां मूलाधारादारभ्य सहस्रारपर्यन्तं चक्रक्रमेण भवन्ति। तदित्थमुच्चारयोगे विनैव हठयोगाभ्यासं कुण्डलिनीजागरणं तदूर्ध्वंगतिश्चानायासं निर्विघ्नतया च सम्पद्यते। यथा—

"एताश्च भूमयः—त्रिकोण-कन्द-हृत्-तालु-ऊर्ध्वकुण्डलिनी-चक्रप्रवेशे भवन्ति।"

(तं॰सा॰ पृ॰ 40)

~खदशकक्रमेण——प्रपञ्चशून्यं पदार्थदशकं यत्तत्राभ्यासेन सचमत्कारं साक्षात्कार्यं भवति क्रमेण, तच्च "आत्माणुकुलमूलानि"—विस्तरतः प्रदर्शितमन्यत्र।

द्र॰ 'ख-दशकम्' इति।

~(तदुपदेष्टा) —— ख-दशकयुक्तिरूपस्योच्चारयोगस्य रहस्यं यदाचार्याभिनवगुप्तैः प्रतिपादितं तन्त्रालोके तत्र प्रमाणं तु तेषां स्वानुभूतिरेव। भगवता महेश्वरेणैव तस्य रहस्यमाचार्यवर्याणां हृदये समुद्बोधितम्। तदनुसारमेव तैस्तस्य निरूपणं कृतम्। तदुक्तम्—

"इति प्रवेशोपायोऽयमाणवः परिकीर्तितः।
श्रीमहेश्वरनाथेन यो हृत्स्थेन ममोदितः॥"

(तं॰आ॰ 5, 96-97)

~प्रकारान्तरतः——परतत्त्वान्तःप्रवेशप्रक्रियादय उत्कृष्टतरा अपि योगप्रकारा उच्चारयोग एवान्तर्भवन्ति, उच्चारस्य प्राणनात्मकत्वाच्चिदात्मकत्वाच्च चिदेव हि मूलतः। प्राणिति। ततश्चिदन्तःप्रवेशक्रमोऽप्युच्चार एव। तदेतदुक्तम्—

"इत्युच्चारविधिः प्रोक्तः·········।"

(तं॰आ॰ 5, 128)

"उच्चार एव हि प्राणचिदात्मना प्रथमं द्विविधः। तत्र चिदात्मापि चित्प्राधान्येन विमर्शप्राधान्येन च भवन्द्विधा भवतीति स एव त्रिविधः। तत् परतत्त्वान्तःप्रवेशात्मनोऽप्युपायस्य तद्भेदत्वादुच्चारात्मकत्वमेव।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 438)

~प्राणेन——

द्र॰ 'उच्चारयोगः~प्राणापानतः' इति।

~प्राणापानतः——श्वासेन, कायेन, वाचा, बुद्ध्या च सम्पद्यमाना प्रमेयपरित्यागवृत्तिः प्राणः, तदाभिमुख्येन एतैरेव तद्ग्रहणवृत्तिरपानः। यथा—

(क) "प्राणापानमयः प्राणः प्रत्येकं सुप्तजाग्रतोः।"

(ई॰प्र॰ 3-2-19)

(ख) "तत्र किञ्चित्त्यजन्ती, क्वचित्पतन्ती क्रमेण प्रश्वासनिःश्वासात्मना प्राणापानरूपा भवति। सा चोभय्यपि जाग्रति स्फुटैव देहाद् विषये, ततोऽपि देहे-स्मृत्यादावाभ्यन्तर एव वेद्ये विश्रमणात्। सुप्तेऽपि स्वप्ने सास्त्येव, परेण स्वपतः प्राणप्रवेश निर्गमयोरुपलम्भात् स्वयमपि वेद्यसम्पातोपलब्धेः। तेन प्राणापानविशेषद्वयप्रधाना प्राणना जाग्रत्स्वप्नयोः।"

(ई॰प्र॰वि॰वि॰ खं॰ 3, पृ॰ 342)

द्र॰ (ई॰प्र॰वि॰ खं॰ 2, पृ॰ 244) इत्यादि।

विषये विश्रान्तिः प्राणः, देहादौ विश्रान्तिरपानः—इति तात्पर्यशेषः संक्षेपतः।

द्र॰ 'प्राणापानौ~उच्चारयोगे' इति।

~मन्त्रापेक्षः——उच्चारयोगाभ्यासे रहस्यभूतानां बीजपिण्डात्मकानां मन्त्राणामपि प्रयोगो भवति। परं नासौ स्पष्टीकृत आचार्यैः, तस्य रहस्यभूतत्वात्। उक्तं हि—

"इदानीमेतदेव मन्त्रव्याप्तिमुखेनाप्यभिधीयते।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 358)

मूलाधारादूर्ध्वंद्वादशान्तं तत्तत्स्थाने तेषां तेषां मन्त्राणां भावना विधातव्येति प्रतीयते तन्त्रालोकतद्विवेकतः।

~व्यानेन——

द्र॰ 'व्यानः~उच्चारयोगे' इति।

~संक्षेपतः——स्पष्टं वर्णितस्तन्त्रसारे। तद्यथा—

"पूर्वं स्वबोधे तदनु प्रमेये विश्रम्य मेयं परिपूरयेत।
पूर्णेऽत्र विश्राम्यति मातृमेयविभागमाश्वेव स संहरेत॥
व्याप्त्याथ विश्राम्यति ता इमा स्युः
शून्येन साकं षडुपायभूमयः।
प्राणादयो व्याननपश्चिमास्त-
ल्लीनश्च जाग्रत्प्रभृतिप्रपञ्चः॥
अभ्यासनिष्ठोऽत्र तु सृष्टिसंहृद्-
विमर्शधामन्यचिरेण रोहेत्।"

(तं॰सा॰ पृ॰ 41)

~समाने——

द्र॰ 'समानः~उच्चारयोगे' इति।

~सिद्धिलक्षणतः——उच्चारयोगस्य सिद्धेर्बाह्यलक्षणानि पञ्च भवन्ति—(1) आनन्दाभिव्यक्तिः, (2) शरीरोत्प्लुतिरूप उद्भवः, (3) शरीरकम्पः, (4) निद्रा, (5) घूर्णिश्चेति। यथा—

"आनन्द उद्भवः कम्पो निद्रा घूर्णिश्च पञ्चकम्।
इत्युक्तमत एव श्रीमालिनीविजयोत्तरे॥"

(तं॰आ॰ 5, 107-8)

"अनया शोध्यमानस्य शिष्यस्यास्य महामतिः।
लक्षयेच्चिह्नसंघातमानन्दादिकमादरात्॥
आनन्द उद्भवः कम्पो निद्रा घूर्णिश्च पञ्चमी।"

(मा॰वि॰तं॰ 11, 34-35)

उच्छलत्ता——विश्वसृष्ट्यादिफला परमेश्वरस्य स्पन्दात्मिका परा स्फुरत्ता।

द्र॰ 'स्पन्दः' इति :

उच्छुष्मतन्त्रम्——कश्चन शैवागमः। कदाचिदयं श्रीकण्ठ्यां स्वच्छन्दाष्टकमध्ये परिगणितो महोच्छुष्म आगम एव स्यात्—

"अकारश्छेदने प्रोक्त ऋकारस्ताडने······।
इत्यादिना श्रीमच्छुष्मतन्त्राद्यादिष्ठ······।
(ने० तं० उ० खं० 2, पृ० 17)

अत्र नेत्रतन्त्र ईदृश एव पाठ उपलभ्यते।

उच्छुष्मभैरवः——किमप्यागमशास्त्रम्। कदाचिन्महोच्छुष्म एव भवेदयमागमः। यथा—

'तदुक्तमुच्छुष्मभैरवे—
यावन्न वेदका एते तावद्वेद्याः कथं प्रिये।
वेदकं वेद्यमेकं तु तत्त्वं नास्त्यशुचिस्ततः॥
(शि०सू० वृ० 1-1)

द्र० (स्व०तं०उद्० पटल० 7, पृ० 315)
(स्व०तं०उद्०पटल 10, पृ० 382)
(शि०सू०वि० पृ० 4)
(पू०प्र० खं० 1, श्लोक 27)

अतोऽनुमीयते यदुच्छुष्मतन्त्रमेवेदं स्यात्।

उच्छुष्मशास्त्रम्——किमप्यागमिकं शास्त्रं समुद्धृतं पराश्रीशिका विवरणे। तद्यथा—

"श्रीमदुच्छुष्मशास्त्रे च......॥"
(प०त्री०वि० पृ० 156)

इदमपि महोच्छुष्माख्य एव भवेदागमः।

उज्जटः——कालीनये भानुकाचार्यस्य शिष्यपरम्परायां कोऽपि गुरुः। उद्भटस्य दैशिकः। अभिनवगुप्तस्य गुरुपरम्परायां कोऽप्याचार्यः। यथा—

"स (गोविन्दराजः) चेदं रहस्यं श्रीसोमानन्दाभिधानाय गुरवे सञ्चारयाम्बभूव। द्वितीयोऽपि (भानुकाचार्यः) एवमेवास्त। तस्यैव चैषा श्रीमदुज्जटोद्भटादिनानागुरुपरिपाटीसन्ततिर्यत्प्रसादादासादितमहिमभिरस्माभिर् (अभिनवगुप्तैः) एतत्प्रदर्शितम्।
(उद्धृ० क्रमकेलि, तं०आ०वि० खं० 3, पृ० 192)

उत्क्रान्तिः——ऊर्ध्वलोकगतिः। सा च भुक्तिपूर्वा सती क्रमेण मुक्तिदायिनी—

"आत्मनो योजनं व्योम्नि तद्वदुत्क्रान्तिवर्तना (वर्त्मना)।"
(तं०आ० 14, 36)

~न शिवतत्त्वे——यथा—

"यदि सर्वगतो देवो वदोत्क्रम्य क्व यास्यति॥
अथासर्वगतस्तर्हि घटतुल्यस्तथा भवेत्।
उत्क्रान्तिविधियोगोऽयमेकदेशेन कथ्यते॥
निरंशे शिवतत्त्वे तु कथमुत्क्रान्तिसंगतिः।
(तं०आ० 14, 33—35)

उत्क्रामणी~खेचरी——लक्षितातीव सङ्क्षेपतो न च स्पष्टमुक्ता। यथा—

"उत्क्रामणी झगित्येव पशूनां पाशकर्तरी।"
(तं०आ० 32, 60)

उत्तरम्——प्रकाशरूपतायाः प्रातिकूल्यं भजमानं वस्तूत्तरम्। दक्षिणस्य वैपरीत्येन स्थितमिति—

"दक्षिणस्य पुरःसंस्थं वाममित्युपदिश्यते।"
(तं०आ० 15, 200)

उत्पत्तिविनाशौ——कारणान्तःस्थस्य कार्यस्य बहिरवभास उत्पादः, कारणे लयो विनाशः—

"अन्तर्विपरिवर्तिन एवार्थस्य बहिरवभासो नाम कार्यत्वं, पुनस्तत्रैव विश्रान्तिर्नाशः॥"
(तं०आ०वि० खं० 6, पृ० 227)

द्र० 'उत्पादन-विनाशने' इति।

उत्पलदेवः——काश्मीरशैवदर्शनवाङ्मयस्य सिद्धान्तपक्षे यो मौलिभूतो ग्रन्थः 'ईश्वरप्रत्यभिज्ञा' इति तस्यान्येषामपि च बहूनां ग्रन्थरत्नानां निर्माता—

'उत्पलदेवः शिष्यस्तस्य ग्रन्थांश्च प्रत्यभिज्ञादीन्॥"
(स्वा०द० श्लो० 10)

~अभिनवगुप्तानुग्रहीता——यदोत्पलदेवो वृद्धोऽभूत् तदाभिनवगुप्तः शिशुरभवत्। तत एवोत्पलदेवेन तस्य प्रशिक्षणार्थं लक्ष्मणगुप्त आदिष्ट इति प्रतीयते, यतस्तेनासौ लक्ष्मणगुप्तपादयोर्घटित इति स्वयमुक्तमभिनवगुप्तेन। एवंविध आदेश एवाभिनवगुप्तोपर्यनुग्रहः। यथा—

"श्रीशास्त्रकृद्धटित लक्ष्मणगुप्तपाद-
मत्योपदर्शितशिवाद्वयवाददृप्तः॥"
(ई०प्र०वि०वि० खं 3, पृ० 406)

श्रीशास्त्रकृदिति पदसन्दर्भेण प्रकृतेश्वरप्रत्यभिज्ञाशास्त्रनिर्माताऽत्राभिप्रेतः, न पुनः कस्यापि कल्पनाकल्पितस्यासतः श्रीशास्त्रस्य कर्तृत्वमिति विदांकुर्वन्तु सुधियः। अयमुत्पलदेवः परम्परयाभिनवगुप्तस्य परमगुरुः।

~कालविचारतः——उत्पलदेवेन स्पन्दकारिकायाः पद्यमेकमुद्धृतम्। तेन भट्टकल्लटादर्वाक्तनः रामकण्ठस्तावदात्मानमुत्पलदेवशिष्यं वदति, तेन तस्माज्ज्यायान्। रामकण्ठ एवात्मानं मुक्ताकणस्यानुजं कथयति। मुक्ताकणश्चावन्तिवर्मणः कालेऽभवत्। एतैः प्रमाणैर्ज्ञायते यदुत्पलदेवोऽप्यवन्तिवर्मण एव कालेऽभवदिति। भट्टकल्लटात्कनीयान् रामकण्ठाच्च ज्यायानभूदिति तस्य कालः ख्रीस्तनवमशतकस्योत्तरार्धम्। यथा—

(क) "यथोक्तं स्पन्दशास्त्रे—'न हीच्छानोदनस्यायम्' इत्यादि॥"
(शि०दृ०वृ० पृ 3)

(ख) "तद्वंशे स्वगुणप्रकर्षखचितो मुक्ताकणाख्योऽभवत् ।
तस्यैषा सदृशानुजेन रचिता रामेण विद्वज्जन ।। इत्यादि ।
(रा०भ०गी०टी० पृ० 405)

(ग) "मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः ।।"
(रा०तं०क० 5, 34)

~तद्ग्रन्थाः——

(क) मौलिकाः—

(1) ईश्वरप्रत्यभिज्ञा ।
(2) अजडप्रमातृसिद्धिः ।
(3) ईश्वरसिद्धिः ।
(4) सम्बन्धसिद्धिः ।
} :— 'सिद्धित्रयी' इतिनाम्ना लभ्यास्त्रयोऽपि ।

(ख) टीकाग्रन्थाः—

(5) ईश्वरप्रत्यभिज्ञावृत्तिः (अपूर्णैव लभ्यते) ।
(6) ईश्वरप्रत्यभिज्ञाविवृतिः (टीकेति ख्याता, नैव लभ्या)
(7) शिवदृष्टिवृत्तिः (अपूर्णैव लभ्यते) ।
(8) अजडप्रमातृसिद्धिवृत्तिः (नैव लभ्या) ।
(9) ईश्वरसिद्धिवृत्तिः ।
(10) सम्बन्धसिद्धिवृत्तिः ।

(ग) स्तोत्रग्रन्थाः—

(11) शिवस्तोत्रावलिः ।

(घ) रचनान्तराणि ।

द्र० अत्रैव '~तद्रचनान्तराणि' इति ।

~तज्जननी——अस्य जननी 'वागीश्वरी' इति नाम्नी योगिनी । तद्यथा—

'द्वितीये वागीश्वरीगर्भजन्मनि कृते पूर्णं द्विजत्वं भवतीति ।।"
(ई०प्र०वि०वि० खं० 3, पृ० 404)

~तन्निवासस्थानम्——श्रीनगरस्योत्तरस्मिन्भागे श्रीशारिकापर्वतस्योत्तरस्यां दिशि यत्र 'डल्' ह्रदादेका क्षुद्रा नदी प्रवहति तत्र तस्यास्तटयोरस्ति कोऽपि नगरस्य भागो य इदानीं लोकभाषायां 'ग्त्पोर्' इति नाम्ना ख्यातः । श्रीनगरे वृद्धपण्डितेष्वस्ति परम्परागतं ज्ञानं यदुत्पलदेवस्तत्रैव न्यवसदिति ।

अनुमीयते यदुत्पलदेवप्रभावत आकृष्टा अत्रिगुप्तवंशजा भूयांसस्तत्रागत्योपनिविष्टाः केनापि कालेन येन तस्य नाम गुप्तपुरम्' इति ख्यातमभवत् । तत एवेदानीं देशभाषायां 'ग्त्पोर्' इति नाम्नोच्यते ।

द्र० साहिबकौलविरचितं 'जन्मचरितम्' काश्मीरभाषाकाव्यं यस्य मातृका 'रिसर्चं एण्ड पब्लिकेशनज़' इति नामके कश्मीरसर्वकारीयशोधसंस्थाने सुरक्षिता वर्तते । इति ।

~तत्पिता——उदयाकरस्तस्य पिता । स च मूलतो लाटदेशीयः । यथा—

"उदयाकरपुत्रः श्रीमानुत्पलदेवोऽस्मत्परमगुरुरिदं शास्त्रमकार्षीत् ।।"
(ई०प्र०वि० खं० 2, पृ० 276)

"जनस्यायत्नसिद्धयर्थमुदयाकरसूनुना ।
ईश्वरप्रत्यभिज्ञेयमुत्पलेनोपपादिता ।।
(ई०प्र० 4-2-3)

द्र० 'लाटवंशीय' इति ।

~तत्पुत्रः——विभ्रमाकरः । यथा—

"विभ्रमाकरसंज्ञेन स्वपुत्रेणास्मि चोदितः ।।"
(शि०दृ०वृ० पृ० 2)

~तद्रचनान्तराणि——एतत् स्पष्टं भवति यदुत्पलदेवाचार्यैः किमप्यन्यदवश्यं रचितं शैवशास्त्रं यस्य नामादि न ज्ञायतेऽद्यत्वे, परं यस्य पद्यमेकं समुद्धृतमीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्याम् । तद्यथा—

"अत एवाभ्यासवतामपोहेन विनापि यत् ।
प्रबोधात्केवलादेव जायते बाधनादिकम् ।।
(ई०प्र०वि०वि० खं० 2, पृ० 171)

एतदपि सम्भाव्यं यत्तेनानेकेऽन्ये ग्रन्था विरचिता येषां पंक्तयो नामनिर्देशं विनैवोद्धृता ईश्वरप्रत्यभिज्ञाविमर्शिन्यामाचार्याभिनवगुप्तपादैः । तद्यथा—

(क) "यदाह ग्रन्थकार एव—
इत्थं स्वसंवित्तिमपह्नुवानैर्यत्तद्वदद्भिः कलुषीकृतं यत् ।
प्रमातृतत्त्वं स्फुटयुक्तिभिस्तान्मूकान्विधाय प्रकटीकृतं तत् ।।"
इति ।
(ई०प्र०वि० खं० 1, पृ० 130)

एतत् पद्यमजडप्रमातृसिद्धिवृत्तेरुपसंहार इव भाति ।

(ख) "अत एवोक्तमाचार्येण—
पूर्वानुभवसंस्कारः प्रमातुरयमेव सः ।
यदपोहनकालेऽपि स पूर्वानुभवः स्थितः ।।"
(तदेव खं० 2, पृ० 41)

(ग) "तदुक्तमाचार्येणैव—
इष्टार्थितायामिष्टं वा विमृश्येतेष्टकारि वा ।
न चाप्यदृष्टमिष्टं द्योरपीष्टा दृष्टभोगभूः ।।
दृष्टं च सहदृष्ट्यैव विनष्टमिति कार्थिता ।
द्रष्ट्रैकेन विमृष्टं तत् ……………………।।"
(तदेव खं० 2, पृ० 58)

(घ) "उक्तमाचार्यपादैरेव—
नियतेऽप्ययमित्येव परामर्शः पुरः स्थिते ।
सर्वभावगतेदन्तासामान्येनैव जायते ।।" इति
(तदेव खं० 2, पृ० 71)

(ङ) "एवमिन्द्रियाविषयत्वेनैवासाधारणत्वमाक्षिप्तम्—
विभ्रमेणैव चास्थैर्यम्………।।" इति स्वकण्ठेन ।
(तदेव खं० 2, पृ० 240)

(च) "तदुक्तमाचार्यपादैरेव—
यावत्योऽर्थक्रियास्तावत्संख्योऽतत्कारिणां गणः ।
तावन्तस्तत्समारोपास्तन्निषेधाश्च तत्समाः ।। इति,
यथा—

एकप्रत्यवमर्शो यस्तत्कारिषु बहुष्वपि ।
सोऽप्यतत्कारिविच्छेदसाम्ये स्यात्सनिबन्धनः ॥

इति ॥"

(ई०प्र०वि०वि० खं० 1, पृ० 295)

(छ) "यदाह ग्रन्थकृदन्यत्र—
इष्टार्थितायामिष्टं वेत्यादि 'ग' इति द्रष्टव्यम् ॥"

(तदेव खं० 2, पृ० 132)

~तन्महिमा——असौ लोकव्यवहारं कुर्वन्नपि शुद्धस्वात्मविमर्शपर एवाभवत् प्रायशः । तदुक्तम्—

"यावानात्मावरणविधये कल्पते कोऽपि कल्प-
स्तावानात्मप्रकटनविधौ नीत एवोपयोगम् ।
येन स्पष्टं परमगुरवे तीव्रकारुण्यपूर्ण-
श्रीशर्वाणीदयितसततावेशभाजे नमोऽस्मै ॥"

(ई०प्र०वि०वि० खं० 3, पृ० 407)

~लाटवंशीयः——ईश्वरप्रत्यभिज्ञाविवृतावुत्पलदेवः स्वपितरमुदयाकरं 'लाट' इत्युक्तवानिति तद्विमर्शिनीतो ज्ञायते । 'लाट' इति गूर्जरदेशवासिनां प्रसिद्धमभिधानम् । ततोऽनुमातुं शक्यते यदस्य पूर्वजाः सोमानन्दादिपूर्वजवद् देशान्तरादागत्य कश्मीरेषूपनिविष्टा इति ततो मूलत इमे गूर्जर (गुजरात) देशीयाः । यथा—

"लाट इत्यादिना पूर्वं शुद्धवंशजन्मनो द्वितीये वागीश्वरीगर्भजन्मनि कृते पूर्णं द्विजत्वं भवतीति ॥"

(ई०प्र०वि०वि० खं० 3, पृ० 404)

~सहपाठी (तस्य)——पद्मानन्दः । यथा—

'पद्मानन्दाभिधानेन तथा सब्रह्मचारिणा ॥"

(शि०दृ०वृ० पृ० 2)

उत्पलवैष्णवः——स्पन्दप्रदीपिकाकारः । अयमुत्पलाचार्य इत्यपि कथ्यते । अस्य प्रदीपिकाग्रन्थादिदं स्पष्टं प्रतिभाति यदयं मूलतो पाञ्चरात्रसम्प्रदायसम्बन्धी वैष्णवः । भट्टकल्लटस्य प्रख्यात्या प्रभावितः संस्तत्कृतौ स्पन्दकारिकायां वैदुष्यपूर्णां सुविस्तृतां व्याख्यां रचितवान् प्रदीपिकाख्याम् ।

इदमपि सम्भाव्यते यदयं वैष्णवः सन्नपि लिङ्गोद्धारविधिना शैवमार्गं प्रविष्टवानिति । परमेषा सम्भावनाऽतीव कृशा, अस्य कृतौ भूयो भूयो पाञ्चरात्रागमवाक्यानां सादरमुद्धृतत्वात् । पाञ्चरात्रागमभक्तिरस्य शैथिल्यं नैवाप्ता कथमपीति स्पष्टतां याति ।

अयमाचार्यो कश्मीरान्तर्गत-वर्तमान-'त्राल' भूखण्डे नारायणस्थाने (साम्प्रतं 'नोर्' इति ख्याते) न्यवसत् । त्रिविक्रमनामा सुधीरस्य पिता । उत्पलदेवाख्याच्छैवगुरोरन्य एवायं ग्रन्थकारः । तत एव भेदप्रदर्शनार्थम् 'उत्पलवैष्णव' इति कथ्यतेऽधुना—

"नारायणस्थात्रसंस्थ-द्विजवर्य-त्रिविक्रमात् ।
जातो जनानुग्रहार्थं व्याख्याति स्पन्दमुत्पलः ॥"

(स्पं० प्र० पृ० 1)

"नारायणस्थानज उत्पलाख्य—
स्त्रिविक्रमाख्यस्य सुतोऽग्रजन्मा ।
यस्तेन सच्छिष्यहिताय दृष्टा
व्याख्या मयैषा च तमोनुदे स्यात् ॥

(तदेव पृ० 55)

~ग्रन्थान्तरकृत्——किमपि ग्रन्थान्तरमनेन निर्मितं यद्वाक्यमुद्धृतं वर्तते स्पन्दप्रदीपिकायाम् । तद्यथा—

"तथा मयापि—
सीदति येनैव जडः प्राज्ञस्तेनैव सन्तरति दुःखात् ।
पिण्डितमयोऽप्सु मज्जति तदेव पात्रीकृतं प्लवते ॥" इति

(स्प०प्र० पृ० 5)

~भोग-मोक्ष-प्रदीपिकानिर्माता——तस्य स्वकृतस्य ग्रन्थस्य नाम 'भोग-मोक्ष-प्रदीपिका'-इति । सम्भाव्यते यदस्मादेव ग्रन्थादुद्धृतमुपरितनं पद्यमपीति । यथा—

"मयाऽप्युक्तं भोग-मोक्ष-दीपिकायाम् ॥"

(स्पं०प्र० पृ० 32 तथा पृ० 49)

उत्पादनविनाशने——उभयेन्द्रियवेद्यत्वे सति शिवात्मकताया अख्यातिर्भावस्योत्पादनम्, उभयेन्द्रियवेद्यत्वाभावे सति शिवात्मकतयैव प्रख्यातिर्भावजातस्य विनाशनम् । तदुक्तम्—

"उभयेन्द्रियवेद्यत्वं शिवाभेदाख्यातिमयमर्थानां करणम्, तथा विनाश उभयेन्द्रियवेद्यत्वाभावः शिवाभेदः, शिवत्वेन प्रच्छादनम् ॥"

(शि०दृ०वृ० पृ० 173)

उत्पादनं शिवात् भिन्नतयावभासनम्, विनाशनञ्च केवलशिवात्मकतया प्रकाशनमिति तात्पर्यम् । इदं परसृष्टिसंहारविषय उक्तं नैवावान्तरादिविषय इति न विस्मर्तव्यम् ।

उत्पूयिनी——शान्तिः (शान्ता वा) कला । उक्तं च—

"उत्पूयिन्या चतुर्थं तु तत्र तत्त्वत्रयं विदुः ।
वर्णत्रयं मन्त्रमेकं पदमेकं च लक्षयेत् ॥
अष्टादश विजानीयाद्भुवनानि समासतः ।

(मा०वि० तं० 2, 55-56)

उदङ्मुखोपासनाफलम्——उदङ्मुखः साधकः सदाशिवनाथस्य दक्षिणमघोराख्यं मुखं पश्यन् संसार-प्लोषपूर्वकं मोक्षं लभते । तदुक्तम्—

"तन्मध्यस्थितनाथस्य ग्रहीतुं दक्षिणं महः ॥
उदङ्मुखः स्यात्……………………।"

(तं०आ० 15, 231)

"सौम्यास्ये भैरवीयं तु संसारप्लोषभीषणम् ॥"

(उद्ध०तं०आ०वि०खं० 9, पृ० 115)

उदधीशो~बीजमन्त्रः——वकार, । उक्तं च—

"उदधीशो व"

(तं०आ०वि० खं० 12, पृ० 202)

उदयः~संविदः——योगाभ्यासेन शुद्धसंविद्रूपतायाः साक्षात्कारस्य समुन्मेषः । सोऽपि त्रिभूमिकः । यथा—

"आदिकोट मज्जा अवसाना
तस तस वानस भूमिक ६.स्त"

(इति देशभाषायाम्)

(म०न० प्र० 3, 3)

"उदयोऽपि आदिमध्यावसानभेदेन त्रिधा ॥"

(तदेव पृ० 40)

उदयाकर:——उत्पलदेवस्य पिता। अस्य पूर्वजा लाटदेशीया ब्राह्मणा आसन्।

द्र० 'उत्पलदेव:~तत्पिता' इति।

उदान:——(1) हानादानरूपौ प्राणापानमार्गौ परित्यज्य क्रमेण विकल्पग्रासतत्परा भवन्ती निर्विकल्पस्वात्मविमर्शोद्दीपनोन्मुखी प्राणवृत्तिरुदान:। एतस्या अभिव्यक्तौ सौषुम्नमार्गेणोर्ध्वगमनात्मिका गतिरनुभूयते योगिभि:। तुर्यदशायामेतस्या: प्राणवृत्तेरुद्दीप्तिर्भवति। विज्ञानाकलादारभ्य मन्त्रमहेश्वरं यावदुत्कृष्टोत्कृष्टरूपोदानवृत्तिविकासमुपयाति क्रमेण—

(क) "यदा तु सा प्राणनावृत्तिर्वामदक्षिणमार्गौ (अपान-प्राण-रूपौ) खिलीभावयन्ती मध्यरूपेणोर्ध्वेन प्रवहति, तदा तत्प्रवहणं सकलस्य भेदस्याभेदसारतादानलक्षणं विलापनमाश्यानस्येव सर्पिषो विदधती उदानवृत्तिर्विज्ञानाकलादारभ्य सदाशिवान्तम्। सा च तुर्यात्मिका दशा।"

(ई०प्र०वि० खं० 2, पृ० 246-47)

(ख) "प्राण एव हृदयभुवि मध्यस्थाने विश्रान्त: समानतां प्रतिपद्य यदा पार्श्वप्रवाहविच्छेदात् तेनैवोर्ध्वं सुषिरमार्गेण प्रवहति तदोर्ध्वमासमन्तादनिति, इति उदान:।"

(ई०प्र०वि०वि० खं० 3, पृ० 349)

(ग) "उदानश्च—उत्=ऊर्ध्वम्, आ=समन्तात् प्राणसाहचर्येण अननाद् 'उदान:'—इति।"

(म०न०प्र०वि० पृ० 34)

(2) भेदात्मकविकल्पमलदाहिकेयं प्राणवृत्तिर्विज्ञानाकलात् सदाशिवान्तमुत्तरोत्तरमधिकाधिकशुद्धरूपतया देदीप्यमाना प्रकाशते—

"स च भेदं दहन्नग्निकल्प:·········।"

(ई०प्र०वि०वि० खं० 3, पृ० 349)

"मध्योर्ध्वगाम्युदानाख्यस्तुर्यगो हुतभुङ्मय:।
विज्ञानाकलमन्त्रेशो व्यानो विश्वात्मक: पर:॥"

(ई०प्र० 3-2-20)

~**कालभावनानुसारम्**——हृदयादारभ्य ब्रह्मरन्ध्रपर्यन्तमुदानचारे तत्तत्कालभावना विधीयते। उक्तं यथा—

"प्राणव्याप्तौ यदुक्तं तदुदानेऽप्यत्र केवलम्।
नासाशक्त्यन्तयो: स्थाने ब्रह्मरन्ध्रोर्ध्वधामनी॥
तेनोदानेऽत्र हृदयान्मूर्धन्यद्वादशान्तगम्।
तुट्यादिषष्टिवर्षान्तं विश्वं कालं विचारयेत्॥"

(तं० आ० 6, 212—13)

~**तत्क्षेत्रम्**——महामायाक्षेत्रं शुद्धविद्याक्षेत्रञ्च, यतस्तत्रत्यानां प्राणिनां प्राणवृत्तिरुदानाख्या।

द्र० (ई०प्र० 3-2-20)

~**तत्रत्यप्राणिवर्ग:**——मन्त्रा:, मन्त्रेश्वरा:, मन्त्रमहेश्वरा:,—इति। एतेषां स्फुटमुदानक्षेत्रान्तर्गतत्वम्। परमस्फुटप्राय उदानक्षेत्रे विज्ञानाकलानामपि स्थितिरुक्तेश्वरप्रत्यभिज्ञायाम्।

द्र० (ई०प्र० 3-2-20 तथा ई०प्र०वि०वि० खं० 3, पृ० 349)

"मन्त्रादय उदान:" (तदेव खं० 3, पृ० 350)

~**विशुद्धप्रमातृता**—तत्र तत्र मन्त्रादिषूदानस्योत्तरोत्तरं शुद्धतरा स्थिति: प्रतिपादिता स्पष्टमेव। तद्यथा—

"स एव च तदानीं प्रमातेति विज्ञानाकलरूपाद् मायोर्ध्ववर्तिन आरभ्य यत् सदाशिवप्रमात्रन्तं तत् तस्यैवेति स एव विज्ञानाकलश्च, मन्त्रश्च विविध:, ईशश्च सदाशिवात्मेति कर्मधारय:।"

(ई०प्र०वि०वि० खं० 3, पृ० 349)

"विज्ञानाकलमन्त्रेश'—इति सूत्रस्थं समस्तं पदमत्रैवं व्याख्यातम्।

मन्त्रश्च विविध:—इति मन्त्रो, मन्त्रेश्वरो, मन्त्रमहेश्वरश्चेति बोध्यम्।

उदानशक्ति:——मध्यधामोल्लासिनी तुर्यदशोचिता जीवनशक्ति:। यथा—

"मध्यधामोल्लासामुदानशक्ति······तुर्यदशारूपाम्।"

(प्र०हृ० पृ० 31)

उदितम्——(1) विश्वमयत्वावस्था। तदुक्तम्—

"उदितमिति विश्वमयम्।"

(तं०आ०वि० खं० 11/2, पृ० 84)

विश्वमयत्वेनात्रात्मसात्कृतविश्वत्वं बोध्यम्।

(2) सुषुप्ते: प्रथमो निम्नतमश्च सोपानविशेष:, यत्र प्रमेयं संस्कारमात्रेणावशिष्टं भवति। तदुक्तम्—

"उदितमिति (वेद्यस्यात्र) संस्कारमात्रात्मनावस्थानात्।"

(तं०आ०वि० खं० 7, पृ० 179)

उद्घात:——कुम्भित: प्राण: पुन: प्रसरन्नुद्घात:। यथा—

(क) "सन्निरुद्धे तु वै प्राणे मूर्ध्नि गत्वा निवर्तिते।
स उद्घात इति प्रोक्तो ज्ञातव्यो योगिभि: सदा॥"

(स्व०तं० 7, 301-2)

(ख) "रोधित: प्राण आगत्य तत्तत्स्थानं निवर्तते।
स उद्घात इति ज्ञेयो योगिभिर्वायुमाश्रित:॥"

(पू०प्र० 1, 543)

उद्देश:——सामान्येन प्रतिपाद्यविषयकथनम्।

~**अनुज:**——एकैकत्राह्निके प्रतिपादयिष्यमाणानां

विषयाणां विशेषेण पृथक् पृथङ्नामकीर्तनम्। असौ तन्त्रालोकस्य प्रथमस्याह्निकस्यान्ते पूर्वजोद्देशानन्तरं विस्तरतः प्रदत्तः।

द्र० (तं०आ० 1, 286-328)

~पूर्वजः——प्रतिपाद्यमानस्य वस्तुनो नामकीर्तनं सामान्यतः स च तन्त्रालोके प्रत्याह्निकं मुख्यविषयनामकथनात्मकः। प्रथमाह्निकान्ते च सर्वेषामप्याह्निकानां क्रमेण सामान्येन विषयकथनं यदसौ पूर्वज उद्देशस्तत्र। यथा—

"तत्रोच्यते पुरोद्देशः पूर्वजानुजभेदवान् ।"
(तं०आ० 1, 278)
"विस्तरतो दृश्यताम् ।" (तं०आ० 1, 277-284)
"यावत्सामान्यसंज्ञया कीर्तनं पूर्वंज उद्देशः ।"
(तं०आ०वि० खं० 1, पृ० 286)

उद्भटः——कालीनये भानुकाचार्यस्य परम्परायां कोऽपि गुरुः। सम्भवतः कालीनये तस्यैव शिष्योऽभिनवगुप्ताचार्यः। तस्य कालो दशमी शताब्दी। जयापीडसभाविदुषो भट्टोद्भटादन्य एवायमुद्भटो भवेत्। अस्य शिवानन्दनाथशिष्यपरम्परायां चिरावाविर्भूतत्वेनार्वाचीनत्वात्, सोमानन्दस्य च शिवानन्दपरम्परायां चतुर्थत्वात्, भट्टोद्भटस्य च 800 इति कालिकत्वात्। उक्तं हि—

"द्वितीयो (भानुकः) अप्येवमास्त। तस्यैव चैषा श्रीमदुज्जटोद्भटादिनानागुरुपरिपाटीसंततिः, यत्प्रसादासादितमहिमभिरस्माभिरेतत् प्रदर्शितम् ।"
(उद्ध० क्रमकेलितः, तं०आ०वि० खं० 3, पृ० 192)

उद्भवः~उच्चारयोगे——अचिरद्युतिवत्क्षणदृष्टनष्टे देहवर्जिते संवित्तत्त्वे प्रवेशस्य क्षणे निमेषमात्रकालिका देहस्योत्प्लुतिर्जायते। असावेव उद्भव इति परिभाषितः। उच्चारादियोगसाफल्यस्य द्वितीयं चिह्नमिदम्—

(क) "ततोऽपि विद्युदापातसदृशे देहवर्जिते।
धाम्नि क्षणं समावेशादुद्भवः प्रस्फुटं प्लुतिः ॥"
(तं०आ० 5, 101-102)

(ख) "तत उद्भवः क्षणं निःशरीरतायां रूढेः।"
(तं०सा० पृ० 40)

(ग) "········ पूर्णतोन्मुख्यमात्रादेव प्रजायते।
देहादावात्मतात्यागादुद्भवः प्लुतिसंज्ञकः ॥"
(पू०प्र० खं० 1, श्लो० 110)

तत्कालं देहादुत्तीर्णताया विमर्शेन देहस्य यो लघुभावो भवति, तेनैवासावुत्प्लुतिः पुनः पुनर्भवति। तदुक्तम्—

"उद्भवो लघुभावेन देहग्रहतिरोहितेः।
देहो हि पार्थिवो मुख्यस्तदा मुख्यत्वमुज्झति ॥"
(तं०आ० 24, 14)

उद्भिज्जमुक्तिः——
द्र० 'बीजादिमोचिका~दीक्षा' इति।

उद्यमः—सततं स्वप्रकाशेन प्रकाशमानायाः, शुद्धायाः, परस्पन्दनिर्भरायाः संविदो झगिति साक्षात्काराभ्यासः। स च शाम्भवोपायः। तस्याभ्यासतः शाम्भवः समावेशः सिद्ध्यति, बन्धरूपं चाज्ञानं विलीयते। असौ तीव्रतरेच्छाशक्तिप्रयोगतोऽभ्यस्यते। यथा—

(क) "परिपूर्णस्वरूपस्य शिवस्येत्थं चिदात्मनः।
स्वस्वरूपापरित्यागं कार्यं प्रत्युद्बुभूषतः ॥
भाव उद्योग उन्मेष उद्यमः परिभाष्यते ॥"
(शि०सू०वा०भा० 1, 25-26)

(ख) "विमर्शमय्याः संविदो नवनवस्वरूपप्रथनरूप उद्यमो भैरवात्मक स्वस्वरूपाभिव्यक्तिहेतुः ॥"
(शि०सू०वृ 1, 5)

(ग) "योऽयं प्रसरद्रूपाया विमर्शमय्याः संविदो झगित्युच्छलनात्मकपरप्रतिभोन्मज्जनरूप उद्यमः···॥"
(शि०सू०वि०, पृ० 8)

(घ) "योऽयं विमर्शरूपायाः प्रसरन्त्याः स्वसंविदः।
झटित्युच्छलनाकार-प्रतिभोन्मज्जनात्मकः।
उद्यमोऽन्तःपरिस्पन्दः पूर्णाहंभावनात्मकः ॥"
(शि०सू०वा०व० पृ० 5)

उद्योगः——(1) उद्यम एव, (2) अर्थाविभासनं प्रतीच्छा साधकस्य। यथा—

"उद्योगः अर्थाविविभासयिषा ।"
(तं०आ०वि० खं० 3, पृ० 368)

उन्मनम्——योगभूमिका विशेषारूढिदशा। उक्तं यथा—
"निस्तरङ्गं निरध्वाख्यं सकलव्यापि चोन्मनम् ।"
(स्व०तं० 3—23)

(क) " 'उन्मनं' मननं सर्वं सङ्कुचितं संवेदनमुत्क्रम्य स्थितं स्वतन्त्रमित्यर्थः ॥"
(स्व०तं०उ०प० 3, पृ० 163)

(ख) "उन्मनमुत्क्रान्तमुत्कर्षं च मनः प्राप्तं यत्र तदुन्मनम् ॥"
(स्व०तं०उ०प० 4, पृ० 249)

उन्मना~प्रणवकला——(1) प्रणवकलासु द्वादशी कला, तदतीतं हि पदं निरामयं तत्त्वं परमशिवात्मकम्। यथा—
"उन्मना च ततोऽतीता तदतीतं निरामयम् ॥" इति।
(स्व०तं० 4, 256)

(2) समनान्तात् पाशजालादुत्तीर्णा प्रणवकला। यथा—
"व्यापिनीं समनां त्यक्त्वा व्रजेदुन्मनया शिवम् ॥"
(तदेव 4, 261)

"समनान्तं वरारोहे पाशजालमनन्तकम् ॥"

(तदेव 4, 432)

~दार्शनिकदृष्ट्या——समनादिबीजभूता विमर्शरूपिणी शिवस्य पराशक्तिः। यथा—

वस्तुतो ह्युन्मनाख्यैव परविमर्शमयी पारमेश्वरी स्वातन्त्र्यशक्तिरहन्तैकरसा स्वरूपगोपनक्रीडा सदाशिवानाश्रितपदात्मकसर्वभावाभासासूत्रणभित्तिकल्पसमनारूपतया स्फुरति ॥"

(स्व०तं०उ० 11, पृ० 6)

~निर्वचनतः——असौ पराशक्तिः, यस्या साक्षात्कारकाले मनोवृत्तिर्विगलति, शुद्धा च संवित् स्वेनैव प्रकाशेन प्रकाशमानतया साक्षात्-क्रियते, मनोव्यापारादुत्तीर्णा चिन्मयी स्थितिः—

(क) ············विद्यातत्त्वे नियोजयेत् ॥

उन्मना सा तु विज्ञेया मनः सङ्कल्प उच्यते।
सङ्कल्पः क्रमतो ज्ञानमुन्मनं युगपत्स्थितम्।
तस्मात्सा तु परा विद्या यस्मादन्या न विद्यते।

(स्व०तं० 4, 393-95)

मनो हि सङ्कल्पात्मकम्। संकल्पः क्रमिकज्ञानमयः। उन्मनं ज्ञानं तु क्रमरहितं युगपद्भावेन प्रकाशमानमिति तात्पर्यमत्र।

~विशेषस्वरूपतः——कालस्पर्शोत्तीर्णा परावस्था। यथा—

"अ-मात्रमुन्मना शक्तिः कालस्तत्र न विद्यते।

(पू०प्र० 1-549)

~साक्षात्कारतः—— (1) चिदात्मतापत्तिः स्वात्मनः। यथा—

"उन्मनाभूमौ च तदैकात्म्यम्।"

(तं०आ०वि० खं० 12, पृ० 180)

(2) संविदैकात्म्यमिति तात्पर्यम्। यथा—

"उन्मना च तदापत्तिः············॥"

(तं०आ०वि० खं० 12, पृ० 180)

(3) शिवतापत्तिरिति तात्पर्यम्।

(4) स्वात्मस्वरूपज्ञानात्मिका स्वात्मशिवस्व परा शक्तिर्या दीक्षात्मिकया क्रिययोद्बोध्यते शिष्यस्यान्तः। सा च परशिवोचिता परविमर्शमयी क्रिया। यथा —

"उन्मना तु परा शक्तिर्ज्ञानरूपावधूतिका ॥
सा क्रियेत्यभिधीयेत न क्रिया त्वध्वमध्यगा।"

(ने०तं० 16, 78-79)

पशुत्वस्यावधूननं करोतीति।

~सृष्टिक्रमतः——शिवस्याद्यः सृष्ट्युन्मुखः परिस्पन्दः। सृष्ट्युन्मुखप्रथमस्पन्दरूपा शिवस्य शक्तिः। सैव स्वयं क्रमेण समनादिरूपतयावभासते। तदुक्तम्—

"शिवो ह्यनादिमान्धाम शाश्वतः प्रथमोऽचलः।
इच्छया च यदा देवि प्रसरत्यविलम्बितः॥
सा शक्तिः परमा सूक्ष्मा उन्मना शिवरूपिणी।
अस्तित्वमात्रमात्मानं क्षोभ्यं क्षोभयते यदा॥
समना सा विनिर्दिष्टा शक्तिः सर्वाध्ववर्तिनी।"

ने०तं० 21, 59-61)

उन्मेषः——(1) असौ शुद्धः संविदुदयो यतो विविधा विकल्परूपा आभासा उदयन्ते, यत्र च ते लयं यान्ति, यश्च तेषामाधारभूतः परस्परसमन्वयकारी च, यस्य च साक्षात्कारस्याभ्यासेन स्वात्मशिवतायाः प्रत्यभिज्ञा समवाप्यते। यथा—

"ग्लानिर्विलुम्पिका देहे तस्याश्चाज्ञानतः सृतिः।
तदुन्मेषविलुप्तं चेत् कुतः सा स्यादहेतुका ॥"

(स्पं० का० 40)

(2) विकल्पज्ञानद्वयस्य मध्ये प्रकाशमानः शुद्धः संवित्प्रकाशः। स एव हि तस्य द्वयस्यापि वास्तविकमन्तर्मुखं स्वरूपम्। तदुक्तम्—

"एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः।
उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥"

(स्पं० का० 41)

"एकत्र विषये व्यापृतचित्तस्य यतो यस्मात्स्वभावात् झगित्यन्या चिन्तोपपद्यते स तु चिन्तायाः कारणं 'उन्मेषो' ज्ञातव्यः, स तु स्वयमेव योगिना लक्षणीयः, चिन्ताद्वयान्तर्व्यापकतयानुभूयमानः ॥"

(स्पं०का०वृ० पृ० 33)

चिन्तापदेनात्र चिन्तनं बोध्यम्।

द्र० "स्फुरत्ता" इति।

~सृष्टिरूपः——असौ शक्तिप्रसरो येन षट्त्रिंशत्तत्त्वात्मकस्य विश्वस्यावभासो बहिः। यथा—

"स्वस्वरूपं शिवः साक्षात् तस्योन्मेषनिमेषतः।
शक्ति प्रसरसङ्कोचनिबद्धावुदयव्ययौ ॥"

(शि०सू०वा०भा० 1, 12-13)

"उन्मेषो नाम शक्तिप्रसरः ॥"

(शि०सू०वा०भा० टिप्पणी 1, 5)

अन्वर्थोऽयं पारिभाषिकः शब्दः।

~सृष्टिक्रमे——जगतो बाह्यतयेदन्तया च योऽवभासस्तस्य स्थितिः। सा चेश्वरतत्त्वरूपा स्थितिः परमशिवस्य। तदुक्तम्—

"यस्योन्मेषादुदयो जगत············।

इत्यत्रोन्मेषशब्देन बाह्यत्वस्फुटताविधायि यद्विश्वस्य चैतन्यसामर्थ्यमीश्वरतत्त्वं तन्निर्दिष्टम् ॥"

(ई०प्र०वि०वि० खं० 3, पृ०265)

उन्मेषकृत्~आचार्यः——तन्त्रालोकविवेके एकविंशे आह्निके 15 संख्याककारिकानन्तरसमुद्धृतानां मृत्युजिद्भट्टारकस्य

वा सिद्धातन्त्रस्य वा वाक्यानां विषये तदागमव्याख्याता कोऽपि यस्य मतं जयरथेन निरस्तम्। तदुक्तम्—

"अत्र चोन्मेषकृता क्लिष्टकल्पनया यद् व्याख्यातं तदाग्रहमात्रपरतयेत्युपेक्ष्यम् ॥"

(तं०आ०वि० खं० 10, पृ० 221)

उन्मेषपदमत्र टीकाविशेषाभिधानम्।

उन्मेषदशा— —तत्त्वव्रातस्य स्रक्ष्यमाणतात्मिका दशा। यथा—

"सदाशिवादिक्षितिपर्यन्तस्य तत्त्वग्रामस्य प्राक्सृष्टस्य या संहारापेक्षया निमेषभूः सैव स्रक्ष्यमाणभेदापेक्षया उन्मेषदशा ॥"

(स्मं०सं० पृ० 5)

उन्मेष-निमेषौ——पारमेश्वरस्य परस्य स्पन्दस्य बहिरन्तर्मुखं सृष्टिसंहारकारकं स्फुरणद्वयम्। तथाहि—

(क) "यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ।"

(स्पं० का० 1)

(ख) उक्तं हि—उन्मेष-निमेषाभ्यां—शक्तिप्रसरप्रलयाभ्याम् ॥"

(स्पं०वि० पृ० 3)

(ग) तौ च ईश्वरेच्छामात्रनिमित्तकौ—इति उदयात्मकोन्मेषहेतुत्वात् ईश्वरेच्छैव उन्मेषशब्देन, प्रलयात्मकनिमेषहेतुत्वात् निमेषशब्देन च उपचर्यते। यथा आयुष्कारणत्वात् आयुः शब्देन घृतम्। (तदेव पृ० 5)

~दृष्ट्यन्तरानुसारम्——पारमेश्वरस्य परस्य स्पन्दस्योभयोन्मुखा गतिरिव काचन पारमेश्वरी क्रियाऽहन्तेदन्तयोर्गुणप्रधानतावभासनकरी। तदुक्तम्—

"उन्मेष-निमेषौ नाम परमेश्वरस्य परमस्वातन्त्र्यलक्षणं स्पन्दतत्त्वम्। तत्र च यदाहन्तोन्मेषस्तदानीमिदन्ताया निमेषः, इदन्तोन्मेषे चाहन्ताया निमेषः ॥"

(म०मं०प० पृ० 42)

एतेनैतत्सिद्ध्यति यदुन्मेषोऽप्युभयतोमुखो निमेषोऽपि तथैवेति। दृष्टि-विशेषानुसारमेषा व्याख्या।

~शक्तिद्वयम्——ईश्वरतत्त्वावभासः परमेश्वरस्योन्मेषशक्तिः, सदाशिवतत्त्वावभासः पुनस्तस्य निमेषशक्तिः। बहिर्भावस्यान्तर्भावस्य च क्रमेणानयोः प्राधान्येनाभिव्यक्तिः। तदुक्तम्—

"यस्योन्मेषादुदयो जगतः इत्यत्र ईश्वरतत्त्वमेवोन्मेषशब्देनोक्तम्। विश्वस्य हि स्फुटत्वं बाह्यत्वमुन्मेषणं, निमेषणं त्वस्फुटत्वापादनमन्तारूपतोद्रेचनम्—इति निमेषः सदाशिवतत्त्वम्, यतो जगतः प्रलयः।"

(ई०प्र०वि० खं० 2, पृ० 194– 5)

उन्मेष-शक्तिः~मातृकाक्रमे——मातृकाक्रमे 'उकारेण' व्यंग्या पारमेश्वरी ज्ञानशक्तिः। अस्यां ज्ञातव्यस्य विश्वस्यान्तर एवोन्मेषो भवति। इच्छाया ईशनायाश्च यैष्टव्यैषणीयोन्मुखताऽसावत्रैवाभासते, नेतः प्राक्। यथा—

"स्वात्मप्रत्यवमर्शो यः प्रागभूदेकवीरकः ॥
ज्ञातव्यविश्वोन्मेषात्मा ज्ञानशक्तितया स्थितः।"

(तं०आ० 3, 73-74)

"ज्ञानशक्तित्वेनान्तर्विजिज्ञास्यतयेष्टस्य विश्वस्य योऽसावुन्मेष—आद्यः परिस्पन्दस्तद्रूपः सन्नवस्थित इति पञ्चमबीजनिर्णयः ॥"

(तं०आ०वि०खं० 2, पृ० 85-86)

पञ्चमं बीजमुकारः। इयमुन्मेषशक्तिरेव घोरस्य शक्तिव्रातस्य प्रभवस्थानम्। ताश्च शक्तयः पशून् काम्ये कर्मणि धर्मादौ प्रवर्तयन्त्यः मोक्षमार्गनिरोधिन्य एव उक्तं हि—

"इयं परापरा देवी घोरां या मातृमण्डलीम्।
सृजत्यविरतं शुद्धाशुद्धमार्गैकदीपिकाम् ॥"

(तदेव 3, 74-75)

उन्मेषाभ्यासफलम्——अल्पज्ञतादिरूपायाः पशुताया विलयः, सर्वज्ञतादिरूपायाः शिवतायाः समुदय उन्मेषसाक्षात्काराभ्यासेन सद्य एव सिद्ध्यति, नात्र संशयः। व्यावहारिक्योऽपि सिद्धयो लभ्यन्ते गौणफलतया—

"ग्लानिर्विलुण्ठिका देहे तस्याश्चाज्ञानतः सृतिः।
तदुन्मेषविलुप्तं चेत्कुतः सा स्यादहेतुका ॥"

(स्पं० का० 40)

"अनेनैव कारणेन वलीपलिताभावः शरीरदार्ढ्यं च योगिनाम् ॥"

(स्पं० वृ:० पृ० 33)

"यस्तु वक्ष्यमाणोन्मेषपरिशीलनाद् आविर्भूतसत्यात्मप्रत्ययः तस्य कुतो ग्लानिः—इति मुख्यं फलं सहजानन्दहानिरूपाया ग्लानेरभावः, गौणस्तु वलीपलिताद्यभावः ॥"

(स्पं०वि० पृ० 114-15)

उपकरणम्——पुष्पनैवेद्यादिपूजोपयोगिद्रव्यजातम्। यथा—

"………………पुष्पाद्युत्तमं लक्षणान्वितम् ॥"

(तं० आ० 21, 18)

उपदेशगुप्तिः——गुरुणा शिष्यस्य साधनाभ्यासविषयाः न कस्यापि पुरतः प्रकटनीयाः। सैषा साधनागुप्तिः। गुरुणा कर्तव्यैषा। यथा—

"यथान्यशिष्यानुष्ठानं नान्यशिष्येण बुध्यते ॥
तथा कुर्याद्गुरुर्गुप्तिर्हानिर्दोषवती यतः।"

(तं० आ० 26, 25-26)

गुप्तिरेषा गुणावहा। तस्या हानिर्दोषवतीति।

उपदेशदशा-तत्त्वम् —— उपदेशकोपदेश्यभेदाश्रयत्वेनोपदेशदशापि मायैव । तत्त्वप्रकाशनोपयोगितयैव तस्या व्यावहारिकी गणना शुद्धविद्यायाम् । यथा—

"उपदेशावस्थापि मायैव । सा केवलं परमार्थमार्गावगाहनसौकर्येण शुद्धविद्येति वक्ष्यते ॥"

(ई०प्र०वि०वि० खं० 1, पृ० 81)

शुद्धविद्यात्वमस्या लाक्षणिकमेवेति तात्पर्यम् ।

उपयामः——प्रसिद्धः सग्रन्थिर्दर्भस्तोमः । यथा—

"उपयाम ऊर्ध्वग्रन्थिर्ज्ञानखड्गतया प्रतीतो वेण्याकारो दार्भः सन्निवेशः । यदाहुः—

दर्भाणां तालमानेन कृता षट्त्रिंशता दलैः ।
सप्तजप्ता शिवास्त्रेण वेणी बोधासिरुत्तमा ।"

(उद्ध०तं०आ०वि० खं० 9, पृ० 217)

उपलब्धृरूपत्वम्——शुद्धप्रमातृतत्त्वरूपत्वं यज्जाग्रदादिदशाचतुष्टयेऽनुस्यूतं तिष्ठति । यथा—

"जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति ।
निवर्तते निजान्नैव स्वरूपादुपलब्धृतः ॥"

(स्पं० का० 3)

उपांशुः~जपः——(1) असौ जपो यं साधकः केवलं स्वयं शृणोति, न च यः परैः श्रूयते । यथा—

"उपांशुः इत्यघोषो यः स्वयमेव श्रूयते, न परेण, उपगताः स्वसमीपमेव प्रविष्टा अंशवः प्रसरा यस्येति ॥"

(ई०प्र०वि०वि० खं० 2, पृ० 188)

"आत्मना श्रूयते यस्तु तमुपांशुं विजानते ।"

(स्व० तं० 2, 146)

(2) उपांशुजपे ओष्ठादिचालनेऽपि परश्रोत्रेण श्रव्यो ध्वनिर्न प्रसरति । तं जपं जपकर्ता स्वयमेव बुद्ध्यते, न तमन्ये समीपस्था अपि जनाः श्रोतुमलम् । यश्च शब्दो न परेण श्रोतुं शक्यते स मध्यमावाग्व्यवहारमय एव न वैखरीपदमवतीर्ण इति । यथा—

"तथापि मध्यमापदमेव······ओष्ठादिचलनमपि न तत्र वर्णांशेऽनुप्रविशेत्, अपि तु स्वात्मनिष्ठमेव तात्कालिकं तत्स्यात् । तात्कालिकेङ्गितनिमिषितकरव्यापारादिस्थानीयम् ॥"

(प०त्री०वि० पृ० 72)

उपाख्या——(1) प्रतिपाद्यवस्तुनो विषये परस्यावबोधनम्—

"तथापि तदेव तथाविधं रूपं प्रख्योपाख्याक्रमेण स्वात्मपरावभासविषयभावजिगमिषया·········।"

(ई०प्र०वि० खं० 1, पृ० 8)

(2) उप-समीपस्थं प्रति, या आख्या-व्याख्यानं तत् । परं प्रति यदाख्यानं तदेवोपाख्येति । उक्तं यथा—

"पूर्वं वा तेनार्थाकारप्रकारेणाभूतस्य जननार्थं वाचकस्य संकेतितस्य शब्दस्य उदीरणमुपाख्याप्रसाधकम् ।"

(ई०प्र०वि०वि० खं० 1, पृ० 250)

उपादानपरम्परा——मूलमुपादानकारणं तु मायैव, परमग्रे मायाकार्याणामपि तत्त्वानामुपादानतोक्ता । यथा 'अव्यक्त' तत्त्वस्योपादानकारणं मायाकार्यात्मकं कलातत्त्वम् । अव्यक्तं च महत्तत्त्वस्य, तदहंकारस्य, सोऽपि करणानां तन्मात्राणाञ्च, तन्मात्राणि भूतानां, मृदादीनि घटादीनामित्यादि । तदुक्तम्—

"तथापि यत्पृथग्मानं कलादेरीश्वरेच्छया ॥
ततो जडत्वे कार्यत्वे पृथक्तत्त्वस्थितौ ध्रुवम् ।
उपादानं स्मृता माया क्वचित्तत्कार्यमेव च ॥"

(तं० आ० 9, 157-158)

तत्कार्यमिति मायाकार्यं, तच्च कलाप्रधानादि ।

उपाधिप्रशमः——देहकरणकञ्चुकानां प्रशमः, तदुत्तीर्णताया अनुभूतिर्योगाभ्यासफलतः । स च प्रशमः शान्त्या वा भवति हठेन वेति—

"प्रशमश्च द्विधा शान्त्या हठपाकक्रमेण तु ॥
अलंग्रासरसाख्येन सततं ज्वलनात्मना ।

(तं०आ० 3, 260-61)

~शान्त्या——पृथिव्यादिकमेकैकं तत्त्वमादाय मातृकादिसाहाय्येन तस्य तस्य तत्त्वस्य संविच्छक्तिप्रतिबिम्बमात्ररूपत्वं पश्यतः शाम्भवयोगाभ्यासिनः क्रमशः एवोपाधिप्रशमरूपोऽभ्यासः । 'मधुरपाकक्रम' इत्यप्यस्याभिधानान्तरम् । तदुक्तम्—

"शान्त्येति शान्तेन मधुरपाकक्रमेण गुर्वाद्याराधनपूर्वं समय्यादिदीक्षासाधनेन तत्तन्नित्यनैमित्तिकाद्यनुष्ठाननिष्ठतया देहान्ते सृष्ट्याद्युपाधीनामत्ययो भवेदित्यर्थः ॥"

(तं०आ०वि० खं० 2, पृ० 239-40)

~हठेन——तीव्रतरेच्छाशक्तिप्रयोगवशतः समकालमेव सर्वोपाधिजालप्रशमनेन सद्य एव शुद्धसंविन्मयतायां विश्रान्तिः । एष एव 'हठपाकक्रमः' इति, 'अलंग्रासरसः' इति चोक्तः—

"तथा अलम्-अत्यर्थं सार्वात्म्येन यः सृष्ट्यादीनां ग्रासः स्वात्मसात्कारस्तत्र रसो गृध्नुता-तत्त्वेनालंग्रासभैरवादावाख्या यस्य·· ॥"

(तं०आ०वि० खं० 2, पृ० 240)

अलंग्रासभैरवश्च कश्चन ग्रन्थविशेष इति वृद्धोपदेशः ।

उपाध्यनुल्लासः——उपाध्याभासानुद्गमेन शुद्धा संविद्रूपता । यथा—

"अनुल्लासादिति प्रागभावरूपात्, प्राक्कोटौ हि निस्तरङ्गजलधिप्रख्यं परं तत्त्वम्, यतः स्वस्वातन्त्र्याद्बाह्योन्मुखतायामुपाधीनामुल्लासः स्यात् ॥"

(तं०आ०वि० खं० 2, पृ० 239)

उत्कृष्टतरे शाम्भवोपाये उपाध्यनुल्लासतः शुद्धस्यैव स्वात्मस्वरूपस्य सन्ततं दर्शनमभ्यस्यते ।

उपायः——स्वस्वरूपसाक्षात्कारसिद्धये य उपादीयते तत्सिद्धौ च सत्यां यस्त्यज्यते स उपायः, शाम्भव-शाक्त-आणवरूपस्त्रिविधस्त्रिके । तदुक्तम्—

'उपादायापि ये हेयास्तानुपायान् प्रचक्षते ।।

(उद्ध०तं०आ०वि० खं० 3, पृ० 46)

"न खलु पादप्रसारिकयैव सुखं शयानैः भुञ्जानैश्च
स्वयम् अविमृशद्भिः……… वा स्थातव्यमिति ।।"

(प०त्री०वि० पृ० 126-27)

उपायोपयोगः आवश्यक इति तात्पर्यम्

~**अभ्यसनीयः**——यदि मोक्षः शिवानुग्रहादेवावाप्यो नात्मनो यत्नतस्तर्हि किमिति शास्त्राध्ययनविचारणोपासनाद्यर्थं यतनीयम् शिवेच्छैवोत्तारणीयमुत्तारयेदिति तावत्पूर्वपक्षशंका । अत्रोत्तरमुक्तमन्यत्र परात्रीशिकाशास्त्रे यथा—

"अविकला भगवदिच्छा न विचारपदवीमधिशेते ? इति चेत्—अलं ग्रन्थधारणवाचनव्याख्यानविचारणादिमिथ्यायासेन, परित्याज्य एवायं गुरुभारः, तूष्णींभावशरणैरेव स्थेयम्, भगवदिच्छैवोत्तारणीयमुत्तारयेत्……वा स्थातव्यमिति ।।"

(प०त्री०वि० पृ० 126-27)

अत्रोत्तरमप्युक्तं द्रष्टव्यं च—

'आगमः~अर्थविमर्शनार्हः' इत्यत्र

~**आणवः**——प्रमेयात्मकं किमपि बुद्धि-प्राण-देह-बाह्यादितत्त्वमादाय तद्विषये कतिपयप्रकारतया परिपूर्णपरमेश्वरताया या भावना तस्याः नियमपूर्वकोऽभ्यासः । स च ध्यानोच्चार-करण-ध्वनि-स्थान-कल्पनादिरूपो बहुप्रकारस्तत्र तत्र द्रष्टव्यः कोषे—

"उच्चार-करण-ध्यान-वर्ण-स्थानप्रकल्पनैः ।
यो भवेत्स समावेशः सम्यगाणव उच्यते ।।

(मा०वि०तं० 2, 21)

~**आणवेन शाक्तः**——आणवोपायाभ्यासो यदा परिपूर्णपरिपक्वतामुपयाति तदासौ स्वत एव शाक्तोपायपदवीमधिरोहति । उक्तमेतत्—

"तस्मिन् रूढः समभ्येति शाक्तमस्माच्च शाम्भवम् ।।"

(तं०व०धा० 3, 39)

~**आणवेन-शाम्भवः** —— कदाचिदाणवोपायाभ्यासस्तथाविधां प्ररूढतां सुपरिपक्वतां चासादयति यथा स्वत एव निर्विकल्पशाम्भवसाक्षात्कारपदवीमधिरोहति । उक्तमेतत्—

"एवं धीप्राणसंघट्टद्वारेणान्तः समाविशन् ।
शाम्भवी परमां धारामाणवेन प्रपद्यते ।।"

(तं०व०धा० 2, 17)

~**उपयोगी**——यद्यप्यनुपाय एव वास्तविकः परतत्त्वसाक्षात्कारस्तथापि कांश्चिन्मन्दानुग्रहभाजः साधकानधिकृत्योपाया अपि समादीयन्त एव येन ते साधकास्तद्बलेनानुपाययोगोचितपात्रतां लभन्ते । तदुक्तम्—

"यथा लिप्यक्षरैर्बालाः सत्ये वर्णात्मनि स्फुटम् ।
प्रवेश्यन्ते तथा मूढास्तैस्तैरौपयिकैः क्रमात् ।।
तदर्थमेव चाद्वैते परतत्त्वेऽपि सादरम् ।
पूजाध्यानादिशास्त्रेऽस्मिन्नुचितं किञ्चिदुच्यते ।।

(मा०वि०वा० 2,-122-23)

~**उपयुक्तः**——यस्य साधकस्य चित्तं येनैवोपायेन तत्त्वे स्थिरं भवेत् तस्य कृते स एवोपायः श्रेष्ठः । यथा—

"किं त्वेतदत्र देवेशि नियमेन विधीयते ।।
तत्त्वे चेतः स्थिरं कार्यं तच्च यस्य यथास्त्विति ।"
"तच्च यस्य यथैव स्यात् स तथैव समाचरेत् ।"

(उद्ध०मालिनीतः, तं०आ०वि० खं० 3, पृ० 113-14)

~**उपादेयः**——यद्यपि ज्ञाता वाऽज्ञाता वा स्वात्मशिवता शिवतैव तथाप्युपायोपयोगेन तस्याः प्रत्यभिज्ञा वाञ्छनीयैव, यया परमेश्वरताया आस्वादस्य चमत्कारो लभ्येत, दुःखरूपत्वं च सर्वथा विलीयेत । यथा—

"तस्माच्छिवेऽप्यविज्ञाते ज्ञाते वा शिव एव ते ।
सर्वं एवात एवैतद्भावनाकरणाच्च्युतम् ।।
विज्ञातं जायते पुंसां यद्यप्येवमवस्थितम् ।
तथापि चित्रकर्मार्थमुपायो वाच्य आदरात् ।।
तज्ज्ञानस्फुटताहेतौ चिन्तारत्नसुवर्णवत् ।
वह्निर्यद्यपि विज्ञातः प्रकाशादि करोत्यसौ ।।
तथापि योजितो युक्त्या प्रकाशमधिकं गृहे ।
दीपेनान्यतमेनापि न तथा वह्निराशिना ।।
तस्मादुपायो वक्तव्यो दृष्टकार्यप्रसिद्धये ।"

(शि०दृ० 7, 8-12)

~**शाक्तः**——प्रमेयसाहाय्यं विना स्वस्वरूपस्य स्वस्वभावस्य च परमेश्वरत्वस्य यत् पुनः पुनर्भावनं तदभ्यासः शाक्तोपायः । यथा—

"उच्चाररहितं वस्तु चेतसैव विचिन्तयन् ।
यं समावेशमाप्नोति शाक्तः सोऽत्राभिधीयते ।।"

(मा०वि०तं० 2, 22)

द्र० 'भावना' इति ।

~**शाम्भवः**——(1) विकल्पात्मकचिन्तनशून्यः, स्वस्वरूपस्यापरोक्षसाक्षात्कारो यस्तस्य पुनः पुनरभ्यासः ।

(2) स्वशक्तिव्रातप्रतिबिम्बात्मकेन तत्त्वव्रातेन खचितस्य स्वात्मसंवित्स्वरूपस्य पुनः पुनरपरोक्षतया दर्शनस्याभ्यासः—

"अकिञ्चिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः ।
जायते यः समावेशः शाम्भवोऽसावुदाहृतः ।।"

(मा०वि०तं० 2, 23)

द्र० 'उन्मेषः' इति ।

उपायाः——मोक्षप्राप्तेः साधनभूता अभ्यासाः।

~**त्रयः**——(1) मोक्षसाधनभूता उपाया इच्छा वा, ज्ञानं वा, क्रिया वेति त्रयः शाम्भव-शाक्त-आणवोपायतया प्रसिद्धास्त्रिकागमेषु। यथा—

(क) "तत्रापि स्वातन्त्र्यवशादनुपायमेव स्वात्मानं प्रकाशयति, सोपायं वा। सोपायत्वेऽपि इच्छा वा, ज्ञानं वा, क्रिया वाभ्युपाय इति त्रैविध्यं शाम्भव-शाक्ताणवभेदेन समावेशस्य।"

(तं०सा० पृ० 7)

अनुपायस्तु परिपूर्णपरिपक्वतां प्राप्तः शाम्भव एवेति न चतुर्थोऽसावुपायः। तस्योपेयात्मकत्वमेव प्रत्यभिज्ञात्मकत्वात्—

(ख) "इच्छाख्यः शाम्भवः प्रोक्तो ज्ञानं शाक्तस्तु भण्यते।
आणवस्तु क्रियारूपः फलभेदविवर्जितः॥"

(पू०प्र० 1-70)

शाम्भवे इच्छांशस्यैव प्राधान्यं, शाक्ते शुद्धविकल्पात्मकस्य ज्ञानस्य, आणवे पुनर्भावनाङ्गभूतस्य क्रियात्मकस्य मानसस्य यत्नस्य मुद्रादिरूपस्य च शरीरादिक्रियांशस्येति तदनुसारमेव संज्ञात्रयम्।

(2) शाम्भवोऽभेदोपायः, शाक्तो भेदाभेदोपायः, आणवो भेदोपायः। यथा—

"अभेदोपायमत्रोक्तं शाम्भवं शाक्तमुच्यते।
भेदाभेदात्मकोपायं भेदोपायं तदाणवम्॥"

(तं०आ० 1, 230)

~**भेदप्रभेदतः**——प्रथमं तावच्छाम्भवशाक्ताणवास्त्रयो भेदा उपायानाम्। तत अपूर्णेन शाम्भवेन पूर्णः शाम्भवः, शाक्तेन शाम्भवः, आणवेन शाम्भव इति त्रिधा शाम्भवः। त्रयाणामप्यवान्तरा बहवो भेदाः। एवं शुद्धः शाक्तः, आणवेन शाक्तः, आणवप्रकारैश्च शाक्त इत्यनेकभेदप्रभेदमयोऽसौ। आणवस्य ध्यानोच्चारकरणध्वनिस्थानकल्पनाख्या मुख्याः पञ्च प्रकाराः। तेषामपि परस्परोपायोपेयतया बहुभेदता आणवस्य स्थानकल्पनस्यापि षडध्वानो भेदाः षट्। तेषामपि ध्यानोच्चाराद्युपायतया बहुभेदता आणवस्य। यथा—

"एवं प्रथमं तावदुपायस्त्रेधा-शाम्भवादिभेदात्। तेषाञ्च द्वारद्वारिभावेन प्रत्येकं षट्, तत्रापि प्रत्येकं पूर्णत्वापूर्णत्वेन द्वैधे द्वादश, तेषाञ्च प्रत्येकं व्यवहिताव्यवहितत्वेन द्वैधे चतुर्विंशतिः। व्यवधानञ्च बहुभिर्विजातीयैरिति भेदानां भूयस्त्वम्।"

(तं०आ०वि० खं० 1, पृ० 183)

~**क्रमाक्रमतः**——स्थानकल्पनादारभ्य शाम्भवं यावत् सप्तस्वप्युपायेषु मन्दगतिः क्रमेणैवारोहणशीलः, परं तीव्रगतिस्तेषां लङ्घनेन सद्य एवोच्चतरं कमप्युपायमादातुं समर्थः। उक्तमत्र विषये—

"लङ्घनेन परो योगी मन्दबुद्धिः क्रमेण तु।"

(तं०आ० 5, 158)

~**तद्भेदप्रयोजनम्**——परमेश्वरकृतेन शक्तिपातेनैव साधकः शिवयोगेऽधिकारं लभते। स च शक्तिपातो तीव्र-मध्य-मन्दादिरूपोऽनेकविधः। तदनुसारं शिवयोगोपायानामप्यनेकविधत्वम्। तेन साधकाः यथाधिकारं विशेषामेव योगप्रक्रियामाश्रयन्ति। अत एवोपायभेदोपदेशः शैवागमेषु। यथा—

"अथाप्यधिकृतिभाजनं क इह वा कथं वेत्यलम्।
विवेचयितुमुच्यते विविधशक्तिपातक्रमः॥"

(तं०आ० 13, 1)

"चित्तभेदान्मनुष्याणां शास्त्रभेदो वरानने।
व्याधिभेदाद्यथा भेदो भेषजानां महौजसाम्॥
यथैकं भेषजं ज्ञात्वा न सर्वत्र भिषज्यति।
तथैकं हेतुमालम्ब्य न सर्वत्र गुरुर्भवेत्॥"

(उद्ध०तं०आ०वि० खं० 3, पृ० 55)

~**मिथो वैचित्र्यतः**——आणवे भेदनिष्ठस्य विकल्पज्ञानस्यात्यन्तं प्राधान्यम्, शाक्ते तस्य स्फुरत्तामात्रं स्वात्मनिष्ठं, शाम्भवे पुनस्तस्य लय एव—शाम्भवस्य निर्विकल्पस्वात्मसाक्षात्काराभ्यासरूपत्वात्। यथा—

"आणवे विकल्पोल्बण्यम्, शाक्ते तस्य स्फुरत्तामात्रम्, शाम्भवे तु निर्विकल्पत्वमित्युत्तरोत्तरपर्वानुशीलनादुक्तरूपमेषां नैश्चित्यमव्याहतम्।"

(म०मं०प० पृ० 161)

अकिञ्चिच्चिन्तनं सर्वेषामपि शाक्तानामाणवानाञ्च योगप्रकाराणां सारमिति तात्पर्यम्। सर्वेषां तत्रैव यतो विश्रान्तिः। आणवे यथार्थस्फुटविकल्पज्ञानोद्भूत्यर्थं धारणादिरूपस्य यत्नस्य प्राधान्यम्। अतः क्रियायोगोऽसौ यत्नस्य क्रियायामन्तर्भावात्। शाक्ते यत्नस्य गौणत्वे सति विकल्पज्ञानस्यैव प्राधान्यम्, अतो ज्ञानयोगोऽसौ। शाम्भवे पुनरिच्छाबलेनैव स्वरूपस्थितेरभ्यासस्यैव प्राधान्यम् अतोऽसाविच्छायोगः।

~**विशेषोपयुक्तताः**——येनैव हि नःमोपायेन साधकः परे तत्त्वे झटिति प्रवेशं लभेत स एवोपायस्तेन ग्राह्य इति सिद्धान्तस्त्रिकशास्त्रस्य। यथा—

"परतत्त्वप्रवेशे तु यमेव निकटं यदा।
उपायं वेत्ति स ग्राह्यस्तदा त्याज्योऽथवा क्वचित्॥
न यन्त्रणात्र कार्येति प्रोक्तं श्रीत्रिकशासने।"

(तं०आ० 4, 273-74)

~**वीर्यतः**——वीर्यं तावत्सारः। तस्य चाणवादिष्वयं क्रमः—स्थानकल्पनायाः सारं ध्वनियोगस्तस्य करणयोगस्तस्योच्चारयोगस्तस्य बुद्धिध्यानयोगस्तस्य शाक्तोपायस्तस्य च शाम्भवोपाय इति। तस्य तस्योपायस्य तत्तद्वीर्यराहित्ये निष्फलत्वम्। यथा—

"अकिञ्चिच्चिन्तनं वीर्यभावनायाञ्च सा पुनः।
ध्याने तदपि चोच्चारे करणे सोऽपि तद्ध्वनौ॥
स स्थानकल्पने बाह्यमिति क्रममुपाश्रयेत्।
लङ्घनेन परो योगी मन्दबुद्धिः क्रमेण तु॥

वीर्यं विना यथा षण्ठस्तस्याप्यस्त्यथवा बलम् ।
मृतदेह इवेयं स्याद्बाह्यान्तः परिकल्पना ॥"
(तं॰आ॰ 5, 156-58)

भावनात्र शाक्तोपायरूपा ।

~साम्येऽपि भिन्नाः——उपायेषु भूयसि पारस्परिके साम्येऽपि निर्विकल्पताप्राधान्ये शाम्भवता, शुद्धस्वात्मविकल्पप्राधान्ये आणवता, तत्रापि बुद्धिवृत्तिप्राधान्ये ध्यानं, प्राणवृत्तिप्राधान्य उच्चारः, देहप्राधान्ये करणता, श्वासगतिप्राधान्ये ध्वनिः, ग्राह्यविषयप्राधान्ये स्थानकल्पनम् । तदुक्तम्—

"एषु च किञ्चिदन्योन्यसाङ्कर्येऽपि तत्तत्प्राधान्यमालोचनीयम् ।"
(म॰मं॰प॰ पृ॰ 139)

"अस्योपायत्रयस्य सूक्ष्मेक्षिकया सङ्करः परस्परमपरिहार्यतया वर्तते । केवलं प्राधान्यमात्रेण पृथग्व्यपदेशः ।"
(म॰मं॰प॰ पृ॰ 140)

~हेयोपादेयतया——त्रिकाचारे नावश्यमेव कश्चनोपायविशेष एवोपादेयो हेयो वा, किन्तु रुचिसामर्थ्याद्यनुसारं येनैवोपायेन तत्त्वे चित्तस्थैर्यं यस्य सम्भवेत् स तस्यैवाभ्यासं कुर्यादित्युपदेशस्तत्र । तदेतन्मालिनीवाक्योपादानेनोपदिष्टं तन्त्रालोके । तद्यथा—

"किन्त्वेतदत्र देवेशि नियमेन विधीयते ।
तत्त्वे चेतः स्थिरीकार्यं सुप्रसन्नेन योगिना ॥
तच्च यस्य यथैव स्यात्स तथैव समाचरेत् ।"
(उद्धृ॰ मालिनीतः, तं॰आ॰ 4, 218-19)

उपायतारतम्यम्——वास्तविकस्य स्वरूपस्य साक्षात्कारस्तु निर्विकल्प एव भवति । परं मन्दशक्तयः साधकाः शुद्धविकल्पज्ञानस्य सतताभ्यासेनाशुद्धस्य जीवोचितस्य विकल्पज्ञानस्य संस्कारांल्लोपयन्तोऽभ्यासपरिपक्वतायां सम्पन्नायां विकल्पान्विहाय सुखमेव निर्विकल्पस्वात्मदर्शनस्थितिं प्रविशन्तीति मन्द-मध्य-तीव्रादिभ्यः साधकेभ्य आणवाद्या विकल्पमयाः, शाम्भवाश्चाविकल्पनात्मका उपाया उपदिष्टा भगवता शिवेन । तत्र सर्वोत्तमत्वं शाम्भवस्य, तदधस्तनत्वं शाक्तस्य, ततोऽप्यधस्तनत्वमाणवस्य । आणवोपायेऽप्यवरोहक्रमेण बुद्धिध्यानम्, उच्चारयोगः, करणयोगो, ध्वनियोगः, स्थानकल्पनायोगश्चेत्येतेषां स्थितिः । यथा—

"केवलं संविदः सोऽयं नैर्मल्येतरविभ्रमः ।
यद्विकल्पानपेक्षत्वसापेक्षत्वे निजात्मनि ॥"
(तं॰आ॰ 1, 183-84)

उपायद्विशती——किमपि लुप्तं शास्त्रम् ।
द्र॰ (म॰मं॰प॰ पृ॰ 141) इति ।

उपायविंशतिः——किमपि शैवयोगपरं शास्त्रम् ।
द्र॰ (म॰मं॰प॰ पृ॰ 142)

उपायोपायः——(1) उपायः-शाम्भवः, (2) तस्योपायः शाक्तः,—इत्युपायस्योपायोऽसौ । यथा—

"अत एव शाक्तोपायस्योपायोपायत्वमुक्तम् ।"
(तं॰आ॰वि॰ खं॰ 1, पृ॰ 239)

एवमेवापरोऽधर उत्तरोत्तरस्योपायरूपतयोपायोपायः । केवलं शाम्भव एवोपेयोपायः परममुपेयं हि स्वात्मप्रत्यभिज्ञा । तस्याः साक्षादुपायः शाम्भवः, अन्ये सर्वे उपायोपाया एव । अनुपायस्तु शाम्भव एव परिपूर्णपरिपक्वतायाम्—इति न शाम्भवानुपाययोः परस्परमुपायोपेयतासम्बन्धः ।

उपासना——(1) मोक्षोपायभूता तत्तद्देवतापूजाध्यानादिक्रिया । क्रमेण मोक्षपर्यवसायिनो ये समुत्कृष्टतरा भोगास्तत्प्रदाप्युपासना भवति शैवे ।

द्र॰ अत्रैव '~द्विविधा' इति ।

~कर्मणो भिन्ना——शिवध्यानं जपादिक्रियाश्च-नैव कर्म, अपि तु क्रियाशक्त्युत्तेजनकर्युपासनैव । जात्यायुर्भोगप्रदं वैदिकादिविधिनियन्त्रितं कृत्यमेव हि कर्म । यथा—

"जपादिका क्रियाशक्तिरेवेत्थं न तु कर्म तत् ।"
(तं॰आ॰ 13, 262)

~ऐक्यदृष्ट्या——बीजयोनिघनात्मकः शिव-शक्ति-संघट्टरूपस्त्रिकात्मकः स्वात्मैव, स्वात्मनैव, स्वस्मिन्नेवोपास्यस्त्रिकाचारनीत्या । यथा—

"अत एव तथाविधबीजकुसुमैकघनभावशिवशक्तिसंघट्टः स्वयं, स्वात्मनैव पूज्य इत्युपदिष्टम्—श्रीत्रिकतन्त्रसारे—
शिव-शक्ति-समापत्त्या शिव-शक्ति-घनात्मकः ।
शिव-शक्ति-समापत्तित्रिकं संपूजयेत्परम् ॥" इति
(प॰त्री॰वि॰ पृ॰ 184)

~द्विविधा——भोगार्थिनः साधका भगवतः किमप्यवच्छिन्नं शुद्धमपरिमितञ्च स्वरूपमुपासते, मोक्षार्थिनः पुनरनवच्छिन्नं शुद्धमपरिमितञ्च संविद्रूपमेव स्वात्मपरमेश्वरमिति द्विविधतया समुपास्यते परमेश्वरः । यथा—

'तस्माद्विश्वेश्वरो बोधभैरवः समुपास्यते ।
अवच्छेदानवच्छिद्भ्यां भोगमोक्षार्थिभिर्जनैः ॥"
(तं॰आ॰ 1, 123)

"साधकानां बुभुक्षूणां विधिर्नियतियन्त्रितः ।
मुमुक्षूणां तत्त्वविदां स एव तु निरर्गलः ॥"
(उद्ध॰तं॰आ॰वि॰ खं॰ 1, पृ॰ 162)

~मूलकारणतः——शिवानुग्रहशक्तिपात एवोपासनाप्रवृत्तौ मूलकारणम् । यथा— .

"………तथाविधोत्तीर्णशिवध्यानजपादिषु ।
प्रवृत्तिरेव प्रथममेषा कस्माद्विविच्यताम् ॥"
(तं॰आ॰ 13, 260-61)

शक्तिपातवशादेव प्रवृत्तिरिति तात्पर्यमत्र प्रकरणतः।

~सङ्करानर्हा——शैवे साधनाक्रमेऽन्यशास्त्रोपदिष्टान् विधीन् नाचरेदिति नियमोऽस्ति। यथा—

(क) "नान्यशास्त्रसमुद्दिष्टं स्रोतस्युक्तं निजे चरेत्॥"

(तं०आ० 4, 251)

(ख) 'नान्यशास्त्रसमुद्दिष्टं न चान्यां देवतां स्मरेत्।
विशुद्धभावनायुक्तः शिवैकगतमानसः॥"

(उद्ध०तं०आ०वि० खं० 3, पृ० 279)

(ग) "क्रियादिभेदभेदेन तन्त्रभेदो यतः स्मृतः।
तस्माद्यत्र यदेवोक्तं तत्कार्यं नान्यतन्त्रतः॥"

(उद्ध० तदेव)

उपोद्घातः——(1) शास्त्रारम्भे निबद्ध्यमानः शास्त्रस्यासौ संक्षिप्तः सारो यः शास्त्रकलेवरेऽग्रे क्रमेण विस्तार्यते। यथा—

'तत्र प्रथममुपोद्घातः समस्तशास्त्रार्थपीठबन्धः।"

(ई०प्र०वि०वि० खं० 2, पृ० 2)

(2) ग्रन्थस्य तथाविधः प्रारम्भिको भागो यत्र सम्पूर्णग्रन्थतात्पर्यं टङ्कितमिव प्रकाशते—

"उप-आत्मनः समीपे टङ्कवद् ईश्वराभिज्ञानलक्षण उत्कर्षो हन्यते विश्राम्यते येन॥" (ई०प्र०वि० खं० 1, पृ० 49)

"उपांशु संक्षेपेण ऊर्ध्वम्-आदौ हन्यते टङ्क्यते चार्थो येनेत्युपोद्घातः।" (ई०प्र०वि०वि० खं० 1, पृ० 111)

उपास्यदेवः——निजशरीरमध्ये हृदयपीठे समुपविष्टः संविद्रूपः करणदेवीवर्गपरिवृतः स्वात्मपरमेश्वर एव परम उपास्यो देवस्त्रिकाचारीयेण क्रियाप्रपञ्चेन। यथा—

"अण्डमये निजपिण्डे पीठे स्फुरन्ति करणदेव्यः।
प्रस्फुरति च परमशिवो ज्ञाननिधिस्तासां मध्य आरक्तः॥"

(म०मं० 34, पृ० 78)

उमा~सिद्धान्ततः——सा परमेश्वरस्येच्छाशक्तिर्ययाऽऽविष्टोऽसौ पञ्चकृत्यानि करोति—

"इच्छा शक्तिरुमा कुमारी"—इति।

(शि०सू० 1, 13)

~मातृकाक्रमे——निष्कलात् परमशिवादभिन्नैव या तस्य परा शक्तिरसावेव मातृकाक्रमे कादिक्षान्तवर्णरूपतयोपास्या देवी। यथा—

"निष्कलभट्टारकाभिन्नस्वरूपैव कादिना क्षान्तेन योनिवर्गग्रामेण विभक्तेन तदधिष्ठात्री 'उमा' योगीश्वरीरूपा पूज्या।"

(स्व०तं०उ०प० 1, पृ० 29)

~पूजाविधौ——परमशिवस्याभिमुखतयोपास्या तस्य परा शक्तिरुमा। यथा—

"सर्वलक्षणसम्पूर्णा सर्वाभरणभूषिता।
योगसिद्धिप्रदा नित्यं मोक्षाभ्युदयदायिका॥
देवस्याभिमुखी नित्यमुमा तु ललितेक्षणा।
शक्तिश्चापररूपेण शक्तिमांश्च हरस्तथा॥
ब्रह्माण्डे सृष्टिसंहारौ करोति च शिवेच्छया।"

(स्व०तं०प० 10, 606-8)

उमापतिनाथः——(1) भगवान् श्रीकण्ठनाथ एव परया मूर्त्योमापतिः। अयमेव 'स्वच्छन्दनाथः'—इति नाम्नोच्यते। उक्तं यथा—

"श्रीकण्ठ एव परया मूर्त्योमापतिरुच्यते।"

(तं०आ० 8, 241)

(2) अयमुमापतिनाथ एवेतिहास-पुराण-लोकप्रसिद्धिषु प्रथितः शिवस्त्रिपुरदाहादीनां चरितानां नायकः। अष्टौ ब्राह्म्याद्या मातरोऽस्यैव शक्तयः। सहस्रशो ब्रह्माद्या अस्यैवादेशतस्तत्तत्सृष्ट्यादि-कार्येषु निरताः सततम्। यथा—

"उमापतेः पुरं पश्चान्मातृभिः परिवारितम्।" (तदेव)
"स्वच्छन्दं ता निषेवन्ते सप्तधेयमुमा यतः॥"

(तदेव—243)

सप्तधा उमा समष्टयात्मकेन रूपेण साकमष्टमातृकारूपेति ज्ञेयम्। वस्तुत परमशिव एव स्वं परमेश्वरत्वं बहिरभिव्यञ्जयितुमिच्छन्नीश्वरभट्टारकभूमिमवतरति। ईश्वरावतारा एवानन्तनाथश्रीकण्ठनाथोमापतिनाथाद्याः। ततः परमशिव एवोमापतिरूपेण लीलाविलासमभिनयति—

(क). "मन्त्रकोट्यो ह्यनेकास्ता मया सर्वाधिकारिकाः॥"

(ने०तं० 19, 28)

(ख) "एवञ्च वदन् भगवानुमापतिः स्वात्मनः परमशिवैकात्म्यं दर्शयति॥"

(ने०तं०उ० खं० 2, पृ० 135)

(ग) "चिदात्मैव च भगवान् भैरवः सदाशिवादिमूर्तिग्रहणपूर्वं स्वाधारप्रपञ्चव्याप्तिप्रधानभूतमुमापतिरूपं स्वसत्तानुप्रवेशाद् भैरवात्मकमेव ···· ॥"

(स्व०तं०उ०प० 1, पृ० 6)

~अधिकारतः——श्रीकण्ठभुवनादुपरि मातृकादेवीभिः परिवारितं स्वच्छन्दापरपर्यायस्योमापतेः पुरम्। यथा—

"उमापतेः पुरं पश्चान्मातृभिः परिवारितम्॥"

(तं०आ० 8, 240)

मातृमण्डलनायको ह्युमापतिर्ब्रह्मविष्णुप्रभृतीनामप्यधिपः। स एव निजा ब्राह्म्याद्याः शक्तीर्यस्मिन् यस्मिन्प्रमातरि पातयेत् स प्रमाता ब्रह्मादिभावानुरूपमधिकारं' लभते। भुवनाध्वभावनाक्रमेऽयं तत्तद्देवाधिदैवतक्रमः कल्पित आगमेष्विति न विस्मर्तव्यम्। अतोऽत्रोमापतिपुरं श्रीकण्ठपुरादुच्चतरं कथं वर्णितमिति न शङ्कित-

व्यम्—अस्य क्रमस्य भुवनाध्वभावनाभ्यासमात्रोपयोगित्वात्—

"ब्राह्मी नाम परस्यैव शक्तिस्तां यत्र पातयेत् ।"
स ब्रह्मा विष्णुरुद्राद्या वैष्णव्यादेरतः क्रमात् ।"
(तं०आ० 6, 177)

द्र० (तं०आ० 6, 179 तथा स्व० तं० 11, 267-68)

~गुरुपरम्परातः—उमापतिनाथेन त्रिकशास्त्रज्ञानं श्रीकण्ठनाथात्प्राप्तम् । तेन चेश्वरावतारादनन्तनाथात्, तेन पुनर्भगवच्छक्तितः । यथा—

(क) "मायानियतिपर्यन्तैस्तस्माद्रुद्रैरवापि तत् ॥
श्रीकण्ठेनेश्वरात्प्राप्तं ज्ञानं . परमदुर्लभम् ।
तेनापि तदधः प्रोक्तं रुद्राणामीश्वरेच्छया ॥
प्रधानाच्छतरुद्रान्तं दीक्षयित्वा विधानत. ।
ममापि च पुरा दीक्षा तथा चैवाभिषेचनम् ॥
श्रीकण्ठेन पुरा दत्तं तन्त्रं सर्वार्थसाधकम् ।
(स्व०तं० 8, 33-36)

अत्र 'ईश्वराद्' इत्यस्य तात्पर्यमीश्वरावताराद् 'अनन्ताद्' इति ।

(ख) "श्रीकण्ठनाथश्चाधिगततत्त्वः श्रीमदनन्तनाथात्, सोऽपि भगवच्छक्तित इत्याद्यागमेषु निरूपितम् ।"
(ई०प्र०वि०वि० खं० 3, पृ० 402)

द्र० 'अनन्तनाथः' इति च ।

उमाभट्टारिका——पारमेश्वरे विलासे परमेश्वरस्य पराशक्तिरेव दिव्यदेहधारिणी सत्युमाभट्टारिका । यथा—

"चिदात्मैव च भगवान्भैरवः सदाशिवादिमूर्तिग्रहणपूर्वं स्वाधारप्रपञ्चव्याप्तिप्रधानभूतमुमापतिरूपं स्वसत्तानुप्रवेशात् भैरवात्मकमेव मुदितमास्थाय ··तथाभूतामेव चोमाभट्टारिकामूर्ति गुरुशिष्यभूमिकाग्रहणेन ।"
(स्व०तं०उ०प० 1, पृ० 6)

उल्लेखः——बुद्धौ कल्पितो विषयस्याकारः । विषयाकारतया परिणतं बुद्धे रूपम् । यथा—

"उल्लेखश्च" स्वाकारः ।
(ई०प्र०वि० खं० 1 पृ० 102-3)

ऊ

ऊ——(1) मातृकाक्रमे ऊनताख्यस्य भावस्य द्योतको वर्णः । उन्मेषे हि स्रष्टृ-स्रष्टव्य-भावद्वयविमर्शेन स्रष्टरि या काप्यूनतेव भाति तदावेशभाक् स्वात्मशिवः 'ऊ' इत्यनेन मातृकावर्णेन साक्षात्कार्यते शाम्भवोपायाभ्यासे । ऊनताख्ययाऽत्र कापि शिवस्य शक्तिरेव.न तु विषयाभावकृता कुण्ठेति । प्रक्षुब्धोऽत्र ज्ञेयांशः—

"ज्ञेयांशः प्रोन्मिषन् क्षोभं यदैति बलवत्तया ॥
ऊनताभासनं संविन्मात्रत्वे जायते ततः ।"
(तं०आ० 3, 75-76)

(2) सुस्फुटतया प्रसृता ज्ञानशक्तिर् 'ऊ' इति मातृकावर्णेन द्योत्यते । यथा क्षीरस्य प्रसरभूमिर्धेनोरूधस्तथैव एषणीयभावजाताभासप्रसरभूमिरियं प्रसृता ज्ञानशक्तिर् 'ऊ' इति स्वरूपा । अन्तरेव भासमानेन स्रष्टृ-स्रष्टव्योर्भेदांशेन स्वात्मन्यूनीभूततेवेयं स्थितिः परमशिवात्मिकायाः शुद्धसंविदः । तत एवोनताभिधाना । तदुक्तम्—

(क) "उन्मिषत्तैवोन्मिमिषत्तामप्यन्तः-प्राणसर्वस्वरूपोन्मेषोत्तरैकरूपैरप्यन्तःकरणवेद्यदेशीयास्फुटप्राय - भेदांशभासमानभावराशिभिः सङ्कोचवशेन ऊनीभूतानुत्तरसंवित्सर्वभावगर्भीकारेणानङ्गधेनवीरूपपरदेवताया ऊधोरूपा ऊढसकलभावराशिः सुस्फुटा. प्रसृता ज्ञानशक्तिर् 'ऊ' इति ।"
(प०त्री०वि० पृ० 168-9)

ऊकारः——
द्र० 'विद्याराजः' इति ।

ऊनता——- उद्रिक्तस्य ज्ञेयांशस्य प्रक्षुब्धतायां संविन्मात्रताभासनं यच्चितः सा तस्या ऊनता । तदुक्तम्—

"ज्ञेयांशः प्रोन्मिषन् क्षोभं यदैति बलवत्वतः ।
ऊनताभासनं संविन्मात्रत्वे जायते ततः ॥"
(तं०आ० 3, 75-76)

"ज्ञेयस्याधिक्याज्ज्ञानस्य ज्ञानमात्ररूपतायामूनत्वस्य-अपूर्णत्वस्य आभासनं जायते-सङ्कोचाधिगमो भवेत्—इति षष्ठवर्णोदयः ॥"
(तं०आ०वि० खं० 2, पृ० 87)

ऊर्ध्वकुण्डली——मूर्धस्थितमौन्मनसं पदम् । यथा—

"तत्रोर्ध्वकुण्डलीभूमौ ···॥"
(तं०आ० 5, 57)

"यतस्तत्रौन्मनसे पदे ···· ॥"
(तं०आ०वि०खं० 3, पृ० 361)

~शक्तिः——ब्रह्मबिलस्योपरि स्थिता पराशक्तिः । यथा—

"·············· तां भित्त्वा चोर्ध्वकुण्डली ॥
शक्तिः सुप्ताहिसदृशी सा विश्वाधार उच्यते ।
(तं०आ० 8, 395-96)

शक्तितत्त्वभावनेयम् ॥

ऊर्ध्वता——दर्शनदृष्ट्या गुणोत्कृष्टतैवोर्ध्वता न पुनरूर्ध्वदिक्स्थितिः । यथा—

"यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्वं उच्यते ।"
(मा०वि०तं० 2, 60)

तेन तत्त्वानामुपायानां शास्त्राणां चोर्ध्वोर्ध्वता माहात्म्योत्कर्षदृष्ट्यैव ज्ञेया ।

ऊर्ध्वदृष्टिः——ऊर्ध्वशास्त्रदृष्टिः—

"ऊर्ध्वंदृष्टौ प्रपन्नः सन्ननाश्वस्तस्ततः परम् ।
अधःशास्त्रं प्रपद्यापि न श्रेयःपात्रतामियात् ॥"

(तं०आ० 23, 70)

ऊर्ध्वंद्वादशान्तः——(1) शिखाया द्वादशांगुलोपरि स्थितं व्योमस्थं द्वादशान्तम् । तदुक्तमेतद्विषये—

'शिखान्तस्थानमुन्मनामुल्लङ्घ्य द्वादशान्तं यावत् षोडश भूमिका अप्युल्लङ्घ्य सप्तदशे निरञ्जने द्वादशान्तस्थे परमशिवे व्योमाकारे स्वमात्मानं भावयेत् ॥"

(वि०भै०उ० पृ० 37)

(2) संशयित एवासौ विषयो विज्ञानभैरवस्यैकत्रिंशत्तमायाः कारिकाया व्याख्याने टीकाद्वयेऽपि संकेतितः । ग्रन्थान्तरेषु नास्योल्लेखो यतः । तद्यथा—

"तया पूर्याशु मूर्धान्तं भंक्त्वा भ्रूक्षेपसेतुना ।
निर्विकल्पं मनः कृत्वा सर्वोर्ध्वे सर्वंगोद्गमः ॥

(वि०भै० 31)

"सर्वोर्ध्वे-द्वादशान्तादप्यूर्ध्वं परमाकाशे सर्वव्यापकत्वं स्यात् ॥"

(वि०भै०उ० पृ० 27)

"सर्वोर्ध्वे-द्वादशान्तादपि चोर्ध्वे परमाकाशे इत्यादि ।"

(वि०कौ० पृ० 13)

ऊर्ध्वंनिःश्वासिका——
द्र० 'मातरः' इति ।

ऊर्ध्वपदम्——शक्तिद्वादशान्तं शिवद्वादशान्तं चापि—
"ऊर्ध्वंपदे—इति शक्ति-शिव-द्वादशान्तरूपे ।।"

(तं०आ०वि० खं० 3, पृ० 460-61)

उर्ध्वबाहुः——झकारः—(शारदालिप्यां 'ञ' एवंरूपः)—
"ऊर्ध्वबाहुर्झकारः ॥"

(तं०आ०वि० खं० 12, पृ० 212)

उर्ध्वम्——स्वस्य सर्वतः प्रकाशात्मतया सर्वं स्वात्मनि धारणे क्षमं तत्त्वम् । यथा—

"तत्र यद्यत् प्रकाशेन सदा स्वीकरणे क्षमम् ।
तदेवोर्ध्वम्··························॥"

(तं०आ० 15, 197)

ऊर्ध्वंरेतसः~कौले——ते कौलसाधनाभ्यासिनः शिष्या ये सम्प्रदायप्रवर्तने निरधिकाराः—

"ऊर्ध्वंरेतस एते षडधिकारपदोज्झिताः ॥"

(तं०आ० 29, 41)

वीर्यक्षोभं विना कौलिक्या दीक्षाया यतोऽपूर्णत्वं ततो नोर्ध्वरेतसां तथाविधासु क्रियास्वधिकारः ॥

उर्ध्वशास्त्राधिकारी——स चोर्ध्वसाधनोपासक एव नाधरसाधनोपासकः । यथा—

"एवमेवोर्ध्ववर्तिष्णोरागमात् सिद्धिवाञ्छकः ।
मायीयशास्त्रनिरतो विनाशं प्रतिपद्यते ।।"

(तं०आ० 13, 353-54)

ऊर्ध्वशास्त्रमत्र शुद्धविद्यादिक्षेत्रीयं, मायीयं च शास्त्रमधःशास्त्रम् । तच्च मायागर्भे येऽधिकारिणो विष्णुब्रह्माद्यास्तैरुक्तं शास्त्रम् ।

ऊर्ध्वशून्यम्——कौण्डिल्यादिशक्तिमूर्नादान्तोपरि स्थिता । यथा—

"ऊर्ध्वशून्यमत्र नादान्तान्तनिःशेषपाशप्रशमभूः शक्तिपदम् ॥"

(स्व०तं०उ०प० 4, पृ० 185)

ऊर्ध्वस्रोतश्शास्त्रम्——स्वच्छन्दनाथस्येशानाख्यादूर्ध्वाद्वक्त्रान्निर्गतं शास्त्रं यद् दशाष्टादशाद्यागमेषु निबद्धम् ।

द्र० 'ऊर्ध्वोर्ध्वस्रोतः' इति ।

ऊर्ध्वा-दिक्——वस्तुतः प्रकाशरूपतौन्मुख्यरूपा स्थितिरूर्ध्वा दिक्—

"तत्र यद्यत् प्रकाशेन सदा स्वीकरणे क्षमम् ।
तदेवोर्ध्वं·····························॥"

(तं०आ० 15, 197)

ऊर्ध्वाऽधोगतिः~कुण्डलिन्याः——उक्ता स्पष्टं यथा—

'अधोऽवस्था यदा ऊर्ध्वं संक्रमन्ति वरानने ।
सैव मोक्षप्रदावस्था सैव ज्ञानस्य भाजनम् ॥
ऊर्ध्वंचक्रगतावस्था यदाधः सम्भवन्ति च ।
तदा पैशाच आवेशः स वै विघ्नस्य कारणम् ॥"

(उद्ध०तं०आ०वि० खं० 11/2, पृ० 149)

ऊर्ध्वोर्ध्वत्वम्~भुवनानाम्——न चैतत् सर्वत्र दिक्कृतमेव, अपि तु गुणोत्कर्षकृतमिति वेदितव्यम्—

"यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्वं उच्यते ।"

(मा०वि०तं० 2, 60)

ऊर्ध्वोर्ध्वस्रोतः~शास्त्रम्——ईशानामकाद् वक्त्रादप्यूर्ध्वे स्थिताभिः शिव-शक्तिभिरुपदिष्टं पराद्वयज्ञानम् । तच्च सौर-भर्गशिखादि-षडागमरूपम् । यथा—

"प्रकृतं ब्रूमहे देवीविसृष्टाश्चित्रसंविदः
यावत्तावत्तदूर्ध्वोर्ध्वं स्रोतो यद्भेदवर्जितम् ॥
सौर-भर्गशिखादीनि ततः शास्त्राणि तेनिरे ।
उक्तं भर्गशिखायाञ्च देवेन परमेष्ठिना ॥

ऊर्ध्वस्रोतोद्भवं ज्ञानमिदं तत्परमं प्रिये।
परमध्वनिनोर्ध्वोर्ध्वं संविद्रूपाभिधायिना ॥
ईशानवक्त्रनिर्यातात् सिद्धान्ताद्भेदमादिशत्।”

(मा०वि०वा० 1, 160-6:)

“परमं प्रिये”—इत्येवात्र “परमध्वनिः”। अनेन परमपदेन शास्त्रस्यास्योर्ध्वोर्ध्वत्वं व्यज्यत इति।

ऊर्मिः——(1) पारमेश्वरी पराशक्तिः। सर्वं जगन्महासमुद्रकल्पे परमेश्वरेऽवभासमानमूर्मिव्रातकल्पम्। तथाविधलहरीशतोद्भूतिबीजं च शिवस्य पराशक्तिरेव। तत एवासावागमेषूर्मिपदेनाप्युच्यते। आगमिकीयं संज्ञा तस्याः।

द्र० ‘काली’ इति।

(2) यथा खलु समुद्रस्योर्मिस्तत्रानन्तप्रकारकं वीची-तरङ्ग-लहरी-बुद्बुदादि-वैचित्र्यमवभासयति तथैव परिपूर्णस्य परमेश्वरस्य या परिपूर्णतामयी पराशक्तिरसावेव चिदानन्दसमुद्रकल्पे तस्मिन्, सृष्टि-संहारादि लीलावैचित्र्यमवभासयति। ततोऽसौ पराशक्तिरागमेषूर्मिरिति परिभाष्यते। यथा—

“परमेश्वरः पूर्णसंवित्स्वभावः, पूर्णतैवास्य शक्तिः, कुलं, सामर्थ्यम्, ऊर्मिः, हृदयं, सारं, स्पन्दो, विभूतिस्, त्रीशिका, काली, कर्षिणी, चण्डी, वाणी, भोगो, दृङ्, नित्या—इत्यादिभिरागमभाषाभिस्तत्तदन्वर्थप्रवृत्ताभिरभिधीयते, तेन तेन रूपेण ध्यायिनां हृद्यास्तामिति ॥”

(तं०सा० पृ० 27-28)

(3) चितोऽसावानन्दोर्मिर्या समुच्छलत्तात्मिका सती ‘स्पन्द’ इति परिभाषितागमेषु। यथा—

“किञ्चिच्चलनमेतावदनन्यस्फुरणं हि यत्।
ऊर्मिरेषा विबोधाब्धेर्नं संविदनया विना ॥”

(तं०आ० 4, 184)

(4) सृष्ट्यादिकृत्यफला परमेश्वरस्यानन्दकल्लोलात्मिका विशेषता।

द्र० ‘स्पन्दः’ इति।

ऊर्मिकौलम्——किमपि कौलिकमागमशास्त्रम्। तदुक्तमेतद्विषये—

(क) “श्रीमदूर्मिमहाशास्त्रे सिद्धसन्तानरूपके।
इदमुक्तं तथा च श्रीसोमानन्दादिदैशिकैः ॥”

(तं०आ० 2, 48)

“ऊर्मिमहाशास्त्र इति श्रीमदूर्मिकौलसिद्धसन्तानरूपके···॥”

(तं०आ०वि० खं० 1/2, पृ० 39)

तद्वाक्यानि समुद्धृतानि जयरथेन—

द्र० (तं०आ०वि०आ० 2, पृ० 39-40)

~तद्वाक्यानि समुद्धृतानि—

यथा—उपरि श्रीमदूर्मिमहाशास्त्रे० इत्यादि

तथाच—

·········· तत्र हि--

शून्यं न किञ्चित्तच्छून्यं त्वशून्यं शून्यता न हि।
यदकिञ्चित्कथं तद्धि न किञ्चिच्छेत्तुमर्हति ॥

(उद्ध०तं०आ०वि०आ० 2, पृ० 39)

इति भगवत्या पृष्टो भगवान्—

आत्मा शून्यमिह ज्ञेयः शिवधर्मैर्विनाकृतः।
शिवः शून्योऽधिगन्तव्यो विमलोऽमूर्तविग्रहः ॥

(उद्ध० तदेव)

इत्याद्युपक्रम्य—

“नास्त्यस्ति नास्ति नास्तीति कोटयो न स्पृशन्ति हि।
वाचामगोचरं यस्मात्तत्त्वमिह कथ्यते ॥
यदभावि न तद्भावि यद्भावि न तदन्यथा।
एवं विचिन्त्य मतिमान् विकल्पं न समाश्रयेत्।
तच्च सर्वगतं सूक्ष्ममुपाधिपरिवर्जितम् ॥

(उद्ध० तदेव पृ० 40)

इत्यादिपर्यन्तं बहूक्तवान्”

(तं०आ०वि०आ० 2, पृ० 39-40)

(ख) “सर्वत्र बहुमानेन याऽप्युत्क्रान्तिर्विमुक्तये ॥
प्रोक्ता सा सारशास्त्रेषु भोगोपायतयोदिता।”

(तं०आ० 14, 32-33)

“सारशास्त्रेष्विति प्रधानेषूर्मिकौलादिष्वित्यर्थः।”

(तं०आ०वि० खं० 8, पृ० 239)

(ग) “उत्क्रान्तिर्विद्यते तत्र यत्र स्यान्मानकल्पना।
+ + + + +
तस्मादुत्क्रान्तियोगोऽयं भ्रान्तिरेषा तमोमयी ॥”

(तदेव खं० 8, पृ० 232-33)

ऊर्मिमहाकुलम्——ऊर्मिकौलाख्यमागमशास्त्रम्। तदुक्तम्—

“उक्तञ्च सिद्धसन्तानश्रीमदूर्मिमहाकुले।”

(तं०आ० 14, 31)

“ऊर्मिकौले इति।”

(तं०आ०वि० खं० 8, पृ० 230)

ऊर्मिशासनम्——ऊर्मिकौलाख्यमागमशास्त्रम्। यथा—

“आचाराच्छक्तिमप्येवं नान्यथेत्यूर्मिशासने।”

(तं०आ० 23, 43)

ऊर्मिशास्त्रम्——श्रीमदूर्मिकुलमूर्मिकौलं वा नाम कौला-

गमविशेषो यन्मतं समुद्धृतं तन्त्रालोके समयिनः समयजातप्रतिपादने ।

द्र० 1. तं० आ० 15, 563-570 ।
2. तं० आ० 15, 573-574 ।
3. तं० आ० 15, 588-590 ।
4. तं० आ० 28-53 ।

ऊष्माणः——(1) अभेदोन्मेषभाजां तत्त्वानामभिव्यंजका वर्णा ऊष्माण इत्युच्यन्ते मातृकाक्रमे । यथा—

"तदुपरि भेदविगलनेन अभेदापत्त्या उन्मिषितत्वाद्—ऊष्माभिधानांश्चतुरो वर्णानाभासितवती ।"

(शि०सू०वि० पृ० 31)

(2) ते च 'श' =शुद्धविद्या, 'ष'=ईश्वरः, 'स'=सदाशिवः, 'ह' = शक्तिः । एष्वेव तत्त्वेष्वभेदभावस्योन्मेषो भवति ।

~तदूष्मत्वम्——(1) स्वरवर्णसाहाय्यं विनापि शकारादीनां ध्वनेरुच्चारयितुं शक्यत्वेनैते वर्णाः स्वकीयेनोष्मणा युक्ताः सन्त एवोष्माणः । एतद्वर्णचतुष्टयेनाभिव्यज्यमानं शुद्धविद्यादि-तत्त्वचतुष्कमपि संविद्विमर्शात्मकेन स्वातन्त्र्यरूपेण निजेनोष्मणा युक्तमित्युभयथापि शकारादेर्वर्णचतुष्टयस्योष्मता सत्या, न तु यादृच्छिकी । न चान्तःस्थादिवत् शक्त्यन्तरसाहाय्येनैषां सृष्टिर्, अपि तु केवलमेकैकस्मादेव स्वरवर्णात्, तस्य तस्य च वर्णस्य स्वकीयेनैवोष्मणा तस्य तस्योष्मवर्णस्य सृष्टिरिति । यथा—

"एतद्वर्णचतुष्कस्य स्वोष्मणाभासनावशात् ।
ऊष्मेति कथितं नाम भैरवेणामलात्मना ।।"

(तं०आ० 3, 179)

"न हीच्छाया अनुत्तरस्य वा परामर्शान्तरवदन्यापेक्षया एतदाभासमानम्, अपि तु स्वमाहात्म्यादेवेति भावः ।।"

(तं०आ०वि० खं० 2, पृ० 176)

(2) ऊष्मवर्णेषु इष्यमाणस्येष्यमाणतास्वरूपस्य च स्वोष्मणोऽपरित्यागात्तेषां संज्ञा 'ऊष्माण' इति । चतुर्ष्वप्यन्तस्तत्तद्बीजरूपतायाः स्फुरणमस्त्येव । तत्स्फुरणमेवेषामूष्मेति गण्यते । तत एवैत ऊष्माणः—

"तदेव स्वोष्मणा स्वात्मस्वातन्त्र्यप्रेरणात्मना ।।
बहिर्भाव्यस्फुटं क्षिप्तं श-ष-स त्रितयं स्थितम् ।"

(तं०आ० 3, 164-65)

तदेवं त्रिविधमपीष्यमाणं स्वातन्त्र्यलक्षणेन स्वोष्मणा बहीरूपतया समुल्लासितं सदूष्मसंज्ञं श-ष-स-त्रितयात्मना प्रस्फुरेत् ।"

(तं०आ०वि० खं 2, पृ० 163)

~तत्सृष्टिः——इच्छाया एव त्रिविधायाः क्रमेण शकारस्य, षकारस्य, सकारस्य च सृष्टिः, विसर्गाच्च हकारस्य । यथा—

"इच्छाया एव त्रिविधायाः श-ष-साः, विसर्गात् हकारः ।"

(तं०सा० पृ० 16)

ऋ—ॠ

ऋवर्णः~मातृकायाम्——इच्छैव क्षिप्रेणाचिरद्युतिवत्तरलेनेषणीयेनोपरक्ता । अत्रेष्टव्यस्योन्मीलत्ता । यथा—

"इच्छाशक्तिर्द्विरूपोक्ता क्षुभिताऽक्षुभिता च या ।
इष्यमाणं हि सा वस्तु द्वैरूप्येणात्मनि श्रयेत् ।।
अचिरद्युतिभासिन्या शक्त्या ज्वलनरूपया ।
इष्यमाणसमापत्तिः स्थैर्येणाथ धरात्मना ।।"

(तं०आ० 3, 78-79)

ऋवर्णस्तथाविधामिच्छाशक्तिमभिव्यनक्ति मातृकात्मकशाम्भवयोगाभ्यासतः ।।

ऋ-ॠ~मातृकाक्रमे——इच्छा, ईशना च अनुत्तरानन्दपदद्वयं प्रति प्रतीपतया प्रसरन्त्यौ शून्यात्मकं स्वात्मानमवगाहमाने कदाचिद्भास्वरं कम्प्रं च तेजोरूपं स्वमवगाहेते । तस्यामवस्थायां त एव 'ऋ-ॠ'-इतिरूपेण भासेते । तदीदृशं शिवतायाः संरम्भविशेषमेतद्वर्णद्वयं द्योतयति । तत 'इ-ई' एव भास्वररूपरकारश्रुत्यनुगमेन 'ऋ-ॠ' इति रूपेणावतिष्ठेते—

"संरम्भेच्छैवेशनान्ता स्वात्मन्यनुत्तरानन्दपदे च प्रसरणक्षमा । ततः सैव शून्यात्मकं स्वं वपुरवगाहमाना भास्वरं रूपं तेजोमयमिव प्रथमं गाहते । 'ऋ-ॠ' इत्यत्र हि 'इ-ई' इत्यनुगमो भास्वररूपरेफश्रुत्यनुगमश्च कथमह्नूयताम् ।।"

(प०त्री०वि०, पृ० 173)

ऋ, ॠ, ऌ, ॡ——अमृतवर्णचतुष्टयम् । यथा—

"आत्मन्येव च विश्रान्त्या तत् प्रोक्तममृतात्मकम् ।।"

(तं०आ० 3, 92)

"इच्छाशक्तेरतः प्राहुश्चातूरूप्यं परामृतम् ।।"

(तदेव 3, 81)

षण्ठवर्णा इमे-यतो न वर्णान्तरसृष्टिरेभ्यः—

"क्षोभान्तरस्याऽसद्भावान्नेदं बीजं च कस्यचित् ।।"

(तदेव)

अबीजत्वमेवैतेषां षण्ठत्वम् ।

ऋजुविमर्शिनी——नित्याषोडशिकार्णवस्य शिवानन्दकृता टीका ।

द्र० (म०मं०प० पृ० 108, 119)

ॠ——ईशनैव क्षिप्र-चल-स्वभावेनैषणीयेनोपरक्ता । अत्रैषणीयस्योन्मीलत्ता ।

द्र० 'इच्छाशक्तिः~त्रिविधा' इति ।
द्र० 'ऋ, ॠ, ऌ, ॡ' इति ।

लृ——इच्छैवेषणीयेन स्थिरेणोपरक्ता । अत्रेष्टव्यस्योन्मीलत्ता ।

द्र० 'ॠ' इति, 'ऋ, ॠ, लृ, लॄ' इति च ।

लृ, लॄ——(1) इच्छा, ईशना च स्वमनुत्तरानन्दपदं प्रति प्रसरन्त्यौ शून्यात्मकमेव निश्चलं स्वं स्वरूपमवगाहमाने सत्यौ निश्चलतात्मकलकारश्रुत्यनुगमे 'लृ-लॄ' इति रूपेणावतिष्ठेते मातृकाक्रमे । यथा—

(क) "ततो निश्चलरूपानुप्रवेशात् पार्थिवरूपसतत्त्वनिश्चलात्मक-लकार-श्रुत्यनुगमे 'लृ-लॄ' इति ।"

(प०त्री०वि० पृ० 173)

(ख) "अनुत्तरसंवित् ······स्वरूपविस्मरणेन निश्चलशून्यताप्त्या 'लृ-लॄ' इति ।"

(प०त्री०विवृ० पृ० 5)

लॄ——ईशनैव स्थिरेणैषणीयेनोपरक्ता । अत्रैषणीयस्योन्मीलितता ।

द्र० 'इच्छाशक्तिः~त्रिविधा' इति ।
द्र० 'ऋ, ॠ, लृ, लॄ' इति च ।

ए—ऐ

ए——मातृकाक्रमे प्रथमं सन्ध्यक्षरम् । संधिरत्रानुत्तरानन्दशक्त्योरिच्छेशनाशक्तिभ्यां सह । यथा—

"अनुत्तरानन्दयोरिच्छेशनयोश्च मिथः संयोगे 'ए' इति ।"

(प०त्री०विवृ० पृ० 5)

अनेन वर्णेन तथाविधः शक्तिसंयोगजो विशेषः शिवताया अभिव्यज्यते मातृकाक्रमेण विधीयमाने शाम्भवे योगे यत्र साधकेन स्वात्मशिवस्वरूपं निजयोरनुत्तरानन्दशक्त्योर्निजाभ्यामेवेच्छेशनाभ्यां साकं यः सङ्घट्टस्तदुपरञ्जितं साक्षात्क्रियते ।

ए, ऐ——यथा—

"इच्छेशनयोरनुत्तरानन्दाभ्यां सन्धीयमानत्वात् 'ए, ऐ' ।

(प०त्री०विवृ० पृ० 5)

स्वात्मपरमेश्वरतायास्तथाविधस्य विशेषस्य तेन प्रकारेणाभिव्यञ्जकमिदं वर्णद्वयं येन प्रकारेण सुकोमला वर्णा माधुर्यगुणाभिव्यञ्जका भवन्ति काव्ये । शाम्भवोपाये मातृकोपासनाक्रमेऽनयोर्वर्णयोस्तथा स्थितिः ।

ए, ओ——अनुत्तरानन्दयोरिच्छेशनाभ्यां सह संघट्टे सति 'एकारस्य' स्थितिः, तयोरेव चोन्मेषोनताभ्यां संघट्टे सति 'ओकारस्य' । यथा—

(क) "योऽनुत्तरः परः स्पन्दो यश्चानन्दः समुच्छलन् ॥
ताविच्छोन्मेषसङ्घट्टाद्गच्छतोऽतिविचित्रताम् ।"

(तं०आ० 3, 93-94)

(ख) 'एकारोकारलक्षणां' वैचित्री गच्छतः ।"

(तं०आ०वि० खं० 2, पृ० 103)

एकारः शिवस्य तां विशेषतामभिव्यनक्ति या तस्य अनुत्तरताया आनन्दस्य च इच्छेशनाभ्यां सह सङ्घट्टे सत्यभिव्यक्ता भवति । सा च विशेषता तेन (एकारेण) मातृकाभ्यासे व्यज्यते । ततस्तथैव स्वात्मशिवभावः साक्षात्क्रियते साधकैः । यथा—

(ग) "तदेवमिच्छेशनं चानन्दवपुषि अनुत्तरपरधाम्नि च प्राग्भाविनि स्वरूपादप्रच्याविनि अनुप्रविश्य—अ आ+इ ई इति च, न तु विपर्यये ···· 'ए' इति बीजं स्थितम् । ·····एवमुन्मेषेऽपि वाच्यम् । अ आ+उ ऊ इति 'ओ' ।

(प०त्री०वि०पृ० 174-75)

एकतत्त्वविधिः——उत्कृष्टतरैः साधकैरेकस्यैव शिवतत्त्वस्य साक्षात्कारोऽभ्यस्यते पुनः पुनरिति तेषां कृत एकतत्त्वविधिस्तत्त्वाध्वयोगे । तदुक्तम्—यथा—

"··········एकतत्त्वे शिवः परम् ॥"

(तं०आ० 11, 35)

~तदधिकारी——तीव्रतरपारमेश्वरानुग्रहपवित्रीकृतः सुप्रबुद्ध एव साधक एकतत्त्वाध्वधारणाधिकारी—

एकतत्त्वविधिश्चैष सुप्रबुद्धं गुरुं प्रति ।
शिष्यञ्च गतभोगांशमुदितः शंभुना यतः ॥"

(तं०आ० 11, 40-41)

एकत्वम् - पारमार्थिकम्——वस्तुतो हि सर्वं शिवात्मकमित्येकत्वमेव परमार्थः । एकस्य भाव एकत्वम् । भावश्च सत्ता, शिवस्यैव सत्ता विश्वत्रेति तात्पर्यमेकत्वस्य ।

~अनेकत्वावभासे——अनेकरूपतयावभासमानं सच्छिवेऽन्तर्भूतं चैकमेव शिवतत्त्वमयम् । मायाशक्त्या भासमाने भेदे तदेवेन्द्रियगोचरतावशायामनेकमित्याभासते । असौ मायादिर्भाविन्नातो वस्तुतः शिवात्मक एव न ततो भिन्नः । उक्तञ्च—

(क) "तत्रैकमान्तरं तत्त्वं तदेवेन्द्रियवेद्यताम् ।
सम्प्राप्यानेकतां याति देशकालस्वभावतः ॥"

(ई०प्र० 2-2-2)

(ख) "उक्तनीत्या विश्वमेवान्तरं सदेकम्, तदेव—'सान्तर्विपरिवर्तिन उभयेन्द्रियवेद्यत्वम्'—इति वक्ष्यमाणकार्यकारणभावतत्त्वदृष्ट्या इन्द्रियवेद्यतायामनेकम्-देशाद्याभासमिश्रणादिति । एकत्वम् आभासान्तरामिश्रतायाम्, अन्तःकरणैकवेद्यत्वे, चिन्मात्रतायामनेकत्वं पुनराभासान्तरमिश्रतायाम्, उभयकरणवेद्यत्वे, चिदतिरिक्तताभासने च ।"

(ई०प्र०वि० खं० 2, पृ० 34-35)

(ग) "यद्यप्येकमेव शिवतत्त्वं तथापि तदीयमेव स्वातन्त्र्यं स्वात्मनि स्वरूपभेदं तावत् प्रतिबिम्बकल्पतया दर्शयति ।"

(ई०प्र०वि० खं० 2, पृ० 191)

(घ) "तस्मान्निर्मलतामाहात्म्यमेतद् यदनन्तावभाससम्भेदश्चैकता च। ··इति चिद्रूपस्यैव कर्तृत्वमुपपन्नम्, अभिन्नस्य भेदावेशसहिष्णुत्वेन क्रियाशक्त्यावेशसम्भवात् ।"

(ई०प्र०वि० खं० 2, पृ० 178)

~(विरोधपरिहारतः)— –

"पूर्वपक्षे इयदेव जीवितम्—एकमनेकत्वस्वभावं कथं स्यादिति ? तत्र चोक्तं चित्स्वभावस्य दर्पणस्येवैकतानापबाधनेनाभासभेदसंभवे क इव विरोध इति ।।"

(ई०प्र०वि० खं० 2, पृ० 4-5)

तदयमभिप्रायः—परमेश्वरस्याद्वैतत्वं तु परमार्थतः सत्यम्। द्वैतप्रपञ्चावभासमसौ परमेश्वर एव स्वलीलारूपत्वेन प्रतिबिम्बन्यायेन स्वात्मनि स्वयमेव प्रकटयति। इति न कोऽपि विरोधः। प्रपञ्चावभासनलीलैव तस्य परमेश्वरत्वप्रतिष्ठापिका। अन्यथा शून्य-गगनतुल्यताऽस्यापद्यते ।

~बाह्यव्यवहारे——यथा नदीस्रोतांसि सागरे एकत्वं प्राप्तानि तांस्तांस्तरङ्गादिरूपानर्थक्रियाविशेषान् सम्पादयन्ति, यथा वा पृथग्दीपज्योतींषि लघून्यपि यदा सम्मिलितानि भवन्ति तदा कानपि विशिष्टान् सूक्ष्मतरवस्तुजातप्रकाशनरूपानर्थक्रियाविशेषान् मिलित्वा सम्पादयितुमलं भवन्ति, तथैव घटः-काञ्चनो, लोहितः, उज्ज्वलः, पृथुः पवित्र इत्यादय आभासा मिलिताः सन्तो विशिष्टरूपां श्रीभूतेश्वरादि-शिवलिङ्ग-समावर्जनोचित-ब्रह्मसरो-जलोद्वहन-धारण-समर्पणादि-सम्भाव्यां तुष्टिविशेषरूपां विशिष्टामर्थक्रियां कुर्वन्ति । यथा—

"घटः काञ्चनो, लोहितः, ततोऽयं शिवलिङ्गशिरः-समावर्जनोचित-सलिलाहरणार्थक्रियोचितो दृष्टमात्र एव तीव्रप्रीतिलक्षणार्थक्रियाकारी ।"

(ई०प्र०वि० खं० 2, पृ० 97)

~शास्त्रभेदे——मूलत आत्मनोऽभिन्नमेकरूपमपि शास्त्रतत्त्वं मुकुरादि-स्थानीय-तत्तद्गुरुवक्त्रेभ्योऽभिव्यक्तं सदनेकरूपतयाभासते, यथैकस्यैव मुखस्य प्रतिबिम्बजातं खड्ग-जल-रत्न-दर्पणादौ प्रतिबिम्बग्राहिण्याधारजाते । यथा—

"स नूनं स्फुटताधाम भाविज्ञानादिशक्तिमान् ।
उपरागात् ततस्तत्तद्वैचित्र्यपरिबृंहितः ॥
यथा मुखस्य तद्व्यक्तिस्थानेऽप्सु मुकुरे मणौ ।
खड्गे चञ्चल-सद्वृत्त-सूक्ष्म-दीर्घादिका स्थितिः ।।"

(मा०वि०वा० 1, 37-38)

एकमपि वस्तुतत्त्वं शास्त्रभेददृष्ट्याऽनेकप्रकारतया वर्ण्यत इति तात्पर्यम् ।।

एकवीरः——भगवान् मृत्युजित् । तदुक्तम्—

"एकवीरो मृत्युजिदिति प्रथमे ध्याने ।"

(तं०आ०वि० खं० 1, पृ० 153)

एकाक्षरा—— (1) अनाहतनादरूपिणी वाणी। तदुक्तम्—

"स तु भैरवसद्भावो मातृसद्भाव एष सः ।
परा सैकाक्षरा देवी यत्र लीनं चराचरम् ।।"

(तं०आ० 6, 218)

द्र० 'अनाहतमाहात्म्यम्' इति 'वर्णोदय' इति च ।

(2) 'एकाक्षरा पराभट्टारिका ।"

(तं०आ०वि० खं० 8, पृ० 83)

एकात्मता——त्र्यम्बकदर्शनानुसारमेक एव परमेश्वरः सदाशिवादिस्तम्बपर्यन्तं विविधप्रमातृतया स्वयं स्वविलासेन प्रकाशते । यथा—

"ततश्च भगवान् सदाशिवो जानाति-इत्यतः प्रभृति क्रिमिरपि जानातीत्यन्तमेक एव प्रमाता ।।"

(ई०प्र०वि० खं० 1, पृ० 48)

न केवलं प्रमातृतयैव यावत्प्रमेयजाततयापि स एवावभासते स्वैश्वर्यविलासतः । यथा—

"सर्वे सर्वात्मभावेन सर्वज्ञा वा व्यवस्थिताः ।।
सर्वे भावाः स्वमात्मानं जानन्तः सर्वतः स्थिताः ।
मदात्मना घटो वेत्ति वेद्म्यहं वा घटात्मना ।।
सदाशिवात्मना वेद्मि स वा वेत्ति मदात्मना ।
शिवात्मना यज्ञदत्तो यज्ञदत्तात्मना शिवः ।।"

इत्यादि ।

(शि०दृ० 5, 104-6)

द्र० 'सर्वसर्वात्मकता' इति ।

एकादशरूपः~शिवः——खण्डचक्रोक्तसाधनाक्रमे शिव एकादशकलात्मक उपास्यो भवति । तदुक्तम्—

"नवात्मा दशदिक्शक्तिरेकादशकलात्मकः ।।"

(तं०आ० 1, 111)

"एकादश इति खण्डचक्रोक्ताः ।"

(तं०आ०वि० खं० 1, पृ० 154)

न च ता एकादश कलास्तत्र स्पष्टीकृता। खण्डचक्राख्यश्च ग्रन्थो नोपलभ्यत इदानीम् ।।

एकादशविधः ~ मन्त्राभ्यासः——उपासनाविधिविशेषानुसारमेकादशधा मन्त्राभ्यासो विधीयते । यथा—

"संपुटं ग्रथितं ग्रस्तं समस्तं च विदर्भितम् ।।
आक्रान्तञ्च तथाद्यन्तं गर्भस्थं सर्वतोवृतम् ।
तथा युक्तिविदर्भं च विदर्भग्रथितं तथा ।।
इत्येकादशधा मन्त्रा नियुक्ताः सिद्धिदाः स्मृताः ।"

(ने०तं० 18, 10-12)

पृथक् पृथक् तेषां लक्षणानि तत्र तत्र द्रष्टव्यानि ।

एकादशरुद्राः——ब्रह्माण्डाद्बहिरवस्थितानां ब्रह्माण्डधारकाणां शतरुद्राणां प्रधाना एकादश रुद्राः । तेषु प्रतिदिशमेकः प्रधान इति दश, सर्वेषामधिनायकोऽन्य इत्येकादश । ते क्रमेण—अनन्तः, कापाली, अग्निः, यमः, नैर्ऋतकः, बलः, शीघ्रः, निधीशः, विद्येशः, शम्भुः, वीरभद्र इति । यथा—

"अनन्तोऽथ कपाल्यग्निर्यमनैर्ऋतको बलः ॥
शीघ्रो निधीशो विद्येशः शम्भुः स-वीरभद्रकः ।" इति ।
(तं०आ० 8, 180-81)

"अनन्तः प्रथमस्तेषां कपालीशस्तथापरः ।
अग्निरुद्रो यमश्चैव नैर्ऋतो बल एव च ॥
शीघ्रो निधीश्वरश्चैव सर्वविद्याधरोऽपरः ।
शम्भुश्च वीरभद्रश्च विधूमज्वलनप्रभाः ॥"
(मा०वि०तं० 5, 13-14, उद्ध०तं०आ०वि० खं० 5, पृ० 131)

अत्र 'विधूमज्वलनप्रभाः' इति विशेषणमेतेषाम् ।

एकादशात्मकत्वं~तत्त्वभेदने——(1) तत्त्वाध्वप्रक्रियायां मायातत्त्वे धारणालम्बनीकृते सति मायतत्त्वावस्थितो न्यग्भूतकञ्चुकोऽपि प्रलयाकलः प्रमेय एव भवति । ततस्तस्य मायान्तः स्थितत्वम् । तदुत्तीर्णानां विज्ञानाकलादीनामेव वेद्यं तदुभयम् । तेन तदुभयं पञ्चभिः प्रमातृभिः पञ्चभिस्तच्छक्तिरूपैः प्रमाणैर्वेद्यं सद् दशात्मकं निजस्वरूपमेलनया चैकादशविधम् । तदुक्तम्—

(क) "मायातत्त्वे ज्ञेयरूपे कञ्चुकन्यग्भवोऽपि यः ।
सोऽपि मेयः कञ्चुकैक्यं यतो माया सुसूक्ष्मिका ॥
विज्ञानाकल एवात्र ततो मातापकञ्चुकः ।"
(तं०आ० 10, 108-9)

(ख) "प्रलयाकलस्य स्वरूपत्वे पञ्चानां प्रमातृत्वे एकादशभेदाः ।"
(तं०सा० पृ० 98)

कञ्चुकानां न्यग्भावो यस्य सः प्रलयाकल इति ।

(ग) "मायानिविष्टेऽप्यकले तथेत्येकादशात्मता ।
(तं०आ०, 10, 109)

'मायानिविष्टेऽप्यकल'— इति प्रलयाकले ।

(2) तत्त्वभेदनप्रक्रियायां साधको मायातत्त्वं धारणावलम्बनतां नीत्वा तदुपरि स्थितैर्विज्ञानाकलादिभिः पञ्चभिः प्रमातृभिस्तेषां च शक्तिभिः पञ्चभिर्वेद्यं सदेकादशविधत्वं भजमानं (मायातत्त्वं) शिवात्मकतया भावयंस्तथैव साक्षात्कुरुते । तदभ्यासेन बहुभेदविस्तरयुक्तस्य मायातत्त्वस्य व्यापकतया स्वात्मशिवं साक्षात्कुरुते । तदेतदेकादशात्मकत्वं तत्त्वाध्वधारणायाम् ।

एवमेव प्रलयाकलेऽपि या तत्त्वभेदनपूर्विका धारणाऽसावप्येकादशात्मिकैव । तस्यापि विज्ञानाकलादिवेद्यत्वात् । यथा—

"………………रुद्रवत्प्रलयाकलाः ।
तद्वन्मायापि विज्ञेया ………………॥" इति ।
(मा०वि० तं० 2, 5-6)

एकानेकरूपता~पारमार्थिकी——स्वच्छस्य चिद्दर्पणस्य प्रतिबिम्बात्मकभेदावभाससम्भिन्नत्वेनैकत्राप्यनेकत्वावभासो दर्पणप्रतिबिम्बितनगरन्यायेन । तदुक्तम्—

"एकमनेकस्वभावं कथं स्यादिति ? तत्र दर्पणस्येवानेकाभासभेद एकतामनपबाधमानो न विरोधमावहति ॥"
(ई०प्र०वि०वि० खं० 3, पृ० 2)

~व्यावहारिकी——एकोऽपि घटाद्याभासो वर्तुलत्व-पृथुत्व-बुध्नोदरत्व-रक्तत्वादिभिराभासैः सम्भिन्न एव ज्ञाने आभासते । उक्तं हि—

"स एवाभासो यावद्भिराभासैरविनाभूतो भगवत्या नियतिशक्त्या नियमितस्तावतोऽवभासान् स्वीकृत्यैव प्रमाणकृतां निश्चयपदवीमवतरति ।"
(ई०प्र०वि० खं० 2, पृ० 100)

एकान्तः——न केवलं सेव्यमानस्य देशस्यैव विविक्तत्वं—स्थूलो ह्यसावेकान्तः । परस्त्वेकान्तो विकल्पविगम एव । स चैको निर्विकल्पः साक्षात्कारः ।

"शुद्धाशुद्धविकल्पानां त्याग एकान्त उच्यते ।"
(तं०आ० 29, 92)

एकाभाववादिनः——सर्वास्तिवादिनो वैभाषिका सौत्रान्तिकाश्च बौद्धाश्चित्तरूपस्य प्रमाणस्य नीलादिरूपस्य च प्रमेयस्य क्षणिकां सत्तामङ्गीकुर्वन्तोऽपि केवलं प्रमातुः सत्तां निरस्यन्त एकाभाववादिनः । यथा—

"तत्र त्रयाभाववादिनो माध्यमिकाः । ज्ञातृज्ञेयाभाववादिनो योगाचाराः, ज्ञात्रभाववादिनो वैभाषिकाः ।"
(तं०आ०वि० खं० 1, पृ० 95)

एकाशीतिपदा~देवी——प्राणचारे समुदयन्ती एकाशीत्यर्धमात्रात्मिका वर्णोदयरूपा मातृकादेवी । यथा—

"यद्वशाद् भगवानेकाशीतिकं मन्त्रमभ्यधात् ।
एकाशीतिपदा देवी शक्तिः प्रोक्ता शिवात्मिका ॥"
(तं०आ० 6, 227)

"एकाशीतिपदा देवी या सा शक्तिः शिवात्मिका ।"
(उद्ध० म०तं० 1-6-39 तं०आ०वि० खं० 4/1, पृ० 185)

एकाशीतिपदो~मन्त्रः——अर्धमात्रा एकाशीतिसंख्याः वर्णोदये—

द्र० 'अर्धमात्राः (81)' इति ।

एकीकारः——मण्डलोपासनायां त्र्यर-षडर-द्वादशारादीनामनेकेषां चक्राणां एकारशिवमयताभावनाभ्यासः—यथा—

"तच्च प्रकाशं वक्त्रस्थं सूचितं तु पदे पदे।
तुर्ये विश्रान्तिराधेया मातृसद्भावसारिणि ॥
तथास्य विश्वमाभाति स्वात्मतन्मयतां गतम्।
इत्येष शास्त्रार्थस्योक्त एकीकारो गुरूदितः ॥"

(तं०आ० 33, 31-32)

~उपसंहारतः——स्पष्टमुक्तः। यथा—

"इत्थं संविदियं याज्यस्वरूपामर्शरूपिणी ॥
अभिन्नं संविदश्चैतच्चक्राणां चक्रवालकम्।
स्वाम्यावरणभेदेन बहुधा तत्प्रयोजयेत् ॥
परापरा परा चान्या सृष्टि-स्थिति-तिरोधयः।
मातृसद्भावरूपा तु तुर्या विश्रान्तिरुच्यते ॥"

(तं०आ० 33, 28-30)

~सिद्धान्तदृष्ट्या——एक एव हि परमशिवस्तत्तद्देवतारूपतया तत्र तत्रोपास्यते-सर्वस्य नामरूपात्मकस्य प्रपञ्चस्य तच्छिव-शक्ति प्रतिबिम्बरूपत्वात्—

"एक एव चिदात्मैष विश्वामर्शनसारकः।
शक्तिस्तद्वानतो माता शब्दराशिः प्रकीर्तितः ॥

(तं० आ० 33, 20)

~फलतः——स्वात्मशिवस्य विश्वात्मकतासाक्षात्कार एकीकारविधेः फलम्। यथा—

"तुर्ये विश्रान्तिराधेया मातृसद्भावसारिणि ॥
तथास्य विश्वमाभाति स्वात्मतन्मयतां गतम्।"

(तं०आ० 33, 31-32)

~रहस्यतः——अत्रायमभिप्रायः—

मूलतस्त्रय एव परामर्शाः। ते च 'अकारः, इकारः, उकारश्च', क्रमशो 'अनुत्तरः, इच्छा, उन्मेषः'—इत्याख्याः। त एव दीर्घरूपैर् 'आनन्दः ईशना, ऊनता'—इत्याख्यैः सहिताः षट्। तदुपासनामयमेव षडरं चक्रम्। तच्चेत्थं शिव-शक्त्यात्मकं शिवरूपमेव।

अन्तःस्थानामूष्मणाञ्च मेलनेनाष्टारं चक्रं तदपि शिव-शक्तिप्रतिबिम्बात्मकं सदेकशिवरूपम्। स्वरा एव षण्ठवर्णरहिता द्वादश सन्तो द्वादशारं चक्रम्। तच्च शिवात्मकमेवेत्थम्। षण्ठवर्णचतुष्टयसहितास्त एव षोडशारं चक्रम्। तच्चाप्येवमेव शिवरूपमेव। अन्तःस्थानामूष्मणां च स्वरैः सह मेलनेन चतुर्विंशारस्थितिः। एवमेव सुमहान् विस्तरः। सर्वोऽयं विस्तरोऽनुत्तरशिवरूप एव मूलत इति सर्वस्यास्य शिवरूपतया दर्शने सत्येकीकारः सिद्ध्यति। तदुक्तम्—

"विश्वमेकपरामर्शसहत्वात्प्रभृति स्फुटम्।
अंशांशिकापरामर्शान् पर्यन्ते सहते यतः ॥
अतः पञ्चाशदैकात्म्यं स्वरव्यक्तिविरूपता।
वर्गाष्टकं वर्णभेद एकाशीतिकलोदयः ॥
इति प्रदर्शितं पूर्वम्………………।"

(तं०आ० 33, 25-27)

एरकनाथः——(1) द्वैतप्रधानाया आमर्दमठिकाया गुरोर्वामनाथस्य पिता तन्नाम्ना कथितस्तन्त्रालोके। यथा—

"आमर्दसन्ततिमहार्णवकर्णधारः।
सद्वैशिकैरकवरात्मजवामनाथः ॥"

(तं० आ० 37, 60)

एष तावदेक एरकनाथः।

(2) श्रीकल्याणिकायाः शिष्यः कालीनयस्य गुरुविशेषोऽपरः। अनेन न कापि शिष्यपरम्परा प्रचालिता। केवलं सिद्धिलाभौत्सुक्येन तदर्थमेव जीवनं यापितम्। अन्ते च सिद्धिजालविरक्तोऽभवत्। तदुक्तम्—

"श्रीमान् 'एरकसमाख्यस्' तृतीयः सममेवोपदेशं……………
…… श्रीकल्याणिकाभ्यः …… प्राप्तवन्तः।………श्रीमानेरकस्तु सिद्ध्यै प्रायतत………।" इत्यादि।

(उद्धृ० क्रमकेलितः, तं०आ०वि० खं० 3, पृ० 192-3)

ऐ

ऐ, औ——'ए, ओ' इति द्वे बीजेऽपि यदा पुनरनुत्तरे आनन्दे वा (अ, आ इति रूपे) अनुप्रविशतस्तदा स्फुटतरायाः क्रियाशक्तेरभिव्यक्तिर्भवति परतत्त्वान्तः। तदेतद्विशेषद्वयं शिवतत्त्वस्य 'ऐकारेणौकारेण' च द्योत्यते। 'औकार' एव क्रियाशक्तेः परमो विकासः। तदुक्तम्—

"एतदपि ('ए, ओ' इति बीजद्वयमपीत्यर्थः) तथा शबलीभूतं संविद्वपुस्तथैव च तदेव रूपमन्ववसद्……अ, आ+ए इति ऐ……अ, आ+ओ इति औ।"

(प०त्री०वि पृ० 175)

ऐश्वर्यम्——(1) ईश्वरत्वम्, असम्भवस्यापि सम्भवकारि सामर्थ्यम्। यथा—

"अतिदुर्घटकारित्वमस्यानुत्तरमेव यत्।
एतदेव स्वतन्त्रत्वमैश्वर्यं बोधरूपता ॥"

(बो०पं०द० 7)

(2) ज्ञान-क्रिया-स्वातन्त्र्यम्। यथा—

"एवं स्वातन्त्र्ये प्रकाशिते ज्ञानक्रिये अपि प्रकाशिते एव। तदेव चैश्वर्यमिति किमन्यदप्रकाशितं स्यात्।"

(ई०प्र०वि०वि० खं० 1, पृ० 78)

(3) अन्यनैरपेक्ष्यम्। यथा—

"अन्यनिरपेक्षतैव परमार्थत आनन्दः, ऐश्वर्यं, स्वातन्त्र्यं, चैतन्यञ्च।"

(ई०प्र०वि० खं०1, पृ० 207)

~तारतम्यतः——स्पष्टमुक्तम्। यथा—

'चतुषष्टिगुणं चैतत्पदे ब्राह्मे व्यवस्थितम् ॥
षट्पञ्चाशद्गुणं तच्च प्राजापत्ये व्यवस्थितम्।
अष्टचत्वारिंशद्गुणं सौम्ये वै परिकीर्तितम् ॥
चत्वारिंशद्गुणं चैव माहेन्द्रैश्वर्यमुच्यते।
द्वात्रिंशद्गुणितं देवि गान्धर्वैश्वर्यमुच्यते ॥

चतुर्विंशद्गुणं याक्षं षोडशं राक्षसं स्मृतम् ।
ऐश्वर्यमष्टगुणितं पैशाचं परिकीर्तितम् ॥
एवं स्थितं तदैश्वर्यं देवयोनिषु सुव्रते ।"

(स्व०तं० 11, 161-65)

~द्विविधम्——एकं तावद्बुद्धिधर्माष्टके परिगणितम्, अन्यत् पुनर्बुद्धितत्त्वोत्तीर्णस्य परित्यक्तमायावरणस्य प्रमातुः स्वाभाविकं स्वप्रकाशं स्व-स्वभावभूतमनन्त ज्ञानक्रिया-सामर्थ्यमयमनवच्छिन्नपारमैश्वर्यविमर्शात्मकं शुद्धमैश्वर्यम् ।

द्र० 'त्रिनेत्रता' इति ।

~योगिनाम्——योगसिद्धिजमष्टविधमणिमादिरूपम् । यथा—

"अणिमा लघिमा चैव महिमा प्राप्तिरेव च ॥
प्राकाम्यं च तथेशित्वं वशित्वञ्च ततः परम् ।
यत्रकामावसायित्वमष्टमं परिकीर्तिम् ॥
ऐश्वर्यमष्टधा चैव कथितं तु वरानने ।"

(स्व०तं० 11, 149-51)

ऐश्वर्यभेदाः——ते चाष्टौ सिद्धयोऽणिमाद्याः—
द्र० 'ऐश्वर्यम्~योगिनाम्' इति ।

ऐश्वर्याद्यधिकारिणः——बुद्धिधर्माष्टकं यदैश्वर्यं तन्मुख्यतया भिन्नभिन्नासु सृष्टिसु प्राणिनाम् । यथा—'ऐश्वर्यं ब्रह्मणि, अनैश्वर्यं पैशाचसृष्टौ, धर्मं ऐन्द्रेषु प्राणिषु, अधर्मो गान्धर्वप्राणिषु, वैराग्यं प्राजापत्येषु, अवैराग्यं राक्षसेषु, ज्ञानं सौम्येषु, अज्ञानं याक्षेषु—इत्यादि । यथा—

"यथाक्रमेण तेष्वष्टौ संस्थितान्कथयामि ते ।
अनैश्वर्यं हि पैशाचे अवैराग्यं च राक्षसे ॥
याक्षे चैव तदज्ञानं गान्धर्वेऽधर्मं एव च ।
धर्मं चैव तथैन्द्रे तु ज्ञानं सौम्ये प्रतिष्ठितम् ॥
प्राजापत्ये तु वैराग्यमैश्वर्यं ब्रह्मणि स्थितम् ।"

(स्व०तं० 11, 159-61)

ऐश्वरकर्माणि— तानि च—1. शासनम्, 2. रोधनम्, 3. पालनम्, 4. पाचनम्—इति सर्वान् जीवानधिकृत्य सदा प्रचाल्यन्ते परमेश्वरेण । तत्र 1. शासनं=शिक्षणं शास्त्रसाहाय्येन धर्मादिबोधनम्, 2. रोधनं=जीवानां संसारदशायामेव सुचिरं स्थापनम्, 3. पालनं=नियतिनियमानुसारं विश्वस्य प्रशासनम्, 4. पाचनं=कर्मणां फलदानयोग्यतायाः स्थितेः सम्पादनम् । यथा—

"शासन-रोधन-पालन-पाचन-योगात् स सर्वमुपकुरुते ।
तेन पतिः श्रेयोमय एव शिवो नाशिवं किमपि तत्र"

(तं०आ० 1, 104)

"स्वाध्येऽध्यास्ते बोधयन् बोधयोग्यान् ।
रोध्यान् रुन्धन् पाचयन् कर्मि-कर्म ।
मायाशक्तीर्व्यक्तियोग्याः प्रकुर्वन् ।
सर्वं पश्यन् यद्यथा वस्तुजातम् ॥"

उद्ध० (तं०आ०वि० खं० 1, पृ० 147)

ओ

ओ——त्रयोदशो मातृकावर्णः । अनुत्तरानन्दयोरुन्मेषसाम्मुख्यस्याभिव्यंजको वर्णः । यथा—

"अ, आ+उ, ऊ=ओ इति ।"

(प०त्री०विवृ० पृ० 6)

ओ, औ——अनुत्तरानन्दयोः साकमुन्मेषोनतयोः सम्मेलनेन कृतो विशेषः शिवतायाः । यथा—

"उन्मेषोनतयोस्ताभ्यामेव (अनुत्तरानन्दाभ्यामेव) तथाकृतत्वात् (सन्धीयमानत्वात्) ओ, औ इति भवति ।"

(प०त्री०ल०वृ० पृ० 5)

ओवल्ल्यः——कौलसम्प्रदाये शिष्यपरम्पराणामुपनामानि षट् । तानि च—1. आनन्दः, 2. अवलिः, 3. बोधिः, 4. प्रभुः, 5. पादः, 6. योगी, इति । कौलिकज्ञानविज्ञानस्य गुरुशिष्यपरम्परा एताः । तदुक्तम्—

"एते हि साधिकाराः पूज्या येषामियं बहुविभेदा ।
सन्ततिरनवच्छिन्ना चित्रा शिष्यप्रशिष्यमयी ॥
आनन्दावलिबोधिप्रभुपादान्ताथ योगिशब्दान्ता ।
एता ओवल्ल्यः स्युः........................॥"

(तं०आ० 29, 35-36)

"ओवल्ल्यो ज्ञानप्रवाहाः.................."

(तं०आ०वि० खं० 1 i/2 पृ० 28)

षण्णां मत्स्येन्द्रपुत्राणां परम्परासु रहस्यात्मकाः साधनाप्रवाहा ओवल्ल्यः ॥

औ

औ——अनुत्तरस्यानन्दस्य वा ओकारव्यंग्येन विशेषणैकीभावे या स्थितिः शिवतायाः असावौकारेण व्यक्तीक्रियते मातृकाक्रमे । परिपूर्णया क्रियाशक्त्याऽऽविष्टं शिवत्वमौकारेण व्यज्यते तदुपासनाक्रमे । यथा—

"अ, आ+ओ=औ इति ।"

(प०त्री०विवृ०, पृ० 6)

औकारः——तयाऽनुत्तरया पराशक्त्याऽऽविष्टस्य शिवस्य व्यञ्जको वर्णो या शक्तिः शुद्धविद्या-ईश्वर-सदाशिव-तत्त्वानि क्रोडीकरोति, तेषां शिव-शक्ति-विशेषरूपत्वात् । यथा—

"शुद्धविद्येश्वरसदाशिवतत्त्वानि ज्ञानक्रियासाराणि शक्तिविशेषत्वात् औकारेऽभ्युपगमरूपेऽनुत्तरशक्तिमयेऽन्तर्भूतानि ॥"

(प०प्रा० पृ० 11)

औत्तराधर्यम्~योगप्रक्रियाणाम्——त्रिकाचारे या योगप्रक्रियास्तासु सर्वोत्कृष्टा शाम्भवी, तदधः शाक्ती, तदधश्चाणवी

प्रक्रिया । आणवोपायेऽपि सर्वोत्कृष्टं बुद्धिध्यानं, ततोऽवर उच्चारयोगः, तदवरः करणयोगः, ततोऽप्यवरो वर्णयोगः, सर्वावरः स्थानकल्पनायोगः । उत्तरोत्तराः प्रक्रियाः अधोऽधोवर्तमानानां वीर्यरूपा। उत्तरोत्तराः—उपेयरूपा अधराधरास्तासामुपायभूताः । यथा—

"अकिञ्चिच्चिन्तनं वीर्यं भावनायाञ्च सा पुनः ।
ध्याने तदपि चोच्चारे करणे सोऽपि तद्ध्वनौ ।
स स्थानकल्पने बाह्यमिति क्रममुपाश्रयेत् ॥"
(तं०आ० 5, 156-57)

अत्र क्रमेण पूर्वपूर्वमुत्कृष्टं परं परं च ततोऽपकृष्टम् - पूर्वपूर्वाणां परापरापेक्षया गुणोत्कृष्टत्वात् । उक्तं हि—

"यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्वमिष्यते ॥"
(उद्धृ मा०वि० 2, 60, तं०आ०वि०खं० 3, पृ० 469)

परापरोद्बोधकतायामेव पूर्वपूर्वाणां सवीर्यताऽत्र बोध्या। सवीर्यतायां सत्यामेव हि परमपुरुषार्थलाभसाधनता ।

औन्मनसम् ——(1) मूर्धस्थाने वर्तमाना ऊर्ध्वकुण्डलिनी—

द्र० 'उर्ध्वकुण्डलिनी' इति ।

(2) पाशेभ्यः सूक्ष्मेभ्योऽप्युत्तीर्णं पदमौन्मनसं यदुपरि परशिवता । तदुक्तम्—

"समनान्तं पाशजालमुन्मन्यन्ते परः शिवः ।" इति
उद्ध० (म०मं०प० पृ० 166)

औन्मनसं~धाम——सदाशिवान्तं भगवत्या आसनमुक्त्वा मालिनीविजयोत्तरे शक्ति-व्यापिनी-समनाख्ये शृंगत्रये वर्तमाने कमलत्रये भगवतीनां पराद्यानामवस्थानमुक्तम् । इयदवधि ज्ञानशक्त्याख्यसदाशिवतत्त्वव्याप्तिः । तदुपरि यच्छक्तित्रयं तदेवौन्मनसं धाम । तदुक्तम्—

"ईश्वरं च महाप्रेतं प्रहसन्तमचेतनम् ।

इत्यनेन सदाशिवान्तमासनं नादान्तपक्षनिविष्टं श्रीपूर्वशास्त्रे ··· ·····इति शक्तिप्रख्यव्यापिनीसमनान्तकशृङ्गत्रयमुक्तम्, तत्राप्युन्मनसोर्ध्वकुण्डलिकापदपरमधामसितकमलत्रयरूपतया निरूपितम् । 'इत्येतत्परमासनं'—परापर्यन्तत्वात् इति, तदुपरि च देवीनां स्थितिः इति । तदेतत् परं पश्यन्त्याख्यं ज्ञानशक्तेरेव पर्यन्तधाम नादाख्यरूपमतिक्रमणीयत्वेनैव स्थितम् । ····· परं सदाशिव-ज्ञानशक्तावेवानाश्रित-शिवशक्त्यात्मनि विश्राम्यति ।"
(प०त्री०वि० पृ० 128-29)

भावनाभ्यासाङ्गभूतमेतत् सर्वम् ।

औन्मुख्यम् ——(1) मूलभूतो विशेषस्पन्दः । तदुक्तम्—

"ततः स्वातन्त्र्यनिर्मेये विचित्रार्थक्रियाकृति ।
विमर्शनं विशेषाख्यः स्पन्द औन्मुख्यसंज्ञितः ।"
(तं०आ० 5, 81)

(2) यथा क्रियाफलमुद्दिश्य प्रवर्तमानायाः कायस्पन्दादिविक्रियायाः पूर्वमेवान्तर्नाडिषु काचन प्रक्षुब्धतेवानुभूयते, एवमेव जगत्सृष्ट्यादिकरणात् पूर्वं सदाशिवादि दशोदयात् प्रागेव चिदानन्दोद्रेकरूपा यान्तःसंरम्भमयी स्थितिः पारमेश्वरी सैव परमेश्वरस्यौन्मुख्यशक्तिरिति परिभाष्यते । एतदौन्मुख्यमेवाग्रे प्ररूढं सदिच्छारूपतां गुह्यदेशोऽहं बहुस्यां प्रजायेयेत्यादिकलनात्मकतामापद्यते । यथा –

(क) "बोधस्य स्वात्मनिष्ठस्य रचनां प्रति निर्वृतिः ।
तदास्थाप्रविकासो यस्तदौन्मुख्यं प्रचक्षते ॥"
(शि०दृ० 1, 15)

(ख) "औन्मुख्यस्य य आभोगः स्थूलः सेच्छा व्यवस्थिता ।।"
(शि०दृ० 1, 17)

~आनन्दोर्मिः——स्वरूपनिष्ठा निजा पारमैश्वर्यविश्रान्तिरानन्दशक्तिः । सा च कर्मानवच्छिन्नान्तःसंरम्भात्मिका परस्पन्दतत्त्वभूता चितः स्वभावभूता विशेषता । सैव विशेषस्पन्दरूपतात्मतायां कर्मांशावच्छिन्ना सत्यानन्दोर्मिरौन्मुख्यमिति व्यपदिश्यते । तदुक्तम्—

"कर्मावच्छिन्ना निर्वृतिरौन्मुख्यम्, अनवच्छिन्ना निर्वृतिमात्रमानन्दशक्तिरिति ।"
(शि०दृ०वि० पृ० 17)

आनन्दशक्तिरानन्दः, औन्मुख्यशक्तिश्चानन्दस्योर्मिरूपोच्छलत्ता ।

~इच्छापूर्वभागरूपम्——अन्तःसंरम्भमयी कर्मानवच्छिन्ना एषणमात्ररूपेच्छा औन्मुख्यमित्यभिधीयते । सैव विकासमुपयाता जगदुत्पादनादिविषयोन्मुखी सतीच्छेति व्यपदिश्यते । पूर्वा तुटिरेवेच्छाया औन्मुख्यम्, अपरा च तुटिरिच्छेति । यथा—

(क) "तस्याः पूर्वापरौ भागौ कल्पनीयौ पुरा हि या ।।
तत् कर्मनिर्वृतिप्राप्तिरौन्मुख्यं तद्विकासिता ।।"
(शि०दृ० 1, 19-20)

(ख) "औन्मुख्यस्य य आभोगः स्थूलः सेच्छा व्यवस्थिता ।।"
(तदेव 1, 17)

~मातृकाक्रमे——द्र० 'अघोराः शक्तयः' इति ।

अं

अं——(1) इच्छाज्ञाने एव सम्यगुपचिते सती यदा सर्वोपाधिपरिस्पन्दं विहाय बिन्दुमात्रावशेषेण वपुषानुत्तरे पदे विलीने तिष्ठतस्तदा 'अं' इति रूपं धारयतः । तदुक्तम्—

"एवमिच्छाज्ञाने अनुत्तरस्वरूपानुप्रवेशेन प्राप्तोपचये पश्चात् परित्यज्य तथाविधोपाधिपरिस्पन्दसत्तामभेदसत्तारोहणचिन्मयपुरुषतत्त्वसतत्त्ववेदनारूपबिन्दुमात्रावशेषेण वपुषा तथानुत्तरपदलीने 'अं' इति ।
(प०त्री०वि० पृ० 176)

(2) अनुत्तरायामवस्थायां प्रलीने इच्छाज्ञाने 'अं' इति ध्वनिनाभिव्यज्येते मातृकाभ्यासे । यथा—

"इच्छाज्ञाने अनुत्तरपदलीने बिन्दुमात्रशेषतया 'अं' इति ।"
(प०त्री०विवृ० पृ० 6)

द्र० अनुस्वारः इति।

अः

अः~मातृकाक्रमे——(1) शाक्तविसृष्ट्याविष्टः परमशिवः। यथा—

"स एव परमेश्वरः शाक्तविसर्गप्रधानतया 'अः' इति।

(प०त्री०विवृ० पृ० 6)

~रहस्योपास्तौ——':' इत्येवं स्थितं बिन्दुद्वयम्। यथा—

"अथ अध ऊर्ध्वग्रन्थिरूपं बिन्दुद्वयमयं संविदात्मकं परभैरवदेवतात्मकं तात्त्विकं वपुः।"

(प०त्री०—ल०वृ० पृ० 17)

द्र० विसर्गः इति।

क

क——धरातत्त्वस्य यद्रहस्यात्मकं स्वरूपं तस्याभिव्यञ्जको मातृकावर्णः शाम्भवोपायाभ्यासे। तत्र 'क वर्णं' उपास्यमानः सन् धरातत्त्वात्मकस्वशक्तिप्रतिबिम्बखचितं स्वात्मानं निर्विकल्पं साक्षात्कारयति रहस्यविधिना।

ककारः——द्र० 'पददीक्षा', (8); 'त्रितत्त्व दीक्षा', (2)

ककार देवी——कालीनयप्रवर्तकस्य गुरोः शिवानन्दनाथस्य शिष्या श्रीकेयूरवती। गुरोर्नाम न ग्राह्यमिति कालीनयगुरुपरम्परायां विद्यमानः श्रीकेयूरवतीं ककारदेवीं वदति जयरथः। यथा—

"श्रीमदवतारकनाथेन श्रीककारदेवीवच्छ्रीमदनिका श्रीकल्याणिके चानुगृहीते।"

(तं०आ०वि० ख० 3, पृ० 195)

"अत्र श्रीककारदेव्यास्तस्याः……………… ।"

(तदेव)

अत्र श्रीशिवानन्दनाथस्य नामोच्चारणं परिहरता जयरथेनावतारकनाथ इत्येवमसौ निर्दिष्टः।

कक्ष्यास्तोत्रम्—भट्ट-दिवाकरवत्सकृतं किमपि दर्शनतत्त्वगर्भं स्तोत्रं यस्य पद्यमेकं ग्रन्थतत्कर्तृनामोल्लेखपूर्वकमुद्धृतं परमार्थसारविवृत्यां योगराजेन। अन्यैरप्याचार्यैरस्य स्तोत्रस्य पद्यान्युद्धृतानि, परं क्वचित् केवलं स्तोत्रस्य नामोल्लेखः कृतः क्वचिच्च केवलस्य कवेरेव। पद्यद्वयमस्योद्धृतं स्पन्दविवृतौ। तयोरेकं पद्यं तदेव तदुपरि निर्दिष्टं योगराजेनोद्धृतम्। तेन द्वितीयमपि तत्कृतमेव। यद्यच्च पद्यं भट्टदिवाकरवत्सकृतत्वेनोद्धृतं तत्तु रचनाशैल्या कक्ष्यास्तोत्रीयमेव प्रायः। यच्च पद्यं कक्ष्यास्तोत्रनामोल्लेखपूर्वं क्वाप्युद्धृतं तद्भट्टदिवाकरवत्सकृतमेवेति वेद्यम्। योगराजेनोद्धृतं पद्यं यथा—

"यथाह भट्टदिवाकरवत्सः—

जाते देह प्रत्ययद्वीपभङ्गे प्राप्तैकध्ये निर्मले बोधसिन्धौ।
अव्यावर्त्य त्विन्द्रियग्राममन्तर्विश्वात्मा त्वं नित्य एकोऽवभासि॥
इति कक्ष्यास्तोत्रे।"

(प०सा०वि०, पृ० 103)

पद्यमेतदुद्धृतमाचार्यरामकण्ठेनापि विना नामादिनिर्देशम्। यथा—"यदुक्तम्—

जाते देहप्रत्यय………… इत्यादि।"

तथा—(1) "नात्माधीनत्वेऽपि विश्वं नियोक्तुं
सर्वो हस्तादीनिवेष्टे यथेष्टम्।
बालो राजेवात्मशक्त्यप्रबोधात्
त्वय्यन्तःस्थे सर्वशक्तिस्तु सर्वः॥"

(स्वं० वि०, पृ० 40)

"जाते देहप्रत्ययद्वीपभङ्गे" इत्यादि पद्यमभिनवगुप्तमहोदयैरपि भट्टदिवाकरवत्सकृतत्वेनोद्धृतम्।

द्र० (ई०प्र०वि०वि० खं० 3, पृ० 388)

एतैः प्रसङ्गैर्वस्तुत्रयं सिद्धं भवति—(1) कक्ष्यास्तोत्रस्य निर्माता भट्टदिवाकरवत्सः, (2) स च रामकण्ठात् प्राक्तनो वा, समकालिको वेति, (3) अतीव महत्त्वमण्डितोऽसौ गुरुः तस्य कृतिश्चैषा विद्वत्प्रियेति।

द्र० 'दिवाकरवत्सो' भट्ट इति।

~पद्यान्यस्य——पद्यद्वयं तूदाहृतमेव। अपराणि यथा—

(2) "तदुक्तं कक्ष्यास्तोत्रे—
सर्वेऽनुभूता यदि नान्तरार्था—
स्त्वदात्मसात्कार-सुरक्षिताः स्युः।
विज्ञातवस्त्वप्रतिमोषरूपा
काचित् स्मृतिर्नाम न सम्भवेत्तत्॥"

(ई०प्र०वि०वि० खं० 2, पृ० 328)

"यदाह भट्टदिवाकरः—सर्वेऽनुभूता ………" इत्यादि।

(ई०प्र०वि०वि० खं० 2, पृ० 3)

(3) "यथाह भट्टदिवाकरवत्सः—
जातेदेहप्रत्ययद्वीपभङ्गे इत्यादि।"

(ई०प्र०वि०वि० खं० 3, पृ० 388)

एक एव पादः पद्यस्य—यथा—"कक्ष्यास्तोत्रेऽपि—.

(4) …· विश्वस्य सत्ता महतीति सोक्ता। इति।"

(ई०प्र०वि०वि० खं० 2, पृ० 203)

"तथा च कक्ष्यास्तोत्रम्—

(5) भग्नो भ्रमोऽयं भवता विचित्रां
स्वप्ने विदेहादिगतिं प्रदर्श्य।
देहे गते भस्ममये परत्र
कीदृक्……………………॥ इति"।

(ई०प्र०वि०वि० खं० 2, पृ० 309)

(6) " "सर्वाः शक्तीश्चेतसा दर्शनाद्याः

स्वे स्वे वेद्ये यौगपद्येन विष्वक्।
क्षिप्त्वा मध्ये हाटकस्तम्भभूत-
स्तिष्ठन्विश्वाकार एकोऽवभासि॥"

इति ·····कक्ष्यास्तोत्रनिर्दिष्टसंप्रदाययुक्त्या · ।"

(स्पं० नि०, पृ० 25)

द्र० (म० मं०, पृ० 80) इति।

(7) "यदुक्तं कक्ष्यास्तोत्रे—

"या अग्निहोत्राहुतयः सहस्र-
द्वासप्ततिः स्युः पुरुषायुषेण।
नाड्यंशयुक्त्या सकृदेव जुह्वत्
संपादयेत्तास्तव मार्गविद्यः॥" इति"

(स्व० तं० उ० प० 7, पृ० 177)

तव मार्गविद् यः इति।

"कक्ष्यास्तोत्रेऽपि—

(8) त्वदाशयोन्मेषनिमेषमात्रमयौ
जगत्सर्गलयावितीदृक्।
स्फुटे स्फुटं त्वन्महिमाऽवभाति
विचित्रनिर्माणनिदर्शनेन॥"

(स्पं० प्र०, पृ० 10)

(9) "ज्ञान क्रियादिगर्भेच्छाशक्तिर्यः प्रसरात्मकः।
सङ्कल्पोक्तः स उन्मेषः प्रोक्तं ह्येतत् स्वतन्त्रके॥"

(तदेव, पृ० 10)

(10) "यत्र यत्र भवेदिच्छा ज्ञानं तत्र प्रवर्तते।
क्रियाकरणसंयोगात् पदार्थस्योदयो भवेत्॥" इति।

(स्पं० प्र०, पृ० 10)

"कक्ष्यास्तोत्रे च—

(11) ज्ञानं प्रशान्तं तव बोधवृत्ति-
रैश्वर्यमुद्यत्प्रसरा परेषाम्।
प्रकाशनं प्रत्यपि योग्यरूपा
शक्तिर्बहिः स्थैर्यवती-बलं-सा॥

(स्पं० प्र०, पृ० 26)

(12) "उत्पन्नबाह्यप्रसरां तु वीर्यं
तेजश्च बाह्यानवभासयन्ति।
षोढेत्थमेकैव तव स्वशक्ति-
र्बाह्यावमर्शात्तु भवेदविद्या॥
तत्र सर्वज्ञता ज्ञानं सर्वं हि जायते ततः।" इति।

(स्पं० प्र०, पृ० 26)

भट्टदिवाकरवत्सकृतान्यधस्तनानिपद्यान्यपि कक्ष्यास्तोत्रादेवोद्धृतानीति तर्क्यते—

(13) "यदाह दिवाकरवत्सः—

ध्यानादिभावं स्मृतिरेव लब्ध्वा
चिन्तामणिस्त्वद्विभवं व्यनक्ति।"

(ई०प्र०वि०वि० खं० 2, पृ० 4)

ग्रन्थ-तत्कर्तृनामनिर्देशरहितमुद्धृते पंक्ती इमे प्रत्यभिज्ञाविमर्शिन्यामपि।

द्र० (ई०प्र०वि० खं० 1, पृ० 120) इत्यत्र

(14) "तदुक्तं भट्टदिवाकरवत्सेन—

सम्प्रेषिते चेतसि हारितार्थ-
ज्ञप्त्यै महाज्ञान भवत्सकाशम्।
युक्त्या यदावेदयसि त्वमन्त-
स्तत्त्व विद्धेत्ति विजृम्भितं ते॥"

(ई०प्र०वि०वि० खं० 2, पृ० 13)

(15) "उक्तं भट्टदिवाकरवत्सपादैः—

दूरान्तिदेशादिगतार्कचन्द्र-
तारादिबाह्यप्रथयैव विघ्नः।
व्याप्य स्थितं विश्वमिदं विभुं त्वां
स्वदेहविच्छेदविमोहभङ्गात्॥"

(तदेव खं० 2, पृ० 14)

(16) "यदाह भट्टदिवाकरवत्सः—

न दृश्यते त्वत्प्रतिभासशक्तेः-
स्वप्नेऽर्थवैचित्र्यनिमित्तमन्यत्।
तद्दृष्टसामर्थ्यतया सदैषा
विश्व-प्रपञ्च-प्रथनैक-हेतुः॥"

(तदेव खं० 2, पृ० 145)

द्र० 'दिवाकरवत्स (भट्टः)' इति।

कचभार्गवम्——आगमशास्त्रपुस्तकं किमपि। यथा—
"ज्ञानप्राधान्यमेवोक्तमिति श्रीकचभार्गवे॥"

(तं० आ० 23, 6)

~तद्वाक्यम्——यथा—

पदवाक्यप्रमाणज्ञः शिवभक्त्येकतत्परः।
समस्तशिवशास्त्रार्थबोद्धा कारुणिको गुरुः॥

(तदेव 23, 7)

कञ्चुकतत्त्वानि——यथा कञ्चुकेन शरीरमाव्रियते तथैव यानि तत्त्वानि नः पारमेश्वरं परिपूर्णं चित्स्वरूपमावृत्य माया-प्रमातृतया परिमिताणु-रूपतयाऽवभासयन्ति तान्यशुद्धानि तत्त्वानि कञ्चुकानि। एतैरावृतः परमेश्वर एव परिमित-प्रमातृतया पुरुष-तत्त्वरूपतया चावभासते। मायाविस्तररूपाण्येतानि तत्त्वानि षट्। तद्यथा—कालः, कला, अशुद्धविद्या, रागः, नियतिः स्वयं च माया। उक्तमत्र विषये—

(क) "परिमितत्वं च शून्यादेरहम्भावस्य यत् तदेव कालादि-पञ्चकम्।"

(ई०प्र०वि० खं० 2, पृ० 207-208)

(ख) "संविदो माययापहस्तितत्वेन कलादीनामुपरिपातिनां कञ्चुकवदवस्थानात्।"

(तं० सा०, पृ० 83)

उपरितनमावरकत्वेनाच्छादनम् ।

(ग) "माया कला राग-विद्ये कालो नियतिरेव च ।
कञ्चुकानि षडुक्तानि संविदस्तत् स्थितौ पशुः ॥"
(तं० आ० 9, 208)

अत्र मायायाः मुख्यकञ्चुकत्वेन तेषु गणना ।

(घ) "मायापरिग्रहवशाद् बोधो मलिनः पुमान् पशुर्भवति ।
काल-कला-नियति-वशाद्रागाविद्यावशेन सम्बद्धः ॥"
(प० सा०, 16)

अविद्याऽत्र परिमिता किञ्चिज्ज्ञतारूपाऽशुद्धविद्येति । न पुनर्वेदान्तिनामिव कापि प्रातिभासिकतत्त्वरूपाऽनाद्याऽनिर्वचनीया चेति ।

~अप्रमेयाणि——यद्यपि कञ्चुकतत्त्वानि मायीयत्वेन जडानि, शुद्धसंविदपेक्षया मन्त्रादि-प्रामात्रपेक्षया च प्रमेयकोटिपतितानि, तथापि व्यवहारे न नीलसुखादिवत् प्रमेयतया भान्ति । तेषां माया-प्रमातुरङ्गत्वेनावस्थानात्, तस्य च प्रमेयभूतस्यापि प्रमात्रीकृतत्वात् । मायाप्रमातुरन्तरङ्गानि तत्त्वान्येतानि ।

द्र० 'पशुः~अप्रमेयः' इति ।

~असंख्यानि——कलादीनि मायीयानि तत्त्वानि प्रायशः प्रत्यात्मभिन्नानि, ततोऽसंख्यानि । यथा—

"कलादिवसुधान्तं यन्मायान्तः संप्रचक्षते ।
प्रत्यात्मभिन्नमेवैतत् सुखदुःखादिभेदतः ॥"
(तं०आ० 9, 167-168)

~एकीभवन्ति——काल-कलादीनि कदाचिन्नितम्बिनी नृत्यदर्शनादावेकीभवन्ति बहूनां प्रमातॄणां परस्परं समन्वयतः । यथा—

(क) "कालकलादयो हि प्रमातृतां पूरयन्तः प्रतिप्रमातृभिन्नस्वभावाः, क्वचित्तु नटमल्लप्रेक्षादावीश्वरेच्छया तावति एकीभवन्त एकविषयतया वा·········।"
(ई०प्र०वि०वि० खं० 3, पृ० 294)

(ख) "तस्मात् कलादिको वर्गो भिन्न एव कदाचन ।
ऐक्यमेतीश्वरेच्छातो नृत्तगीतादिवादने ॥"
(तं०आ० 9, 170)

~प्रतिबिम्बात्मकानि—— यच्छिवत्वादि-शुद्धविद्यान्तं तत्त्वपञ्चकस्वरूपं शुद्धं तदेव पशुप्रमातरि प्रतिबिम्बरूपतयाऽऽभासमानं सत् संकोचसंभिन्नतां प्राप्तं कञ्चुक-जालकम् । तत्रानाश्रितः शिवो=माया, सदाशिवः=कला-विद्या च, ईश्वरः=कालो नियतिश्च, शुद्धविद्या=रागः । यथा—

"अनाश्रितं यतो माया कलाविद्ये सदाशिवः ॥
ईश्वरः कालनियती सद्विद्या राग उच्यते ।"
(तं० आ० 6, 42-43)

आगमेऽनाश्रितशक्त्योरेकरूपतया परामर्शतः शक्तिरेव मायेत्युपदिष्टम् । ततोऽनाश्रितः शक्तिश्च मायेति वेदितव्यम् । यथा—

"शक्त्यादिस्तत्त्ववर्गस्तु कञ्चुकत्वेन वै पशोः ।
शक्तिर्माया कला विद्या कालो नियतिरेव च ॥
सदाशिवेश्वरौ विद्या रागस्तु वरवर्णिनि ।"
(उद्ध०तं०आ०वि०खं० 4/1, पृ० 39)

कला विद्या च सदाशिवः, कालो नियतिश्चेश्वर इति ।

~प्रमाण-रूपाणि——केषांचिन्मते पुरुषस्य मितप्रमातृभावस्रोतोभूतं तत्त्वमेव मूलतः प्रमाणम्, तद्वशादेवास्य प्रमातृत्वावभासदर्शनात् । तत्र मितप्रमातृतादायकं तावत् कञ्चुकषट्कं (माया सहितम्) । ततः केचन पञ्चकस्य तस्य प्रमाणत्वं मन्यन्ते । तत्रापि केचन तेष्वेकैकस्य कस्यापि, अन्ये द्वयस्य, त्रयस्य वा । सोऽयं विचारभेदः वय्यादीनां गुरूणाम् । तदेतद्विषय उक्तम्—

"तदित्थं पुम्सि चिद्धर्मविभवामोदशालिनि ।
मातृत्वदायि यत् प्रोक्तं षट्कं कञ्चुकसंज्ञितम् ॥
तदेकैकस्य मानत्वं केचन प्रतिपेदिरे ।
अन्ये त्वेकस्य सर्वान्यसचिवस्येति मन्वते ॥
अन्ये कदापि कस्यापि कथञ्चित् क्वचनेत्यपि ।
अन्ये द्वयोर्द्वयोरन्ये त्रिकद्वयनियोगतः ॥
अन्योन्यानुग्रहादन्ये बोधेनान्योन्यतोऽपरे ।
अन्ये तु गुणसाम्यात्म प्रकृतिमेव (प्रकृतेरेव) मानताम् ॥
मुख्यत्वेन विदुः सुप्तमत्तमूर्छादि-दर्शनात् ।

······································

······································

इत्थं केऽप्यभिमन्यन्ते सांख्यकञ्चुकसंश्रयात् ॥
वय्याभिधानस्य गुरोर्गृहे ज्ञानोपजीविनः ।"
(मा०वि०वा० 1, 836तः 844)

वय्यादिभिर्गुरुभिः सूक्ष्मतरप्रामाण्यदृष्ट्या विचारितमत्र विषये । ततो विचारविमर्शभेद एवायं न मतभेद इति वेद्यम् । न हि सर्वे गुरव एकयैव सरण्या विचारयन्ति । ते च विचारभेदाः परस्परं पूरका एव न विरोधिनः । किञ्च "ज्ञानोपजीविनः" इति निर्देशादिदं प्रतीयते यज्जीविकार्थमेव तेषामेतज्ज्ञानं न यथार्थतया स्वीकार्यमिति ।

~भिन्नविषयाण्यपि——एकत्र प्रमातरि स्थिता अपि कलारागनियत्याद्याः कदाचिद् भिन्नभिन्नविषयोन्मुखतयापि पुरुषमुपकुर्वन्ति । यथा—

"··

··

अन्यत्र रक्तोऽन्यन्नियत्या कार्यते इत्यादिस्थित्या करणांशगामिनः ।"
(ई०प्र०वि०वि०खं० 3, पृ० 294)

~भोक्त्रङ्गभूतानि——भोक्तुर्जीवस्यान्तरङ्गाः विशेषताः, कलादीनि कञ्चुकानि भोक्तृमध्यपातित्वेन भोक्त्रंशभूतानि न भोग्यविषयमध्ये गणनीयानि । यथा—

"..............भोक्तृभावे।
तिष्ठद् भोक्तृत्वपूरितम्॥"

(तं॰आ॰ 9, 203)

कलादिना किञ्चित्कर्तृत्वाधानेन पूरितमुपबृंहितं कार्यपर्यन्तीकृतमिति यावत्। अत एवैषां तद्धर्मत्वाद् भोक्तर्येवावस्थानम्।"

(तं॰आ॰वि॰खं॰ 6, पृ॰ 162)

~मूलतः——परमेश्वरस्य सर्वशक्तिमत्त्वादयो विशेषा एव संकोचरसे जीवभावे पञ्चकञ्चुकतत्त्वरूपतयावभासन्ते स्वरूपावरकत्वेन। तथाहि—सर्वकर्तृत्वं किञ्चित्कर्तृत्वरूपतया कलेति, सर्वज्ञत्वं किञ्चिज्ज्ञत्वरूपतयाऽशुद्धविद्येति, परिपूर्णताऽपूर्णम्मन्यत्वमूलकाभिष्वंगरूपतया रागः इति, क्रमरहिता नित्यता भूतभविष्यदादि क्रम-संस्कारसम्भिन्नतया काल इति, असङ्कुचितं स्वातन्त्र्यं सङ्कोचप्राणपारतन्त्र्येण नियतिरिति पञ्चकञ्चुकावभासः। असम्भवस्यापि सम्भवकारिणी परा मायाशक्तिर्मायाख्यावरणरूपतयावभासते। यथा—

(क) "सर्वकरः सर्वज्ञः पूर्णो नित्योऽसङ्कुचंश्चैव।
विपरीत इव महेशो याभिस्ता भवन्ति पंच शक्तयः॥"

(म॰मं॰ 18, पृ॰ 48)

(ख) "एतत् पञ्चकं चागमेषु स्वरूपावरकत्वात् कञ्चुकमित्युच्यते।"

(म॰मं॰प॰, पृ॰ 48)

परमाचार्याभिनवगुप्तस्य विचारे रागो गुणारोपणमयोऽभिष्वङ्ग एव, नापूर्णतामात्रम्। या चापूर्णम्मन्यताऽसौ लोलिकेति प्रतिपादिता तन्त्रालोकादौ। महार्थमञ्जरीकारो न सर्वथा काश्मीरशैव-दर्शनानुसारी। तस्य कौलपरम्परायां दाक्षिणात्यायां विद्यमानत्वात्। यथा—

(ग) "अस्य सर्वकर्तृत्वं सर्वज्ञत्वं पूर्णत्वं नित्यत्वं व्यापकत्वं च शक्तयोऽसङ्कुचिता अपि सङ्कोचग्रहणेन कला-विद्या-राग-काल-नियतिरूपतया भवन्ति।"

(प॰प्रा॰, पृ॰ 9)

~वस्तुतः——यथा सूक्ष्मायाः मायाख्यायाः प्रभोः शक्तेरेव स्थूलतात्मको बहिः प्ररोहस्तथा कलाद्या अपि वस्तुतो मूलतः शिवस्य शक्तयः एव; तासां बहिः प्ररोह एव कलादीनि तत्त्वानि। यथा—

"यथा च माया देवस्य शक्तिरभ्येति भेदिनम्।
तत्त्वभावं तथान्योऽपि कलादिस्तत्त्वविस्तरः॥"

(तं॰आ॰ 9, 154-155)

~शुद्धानि (क्वापि)——शिवार्चाध्यानोपासनाद्युपयोगीनि कलाविद्यादीनि कञ्चुकानि शुद्धानि गण्यन्ते, यतः शक्तिपातपवित्रीकृतानां कृते मायावरणशैथिल्यकारीणि स्वरूपप्रकाशनोपयोगीनि मोक्षोपायाभ्यास-साहाय्यकारीणि तानि। यथा—

(क) "एषां कलादितत्त्वानां सर्वेषामपि भाविनाम्।
शुद्धत्वमस्ति तेषां ये शक्तिपातपवित्रिताः॥"

(तं॰आ॰ 9, 171)

(ख) "तत्र सर्वोऽयं कलादिवर्गः शुद्धोयः परमेश्वरविषयतया तत्स्वरूपलाभानुगुणनिजकार्यकारी संसारप्रतिद्वंद्वित्वात्। स च पारमेश्वरशक्तिपातवशात् तथा भवति।"

(तं॰सा॰, पृ॰ 79)

(ग) "तत्र कलायाः शुद्धत्वं परमेश्वरार्चनध्यानादिविषयम्, रागो भगवद्विषयमभिष्वङ्गं सम्प्रसूयते। विद्यापि तद्विषयं विवेकम्, कालश्च तदुपदेशादिविषयमेव कलनम्, नियतिश्च तदाराधनादेव नियमनम्।"

(तदेव टि॰, पृ॰ 79)

~शोध्यानि——(1) कलाविद्यारागात्मकानि त्रीण्येवाणुं संसृतौ प्रवर्तयन्ति। तत् एतत् त्रयमेव शोध्यम्। एतैः शोधितैः नियतिकालयोः शोधनं स्वत एव भवति। सम्भवतोऽत एव मातृकाक्रमे नियतिकालौ न पृथक् परिगणितौ। यथा—

"तस्य द्वितीयचितिरिव स्वच्छस्य नियुज्यते कला श्लक्ष्णा।
अनया विद्धस्य पशोरुपभोग-समर्थता भवति॥
विद्या चास्य कलातः शरणान्तर्दीपकप्रभेवाभूत्।
सुखदुःखसंविदं या विविनक्ति पशोर्विभागेन॥
रागश्च कला-तत्त्वाच्छुचिवस्त्रकषायवत् समुत्पन्नः।
त्यक्तुं वाञ्छति न यतः संसृतिसुखसंविदानन्दम्॥"

(तं॰आ॰ 9, 208 तः 211)

"कालनियत्योस्त्वनभिधानेऽयमाशयो यत् कलादिशुद्धयैतत्तत्त्वशुद्धिरिति।"

(तं॰आ॰वि॰खं॰ 6, पृ॰ 168)

(2) मायायाः शोधनेन कञ्चुकशोधनं स्वत एव सिद्धं भवति। यथा—"दीक्षासमये तदन्तर्वर्तिन (मायान्तर्वर्तिनः) एव सर्वस्य शोध्यत्वं श्री-स्वच्छन्दादिशासनेषु निरूपितम्; मूले दग्धस्य पुनः प्ररोहाभावात्।"

(ई॰प्र॰वि॰वि॰खं॰ 3, पृ॰ 291)

(3) मलानां पृथक्पृथग्वा मायामयत्वेनैकदैव वा यच्छोधनं तद् गुरोरिच्छां शिष्यस्य योग्यतां चाश्रितं वेदितव्यम्।

~संख्यातः——पंच वा, षड् वा।
कलादीनि पञ्च माया चेति षट्। यथा—

"माया-कला-रागविद्ये-कालो-नियतिरेव च।
कञ्चुकानि षडुक्तानि संविदस्तत्स्थितो पशुः॥"

(तं॰आ॰ 9-208)

~सप्रयोजनानि——मायैव हि जडतामिवापादिता याणवे स्वयमेव कर्मफलभोगनिर्वाहसिद्धये पुनरपि कांश्चिच्छक्तिलेशान् प्रददाति। त एव शक्तिलेशाः कञ्चुकतयाणुं परिवृत्य तस्य ज्ञानक्रिये मनाक् साधयन्ति। यथा—

(क) "माययापहृतैश्वर्यसर्वस्वः सन् पुनरपि प्रतिवितीर्णतत्सर्वस्वराशिमध्यगतभागमात्र एवम्भूतोऽयं मितः प्रमाता

भाति—इदानीमिदं किञ्चिज्जानानः, इदं कुर्वाणोऽत्र रक्तोऽत्रैव च यः सोऽहमिति ।"

(ई०प्र०वि०खं० 2, पृ० 209)

(ख) "कालकलादयो हि प्रमातृतां पूरयन्त. प्रतिप्रमातृभिन्न-स्वभावाः ।"

(ई०प्र०वि०वि०खं० 3, पृ० 294)

(ग) "असूत-सा कलातत्त्वं यद्योगादभवत्पुमान् ।
जातकर्तृत्वसामर्थ्यो विद्यारागौ ततोऽसृजत् ॥
विद्या विवेचयत्यस्य कर्म तत्कार्यकारणे ।
रागोऽपि रञ्जयत्येनं स्वभोगेष्वशुचिष्वपि ॥
नियतिर्योजयत्येनं स्वके कर्मणि पुद्गलम् ।
कालोऽपि कलयत्येनं तुट्यादिभिरवस्थितः ॥"

उद्ध० (तं०आ०वि०खं० 1, पृ० 75)

~सृष्टिक्रमतः——(1) भिन्नभिन्नेष्वागमशास्त्रेषु कलादीनामुत्पत्तेः भिन्नभिन्न एव क्रमो दर्शितः । तत्पुरुषभेदमूलकम् । कश्चिद् रज्यन् वेत्ति तस्य रागाद् विद्योदयः, कश्चिद् विदन् रज्यति तस्य विद्याया रागोदयः । इत्येवमेवान्यदपि वैचित्र्यमूह्यम् । यथा —

"ननु श्रीमद्रौरवादौ रागविद्यात्मकं द्वयम् ।
सूते कला हि युगपत् ततोऽव्यक्तमिति स्थितिः ॥
उक्तमत्र विभात्येष क्रमः सत्यं तथा ह्यलम् ।
रज्यमानो वेद सर्वं विदंश्चाप्यत्र रज्यते ॥"

(तं०आ० 9-217, 18)

(2) युगपदेव मायातः पञ्चानामेव कलादीनां सृष्टिः क्वचित्, क्वचिच्च मायातः कलायाः सृष्टिः, कलातश्च शेषस्य कञ्चुक-चतुष्टयस्य क्वचिद् युगपदेव सृष्टिः, क्वचिच्च क्रमेण । क्रमश्चापि तत्रान्यान्यरूपः । तत् प्रतिपुरुषमिदं विशेषविशेष-रूपतयावभासते । यथा—

(क) "अत्र चैषां वास्तवेन पथा क्रमवन्थ्यैव सृष्टिरित्युक्तं, क्रमावभासोऽपि चास्तीत्यपि उक्तमेव । क्रमश्च विद्यारागादीनां विचित्रोऽपि दृष्टः । कश्चिद्रज्यन् वेत्ति कोऽपि विदन् रज्यते, इत्यादि । तेन भिन्नक्रमनिरूपणमपि रौरवादिषु शास्त्रेषु अविरुद्धं मन्तव्यम् ।"

(तं०सा०पृ० 84)

(ख) "तेन कलात एवैतच्चतुष्कं जातमिति ।"

त०सा० पृ० 82
द्र०च०तं०आ० 9, 45 तः 48;
तं०आ०वि० खं० 9, पृ० 45 तः 47

~स्रोतस्तेषाम्——मायैव कञ्चुकानां मूलभूतं स्रोतः, तत एव तेषां प्ररोहात् । यथा—

"तत एतत् सर्वमेव मायामूलत एव स्थितम् ।"

(ई०प्र०वि०वि०खं 3, पृ० 291)

कटिः——वेद्या मध्यभागो मण्डलविधौ । यथा—

"कटिं कुर्याद् द्विरङ्गुलाम् ।"

(तं०आ० 31-109)

द्व्यङ्गुलामिति तात्पर्यं स्यात् ।

कण्ठः - बीजम्——वकारः ।

(तं०आ०वि० खं० 12, पृ० 202)

कन्था——योगिभिर्धार्यमाणा "झोली" इति । सा चोपलक्षणं महार्थनिष्ठानां योगिनां कृते भेदवैचित्र्यावभासेऽप्यभेदनिष्ठतां तेषां द्योतयति । यथा—

"तत्र कन्था नाम भेद-वैचित्र्यवत्तायामपि पर्यन्तत एकानुसन्धानसाध्यो विश्वव्यवहारः ।"

(म०मं०प० पृ० 185)

कन्दलम्——अर्धचन्द्रः । यथा—

"कन्दलमर्धचन्द्रः ।"

(ने०तं०उ० खं० 1, पृ० 51)

कपालम्——(1) तान्त्रिकव्याख्याविध्यनुसारं 'क' पराशक्तिस्तस्याः पालकः शिवस्तयोः संघट्टात्मकं कपालम् । तन्त्रकोशानुसारमेषा व्याख्या । यथा—

"क-शब्देन पराशक्तिः पालकः शिवसंज्ञया ।
शिवशक्तिसमायोगं कपालं परिपठ्यते ॥
इति तन्त्रकोशयुक्त्या……………….।"

(वि०मै०उ०, पृ० 30)

(2) चित्तमयमायाप्रमातृवशीकारोपलक्षणम् । यथा—

"कपालं च शरीराहन्ताधिवासितात्मा परिमितः प्रमाता यश्चित्तमयो मायाप्रमातेत्युच्यते ।"

(म०मं०प०, पृ० 185)

(3) लोकपालमन्त्रविशेषो न स्पष्टीकृतो जयरथेन ।

(तं०आ०वि०खं० 12, पृ० 201)

द्र० 'लोकपालमन्त्राः' इति ।

~बहुत्वे——समस्तवाच्यवाचकात्मकानि वेद्यानि । यथा—

"समस्तवाच्यवाचकात्मक जगत्खण्डरूपकपालैः ।"

(वि०मै०उ०, पृ० 16)

कपालमुद्रा——वर्णिता यथा—

(क) "उत्तानमञ्जलिं कृत्वा कपालं परिकीर्तितम् ॥"

(स्व०तं० 14/1)

(क) "एषा च विश्वसमाहरणप्रवृत्तसंवित्स्वरूपानुकारिणी ।
यदुक्तं मयैव श्रीभैरवानुकरणस्तोत्रे—
शाक्ताण्डखण्ड मध्ये विश्वरसमेवमहं समाहरामि सदा ।
व्यञ्जयसि करकपालगरुधिरमिषादेतदिव मेऽन्तः ॥
इति ।"

(स्व०तं०उ०, 14, पृ० 110)

कपालेशः~मन्त्रः——क्ष्म्र्यूं इति। यथा

"हान्तो यादिर्यकारान्तो रादिः षष्ठस्वरान्वितः।
बिन्दुनादसमायोगात् कपालेशः प्रकीर्तितः॥"

(स्व०तं०पं० 1-76-77)

हान्तः=क्ष्, यादिः=म्, यकारान्तः=र्, रादिः=य् इति।

कम्पः~उच्चारयोगे——देहादेः संविदन्तः-प्रवेशक्षणे जलमिश्रितपांसुवत्. परस्परमोतप्रोतयोः संवित् शरीरयोरैक्यस्य-शरीरात्मभावरूपस्य चिराभ्यस्तस्य या शैथिल्यरूपा हानिस्तद्वशादभ्यासिनो देहः भंगुरायमाणत्वेन कम्पते। स कम्प एवोच्चारादि-योगस्य यत् साफल्यं तस्य तृतीयमभिव्यञ्जकं बाह्यं लक्षणम्। यथा—

(क) जलपांसुवदभ्यस्त-संविद्देहैक्य हानितः॥
स्वबलाक्रमणाद् देहशैथिल्यात् कम्पयाप्नुयात्।

(तं०आ० 5-102, 103)

(ख) तदत्र भावनादेहगतोपायैः परे पथि।
"यदैष प्रविविक्षुः स्याद् योगी तावत् प्रकम्पते॥"

(मा०वि०वा० 2-57)

(ग) "ततः कम्पः स्वबलाक्रान्तौ देह तादात्म्यशैथिल्यात्।"

(तं०सा० पृ० 40)

~स्थानकल्पने——शङ्काविकं तत्त्वात्प्रच्यावकं भावजातम्। यथा—

"कम्पं शङ्कादिरूपं बलान्नि ह्रासयेत्।"

(तं०आ०वि० खं० 7/2, पृ० 102)

कम्प्रता——शक्तिभेदनप्रक्रियायां प्रमातृवर्गाणामुद्रिक्त-स्वशक्तिमद्रूपताविश्रान्ति पक्षे या शक्तिस्पन्दनात्मिका स्फुरद्रूपता, शक्तेर्बहिर्विकासं प्रत्युन्मुखतेव, सा तेषां कम्प्रता। तत्र सा स्थिरताया वैपरीत्येन तेषां स्थितिः। यथा—

"……… ……स्थिर कम्प्रत्वाच्चतुर्दशधरादिषु॥

(तं०आ० 10-103)"

"कम्प्रं स्पन्दात्मकं सव्यापारं शक्तिरूपम्।"

(तं०आ०वि० खं० 7, पृ० 79)

करकम्पः——द्र० 'करस्तोभः' इति।

करङ्किणी~कायिकी——कायिकाङ्ग-सन्निवेश-विशेषरूपा।

"कनिष्ठया विदार्यास्यं तर्जनीभ्यां भ्रुवौ तथा।
अनामे मध्यमे वक्त्रे जिह्वया तालुकं स्पृशेत्॥
एषा करङ्किणी देवी…………………।"

(तं०आ० 32-26, 27)

~कौले——

(क) "तत्त्ववृत्त्या तु करङ्किणी नाम स्वदेहेन्द्रियाख्यभेद-विगलनप्रगल्भा मुद्रा।"

(म०मं०प० पृ० 90)

(ख) "सर्वपरिक्षपणेन च स्वावशेषमात्रेणापि त्यागग्रहात्मिकैव करङ्किणी।"

(मा०वि० पृ० 32)

(ग) "पाञ्चभौतिकं शरीरं परमाकाशे या विश्रामयति सा करङ्किणी इति ज्ञान-सिद्धानां मुद्रा।"

(म०प्र०वि० पृ० 87)

~त्रिके——चित्तेनाभ्यसनीया विशेषप्रकारा मुद्रा। विश्वम् अस्थिपञ्जरात्मकं शवमिव विमृशन्ती पांचभौतिकं जगद्भावनया परे चिदाकाशे विलापयन्ती मुद्रा ज्ञानसिद्धानाम्। यथा—

"विगत चेष्टं करङ्कमात्रं शवमिव विश्वं पश्यन्त्या… .."

…………………………………………

(वि०भै०उ० पृ० 66)

"पाञ्चभौतिकं शरीरं परमाकाशे या विश्रामयति सा करङ्किणी इति ज्ञान सिद्धानां मुद्रा।"

(तदेव पृ० 67)

"करङ्को देहः, करङ्कानुभवात् करङ्किणी।"

(तदेव पृ० 67)

करणदेवताः——चैतन्यस्वरूपस्य परमेश्वरस्य ताः शक्तयो याः प्राणिनां करणचक्रमधितिष्ठन्ति। अज्ञान् जीवांस्ताः विषयोपभोगादौ प्रवर्तयन्त्यस्तेषां बन्धनानि दृढीकुर्वन्ति। परं प्रबुद्धाः साधकास्तासां वास्तविकं तत्त्वं जानन्तः सन्तस्ताः विषयात्मकैरुपहारैस्तर्पयन्ति भावनया। ताश्च तेषां स्वरूपसाक्षात्कारे सहायतामुपयान्ति, तुष्टाः सत्यः साधकान् स्वशिवत्वं प्रत्यभिमुखान् सम्पादयन्ति। भोगेच्छूनां बुद्धानां साधकानां कृते ता एव मारणमोहनोच्चाटनादिसिद्धिप्रदा भवन्ति। यथा—

"परमेश्वर्यः करण देवता एव भगवत्यस्तास्ताः क्रीडा वितन्वत्यः शिवार्कस्य दीधितिरूपाः, तथा ता एव तत्तत्परस्पर सांकर्यलब्धासंख्येय रूपास्तत्तदुच्चाटन-मारण-शान्त्यादि रूपेषु कर्मसु परिकल्पिततत्तत्समुचितसौम्यरौद्रप्रकाराः कृत्यादिभेदाद देवतात्वेनोपास्या उक्ताः मतादिशास्त्रेषु भगवद्भैरवभट्टारकपरिवारभूताश्च। यथोक्तम्

'उच्चाटने काक वक्त्रा………।

इत्याद्युपक्रम्य—

'ता एव देवदेवस्य रश्मयः कादिधारिकाः॥'

इत्यादि। तथात्वेन त्वपरिज्ञातस्वरूपाश्चिच्चमत्कारं

…………तिरोदधत्यः सांसारिकपाश्यपशुभावदायिन्यः।"

(पं०जी०वि० पृ० 42-43)

"ज्ञातस्वरूपाः ता एवोक्तयुक्त्या जीवन्मुक्तताप्रदायिन्यः।"

(तदेव पृ० 44)

करणम्——प्रमातुरङ्गभूतमिव विषयोन्मुखस्य ज्ञानस्य तथाविधायाः क्रियायाश्च साधनम्। तच्च बाह्येन्द्रियदशकमन्तः-करणत्रयं चेति त्रयोदशात्मकम् :

~आभ्यन्तरम्——मनोबुद्धिरहङ्कार इति त्रयमन्तः करणात्मकमान्तरस्य सुखदुःखादेर्ज्ञानस्य सङ्कल्पनाध्यवसायाभिमननक्रियाणां च साधनम्।

~करणयोगे——भोगसाधनं शरीरमेव योगविधेरालम्बनतां नीतं सत् करणयोगसाधनं भवति।

द्र० करणम्—'देहयोगे' इति।

~दिव्यम्——शाम्भवयोगोपयोगी मुद्राविशेषः। यथा—

"करणं तु ततः कृत्वा लक्षणं तस्य वै श्रृणु—
जिह्वा तु तालुके योज्या किञ्चिदूर्ध्वं न संस्पृशेत् ॥
ईषत् प्रसार्यं वक्त्रं तु किञ्चिदोष्ठौ न संस्पृशेत्।
दन्त-पंक्ती तथैवेह दृष्टिश्चाधोर्ध्ववर्जिता ॥
कायं समुन्नतं कृत्वा करणं दिव्यमुच्यते।"

(स्वं०तं०प० 4.265तः 267)

द्र० 'करणयोगः~शाम्भवे' इति।

~असद्व्याख्यातम्—— क्षेमराजेन हठयोगानुकूलं यज्जिह्वापरिवर्तनमुक्तं स्वकीये उद्द्योते तदसत् व्याख्यानमिति विदांकुर्वन्तु सुधियः। यथोक्तं तेन—

"अत्र जिह्वायास्तालु योजने कुञ्चितत्व मर्थलब्धम्"
....। इति।

(स्वं०तं०उ० खं० II पृ० 230)

अत्र विषये भगवद्दुर्वाससा यत् साक्षादुपदिष्टं तदनुसारमस्मभ्यं व्याख्यातं स्वगुरुभिराचार्यामृतवाग्भवैः। तदनुसारं जिह्वा नात्र परिवर्तनीया। किञ्चात्र याज्ञवल्क्यस्मृतौ यति धर्मप्रकरणे श्लो० 3-199 इत्यत्र यदुक्तं पुरातनेन योगिराजेन तदपि विमृष्टव्यं सुधीभिः।

~देहयोगे——सन्निवेश विशेषादि-विशिष्टः स्थूलो देहो यः आणवयोगविशेषे धारणायाः आलम्बनतां नीयते। यथा—

"देहः सन्निवेशविशेषात्मा करणशब्दवाच्यः।"

(तंत्र०सा० पृ० 35-36)

~बाह्यम्——बहिर्विषयोन्मुखं ज्ञानक्रियासाधनम्। तच्च पञ्चज्ञानेन्द्रियरूपं पञ्चकर्मेन्द्रियरूपं च वर्गद्वयभिन्नं दशविधम्।

~मुख्यम्——तच्च कला विद्या चेति द्वयमेव, प्रमेयांशं प्रति पुरुषाणां ज्ञानक्रिययोः साधनम्। कलाया एव विस्तारो मनः कर्मेन्द्रियाणि च। विद्यायाश्च विस्तारो बुद्धिर्ज्ञानेन्द्रियाणि च। ततो विद्याकले एव मुख्ये करणे.। विकलकरणैरपि तयोरेव बलाद् ज्ञानक्रिययोः प्रवर्त्यते। यथा—

(क) "अत एव विहीनेऽपि बुद्धिकर्मेन्द्रियैः क्वचित्।
अन्धे पङ्गौ रूपगतिप्रकाशो न न भासते ॥"

(तं०आ० 9-251)

(ख) "तेन मुख्ये करणे द्वे एव पुंसः, ज्ञानेविद्याक्रियायाञ्च कलेति।" ....
....

"अन्धस्य पङ्गोश्चाहन्तारूपज्ञानक्रियाऽनपगमात्।"

(तं०सा० पृ० 88)

~सामान्यम्——अशुद्धविद्या कला चेति द्वयमेव मुख्यमिति। सर्वेषां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च सामान्यरूपतया तत्रैव निविष्टत्वात्। यथा—

"तेनाशुद्धैव विद्यास्य सामान्यं करणं पुरा।
ज्ञप्तौ, कृतौ तु सामान्यं कला करणमुच्यते ॥"

(तं० आ० 9-286)

करणयोगः——आणवोपायेऽवरोहक्रमेण तृतीयो योगप्रकारविशेषः, तत्र पूर्वं परिपूर्णस्य स्वात्मनः शुद्धचिदानन्दात्मकस्य शिवरूपत्वस्य भावना विधीयते, ततस्तेनैव ग्राह्यग्राहकादयो ये मायीया सप्तभावविशेषास्तेषां मध्ये यस्य कस्याप्याक्षेपपूर्वकं परिपूर्णे स्वस्वरूपेऽवस्थानमनुभूयते। तदभ्यासेन चाणवः समावेशविशेषः सिद्धो भवति। अत्र योगे शारीरमुद्राणामुपयोगो विधीयते। तत एवास्य संज्ञा करणयोग इति, यतः शरीरादिरेव हि करणम्। यथा—

(क) "ग्राह्यग्राहकचिद्व्याप्तित्यागाक्षेपनिवेशनैः।
करणं सप्तधा प्राहुरभ्यासं बोधपूर्वकम् ॥
तद्व्याप्तिपूर्वमाक्षेपे करणं स्वप्रतिष्ठता।"

(तं०आ० 5-129, 130)

(ख) "बोध्यन्यग्भावेन स्वात्मैकताननतामापन्नं बोधमेव कथितवन्त इत्यर्थः।"

(तं०आ०वि० खं० 3, पृ० 439)

द्र० तत्रैव त्रिशिरोभैरवप्रकरणमुद्धृतं विस्तरतः।

(पृ० 440, 41)

~गोपनीयः——एवं तर्क्यंते यत्करणयोगस्य स्फुटेन व्याख्यानेन तथाविधा सुबोध्यताऽभविष्यद् यथाऽनधिकारिणोऽपि तस्याभ्यासं कुर्वन्तस्तदनन्तरं तस्यानुषङ्गिकाणां फलानां दुरुपयोगमकरिष्यन्निति विचिन्त्य गुरुभिस्तस्योपदेशः स्फुटतया नैव कृतः क्वापि ग्रन्थेषु। उच्चारादीनां सूक्ष्मसूक्ष्मतरस्वभावत्वेन स्फुटतया व्याख्याने कृतेऽपि प्रबुद्धैरेव ग्रहणं कर्तुं शक्यते। ततस्तेषां स्फुटेऽपि व्याख्याने न कापि क्षतिः। करणयोगस्य स्थूलदेहालम्बनतयाऽनधिकारिभिरपि ग्रहणं कर्तुं शक्येतेति न तत् स्फुटं व्याख्यातम्। यथोक्तम्—

"गुरुवक्त्राच्च बोद्धव्यं करणं यद्यपि स्फुटम्।
तथाप्यागमरक्षार्थं तदग्रे वर्णयिष्यते ॥"

(तं०आ० 5-130, 131)

अग्रे इति तन्त्रसारोक्त्या मुद्राप्रकाशनप्रकरणे इति। याश्च जयरथेनाग्रिमाः कारिकाः काश्चनात्रोद्धृतास्तासां करणयोगेन साकं कथं प्रतिपाद्य-प्रतिपादक-भाव सम्बन्ध इति न स्पष्टीभवति।

किञ्च तास्वप्यस्य योगस्य स्वरूपं न विशेषतया स्फुटतां याति। न च जयरथेनोद्धृतानां वाक्यानां त्रिशिरोभैरवीयैर्वाक्यैः सह समानार्थता। ततः संशयितमेव जयरथकृतं समाधानमत्र विषये। यथा—

(क) "देह : सन्निवेशविशेषात्मा करणशब्दवाच्यः।"

(तं॰सा॰ पृ॰ 35-36)

(ख) "करणं तु मुद्राप्रकाशने वक्ष्यामः।"

(तदेव पृ॰ 43)

(ग) ……… …… ……………

……………………………

"धियि प्राणे देहे तदनु वहिरित्याणवतया
स निर्णीतः……… ………………॥"

(तदेव)

~दिव्यात्मकः——

द्र॰ **'दिव्यं करणम्'** इति

~मुद्रात्मकः———देहस्यावयवानां सन्निवेशेषेणाभिव्यज्यमानो बोधरूपो व्यापारः मुद्रापद-वाच्यः करणम्।

(तं॰सा॰ पृ॰ 35, 36, 43)

यथोक्तम्—

"ग्राह्य-ग्राहक चिद्-व्याप्ति-त्यागाक्षेप-निवेशनैः।
प्रकारैः सप्तभिर्भिन्नमभ्यासं बोधपूर्वकम् ॥
प्राहुः करणमप्यत्र व्याप्त्या स्वात्मप्रतिष्ठिता।
बोध्यं न्यक्कृत्य स्वात्मैकतानतामागतं पुनः॥
बोधमेव परं प्राहुः करणं तद्विदो जनाः।
ज्ञातव्यं तच्च गुरुतोऽन्योऽर्थोऽस्याप्यधुनोच्यते॥"
मुद्रादिपदवाच्यो यो देहस्यावयवस्य वा।
सन्निवेशविशेषात्मा व्यापारः करणं स्मृतम्।"

(पू॰प्र॰ खं॰ 1, श्लो॰ 92-95)

विशेषरूपैका प्रक्रिया करणयोगस्य वर्णिता मुद्राविशेषमयी।

द्र॰ **'दिव्यं~करणं'** इति।

एतेनैतत् सिद्धयति यत् करणयोगो बाहुल्येन मुद्राभ्यासात्मक एवेति।

~रहस्यस्वरूपतः——

(1) सप्तस्वपि करणयोगप्रकारेषु ग्राह्यग्राहकादिविकल्पानां प्रसरेऽपि सर्वस्यापि तस्य प्रसरस्य तत्तत्परिमितस्वरूपन्यग्भावेना परिमितबोधमात्रविश्रान्त्याभ्यासतः स्वात्ममहेश्वरभावसमावेशाभ्यासो विधीयते। यथा—"तद्धिकरणम्—

सोऽहं ममायं विभव इत्येवं परिजानतः
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता।"

(ई॰प्र॰ 4-1-12)

"इत्याद्युक्तनीत्या व्याप्तिपूर्वं विश्वस्याक्षेपे स्व प्रतिष्ठिता" स्वात्मन्येव विश्रान्तिरित्यर्थः।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 439-440)

~शाम्भवोपाये——विशेष-प्रकारोत्कृष्टतरा करणयोग-प्रक्रिया तु शाम्भवीमुद्रा।

द्र॰ **'करणं—दिव्यम्'** इति।

भगवद्गीतासु (6-11 तः 14)
याज्ञवल्क्य स्मृतौ (3-198 तः 201)
कुमारसम्भवे (3-45 तः 50)
चास्याः मुद्रायाः स्पष्टं प्रतिपादनं कृतं वर्तते।

"शाम्भवयोगोपयोगिन्येषा मुद्रेत्यस्मद्गुरवः श्रीमदमृतवाग्भवाचार्याः। तदुक्तं तैः—

पद्मासनमधिष्ठाय समसर्वाङ्गविग्रहम्।
परस्परोपरिधृतौ करौ कृत्वाङ्कगावुभौ॥
निवातदीपवत्तिष्ठन् क्रिया ज्ञानैषणाः समाः।
अगृह्णन्नत्यजन् नित्यं स्वात्मानं शम्भुमीक्षते॥"

(सि॰म॰र॰ 6-21, 22)

~सप्तविधः——करणयोगस्य सप्तप्रकारतानिरूपणाय-समुद्धृतानि त्रिशिरोभैरववाक्यानि करणयोगप्रतिपादकानि तन्त्रालोकटीकायां जयरथेन। यथा—

"ग्राह्यं च ग्राहकं चैव संवित्तिं च तृतीयिकाम्।
सन्निवेशं तथा व्याप्तिमाक्षेपं त्यागमेव च॥
करणं सप्तधा ख्यातमभ्यासं बोधपूर्वकम्।
तद्व्याप्तिपूर्वमाक्षेपे करणं स्वप्रतिष्ठिता॥"

(उद्ध॰तं॰आ॰वि॰ खं॰ 3, पृ॰ 440)

~स्पष्टीकृतौ —— सूक्ष्मातिसूक्ष्मस्य चित्स्वरूपस्य मनोव्यवधानरहितः साक्षात्कारो यतोऽतीव कठिनस्ततस्त्रिकयोगिनो ग्राह्यग्राहकादिपदार्थानाश्रित्य तेषु व्यापकत्वेन स्थितं चिद्रूपत्वमनुसन्धाय व्याप्यं पदार्थजातं तदन्तर्निमज्ज्य चित्प्रतिष्ठामेव तत्र तत्र साक्षात्कुर्वन्तश्चिदानन्दरसचमत्कारतश्चिद्रूपतायाः समावेशमभ्यस्यन्ति। तदेतदेव रहस्यं करणयोगस्य स्पष्टीकृतमन्यत्राभिनवगुप्तपादैर्दृष्टान्तप्रदर्शनपूर्वकम्—यथा—

"तदुक्तं मयैव स्तोत्रे—

वितत इव नभस्यवच्छिदैव प्रतनु पतन्न विभाव्यते जलौघः।
उपवनतरुवेश्मनीध्रभागाद्युपधिवशेन तु लक्ष्यते स्फुटं सः॥"
तद्वत् परभैरवोऽतिसौक्ष्म्याद् अनुभवगोचरमेति नैव जातु।
अथ देशाकृतिकालसन्निवेश-स्थितिस्पन्दितकारकत्व योगाः॥
जनयन्त्यनुभाविनीं चितिं ते झटिति न्यक्कृतभैरवीय बोधाः।"

(प॰त्री॰वि॰ पृ॰ 23)

निजस्वरूपतो न्यक्कृत-भैरवीयबोधाः जडा अपि पदार्थाः करणयोगनीत्योपयुक्ताः सन्तः शिवत्वानुभाविनीं चितिं झटिति जनयन्तीति तात्पर्यमत्र, पाठभेदो वा भवेत् कश्चन।

करण वृत्तिः~द्विप्रकारा——

(1) अन्तः प्राणनात्मिका वृत्तिः,

(2) नील-सुखादि-विषयोन्मुखा वृत्तिः। यथा—

"तत्रैव शून्ये प्रमातरि समवेता प्राणापानसमानोदानव्यानात्मके वायुचक्रे प्रेरणात्मिका शक्तिः। सा च विद्याकलयोः प्रपञ्चभूतौ यौ क्रमेण बुद्धीन्द्रियकर्मेन्द्रियवर्गौ तयोरान्तरी वृत्तिः। बाह्या हि तयोः शब्दाद्यालोचनशब्दाभिव्यक्तिस्थानामिहननादिका वृत्तिः।"

(ई०प्र०वि० खं० 2, पृ० 235-236)

करणशक्तिः~योगिनः——करणे सम्पादने समर्थता। यथेच्छं-भावनिर्माणशक्तिर्योगिनः ईश्वरस्येव-सृष्टिशक्तिः।

"योगिनः करणशक्तिः—स्वेच्छानुसारिणी निर्माणशक्तिर्या-पूर्वमुक्ता सा स्वत एव भवति।

(शिव०सू०विवृ० 3,37)

करणस्कन्धः~अहङ्कारस्य——

द्र० 'अहङ्कारः—करणस्कन्धतः' इति।

करणानि~द्वादश——कर्मेन्द्रियगणः ज्ञानेन्द्रियचक्रं मनोबुद्धिश्चेति द्वादशकरणानि गण्यन्ते कालीनये। अहङ्कारस्य करणत्वेऽपि नात्र तन्मध्ये गणना। द्वादशात्मकस्यास्य वर्गस्याहङ्कारा‍धीनत्वात्, तस्य चैतस्मिन् वर्गे स्वतन्त्रत्वात्। द्वादशकरणानामत्र 'सूर्य' इति संज्ञा। यथा—

"कर्मबुद्ध्यक्षवर्गो हि बुद्ध्यन्तो द्वादशात्मकः।
प्रकाशकत्वात् सूर्यात्मा भिन्ने वस्तुनि जृम्भते॥"

(तं०आ० 4, 160)

करस्तोभः——(1) करकम्पः, करचालनम्, शिष्यदेहस्थे विशेषे चक्रे करपातनम् शिवहस्तविधौ। यथा—

"इत्येष समयी प्रोक्तः श्रीपूर्वे करकम्पतः॥
समयी तु करस्तोभादिति श्रीभोगहस्तके।"

(तं०आ० 29-197, 198)

"यच्छ्रीपञ्चाशिका—

'समयी तु करस्तोभान्मुद्रया पुत्रको भवेत्।"

(तं०आ०वि०खं० 11/2, पृ० 129)

(2) स्तोभपदं कम्पपदं चात्रैवविधेष्वागमवाक्येष्वेव यतः समानमेवार्थं प्रतिपादयितुं प्रयुक्तं तत इदं प्रतीयते, यत् स्तोभपदं तान्त्रिकसाधनासु कम्पार्थकम्। तेन करस्तोभः=करकम्पः इति। स्तुभ्यति=कम्पविशेषरूपां गतिं गृह्णति इति। गुरुणा मन्त्रशक्तिबलेन शिष्यस्याभिमन्त्रितो हस्तश्चालनीयो भवति, संचालितो यद् यदेवाङ्गं स्पृशति तत्र तत्रैव पुष्प-चरु-वस्त्रादिसमर्पणं क्रियते कौलदीक्षाविधौ। असौ तथाविधो हस्तकम्पः हस्तस्य च तत्र तत्र प्रचालनं करस्तोभः कौलिके विधौ। यथा—

"अनेनैव प्रयोगेण चरुकं ग्राहयेद् गुरुः।
शिष्येण दन्तकाष्ठं च तत्पातः प्राग्वदेव च॥
करस्तोभो नेत्रपटग्रहात् प्रभृति यः किल।
दन्तकाष्ठसमादानपर्यन्तस्तत्र लक्षयेत्॥"

(तं०आ० 29, 195-96)

~**परीक्षणार्थः**——चेत् स्तोभितः शिष्यहस्तः पुष्पपातप्रणामचरुदानादौ प्रतिवारमेकस्मिन्नेवाङ्गे पतेत्, तत्रैव च चरुदानादि कारयेत्, तदा तीव्रोऽनुग्रह इति सिद्ध्यति। चेत् पूजाङ्गेषु भिन्न-भिन्नेषु पतन् भिन्नभिन्नान्येतान्यङ्गानि स्पृशेत् तदाऽनुग्रहस्य मन्दता ज्ञायते। यथा—

"...... .... तत्र लक्षयेत्॥
तीव्रमन्दादिभेदेन शक्तिपातं तथाविधम्।"

(तं०आ० 29, 197)

"यदा हि यत्रैव चक्रे पुष्पपातो वृत्तस्तत्रैव प्रणामस्तत्रैव चरुदानं, तत एव तद्ग्रहणमित्यादि, तदा तीव्रः शक्तिपातो लक्षणीयः अन्यथा तु मन्दः इति।

एतेषां चलनान्मन्त्री शक्तिपातं परीक्षयेत्।
मन्दतीव्रादिभेदेन मन्दतीव्रादिकं बुधः॥"

(उद्ध०तं०आ०वि० खं० 11/2, पृ० 128)

द्र० 'स्तोभ' इति।

कर्करी—कलशी। ओषध-नवरत्नगर्भो-तीर्थजलपूरितः सन् यागस्थलपरिक्रमायां मन्दमन्दं जलधारा-निपातन-साधनत्वेनोपयुज्यमानो लघीयान् कुम्भः। असौ यागमण्डपे ईशानकोणे कलशस्य पार्श्वे स्थाप्यते पूज्यते च यागविघ्नोपशान्तये यागरक्षाविधौ। यथा—

"असिना कर्करीं पूर्वमस्त्रयागो न चेत् कृतः।
तमैशान्यां यजेत् कुम्भं वामस्थकलशान्वितम्॥
ततः सौरदिगाश्रित्या सास्त्राँल्लोकेश्वरान् यजेत्॥
गन्धपुष्पोपहाराद्यैर्विधिना मन्त्रपूर्वकम्।
ततः शिष्योऽसिकलशी हस्तो धारां प्रपातयन्॥
गुरूणा कुम्भहस्तेनानुव्रज्यो वदतात्त्विदम्।
भो भोः शक्र त्वया स्वस्यां दिशि विघ्नप्रशान्तये॥
सावधानेन कर्मान्तं भवितव्यं शिवाज्ञया।"

(तं०आ० 15-378 तः 383)

इयं कलशी त्वद्यत्वे काश्मीरभाषायां "चोड़्" इत्युच्यते।

कर्काचार्यः——उत्पलदेवस्य कोऽपि सम्बन्धी। यदुल्लेखस्तेनेश्वरप्रत्यभिज्ञाविवृत्यन्ते कृतः संस्तद्विमर्शिन्यां व्याख्यातोऽभिनवगुप्तमहोदयेन। यथा—

"कर्काभिधानः इति यदीयं·कर्कसंप्रहादिशास्त्रम्।"

(ई०प्र०वि०वि० खं० 3, पृ० 404)

कर्णः——अभिनवगुप्तस्य कोऽपि प्रियः शिष्यो यदर्थं तेन परात्रीशिकाविवरणं निर्मितम्। (तन्त्रालोक निर्माणं तु परलोकं गते

कर्णे कृतम्, परात्रींशिकाविवरणं पुनर्जीवति तस्मिन । मालिनीविजयवार्तिकमपि तथैव । तत एव तद्ग्रन्थद्वयनिर्माणानन्तरं तन्त्रालोकनिर्माणकालः सिद्धयति ।) यथा—

"ध्यानार्चा परिचिन्तनैकरसिकः कर्णाभिधानो द्विजः ।"

(प०त्री०वि० पृ० 271)

द्र० 'कर्णमन्द्रौ' इति ।

कर्णमन्द्रौ——अभिनवगुप्तस्य प्रियौ सच्छिष्यौ । यथा—

"सच्छिष्यकर्णमन्द्राभ्यामर्थितोऽहं पुनः पुनः ।
वाक्यार्थं कथये श्रीमन्मालिन्यां यत् क्वचित् क्वचित् ॥"

(मा०वि०वा०, 1-11)

कर्तृता——द्र० 'कर्तृत्वम्' इति ।

~अनुपचरिता——स्वस्मादभिन्नं ज्ञेयं प्रति स्वाभाविकी कर्तृता शिवस्य । सेयं परिपूर्णपारमैश्वर्य-विमर्शनमयी । यथा—

"अनुपचरितस्त्वं वेत्थम्—यदि न व्यतिरिक्तं ज्ञेयं कार्यं च, अपि तु आत्मैव ज्ञेयीक्रियते इति । अत्र च स्वातन्त्र्यशक्तिरेव जृम्भते ।"

(ई०प्र०वि०वि० खं० 2, पृं० 208-9)

~उपचरिता——स्वतो व्यतिरिक्ता ज्ञेयोन्मुखी कर्तृता तूपचरितैव न मुख्या । यथा—

"यदि च व्यतिरिक्तज्ञेयोन्मुखता भवेत्
उपचरितेयं स्यान्न पामार्थिकी ।"

(ई०प्र०वि०वि०खं० 2, पृ० 208)

कर्तृत्वम्——स्वातन्त्र्यमिति । यथा—

"तेन कर्तृत्वं शुद्ध-स्वातन्त्र्य-रूपं पूर्णमिह समर्थनीयम् ।"

(ई०प्र०वि०वि०खं० 1, पृ० 209)

~अपरम्——सर्वकर्तृत्वम् । तद्धि दार्शनिकदृष्ट्येश्वरत्वम् । कुम्भकारादेर्घटादिकर्तुरपीश्वरत्वमेव, परं मायाशक्त्या सङ्कोचितं सत्तन्नेश्वरतया व्यवहारविषयतामुपयाति । एतत् सूचितं यथा—

"कुम्भकारचैतन्यमीश्वर एव । तन्नियतिमहिम्ना तु चक्रदण्डादिवर्गपतित एव कुलालकार्यकारणतावभासः स्वप्नसङ्कल्पादिवदित्यसकृन्निवेदितम् ।"

(ई०प्र०वि०वि०खं० 3, पृ० 186)

~मितप्रमातुः——परमेश्वरोद्भावितेन सङ्कुचितेनाभिमानेन विमृशन् परिमितः प्रमाता स्वात्मानमेव तत्तत्कर्मजातकर्तृत्वेनाभिमनुते । स एष तस्य कर्मकर्तृत्वे यः संकुचितो मिथ्याभिमानः स एव कार्मो मलो, येनासौ परवशः सन् संसरति । यथा—

"कथं कुम्भकारशरीरस्य कर्तृत्वाभिमानः इति चेत् परमेश्वरकृत एवासौ घटादिवद् भविष्यति ।"

(तं०सा० पृ० 72)

~वास्तविकम्——वस्तुतः सर्वत्र घटादावपि भगवान् शिव एव कर्ता । कुलालादेरपि चैतन्यं यद् घटादिकर्तृत्वेन मन्यते, तदपि वस्तुतः शिवचैतन्यमेव, केवलं मायाकृतावावरणात् तथा नावभासते । तेनैव जीवस्य मिथ्याकर्तृत्वाभिमानः कार्मो मलः संसृतिहेतुः । यथा—

(1) "कुलालस्यापि-तु परमेश्वर-संवेदने एव विश्रान्तिरिति तत्त्वम् ।"

(ई०प्र०वि०वि०खं० 3, पृ० 191)

वस्तुत इदमेव हि वास्तविकं तत्त्वं यद्यपि न तथावबुद्ध्यते जनैः । यथा—

(2) "नन्वेवं कुम्भकृतो नास्ति कर्तृत्वमिति समुत्सीदेद् धर्माधर्मव्यवस्था । यदि प्रत्येषि युक्त्यागमयोस्तदेवमेव । तथापि समस्तेतरनिर्माणमध्य एवेदमपि परमेश्वरेणैव निर्मितं, यदविचलस्तस्य कुम्भकार पशोर्मिथ्या कर्तृत्वाभिमानः, प्रतिभुव इवाधमर्णताभिमानः ।"

(ई०प्र०वि० खं० 2, पृ० 149)

(3) "तत्रापि च परमेश्वरस्य कर्तृत्वानपाय इति—अकल्पितोऽपि असौ पारमार्थिकः स्थित एव । पारमार्थिके हि भित्तिस्थानीये स्थिते रूपे सर्वमिदमुल्लिख्यमानं घटते ।"

(तं०सा०पृ० 70)

(4) "परमेश्वर एव विश्वभावशरीरो घटादेर्निर्माता, कुम्भकार-संविदस्ततोऽनधिकत्वात् । कुम्भकार-शरीरस्य च भावराशिमध्ये निक्षेपात् ।"

(तदेव पृ० 71-72)

~शिवस्यैव——यद्यपि शास्त्रानुसारं शुद्धेऽध्वनि शिवः कर्ता मायीये पुनरशुद्धेऽनन्तनाथः, तथापि वस्तुतः सर्वत्रापि शिवस्यैव मूलतः कर्तृत्वं यतोऽनन्तनाथादीनां कर्तृत्वं शिवेच्छानुसारमेव प्रचलति, न तद्विरुद्धतया वा स्वतन्त्रतयापि वा । यथा—

"ऐश्वरः शुद्धः सर्गो यत्रोच्यते—
'शुद्धेऽध्वनि शिवः कर्ता ·····।' इति
मायीयस्त्वशुद्धो यत्रोक्तम्-
······'प्रोक्तोऽनन्तोऽसिते प्रभुः । इति

सर्वत्र च वस्तुतः शिवस्यैव कर्तृत्वेऽपि तदिच्छा-कृतादभिमानतोऽन्यस्य कर्तृत्वमुच्यते' ।"

(ई०प्र०वि०वि०खं० 3, पृ० 261)

~सर्वत्र——तद्धि परमेश्वरस्यैव, यतस्तदिच्छावभासितनियति-शक्त्यनुसारमेव कुलालाद्याः मृद्दण्डचक्रादि-सहकारि-सहायतया घटादि जनयन्ति । मृद्दण्डचक्राद्या जडा अपि तदिच्छयैव कुलालादीनामिच्छामनुवर्तन्ते । यथा—

"ततश्च कुम्भकृदेव तत्रेश्वरो यतस्तं तं मर्दनप्रगुणीकरणपरिवर्तनादिकं मृद्दण्डचक्रादिकस्य संस्कारं कुर्वंस्तत्क्रमेण शिविकस्तूपकादिना घटं जनयतीति नियोग एषः । ईश्वर एव च तथा नियतिशक्तिस्वीकृततथारूप्याभासः कुम्भकृद्वा, कुविन्दो वा, इति

सर्वत्र स एव कर्ता, अन्यथा कुम्भकृतः इच्छां मृद्दण्डादयः कथमनुवर्तेरन्, तन्तवोऽपि वा पटकरणाय किं न अनुवर्तेरन् । कुम्भकृतस्तु यः कर्तृत्वाभिमानो नियतो धर्माधर्मादिस्थितिः, सोऽपि ईश्वरव्यवस्थयैव स्पष्टभिमानोत्थापिकया प्रतिभुव इव अधमर्णभाव इति सर्वत्र भगवानेव कर्तेति ।"

(ई॰प्र॰वि॰वि॰खं॰ 3, पृ॰ 193)

कर्तृत्वाभिमानः——वस्तुतः शिव एव सर्वकर्ता । कुम्भकारादेर्यो घटादिकर्तृत्वाभिमानोऽसौ मायाकृतावरणवशादेव भासते । परं शिव एव तथाऽभिमानावभासकर्ता । यथा—

"तस्मादेकैकनिर्माणे शिवो विश्वैकविग्रहः ।
कर्तेति पुंसः कर्तृत्वाभिमानोऽपि विभोः कृतिः ॥"

(तं॰आ॰ 9, 38, 39)

कर्म——(1) जात्यायुर्भोगफलाः विहिता निषिद्धाश्च पशुप्रमातुः कर्तृत्वाभिमानसचिवाः क्रियाः, यद्वशात् कार्मो मलस्तस्य येन च तस्य सततं संसरणम् ।

(2) सुखभोगावाप्तिफलमग्निहोत्रादि विहितं कर्म दुःखावाप्तिफलं च स्तेयादिकं निषिद्धं कर्म क्रमेण पुण्यपापरूपतया यत् प्रसिद्धं तदेव कर्म । जपध्यानादिकं चोपासना न तत् कर्म । यथा—

"कर्म तल्लोकरूढं हि यद्भोगमवरं ददत् ।
तिरोधत्ते भोक्तृरूपं संज्ञायां तु न नो भरः ॥"

(तं॰आ॰ 13, 263)

~अनादि——परमेश्वरः स्वस्वभावतिरोधित्सया स्वात्मन्यणुत्वमवभासयन्नात्मानमेव जीवरूपतया प्रकटयति । जीवश्चात्मनोऽपूर्णत्वं प्रमेयोन्मुखज्ञानक्रियाभ्यां पूरयितुं यतते । तद्विषये तस्य प्रवृत्तिर्लौलिकेत्युच्यते । तदेव हि मूलं कर्मणाम् । तच्च मायाविकासरूपायाः कालकलनायाः सृष्टेरुपरिष्टादेवाविर्भवति । ततः कर्मणां मूलं कालकलनातीतत्वविवक्षयाऽनादीति कथ्यते, न पुनरारम्भराहित्यविवक्षयेति बोध्यम् । किञ्च केन पशुप्रमात्रा कदा कर्माण्यारब्धानीति न निश्चेतुं कथमपि शक्यम् । कालसृष्टेः पूर्वमेवतस्य तस्य जन्तो-र्लौलिकोदयात् । ततोऽपि कर्मणोऽनादित्वम् आरम्भ-ज्ञान-राहित्यम् । यथा—

"ईश्वरस्य च या स्वात्मतिरोधित्सा निमित्तताम् ।
साभ्येति कर्ममलयोरतोऽनादिव्यवस्थितिः ॥"

(तं॰आ॰ 13-110, 11)

कर्म-क्रिये——कर्मक्रिये न पृथग्वस्तुद्वयम्, कर्मणः क्रियात्मकत्वात् । यथा—

"·········यतः कर्म क्रियात्मकम् ।"

(तं॰आ॰ 9-98)

कर्मशोधनम्——फलदानेऽसमर्थतापादनं तेषाम् । तच्च गुरुणा क्रियते । दीक्षाविधौ गुरुणा बुभुक्षोरशुभान्येव कर्माणि शोध्यानि भवन्ति, न शुभानि, मुमुक्षोस्तु तान्यपि । यथा—

"दुष्टानामेव सर्वेषां भूतभव्यभविष्यताम् ।
कर्मणां शोधनं कार्यं बुभुक्षोर्न शुभात्मनाम् ॥"

(तं॰आ॰ 16, 302, 303)

कर्मदाहः——अज्ञानदशायां कृतं सर्वमपि फलदानायाप्रवृत्तं कर्म ज्ञानोदयसमकालमेव फलोपजननसामर्थ्यरहितं सञ्जायते । स एव कर्मदाह इत्युच्यते । परं प्रारब्धं कर्म तदापि फलदानाय तिष्ठति, न दग्धं भवति । केवलं क्रियमाणं सञ्चितं च कर्मजालं दग्धं भवति । यथा—

"अतो मोहपराधीनो यद्यप्यकृत किंचन ।
तथापि ज्ञानकाले तत्सर्वमेव प्रदह्यते ॥"

(तं॰आ॰ 9-133, 34)

कर्मनाशः——(1) ज्ञानेनैव कर्मणो भोगदान-सामर्थ्यस्य यो नाशो विधीयते स एव कर्मनाशः । यथा—

"नन्वित्थं प्रदहेज्ज्ञानं कर्मजालानि·········।"

(तं॰आ॰ 13, 13)

कर्मजालानि न दहेत्, केवलं तेषां फलदानसामर्थ्यमेव दहेत्, इति तात्पर्यम् ।

(2) ज्ञानाग्निः सर्वाणि सञ्चितान्येव कर्माणि दहति न प्रारब्धानि । तेन सञ्चितकर्मदाह एव योगिनः कर्मनाशः । यथा—

"अज्ञानकालनिचितं धर्माधर्मात्मकं तु कर्मापि ।
चिरसञ्चितमिव तूलं नश्यति विज्ञानदीप्तिवशात् ॥"

(प॰सा॰का॰ 55)

सञ्चीयमानमप्यत्र सञ्चितपदेनोपलक्ष्यते ।

~वार्तमानिकाः——अस्मिन्नेव जन्मनि स्वरूपसाक्षात्कारात् प्राक् तदनन्तरं वा क्रियमाणानि कर्माणि नाश्यन्ते साक्षात्कारात्मकेन ज्ञानेन । एवमेव दीक्षायाः प्रागनन्तरं वा कृतान्यत्रत्यानि कर्माणि दीक्षया दाह्यन्ते । यथा—

"तत्रैव देहे यत्त्वन्यदद्यगं वा पुरातनम् ।
कर्म तज्ज्ञानदीक्षाद्यैः शण्ठीकर्तुं प्रसह्यते ॥"

(तं॰आ॰ 9-131-32)

कर्मनिरोधः——फलपाकोन्मुखतामनायातं सत् कर्म प्रायश्चित्तादिकर्मणा, तपसा वा, स्वशिवत्वप्रत्यभिज्ञया वा मनाङ् निरुध्यते, न च तथा फलं ददाति । यथा—

"अत एव कृतं कर्म कर्मणा तपसापि वा ॥
ज्ञानेन वा निरुध्येत फलपाकेष्वनुन्मुखम् ।"

(तं॰आ॰ 9-129-30)

"यद्धि यावत् कार्यमेवारब्धुं न प्रवृत्तं तावत्तदारम्भकत्वमेवास्यान्तरा केनचिदुपायेन प्रतिबध्यते इति युक्तस्तन्निरोधः यत्पुनस्तदारब्धुमेव प्रवृत्तं तस्य प्रवृत्तत्वादेव किं निरुध्यते ।"

(तं॰आ॰वि॰ खं॰ 6, पृ॰ 103)

ततः फलवान प्रवृत्तं कर्म न निरोद्धुं शक्यते ।

कर्मनिष्फलता— —यथा हि मृष्टानि बीजानि नांकुरोत्पादने समर्थानि तथैव ज्ञानाग्निदग्धसामर्थ्यानि योगिनः सञ्चितकर्माणि न फलप्रदानि । यथा—

"अग्न्यभिदग्धं बीजं यथा प्ररोहासमर्थतामेति ।
ज्ञानग्नि-दग्धमेवं कर्म न फलप्रदं भवति ॥"
(प०सा०का० 62)

"हयमेधशतसहस्राण्यपि-
कुरुते ब्रह्मघात-लक्षाणि ।
परमार्थविन्न पुण्यै-
नं च पापैः स्पृश्यते विमलः ॥"
(पं०सा०का० 70)

कर्मफलदाहः——स्वकृतकर्मणां विषये ये विविधानामभिमानानां संस्कारास्ते एव कार्मो मलो यो जनान् कर्मफलभोगार्थं संसृति-चक्रेषु भ्रामयति । "शिव एव सकलकर्मकर्ता, अहमपि स एवेति सर्वकर्ताऽहं नाल्पकर्मकर्ता" इत्येवंविधः शिवज्ञानानलः सर्वाणि संचितानि क्रियमाणानि च कर्माणि भृष्टचणकादिबीजतुल्यामवस्थामापादयति । यथा—

"शङ्कावज्रप्रलेपान्तदृढबद्धां त्विमां मतिम् ।
भैरवानल एवैकः समूलं प्लुष्यति क्षणात् ॥"
(मा०वि०वा० 1-1090)

कर्मफलावप्तिः——यदा कर्ता कर्म कुरुते तदासौ तत्फलाभिसन्धानपूर्वकमेव कुरुते । तदभिसन्धान-संस्कारेण चाग्रे तत् कर्म समुचिते काले तस्मै स्वफलं प्रसूते । यथा—

"तथाभिसंधानाख्यां तु मानसेकर्म संस्क्रियाम् ॥
फलोपरक्तां विदधत् कल्पते फलसम्पदे ।"
(तं०आ० 9-107, 108)

कर्मभूः——कन्याद्वीपापरनाम्नी भारतभूः । यथा—

"नानावर्णाश्रमाचार-सुखदुःखविचित्रता ।
कन्याद्वीपे यतस्तेन कर्मभूः सेयमुत्तमा ॥"
(तं०आ० 8-91)

कर्ममलसम्बन्धः——सङ्कोच एव हि मलः । तत्संस्कारेण या परिमितकर्तृत्वाभिमानरूपता सैव कर्मणः फलप्रदत्वकारणभूता । सैव स्थितिः कर्मणो मलजन्यता । ततः कर्मणः फलप्रदत्वमेव मलजन्यं न कर्मस्वरूपम् । यथा—

"या त्वस्य कर्मणश्चित्रफलदत्वेन कर्मता ॥
प्रसिद्धा सा न संकोचं विनात्मनि मलश्च सः ।"
(तं०आ० 9-99-100)

(2) कर्मणः क्रियात्मकत्वात् कर्तैव तस्याश्रयः कारणं च, न मलः, तस्य जडत्वादकर्तृत्वाच्च । यथा—

"किञ्च कर्मापि न मलाद्यतः कर्म क्रियात्मकम् ॥
क्रिया च कर्तृतारूपात् स्वातन्त्र्यान्न पुनर्मलात् ।"
(तं०आ० 9-98, 99)

कर्मयोगी——प्राप्तस्वात्मपरमेश्वरताविनिश्चयो रागादिराहित्येन लोक-संग्रहार्थं कर्म कुर्वाणः साधकः । असौ समाधियोगनिष्ठाद् योगिनः सकाशादुत्तमः । यथा—

"तदेवं सत्स्वेव विषयेषु रागादिदोषोन्मेषशून्यत्वात् परमात्मसम्पन्नः कर्मयोगी जीवन्नेव मुक्तः················ ········ ··
चित्तवृत्ति-निरोध-लक्षण-योगाभ्यास-निष्ठस्य योगिनः सकाशात् सदा स्वरूप-प्रतिष्ठ-संवित्कर्मयोगी विशिष्टः प्रतिपादितः·····।"
(भ०गी०सं० पृ० 132-33)

कर्मवासनाफलम्——संकुचिते प्रमातरि कर्मकर्तृत्ववासना सततमारूढैव तिष्ठति । असौ वासनैव देहान्ते तं तत्र तत्राभिनवे देहे प्रवेशयति यत्र यत्र तस्याः फलप्राप्तिः सम्भवेदिति बलादिवान्यस्मिन् देहे प्राणिनं प्रवेशयति । यथा—

"परिमित बुद्धित्वेन हि कर्मोचितभाविदेहभावनया ।
संकुचिता चितिरेतद्देहध्वंसे तथा भवति ॥"
(प०सा०का० 63)

कर्मशोधनम्——पुत्रकादिदीक्षाविधिषु गुरुर्मन्त्रबलेन शिष्यस्य कर्माणि शोधयति । असौ मुमुक्षोः सर्वाणि शोधयति, बुभुक्षोश्चाशोभनान्येव, विहाय प्रारब्धकर्माणि । तानि नैव शोध्यानि भवन्ति । तच्छोधने सद्यः शरीरपातो भवेच्छिष्यस्य । यथा—

"दुष्टानामेव सर्वेषां भूतभव्यभविष्यताम् ॥
कर्मणां शोधनं कार्यं बुभुक्षोर्न शुभात्मनाम् ।"
(तं०आ० 16-302, 303)

~तद्विधिः——क्रियाबहुलमेतद्विधानम् ।
दृश्यतां विस्तरतः ।
(तं०आ० 16-304तः 310)

~तन्नियमः——यस्य पुनः शिष्यस्य नैव स्यादैहिकादिविषयभोगबुभुक्षा, यः केवलमूर्ध्वभुवनपतित्वादि-भोगबुभुक्षुस्तस्य विषयभोगदानि कर्माणि शोध्यानि नैश्वर्यप्रदानि । प्रारब्धस्य चाशोधनमपि नियम एव । यथा—

"यः पुनर्लौकिकं भोगं राज्यस्वर्गादिकं शिशुः ।
त्यक्त्वा लोकोत्तरं भोगमीप्सुस्तस्य शुभेष्वपि ॥"
(तं०आ० 16-303, 304)

यागादिषु, लौकिकेष्वपि शुभेष्वयमेव विधिः । यथा—

"अभावं भावयेत् सम्यक् कर्मणां प्राच्यभाविनाम् ।
मुमुक्षोर्निरपेक्षस्य प्रारब्धेकं न शोधयेत् ॥"
(तं०आ० 15-27)

कर्मसंस्कारः——मया कृतमिदं कर्म मह्यं फलिष्यतीति यः

संस्कारः स एव कार्मो मलो, यः प्राणिनं फलभोगाय जन्मान्तरग्रहणं प्रति प्रेरयति। तदसौ कर्मसंस्कार एव संसृतिस्वर्गनरकादि हेतुः। यथा—

"फलिष्यतीदं कर्मेति या दृढा वृत्तिरात्मनि ॥
स संस्कारः फलायेह········· ········।"

(तं०आ० 9-104, 105)

~अन्य निष्ठः——पुरोहितादिना यजमानादेः कृतेऽनुष्ठितस्य कर्मणो नैव स्वीयत्वेन संस्कारः। ततस्तत् कर्मान्यस्मै (यजमानायैव) फलप्रदं न कर्मकर्त्रे पुरोहिताय। यथा—

"यन्मयाद्य तपस्तप्तं तदस्मै स्यादिति स्फुटम् ॥
अभिसन्धिमतः कर्म न फलेदभिसन्धितः।"

(तं०आ० 9-106, 7)

~विनाशशीलः—उन्मत्तमूढादीनां कर्मानुष्ठानकाल एव तत् कर्तृत्वाभिमानो विगलति। तत एव तत्कृतं कर्म न फलप्रदं भवति। एवमेव येऽकर्तृत्वभावनाभ्यासिनस्तेषामपि कर्मसंस्कारो नश्यति। संस्कारनाशे न तेषां कर्मफलयोगः। एवं कृतस्य कर्मणः संस्कारः प्रायश्चित्तादिनापि विनश्यति। यथा—

"अप्रध्वस्तेऽपि संकोचे नाहं कर्तेति भावनात्।
न फलं क्षीवमूढादेः प्रायश्चित्तेऽथ वा कृते।"

(तं०आ० 9-105, 106)

कर्मसाम्यम्——सिद्धान्तशैवानां मते तावत् तुल्यबलयोः परस्परविरुद्धफलदान समर्थयोः कर्मणोरेकस्मिन्नेव क्षणे भोगप्रदानोन्मुखत्वे उभयोरपि परस्परं निरुद्धत्वेन भोगदाने रुद्धसामर्थ्यत्वेनाकिञ्चित्करत्वं कर्मसाम्यम्। तस्मिन् कर्मसाम्यक्षण एव शिवस्यानुग्रहशक्तिर्जीवे निपतति येनासौ शिवभक्तो भूत्वा क्रियाचर्यादिना मुक्तिं लभते। यथा—

(क) "भोगपर्यायमहात्म्यात् काले क्वापि फलं प्रति।
विरोधात् कर्मणी रुद्धे तिष्ठतः साम्यमीदृशम् ॥"

(तं०आ० 13-68)

(ख) "तदीदृशं विरुद्धकर्मद्वयविरोधलक्षणं कर्मणां साम्यमुच्यते।"

(तं०आ०वि० खं० 8, पृ० 47)

(ग) "विरुद्धयोः कर्मणोः समबलयोरन्योन्यप्रतिबन्धे कर्मसाम्यम्।"

(तं०सा० पृ० 116)

~न युक्तम्——(1) सिद्धान्तशैवदर्शनस्यायं कर्मसाम्यसिद्धान्तो नाभीष्टः काश्मीरशैवानाम्। ततस्ते बहून् तर्कदोषानत्र पश्यन्ति। तद्यथा—तुल्यबले अपि कर्मणी क्रमेण फलं दातुं समर्थे भवितुमर्हतः, इति कर्माणां क्रमिकत्वात् फलदानस्यापि क्रमिकत्वं सम्भवति यतः। यथा —

नैतत् क्रमिकसंशुद्ध व्यामिश्राकारकर्मभिः।
तथैव देये स्वफले केयमन्योन्यरोद्धृता ॥

(तं०आ० 13-70)

(2) कर्मणोः फलदानरोधे सति जात्यायुष्प्रदत्वमपि रुद्धं भवेत्, ततश्च सद्यो देहपातः स्यात्। यथा—

"रोधे तयोश्च जात्यायुरपि न स्यादतः पतेत्।
देहो·································॥"

(तं०आ० 13-71)

(3) यदेश्वरो जात्यायुष्प्रदकर्मणः प्रवृत्तौ सत्यामपि मलमात्रस्य निरोधं करोति कर्मसाम्यकाले तदा भोगदानसमर्थस्यापि कर्मणः प्रवृत्तौ सत्यां तन्निरोधं केन कारणेन न कर्तुं शक्नुयात्। ततः कर्मफलभोगे प्रवर्तमानेऽपि मलं निरुन्ध्यात्।

"······भोगदयोरेव निरोध इति चेन्ननु ॥
जात्यायुष्प्रदकर्मांशसंनिधौ यदि शंकरः।
मलं रुन्द्धे भोगदात्तुः कर्मणः किं बिभेति सः ॥"

(तं०आ० 13-71, 72)

(4) सुख दुःखादि-रहिताः शून्यतामय्यो दशाः शतशो जनैरनुभूयन्ते, परं तथापि शक्तिपातो न जायते, इति तावदनुभवसिद्धम्। सुखदुःखादिशून्यतैव हि कर्मसाम्यत्वेनाभीष्टा सिद्धान्तशैवे। यथा—

"शतशोऽपि ह्लादतापशून्यां संचिन्वते दशाम्।
न च भक्तिरसावेशमिति भूम्ना विलोकितम् ॥"

(तं०आ० 13, 73)

भक्तेरुदयः शक्तिपातस्य प्रथमं मुख्यं फलं यतः।

(5) यदि कदाचिद् विरुद्धं कर्मद्वयं परस्परं फलदानासमर्थं विदध्यात् तदा तस्मिन् क्षणे तृतीयमपरं कर्म फलदानोन्मुखं सम्भवेत्। ततो न शक्तिपातावकाशः कश्चिदपि कदापि भवेत्। यथा—

"विरोधे स्वफले चैते कर्मणी समये क्वचित्।
उदासाते यदि ततः कर्मैतत् प्रतिबुध्यताम् ॥
शिवशक्तिनिपातस्य कोऽवकाशस्तु तावता।"

(तं०आ० 13-88, 89)

विरोधे सतीत्यर्थः कर्मैतदिति तृतीयं किमपि कर्मेति।

(6) यदि कदाचिद् विरुद्धं कर्मद्वयं परस्परं निरुन्ध्यात्, तदाऽग्रेऽपि ते तथैव निरुद्धे तिष्ठताम्, न च कर्मान्तरमपि फलदाने प्रवृत्तं भवेत्, निरोधस्यानपसरणाद्, अपसारकस्याभावाच्चेति मृत्युपर्यन्तं तथैव तिष्ठतो जीवस्यैवमेव मुक्तिः स्याद् विनापि शक्तिपातम्। यथा—

"क्वापि काले तयोरेतदौदासीन्यं यदा ततः ॥
कालान्तरे तयोस्तद्वद्विरोधस्यानिवृत्तितः।
अतश्च न फलेतान्ते ताभ्यां कर्मान्तराणि च ॥
रुद्धानि प्राप्तकालत्वाद्गताभ्यामुपभोग्यताम्।
एवं सदैव वार्तायां देहपाते तथैव च ॥
जाते विमोक्ष इत्यास्तां शक्तिपातादिकल्पना ॥"

(तं०आ० 13-89तः 92)

(7) यदि तर्हि परस्परविरुद्धकर्मक्षणानन्तरमपरं किमपि

कर्मफलदाने समुन्मुखतामियात्, तर्हि विरोधक्षणेऽपि स तथैव फलदाने प्रवर्तेत, इति कर्मसाम्यमकिञ्चित्करतामापद्येत। यथा--

'अथोदासीनतत्कर्मद्वययोगक्षणान्तरे ॥
कर्मान्तरं फलं सूते तत्क्षणेऽपि तथा न किम्।
क्षणान्तरेऽथ ते एव प्रतिबन्धविवर्जिते ॥
फलतः प्रतिबन्धस्य वर्जनं किं कृतं तयोः।"

(तं०आ० 13, 92 तः 94)

(8) कर्मसाम्यस्य स्वरूपतो वैचित्र्याभावात् शक्तिपातेऽपि मन्दतीव्रत्वादिरूपं वैचित्र्यं नैव भवेत्। यथा—

कर्मसाम्यं स्वरूपेण न च तत्तारतम्यभाक् ॥
न शिवेच्छेति तत्कार्ये शक्तिपाते न तद्भवेत्।

(तं०आ० 13, 94, 95)

तत् कार्ये शक्तिपाते तारतम्यादिवैचित्र्यं न स्यात् इति।

कर्माक्षपञ्चकम्~मातृकाक्रमे——'ट ठ ड ढ ण' इति वर्णपञ्चकेन कर्मेन्द्रियपञ्चकं स्वात्मप्रकाशे प्रतिबिम्बितं सत् साक्षात्क्रियते शाम्भवयोगाभ्यासेन। यथा—

"टादिणान्तं पादादिवागन्तं कर्माक्षपञ्चकम्।"

(प०त्री०वि०, पृ० 113)

कर्मात्मा——प्रत्यगात्मा।

मोहजालपरिच्छिन्नो बद्धो जीवः कर्मफलं संसृतिचक्रे भुञ्जानः। यथा—

"मोहप्रतिसंहतस्तु कर्मात्मा।"

(शि०सू० 3, 35)

कर्माद्याः——ते च —

(1) दीक्षादीनि मन्त्रप्रयोगादिकर्माणि।
(2) भुक्तिमुक्तिसाधनभूता योगाभ्यासाः,
(3) स्वात्मशिवभावप्रत्यभिज्ञाख्यं च ज्ञानम्।

इत्येते भोगमोक्षदाः उपाया गुरुणा शिक्षणीयाः कारणीयाश्च।

~तारतम्यतः——कर्मणः उत्कृष्टो योगो, योगादुत्कृष्टं ज्ञानम्। यथा—

"तत्रोक्तलक्षणः कर्मयोगज्ञानविशारदः।
उत्तरोत्तरताभूम्युत्कृष्टो गुरुरुदीरितः ॥"

(तं०आ० 15, 19)

"गरीयान् कर्मिणो योगी स च ज्ञानवतः शिशुः।"

(तं०आ०वि० खं० 9, पृ० 13)

कर्मी~गुरुः——असौ गुरुर्यो मन्त्रप्रयोगादिक्रियोपायतो भुक्तिमुक्तिप्रदां दीक्षां विधत्ते शिष्यस्य।

द्र० 'कर्माद्याः~तारतम्यतः' इति।

कर्मेन्द्रियाणि——वाक्-पाणि-पाद-पायूपस्थाख्यानि क्रियासाधनभूतानि कलातत्त्वस्य विस्ताररूपाणि पञ्च बाह्यकरणानि।

~अधिष्ठानतः——द्र० 'इन्द्रियवर्गः~अधिष्ठानतः' इति।

~आहङ्कारिकाण्येव——

"वच्म्याददेत्यजाम्याशु विसृजामि व्रजामि च।
इति याहंक्रिया कार्यक्षमा कर्मेन्द्रियं तु तत् ॥"

(तं०आ० 9, 254)

एतेनैतदभिप्रेतं यदहङ्कार एव कर्मेन्द्रियद्वारा तत्तद्वृत्तिषु प्रसरति। तेनाहङ्कारविशेषात्मकानि कर्मेन्द्रियाण्याहङ्कारिकाण्येव; न पञ्चभूतविकारमयानि वा तदंशभूतानि वेति।

~उत्पत्तिस्थानतः——(1) सामान्येन राजसोऽहङ्कारः एतेषामुत्पत्तिस्थानम्। यथा—

"उक्त इन्द्रियवर्गोऽयमहंकारात् तु राजसात्।"

(तं०आ० 9, 271)

(2) विशेषेण रजोगुणप्रधानात् पञ्चतन्मात्रोन्मुखाद् विशिष्टादहङ्कारात् कर्मेन्द्रियसृष्टिः। यथा—

"तत एव त्वहंकारात् तन्मात्रस्पर्शिनोऽधिकम्।
कर्मेन्द्रियाणि वाक्पाणिपायूपस्थाङ्घ्रि जज्ञिरे ॥"

(तं०आ० 9, 253)

~न्यायशास्त्र मते——नैयायिकाः कर्मणामानन्त्यात् कर्मेन्द्रियकल्पनायमप्यानन्त्येन गौरवदोषं मन्यमानास्तानीन्द्रियेषु नैव गणयन्ति। यथा—

"कण्ठोऽन्ननिगरणेन स्तनकलशालिङ्गनादिना वक्षः।
भारोद्वहनेनांसद्वयमिन्द्रियमुच्यते न कथम्।"

(उद्ध० न्या० मंज० 1-1-12)
(तं०आ०वि० खं० 6, पृ० 210)

~सिद्धान्तशैवमते——सिद्धान्तशैवानुसारिणः खेटपालाचार्यस्य मतमेतद् यन्नैव सर्वेषां कर्मणां करणभूतानि साधनानि कर्मेन्द्रियाणि; अपि तु मुख्यानामेव कर्मणाम्; तानि च कर्माणि वचनग्रहणविसर्गादीनि पञ्च; तेन कर्मेन्द्रियाणि पञ्च। परं नैतन्मतं रोचतेऽभिनवगुप्ताचार्येभ्यः। यथा—

"नन्वेतत् खेटपालाद्यैर्निराकारि न कर्मणाम्।
यत्साधनं तदक्षं स्यात् किन्तु कस्यापि कर्मणः ॥"

(तं०आ० 9-262, 63)

"यदाहुः—आनन्दादिभिरेभिस्तु कर्मभि· परिभाषितैः।
कर्मेन्द्रियाण्यतो नैषामानन्त्यं कर्मणां वशात् ॥ इति"

(उद्ध० तं०आ०वि० खं० 6, पृ० 211)

"एतन्नास्मत्कृतप्रश्न-तृष्णा-संतापशान्तये।
न ह्यस्वच्छमितप्रायैर्जलैस्तृप्यन्ति बर्हिणः ॥"

·(तं०आ० 9-263, 64)

~स्वमते——कर्मेन्द्रियाणि पञ्चैव। कर्माणि च चतुर्धा-विषयग्रहाय, विषयत्यागाय, त्यागग्रहाभ्यां च समम्, तथा च त्यागग्रहोभयपरित्यागेन स्वात्मविश्रान्तये। तत्र त्यागे पायुः करणम्, ग्रहे पाणिः, उभयत्र पादौ बाह्यविषये; अन्तः प्राणविषये च वाक्।

एवमेतत् कर्मेन्द्रियचतुष्टयम् । त्यागग्रहणोभयशान्त्या स्वस्वरूपविश्रान्त्यासादनाय पञ्चमं कर्मेन्द्रियमुपस्थः । पञ्चस्वेतेषु कर्मसु सर्वेषामपि कर्मणामन्तर्भावः । तदेवंप्रकारकपञ्चविधानुसन्धानपूर्वकं कर्मसु कर्त्तुः प्रवृत्तौ पञ्चप्रकारमेव करणं यत् तत् कर्मेन्द्रियपञ्चकम्, अनुसन्धानस्यैव कर्मोद्भावकत्वात् । ततो नानन्त्यदोषः कोऽपि । यथा—

(क) "इह कर्मानुसंधानभेदादेकं त्रिभिद्यते ॥
तत्रानुसन्धिः पञ्चात्मा पञ्चकर्मेन्द्रियाण्यतः ।
त्यागायादान-संपत्त्यै द्वयाय द्वितयं विना ॥
स्वरूप-विश्रान्तिकृते चतुर्धा कर्म यद् बहिः ।
पायुपाण्यङ्घ्रिजननं करणं तच्चतुर्विधम् ॥
अन्तः प्राणाश्रयं यत्तु कर्मात्र करणं हि वाक् ।"

(तं०आ० 9, 265 तः 268)

एतच्च श्रीशम्भुनाथोपदिष्टं मतम् । यथा—

"उच्यते श्रीमतादिष्टं शम्भुनात्र ममोत्तरम् ॥
स्वच्छसंवेदनोदारवित्कलाप्रबलीकृतम् ।"

(तदेव 9-264, 65)

(ख) "तस्मादवश्याभ्युपेयः कर्मेन्द्रियवर्गः, स च पञ्चकः, अनुसन्धेस्तावत्त्वात् । तथाहि बहिस्तावत्त्यागाय वा अनुसन्धिः आदानाय वा, द्वयाय वा, उभयरहितत्वेन स्वरूपविश्रान्तये वा, तत्र क्रमेण पायुः, पाणिः, पादः, उपस्थ इति । अन्तः प्राणाश्रयकर्मानुसन्धेस्तु वागिन्द्रियम् ।"

(तं०सा० पृ० 88तः 89)

(ग) "उक्तं हि—कर्मणि तूपयोगीनि पञ्च कर्मेन्द्रियाणि । तथा हि—त्यागो ग्रहण द्वयं—इति बहिर्विषयं यत् तत्र पाणिः, पायुः, पाद इति करणानि एतदेवान्तः प्राणे येन क्रियते तद्वागिन्द्रियम् । तत् प्रक्षोभप्रशान्त्या विश्रान्तिक्रियोपयोगी उपस्थः ।"

(ई०प्र०वि० खं० 2, पृ० 212-213)

द्र० 1-(ई०प्र०वि०वि० खं० 3, पृ० 309) इति ।

द्र० 2-(म०मं०प० पृ० 63) इति ।

कर्षणी——कालं कालिकं च सर्वमपि पदार्थजातं स्वात्मनः एव सकाशाद् बहिराकर्षिणी पूर्णस्य परमेश्वरस्य पूर्णतामयी पराशक्तिः कर्षणी कर्षिणीति वोच्यते ।

द्र० 'ऊर्मिः' इति ।

द्र० 'काली' इति ।

कलना——गतिक्षेपादिरूपिणी पारमेश्वरी विजृम्भा । नासौ कल्पना । कल्पना तु मानसी क्रिया मायाप्रमातुः । कलना पुनरसौ पारमेश्वरी क्रिया यां परमेश्वरो निजशक्त्या काल्या देव्या कलयति ।

द्र० 'काली' इति ।

कलशमुद्रा——तस्या लक्षणं यथा—

"संहतांगुलिकौ पाणी पृष्ठार्श्वेन्दूदराहितौ ।
सुश्लिष्टमूलावंगुष्ठौ कुम्भमुद्रा प्रकीर्तिता ॥"

(तं०आ०वि० खं० 9, पृ० 39)

कुम्भः=कलशः ।

कला (1) ~अध्वा ——कतिपय-कतिपय-तत्त्वानामपि परस्परं वर्गीकरणेन ये वर्गविशेषास्तेष्वनुगतं यत् किमपि प्रमेयस्वरूपं तत्र तत्र तत्त्ववर्गेषु व्यापकं तदेव कलापदेनाभिधीयते स्थानकल्पनाख्ये योगे । यथा—

"तथा तेष्वपि तत्त्वेषु स्ववर्गेऽनुगमात्मकम् ।
व्यावृत्तं परवर्गाच्च कलेति शिवशासने ॥"

(तं०आ० 11-3)

षडध्वमध्ये गणिता एताः कला धारणायामालम्बनत्वेन गृहीताः सत्यः सर्वसर्वात्मकत्व-सिद्धान्तदृशा परिपूर्णशिवरूपतया साक्षात्क्रियन्ते तथाविधभावनाभ्यासेन स्वात्मैव वा सकलकलापरिपूर्णो भाव्यते । एवं भाव्यमानास्ताः साधकस्याणवं समावेशं समुद्भावयन्ति यदभ्यासेन तस्य स्वरूपप्रत्यभिज्ञा समुद्दीप्ता भवति ।

~अभ्यास-दृष्ट्या——स्थानकल्पनयोगे षट्प्रकारतयाभावनाभ्यासो विधीयते; त्रिप्रकारतया कालाध्वनि त्रिप्रकारतया च देशाध्वनि । सर्वोऽपि देशाध्वा स्थूलतया, सूक्ष्मतया, परतया (सूक्ष्मतरतया) च विश्लिष्यते । तत्र परतया विश्लेषणे सर्वमपि प्रमेयजातरूपं जगत् पञ्चसु कलासु विभज्यते । ताश्च कलाः भिन्नभिन्नान् तत्त्ववर्गान् व्याप्नुवन्ति । कलाध्वाभ्यासे ताः पञ्चकलाः निज-प्राणापान-मार्गे क्रमेणाधश्चक्रादारभ्योर्ध्वचक्रं यावन्निविष्टाः सत्यो भाव्यन्ते पुनः पुनः । तदभ्यासेनैकतः स्वस्य-विश्वपूर्णत्वं साक्षात्क्रियते, अन्यत. आणवसमावेशविशेषस्य सिद्धिर्भवत्यपरतश्च तत्तत्कलास्वाधिपत्यस्य भोगाः अपि भुज्यन्ते भोगवासना चेदवशिष्टा स्यात् । यथा—

"अध्वषट्कं यथा प्राणे संस्थितं कथयामि ते ॥
....

कलाकलितसंतानः प्राणः संचरते सदा ।
निवृत्तिश्च प्रतिष्ठा च अधोभागे प्रवर्तिके ॥
विद्याशान्तिस्तथा चोर्ध्वे शान्त्यतीता त्वधिष्ठिका ।
तदतीतः परोभावः तदूर्ध्वं पदमव्ययम् ॥
एवं बिन्दुकला ज्ञेया नादशक्त्यात्मिकाश्च याः ।
व्यापिन्याद्यात्मिका याश्च व्याप्यव्यापकभेदतः ॥
प्राणैकसंस्थिताः सर्वाः षट्त्यागात्सप्तमे लयः ।
कलाध्वैवं समाख्यातः............ .... ॥"

(स्व०तं० 4/241, 243-46)

~चतुष्टयम्——भावना विषयतया (1) स्थूल जगद्व्यापिनी कला निवृत्तिरिति (2) जलादि प्रधानान्तं व्यापिनी प्रतिष्ठेति (3) पुरुषादिमायान्तं स्थिता विद्येति (4) शुद्धविद्यादिशक्त्यन्तं स्थिता शान्तिरिति वा शान्तेति वा । यथा—

"निवृत्तिः पृथिवीतत्त्वे प्रतिष्ठाव्यक्तगोचरे।
विद्या निशान्ते शान्ता च शक्त्यन्ते ··॥"

(तं॰आ॰ 11-4)

शिवतत्त्वमयी-पञ्चमी-शान्त्यतीता कला तु न भावनाविषयतामुपयाति।

~दार्शनिक दृष्टया——भिन्नभिन्नतत्त्ववर्गाणामन्तर्व्यापिनी सुसूक्ष्मा कापि शक्तिः कला। यथा—

"केचिदाहुः पुनर्यासौ शक्तिरन्तः सुसूक्ष्मिका।
तत्त्वानां सा कलेत्युक्ता धरण्यां धारिका यथा॥"

(तं॰आ॰ 11-4)

तासां कलानां बहिर्मुखा धनीभावमिव-याता प्रसृतिस्तत्तत्त्वरूपेति।

~त्रयम्——कलाध्वनि त्रितत्त्वविधौ आत्मकला, विद्याकला, शिवकला चेति संक्षेपत एव कलाविश्लेषणम्। यथा—

"विज्ञानाकल-पर्यन्तमात्मकला, ईशान्तं विद्याकला, शिष्टं शिवकला-इति त्रितत्त्वविधिः।"

(तं॰सा॰ पृ॰ 111)

"विज्ञानाकलपर्यन्तमात्मा विद्येश्वरान्तकम्।
शेषे शिवस्त्रितत्त्वे स्यादेकतत्त्वे शिवः परम्॥"

(तं॰आ॰ 11-35)

~दीक्षाविधौ——कतिपयकतिपयतत्त्वानां वर्गेषु यदनुगामिरूपं तेषां तत्त्वानां स्थितिश्च यत्क्षेत्रे तदेव कला। तेषां तेषां तत्त्वानां यदेकरूपकलनासहिष्णुत्वं तदेव तेषामेककलात्वप्रयोजकम्। यथा—

"तत्त्वेषु वर्गशो यदनुगामिरूपं तत्
कला-एकरूपकलना सहिष्णुत्वात्॥"

(तं॰सा॰ पृ॰ 109)

दीक्षाकाले तत्तत्कलामात्रस्य शोधनेन शिष्यस्य ते ते तत्त्वव्राताः शोध्यन्ते स्वल्पेनैवायासेन।

~दृष्ट्यन्तरेण——तत्त्वानां स्वं स्वं सामर्थ्यम्। यथा—
"तत्त्वानां यत्स्वसामर्थ्यं कलास्ताः परिकीर्तिताः।"

(शि॰सू॰वा॰भा॰ पृ॰ 46)
(तदेव सू 3-4)

सामर्थ्यमत्र सार इति वेद्यम्।

~धारणाक्रमे——षडध्वधारणासु सूक्ष्मतरः धारणाप्रकारो, यत्र प्रमेयरूपतायामाभासमानायामेव प्रमाणरूपतावेशः सिद्ध्यति साधकस्य। यथा—

"प्रमाणरूपतावेशमपरित्यज्य मेयताम्।
गच्छन् कलनया योगादध्वा प्रोक्तः कलात्मकः।"

(तं॰आ॰ 11-60, 61)

अयमध्वा एकतः स्वोपरिवर्तमानेन कालाध्वना सम्पृक्तोऽपरतश्च स्वस्याङ्गिभूतेन देशाध्वना।

~धारणा विशेषतया——योगिनो धारणासु निवृत्तौ सूक्ष्मसूक्ष्मतरं गन्धं, प्रतिष्ठायां तथाभूतं रसं, विद्यायां च तथाविधमेव रूपं संविदन्तीत्युक्तमागमेषु। उपलक्षणन्यायेनैवं प्रतिपद्यते यच्छान्तायां कलायां तथाविधमेव सूक्ष्मसूक्ष्मतरं स्पर्शमनुभवन्तीति। एतेन कलास्वेतासु धरादीनां विशेष-गुणानामुपलब्धेरासामपि धरादिरूपता सूक्ष्मसूक्ष्मतरा। शान्त्यतीता तु कला न धारणाविषयः। एतदभिप्रेत्योक्तम्—

'धरायां गुणतत्त्वान्ते मायान्ते क्रमशः स्थिताः।
गन्धो रसो रूपमन्तः सूक्ष्मभावक्रमेण तु॥
इति स्थिते नये शक्तितत्त्वान्तेऽप्यस्ति सौक्ष्म्यभाक्।
स्पर्शः कोऽपि सदा यस्मै योगिनः स्पृहयालवः॥"

(तं॰आ॰ 11-29, 30)

कौलिकचर्यास्वस्य सूक्ष्ममधुरस्य स्पर्शस्यानुभूतिः शिवभावे प्रवेशयतीत्यपि वेद्यम्। अत्र धरादिरूपतया साक्षात्कारे कोऽपि विशेषो यथोक्तः—

स्पर्शः कोऽपि सदा यस्मै योगिनः स्पृहयालवः॥
तत्स्पर्शान्ते तु संवित्तिः शुद्धचिद्व्योमरूपिणी।
यस्यां रूढः समभ्येति स्वप्रकाशात्मिकां पराम्॥"

(तं॰आ॰ 11-30, 31)

"शक्तिं भित्त्वा ततो देवि यच्छेषं व्यापिनी भवेत्।
अनुभावो भवेत् तत्र स्पर्शो यद्वत्पिपीलिका॥"

(स्व॰तं॰ 4-384)
उद्ध॰ (तं॰आ॰वि॰ खं॰ 7/2, पृ॰ 28)

रहस्यात्मिकेयं योगप्रक्रिया न स्पष्टतया शब्दैर्व्याख्यातुं शक्यते, नापि युज्यते। अनुभवत एव योगिन एवं विधाः धारणाः हृदयङ्गमतां नयन्ति।

~नामान्तरतः——मालिनीविजयतन्त्रे पञ्च कलानामन्यानि पञ्च नामानि यान्युक्तानि तानि तासां सूक्ष्म-सूक्ष्मतर धरादिरूपतासूचकानि। तत्र—

(1) निवृत्तेर्नाम=धारिका इति।
(2) प्रतिष्ठायाः नाम=आप्यायनी इति।
(3) विद्याया नाम=बोद्ध्री इति।
(4) शान्तेर्नाम = उत्पूयिनी इति।
(5) शान्त्यतीताया नाम = अवकाशदा इति। यथा—

"मतं चैतन्महेशस्य श्रीपूर्वे यदभाषत।
धारिकाप्यायिनी बोद्ध्री पवित्री चावकाशदा॥
एभिः शब्दैर्व्यवहरन् निवृत्त्यादेर्निजं वपुः।"

(तं॰आ॰ 11-33, 34)

"बोद्धीति तेजसो भास्वरत्वेन दर्शनप्राधान्यात्।"

(तं॰आ॰वि॰ खं॰ 7/2, पृ॰ 30)

"आद्यं धारिकया व्याप्तम्··········"

(मा॰वि॰त॰ 2, 50)

"आप्यायिन्या द्वितीयं तु ············ "

(मा०वि०त० 2, 52)

"तत्त्वानि सप्त बोधिन्या ·········· . "

(मा०वि०त० 2, 54)

"उत्पूयिन्या चतुर्थं तु······· ·········"

(मा०वि०त० 2, 55)

"शिवतत्त्वं परं शान्तं कला तत्रावकाशदा"

(मा०वि०त० 2, 56)

~पञ्चकम्——(1) पृथ्वीप्रायं स्थूलं जगत् निवृत्तिकला,

(2) जलादिप्रधानान्तं प्रतिष्ठा,
(3) पुरुषान्मायान्तं विद्या,
(4) शुद्धविद्यातः शक्त्यन्तं शान्तिः,
(5) शिवतत्त्वे शान्त्यतीतेति पञ्चकलाः। एतासां लक्षणानि तत्र तत्र दृष्टव्यानि।

"पृथिव्यां निवृत्तिः, निवर्तते यतस्तत्त्वसर्गं इति। जलादिप्रधानान्ते वर्गे प्रतिष्ठा-कारणतयाप्यायनपूरण-कारित्वात्। पुमादिमायान्ते विद्या-वेद्यतिरोभावे संविदाधिक्यात्। शुद्धविद्यादिशक्त्यन्ते शान्ता-कञ्चुकतरङ्गोपशमात्। ······शिवतत्त्वे शान्तातीतातस्योपदेशभावनार्चादौ कल्यमानत्वात्।"

(तं०सा० पृ० 109, 110)

~शोधनविधौ——दीक्षादौ मलात्मक-सर्व-तत्त्वजाल शोधन सौकर्याय शिवेन कृतं तत्त्वानां सूक्ष्मं वर्गीकरणं कलाः इति। एंतेन तत्त्वव्राताः स्वल्पेनैवायासेन सुखं शोध्यन्ते शिष्यस्य। यथा—

"अन्ये वदन्ति दीक्षादौ सुखसंग्रहणार्थतः।
शिवेन कल्पितो वर्गः कलेति समयाश्रयः॥"

(तं०आ० 11, 6)

तेन गुरुः "निवृत्तिकलां शोधयामि ते" इति वदन् सुविस्तृतस्थूलब्रह्माण्डान्तर्गतानि सर्वाणि स्थूलबन्धनानि शिष्यस्य शोधयति येनासौ तेभ्य उत्तीर्णे पदे स्थितो भवति, एवं "प्रतिष्ठाकलां ते शोधयामीति" वदन् जलादिप्रधानान्तेभ्यस्तत्त्वेभ्य उर्ध्वं नयति शिष्यम्। एवमग्रेऽपि वेद्यम्। एकैकेन सङ्कल्पेन बहुतरतत्त्वजालशोधनोपायसाधनं कलाविभागः इति।

~संख्यातः——सूक्ष्मतरेण विश्लेषणेन कलानां संख्यायां वृद्धिः सम्भवति, संश्लेषणेन च ह्रासः। परं कलाध्वधारणाक्रमानुसारं पञ्चैव कलाः। यथा—

"एवं पञ्चैव कलाः।"

(तं०सा० पृ० 110)

~कञ्चुकरूपा——पशुप्रमातरि सर्व-कर्तृत्वस्य संकोचकं मायाविकारभूतं प्रथमं कञ्चुकम् किञ्चिन्मात्र-कर्तृत्वाभिमानरूपम्। मायया जडीकृतेऽणौ कला किञ्चिन्मात्रं कर्तृत्व सामर्थ्यमादधाति।

~उद्भवस्थानतः——मायातः साक्षात् कला जायते। ततो मायाया एव साक्षाद्विकारभूतासौ किञ्चित्कर्तृत्वरूपा कला। यथा—

(क) 'तत्र मायातः कला जाता, या सुप्तस्थानीयमणुं किञ्चित्कर्तृत्वेन युनक्ति, सा च उच्छूनतेव संसारबीजस्य मायाण्वोरुभयोः संयोगादुत्पन्नापि मायां विकरोति, न अविकार्यमणुम्, इति मायाकार्यत्वमस्याः।'

(तं०सा० पृ० 80)

(ख) "मायातत्त्वात् कला जाता किञ्चित्कर्तृत्वलक्षणा॥"

(तं०आ० 9, 178)

~कर्तृत्वस्वभावा——मायया जडीकृतस्येव पुरुषस्यान्तश्चैतन्यसमुद्वलनकारिणी तावत् कलैव। ततोऽसावेव पुरुषं ज्ञाने प्रवर्तयन्ती प्रयोजककर्तृत्ववती; पुरुषः प्रयोज्यकर्ता, अशुद्धविद्या च तस्य करणमिति सूक्ष्मदृशा विचारणेन सिद्ध्यति। ततः कलाया यत् करणत्वमप्युक्तं तत् करणस्थानीयत्वेनामुख्यमिति वेदितव्यं सुधीभिः।

"सेयं कला न करणं मुख्यं विद्यादिकं यथा।
पुम्सि कर्तरि सा कर्त्री प्रयोजकतया यतः॥"

(तं०आ० 9, 183)

~तत्त्वम्—— माया-विकार-भूतेषु शक्तिसंकोचरूपेषु कञ्चुकतत्त्वेषु प्रथमं तत्त्वं किञ्चिन्मात्रकर्तृत्वमणोः। यथा—

"कला किञ्चित्-कर्तृत्वोपोद्वलनमयी कार्यमुद्भावयति किञ्चिज्जानामि किञ्चित् करोमीति।"

(ई०प्र०वि० खं० 2, पृ० 208-209)

अशुद्धविद्याफलस्य परिमितस्य ज्ञानस्यापि क्रियारूपत्वात्तत्रापि कला विजृम्भते इति बोध्यं सुधीभिः।. तत एव किञ्चिज्जानामीत्युक्तम्। यथा—

(क) "कला कर्तृत्वसामर्थ्यं किञ्चिन्मात्रं प्रकीर्तितम्।"

(शि०सू०वा०भा०सू० 3-3, पृ० 43)

(ख) 'मायात्मकं कला नाम किंचित्कर्तृत्वकारणम्।"

(अ०प्र०पं० 24)

द्र० (1) स्पं० वि०—पृ० 135, 36
(2) ष० त० सं०—8 (3) स्व०तं० 11-98

~तदधिष्ठाता——महादेवादयो रुद्राः कलातत्त्वेऽधिष्ठातारो देवाः। यथा—

"कलातत्त्वस्थानां महादेवादीनाम्।"

(तं०आ०वि० खं० 4/1, पृ० 134)

~प्रभावतः——मायया तिरोहितस्य चैतन्यस्य पुनः किञ्चिदुपोद्वलनं कला करोति भगवतोऽनन्तस्य प्रेरणया। तत एव ह्यणुरपूर्णंम्मन्यतायाः पूरणं कर्तुं प्रभवति बाह्यविषयैः। यथा—

"अतः सञ्छन्नचैतन्यसमुद्वलनकार्यकृत्।
कलैवानन्तनाथस्य शक्त्या सम्प्रेरिता जडा॥"

(तं०आ० 9, 181)

~प्रयोजनत्तः——माया तावदात्मनश्चिद्रूपतां तिरोदधती तं जडमिवाविर्भावयति । ततः कला तस्मिन् पुनरिव कर्तृत्वमुपजनयतीव । यथा—

"माया हि चिन्मयाद् भेदं शिवाद्विदधती पशोः ।
सुषप्ततामिवाधत्ते तत एव ह्यदृक्क्रियः ।
कला हि किञ्चित्कर्तृत्वं सूते स्वालिङ्गनादणोः ।"

(तं०आ० 9, 175, 76)

"कर्तृशक्तिं व्यनक्त्यस्य कला सातः प्रयोजिका ।
ततः कलासमायुक्तो भोगेऽणुः कर्तृकारकम् ॥"

उद्ध० (तं०आ०वि० खं० 6, पृ० 143)

~भोक्त्री——भोक्तुरेव विशेषत्वेन कला भोक्त्री एव न भोग्या ।

द्र० 'कञ्चुक तत्त्वानि~भोक्त्रङ्गभूतानि' इति ।

~मुख्य करणम्——कला विद्या च अणोर्मुख्यं करणद्वयम् । यथा—

"कलाविद्ये ततः पुंसो मुख्यं तत्करणं विदुः ॥
अत एव विहीनेऽपि बुद्धिकर्मेन्द्रियैः क्वचित् ।
अन्धे पङ्गौ रूपगतिप्रकाशो न न भासते ॥"

(तं०आ० 9, 250, 51)

परममुख्यमस्याः करणत्वम्; यतः कर्तुरन्तरङ्गभूताया अस्याः करणस्थानीत्वमेव न करणत्वम् । यथा—

करणत्वं पुनरस्या अमुख्यमित्यर्थसिद्धम् ।"

(तं०आ०वि० खं० 6, पृ० 200)

यथा शुद्धविद्यायाः मन्त्रेश्वरादीनां करणस्थानीयत्वं तथैतत् ।

~मूलतः——वस्तुतो हि शिवस्य शक्तिरेवेयं पशोः कञ्चुकतां याता कलोच्यते । यथा—

"निरुद्धशक्तेर्या किञ्चित्कर्तृतोद्वलनात्मिका ॥
नाथस्य शक्तिः साधस्तात्पुंसः क्षेप्त्री कलोच्यते ।"

(तं०आ० 9, 155, 156)

शिवस्य याऽनवच्छिन्ना परिपूर्णा सर्वकर्तृत्वरूपिणी परा क्रियाशक्तिः सैवाणुप्रमातरि संकुचितेन रूपेण परिस्पन्दमाना कलेति । यथा—

"स्वतन्त्रोऽपि बोधः स्वमायया यथाऽणुत्वं प्राप्तस्तथैव तदीये ज्ञानक्रियाशक्ती संकुचिते अस्य पशुरूपस्य विद्याकले इत्युच्येते ।"

(पं०सा०वि० पृ० 46, 47)

कला (2) ~कालमानम्——त्रिंशत्काष्ठात्मकं कालपरिमाणम् । यथा—

"मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः ।
क्षणद्वयं तुटिर्ज्ञेया तद्द्वयं तु लवः स्मृतः ॥
लवद्वयं निमेषस्तु ज्ञातव्यो गणितक्रमात् ।
दशपञ्च निमेषाश्च काष्ठा चैव प्रकीर्तिता ॥
त्रिंशत्काष्ठाः कला ज्ञेया··················।"

(स्व०तं० 11/209-3)

कलाः~वर्णरूपिण्यः——
द्र० 'वर्णकलाः' इति ।

कलातीतः——सप्तत्रिंशतत्त्वात्मकः परमशिवः । यथा—
"··········· ···कलातीतः परः शिवः ।"

(तं०आ० 11, 9)

कलाशेषः——'ट' इति वर्णः बीजमन्त्ररूपः । यथा —
"कलाशेषेण टकारेण" ।

(ने०तं०उ० खं० II, पृ० 67)

कल्पना——शाब्दस्वरूपानुविद्धा मनःसंकल्पजन्यार्थप्रतीतिः । विकल्पात्मकं ज्ञानम् । यथा—

"शब्दसंसर्गयोग्यार्थप्रतीतिः कल्पना ।"

(तं०आ०वि० खं० 7/2, पृ० 49)

जीवभावोचितेयं मानसी क्रिया । पारमेश्वरी च क्रिया कलेति ।
द्र० 'कला' इति ।
द्र० 'काली' इति ।

कल्पितम्——मायाप्रमात्रा स्वबुद्धया समुल्लिखितं शशशृङ्गादि । यथा—

"कल्पितं पुनः स्वयं स तथा केवलमिष्यते तेन रूपेण ।···
······································
कल्पनायाश्च स्वामतथाभूतस्य तथा सम्भावनामात्ररूपायाः"································ ।

(शि०दृ०वृ०, पृ० 133)

कल्पितेश्वराः——वित्तीर्णपारमेश्वर्यांशाः ब्रह्माविष्णुरुद्राद्याः । यथा—

"कल्पितेश्वराणां ब्रह्मविष्ण्वादीनां स्वांशाभिषेकोपकल्पितैश्वर्यो महेश्वरः ।"

(ई०प्र०वि०वि० खं० 20, पृ० 340)

महेश्वरस्तेषामैश्वर्यं स्वैश्वर्यांशैः कलयतीति तात्पर्यम् ।

कल्पितो गुरुः——द्र० 'गुरुः—कल्पितः इति ।

कल्याणः——कल्हणादन्य एव कश्चित् कल्याणनामा तत्त्वदर्शी गुरुः पराश्रीशिकाशास्त्रव्याख्याकृत् । अभिनवगुप्तादपि प्राचीनोऽयम् । यथा—

"असदेतदिति प्राहुर्गुरवस्तत्त्वदर्शिनः ।
श्रीसोमानन्द-कल्याणभवभूतिपुरोगमाः ॥
तथाहि श्रीशिकाशास्त्र-विवृतौ तेऽभ्यधुर्बुधाः ।"

(तं०आ० 13-149, 50)

कल्हणः पुनर्जयरथस्यासौ गुरुर्यस्तेन कल्याण इत्युक्तः ।
द्र० 'कल्याणगुरुः' इति ।

कल्याणगुरुः——जयरथस्य गुरुः, सम्भवतः कल्हणो राजतरङ्गिणीकृत् यो मंखेनापि कल्याणकविरित्युल्लिखितः। यथा—

"देहे विमुक्त एवास्मि श्रीमत्कल्याणवारिधेः।
यस्य कारुण्यविप्रुड्भिः सद्गुरुं तं हृदि श्रये॥
मूर्ध्न्युत्तंस इव क्ष्मापैः सर्वैर्यस्यानुशासनम्।
हृदये भवसंभारकर्कशेऽप्याशु शिश्रिये॥"

(तं०आ०वि० खं० 1, पृ० 2)

"शिवाद्वैतज्ञप्तिप्रकटितमहानन्दविदितं।
गुरुं श्रीकल्याणाभिधममुमताप्यास्तरजसम्।"

(तदेव खं० 12, पृ० 433)

कल्याणिका——कालीनये शिवानन्दनाथस्य शिष्या एरकनाथस्योपदेष्ट्री, पीठेश्वरी उत्तरपीठस्य। यथा—

" ········'श्रीमान् एरक समाख्यः' तृतीयः सममेवोपदेशं पीठेश्वरीभ्यः उत्तरपीठलब्धोपदेशाच्छिवानन्दनाथाल्लब्धनुग्रहाभ्यः श्रीकेयूरवती-श्रीमदनिका-श्रीकल्याणिकाभ्यः" (उद्धृतं क्रमकेलितः)

(तं०आ०वि० खं 3, पृ० 192)

कल्लटगुरुः——अभिनवगुप्तः सोमानन्दस्य शिष्यपरम्परायां सन्नपि भट्टकल्लटाचार्यं निजसन्तानगुरुमाह। एतेनैतत् सिद्ध्यति यद् भट्टकल्लटोऽपि सोमानन्दस्य गुरुरभूदिति। सोमानन्दः स्वात्मानं स्वपितुरानन्दस्य सन्ततौ गणयति। तदसावानन्दस्यापि भट्टकल्लटस्यापि च शिष्य इति प्रतिभाति। अभिनवगुप्तस्त्वनेकेषां गुरूणां शिष्यः। सोमानन्देन भट्टकल्लटस्य सिद्धान्तः शिवदृष्टावुपजीव्यत्वेन गृहीत एव स्पन्दकारिकासिद्धान्तोल्लेखतः। एतेन भट्टकल्लटस्त्र्यैयम्बकसन्तानेऽपि प्रतिष्ठितो गुरुरिति वेद्यम्, नास्य त्र्यम्बकसन्तानबाह्यत्वम्, यथाऽद्यतनीयाः शोधविद्वांसः समुद्घोषयन्ति मृषा। तथाहि—

"युक्त्यानयास्मत्सन्तानगुरुणा कल्लटेन यत्।
देहाविशेषे प्राणाख्यदार्ढ्यं हेतुरुदीरितम्॥
तद्युक्तमन्यथा प्राणदार्ढ्ये को हेतुरेकतः।
देहत्वस्याविशेषेऽपीत्येष प्रश्नो न शाम्यति॥"

(तं०आ० 28-338 तः 340)

"यन्नाम श्रीमत्कल्लटपादैः "देहनीलादीनां सर्वशरीर ग्रहणम्" इत्याद्युक्त्या शरीरत्वाविशेषेऽपि देह एव तथात्व निबन्धनं—

"प्राणाख्यनिमित्तदार्ढ्यम्" इत्याद्युक्त्या प्राणदार्ढ्यं निमित्तमुक्तं तदनया समनन्तरोक्तया "प्राक् संवित् प्राणे परिणता" इत्यादि-सूत्रितया सर्वाधिष्ठेयपूर्वत्वादिलक्षणया युक्त्या न्याय्यम्।"

(तं०आ०वि० खं० 11/1, पृ० 138)

अत्र "देहनीलेत्यादि" "प्राणाख्यनिमित्तेत्यादि" "प्राक्संवित् प्राणे" इत्यादि च शिवसूत्रशास्त्रस्य चतुर्थखण्डस्य सूत्राणि प्रतिभान्ति, तत्त्वार्थ-चिन्तामणौ व्याख्यातानि।

~गुरुपरम्परातः——वसुगुप्तसिद्धस्य प्रमुखः शिष्यः।
द्र० 'भट्टकल्लटः' इति।

~महाकविः——उत्पलवैष्णवेन भट्टकल्लटो महाकविरित्युक्तः। न च तस्य किमपि काव्यं लभ्यते क्वचिदपि। यथा—

"यत्तु "शक्तिचक्रविभवप्रभवम्" इति पदमुपन्यस्तं तदुद्देशार्थं साभिप्रायत्वान्महाकवेः।"

(स्पं०प्र० पृ० 18)

द्र० 'भट्टकल्लटः' इति।

कवचबीजम्——'हुं' इति प्रसिद्धम्।
उपयुक्तमेतद् यथा—
"हुं हकारो विसर्गवान्—इत्यत्र"

(तं०आ० 307-20)

"अघोरे ह्रीः परमघोरे कवचबीजं घोररूपे हः इत्यत्र च।"

(तं०आ०वि० खं० 12, पृ० 185)

कवर्गः~मातृकासु——पञ्च कादयो वर्णाः मातृकाक्रमान्यासे स्वात्मानं पञ्चमहाभूतात्मकैः प्रतिबिम्बैः खचितं साक्षात्कारयन्तीति-कादयः पञ्चभूतस्थानीयास्तत्र। यथा—

"धरादिस्तु कवर्गोऽयम्"

(पू० प्र० 2, 100)

कवर्गदेवता——कमलोद्भवा। यथा—

" ········ कवर्गे कमलोद्भवा॥"

(स्व०तं० 1, 34)

काकचञ्चुः——सकारस्येदं साङ्केतिकं नाम; प्राचीनकाश्मीरलिप्यां तस्य तदाकारतया लिख्यमानत्वात्।
द्र० विषतत्त्वम् इति।

कात्यायनः——श्रीशैवागममहागुरोः श्रीभूतिराजस्य पूर्वजः वररुचिसदृशः कोऽपि महामनीषी। यथा—

"श्रीमान् कात्यायनोऽभूद्वररुचिसदृशः प्रस्फुरद्बोधतृप्तः" इत्यादि द्रष्टव्यम्।

(भ०गी०सं० पृ० 186)

कामः~चमत्कारात्मकः——
द्र० 'चमत्कारः~कामात्मक' इति।

कामकलारहस्यम्~ग्रन्थः——पुण्यानन्दनाथकृतं श्रीचक्रोपासनाप्रतिपादकं कौलसम्प्रदायानुकूलं लघुकायं पुस्तकम्। अमृतानन्दनाथकृतया व्याख्यया सह प्रकाशितं काश्मीरग्रन्थावलौ।

~सिद्धान्तः——रहस्यमय्येव वाचोक्तं यथा—

"कामस्थं काममध्यस्थं कामोदरपुटाकृतम् ॥
कामेन साधयेत् कामं कामं कामेषु निक्षिपेत् ।
कामेन कामितं कृत्वा कामस्थः क्षोभयेज्जगत् ॥"

(वा०म० पृ० 114)

कौलिकसाधनारहस्यं किमप्येतत् ।

कामतत्त्वम्——बीजरूपतया हकारः । यथा—
"कामस्य पूर्णता तत्त्वं संघट्टे प्रविभाव्यते ।
विषस्य चामृतं तत्त्वं छाद्यत्वेऽणोश्च्युते सति ॥"

(तं० आ० 3, 170)

पारिमित्यरूपं छादितत्वं यदा तस्य च्युतं भवतीति तात्पर्यम् ।

(2) प्राणयोगे पुनः कामः—प्राणो हकारानुविद्धः, विषम् अपानः सकारानुविद्धः । यथा—

"विशिष्टत्वं पुनः कामतत्त्वस्य प्राणरूपत्वं, विषतत्त्वस्य चापानरूपत्वम्; अत एवानयोर्हंकारसकारात्मत्वम्, तदुक्तं—
स-हौ क्षपादिनामानावधरोत्तरचारिणौ ।
परस्परद्वेषरतौ मतौ नगहुडूपमौ ॥"

(उद्ध० तं०आ०वि०, खं० 2, पृ० 169)

अत एव विसर्गोऽयमव्यक्तहकलात्मकः ।
कामतत्त्वमिति श्रीमत्कुलगह्वर उच्यते ।"

(तं० आ० 3, 146)

"तत्रत्यमेव ग्रन्थं पठति—
यत्तदक्षरमव्यक्तं कान्ताकण्ठे व्यवस्थितम् ।
ध्वनिरूपमनिच्छं (मनच्कं) तु ध्यानधारणवर्जितम् ॥
तत्र चित्तं समाधाय वशयेद्युगपज्जगत् ।"

(तं० आ० 3, 148)

~मातृका क्रमे——स च विसर्गात्मको वर्णः ।

~रहस्य चर्चायाम्——स्तनितमणितादिप्रायः स्त्रीकण्ठात् कामसम्भोगसमकालमानन्दातिरेकवशात् स्वयमुच्चरन् कश्चन नादात्मको ध्वनिरनच्कहकलात्मकः । तस्य ध्यानेन बुभुक्षोर्योगिनोऽसुरसुरादिस्त्रियो वशीभवन्ति, का कथा मानुषीणाम् । यथा—

(क) "उपभोगावसरे रतिसौख्यसमावेशवैवश्येन विगलितवेद्यान्तःकरणत्वात् निरस्तवैकल्यायाः कान्तायाः कण्ठान्तः स्वरसत एवोद्यद् अभिव्यज्यमानमत एव सततोदितत्वेऽपि तत्कालमस्य विशेषेणावस्थानम् । एवं च विसर्गस्यानाहतरूपत्वात् सौक्ष्म्येऽपि कान्ताकण्ठान्तः किञ्चिदुच्छूनतापत्त्या "हा-हा" इति स्फुटमवस्थानम् ।"

(तं०आ०वि० खं० 2, पृ० 150)

(ख) "उक्तं चान्यत्र—
यत्तदक्षरमक्षोभ्यं प्रियाकण्ठोदितं परम् ।
सहजं नाद इत्युक्तं तत्त्वं नित्योदितो जपः ॥ इति"

(उद्ध० तदेव, पृ० 151)

तथा—
नित्यानन्दरसास्वादाद्धाहेति गलकोदरे ।
स्वयंभूः सुखदोच्चारः कामतत्त्वस्य वेदकः ॥"

(उद्ध० तदेव पृ० 151)

"तत्र अनाहतात्मनि एवं विधे विसर्गे साधकश्चित्तं सम्यक्—
अतिसौख्यसमावेशविवशीकृतचेतसः ।
अविच्छिन्नं जपन्त्येनमङ्गनासङ्गमोत्सवे ॥
अत्रासक्तधियो यान्ति योगं योगीश्वराः परम् ।
स शिरोरहितः कामः कामिनीहृदयालयः ॥
नेत्रारूढेन तेनाथ शक्तिदृष्टिं समाहरेत् ।
क्षोभयेन्नात्र सन्देहो दृप्तामपि वरस्त्रियम् ॥
इत्याद्युक्तनीत्या कामशब्दाभिधेयम् अनच्कहकलात्मकं विसर्गं स्वनेत्राभ्यां निर्गतं साध्यनेत्रयोरनुप्रविष्टं ध्यायेत्
……………… ……..इत्यादि ।"

(तं०आ०वि० खं० 2, पृ० 151)

~पूर्णम्——विसर्गात्मकमहाकामस्य परिपूर्णायाः अभिव्यक्तेः स्थानं हकारः ।

द्र० 'विसर्गः~अपरः' इति ।

~मातृकायाम्——समस्ततत्त्वव्रातस्थानीयवर्णसृष्टिकारी विसर्गः विश्वसिसृक्षात्मक-महाकामस्वरूपः सन् कामतत्त्वमित्युच्यते रहस्यागमेषु । यथा—
"अत एव विसर्गोऽयमव्यक्तहकलात्मकः ।
काम-तत्त्वमिति श्रीमत्कुलगह्वर उच्यते ॥"

(तं० आ० 3, 146)

विश्वविसिसृक्षात्मकपारमैश्वर्याभिव्यञ्जकोऽयं मातृकावर्ण इति बोध्यम् ।

कामविष-तत्त्वे~प्राणापानक्रमे——पृथक् पृथक् प्रतिपाद्यमानत्वे कामतत्त्वं हकारो विषतत्त्वं च सकारः । प्राणविषये कामतत्त्वं प्राणो विषतत्त्वं चापान : इति । तेन प्राणः "हं" अपानश्च "सः" इति । यथा—

"विशिष्टत्वं पुनः कामतत्त्वस्य प्राणरूपत्वं, विषतत्त्वस्य चापानरूपत्वम् । अत एवानयोर्हंकारसकारात्मत्वम् ।
'स हौ क्षपादिनामानावधरोत्तर-चारिणौ ।
परस्परद्वेषरतौ मतौ नगहुडूपमौ ॥
कस्तौ रोधयितुं शक्तो वीर्यं मुक्त्वा स्वकं महत् ।"

(उद्ध०तं०आ०वि०, खं० 2, पृ० 168, 169)

ध्वनियोगस्य (वर्णयोगस्य) अयं विषयः ।

~ऐक्ये——पृथक् पृथक् प्राणापानरूपयोरप्यनयोः प्राणनक्रियाया अभिन्नत्वेन एकत्वेनापि निर्देशः आगम शास्त्रेषु । यथा—

"एवं वैशिष्टयेऽप्यनयोः सामान्यस्य विशेषनिष्ठत्वात् प्राणनमात्ररूपत्वमुभयत्रापि सम्भवतीति ऐक्यरूप्येण निर्देशः ।"

(तं०आ०वि०, खं० 2, पृ० 169)

कामादितत्त्वत्रयम्——कामो, विषं, निरञ्जनं चेति। तच्चेच्छाज्ञानक्रियास्थानीयं भैरवस्य स्वभावभूतम्। प्राणगतो बीजमन्त्राभ्यासविषयोऽयम्। यथा—

"इच्छा कामो विषं ज्ञानं क्रियादेवी निरञ्जनम्॥
एतत् त्रयसमावेशः शिवो भैरव उच्यते।"

(तं०आ० 3, 172, 73)

यत् खलु काम-विष-निरञ्जनाख्यं बीजत्रयं तदिच्छादिशक्तित्रयोद्बोधकं साधकस्येति वेद्यम्। तत्र कामतत्त्वं = सः, विषतत्त्वं = हः निरञ्जनतत्त्वम् औ इति। विसर्गस्यापि हकारार्द्धमयत्वेन तत्त्वत्रयम् "सौः" इति प्रतिभाति। परं नैतद्रहस्यमुन्मीलितं सत् क्वापि दृश्यते।

कामिकम्——कामिकागम एव।
द्र० (तं०आ० 1, 58)

कामिका——कामिकागमो यस्य वाक्यमुद्धृतं तन्त्रालोके। यथा—

"श्रीकामिकायां कश्मीरवर्णने चोक्तवान् प्रभुः।
इत्यारभ्य··············पुराणि शिवशासने॥ इत्यन्तम्"

(तं०आ० 8, 293 तः 215)

द्र० (तत्रैव 4-25 तः 27, 6—94, 95) इति।
द्र० (ने०तं० उद्० खं० 2, पृ० 36) इति च

कामिकागमः——श्री श्रीकण्ठीसंहितायां "कामजम्" इति नाम्ना शिवभेदेषु परिगणितो भेद्दृष्टिप्रधानः आगमविशेषो यस्य वाक्यानि बहुधा समुद्धृतानि काश्मीरशैवदर्शनग्रन्थेषु, मतं चाप्युद्धृतं बहुधा तन्त्रालोकादौ; उपासनाक्रमाणां बहुधा समानत्वात्। दक्षिणभारते तमिलदेशे लोकप्रियोऽयमागमः।

द्र० (तं०आ० 1, 58; 4, 25 तः 27; 6, 190, 191; 22, 32; 23, 4) इति।
तथा 'स्व०तं०उद्० प० 7, पृ० 213'
'ने०तं० उद्०, खं० 9, पृ० 152'
'ने०तं० उद्०, खं० 2, पृ० 36'
'ने०तं० उद्०, खं० 2, पृ० 341' चापि

कामिकातन्त्रम्——कामिकागम एव।
द्र० (ने०तं० उद्०, खं० 2, पृ० 341)

कायपीठम्——शरीरे योगधारणालम्बनतां नीतं शिरः इति। यथा—

"कायपीठं स्वं परकीयं वा शिरः।"

(तं०आ०वि०, खं० 11/2, पृ० 15)

कारकत्वाश्रयः——कारकाणां कारकत्वस्य प्रतिष्ठास्थानभूत आत्मा। चित्स्वभाव आत्मैव कर्ता, स एव च ततः कारकः। करणादिषु स एव कारकत्वं वितरतीति तत्रापि वस्तुतः स एव कारकः ततः स एव सर्वत्र कारकत्वस्याश्रयः। यथा—

"ततश्च काष्ठैः पचतीत्यस्यामपि दशायां संवित्तत्त्वस्वातन्त्र्यानुप्रवेशादेव कारकत्वम्, न त्वन्यथा।"

(ई०प्र०वि०वि०, खं० 3, पृ० 254)

"सोऽहं शाकोऽभिनन्दामि स्वं क्रियापदमुत्तमम्।
मामालम्ब्यैव सर्वत्र कारकत्वं प्रतिष्ठितम्॥"

(सि०म०रह० 3, 14)

कारकवार्त्तिकम्——किमपि व्याकरणशास्त्रपुस्तकम्। यथा—

"तथाऽऽह कारकवार्त्तिके—
भिन्नं पचेः स्वरूपं कारकभेदेन तद्बुद्धेः। इति"

(ई०प्र०वि०वि० खं० 3, पृ० 62)

व्याकरणशास्त्रसिद्धान्ता अपि बहुषु स्थलेषु दार्शनिकीं दृष्टिमवलम्बन्ते। तत एव तेषामुल्लेखो दर्शनग्रन्थेषु कोषे चास्मिन्। पाणिनीयं व्याकरणं तु माहेश्वरमेव। तत एव भर्तृहरिप्रभृतयो वैयाकरणा अप्यन्तः शैवाः।

कारणता~प्रमातुरेव——"अन्तराभासमानस्य तथारूपापरित्यागेनैव बहिराभासनं निर्माणम्। ततश्च यद्वस्तु यमपेक्ष्य अन्तरित्युक्तं तद् वस्तु तस्यैवान्तरवस्तुरूपविपरिवृत्तिमात्रस्य बहिष्करणार्हं भवति। संविद्रूपं च प्रमातारमपेक्ष्य अन्तराभासिनो भावास्तदपेक्षयैव बाह्याभासाः। इति तेनैव तेषां बहिष्करणावभासनं युक्तम्। ततश्च प्रमातैव कारणं भवति न जडः।"

(ई०प्र०वि० खं० 2, पृ० 144)

कारणत्वम्——वस्तुतः कर्तृत्वमेव कारणत्वम्, अन्येषां कारणत्वेनाभिमतानां सर्वदा कर्त्रधीनत्वात्। यथा—

"न कर्तृत्वादृते चान्यत् कारणत्वं हि लभ्यते।"

(तं०आ०, 9-10)

बीजाङ्कुरादौ——यत्र बीजादेरङ्कुरादि जायते तत्रापि वस्तुतः कर्ता परमेश्वर एव कारणम्, तस्यैव नियति-शक्तेरनुसारं यतोऽङ्कुराद्युत्पत्तिस्तत्र। यथा—

ईश्वर एव नियतिशक्तिं निजामनुरुन्धानो बीजभूमिजलाभासपुरःसरीकारेणाङ्कुरात्मानं स्वच्छे स्वप्रकाशे निर्भासयतीति।"

(ई०प्र०वि०वि० खं० 3, पृ० 193)

कारणपञ्चकम्——(1) ब्रह्मा, (2) विष्णुः, (3) रुद्रः, (4) ईश्वरभट्टारकः, (5) सदाशिव भट्टारकः इति। एते पारमेश्वराणि पञ्चकृत्यानि तद्वितीर्णया शक्त्या तदिच्छानुसारं प्रचालयन्ति।

कारण-षट्कम्——ब्रह्मा, विष्णुः, रुद्रः, ईश्वरः, सदाशिवः, अनाश्रित इत्येतेऽधिकारिणः कारणषट्कम्। यथा—

"ब्रह्मविष्णुहरेशानसुशिवानाश्रितात्मनि ।।
षट्के कारणसंज्ञेऽर्धं ………………।"

(तं०आ०, 9-57, 58)

~प्राणोदये——तत्र हृदयादारभ्य ब्रह्मरन्ध्रान्तं ब्रह्मादिकारणषट्कस्य भावनया स्थापना क्रियते प्राणोच्चारयोगे ।

उक्तं हि—"यथा च-हृत्-कण्ठ-तालु-ललाट-ब्रह्म रन्ध्र-द्वादशान्तेषु ब्रह्म-विष्णु-रुद्रेश-सदाशिवानाश्रिताख्यं कारण-षट्कं तथैवापानेऽपि हृत् कन्दानन्द-संकोच-विकास-द्वादशान्तेषु बाल्य-यौवन-वार्धक्य-निधन-पुनर्भवमुक्त्यधिपतय-एते ।"

(तं०सा० पृ० 57)

प्राणेऽत्र द्वादशान्त उर्ध्वद्वादशान्तो वेद्यो यो ब्रह्मरन्ध्राद् द्वादशाङ्गुलपर्यन्ते स्थाने शिखाशिखरे। अपाने चोपस्थादग्रे द्वादशाङ्गुलपरिमितं स्थानं वेद्यम् ।

~शरीरे——यथा—"ब्रह्म-हृदयो, विष्णु-कण्ठो, रुद्रतालुरीश्वरभ्रूमध्यः, सदाशिवोर्ध्वब्रह्मरन्ध्रोऽनाश्रितात्मकशक्तिसोपानोपरिपदः कारणषट्कविग्रहः परमेश्वरः इति ।"

(ई०प्र०वि०वि० खं० 3, पृ० 309)

कारणेश्वराः——शिवेच्छानुसारं तस्य पञ्चकृत्यानि तद्वितीर्णयैव तत्तच्छक्त्या निभालयन्तो देवाधिदेवाः ब्रह्माद्याः सदाशिवान्ताः कारणपञ्चकत्वेन गणिताः एव हि कारणेश्वराः इति ।

कारिका——उक्तं तल्लक्षणं यथा—

"संक्षेपेण वृत्तश्रव्यता बलेन च प्रतिपाद्ये झटिति यया बुद्धिः क्रियते सा कारिका" इति ।

(ई०प्र०वि०वि०, खं० 1, पृ० 198)

कारुकसिद्धान्तः——इदानीमलभ्यं भेदवादनिष्ठं किमपि शैव-दर्शनम् । तद्दर्शनोपासनया विद्येश्वरप्राप्त्या महामायायां या विश्रान्तिस्तद्रूपस्यैव मोक्षस्य प्राप्तिः पार्यन्तिकफलत्वेन सम्मता तत्र । सम्भवतो अयमेव सिद्धान्तः कदाचित् कौरुषसिद्धान्त इत्युच्यते स्म । यथा—

"मौसुले कारुके चैव मायातत्त्वं प्रकीर्तितम् ।"

(तं०आ०वि०, खं० 1, पृ० 70)

मायातत्त्वे स्थितिरेव तत्र दर्शने मोक्षश्चरमं च जीवनस्य फलम् ।

द्र० 'कारुका' इति ।

कारुकाः——पाशुपतशाखाविशेषभाजः शैवा एते प्रतिभान्ति । तत्र कौरुषशाखासमुल्लेखात् । तन्त्रालोकादौ साधनाक्रम विशेषोपासकेषु गणिताः । यथा—

"………… आर्हताः कारुकाश्च ये ।"

(तं०आ० 13, 305)

"मौसुले कारुके चैव मायातत्त्वं प्रकीर्तितम् ।"

(उद्ध०तं०आ०वि०, खं० 1, पृ० 70)

कार्मणं~मलम्——कार्मो मल एव । यथा—

"कर्मणा पुण्यपापवासनात्मना सम्भूतं कार्मणम् ।"

(म०मं०प० पृ० 31)

द्र० 'कार्ममलम्' इति

कार्ममलम्——धर्माधर्मात्मकं कर्मबन्धनम् । यथा—

"कर्तुरबोधरूपस्य देहादेर्भिन्नवेद्यप्रथने सति धर्माधर्मरूपं कार्ममलम् ।"

(ई०प्र०वि०, खं 2, पृ० 229)

तच्च सकलाख्यस्य प्रमातुः स्पष्टमेव । प्रलयाकलस्य तु कंचित् कालं सुषुप्तप्रायं फलदानासमर्थं तिष्ठति, कालान्तरे च पुनः संसृतिरूपं फलं फलति ।

~कारणतः——(1) मायान्ताध्वविसारिणः कार्ममलस्य प्रधानं कारणं अज्ञानात्माणवो मलः । यथा—

"अस्य कार्ममलस्यापि मायान्ताध्वविसारिणः ।
प्रधानं कारणं प्रोक्तमज्ञानात्माणवो मलः ।।"

(पू० प्र० 2/477)

क्रियाशक्तिरेव परिमिततां प्राप्ता सती पशुप्रमातुः कार्मं मलं जनयति । तथा—

"क्रियाशक्तिः क्रमेण भेदे सर्वकर्तृत्वस्य किंचित्कर्तृत्वाप्तेः कर्मेन्द्रियसंकोचग्रहणपूर्वम् अत्यन्तं परिमिततां प्राप्ता शुभाशुभानुष्ठानमयं कार्मं मलम्………।"

(प्र०हृ० पृ० 21, 22)

~तत्त्वतः——ईश्वरस्यैव सर्वकर्तृत्वे सति तदिच्छोद्भावितायाः मायायाः प्रभावेण पशोः स्वस्य यः परिमितः कर्तृत्वाभिमानो तत्संस्कारसहितः स एव तस्य कार्मो मलः । तेन कर्तृत्वस्य मिथ्याभिमानेनासौ कर्मसंस्कारप्रेरितः सन्नसंख्ययोनिषु जायमानः कर्मफलानि परवश इव भुंक्ते । यथा —

"एवमेवैतदायुष्मंस्तथा ह्येवं विजानताम् ।
न किञ्चन फलं क्वापि शुभाशुभसमुद्भवम् ।।
इत्थं ये तु न जानन्ति भुञ्जते तेऽविपश्चितः ।
तदेव कर्मसंज्ञं तु मलमज्ञानमूलकम् ।।"

(मा०वि०वा० 1, 314-315)

~फलतः——जात्यायुर्भोगफलदः कार्मो मलः । यथा—

"भोग हेतुश्च कर्म स्यात् ………………।"

(स्व० तं०, 4/105)

~मुख्यतः——साक्षात् संसृतिजनकत्वेन कार्म एव मलो मुख्यतयाऽनिवार्यो भवति । यथा—

"कार्ममलस्याभावे सत्येव दत्तोऽसंसरणसोपानपदबन्धः, अत

एव कार्ममलस्य निराकरणमेव सांख्ययोगपुराणभारतश्रुत्यन्तादौ यत्नेनोपदिश्यते ।"

द्र० (ई०प्र०वि० खं० 2, पृ० 228)

~विच्छेदत:——यतोऽज्ञानवशादेव परिमित: कर्मकर्तृस्वाभिमान: पशोस्ततो ज्ञानोदये जाते तथा विषस्य संकुचितस्याभिमानस्यापगमे न कापि तत्प्रयुक्ता वासनावशिष्यते । यथा—

"कर्मफलं शुभमशुभं मिथ्याज्ञानेन संगमादेव ।
विषमो हिं सङ्गदोषस्तस्करयोगोप्यतस्करस्येव ॥"

(प० सा० 53)

कार्ममावरणम्——कर्मफलभूतं स्थूलं शरीरं कार्ममावरणम् । यथा—

"बाह्यं तुषस्थानीयं प्राधानिकं शरीरसत्तालक्षणमावरणं स्थूलं, त्वङ्मांसादिरूपत्वात् । एष तृतीय: कार्मो मलो येन प्रमाता शुभाशुभ-कर्मसंचयभाजनं भवति ।"

(प०सा०वि० प्र० 56)

कर्ममलस्य फलभूतत्वेनैव योगराजेन "कार्मोमल:" इत्येवं व्याख्यातमेतदावरणम् ।

कार्यवर्ग:~तत्त्वेषु——प्राकृतेषु तत्त्वेषु प्रमेयात्मकानि पञ्चसूक्ष्माणि तन्मात्रतत्त्वानि पञ्च च स्थूलानि भूततत्त्वात्मकानीति दश-तत्त्वानि कार्यवर्ग: । यथा—

"कार्यवर्गश्च दशधा स्थूलसूक्ष्मत्वभेदत: ।" इति

(ई० प्र० 3-1-11)

"पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥
गन्धो रसश्च तन्मात्रे रूपतन्मात्रमेव च ।
स्पर्श: शब्दश्च पञ्चैव तन्मात्राणीरितानि तु ॥
एतत्ते दशधा कार्यं कीर्तितं नामसंख्यया ।"

(स्व० तं०, 11/129-31)

कार्यकारणभाव:——नियतपूर्वभाविकारणं नियतपरभाविकार्यमिति नियतपूर्वापरभावात्मक आभास-विशेष: कार्यकारणभाव: । यथा—

"अतो यन्नियमेनैव यस्मादाभात्यनन्तरम् ।
तत्तस्य कारणं ब्रूम: सति रूपान्वयेऽधिके ॥"

(तं० आ० 9, 24)

परस्पर-स्वरूपान्वये सतीति । तेन कृत्तिकारोहिण्योर्नोपादानत्वेन कार्यकारणता ।

~आश्रयत:——लोके नियत्यधीन: कार्यकारणभाव: । तस्य नियतिनियमितस्य कार्यकारणभावावभासस्याश्रयश्चिद्रूप: प्रमाता, इति स एवाश्रयोऽस्य । यथा—

"अवश्यं केनचित् चिद्रूपेण प्रमात्रा भाव्यं, यत्र विश्रान्तं सद् भावद्वयं कार्यकारणव्यपदेश-पात्रतामासादयेत्, न हि चिदात्मकंकप्रमातृविश्रान्तिमन्तरेण अत्यन्तविशरारूणां सिकतानामिव जडानां भेदाभेदात्मा संश्लेष: ।"

(तं०आ०वि० खं० 6, पृ० 23, 24)

~नियतिनियमित:——नियतिशक्त्यधीनो बीजाङ्कुरादे: परस्परं निमित्तनैमित्तिकभाव: । यथा—

"कल्पितस्तु कार्यकारणभाव: परमेशेच्छया नियतिप्राणया निर्मित: ।"	(तं०सा० पृ० 70)

~बौद्धमते——नियतपूर्वापरता । यथा—"अयमेव च भावो भावान्तरेण सह नियतपूर्वापरतया विकल्पेन व्यवह्रियमाण: कार्यकारणभाव: इत्यभिधीयते ।"

(ई०प्र०वि० खं० 1, पृ० 86)

~परमार्थिक:—परमार्थतया कारणं परमेश्वर: स्वतन्त्र: स्वेच्छानुसारं स्वशक्त्या स्वात्मन्येव जगदवभासकर्ता । कार्यं च विश्वं भावाभावात्मकं जगत् । बीजादङ्कुर: इत्यादि कार्यकारणभावस्तु लोकव्यवहारे । स चापि पारमेश्वरनियतिशक्त्यधीन इति तत्रापि पारमेश्वरी शक्तिरेव मूलकारणम् । यथा—

(क) "तत्र श्लोकेन स्वमते कर्तृ-कर्मभाव एव कार्यकारणभाव: इत्युपक्षिपति ।"	(ई०प्र०वि०, खं० 2, पृ० 135)

(ख) "एष चानन्तशक्तित्वादेवमाभासयत्यमून् ।
भावानिच्छावशादेषा क्रिया निर्मातृतास्य सा ॥".

(ई० प्र० 4-4-1)

(ग) "तत्र परमार्थिक एतावान् कार्यकारणभावो यदुत कर्तृस्वभावस्य स्वतन्त्रस्य भगवत एवंविधेन शिवादिधरान्तेन वपुषा स्वरूपभिन्नेन स्वरूपविश्रान्तेन च प्रथनम्"

(तं०सा० पृ० 69त: 70)

~पारमेश्वर:—परमेश्वरस्यान्तरहंरूपतया संविन्मयत्वेन विद्यमानस्यैव जगतो तेनैव बहिरिदंरूपतया बाह्यान्त:करणविषयतायोग्यतापादनम् । न पुनरसतो विश्वस्य निर्माणं नापि सत: पुन: सत्ताकरणमपि त्वन्त: सत एव बाह्यतयाभिव्यञ्जनम् । यथा—

"यदसत् तदसद् युक्ता नासत: सत्स्वरूपता ।
सतोऽपि न पुन: सत्तालाभेनार्थोऽथ चोच्यते ॥
कार्यकारणता लोके सान्तर्विपरिवर्तिन: ।
उभयेन्द्रियवेद्यत्वं तस्य कस्यापि शक्तित: ॥"

(ई० प्र० 2-4-3, 4)

~मुख्य:——द्र० 'पारमेश्वर' इति ।

~मूलत:——मूलत: कर्ता शिव:, स एव हि समस्तकार्यजातमूलकारणम् विश्वं हि तस्यैव कार्यं, तेनैवानुपादानमाभास्यते यत: ।

एतदेव सूचितं यथा—

"तत्र कर्तृकर्मतैव तत्त्वं कार्यकारणतायाः…… · ………… …………… …,…………………………………………………… ………………………………………………… …………… … …………चेतनस्यैव सा कर्तृतात्मेति प्रसाध्यते।"

(ई०प्र०वि०वि० खं० 3, पृ० 184)

कर्तृता चेतनस्यैवात्मेति।

~लोके——प्रथमं घटाद्याः कुलाल-संवित्तौ भेदाभेदात्मकेन सम्बन्धेन वर्तमानाः सन्तस्तदनन्तरं तस्यान्तःकरणभूमौ सूक्ष्मेण विकल्पमात्रात्मकेन शरीरेणोत्पन्नाः सन्तः पश्चान् मृदाद्युपादान· साहाय्येन दण्डचक्रादिनिमित्तकारणकलापसहकारेण चान्तर्बहिरुभयेन्द्रियवेद्यतामापद्यन्ते। एतदेव कुलालादेर्घटादिनिर्मातृत्वं लोके। यथा—

"कुलालहृदयान्तर्मनोगोचरतापत्तेरपि प्राच्यावस्थायामन्तः स्वसंविदि तादात्म्येन विचित्रतया विश्वस्य भेदाभेदमय्या परिवर्तमानस्य स्फुरतो यदन्तःकरणैकवेद्यत्वं सुखादेरन्तर्बहिष्करणद्वयवेद्यत्वं च घटादेराभास्यते यदयमेव स लोके कार्य-कारण-भावः।"

(ई०प्र०वि०वि० खं०·3, पृ० 187)

भेदाभेदमय्या विचित्रतयेत्यन्वयः।

(ई०प्र०वि० खं 2, पृ० 140)

तदत्र लौकिके कार्यकारणभावेऽपि कुलालादिरन्तःसंस्थितस्यैव बहिराभासनं कुर्वंस्तस्य स्रष्टा सम्पद्यते।

द्र० अत्रैवोपरि 'पारमेश्वरः' इति।

~वैविध्येन——एकस्यापि कार्यस्यान्यान्यकारणानि सम्भवन्ति क्वचित् कदाचित्। यथा—

"लोके च गोमयात्कीटात् संकल्पात्स्वप्नतः स्मृतेः।
योगीच्छातो द्रव्यमन्त्रप्रभावादेश्च वृश्चिकः।"

(तं० आ० 9-42, 43)

(2) यतः कल्पितोऽयं लौकिकः कार्यकारणभावस्ततः कल्पनाश्रितत्वात्तदनुसारं विविधः स्वप्नजागरादौ, योगिकुम्भकारादिसामर्थ्यानुसारञ्च। यथा—

"एवं कल्पितेऽस्मिन् कार्यत्वे शास्त्रेषु तत्त्वानां कार्यकारणभावं प्रति यद् बहुप्रकारत्वं तदपि संगतम्, गोमयात् कीटात् योगीच्छातो मन्त्रादौषधाद् वृश्चिकोदयवत्।"

(तं०सा० पृ० 73)

"मायातोऽव्यक्तकलयोरिति रौरवसंग्रहे॥
श्रीपूर्वे तु कलातत्त्वादव्यक्तमिति कथ्यते।"

(तं० आ० 9, 40, 49)

~सामान्यतः——निर्बाधः पौर्वापर्यनियम एव कार्यकारणभावः। स नियमोऽपि चिद्विलासाश्रितश्चिता स्वैश्वर्यतोऽवस्थापितः। यथा—

"ततो यावति याद्रूप्यान्नियमो बाधवर्जितः।
भाति तावति ताद्रूप्याद् दृढहेतुफलात्मता॥
तथाभूते च नियमे हेतुतद्वत्त्वकारिणि।
वस्तुतश्चिन्मयस्यैव हेतुता तद्धि सर्वगम्॥"

(तं० आ० 9, 28, 29)

"तथा च तेषां हेतूनां संयोजनवियोजने॥
नियते शिव एवैकः स्वतन्त्रः कर्तृतामियात्।"

(तं० आ० 9-35, 36)

कालः——(1) इदानीन्तनादितया क्रमावभासमूला कलना पशोः। सा च कलना भूतवर्तमानभविष्यदाद्याभासरूपा। यथा—

"इदानीन्तनभावेऽस्मिन् कालोऽप्याकलनं मतम्।"

(शि०सू०वा० भा० 3, पृ० 44)

काल-तत्त्वस्य मायीयत्वाद् व्यावहारिकस्य कालस्याभासो मायाक्षेत्र एव, न शुद्धविद्यादौ। तत्रापि या कालकलनाऽसौ तत्त्वाध्वयोगाभ्यासाङ्गभूता केवलं भावनामयी। भावना च साधककृता कल्पना। ततोऽपर एवासौ तत्रत्यः कालः।

(2) क्रमाक्रमकलना कालः। यथा—

"सर्वोऽसौ वक्ष्यमाणोऽध्वा प्राणस्थः कल्यते, तस्य क्रमाक्रमकलनैव कालः।"

(तं०सा० पृ० 45)

"क्रमेणाक्रमेण च कलना भावानां परिच्छित्तिः सैव कालः, तत्र क्रमेण कार्यकारणादौ, अक्रमेण चित्रज्ञानादौ। इत्यादि"…

(तं०सा० पृ० 45 टिप्पणी)

कलना च पारमेश्वरी स्वतन्त्राऽवभासना सा च प्रतिबिम्बन्यायेन परिस्फुरति। परमेश्वरस्य शक्तय एव तस्य चित्प्रकाशे प्रतीपतया बहिर्मुखतयावभासन्ते कलनात्मिकया तस्य लीलया।

~अकल्यः——मायाया उर्ध्वतरेषु तत्त्वेषु न कोऽपि कालव्यवहारः। सदाशिवादुपरि च सूक्ष्मतरस्यापि क्रमस्य नावकाशः। ततस्तत्र नैव सूक्ष्मापि कालकलना कथञ्चित्। परं कालाध्वधारणायां तत्रापि भावनया सूक्ष्मसूक्ष्मतरा क्रमरूपता स्थाप्यते तावत्कालम्। परं तत्र क्षेपसंख्यानादिरूपाणां कलनानामभावादकल्योऽसौ भावनाभावित एव कालः। यथा—

"ततोऽप्यूर्ध्वममेयस्तु कालः स्यात् परमावधिः।
नित्यो नित्योदितो देवि अकल्यश्च न कल्यते॥
स चाद्यः कलयेत् सर्वं व्यापिन्यादि धरावधिम्।
त्रुट्यादिभिः कलाभिश्च देव्यध्वानं चराचरम्॥"

(स्व० तं० 11, 309 तः 311)

"स कालः साम्यसंज्ञश्च जन्ममृत्युभयावहः।

(तदेव 11-309)

एतस्मात् साम्यसंज्ञादप्यूर्ध्वमकल्यः कालः इति प्रतीयते।

द्र० अकल्यः—कालः इति च।

"शक्तिकालेन परार्धकोटिगुणितेन अनाश्रितदिनम्। अनाश्रितः सामनसे पदे, (लीयते इति) यत्तन् सामनस्यं साम्यं तद् ब्रह्म।

अस्मात् सामनस्यात् अकल्यात् कालान्निमेषोन्मेषमात्रतया प्रोक्ताशेषकालप्रसरप्रविलयचक्रभ्रमोदय:।"

(तं०सा० पृ० 56)

~अध्वात्मक:——स्थानकल्पनाख्यस्य योगस्य प्रकारविशेष:। कालतत्त्वान्मायामयादन्य एवायं क्रियाशक्तिस्फाररूप: कालो यस्य कालाध्वेति संज्ञा पारिभाषिकी। अस्याभ्यासक्षेत्रं ह्यनाश्रितशिवपर्यन्तम्। यथा—

"एष कालो हि देवस्य विश्वाभासनकारिणी ॥
क्रियाशक्ति: समस्तानां तत्त्वानां च परं वपु:।"

(तं० आ० 6-38, 39)

~ईश्वरतत्त्वमय:——विश्वावभासिनी पारमेश्वरी क्रियाशक्तिरेव तत्त्वात्मकविश्वकलनकारिणी सती कालो मूलत:। क्रियाशक्तेर्बहिर्मुखाभिव्यक्तिश्चेश्वरतत्त्वम्। तत: ईश्वर एव हि मूलत: पारमेश्वरशक्तिरूप: काल:। यथा—

"एतदीश्वरतत्त्वं तच्छिवस्य वपुरुच्यते।"

(तं० आ० 6-39)

'तस्माद् बहिरुन्मेषलक्षणाद्विश्वावभासकारित्वाद्धेतोरेतदीश्वरतत्त्वमुच्यते, कालात्मन: क्रियाशक्तेरेवैतद्विश्वकलनात्मकत्वं बहिर्मुखं रूपमित्यर्थ:।"

(तं०आ०वि० खं० 4/1 पृ० 37)

~कञ्चुकविशेष:——व्यवच्छेदकं तत्त्वम्। मायया सङ्कोचमापादित: पशुप्रमातैवानेन तत्त्वेन वेष्टित: सन्नेवमेवाभिमनुते "आसम्, अस्मि, भविष्यामीत्यादि"। वस्तुतो अकालकलितो नित्योऽपि सन्नसौ स्वात्मानं कालात्मकव्यवच्छेदकलितमिव तथाभिमनुते यथा न काचन क्रियाऽस्य कालकृतपरिच्छेदरहिता कदाचिदपि विमर्शपदवीमधिरोहति। कालस्यानेनैव माहात्म्येनान्ये शास्त्रकृतस्तं विभुं नित्यं च द्रव्यविशेषमकल्पयन्। परं शैवनये परिमितप्रमातुर्या क्रिया तदङ्गभूतेन क्रमेण स्वात्मनि कल्पितमेव किमपि क्रमावभासात्मकं काल्पनिकं तत्त्वं काल:। यतोऽयं कल्पनाक्षेत्रे विजृम्भमाणे सर्वस्मिन्नपि व्यवहारजाते ओतप्रोततयावभासते, आप्रलयं च तथावभासमान: परम्परात्मकतया तिष्ठत्युपयुज्यते प्रभावयति च; ततोऽस्य नित्यद्रव्यत्वमभिमतं नैयायिकादिभि:। उक्तं शैवशास्त्रे—

'कालं व्यवच्छित् कर्तारम्............।"

(मा०वि० वा० 1, 876)

"काल: क्रममासूत्रयन् प्रमातरि विजृम्भमाणस्तदनुसारेण प्रमेयेऽपि प्रसरति, योऽहं कृशोऽभवं स स्थूलो वर्ते भविष्यामि स्थूलतर:—इत्येवमात्मानं देहरूपं क्रमवन्तमिव परामृशंस्तत्-सहचारिणि प्रमेयेऽपि भूतादिरूपं क्रमं प्रकाशयति।"

(ई०प्र०वि०, खं० 2, पृ० 208)

~द्विविध:——तत्र सौरपरिस्पन्दाश्रित: क्रमावभास एको यो लौकिक: काल:, क्रमरूपतावभासनशक्तिरूप: शिवनिष्ठोऽपरो य: कालीति कथ्यते, कालशक्तिरिति वा। असावाध्यात्मिक: काल:। यथा—

"कालो द्विधात्र विज्ञेय: सौरश्चाध्यात्मिक: प्रिये।"

(स्व तं० 7-2)

~पर:——परस्यां संविदि तच्छक्तितया विद्यमानं कालावभासनसामर्थ्यम्। प्रभो: कालशक्ति:।

द्र० काल:~परे तत्त्वे' इति।

~परे तत्त्वे——परे संवित्तत्त्वे या क्रमाक्रमात्मकस्य कालस्यावभासनकरी शक्ति: तद्रूपेणैव तत्र काल:। यथा—

"क्रमाक्रमात्मा कालश्च पर: संविदि वर्तते।
काली नाम परा शक्ति: सैव देवस्य गीयते ॥"

(तं०आ० 6-7)

~बीजम्——मकार:। यथा—

"कालो म।"

(तं०आ०वि० खं० 12, पृ० 202)

तथा (तं०आ०वि० खं० 12, पृ० 178)

~मूलत:——अध्वन: क्रमाक्रमतया यत् कलनं तत्स्वभावता या परस्य तत्त्वस्य स एव मूलत: काल:। तद्विकास एव त्रुट्यादिमहासृष्टिप्रलयान्ता: सर्वेऽपि कालभागा:। यथा—

"अध्वन: कलनं यत्तत् क्रमाक्रमतया स्थितम्।
क्रमाक्रमौ च चित्रैककलना भावगोचरे ॥"

(तं०आ० 6-6)

द्र० 'काल~परे तत्त्वे' इति।

~लक्षणत:——कस्यचिदाभासोऽपरस्य चानाभास इत्येवं प्रचलन्नाभासानां क्रम: एव काल:। यथा—

"आभासनाभासात्मा क्रम एव तावत् काल:।"

(ई०प्र०वि०वि० खं० 2, पृ० 23)

~लोक व्यवहारे——सूर्यादीनां नियतक्रमिकक्रियावतां या क्रियास्तासामेव विततावितताादिरूपे क्रमे कल्पिता: क्षण-घटिका प्रहराहोरात्र-पक्ष-मास-वर्ष-युग-मन्वन्तर-कल्पादिरूपा: काल्पनिका आभासा:। तेन कालो नैव वस्तुभूतं किमपि तत्त्वम्, अपि तु क्रियावैचित्र्याधारे कल्पिता विततावितताादिरूपा क्रमिकत्वकल्पना काल:। यथा—

"काल: सूर्यादिसञ्चारस्तत्तत्पुष्पादिजन्म वा।
शीतोष्णे वाथ तल्लक्ष्य: क्रम एव स तत्त्वत: ॥"

(ई०प्र० 2-1-3)

"ये इयत्तया परिनिष्ठता आभासा: सिद्धा:, तद्यथा चन्द्रसूर्यादीनां सहकारमल्लिकाकुटजादीनां शीतोष्णादे:, परभृतमदविलासादे:, त एव कालो, यतोऽपरिनिष्ठितं गमनपठनादि तैरियत्तया परिनिष्ठीयते, परिवर्तकैरिव कनकं, स एव च सूर्यादीनां स्वभावविशेषस्तत्त्वत: परमार्थत: क्रमो, नान्य: कश्चित् क्रमो नाम। क्रम एव च कालो, नान्योऽसौ कश्चित्।"

(ई०प्र०वि० खं० 2, पृ० 8-9)

"मायाप्रमातृलग्न एव प्रधानतया भवन्नेतद्विषयीकरणीयभावनिष्ठः क्रम एव कालः इति दर्शयितुं सूत्रम्—"

(ई०प्र०वि०वि० खं० 3, पृ० 4)

"तेन सूर्यादिगतो यो नियतः स्वभाववेदः स क्रमः, स एव कालः।"

(ई०प्र०वि०वि० खं० 3, पृ० 5)

नियतेन सूर्यसञ्चारादिक्रियाक्रमेणानियतक्रमो लोकव्यवहारः परिमीयते, परिमाणसूत्रैरिव गेहोद्यानसरणिराजमार्गादिदैर्ध्यम्।

~शास्त्रान्तरेषु——वैशेषिकादि-सम्मतस्य काललक्षणस्यासमीचीनता प्रतिपाद्यते। यथा—

"वैशेषिकानां द्रव्यरूपः, कापिलानां रजःस्वभावः प्रवर्तनात्मकत्वात्, वैयाकरणानां नित्यानाश्रितप्रवृत्तिस्वभावः, सौगतानां सन्तन्यमानभावैकपरमार्थः, सोऽपि वस्तुतः क्रमरूपतां नातिक्रामतीति क्रम एव नाम बहिः कालः।"

(ई०प्र०वि०वि० खं० 3, पृ० 5)

"दिवसे जातो मध्याह्ने जात इति अर्कसञ्चारक्रमस्यैव कारणताप्रतीतिः सिद्धा, न तु नित्यद्रव्यात्मनः परिनिष्ठितरूपस्य कस्यचित्।"

(ई०प्र०वि०वि० खं० 3, पृ० 5)

~शुद्ध विद्यादौ——यद्यपि कालतत्त्वं मायीयमेव, तथापि कालाध्वधारणाभ्यासे शुद्धविद्याक्षेत्रेऽपि तदुपर्यपि च क्रमरूपतायाः आभासस्य भावनाऽभ्यस्यते। कालतत्त्वादूर्ध्ववर्ती सूक्ष्मतरो वा क्रमोऽयम्।

"अथवा मायोर्ध्वेऽपि परापररूपत्वादवस्थाविशेषस्य कालविभागोऽपि स्यादित्यत एव तुटिरित्युक्तम्।"

(शि०दृ०वृ०, पृ० 11)

एतेन ज्ञायते यन्मायोर्ध्वे स्थूलक्रमरूपतात्मकस्य कालिकव्यवहारस्याभावेऽपि वर्तत एव कश्चन परापरावस्थोदयविलयादिकृतः सूक्ष्मतरः क्रमः। यथा—

"सदाशिवः स्वकालपरिक्षये बिन्द्वर्धचन्द्र निरोधिका आक्रम्य नादे लीयते, नादः शक्ति-तत्त्वे। तद् व्यापिन्याम्, सा चानाश्रिते। शक्तिकालेन परार्द्धकोटिगुणितेन अनाश्रितदिनम्। अनाश्रितः सामनसे पदे। यत्तत् सामनस्यं साम्यं तद् ब्रह्म। अस्मात् सामनस्यादकल्यात् कालान्निमेषोन्मेषमात्रतया प्रोक्ताशेषकालप्रसरप्रविलयचक्रभ्रमोदयः।"

(तं०सा० पृ० 56)

परमश्चायं क्रमो भावनाभ्यासाङ्गभूतत्वेनैव कलितः सिद्धैर्न दर्शनसिद्धान्तदृष्ट्येति न विस्मर्त्तव्यम्।

~शैवागमेषु——पारमेश्वरः क्रियास्पन्दः। यथा—

(क) "कलयति जन्म स्थित्यादि-विकारषट्केन परिच्छिनत्ति जगद्यः पारमेशक्रियाशक्ति स्पन्दात्मा काल" ·····।

(स्व०तं०उ०प० 9, पृ० 168)

(ख) "कालो वै कलयत्येनं तुट्यादि-प्रलयावधिः।"

(स्व०तं० 11/99)

(ग) "कालः सृजति भूतानि कालः संहरते प्रजाः।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः॥

(उद्ध०म०न०प्र०वि० पृ० 6)

"भैरवरूपी कालः सृजति जगत्कारणादि कीटान्तम्।
इच्छावशेन यस्याः··············॥
इत्युक्तेः, कालो भैरवः।"

(उद्ध म०प्र०वि० पृ० 6-7)

(घ) "कालः परिच्छेदकरो ·····················।"

(अ०प्र०पं० 25)

~ संहारक्रमे——कालाध्वधारणास्वधराधरतत्त्वानामुत्तरोत्तरेषु तत्त्वेषु संहारस्य कापि सुविचित्रा भावनाऽभ्यस्यते। तदनुसारं शक्तितत्त्वान्तं सूक्ष्मसूक्ष्मतरः कालक्रमावभासः। परं नैव तत् कालतत्त्वम्, न वाऽसौ मायीयः क्रमात्मकः कालः। यथा—

"ततः कालाग्निरुद्रश्च कालतत्त्वे लयं व्रजेत्।
अप्तत्त्वातु समारभ्य यावन्मायान्तगोचरम्॥
तत्सर्वं संहरेत्कालः स्वयमेव चराचरम्।"

(स्व०तं० 11, 280-81)

"काल इति अशेषविश्वकलनः परमेश्वर एव"

(स्व०तं०उ० 11, पृ० 147)

कालकर्षिणी——(1) अनुत्तरसंविदात्मिका माहेश्वरी पराशक्तिः। यथा—

"एषा वस्तुत एकैव परा कालस्य कर्षिणी।"

(तं०आ० 3, 238)

"एषा इत्यनुत्तरा संवित् कलयति शिवादिक्षित्यन्तं जगत् सृजतीति कालो भैरवः। तस्य कर्षिणी स्वात्मायत्ततयावभासयन्तीत्यर्थः।"

(तं०आ०वि० खं० 2, पृ० 223)

द्र० (पू०प्र० 1/384-85) इति।

(2) कलनसामर्थ्यरूपाऽसौ काल्येव कालकर्षिणी। कालीति पराशक्तिरेवोच्यते। यथा—

"इति पञ्चविधामेनां कलनां कुर्वती परा।
देवी काली तथा कालकर्षिणी चेति कथ्यते॥"

(तं०आ० 4-176)

(3) भूत वर्तमानभविष्यदात्मकस्य कालाभासस्य स्रोतोभूतासौ पारमेश्वरी पराशक्तिः याकालिकं व्यवहारमाभासयति। यथा—

"त्रिवहं त्रिपथं त्रिस्थं कालं सा कर्षति स्वतः।
बहिस्ततश्चात्मनीति श्रीपरा कालकर्षिणी॥"

(प०पं० 42)

~डामरयागे——इच्छाज्ञानक्रियाणां पारस्परिक भेदकलनायाः प्रसिष्णुतया तासां याऽभेदरूपा स्थितिरसौ भेदकलनाया प्रसनादेव कालकर्षिणीति कथ्यते। यथा—

"अन्योन्यात्मकभेदावच्छेदनकलनसंप्रसिष्णुतया।
स्वातन्त्र्यमात्रसारा संवित्सा कालकर्षिणी कथिता ॥"

(तं०आ० 15, 346)

पदव्युत्पत्तिविचारत इयं व्याख्या।

~तद्विद्या——कालकर्षिणी-मन्त्रः एव।

~तन्मन्त्रः——फ्रें इति फें इति वा द्विप्रकारः। पञ्चपिण्डनाथ एवाद्यवर्णेनाद्यन्त्याभ्यां वा वर्णाभ्यां शून्यः। यथा—

"आद्येति खकारेण (शून्यः) तेन फ्रें इति। अन्त्येनापि न केवलमाद्येन खकारेण यावदन्त्येन रेफेणापीत्यर्थः, तेन फें इति।"

(तं०आ०वि० खं० 12, पृ० 201-2)

"आद्योज्झितो वाप्यन्त्येन वर्जितो वाथ संमतः ॥"

(तं०आ० 30-46)

द्र० पञ्चपिण्डनाथः' इत्यपि।

~मूलतः——आभासात्मक-प्रमातृ-प्रमाणादिरूपानारुषिता शुद्धा पारमेश्वरी शक्तिः परासंवित् भाविकालकलनाप्रसिष्णुतया भाव्यमाना सती तथोच्यते। अन्यथा परावस्थायां कलनाया नैवाभासः कोऽपि। यथा—

"प्रमात्रादिनियतरूपानारुषितेयं "श्रीकालसंकर्षिणी" शब्दव्यपदेश्या परा संविद्देवी कालकलनाकलङ्कग्रसिष्णुतया द्योतमाना।"

(तं०आ०वि० खं० 3, पृ० 157)

द्र० कालसंकर्षिणी इति।

~यामलोपास्तौ——शिवशक्तिसंघट्टरूपा आनन्दशक्तिः। मातृकाक्रमे "आ" इत्यनेन वर्णेन व्यंग्या। यथा—

"तयोर्यद्यामलं रूपं स संघट्ट इति स्मृतः।
आनन्दशक्तिः सैवोक्ता यतो विश्वं विसृज्यते ॥
………………… ………………
………… ……… ……………
……………………………………
देवी-यामलशास्त्रे सा कथिता कालकर्षिणी।"

(तं०आ० 3, 68 तः 70)

"तयोरकुलकौलिकीशब्दव्यपदेश्ययोः शिवशक्त्योः।"

(तं०आ०वि० खं० 2, पृ० 81)

~स्वरूपतः——परमेश्वरो यया स्वशक्त्याऽभेदेन, भेदाभेदाभ्यां, भेदेन चेति त्रिविधतया शिवादि-धरण्यन्त-तत्त्व-व्रात-धारणं क्रोडीकारेण स्वात्मन्येव ग्रसते, स्वात्मसात्करोति सैवास्य शक्तिः कालकर्षिणीति कथ्यते। सा च वस्तुतः पराशक्तिरेवानया दृष्ट्या भावनादावुपयुक्ततया परिभाष्यते—इति कल्पित एवानयोर्भेदः उपासनाप्रयोजनेनेति वेदितव्यम्। यथा—

"एतत् त्रिविधं यया धारणमात्मन्येव क्रोडीकारेणानुसन्धानात्मना ग्रसते, सा अस्य भगवती श्रीपरैव श्रीमन्मातृसद्भाव-कालकर्षिण्यादि-शब्दानन्तर-निरुक्ता।"

(तं०सा० पृ० 28)

कालक्रमः——आसीद्, अस्ति, भविष्यतीत्यादिरूपः वस्तूनां सत्तायाः पौर्वापर्यात्मकः क्रमः।

~प्रमातरि——घटादिविषयजाते इव मायाप्रमातर्यपि क्रमोऽयमाभासते। यथा—

"शून्यप्राणबुद्धिदेहादेः ……………………………

इत्याभाससद्भावासद्भावकृतः कालक्रमोऽस्ति, अतीतोऽहं बालदेहाभासरूपो, भवामि युवदेहाभासरूप इति।"

(ई०प्र०वि० खं० 2, पृ० 18-19)

~प्रमेयेषु——मायाप्रमाता भावानपि पौर्वापर्यक्रमरूपतयैव यतो विमृशति ततस्तस्य दृष्टौ भावेष्व प्यस्त्ययं क्रमः। यथा—

"स च यतः प्रमाताऽहम्भावसमावेशनाद् अपरिपूर्णाद् अत एवोद्रिक्तकालक्रमत्वाद् भावेष्वपि कालक्रममाभासयति, 'योऽहं-बालोऽभवं तत्सहभावी घटाभासोऽप्यभ' वेदिति।"

(ई०प्र०वि० खं० 2, पृ० 19-20)

कालगणना——क्षणघटीप्रहरादिगणना दिनमासवर्षयुगकल्पादिगणना चातिभूयसी गणितशास्त्राङ्गभूता।

~सूक्ष्मतरा——सा च सदाशिवादुपरि। तथा हि—कालाध्वभावनाभ्यासे सदाशिवस्याप्यायुषः क्षयेऽसौ बिन्द्वर्धचन्द्रादिक्रमेणैव परे तत्त्वे विलयं यातीति भाव्यते। ततोऽस्ति तत्रापि सूक्ष्मसूक्ष्मतरो यः क्रमः स एव सूक्ष्मसूक्ष्मतरः कालः। परमेषा भावना विषयतायामेवाभासते। न चायं मायीयः कालः।

द्र० 'कालः~अकल्यः' इति।

~तद्रहस्यम्——द्र० 'क्षणः' इति।

कालज्ञानम्——स्वात्मस्वभावप्रत्यभिज्ञायाः आगमिकीयं परिभाषा रहस्यात्मकताध्वननप्रयोजना।

तच्चक्रपीडनाद्रात्रौ ज्योतिर्भात्यर्कसोमगम्।
तां दृष्ट्वा परमां ज्योत्स्नां कालज्ञानं प्रवर्तते ॥

(तं आ० 4, 132)

"सृष्टयाद्यात्मनो विश्वस्य कलनात् कालः परप्रमात्रेकरूपः पूर्णः प्रकाशः, तस्य ज्ञानं प्रवर्तते।"

(तं०आ०वि० खं-3, पृ० 142-43)

कालतत्त्वम्——(1) कञ्चुकतत्त्वेषु परिगणितं प्रमातुः प्रमेयस्य च स्वरूपस्य सङ्कोचकेषु तत्त्वेष्वेकतमं तत्त्वम्। अपरिमितः एकः क्रमरहितश्च प्रमाता यस्य तत्त्वस्य प्रभावेण स्वात्मानं स्वं च प्रमेयजातं क्रमिकतया कलयति आसम्, अस्मि, भविष्या-

मीति, आसीद्, अस्ति, भविष्यतीति च, तत् क्रियावैचित्र्याश्रितस्य क्रमिकत्वस्याश्रयभूतं सङ्कोचकं तत्त्वं कालतत्त्वम्।

द्र० 'कालः~कञ्चुकविशेषः' इति।

(2) तुट्यादिभिरणोः कलनकारि तत्त्वम्। तद्वशादेव भूत-भविष्य दाद्यवभासाः कर्तृत्वस्य प्रमेयादीनां च। यथा—

"कालस्तुट्यादिभिश्चैतत् कर्तृत्वं कलयत्यतः॥"

(तं० आ० 9-201)

~क्लृप्तिरूपम्——नित्यत्वानित्यत्वादि-परिच्छेद-क्लृप्तिः, तथा भूतवर्तमानभविष्यदाद्याभासक्लृप्तिः कालः। यथा—

"सा नित्यतास्य शक्तिर्निकृष्य निधनोदयप्रदानेन।
नियतपरिच्छेदकरी क्लृप्ता स्यात्कालतत्त्वरूपेण॥"

(ष०त्रि०तं० सं०, 11)

~मूलतः——पारमेश्वरी क्रियाशक्तिरेव संकोचमयतामुपयाता सती पशुप्रमातृषु क्रियांशवैचित्र्याश्रितक्रमावभासनकारिणी सती कालतत्त्वरूपतयावभाति। यथा—

"एतदीश्वररूपत्वं परमात्मनि यत्किल॥
तत् प्रमातरि मायीये कालतत्त्वं निगद्यते।"

(तं० आ० 6-40; 49)

~व्याख्यानतः——"अकालकलितस्य चिदात्मनो नित्यत्वाख्या शक्तिः न्यग्भावमाश्रित्य कार्यारूषितकर्तृत्वकलनया अणुं तुट्यादिक्रमाभासनात्मना कालेन संयोज्य कालतत्त्वव्यपदेश्या कल्प्यते, येन अयमणुः भूतादिक्रियाक्रमकलितः कालवशतामापद्यते।" (ष०त्रि०त०सं०वि० पृ० 8)

काल त्यागः~त्रिक योगे——तत्त्वक्रमेणारोहणे यो भावनाभ्यासस्तत्रोत्तरोत्तरं तस्य तस्य कालमानस्य परित्यागे विश्वोत्तीर्णत्वेन कालस्पर्शरहिते परे तत्त्वे स्वात्मनः स्थितेरभ्यासः। यथा—

"……………………कालत्यागं निबोध मे।
तुटिषोडशसंयुक्तः प्राणस्तु समुदाहृतः॥
तुटिद्वयं समाश्रित्य एकैको भैरवः स्थितः।
अहोरात्रविभागेन कुर्वन्त्युदयमेव ते॥
नवमस्तु परो देवः तेजसस्तूदयन्ति ते।
सर्वं कालं त्यजेत्प्राणे यथावत्कथयामि ते।
तुटयः षोडशैवोक्ताः कालस्य करणं तु ताः।
तदादिः संस्थितः कालः सर्वं चरति वाङ्मयम्॥
तुटिर्लवो निमेषश्च काष्ठा चैव कला तथा।
मुहूर्तश्चाप्यहोरात्रः पक्षो मास ऋतुस्तथा॥
अयनं वत्सरश्चैव युगं मन्वन्तरं तथा।
कल्पश्चैव महाकल्पः शक्त्यन्ते तं परित्यजेत्॥
व्यापिन्यन्ते परः कालः स तदङ्गी त्यजेत्तु तम्।
स च सप्तदशो ज्ञेयः परार्धपरतः स्थितः॥
सोऽपि चाष्टादशो देवि समनान्ते तु तं त्यजेत्।
सर्वकालं तु कालस्य व्यापकः परमोऽव्ययः॥
उन्मन्यन्ते परे योज्यो न कालस्तत्र विद्यते।
नित्यो नित्योदितो व्यापी आदिरूपं न संत्यजेत्॥
तं च नित्योदितं प्राप्य तन्मयो जायते सदा।
कालत्यागो भवेदेवं……………………॥"

(स्व० तं 4, 279-88)

कालपरा——कापि तन्त्रसंहिता। यथा—

"श्रीकालपरायाम्—
शब्दो नादात्मकस्तस्मात् प्रत्ययेनोपबृंहितः।
मन्त्रबोधस्वरूपस्थमभिन्नो बोधयत्यपि॥ इति।"

(स्पं०प्र० पृ० 33)

"उक्तं च कालपरायाम्—
पराक्षरतरोर्धातुर्नानाशक्तेर्विवर्तगाः।
शक्तयो वर्णदेहेषु वक्त्राद् वर्णत्वमागताः॥"

(तदेव पृ० 34)

कालप्रपञ्चः——तुटिलवक्षणादिभ्य आरभ्य महासृष्ट्याद्यायुःपर्यन्ता विविध-परिमाण-भेद-सम्भिन्नाः अनन्ताः कालव्यवहाराः।

द्र० 'कालत्यागः' इति।

~तदुपयोगः——शिवयोगी भावनाभ्यासबलेनैकैकस्मिन् प्राणचारेऽसंख्यान् सृष्टिप्रलयान् साक्षात्कुर्वन्नभ्यासपरिपक्वतायां सकलसृष्टिसंहारादि-काल-व्यापिन्यां संविदि सुप्रतिष्ठितो भवतीति कालप्रपञ्चस्योपयोगः। यथा—

"एवं विसृष्टिप्रलयाः प्राण एकत्र निष्ठिताः।
सोऽपि संविदि संविच्च चिन्मात्रे ज्ञेयवर्जिते॥"

(तं०आ० 6, 179-180)

अनेनाभ्यासेन कालकृतात् सङ्कोचान्मुक्तो भवन्नात्मानमकालकलितं विमृशन् परिपूर्णकृतकृत्यतां प्रत्यग्रेसरो भवति।

कालपादा——कालोत्तराख्य आगम-ग्रन्थः। कालपादा संहितेति, टाबन्तनिर्देशात्। यथा—

"उक्तं वा कालपादादावागोपालाङ्गनादिना॥
तदैक्यं……………………………।"

(शि०दृ०वृ० 3, 63)

एतदेव हि वाक्यं शिववृष्टिवृत्तौ कालोत्तरवाक्यत्वेन निर्दिष्टम्। यथा—

"श्रीकालोत्तरादौ दृष्टमेतत्—
'आगोपालाङ्गनाबाला नित्यमेव ब्रुवन्ति यम्'। इति"

(शि०दृ०वृ० पृ० 122)

"तदुक्तं श्रीकालपादायाम्—

यावत्येव हि संवित्तिरुदिता सुस्फुटा भवेत् ।
तावान् क्षणो वर्तमानः कल्पो वान्यद्वयावधिः ॥”

(ई०प्र०वि०वि० खं० 3, पृ० 288)

अस्पष्टोऽत्र तुरीयपादः ।

“साम्यं वैषम्यजनकं विषुवत् सन्ततं स्मृतम् । इति तु श्रीकालपादायाम्” ।

(तदेव पृ० 343)

कालभावना~प्राणादौ——दिनराव्यादिपरिमाणादारभ्य महासृष्टिप्रलयपरिमाणं यावद्यः कालीयो व्यवहारस्तस्य स्थापना भावनयैकैकस्मिन् प्राणेऽपानेचाभ्यस्यते शिवयोगिभिः कालाध्वधारणासु । यथा—

“यावान् समस्त एवायमध्वा प्राणे प्रतिष्ठितः ।”

(तं०आ० 6, 21)

कालरात्रिमन्त्रः——“स्क्रृक्' इति मन्त्रः । यथोक्तः—

(क) “सुधाच्छेदकषण्ठाद्यैर्बीजं छेदकमस्वरम् ॥”

(तं०आ० 30-55)

सुधेति सकारः, छेदकं ककारः, षण्ठाद्यम्=ऋकारः, छेदकम्=क् अस्वरं=स्वररहितमिति ।

(ख) “इत्येषा कथिता कालरात्रिर्मर्मनिकृन्तनी ।”

(उद्ध तं०आ०वि० खं० 12, पृ० 203)

~तन्नियमः——दीर्घजीवित्वाकांक्षी नैतामुच्चारयेदित्यस्ति नियमः । ततः सद्यो मुमुक्षवे एव हितैषा मन्त्रविद्या । यथा—

“नैनां समुच्चरेद् देवि य इच्छेद् दीर्घजीवितम् ।”

(तं०आ० 30-57)

कालरात्रिविद्या——कालरात्रिमन्त्र एव ।

कालरुद्रः~बीजम्——'ऊ' इति वर्णः । यथा—

“कालरुद्रः—ऊ ।”

(तं०आ०वि० खं० 30, पृ० 197)

कालवञ्चनम्——शरीरान्तसमयं सम्यग् विज्ञाय स्वायुषः शेषस्यकालस्याकिञ्चित्करत्वेन यापनम् । तच्च योगाभ्यासपरत्वेन वा, आयतन-सेवनेन वाऽन्येन वा केनाप्युपायेन कर्तुं शक्यते साधकेन । यथा—

“उक्तं श्रीरत्नमालायां ज्ञात्वा कालमुपस्थितम् ॥
मोक्षार्थी न भयं गच्छेत् त्यजद्देहमशङ्कितः ।
तीर्थायतनपुण्येषु कालं वा वञ्चयेत् प्रिये ॥
अयोगिनामयं पन्था योगी योगेन वञ्चयेत् ।
वञ्चने त्वसमर्थः सन् क्षेत्रमायतनं व्रजेत् ॥
तीर्थे समाश्रयात्तस्य वञ्चनं तु विजायते ।”

(तं०आ० 28, 256 तः 259)

“येनास्य पुनर्जन्ममरणायोगात् कालवञ्चनं सिद्धयेत् ।”

(तं०आ०वि० खं० 11, पृ० 101)

कालवैचित्र्यम्——अस्ति खलु कालगणनाविधेः सुविचित्रता तत्र तत्र भुवनेषु तत्त्वेषु च । यथा मानुषं वर्षं देवानामहोरात्रम् । कल्पमितं ब्रह्मदेवस्य दिनं, तावती तस्य रात्रिः, इत्यादि ।

तच्च काल-वैचित्र्यं भावनाभ्यासविषयतां नीयते कालाध्वयोगे । येनैकस्मिन् प्राणचारे वर्ष-युग-कल्पादिभावना क्रियते । यथा—

~अधोऽपाने——

द्र० 'अधोऽपाने~काल वैचित्र्यम्' इति ।

~अवस्थाभेदे——(1) जाग्रदादौ ज्ञानक्रियाशक्त्योर्वेगस्य वैविध्येन कालमानस्य वैविध्यं प्रमात्रा स्वयं कल्प्यते । ततः कल्पनामूलैव कालकलनेति ज्ञेयं सुधीभिः । यथा—

“किञ्च जाग्रति कस्मिँश्चिद् घटिकाभिमतापि या ॥
तस्यामेव प्रमातारः स्वप्नगाश्चित्रताजुषः ।
दिनप्रहरवर्षादि वैचित्र्यमपि चिन्वते ॥”

(प०त्री०वि० पृ० 246)

(2) यतश्चिन्मात्रस्यैव स्पन्दः कालोदयः । यतश्चासौ स्पन्दः जाग्रत्स्वप्नसुषुप्तितुर्येषु विचित्र-विचित्रवेगवांस्तत एव कालव्यवहारवैचित्र्यमपि तत्र तत्र विविधमेव । यथा—

“चिन्मात्रस्यैवायं स्पन्दो यदयं कालोदयो नाम । तत एव स्वप्नसंकल्पादौ वैचित्र्यमस्य न विरोधावहम् ।”

(तं०सा० पृ० 57)

प्राणस्पन्दतः एव कालगणनेति प्राणोदयपदमत्र । यथा—

“स्वप्नस्वप्ने तथा स्वप्ने सुप्ते संकल्पगोचरे ॥
समाधौ विश्वसंहारसृष्टिक्रमविवेचने ।
मितोऽपि किल कालांशो विततत्वेन भासते ॥”

(तं०आ० 6, 183-184)

~उदाने——

द्र० उदाने~कालभावना । इति ।

~प्राणे——

द्र० प्राणे~कालभावना । इति ।

~व्याने——

द्र० व्याने~काल. वैचित्र्यम् । इति ।

~समाने——

द्र० समाने~काल वैचित्र्यम् । इति ।

कालशक्तिः——भगवतः परमेश्वरस्य क्रमावभासनप्रवणा शक्तिः ।

“भगवत एव शक्तिः क्रममवभासयन्ती कालशक्तिः ।”

(ई०प्र०वि०वि० खं० 3, पृ० 4)

सा च मूलतस्तस्य क्रियाशक्तिरेव तथाविधकार्यानुसारं कालशक्तिरित्यभिधीयते। तदुत्तीर्णः शिवः।

द्र० क्रमावभासः~तत्कारणम् इति।

~आधारतः——पारमेश्वरी या क्रमोद्भासिनी कालशक्तिस्तस्या आधारः पारमेश्वरी क्रियाशक्तिः। यथा—

"परमेश्वरस्य तु कालशक्तिः क्रियाशक्तिप्राणितरूपा।"

(ई०प्र०वि०वि० खं० 3, पृ० 290)

~प्रभावतः——आभासानां परस्परं विच्छेदनमवभासयन्ती तेन च तेषां क्रमिकत्वं प्रकटयन्ती पारमेश्वरी शक्तिः। सैव तस्य बहिर्विकासोन्मुखी क्रियाशक्तिरिति ख्याता। तथा क्रमावभासः, क्रमोपरि च कालिकी कल्पना विततादिरूपक्रमाश्रयाऽत एव च बहुविधवैचित्र्या।

"लौकिक्याः क्रियायाः सक्रमत्वं कालशक्तेः आभासविच्छेदनप्रदर्शनसामर्थ्यरूपात् पारमेश्वरात् शक्तिविशेषाद् घटते।"

(ई०प्र०वि० खं० 2, पृ० 6-7)

~संक्षेपतः——क्रमिकक्रियादिवैचित्र्यावभासिनी भगवतः शक्तिः। यथा—

"वैचित्र्यभासनां कुर्वन् कालं भासयति प्रभुः।
वैचित्र्यभासनैवेयं कालशक्तिरुदाहृता॥"

(मा०वि०वा० 1, 99-100)

~स्वरूपतः——अक्रमेऽपि निजे चित्प्रकाशे सर्वथाऽप्यभिन्ने क्रमात्मकस्य भेदस्य यदवभासनं तद्विषये प्रभोरौन्मुख्यं तस्य कालशक्तिः स्वातन्त्र्यशक्तेरेव विशेषरूपता फलविशेषतः कल्पिता। यथा—

"(ख) यः कालक्रमो व्यवहारसिद्धः—इदं भातं, न भाति, भात्येकरसं, भासिष्यते इत्यादिर्भूतादिरूपतो भावानामन्योन्यासहभावेनोपलभ्यमानत्वं, तत्त्वस्य यदवभासनम्, यत् संविद इत्थं विमर्शनमप्रतिहतं यदहममुनापि रूपेणेत्थं प्रकाशेयेत्येवंरूपश्च व्यापारः कर्तव्यं यस्याः परमेश्वरस्वातन्त्र्यशक्तेः सा कालोत्थापकत्वाद् भगवतः कालशक्तिरुच्यते —

'अव्याहृतकलां यस्य कालशक्तिमुपाश्रितः" इत्यादौ।

(ई०प्र०वि०वि० खं० 2, पृ० 8)

कालसंकर्षिणी——कालस्य स्वस्माद् बहिष्करणात् परमेश्वरस्य पराशक्तिः कालसङ्कर्षिणीति कथ्यते। यथा—

"सैव च भूयः स्वस्मात् संकर्षति कालमिह बहिष्कुरुते।
सङ्कर्षिणीति कथिता ………………… …….॥"

(तं०आ० 15, 347)

द्र० 'कालकर्षिणी~मूलतः' इति।

~चिद्गगनचन्द्रिकायाम्——

"त्वष्टुरम्ब शिवबोधभास्वतः सृष्टितः प्रभृति या मरीचयः।
द्वादशक्रमपदत्रयोर्ध्वगास्तासु सञ्चरसि वा त्रयोदशी॥"

(चि०ग० चं० 249)

~तद्धाम——सावस्था यस्यां सर्वसंहारकारकस्य कालस्यापि संहारो भवति। तच्चौन्मनसं धाम। यथा—

"सर्वसंहारसंहारसंहारमपि संहरेत्।
सा शक्तिर्देवदेवस्याभिन्नरूपा शिवात्मिका॥

(उद्धरणम्)

इत्याद्युक्तस्वरूपे श्रीकालसङ्कर्षिणीधाम्नि लीयते।"

(तं०आ०वि० खं० 3, पृ० 221)

कालहंसः——विश्वात्मककालकलनकारी सन्नपि सदा शुद्ध एव तिष्ठन् परमेश्वरः। यथा—

"‥ यः परनिष्कलभट्टारकात्मा हंसः, स एव निर्णीतहानसमादानधर्मतया विश्वं कलयन् कालहंस इति……।"

(स्व०तं०उ०, प० 7, पृ० 291-2)

कालाग्निरुद्रः——पार्थिवाण्डसंहारको रुद्रः। श्रीकण्ठनाथ एव पार्थिवाण्डसंहारं कर्तुं कालाग्निरुद्ररूपतया तिष्ठति। तदसौ श्रीकण्ठावतारः। यथा—

'श्रीकण्ठ एव परया मूर्त्या कालाग्निरुच्यते।"

(उद्ध तं०आ०वि० खं० 4/1, पृ० 146)

~कालीनये——कालो व्यवच्छेदः। तद्युक्तोऽग्निः=भोक्ता, कल्पनाऽकल्पनाभ्यां संसारस्य रोधनं द्रावणं च कुर्वन् मायीयः प्रमाता कालाग्निरुद्रः। यथा—

"कर्ता च द्विविधः प्रोक्तः कल्पिताकल्पितात्मकः।
कल्पितो देहबुद्ध्यादिव्यवच्छेदेन चर्चितः॥
कालाग्निरुद्रसंज्ञास्य शास्त्रेषु परिभाषिता।
कालो व्यवच्छित् तद्युक्तो वह्निर्भोक्ता यतः स्मृतः॥"

(तं०आ० 4, 165-166)

कालाग्निरुद्रकाली-10 मी——(1) स्वात्मानं मायीयप्रमातृरूपतया कलयन्ती परैव संवित्। यथा—

"ततः कल्पितं मायीयं प्रमातृरूपमपि कलयति।"

(तं०सा० पृ० 30)

(2) ग्रन्थेष्वनेकधा व्याख्यातमप्यस्याः ध्येयं रूपं रहस्यात्मकमेव। न तात्पर्यतः स्फुटतामापद्यते। कालीनयाख्यशाक्तोपायाभ्यासैकविषयत्वात्तत्स्फुटीभावस्य।

(3) इयन्मात्रमत्र विषये कथयितुं शक्यते यत्कालीनयोपासकः साधकः साधनाक्रमस्य दशमे सोपाने मायीयस्य प्रमातृतत्त्वस्य कलनां कुर्वतीं कालीं स्वात्मतया पश्यंस्तदभ्यासेन शाक्तं समावेशं लभते। तदभ्याससाफल्यार्थं च देव्या ध्यानविशेषस्योपयोगिता कापि। तद् ध्यानमेव स्तुतिकृद्भिः प्रतिपादितमिति। उक्तं हि तत्र—

"कालक्रमाक्रान्तदिनेशचक्र-
क्रोडीकृतान्ताग्निकलाप उग्रः।

कालाग्निरुद्रो लयमेति यस्यां
तां नौमि कालानलरुद्रकालीम् ॥"

(उद्ध० तं०आ०वि० खं० 3, पृ० 183)

"या सा जगद् ध्वंसयते समग्रं
मृत्योर्वपुर्ग्रासयतीति विष्वक् ।
धामाग्निरूपीयसहस्रदीप्तां
तां नौमि कालानलरुद्रकालीम् ॥"

(क्र०स्तो० उद्ध० खं० 3, पृ० 202)

"प्रमाणे संलीने शिवपदलसद्वैभववशा-
च्छरीरं प्राणादिर्मितकृतकमातृस्थितिमयः ।
यदाकालोपाधिः प्रलयपदमासादयति ते
तदा देवी यासौ लसति मम सा स्ताच्छिवमयी ॥"

(क्र०स्तो० अभि० 25)

(4) कल्पितस्य कालाग्निरुद्रसंज्ञस्य मायाप्रमातुरपि विश्वाभेदमयेनाकल्पितेन प्रमातृतत्त्वेनैकीकारकलनामयी संविच्छक्तिः । यथा—

(क) "सोऽपि कल्पितवृत्तित्वाद्विश्वाभेदैकशालिनि ।
विकासिनि महाकाले लीयतेऽहमिदम्मये ॥"

(तं०आ० 4, 168)

"परस्मिन्नकल्पिते पूर्णाहंविमर्शमये प्रमातरि विश्रान्तो भवेत् ।"

(तं०आ०वि० खं० 3, पृ० 182)

(5) कालाग्निरुद्रग्रसनोद्यतापि कलना यस्यां संविच्छक्तौ लीयतेऽसौ कालाग्निरुद्रकाली । यथा–

"वरदा विश्वरूपा च गुणातीता परा कला ।
अघोषा सास्वरारावा कालाग्निग्रसनोद्यता ॥
निरामया निराकारा यस्यां सा शाम्यति स्फुटम् ।
कालाग्निरुद्रकालीति सा ज्ञेयाऽमरवन्दित ॥"

(पञ्चशतिकातः उद्धृ तं०आ०वि० खं० 3, पृ० 183)

उन्मिषन्निमिषदर्कबिम्बया—
नन्तयाम्ब परमार्थमध्यतः ।
अग्निमूर्त्तिरिह सृज्यते त्वया
मध्यतेऽपि च सकृत् प्रमा तया ॥60॥
भर्गनाम्न इह भास्वेः शिखा
शक्तिरम्ब विषयेन्धनोन्मुखी ।
शान्तिधामजुषि याति निर्वृत्ति
त्वय्यसौ खलु शिवैकपावके ॥61॥

(चि०गं०चं० 4, 60-61)

न सम्यक् स्पष्टतां यात्येतत् ।

कालातीतः——कालिकात् क्रमादुत्तीर्णः । यस्य स्वात्मनि न कश्चिदपि नित्यानित्यत्वादिकृतो भूतभविष्यदादिकृतो वा सङ्कुचितोऽभिमानोऽसौ प्रमाता ।

~**योगी**——कालिकेऽत्र जगति तिष्ठन्नपि परो योगी वस्तुतोऽन्तः कालास्पृष्ट एव । यथा—

"योगिनोऽपि सर्वदा परित्यक्तमायाप्रमातृपदस्य को नामातीतादिभेदः ।" (ई०प्र०वि०वि० खं० 3, पृ० 19)

~**शिवः**——परमेश्वरे न कालव्यवहारः । कालव्यवहारस्य क्रमरूपताश्रितत्वात्, परमेश्वरस्य चाक्रमत्वात् । केवलं तस्य क्रमावभासनसामर्थ्यं तदवभासनप्रवणत्वं च यत् तदेव तस्य परमेश्वरत्वम् । असौ तस्य कालशक्तिः । यथा—

"भगवति तु न कालव्यवहारः कश्चित् ।"

(ई०प्र०वि०वि० खं० 3, पृ० 6)

द्र० 'कालशक्तिः' इति ।

कालादिसत्ता——तत्तदवभासन-शक्तिरूपेण कालादीनि मायीयतत्त्वानि शिवे तच्छक्तिरूपतया सदा विद्यन्त एव । यथा—

"न चासौ तत्र नास्त्येव तत्र यन्नास्ति तत् कुतः ॥
अन्यत्र तन्यतां नाम तत् प्रकाशवशं हि तत् ।"

(मा०वि० वा०, 1, 101-102)

कालाध्वा——(1) स्थानकल्पनाख्ये योगे पदार्थद्वयमालम्बनत्वेन गृह्यते । तच्च कालो देशश्चेति । तत्र कालालम्बनोऽसौ योगः कालाध्वेति कथ्यते, यो वर्णमन्त्रपदालम्बनः । नामरूपात्मकं हि जगत् । तत्र नामांश एव वर्णमन्त्रपदरूपतयाऽऽलम्बनीक्रियते स्थानकल्पनाख्ययोगे । स एषोऽध्वा प्रमात्रंशधारणाविषयः । यथा—

"अधुना मातृभागस्थं रूपं त्रेधा निरूप्यते ।"

(तं० आ० 11, 43)

"त्रिधेति पदमन्त्रवर्णगतत्वे स्थूलसूक्ष्मपरत्वेनेत्यर्थः ।"

(तं०आ०वि० खं० 7/2, पृ० 36)

(2) प्राणनक्रिया हि क्रियाशक्तेरेव बहिर्मुखो विकासः । तस्याश्च प्राच्यभागे कालशक्तेः स्थितिः । ततः कालकलनामालम्बनीकृत्य विधीयमाना स्वात्मनः परिपूर्णतायाः या भावना, तन्मयोऽभ्यासमार्गः कालाध्वा । यथा—

"क्रियाशक्तिप्रधाना प्राणनारूपा जीवनस्वभावा पञ्चभी रूपैर्देहं यतः पूरयति, ततोऽसौ चेतन इव भाति । तत्र क्रियाशक्तौ कालाध्वा प्राच्यभागे ।"

(तं०सा० पृ० 46-47)

~**त्रिप्रकारः**——(1) कालस्य सूक्ष्मातिसूक्ष्मतरो भागः क्षणः । क्षणश्च ज्ञानस्थित्यैव मेयो भवति । असावेव कालांशः क्षणो भवति, यावत् कालमेकं ज्ञानं तिष्ठति । विमर्शरूपतैव हि ज्ञानानां जीवनम् । न च विमर्शात्मकं ज्ञानं शब्दानुवेधरहितं भवति । ततः शाब्दो विमर्शस्तत्रावश्यम्भावी । तत्र निर्विकल्पानि ज्ञानानि वर्णैर्बीजमन्त्रैश्च विमृश्यन्ते, सविकल्पानि पुनः पदैः । ततः कालोऽपि क्रमेण वर्णैर्मन्त्रैः पदैश्च मीयते । ततः कालाध्वा

त्रिविधः वर्णात्मा परो, मन्त्रात्मा सूक्ष्मः पदात्मा च स्थूलः। यथा—

"तत्र वर्णमन्त्रपदाध्वनः कालाध्वनि स्थितिः परसूक्ष्मस्थूलरूपत्वात्।"
(तं०सा० पृ० 47)

"वर्णमन्त्रपदाभिख्यमत्रास्तेऽध्वत्रयं स्फुटम्।"
(तं० आ० 6-34)

(2) तत्रापि वर्णविमर्शः पूर्णप्रमातृमयः, मन्त्रविमर्शोऽक्षुब्धप्रमाणमयः, पदविमर्शश्च प्रक्षुब्धप्रमाणरूपः इति कालाध्वनो रहस्यान्तरम् सुप्रबुद्धयोगिभिर्गम्यम्। यथा—

"मातृविश्रान्त्या तथैव त्रिविधः, तत्र प्रमाणतायां पदाध्वा। प्रमाणस्यैव क्षोभतरङ्गशाम्यत्तायां मन्त्राध्वा। तत् प्रशमे पूर्णमातृतायां वर्णाध्वा।"
(तं०सा० पृ० 111-12)

~दार्शनिकदृष्ट्या—क्रियावैचित्र्यावभासप्रसरमार्गः शिवस्य। यथा—

"तत्र क्रियाभासनं यत्सोऽध्वा कालाध्व उच्यते।"
(तं० आ० 6, 34)

क्रियाशक्तेर्बहिरुल्लासस्यैव हि कालरूपत्वेनाभासः।

~परः——प्राणचारे यो वर्णोदयोऽसौ भावनाभ्यासालम्बनीकृतः सन् परः कालाध्वा। यथा—

"वर्णमन्त्रपदाध्वनः कालाध्वनि स्थितिः पर-सूक्ष्म-स्थूल-रूपत्वात्।"
(तं०सा० पृ० 47)

"त्रिकद्वयेऽत्र प्रत्येकं स्थूलं सूक्ष्मं परं वपुः।
यतोऽस्ति तेन सर्वोऽयमध्वा षड्विध उच्यते॥"
(तं० आ० 6, 36)

पदानि मन्त्रारब्धानि मन्त्रा वर्णैकविग्रहाः।
वर्णाः स्वनिष्ठा इत्येषां स्थूल-सूक्ष्म-परात्मता॥
उद्ध० (तं०आ०वि० खं० 4, पृ० 34)

द्र० 'परः~कालाध्वा' इति।

~प्रयोगक्रियातः——षट्त्रिंशदङ्गुले प्राणचार एव भावनया घटिकादिनमासवर्षादि—महाप्रलयसृष्ट्यादिपर्यन्तः कालो भावनोपायतः साक्षादनुभूयते कालाध्वयोगस्याभ्यासेन। यथा—

"षट्त्रिंशदङ्गुले चारे यद्गमागमयुग्मकम्।
नालिकातिथिमासाब्द तत्सङ्घोऽत्र स्फुटं स्थितः॥"
(तं आ० 6, 63)

~फलदृष्ट्या——(1) भुक्तिमुक्तिफलप्रदोऽस्याभ्यासः। यथा—

"संकुचच्चित्स्फुरत्तात्मप्राणान्तर्येन भास्यते।
कालाध्वा विश्वभृद्भुक्तिमुक्त्यर्थं स जयत्यजः॥"
(उद्ध०स्व०तं०उ० प० 7, पृ० 167)

(2) वर्णमन्त्रपदक्षेत्रेषु या सिद्धयस्ता हस्तगता भवन्त्यनेन, कालातीतस्यानवच्छिन्नस्य च परस्य संवित्स्वरूपस्यात्मनः साक्षात्कारोऽपि जायते।

(3) प्रहराणामष्टके प्राणचारे एवंविधायाः भावनायाः फलं परापररूपा बहुविधाः सिद्धयः। यथा—

"सिद्धिर्दवीयसी मोक्षोऽभिचारः पारलौकिकी॥
ऐहिकी दूरनैकट्यातिशया प्रहराष्टके॥"
(तं० आ० 6, 67-68)

~रहस्यतः—घटिकातः आरभ्य प्रहर-दिन-मास-वर्ष-युग-मन्वन्तर-कल्पप्रभृतीनां महतामपि कालभागानां, प्राकृतानां, मायीयानां, शुद्धानां चापि तत्त्वानां सृष्टिसंहारयोः, ब्रह्माद्यनाश्रितानामपि कारणेश्वराणामायुषः, एवं महासृष्टीनां महासंहाराणामपि कालमानानां निजे एकस्मिन् प्राणचारेऽनेन कालाध्वयोगेन साक्षादनुभवो जायते सुदृढाया भावनायां अभ्यासेन। परिपक्वतामुपयातेऽभ्यासेऽकालकलितं निजं भैरवरूपत्वं साक्षादनुभूयते, शिवभावस्याणवः समावेशश्चाप्यवाप्यते।

द्र० (तं०सा० पृ० 54 तः 57)

यथा—

"एवमसंख्या सृष्टिप्रलयाः एकस्मिन् महासृष्टिरूपे प्राणे, सोऽपि संविदि, सोपाधौ, स चिन्मात्रे। चिन्मात्रस्यैवायं स्पन्दो यदयं कालोदयो नाम।"
(तं०सा० पृ० 57)

"अखिलं कालाध्वानं प्राणोदय एव पश्यन् सृष्टिसंहारांश्च विचित्रान् निःसंख्याकान् तत्रैवाकलयन्, आत्मन एव पारमैश्वर्यं प्रत्यभिजानन् मुक्त एव भवति।

संविद्रूपस्यात्मनः प्राणशक्ति
पश्यन् रूपं तत्रगं चातिकालम्।
साकं सृष्टिस्थेम-संहार-चक्रै-
र्नित्योद्युक्तो भैरवीभावमेति॥"
(तं०सा० पृ० 61)

~सूक्ष्मः——प्राणचारे यो मन्त्रोदयोऽसौ भावनाभ्यासालम्बनीकृतः सन् सूक्ष्मः कालाध्वा।

द्र० 'परः कालाध्वा' इति।

~स्थूलः——प्राणचारे यः पदोदयोऽसौ भावनाभ्यासालम्बनीकृतः सन् स्थूलः कालाध्वा।

द्र० 'परः कालाध्वा' इति।

कालानलः (बीजम्)——रकारः। यथा—

"कालानलो 'र'।"
(तं०आ०वि० खं० 12, पृ० 202)

कालान्तका देवी——परा कालसङ्कर्षिणी। यथा—

"या सा कालान्तका देवी परातीता व्यवस्थिता।
ग्रसते शूलचक्रं सा त्विच्छामात्रेण सर्वदा॥"
(तं० आ० 31, 97)

कालाभासबीजम्——संविदः क्रमावभासन-स्वातन्त्र्यात्मकः स्वभाव एव हि मूलतः कालावभासस्य बीजम्। यथा—

"सर्वे व्यवहारास्तस्यैव, पुराणत्वेन प्राक् प्रसिद्धतायामविवादात्—इति दर्शितमेव। संविदेव हि प्राणनक्रियया प्राक्कालमुल्लासयेत्। महाप्रलये च ब्रह्मणि स्वपत्यपि तन्निःश्वासोच्छ्वासादिक्रियया, उत्तरविष्णुरुद्रप्रभृतिकारणवर्गगतया च क्रियया कालव्यवहार:।"

(ई०प्र०वि०वि० खं० 3, पृ० 6)

कालावली——त्रिकसाधनोपयोगी ज्योतिर्विज्ञानग्रन्थः कोऽपि।

यथा—"यदुक्तं कालावल्याम्—
तत्र तावदयं प्राप्य दर्शप्रतिपदं मरुत्।
समुदेति विधौ तावदादौ चन्द्रदिनत्रयम्॥
ततः संक्रमते सूर्ये तत्राप्युदयते त्र्यहम्।
संक्रम्य त्रयमेतस्मात्पुनरेति हिमद्युतौ॥
इत्यादि।"

(उद्ध०स्व०तं०उ० प० 7, पृ० 269)

कालिकाकुलम्——किमपि शैवं दार्शनिकं पुस्तकम्। यथा—

'तस्य देवातिदेवस्य परबोधस्वरूपिणः।
विमर्शः परमा-शक्तिरवियुक्तो यथा प्रभुः॥'
इति श्रीकालिकाकुलोक्तस्थित्या·········।"

(स्व०तं०उ० 11, पृ० 5)

कालिकाक्रमः——किमप्यागमिकं शैवशास्त्रपुस्तकम्। यथा—

"तत्तद्रूपतया ज्ञानं बहिरन्तः प्रकाशते।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत्॥
न हि ज्ञानादृते भावाः केनचिद्विषयीकृताः।
ज्ञानं तदात्मतां यातमेतस्मादवसीयते॥"
इत्यादि श्रीकालिकाक्रमोक्त्या।"

उद्ध (तं०आ०वि० खं० 3, पृ० 390)

द्र० (शि०सू०वि० पृ० 54तः 61, 65, 131)

द्वितीय संस्करणे।

पृ० 111, 113, 118, 120, 123, 131तः 133, 139 इति।

प्रथम संस्करणे।

(ने०तं०उ० खं० 2, पृ० 282) प० सा० पृ० 90

कालिकामतम्——किमपि कौलाचारप्रधानं शास्त्रं सोद्धरणं कृतनामोल्लेखं महार्थमञ्जरीपरिमले। यथा—

"यथा च कालिकामते—
पतन्ति जन्तवो येन कर्मणा नरके ध्रुवम्।
उत्पतन्ति च तेनैव त्रिकालज्ञा भवन्ति च॥"

(मं०मं०प०, पृ० 22)

काली——(1) गतिक्षेपाद्यात्मकविश्वकलनायाः कारिणी परा पारमेश्वरी शक्तिः कालीति कथिताऽऽगमेषु। सैव सृष्ट्यादिकलनाकरी।

द्र० (तं०सा०, पृ० 27)

द्र० अत्रैव '~अर्थतः' इति।

(2) असौ पराशक्तिर्यस्याः विविध-विधस्य साक्षात्कारस्याभ्यासेन शिवयोगिनः परां स्वरूपप्रत्यभिज्ञां लभन्ते भावनात्मकशाक्तोपायप्रक्रियानुसारम्; सार्धमेव च स्वस्वभावभूतायाः पारमैश्वर्य-शक्तेस्तांस्तान् विविधान् कलनसामार्थ्यरूपान् विशेषानपि स्वात्मन्युद्दीपयन्तः पूर्णतया कृतकृत्यतां रसयन्ति। द्वादशरूपतया तस्याः भावनायाः अभ्यासो यतो विधीयते ततो द्वादशकाल्यो भगवत्य उपास्यन्ते त्रिकयोगे। ताश्च शाम्भवोपाये, शाक्तोपाये, बुद्धिध्यानात्मके, चक्रोदयाख्ये चाणवोपाये साधकैरालम्बनीक्रियन्ते।

~अधिष्ठानतः——यतो हि सर्वः प्रमातृप्रमाणप्रमेयप्रपञ्चः काल्यैव कल्यते ततः सर्वाण्यपीन्द्रियाणि सर्वमपि च प्रमेयजातं (प्रमाण-प्रमेय प्रमातृसंसर्गतः स्फुरद्) द्वादशकालीचक्राधिष्ठानतां याति शाक्तोपायमये क्रमनये। यथा—

"अत्र तात्पर्यतः प्रोक्तमक्षे क्रमचतुष्टयम्।
एकैकत्र यतस्तेन द्वादशात्मकतोदिता॥
न व्याख्यातं तु निर्भज्य यतोऽतिसरहस्यकम्।
मेयेऽपि देवी तिष्ठन्ती मासराश्यादिरूपिणी॥"

(तं०आ० 4, 145-46)

अक्षे इति करणसमूहे।

"द्वादशैव स्वराः प्रोक्ता नपुंसकविवर्जिताः।
आदित्या द्वादश प्रोक्ता द्वादशारव्यवस्थिताः॥
मासा द्वादश इत्युक्ताः कला द्वादशसंज्ञिताः।"

(उद्ध० तं०आ०वि० खं० 3, पृ० 156)

इत्थं विश्वं जगत् कालीकलितमिति वेद्यम्।

~अर्थतः——(1) कल शब्दने। शब्दनं च विमर्शनम्। ततो विमर्शात्मिका पराशक्तिः काली। कल संख्याने। कल क्षेपे, कल गतौ, इत्यनेकार्थाद्धातोरस्य पदस्यान्वर्था व्युत्पत्तयः सम्भवन्ति। यथा—

"'कल शब्दे' 'कलकिल बिलक्षेपे' 'कल संख्याने' 'कल गतौ' इति धात्वर्थानुगमात् क्रमेण कलयन्ति, परामृशन्ति, क्षिपन्ति, विसृजन्ति संहरन्ति च, गणयन्ति, जानते चेति काल्यः ता एवं कालिकाः।"

(तं०आ०वि० खं० 2, पृ० 235)

(2) कल्यते पञ्चकृत्यविषयतयावभास्यते विश्वमनयेति काली, सा चासौ क्रमाक्रमकलनावभासनशक्तिः परमेश्वरस्य यया विश्वप्रपञ्चकलनाकरस्य कालस्यापि कलना विधीयते। यथा—

“तस्य क्रमाक्रमकलनैव कालः, स च परमेश्वर एवान्तर्भाति तद्भासनञ्च देवस्य काली नाम शक्तिः ।”

(तं०सा०, पृ० 45-46)

“श्रीमदानन्द भैरवे—

काल्या कलति भूतानि ………… ।
………………………महेश्वरः ॥ इति”

(उद्ध० स्व०तं०उ० 10, पृ० 484)

~एकैव——अनेकै रूपैर्भाव्यमानापि काली वस्तुत एकैव परासंविद् यस्यामन्तः प्रमातृ-प्रमाण-प्रमेयवैचित्र्यं तत्तद्व्यवहारैर्यदैश्वर्यविजृम्भयैव भाति ।

द्र० अत्रैव—तत्त्वतः इति ।

~चक्ररूपिणी——

द्र० ‘शक्ति-चक्रम्’ इति ।

~तत्त्वतः——सर्वप्रमातृषु द्वादशधा तिष्ठन्ती संविद् वस्तुत एकैव, नास्याः क्रमस्य नियमः क्वचित् । ततो क्रमाक्रमकथातीतं सुनिर्मलं पारमेश्वरशक्ति-चक्ररूपतया प्रकाशमानमेकं संवित्तत्वमेव तत्त्वतः कालीति । यथा—

“इत्थं द्वादशधा संवित् तिष्ठन्ती विश्वमातृषु ॥
एकैवेति न कोऽप्यस्याः क्रमस्य नियमः क्वचित् ।
क्रमाभावान्न युगपत् तदभावात्क्रमोऽपि न ॥
क्रमाक्रमकथातीतं संवित्तत्वं सुनिर्मलम् ।”

(तं०आ० 4, 178तः 180)

~त्रयोदशी——केचिदुपासकाः द्वादशकालीनां समष्टिरूपं परं स्वरूपं त्रयोदशमपि कदाचिदुपासनाविषयतामापादयन्ति स्मेति जयरथकृतात् शास्त्रार्थप्रघट्टकात् प्रतिपद्यते । तत्र गुरूपदेशानुसारमेवोपासितव्यं साधकविशेषैरिति निर्णयः । ततो नात्र परस्परविरोधावकाशः ।

द्र० विस्तरतः (तं०आ०वि० खं० 3, पृ० 188 तः 203)

~दार्शनिकदृष्ट्या —— (1) सृष्ट्यादि-कर्तृत्वमयी पारमेश्वरी पराशक्तिः । सृष्ट्यादिपञ्चकृत्यकलनाकारिणी परमेश्वरस्य स्वभावभूताऽसौ विशेषताययाऽसौ परमेश्वरत्वेन चकास्ति । विश्वकलनाकरस्य कालस्यापि कलनाकरी प्रभोः शक्तिः । यथा—

“द्वितीया सर्वज्ञानकरणाविष्टाभ्यस्यमाना सर्वज्ञत्वसर्वकर्तृत्वाय कल्पते ।……………… …………… ……………
……………………………………………………………
सैव भगवती श्रीमत्काली । मातृःसद्भावो, भैरवः प्रतिभा इति ।”

(तं०सा०, पृ० 104-5)

कालकर्षिणी, कालसङ्कर्षिणी, मातृसद्भावः । इत्येतस्याः अभिधानान्तराणि ।

द्र०च० ‘कालः’~‘परे तत्त्वे’ इति ।

“तत्र परमेश्वरः पूर्णसंवित्स्वभावः । पूर्णतैवास्य शक्तिः, कुलं, सामर्थ्यम् ऊर्मिः, हृदयं, सारं, स्पन्दः, विभूतिः, त्रीशिका, काली, कर्षणी, चण्डी, वाणी, भोगो, दृग्, नित्या इत्यादिभिरागमभाषाभिस्तत्तदन्वर्थप्रवृत्ताभिरभिधीयते, तेन तेन रूपेण ध्यायिनां हृद्यास्तामिति ।”

(तं०सा०, पृ० 27-28)

(2) विश्वात्मकस्य जगतः सृष्टिसंहारादिकृत्यपञ्चकेन कलनाकरी परिपूर्णस्य परमेश्वरस्य पूर्णतामयी पराशक्तिः कालीत्युच्यते ।

द्र० ‘ऊर्मिः’ इति ।

~द्वादशरूपा——अन्तर्बहिः-परामर्शनात्मकं कलनं द्वादशधा भवति । तदनुसारं काल्योऽपि द्वादशसु रूपेषूपास्या भवन्ति । ततो द्वादशकाल्यः प्रसिद्धा । तासां नामोल्लेखोऽत्रैवाग्रे विधीयते । द्वादशत्वं यथा—

“स च द्वादशधा तत्र सर्वमन्तर्भवेद्यतः ॥”

(तं०आ० 4, 123)

यतः संवित्परामर्शो द्वादशधा ततस्तत्र द्वादशसु कलनासु सर्वोऽपि संविद्व्यवहारोऽन्तर्भवति । तत एव तत्कलनकारिण्यः काल्यो द्वादशेति ।

~प्रपञ्चे——सर्वानपि प्रमातॄन्, एकैकं वापि प्रमातारमुद्दिश्य एताः काल्यः उदयव्ययभागिन्यो जगद्व्यवहारं चालयन्ति । कदाचिद् द्विशस्त्रिशो, बहुशोऽपि वा मिलित्वा प्रवर्तन्ते । एवं जगति चक्रवदावर्तमाना विश्वान् व्यापारान् सञ्चालयन्ति । कालीत्वं चासां कलनकर्तृत्वेन । तच्च कलनं (1) क्षेपः=स्वात्मनः सकाशाद् भिन्नतयावभासनम् । (2) ज्ञानं=निर्विकल्पं प्रकाशनम् । (3) गणनं-संख्यानं=सविकल्पमाभासनम्, (4) गतिः=स्वात्मनि प्रतिबिम्बवद् धारणम् । (5) नादः=स्वात्मपरामर्शं शेषतापादनम् ‘अहम्’ इति । अत्र तन्त्रसारे अन्यदपि कलनद्वयमुदितम् । तच्च भोगीकरणं, स्वात्मलयीकरणं चेति । तयोः भोगीकरणं संख्यानानन्तरं स्वात्मलयी-करणं च गतेरन्तरं वेद्यं सुधीभिः । तत्र भोगीकरणं ज्ञातृताविमर्शमयम्, स्वात्मलयीकरणं च स्वात्मपरामर्शशेषतापादनस्य पूर्वो भागः इति विज्ञेयम् । सूक्ष्मतरेण विश्लेषणेनैतदेवमुक्तं तन्त्रसारे । यथा—

“एता द्वादश भगवत्यः संविदः प्रमातॄन् एकं वाप्युद्दिश्य युगपत् क्रमेण द्विशस्त्रिश इत्यादि-स्थित्यापि उदयभागिन्यः चक्रवदावर्तमाना बहिरपि मासकलाराश्यादिक्रमेणान्ततो वा घटपटादिक्रमेणापि भासमानाः चक्रेश्वरस्य स्वातन्त्र्यं पुष्णत्यः श्रीकालीशब्दवाच्याः ।

कलनञ्च गतिः, क्षेपो, ज्ञानं गणनं, भोगीकरणं, शब्दनं स्वात्मलयीकरणञ्च ।”

(तं०सा०, पृ० 30)

तन्त्रालोके कलनं पञ्चविधत्वेनैव प्रतिपादितम् । तन्त्रसारे पुनः सूक्ष्मतरेण विचारेण तस्य सप्तप्रकारतोक्ता; न च प्रकारद्वयस्य व्याख्या कृता । तन्त्रालोकानन्तरं तन्त्रसारस्य रचना सम्पन्ना । ततस्तत्र विचाराणां विशेषा परिपक्वतेति स्मर्तव्यं सुधीभिः । उक्तं हि तन्त्रालोके—

"इमा प्रागुक्त कलनास्तद्विजृम्भोच्यते यतः ।
क्षेपो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात् ॥
स्वात्मनो भेदनं क्षेपो, भेदितस्याविकल्पनम् ।
ज्ञानं, विकल्पः संख्यानमन्यतो व्यतिभेदनात् ॥
गतिः स्वरूपारोहित्वं प्रतिबिम्बवदेव यत् ।
नादः स्वात्मपरामर्शशेषता तद्विलोपनात् ॥
इति पञ्चविधामेनां कलनां कुर्वती परा ।
देवी काली तथा कालकर्षिणी चेति कथ्यते ॥"

(तं०आ० 4, 173तः 176)

~भावनाक्रमे——प्रमेय-प्रमाण-प्रमातृ-मयान् संविद्व्यापारान् कलयन्त्यः स्वात्मसाच्च कुर्वंत्यस्तद्ग्रसनशीलाः संवित्शक्तयः सृष्टिकाल्याद्यभिधानाः द्वादश देव्यो भावनात्मके शाक्तोपाये ज्ञानयोगाङ्गतयोपास्याः । साधकानां चेतसि तासां वास्तविकस्य तत्त्वस्याभिव्यञ्जकं यत् स्थूलं रूपं मानसे ध्याने समुपयुक्तं तस्य वर्णनमाचार्यसिद्धनाथकृते क्रमस्तोत्रे, तदुपरि चाभिनवगुप्ताचार्यकृतायां क्रमकेलि-संज्ञायां टीकायां (या नोपलभ्या), तत् कृत एव च स्वतन्त्रे क्रमस्तोत्रे काव्यात्मकतया कृतमस्ति । पञ्चशतिकाख्ये आगमविशेषेऽप्यासां वर्णनं विद्यते । तानि चैतद्वर्णनपद्यानि जयरथेनोद्धृतानि तन्त्रालोकविवेके । सिद्धनाथीय-क्रमस्तोत्र-पद्यान्यपि तत्रैव तेनोद्धृतानि, तथा कतिचित् प्रघट्टकाः क्रमकेल्याः । विश्वान् संविद्व्यापारान् ग्रसमानाः एताः द्वादशकालीरपि साधको भावनाभ्यासेन स्वशक्तिरूपतया स्वसंविदि निमज्जयन् स्वीयं विश्वात्मकत्वमनुभवतीति रहस्यं कालीनयोपासनायाः ।

प्रमातृ-प्रमाण-प्रमेय-प्रकाशरूपा संवित् सृष्टिस्थितिसंहारानाख्यत्वेन प्रत्येकं चतुर्विधत्वाद् द्वादशधा भवतीति द्वादशकाल्यः क्रमेणोपास्या भवन्ति कालीनयाभ्यासरूपे शाक्तोपाये । यथा —

"सा च मातरि विज्ञाने माने करणगोचरे ।
मेये चतुर्विधं भाति रूपमाश्रित्य सर्वदा ॥"

(तं०आ० 4, 125)

"सृष्टि-स्थिति-संहारानाख्यत्वेन चतुर्विधं रूपमाश्रित्य प्रमातरि, प्रमाणे प्रमेये च सर्वदा भाति ।"

(तं०आ०वि० खं० 3, पृ० 128)

"इह खलु परैव संवित् स्वस्वातन्त्र्याद् यथोक्तयुक्त्या द्वादशधा प्रस्फुरितेति तावदविवादः ।"

(तदेव, पृ० 129)

"तस्य शक्तय एवैतास्तिस्त्रो भान्ति परादिकाः ।
सृष्टौ स्थितौ लये तुर्ये तेनैता द्वादशोदिताः ॥"

(तं०आ० 1, 107)

"परादिकास्तिस्त्रः शक्तयः सृष्टौ, स्थितौ, लये-संहारे, तुर्ये-अनाख्ये च भान्ति सर्वसर्वात्मकेन रूपेण स्फुरन्ति इत्येकैकस्याश्चातुरूप्येण श्री-सृष्टि काल्याद्यात्मकतया द्वादशधोदयः ।"

(तं०आ०वि० खं० 1, पृ० 151)

~भाव्यभेदे——प्रमेये, प्रमाणे, प्रमातरि च भावनाविषयतां नीते सति काली प्रत्येकं चतुर्धोपास्यते । तत्र—

(1) सृष्टिस्थितिसंहारानाख्यावस्थागतस्य प्रमेयांशस्य पंचविधकलनात्मकतया स्वात्मनैक्यस्य सम्पादयन्त्यः (1) सृष्टिकाली (2) रक्तकाली (3) स्थितिनाशकाली (4) यमकाली चेति प्रथमाश्चतस्रो द्वादशसु ।

एवं प्रमेयांश-ग्रासरसिकं सृष्टयादि-देवी-चतुष्टयं निरूपितम् ।

(तं०आ०वि० खं० 3, पृ० 165)

(2) संहारकालीमारभ्य चतस्रः संविच्छक्तयः करणात्मकप्रमाणग्रसनकलनात्मिकाः ।

"प्रमाणांशभक्षणप्रवणं संहारादिदेवीचतुष्कं निरूपयति ।"

(तं०आ०वि० खं० 3, पृ० 165)

ताश्च—(1) संहार काली (2) मृत्युकाली, (3) रुद्रकाली, (भद्रकालीत्यपरनाम्नी) (4) मार्तण्ड-काली । इति ।

(3) द्वादशसु चरमाश्चतस्रः काल्यः प्रमातृतत्त्वानां संविदेकीकारणकारिण्यो भवन्ति । यथा—

"एवं प्रमाणांशभक्षणप्रवणं देवीचतुष्टयं निरूपितम् ।
इदानीं प्रमात्रंश-चर्वणाचतुरं देवीचतुष्टयं निरूपयति ।"

(तं०आ०वि० खं० 3, पृ० 179)

ताश्च—

(1) परमार्क काली,
(2) कालाग्निरुद्रकाली,
(3) महाकालकाली,
(4) महा-भैरव चण्डोग्रघोरकाली । इति

~मूलतः——काली हि वस्तुतः परामर्शस्वरूपिणी संवित् । संविदेव हि स्वस्वातन्त्र्यादन्तर्बहीरूपतया सततं परामर्शमयी प्रकाशते । तथा परामर्शनमेव हि सृष्ट्यादिकृत्यविषयभूतस्य प्रमेयादेः विविधं कलनम् । तत इयं कालीति भण्यते । एवं सततकलनापरा सृष्टिसंहारादिकृत्यान्याभासयन्ती द्वादशधा प्रमेयादि कलनाकारिणी संविद्द्व्येव काली । यथा—

"तथाहि संविदेवेयमन्तर्बाह्योभयात्मना ॥
स्वातन्त्र्याद्वर्तमानैव परामर्श-स्वरूपिणी ।"

(तं० आ० 4, 122-23)

~विश्लेशणभेदतः——द्वादशकालीनिरूपणं तन्त्रसारेऽन्यथा तन्त्रालोके चान्यथा, ग्रन्थान्तरेषु चान्यथा । एतद्विषयेऽसमञ्जसत्वं न शङ्कनीयम् । यतो हि भावनात्मके योगे बहुधा शुद्धविकल्पाभ्यासपाटवेनाशुद्धविकल्पनिर्ह्रास एवाभ्यासस्य मुख्यं प्रयोजनम् । स च शुद्धो विकल्पो विविधयापि कल्पनया स्थाप्यते । देशाध्वनि यथा द्वीपानां समुद्राणां च स्थितेः सा कल्पना या प्रत्यक्षदृष्टप्रमाणविरुद्धापि भावनोपयोगिनी तत्तत्फलदा च । यथा—

"इह यावता हि परस्याः संविदो द्वादशधोदयो विवक्षितः, स चैवमस्त्वनेवं वा, प्रक्रियाया विशेषे तस्या विशेषात् एतदभिप्राय-

गर्भीकारेणैव चान्यत्राप्यनेनैव ……………………………
……………………………………………………
……………………………………………………
प्रक्रियान्तरेणास्या द्वादशधोदय उक्तः, इति सर्वं निरवद्यम् ।"

(तं०आ०वि० खं० 3, पृ० 134)

~शाक्ताणवयोः——चिन्मात्रः परमेश्वर एव प्रमाण-प्रमेय-प्रमातृ-प्रमामयेन संविद्व्यवहारेण स्वात्मानमेव कलयति सर्वेषु प्राणिषु। तस्यैषा कलनशक्तिरेव मुख्यतः काली। कलनं च क्षेपो, ज्ञानं, संख्यानं, गति-नाद इति मुख्यतया पञ्चविधम्। तद्विषयं परमेश्वरस्य स्वातन्त्र्यं शाक्तोपायमय-भावनायोगेन भाव्यमानं सत् कालीशब्दव्यपदेश्यम् त्रिकादि-साधनाक्रमेषु। आणवेऽप्यस्योपयोगो-यथा बुद्धिध्याने। यथा—

"प्रमातृवर्गो मानौघः प्रमाश्च बहुधा स्थिताः।
मेयौघ इति यत् सर्वमत्र चिन्मात्रमेव तत्॥
इयतीं रूपवैचित्रीमाश्रयन्त्याः स्वसंविदः।
स्वाच्छन्द्यमनपेक्षं यत् सा परा परमेश्वरी॥
…………………………………………
…………………………………………
क्षेपो ज्ञानं च संख्यानं गतिर्नाद इति क्रमात्॥"

(तं० आ० 4, 171तः 173)

"इति पञ्चविधामेनां कलनां कुर्वती परा।
देवी काली तथा कालकर्षिणी चेति कथ्यते॥"

(तं० आ० 4, 176)

क्षेपादीनां लक्षणानि तत्र तत्र द्रष्टव्यानि कोषेऽत्रैव।

~शाम्भवोपाये——अनुत्तरः (अ) इच्छा (इ) उन्मेष (उ) इति मुख्यास्तिस्रः परमेश्वरस्य शक्तयः परा, परा-परा अपरा चेति। क्षोभरूपतामायातास्ताः आ, ई, ऊ इति रूपत्रयोपगमनेन षट्संख्याकाः सम्भवन्ति। तासामेव परस्परोन्मुख्याच्चतस्रः शक्तयः ए, ऐ, ओ, औ, इत्येता आविर्भवन्ति। विश्वस्यान्तःकृतत्वेन विमर्शः अं इति बहिष्करणोन्मुख्येन च 'अः' इति शक्ति-द्वयमाविर्भवति ताभ्यः। इत्येवं द्वादशतामुपयाता परमेश्वरस्य कलनाशक्तिरेव द्वादशकालीरूपतयोपास्यते निर्विकल्प-साक्षात्काराभ्यासमयशाम्भवोपायप्रक्रियया। शाक्तोपाये च द्वादशधा भावना तासु विधीयते। दृश्यं तद् व्याख्यानं स्वे स्थाने। शाम्भवे कालीनयोपयोगो यथा तथा द्रष्टव्यमत्र—

"विभागाभासनायां च मुख्यास्तिस्रोऽत्र शक्तयः॥
अनुत्तरा परेच्छा च परापरतया स्थिता।
उन्मेषशक्तिर्ज्ञानाख्या त्वपरेति निगद्यते॥
क्षोभरूपात्पुनस्तासामुक्ताः षट् संविदोऽमलाः।
आसामेव समावेशात्क्रियाशक्तितयोदितात्॥
संविदो द्वादश प्रोक्ता यासु सर्वं समाप्यते।
एतावद्देवदेवस्य मुख्यं तच्छक्तिचक्रकम्॥
एतावता देवदेवः पूर्णशक्तिः स भैरवः।
परामर्शात्मकत्वेन विसर्गाक्षेपयोगतः॥
इयत्ताकलनाज्ज्ञानात्ताः प्रोक्ताः कालिकाः क्वचित्।"

(तं० आ० 3, 248तः 253)

अत्र (1) विसर्गः=क्षेपः, (2) ज्ञानं=निर्विकल्पकम् (3) इयत्ता कलनं संख्यानम्। तच्चापोहरूपतया विकल्पनम्। (4) आक्षेपः=स्वात्मनि प्रतिबिम्बतया धारणम्, असावेव गतिः, (5) परामर्शात्मकत्वं=स्वात्मपरामर्श-शेषतारूपो नादः। इत्येषा पञ्चविधात्र कलना कालिकाभिः। एते क्षेपादयोऽपि स्वे स्वे स्थाने व्याख्याता इति तत्रैव द्रष्टव्याः।

~संख्यातः——उपासन-क्रम-भेदेषु कालीनां संख्याभेदोऽपि भवितुमर्हति; अस्य क्रमस्य भावनाङ्गभूतत्वात्, भावनायाश्च बहुविधतयाऽभ्यसनीयत्वात्, तत एव पञ्चशतिके तन्त्रराजभट्टारके च कालीनां मध्ये द्वादशातिरिक्ता सुकाली नाम वर्णिता, याऽन्यत्र नैव गणिता। चिद्गगन-चन्द्रिकायां चान्यथैव कालीनां वर्णनं कृतं कासाञ्चित्। तत्र रुद्रकाली-भद्रकाल्यौ पृथग् गणिते, भीमकाली चाधिकतया गणिता। महाभैरवचण्डोग्रकालीं प्रति स्फुटतया निर्देशो नैव कृतः। तदत्र गुरूपदेशानुसारं यो यस्योपासनाक्रमस्तेन तथैव भावनाभ्यासो विधेयः।

द्र० चि०ग० चं० 217तः 250 यावत्,
द्र० 'पञ्चशतिकम्' इति 'तन्त्रराजभट्टारक' इति च।

कालीकुलम्——कोऽपि कौलागमसम्बन्धी ग्रन्थ इदानीमलभ्यः।

"यच्छ्रीकालीकुलम्—
तस्य देवातिदेवस्य परबोधस्वरूपिणः।
विमर्शः परमाशक्तिः सर्वज्ञा ज्ञानशालिनी॥

(उद्‌० ने० तं० उ० खं० 1, पृ० 21)

"अन्याश्च गुरुतत्पत्न्यः श्रीमत्कालीकुलोदिताः।"

(तं० आ० 29, 43)

कालीनयः——क्रमनयः। द्वादशकालीनां ज्ञानयोगेनोपास्तिक्रमः। असौ च प्रमेय-प्रमाण-प्रमातृमयस्य संविद्व्यापारस्य भावनात्मकेन शाक्तयोगेन क्रमेण स्वात्मसात्-करणात्मकं यद् ग्रसनं तस्याभ्यासेन परिपूर्णपारमैश्वर्यसुमण्डितस्य स्वात्मनः शुद्धसंविद्रूपतायाः साक्षात्कारस्योपायविशेषः। शाक्तोपायविशेषोऽयम्। ततो नैष क्रमनयः त्रिकाचारात् पृथक्त्वेन गणनीयः यथाऽद्यत्वे केऽपि विद्वांसः शोधकाराश्च गणयन्ति। जयरथस्य युगे कश्मीरेष्वियं योगप्रक्रियाऽतीव साधकप्रियाऽभूत्। तदैवैतस्या महात्म्यमभिव्यञ्जयितुं तेन तन्त्रालोकान्ते त्रिककुलक्रमाणां पृथक्-पृथक् त्रयाणामाचाराणामुल्लेखो नामतः कृतः। एतस्योपासनाप्रकारस्य लोकप्रियतयैवाभिनवगुप्तपादैरपि "त्रिक-कुल-क्रमयोगि" इति पृथङ् निर्देशः क्रमस्य कृतस्तन्त्रालोकस्य त्रिंशस्याह्निकस्यारम्भे। अथवा तत्र त्रिककुलयोः क्रमे यदुपयोगीति तात्पर्यं स्यात्। आगमेषु न क्वापि क्रमनयस्य स्वतन्त्राचारता स्वीकृता। तन्त्रालोकादौ

शाक्तोपायमध्ये त्रिकयोग एवास्य प्रतिपादनं कृतं विस्तरतः। किञ्च तत्र शाम्भवे आणवे चाप्युपाये बुद्धिध्यानात्मकेऽस्य शक्तिचक्रक्रमस्योपयोगः। चक्रोदयप्रकरणेऽपि तथा। इत्थं त्रिकाचारस्योपायत्रयस्याप्यङ्गभूतोऽयं क्रमनयः कथं पृथगाचारतया गणयितुं शक्यते। इत्यत्रावधातव्यं सुधीभिः।

~अभ्यासविधानतः——साधकः सृष्टिकालीमारभ्य महाभैरव-चण्डोग्रकालीं यावत् सर्वाः कालिका भावनायाः आलम्बनं विधाय स्वात्मन्युद्बोधिताभिस्ताभिर्विश्वमात्मसात् कुरुते। ताश्च कालीः क्रमशः एकैकशो वा, द्विशो वा, त्रिशो वा, चक्रात्मकतया वा, एकप्रमातृगततया वानेकप्रमातृगततयापि वा, विश्वात्मकतयापि वा स्वात्मनयुद्बोधयंस्तथा च साक्षात्कुर्वन् सद्यो भुक्तिमुक्तिफलभाग् भवति। यथा—

अक्रमक्रमवशाद् द्विशस्त्रिशो भूरिशोऽथ विविधैः क्रमाक्रमैः।
चक्रमेतदुदितं विजृम्भते मेयमानमितिमातृभक्षकम्॥
एतच्चक्रगतानन्त किरणारासमाश्रयात्।
चक्रभेदो न संख्यातुं कदाचिदपि शक्यते॥

(मा०वि० वा० 1, 942-43)

~प्रतिपादनतः——विस्तरतः प्रतिपादितोऽयं कालीनयविषयः रहस्यमय्या शैल्या निम्नांकितेषु ग्रन्थेषु।

द्र० क—(तं० आ० 4-122तः 180)
ख—(तं०आ०वि० खं० 3, पृ० 124तः 210)
ग—(तं०सा० पृ० 28तः 31)
घ—(चि० ग० चं० 4-38तः 72)
ङ—(मा०वि० वा० 1-935तः 950)

~शिष्य परम्परातः——उत्तरपीठे गुरुः कोऽपि नाम्ना शिवानन्दनाथः स एव अवतारकनाथः इति।

तस्य शिष्यपरम्परा



(तं०आ०वि० खं० 3, पृ० 192)

~अन्ये गुरवः——(1) ह्रस्वनाथः, (3) वीरनाथः, (3) भोजराजः, (4) सोमराजः इति

द्र० (तं०आ०वि० खं० 3, पृ० 196)

काली-पूजा~त्रिके——संविदभेदभावनामय्यां कालीपूजायां नैवावाहन-पाद्यार्घ्याद्युपचारमयी पूजा सम्भवति। ततः स्वात्मसंविदभेद-विमर्शनाभ्यास एव कालीनयोपास्तिः। सैव त्रिकाचारीया कालीपूजा।

तदस्याः संविदो देव्या यत्र क्वापि प्रवर्तनम्।
तत्र तादात्म्ययोगेन पूजा पूर्णैव वर्तते॥

(तं० आ० 4, 180-181)

कालीमुखम्——कोऽप्यागमिको ग्रन्थविशेषो यन्मतमुल्लिखितं तन्त्रालोके। यथा—

"विमलं तत्तथा कुर्याच्छ्रीमत्कालीमुखोदितम्॥"

(तं० आ० 27, 44)

कालुष्यम्——परमेश्वरैकरूपेऽपि स्वात्मनि यदतद्रूपतावभासरूपाऽशुद्धिः सैव कालुष्यम्। यथा—

"कालुष्यापगमो हि शुद्धिः। कालुष्यं च तदेकरूपेऽपि अतत्स्वभावरूपान्तर-संवलनाभिमानः।"

(तं०सा०, पृ० 129)

कालोत्तरः——कालपादाख्य आगमिको ग्रन्थः कोऽपि।

द्र० 'कालपादा' इति।
द्र० 'कालोत्तरागमः' इति च।

कालोत्तरागमः——कश्चिच्छैवागमो यस्य पंक्तय उद्धृतास्तन्त्रालोकादिशास्त्रेषु। यथा—

(क) "श्रीमत्कालोत्तरादौ च कथितं भूयसा तथा।"

(तं०आ० 11, 19)

"यदुक्तं तत्र—

(ख) पृथिव्यापस्तथा तेजो वायुराकाशमेव च।"

(तं०आ०वि० खं० 7/2, पृ० 11)

(ग) "पञ्चैतानि तु तत्त्वानि यैर्व्याप्तमखिलं जगत्।"

(तं०आ० 11, 19)

(घ) "तत्र-तत्र—श्री कालोत्तरादौ। यदुक्तं तत्र—
सद्यस्तु पृथिवी ज्ञेया वामो ह्यापः प्रकीर्तिताः।
अघोरस्तेज इत्युक्तं वायुस्तत्पुरुषः स्मृतः॥
आकाशस्तु भवेदीशः स्वयं देवो महेश्वरः।"

(उद्ध० तं०आ०वि० खं० 7/2, पृ० 12)

सद्योजातादीनां पृथिव्यादिभूतपञ्चकतया वर्णनमेतद् दृष्टान्तनीत्यैव बोध्यं, स्थूल-सूक्ष्म-सूक्ष्मतर-पर-परतरात्मकतया।

(ङ) "यदुक्तं श्रीकालोत्तरे—
'बीजाङ्कुरं पुरा शक्त्या पश्चादानन्तमासनम् ।
अनन्तं चान्तगं कुर्यात्क्रमेणैव षडानन ॥' इत्यादि"
(ने०तं०उ० खं० I, पृ० 218)

(च) "·········इत्यादिः क्रमः श्रीकालोत्तरादिशास्त्रोक्त उदयज्ञप्त्यर्थं स्मर्तव्यः।···············।"
(स्व०तं०उ०प० 7, पृ० 269)

(छ) "तथा च कालोत्तरेऽपि—
'नादाख्यं यत्परं बीजं ।' इत्यादि
'पञ्चैतानि तु तत्त्वानि यैर्व्याप्तमखिलं जगत् ।' इति
'एवं ज्ञात्वा महासेन श्वपचानपि दीक्षयेत् ।' इत्यादि।"
(ने०तं०उ० खं० I, पृ० 227)

कालोपादानम्——कलैव ।
द्र० 'विद्योपादनम्' इति ।

काल्यः (द्वादश)——
द्र० 'द्वादश काल्यः' इति ।

काश्मीर दर्शनम्——
द्र० 'अद्वैतशैवदर्शनम्' इति ।

काश्मीरशैवदर्शनम्——
(1) द्र० 'अद्वैतशैवदर्शनम्' इति।
(2) डा० बलजिन्नाथपण्डित-निर्मितं हिन्दीभाषामयमद्वैतशैवदर्शनाख्यं पुस्तकम् । प्रकाशितं तद् रणवीरविद्यापीठेन जम्मूपुरे ।

काष्ठा——पञ्चदशनिमेषात्मकः कालमानविशेषः। यथा—
"मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः ।
क्षणद्वयं तुटिर्ज्ञेया तद्द्वयं तु लवः स्मृतः ॥
लवद्वयं निमेषस्तु ज्ञातव्यो गणित क्रमात् ।
दशपञ्चनिमेषाश्च काष्ठा चैव प्रकीर्तिता ॥"
(स्व०तं० 11/201-2)

किरणा——किरणसंहितानामको रुद्रागमविशेषः। तन्मतमुद्धृतं बहुषु ग्रन्थेषु। यथा—
"यदुक्तं किरणायाम्—
पशुर्नित्यो ह्यमूर्त्तोऽज्ञो निष्क्रियो निर्गुणोऽप्रभुः ।
व्यापी मायोदरान्तःस्थो भोगोपायविचिन्तकः ॥"
(उद्ध० ई०प्र०वि०वि० खं० 2, पृ० 62)
(प०त्री०वि० पृ० 254)

"श्रीमत्किरणशास्त्रे च तत् प्रश्नोत्तरपूर्वकम्
इत्यादि·······,·······,·······,·······।"
(तं०आ० 1, 75-76)

द्र० (तं०आ०वि० खं० 1, पृ० 116-121) इति च।
किरणं, किरणा, किरणशास्त्रं, कैरणशास्त्रं चेत्येवं विविधतयास्य नामोल्लेखाः।
"किरणायां यदप्युक्तं गुरुतः शास्त्रतः स्वतः ।"
(तं०आ० 4, 41)

द्र० च तं०आ० 4, 78
तं०आ० 9, 47
तं०आ० 13, 162
तं०आ० 18, 11
तं०आ०वि० खं० 5, पृ० 41
तं०आ०वि० खं० 9, पृ० 13
तं०आ०वि० खं० 10, पृ० 179
स्व०तं०उ०प० 4, पृ० 37
स्व०तं०उ०प० 4, पृ० 38
स्व०तं०उ०प० 4, पृ० 71
स्व०तं०उ०प० 10, पृ० 60
स्व०तं०उ०प० 10, पृ० 78
स्व०तं०उ०प० 10, पृ० 232

कीलनम्~मन्त्राणाम्——तदनुकूलायाः भावनायाः स्थिरीकरणम्। तच्च मन्त्राभ्याससहायतया विधीयते। यथा—
"कीलनमन्यादृशत्वापादनम् ।"
(ने०तं०उ० खं० II, पृ० 17)

कुण्डगोलकद्रव्यम्——कौलिके विधौ पञ्चममकाराभ्यासेन द्रुतं पुरुषस्त्रीवीर्यम्। साङ्केतिक्येषाऽस्य द्रव्यस्य संज्ञा। अर्घरूपतया प्रयुज्यते एतत् कौलयागे। यथा—
(1) अर्घपात्रं यागधाम दीप इत्युच्यते त्रयम् ॥
रहस्यं कौलिके यागे तत्रार्घः शक्तिसङ्गमात् ।
(तं०आ० 29, 14-15)
(2) अर्घ इति कुण्डगोलकाख्यो द्रव्यविशेषः। शक्तिसङ्गमादिति—आद्ययागतया वक्ष्यमाणात् ।
(तं०आ०वि० खं० 11/2, पृ० 14, 15)
रेतो ह्राम्नु पुष्पं च···············।
(तदेव पृ० 16)
द्र० 'कौलयाग'~बभुक्षोः' इति ।
(3) मिथः परस्परस्य संयुक्ततया आत्मीयायाः षडरमुद्रारूपायाः प्रतिमायाः सम्बन्धि अमृतमुभयसामरस्यसमुत्थः कुण्डगोलकाख्यो द्रव्यविशेषः इत्यर्थः। अत्र च वीराणामिति भावितात्मभिरिति चानेन विशिष्टाधिकारिविषयत्वमुक्तम् ।
(तं०आ०वि० खं० 9, पृ० 84)

कुण्डलाख्या शक्तिः——कुण्डलिनी शक्तिः प्रणवकलासु।
द्र० 'कुण्डलिनी'~'प्रणव कलासु' इति ।

कुण्डलिनी——(1) चित्स्पन्दरूपा संवित्: पारमेश्वरी शक्तिः। सृष्टिसंहारादिकृत्यजातबीजभूताऽसौ परमाह्लादचमत्काररूपा चैतन्यविभूतिः। यथा--

"एवं त्वियमेव (कुण्डलिनीसमाख्या शक्तिः) संविन्मात्ररूपेत्यर्थः। एवं त्वियमेव संविन्मात्ररूपा सप्तदशी कला, शिवव्योमेति, परमं ब्रह्मेति, शुद्धात्मस्थानमिति चोच्यते।"

(तं॰आ॰वि॰ 2, पृ॰ 142)

"तया त्रिशिरोभैरवे एव—

"शिव व्योमेति या संज्ञा परं ब्रह्मेति यत् पदम्।" इति तथा—'आत्मस्थानं किमाख्याताम् ·······'। इति भगवत्या पृष्टे—'कुण्डलाख्या तु सा ज्ञेया सर्वाध्वोपरिवर्तिनी', इत्युपक्रम्य—

'प्रमाणोत्थानरहितमुपमाभेदवर्जितम्।
भूतव्योमपदातीतं चिद्व्योमान्तपदं परम्॥
भावप्रत्ययसंरम्भमभावं परमा गतिः।
शिवव्योम तु तज्ज्ञेयं सर्वाधारत्वलक्षणम्॥
बृहत्त्वं बृंहकत्वं च सूक्ष्मं तच्चान्तवर्ति च।
परं ब्रह्मेति तत्प्रोक्तं लक्ष्यभूतमलक्ष्यकम्'॥

इति, तथा—

'पूर्वं पदविभागं तु कीर्तितं तदहेयकम्।
तथापि भूमिकातीतमात्मस्थानं निगद्यते॥" इत्यादिना स्वरूपमेषां भगवतोक्तम्।"

(तं॰आ॰वि॰ खं॰ 2, पृ॰ 143)

(2) कुण्डलितभुजगाकारतया साक्षात्कार्या शक्तिः।

काश्मीरशैवदर्शने एषा त्रिप्रकारतयां प्रतिपादिता—

(क) शक्तिकुण्डलिनीया परमेश्वरस्य परमेश्वरताख्या सर्वथाभिन्ना स्वभावभूता पराशक्तिः।

(ख) विश्वकुण्डलिनीया कालसङ्कर्षिणीति नामधेया परमेश्वरस्यासौ शक्तिर्ययाऽसौ सर्वमपि जगद् भेदे, भेदाभेदपदे, अभेदपदे चापि त्रैधं धारयति, स्थिरतयाऽवभासयति निजे निजे च कारणतत्त्वे अन्ततो विलापयति।

(ग) प्राणकुण्डलिनी—असौ प्राणशक्तिर्यया जडोऽयं देहः चेतनायमानतामापद्यते।

द्र॰ 'त्रिरूपा' इति अत्रैव।

~गतिमती-(त्रिके)——उच्चारयोगे आनन्दादीनामवस्थानां सहभावेनैव प्राणशक्तेर्मध्यनाड्यामूर्ध्वोन्मुखी गतिरनुभूयते। सममेव च निजानन्दादीनामानन्दभूमिकानामप्यनुभूतिर्जायते। तदत्रोच्चारयोगे कुण्डलिन्याः जागरणम्, ऊर्ध्वञ्च तस्या गतिरनायासमेव स्वत एव च जायते, विनापि मूलबन्धासनप्राणायामादिकदर्थनाः—इति महानयं विशेषस्त्रिकयोगस्य हठयोगात्। यथा—

"एताश्च भूमयस्त्रिकोण-कन्द-हृत्तालूर्ध्वकुण्डलिनी-चक्रप्रवेशे भवन्ति।"

(तं॰सा॰ पृ॰ 40)

~तज्जयः——हठयोगिनां महताऽऽयासेन कुण्डलिन्या जागरणमारोहणावरोहणादिना च तत्तच्चक्रषट्कजयो भवति। उच्चारयोगाभ्यासिनस्त्वनायासमेव सर्वं सम्पद्यते, आनन्दादिपञ्चलक्षणाविर्भाव-समकालमेव। यथा—

"प्रदर्शितेऽस्मिन्नानन्दप्रभृतौ पञ्चके यदा॥
योगी विशेत्तदा तत्तच्चक्रेशत्वं हठाद् व्रजेत्।"

(तं॰आ॰ 5, 108-109)

"हठात्-स्वरसत एव तत्र-तत्र नियते चक्रे
त्रिकोणादावीशत्वं भवेत् तत्तच्चक्रजयो भवेत्।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 419)

~जागरणादितया——योगिभिः कुण्डलिताकारतया सुप्ता भुजगीव सुषुम्नायाः मूलभूते नाडीचक्रे साक्षात्क्रियमाणा जीवनात्मिका प्राणशक्तिः कुण्डलिनी।

सैषा प्राणशक्तिः प्रतिप्राणि भिन्नभिन्नपरिमाणा सती, सर्वत्र प्राणनक्रियां करोति.। नैषा वस्तुतः कदापि सुप्ता भवति; प्राणशक्तेः स्वापे देहपातापातात्। ततः 'कुण्डलिनी जागरणमितिलक्षणिकोऽयम्' पदप्रयोगः। "क्रिमेरपि नाडीचक्रेषु प्राणशक्तिर्हस्तिनोऽपि, परं पारस्परिकं सुमहदन्तरं तयोः। यथा खलु विविधशक्तिकेषु विद्युद्दीपेषु भिन्नभिन्नयैव मात्रया विद्युच्छक्त्युपयोगसामर्थ्यतः मन्द-मध्य-तीव्रादि-प्रकारकमालोकसामर्थ्यं; तथैव प्राणिनां नाडीचक्रेषु स्फुरन्त्याः प्राणशक्तेरपि। विद्युद्दीपाः जडाः ततो न तेषु शक्तिवर्धनस्यावकाशः। परं प्राणिदेहाश्चैतन्याविष्टास्ततस्तेषां शक्तीनां वृद्धिर्ह्रासश्चोभयं सम्भवति। हठयोगिनः प्राणायाममुद्राबन्धाभिरूपायैः प्राण-शक्तेः परिमाणे वर्धनमपि कर्तुं शक्नुवन्ति। सैषा व्यक्तिगतप्राणशक्तिसामर्थ्यवर्धनैव कुण्डलिन्या जागरणं प्राणिनां प्राणकुण्डलिन्या एव विषये कथ्यते। न परस्याः विश्वकुण्डलिन्याः, न चापि शक्तिकुण्डलिन्याः विषये। ते तु सदा जागृते एव।

एतत्कुण्डलिनी-जागरणं गोरक्षनाथीयेन हठयोगेनापि विधातुं शक्यते। परं तत्र कष्टमयैरूपायैः सम्भवति, असावधानतायां च शरीरपात-भयमपि वर्तते। परं त्रिकाचारीये शैवयोगे कुण्डलिन्या जागरणं, षट्चक्रभेदनम्, ऊर्ध्वाधोगतिश्चापि सर्वं स्वयमेव सानन्दं भवतीति विशेषस्त्रिक योगस्य, तत्रापि खल्वाणवोपायापेक्षया शाक्तशाम्भवयोरुपाययोः कुण्डलिन्याः सर्वमप्येतत् सुखतरया रीत्या सम्भवति।

व्याख्यातमेतद्रहस्तमुत्कष्टतरानुभूतिसम्पन्नैर्योगिवरैः श्रीमद्मृतवाग्भवाचार्यैर्मौखिकेनोपदेशेन।

~त्रिरूपा——शिवात्मिका परा कुण्डलिनी सृष्टिक्रमविकासे त्रिरूपतयाऽऽभासते। यथा—

(1) शक्तिकुण्डलिनी, (2) विश्वकुण्डलिनी चेति। (3) प्राणकुण्डलिनी। यथा—

"कलासप्तदशी तस्मादमृताकाररूपिणी।
"परापरस्वरूपरूपविन्दुगत्या विसर्पिता॥

प्राकाश्यं सर्ववस्तूनां विसर्गरहिता तु सा।
शक्तिकुण्डलिका चैव प्राणकुण्डलिका तथा ॥
विसर्गप्रान्तदेशे तु पराकुण्डलिनीति च।
शिवव्योमेति परमं ब्रह्मात्मस्थानमुच्यते ॥
विसर्गमात्रं नाथस्य सृष्टि-संहार-विभ्रमाः।

(त्रि०शि०मै०उद्धृ०तं०आ० 3, 138तः 149)

त्रिसृणामपि मूलस्रोतोभूता हि परा-कुण्डलिनी। सा च शिवरूपिणी या योगिभिः स्व-स्वरूपप्रवेशे साक्षात्क्रियते।

~परा——जगद्बीजभूता जगत्प्राणभूता च शिवापरपर्याया पराशक्तिरेव मूलतः परा-कुण्डलिनी। सैव वर्णसमूहबीजभूतापि एषा तावदानन्दशक्तिप्रधाना इच्छोन्मेषादिवर्णानां प्रसवभूमिः। यथा—

"सात्र कुडलिनी बीजं जीवभूता चिदात्मिका।
तज्जं ध्रुवेच्छोन्मेषाख्यं त्रिकं वर्णास्ततः पुनः॥"

(तं० आ० 3, 220-21)

संविन्निष्ठत्वात् सर्वव्यवस्थितीनां जीवभूता, न हि संविदमन्तरेण किञ्चिदपि स्फुरेदिति भावः तदुक्तं तन्त्र"

(तन्त्रेति सिद्धयोगीश्वरे मते)—

"या सा कुण्डलिनी सात्र-जगद्योनिः प्रकीर्तिता।
त्रुटिरूपा तु सा ज्ञेया जीवभूता जगत्यपि॥
बीजरूपा समाख्याता चिद्रूपापि प्रकीर्तिता।" इति।

(तं०आ०वि० खं० 2, पृ० 207)

"विसर्गप्रान्तदेशे तु परा कुण्डलिनीति सा।"

(तं० आ० 3-140)

विसर्ग-प्रक्रियायाः प्राग् इति तात्पर्यम्।

"शिवव्योमेति परमं ब्रह्मात्मस्थानमुच्यते।
विसर्गमात्रं नाथस्य सृष्टिसंहारविभ्रमाः॥"

(तं० आ० 3-140, 49)

"शिवव्योमेति या संज्ञा परं ब्रह्मे ति यत् पदम्।"

(तं०आ०वि० खं० 2, पृ० 142)

इयमपि कदाचित् कुण्डलिनी भेदेषु गण्यते। तथा (1) परा कुण्डलिनी (2) शक्तिकुण्डलिनी (3) प्राणकुण्डलिनीति तावदेतदेव भेदत्रयम्। नात्र विश्वकुण्डलिनी गण्यते भेदेषु।

द्र० 'परा कुण्डलिनी' इति।

~प्रणव कलासु——नादान्तादूर्ध्वं व्यापिन्याश्चाधोऽनुसन्धीयमानासौ शक्तिर्या जगतः सृष्टि-संहार-कर्तृतया योगिभिः साक्षात्क्रियते। अस्याः साक्षात्कारे योगी स्वात्मानमेव सृष्टिसंहारकर्तारं स्वसंवेदनेन प्रमाणेन साक्षात्करोति। योगजानुभूत्यनुसारं व्यापिनी नाम या शक्तिरसावेव सृष्टि-संहार-कारिणी सती कुण्डलेति वा कुण्डलीति वा कुण्डलिनीति वोच्यते। समनायाः सकाशात् तृतीयेयं प्रणवकलाऽवरोहक्रमे। यथा—

"क्रोडीकरोति या विश्वं संहृत्य सृजते पुनः।
कुण्डलाख्या महाशक्तिस्तृतीयाप्युपचर्यते॥"

(ने० तं० 21-61)

~(आरोहक्रमे)——शैवयोगाभ्यासवशान्नादान्ते चिद्रूपताया उद्बोधमात्रं जायते या च पुनरुद्बुद्धायाश्चिद्रूपताया उद्दीपनात्मिका स्थितिरसौ कुण्डलिनीशक्तिः। यथा—

"क्षेपस्तु कथितो विन्दुराक्रान्तिर्नाद उच्यते।
चिदुद्बोधः परावस्था दीपनं शक्तिरुच्यते॥"

(त्रि०भै०तं०उद्धृ०तं०आ०वि० खं० 12, पृ० 180)

परावस्थाऽत्र नादात् परा नादान्ताख्या, शक्तिरितिकुण्डलिन्याख्येति।

~प्राणरूपा—(प्राणकुण्डलिनी)——प्राणशक्तिरूपेण जडं शरीरं चेतनसदृशं प्रदर्शयन्ती संविदः प्रथमरूपान्तरात्मिका। अणोर्जीवस्य प्राणशक्तिः। एषैव षट्चक्रभेदिनी गोरक्षानुयायिनां हठयोगिनाम्। क्रियाशक्तिप्रधानैषा। यथा—

"अत एव विसर्गस्य बहिर्भावोन्मुख्यात्मकादिकोटिरूपे प्रान्तदेशे प्राणकुण्डलिका 'प्राक्संवित्प्राणे परिणता' इति नीत्या प्राणरूपतामवभासयन्ती।"

अत्र जीवनव्यापारात्मकं प्राणनमत्र प्राणपदेन ज्ञेयं, न केवलं प्रश्वास निःश्वासावेव।

द्र० 'प्राणकुण्डलिनी' इति।

~योगजानुभूतौ——(1) सामर्थ्यशालिनो गुरोः शक्तिपातवशादपि कुण्डलिनीजागरणमूर्ध्वाधोगतिश्च षट्चक्रमार्गे सम्भवति। शिवजीनामधेयेन सिद्धमानवेन दृष्टिपातमात्रतोऽनुग्रहशक्तिपातं कुर्वताऽऽचार्यामृतवाग्भवमहोदयनां विषये एवं कृतं श्रीनगरे यत्तैः स्वयं वर्णितं संस्कृतश्लोकप्रघट्टकेन।

द्र० सिद्धमानवदर्शनं काव्यम्।

शोध-प्रभा, वर्ष 1987 अंक 8, दिल्ली
(लालबहादुर शास्त्री विद्यापीठ पत्रिका)

(2) कुण्डलिन्या अनुभूतावपूर्वस्यानन्दस्य चमत्कारो विकसति मूलाधारात् सहस्रारं यावत्सुषुम्नामध्ये किमपि तरलतरलं वस्तु सञ्चरदिवोर्ध्वाधो गतिशीलतयाऽनुभूयते। प्राणशक्तेरेवायं सञ्चारो न स्थूलस्य द्रवस्य वा कस्यापि द्रव्यस्येत्युपदिष्टं नो गुरुवरैः। वैद्यकशास्त्रानुसारमपि द्रवपदार्थगतिर्न सम्भवति; सूक्ष्माया नाड्याः सुषिरत्वाभावात्। ततः प्राण शक्तिरेवात्र गतिशीलेति वेद्यम्।

~शक्तिरूपा——परैव शक्तिः प्रसर-सङ्को-चादिरूपतामापद्यमाना सती तदाभासनसामर्थ्यरूपत्वेन शक्तिकुण्डलिनीति गद्यते। इच्छाशक्तिप्रधानैषा। यथा—

"स्वात्ममात्रविश्रान्ता शक्तिकुण्डलिनी, परा सविन्मात्ररूपेति यावत्।"

(तं०आ०वि० खं० 2, पृ० 142)

अत्र प्रसुप्तभुजगाकारस्वरूपं यद्विशेषणं शक्तिकुण्डलिन्याः प्रदत्तं जयरथेन तच्चिन्त्यमेव, तस्य प्राणकुण्डलिन्यामेवोचितत्वान्न शक्तिकुण्डलिन्याम्।

द्र० 'शक्तिकुण्डलिनी' इति।

कुब्जिकामतम्——कोऽपि ग्रन्थविशेषः आगमिकः परात्रीशिकाविवरणे यस्य मतमुद्धृतम् । यथा—

"तथा च श्रीकुब्जिकामते खण्डचक्रविचारे…………।"

(प०त्री०वि० पृ० 184)

कुमारी——(1) सततं क्रीडनशीला (कुमार क्रीडायाम्) परमेश्वरस्य शिवयोगिनश्चेच्छाशक्तिः कुत्सिताया भेदप्रथायाः मारणकर्त्री कु+मारी शिवयोगिन इच्छा । इच्छाशक्तिप्रयोगत एवासौ भेदप्रथां विनाशयति । यथा—

(क) "इच्छाशक्तिरुमा कुमारी"

(शि०सू० 1, 13)

(ख) "सा च कुमारी विश्वसर्गसंहारक्रीडापरा। कुमार क्रीडायामिति पाठात् ।"

(शि०सू०वि० पृ० 14)

(ग) "अथ च—कुं भेदप्रथोत्थापिकां मायाभूमिं मारयति अनुद्भिन्नप्रसरां करोति तच्छीला कुमारी ।"

(शि०सू०वि० पृ० 18)

कुम्भः——यागारम्भे यागमण्डपे ईशानकोणे स्थाप्यो जलौषधिरत्नादिपूरितः कलशः । यथा—

"ततः कुम्भं यदामोदिद्रवद्रव्यप्रपूजितम् ॥ इत्यादि

(तं०आ० 15-379)

तत्रादौ कुम्भमादाय हेमादिमयमव्रणम् ।
सर्व-रत्नौषधीगर्भं गन्धाम्बुपरिपूरितम् ॥
चूतपल्लववक्त्रं च स्रक्सूत्रकृतकण्ठकम् ।
रक्षोघ्न-तिलका-क्रान्तं सितवस्त्रयुगावृतम् ॥
शताष्टोत्तर-संजप्तं मूलमन्त्रप्रपूजितम् ।"

(मा०वि०तं० 8, 101तः 103)

कुलम्——(1) सर्वं जडात्मकं जगत् । यथा—

(क) "कुलं स्थूलसूक्ष्मपर-प्राणेन्द्रिय-भूतादि-समूहात्मतया …………… ।"

(प०त्री०वि० पृ० 32)

(ख) "कौलिकस्य कुलसमूहस्य देहाक्षभुवनादेः अपूर्वं रूपस्य………।"

(प०त्री०ल०वृ० पृ० 2)

(ग) "कुलस्य शाक्तप्रसरात्मनो जगतः ।"

(तं०आ०वि० खं० 2, पृ० 76)

(2) प्रमातृप्रमाणप्रमेय-त्रिकोणमयं विश्वम् । यथा—

(क) "कुलं ग्राह्यग्राहक ग्रहण चक्रम् ।"

(प०त्री०ल०वृ० पृ० 3)

(ख) "कुलस्य देहाक्षभुवनादेर्विश्वविलासस्य ।"

(म०मं०प० पृ० 18)

~**उपासनापक्षे**——शिवशक्त्यात्मकं विश्वम् । तत्रैव हि लभ्या भोगमोक्षात्मिका सिद्धिः । यथा—

"कुले शिवशक्त्यात्मनि सन्निहितेऽपि सिद्धिरुक्तनयेन जीवन्मुक्ततामयी समभिलषिताणिमादिप्रसवपदं, तां सद्यः अनाकलितमेव भावनाकरणादि-रहितत्वेनैव ददाति ।"

(प०त्री०वि० पृ० 36-37)

~**उपास्यत्वे**——षट्त्रिंशत्तत्त्वसमूहतयावभासमाना पारमेश्वरी शक्तिः । यथा—

"पूर्णतैवास्य शक्तिः—कुलं सामर्थ्यं सार…………… ………………………इत्यादिभिरागमभाषाभिस्तत्तदन्वर्थप्रवृत्ताभिरभिधीयते ।"

(तं०सा० पृ० 27, 28)

~**कौले**——मन्त्रौघः, सिद्धौघः, प्राणपञ्चकम् संवित् प्रपञ्चः, करणानीति सर्वं कुलमिति कथ्यते । यथा—

"मन्त्र-सिद्ध-प्राण-संवित्करणात्मनि या कुले ॥"

(तं०आ० 29-46)

~**दर्शनसिद्धान्ते**——परमेश्वरस्य परमेश्वरतात्मिका शक्तिः स्वातन्त्र्याद्यपरनाम्नी कुलमित्युच्यते । यथा—

"कुलं च परमेशस्य शक्तिः सामर्थ्यमूर्ध्वता ।
स्वातन्त्र्यमोजो वीर्यं च पिण्डः संविच्छरीरकम् ॥"

(तं०आ० 29-4)

"उर्ध्वेति सर्वेषां कारणतयोपरिवर्तित्वम् ।"

(तं०आ०वि० खं० 11/2, पृ० 3)

"लयोदयश्चित्स्वरूपस्तेन तत् कुलमुच्यते ।"

(उद्ध० तदेव, पृ० 4)

"शक्तिगोचरगं वीर्यं तत्कुलं विद्धि सर्वगम् ।"

(उद्ध० तदेव पृ० 4)

~**साधना क्रमे**——(3) दक्षिणाचारादुत्कृष्टो मताचारत्रिकाचाराभ्यां चावरो योगादिसाधनामार्गः । यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥"

(उद्ध० प०त्री०वि० पृ० 92)

कुलकालीविधिः——किमपि शास्त्रं समुद्धृतं यन्मतं तन्त्रालोके । यथा—

"कुलकालीविधौ चोक्तं……… …।"

(तं०आ० 13-306)

कुलकुण्डलिका——मध्या प्राणशक्तिः । यथा—

"कुलकुण्डलिकाम्-मध्यप्राणशक्तिम् ।"

(तं०आ०वि० खं० 12, पृ० 320)

कुल कौले——कुलाचारे कौलाचारे च परस्परमस्ति कश्चन विशेषो यो ग्रन्थेषु न स्पष्टतां नीतः । परमुभयोः पृथक् पृथङ् नामोल्लेखः पारस्परिकं विशेषं सूचयति । यथा—

"क्रमिकः शक्तिपातश्च सिद्धान्ते वामके ततः।
दक्षे मते कुले कौले षडर्धे हृदये ततः।"
(तं०आ० 13-300, 301)
"तन्न सैद्धान्तिको वामे नासौ दक्षे स नो मते।
कुलकौले त्रिके नासौ पूर्वः पूर्वः परत्र तु॥"
(तं०आ० 13-320, 21)

अस्मन्मते तु—

कुलसाधनाया असौ प्रक्रिया कौलमित्यभिधीयते स्म यत्र वाम दक्षिणावाचारावेकत्र मिलितौ सन्तौ सद्यः परशिवत्वसाक्षात्कारप्रदौ भवतः। सङ्केतितं हि तथा—

"उक्तं श्रीरत्नमालायामेतच्च परमेष्ठिना।
अशेषतन्त्रसारं तु वामदक्षिणमाश्रितम्।
एकत्र मिलितं कौलं श्री-षडर्धकशासने॥"
(तं०आ० 37-25, 26)

तच्च कौलं त्रिकाचारीयस्य रहस्यसाधनाक्रमस्यातीव समीपस्थमित्यप्यनेन सूच्यते। तत एवाभिनवगुप्तोत्पलदेव-सोमानन्द-भट्टकल्लटप्रभृतयोऽपि कौलसाधनायां रुचिमन्तोऽभूवन्।

कुलक्रमोदयः——कौलिक आगम विशेषः। यथा—
"तदुक्तं कुलक्रमोदये—"
(तं०आ०वि० खं० 11/2, पृ० 44)

कुलक्रीडावतारः——कौलिक आगमविशेषः। उद्धृतमेतस्य मतं तन्त्रालोकविवेके विस्तरतः कौलयागप्रकरणे।
द्र० (तं०आ०वि० खं० 11/2, पृ० 28-29)

कुलगह्वरम्——किमपि कौलिकमागमशास्त्रपुस्तकं यस्य वाक्यानि तन्त्रालोकादौ बहुधा समुद्धृतानि। यथा—
(तं०आ० 3-146तः 148, 168, 169; 16-182, 24-13तः 16)
(तं०आ०वि० खं० 2, पृ० 148, 149, 167, 168, खं० 3-267, खं० 11, पृ० 89, 90; म०मं०प० पृ० 165)

~निर्वचनतः——य यथा—
"अन्वर्थाभिधानके। यदुक्तं तत्र—
कुलं शक्तिः समाख्याता गह्वरं शक्तिमानिति।
उभयोर्वेदनैकत्वं कथ्यते कुलगह्वरम्॥"
(उद्ध० तं०आ०वि० खं० 2, पृ० 167)

कुलचूडामणिः——कुलप्रक्रियासाधनाग्रन्थः।
(द्र०शि०सू०वि० पृ० 29)

कुलनायिका~मूलतः——अनुत्तरस्य नाथस्य कौलिकी शक्तिः। सा च विसर्गरूपतामापन्ना सती कुलसृष्टिकारिणी भवति। कुलं च वर्णसमूहस्तत्स्वजातं चेति। यथा—

"कुलनायिकेति कौलिकी शक्तिः।"
(तं०आ०वि० खं० 3, पृ० 72)
"विसर्गस्तस्य नाथस्य कौलिकी शक्तिरुच्यते॥"
(तं०आ० 3·143)

~साधक निष्ठा——शरीरप्राणसुखादिवर्गरूपस्य कुलस्य नायिका, स्फुरत्तादायिनी प्राणनक्रियात्मिका शक्तिः। यथा—

(क) "कुलस्य नायिका शरीरप्राणसुखादेः स्फुरत्तादायिनी ब्राह्म्यादिदेवताचक्रस्य वीर्यभूता निखिलाक्षनाडीचक्रस्य मध्य-मध्यमरूपा जननस्थानकर्णिकालिङ्गात्मा अस्ति।"
(प०त्री०वि० पृ० 61)

सैवप्राणकुण्डलिनीति बोध्या।

(ख) "कौलिकी देहादिव्याप्त्री कुलनायिका कुलस्य देहस्य नायिका चिदैकात्म्योपपादिका।"
(प०त्री०वि०वृ० पृ० 3)

प्राणनक्रियाशक्तिरेव हि तथाऽऽभाति।

(ग) "तस्य निर्मितस्य कुलस्य नायिका सा अधिष्ठात्री,
तद्वेदनेन तदवभासनकर्त्री च तत्स्वरूपसंहर्त्री च।"
(प०त्री०ल०वृ० पृ० 3)

कुलपञ्चाशिका——कुलप्रक्रियाग्रन्थः कोऽपि।
द्र० (शि०सू०वि० पृ० 54)

यथा—
"यन्नास्ति सर्वलोकस्य तदस्तीति विरुध्यते।
निगद्यते यदा देवि हृदये न प्ररोहति॥
एतस्मात्कारणाद्देवि देवताभिः प्रगोपितम्।
तेन सिद्धेन देवेशि किं न सिद्ध्यति भूतले॥"
(ने०तं०उ० खं० 1, पृ० 191)

कुलपर्वाणि——(1) माहेश्वर्यादि-योगेश्यन्तानामष्टानां मातॄणां पूजने नियतानि पर्वाण्यष्टौ। एकैकस्या तिथिद्वयं पर्व। ततः कुलपर्वतिथयः षोडश। अष्टमी तिथिस्तत्र चामुण्डाया अपि योगेश्या अपि पर्व। तत्र माहेश्वर्याः 14शी सप्तमी च, ब्राह्म्याः प्रतिपदा पूर्णिमा च, कौमार्याः षष्ठी तृतीया च, वैष्णव्याश्चतुर्थी द्वादशी च, ऐन्द्र्याः पञ्चमी त्रयोदशी च, वाराह्याः नवम्येकादशी च, चामुण्डाया अष्टमी द्वितीया च, योगेश्या दशम्यष्टमी चेति। यथा—

"अक्षीन्दुमुनिरित्येतन्माहेश्याः ब्रह्मसन्ततेः।
प्रतिपत्पञ्चदश्यौ द्वे कौमार्याः रसवह्नियुक्॥
अब्धिरक्षीन्दु-वैष्णव्या ऐन्द्र्यांस्वस्त्रं त्रयोदशी।
वराह्या रन्ध्ररुद्रौ द्वे चण्ड्या वस्वक्षियुग्मकम्॥
द्वे द्वे तिथी तु सर्वासां योगेश्या दशमी पुनः।
तस्या अप्यष्टमी यस्माद् द्वितिथिः सा प्रकीर्तिता॥"
(तं०आ० 28-11तः 13)

(2) माघ शुक्लपूर्णिमा । यथा —
"माघशुक्लान्त्यदिवसः कुलपर्वेति तन्मतम् ॥"
(तं०आ० 28-124)

कुलपुत्तलिका— प्रक्षुब्धानां बीजयोनीनां साङ्कर्यस्य बहुप्रकारतायां केषुचिच्छास्त्रेषु विशेषक्रमान्तरावस्थिता वर्णाली कुलपुत्तलिकेत्यादिभिर्नामभिरभिधीयते नादिफान्ता मालिनी । यथा—
"अतः शास्त्रेषु बहुधा कुलपुत्तलिकादितिः ॥
भेदैर्गीता हि मुख्येयं नादिफान्तेति मालिनी ।"
(तं०आ० 15-129, 30)

कुलपूर्णिमा——कुलपर्वदिनमेव कुलपूर्णिमा । यथा—
"पूर्णत्वं तत्र चन्द्रस्य सा तिथिः कुलपूर्णिमा ।"
(तं०आ० 28-125)

कुलप्रक्रिया——कुलाचाराख्यः साधनाक्रमः । स हि पञ्चमकारोपयोगबहुलो वीरसाधकोचितः सद्यो भुक्तिमुक्तिप्रदः साधनाक्रमः कुल-गह्वर-कुल-चूडामणि-कुलार्णवकुलरत्नमालाद्यागमेषूपदिष्टस्तन्त्रालोके च तदीयमुत्कृष्टतरं स्वरूपं प्रतिपादितं विस्तरत एकोनत्रिंश आह्निके ।

~माहात्म्यतः——(1) उक्तमत्र विषये स्पष्टम्—
"सिद्धक्रमनियुक्तस्य मासेनैकेन यद् भवेत् ।
न तद्वर्षसहस्रैः स्यान्मन्त्रौघैर्विविधैरिति ॥"
(तं०आ० 20-3)

"सिद्धानां कृतयुगादिक्रमेणावतीर्णानां श्रीखगेन्द्रनाथादीनां तत् परम्परागतायां कुलप्रक्रियायामित्यर्थः ।"
(तं०आ०वि० खं० 11/2, पृ० 2, 3)

"सिद्धान्तादिषु तन्त्रेषु ये मन्त्रा समुदाहृताः ।
वीर्यहीनास्तु ते सर्वे शक्ति तेजोज्झिता यतः ॥
कौलिकास्तु महामन्त्राः स्वभावाद्दीप्ततेजसः ।
स्फुरन्ति दिव्यतेजस्काः सद्यः प्रत्ययकारकाः ॥"
(उद्ध०तं०आ०वि० खं० 11/2, पृ० 3)

(2) मतत्रिकप्रक्रिये विहाय अन्याः सर्वा अपि साधन-प्रक्रिया अतिशेते । यथा—

(क) "नभः स्थिता यथा तारा न भ्राजन्ते रवौ स्थिते ।
एवं सिद्धान्त-तन्त्राणि न विभान्ति कुलागमे ॥
तस्मात्कुलादृतेनान्यत्संसारोद्धरणं प्रति । इति"
(उद्ध० तं०आ०वि० खं० 1, पृ० 24)

(ख) "वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम् ।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम् ॥"
(प०त्री०वि० पृ 92)

कुलम्——(1) सदाशिवादि-धरण्यन्त-तत्त्वकुल-रूपत्वेनावस्थानात् कुलं शक्तिः ।
द्र० 'कुलगह्वरम्~नामनिर्वचनतः' इति ।

(2) सदाशिवादिधरान्तं सृष्टं जगत् । यथा—
कुलस्य शाक्तप्रसरात्मनो जगतः ।
(तं०आ०वि० खं० 2, पृ० 76)

कुलमूलम्~उच्चारयोगे——खदशके तृतीयं खम् । प्राणशक्तेः प्रभवस्थानम् । यथा —
कुलमूलम्-प्राण शक्तेः प्रभवस्थानम्, जन्माधारः ।
(तं०आ०वि० खं० 3, पृ० 404)

कुलमूलावतारः——कुलाचारपरं किमपि दर्शनशास्त्रम्, महार्थमञ्जरीपरिमले कृतपंक्तिसमुद्धरणम् । तथा—
"यथा श्रीकुलमूलावतारे—
अनादिनिधनाच्छान्ताच्छिवात् परमकारणात् ।
इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं ततः क्रिया ॥
इत्यारभ्य,
तयोत्पन्नानि भूतानि भुवनानि चतुर्दश ।
वाङ्मयं चैव यत्किञ्चित् तत्सर्वं मातकोद्भवम् ॥
इत्यन्तम् ।"
(म०मं०प० पृ० 39)

कुलयागः——सर्वं शिवशक्तिरूपमेवेति निश्चयनिरूढ्यर्थं मनोवाक्कायद्वारा यद्यत् क्रियते तत् तद्यागरूपतया भाव्यमानं सत् सर्वं कुलयाग इति प्रोच्यते कौलिकैः साधकैः । यथा—
"तादृग्रूपनिरूढ्यर्थं मनोवाक्कायवर्त्मना ।
यद्यत्समाचरेद्वीरः कुलयागः स सस्मृतः ॥"
(तं०आ० 29-6)

~तदाधाराः——आधारपदेनात्रोक्तानि कुलयागस्यालम्बनानि यजनीयानि । यथा खलु वेदिराधारो भवति वैदिकस्य यागस्य तथैव भावनाभ्यासप्रधाने कुलयागे केऽपि पदार्थाः आधारतया गृह्यन्ते । ते च पदार्थाः—

(1) बाह्यालम्बनं स्थण्डिलपटतूरादिकम् ।
(2) निजशक्तित्वेन भाविता पुरःस्थिता स्त्री ।
(3) सेव मिथुनीभूता सती ।
(4) निजो देहः ।
(5) देहान्तःस्था प्राणापानयोः सरणिः ।
(6) बुद्धितत्त्वं वा निजमन्तः करणम् इति ।

एतान्येवालम्बनानि कुलयागे । यथोक्तम्—

(क) "एवमुक्तसतत्त्वश्चायं यागः किमाधार इत्याशङ्क्य आह ।"
(तं०आ०वि० खं० 11/2, पृ० 5)

(ख) "बहिः शक्तौ यामले च देहे प्राणपथे मतौ ।
इति षोढा कुलेज्या स्यात् प्रतिभेदं विभेदिनी ॥"
(तं०आ० 29-7)

(ग) "यामल इति आद्ययागादिरूढे मिथुने। प्राणपथे इति मध्यनाड्याम्। मताविति बुद्धौ।"

(तं०आ०वि० खं० 11/2, पृ० 5)

(घ) "तदनया स्थित्या कुलयागः। स च षोढा-बाह्ये, शक्तौ, स्वदेहे, यामले, प्राणे, संविदि चेति। तत्र चोत्तरोत्तराः उत्कृष्टाः पूर्वः पूर्वस्तद्रुच्यर्थम्। सिद्धिकामस्य द्वितीयतुर्यपञ्चमाः सर्वथा निर्वर्त्याः, षष्ठस्तु मुमुक्षोर्मुख्यः, तस्यापि द्वितीयाद्या नैमित्तिके यथासम्भवमनुष्ठेया एव विधिपूर्णार्थं च।"

(तं०सा० पृ० 198)

कुलयुक्तिः——किमपि कौलमतानुसारि पुस्तकमागमिकमुद्धरणतो विदितम्—यथा—

"तदुक्तं श्रीकुलयुक्तौ—
आत्मा चैवात्मना ज्ञातो यदा भवति साधकैः।
तदा विस्मयमात्मा वै आत्मन्येव प्रपश्यति॥"

(शि०सू०वि० पृ० 13)

"कुलयुक्तौ च—
प्राणिनां पतनं येन तेनैवोत्पतनं स्मृतम्।
अज्ञस्तु बद्धयते येन ज्ञाता तेनैव मुच्यते॥" इति॥

(स्पं०प्र० पृ० 5)

"उक्तं च कुलयुक्तौ—
वेदान्ते वैष्णवे शैवे सौरे बौद्धेऽन्यतोऽपि च।
एक एव परः स्वात्मा ज्ञाता ज्ञेयं महेश्वरि॥ इति॥"

(स्पं०प्र० पृ० 11)

कुलरत्नमाला——आगमिकः कोऽपि कौलसाधनापरो ग्रन्थो यस्य पंक्तयः समुद्धृता जयरथेन। यदुक्तम्—

"तथा च श्रीकुलरत्नमालायाम्—
'तत्त्वाख्यानं प्रवक्ष्यामि यथा ज्ञास्यसि सुव्रते।
इत्यारभ्य ……………………………… ………
……………………………………………… ………
कौलिको यो न जानाति कथं दीक्षां तु कारयेत्'॥"

(तं०आ०वि० खं० 7/2, पृ० 20)

"तदुक्तं श्री कुलरत्नमालायाम्—
'यदा गुरुवरः सम्यक् कथयेत्तन्न संशयः।
मुक्तस्तेनैव कालेन यन्त्रं तिष्ठति केवलम्॥
किं पुनश्चैकतानस्तु परे ब्रह्मणि यः सुधीः।
क्षणमात्रस्थितो योगी स मुक्तो मोचयेत् प्रजाः'॥"

(शि०सू० पृ० 66)

अयमेवागमो बहुश. उदाहृतस्तन्त्रालोके केवलं 'रत्नमालायाम्' इत्यनेन पदप्रयोगेण। ततस्तत्र तत्र रत्नमालापदेन कुलरत्नमालैवाभिप्रेतेति प्रतिभाति।

द्र० 'रत्नमाला' इति।

कुलरत्नमालिका——कुलरत्नमालैव।
"यथोक्तं कुलरत्नमालिकायां साहस्रिकायाम्—"

(प०त्रा०वि० पृ० 163)

कुलसारः——कौलसम्प्रदायशास्त्रं किमपि। यथा—

"कुलसारेऽपि—
अहो तत्त्वस्य माहात्म्यं ज्ञातमात्रस्य सुन्दरि।
श्रोत्रान्तरं तु सम्प्राप्ते तत् क्षणादेव मुच्यते॥"

(शि०सू०वि० पृ० 67)

कुलाचारः——दूतीयाग - कुलचक्रपूजादि - रहस्यचर्यामयः पंचमकार-प्रयोगबहुलः कश्चन कतिपयमहाधिकारिजनयोग्यः तान्त्रिकोऽसौ साधनाप्रकारो येन सममेव भुक्तिमुक्ती सुलभे भवतः सत्वरम्। अति रहस्यमयोऽयमाचारो न क्वापि सुस्पष्टं प्रतिपादितः। तथैव प्रतिपादितो यथा तदुपासनमार्गे प्राप्तदीक्षैरेव स्पष्टं वेद्यते नान्यैः। ततोऽत्र स्वमत्या किमपि व्याख्यानं कर्तुं नैव न्याय्यम्।

कुलावेशः——शक्तिसङ्गमाभ्यासं विनैव भावनाभ्यासमात्रेण शाक्तक्षोभवशावेशः। यथा—

"कुलावेशे इति बाह्यशक्त्यभावेऽपि कुलस्य शाक्तस्य स्वरूपस्य आवेशे स्मरणपुरः सरं भावनातिशयात् तन्मयीभावे इत्यर्थः। तदुक्तम्—
'लेहनामन्थनाकोटैः स्त्रीसुखस्य भरात् स्मृतेः।
शक्त्यभावेऽपि देवेशि भवेदानन्दसम्प्लवः'॥"

(वि०भै०उद्धृ०तं०आ०वि० खं० 3, पृ० 378)

कुलेश्वरः——विसिसृक्षात्मकेच्छयाविष्टोऽनुत्तरः शिवः। स एव 'अं' इति बिन्दुरूपतामापन्नोऽनुत्तरः। "बिन्दुरिच्छुः" इत्युक्तः पाणिनीये व्याकरणे। तथैवोक्तम्—

(क) "अत्र प्रकाशमात्रं यत्स्थितं धामत्रये सति॥
उक्तं बिन्दुतया शास्त्रे शिवबिन्दुरसौ मतः।"

(तं०आ० 3, 133-34)

बिन्दुरयं न विन्दुरति स्मर्तव्यम्।

(ख) "इत्येवमेष भगवाननुत्तर एव कुलेश्वर-रूपः।"

(तं०सा० पृ० 16)

द्र० 'बिन्दु' इति।
द्र० 'कुलेश्वरी' इति।

कुलेश्वरी——अनुत्तरस्य कुलेश्वरस्य स्वभावभूता विसिसृक्षा विकासोन्मुखी सती कुलेश्वरी या कौलिकी शक्तिरित्युच्यते। सा एव 'अः' इति। यथा—

"अस्यान्तर्विसिसृक्षासौ या प्रोक्ता कौलिकी परा।
सैव क्षोभवशादेति विसर्गात्मकतां ध्रुवम्॥"

(तं०आ० 3, 136-37)

~दार्शनिकदृष्ट्या——अनुस्वारविसर्गरूपं हि मातृकाद्वयम् । तन्त्रालोके (5-67) इत्यत्र विमर्शमात्रस्यैव कुलनायिकात्वमुक्तम्, अग्रे पुनरनुस्वारस्यापि, यतोऽनुस्वार एवाग्रे स्फुरन् विसर्गतामेति । वस्तुतो हि कुलेश्वर्याः क्रमिको विकास एवानुस्वारविसर्गौ । यथा—

"अं अ इति कुलेश्वर्या सहितो हि कुलेशिता ।"

(तं०आ० 5-68)

~यागविधौ——मन्त्रौघादेः कुलस्येश्वरी प्रभ्वी चक्रयागे । वस्तुतस्तत्र प्रधानतया पूज्या चितिरेव कुलेश्वरी । यथा—

"मन्त्रसिद्धप्राणसंवित्-करणात्मनि या कुले ॥
चक्रात्मके चितिः प्रभ्वी प्रोक्ता सेह कुलेश्वरी ।"

(तं०आ० 29-46, 47)

सा च मातृसद्भावरूपिणी परा काली देवी । यथा—

"सा मध्ये श्रीपरा देवी मातृसद्भावरूपिणी ॥
पूज्याथ तत्समारोपादपराथ परापरा ।
एकवीरा च सा पूज्या यदि वा सकुलेश्वरा ॥"

(तं०आ० 29-47, 49)

पक्षद्वयस्य निर्देशोऽत्रावधानविषयतां नेयः ।

~यागमण्डले——त्रित्रिशूलाख्यस्य मण्डलस्य मध्यं हि तस्याः स्थानं यत्रासौ पूज्यते स्म । यथा —

"मध्यत इति कुलेश्वरीस्थाने ।"

(तं०आ०वि० खं० 12, पृ० 250)

कुहनप्रयोगः——कक्षाद्यङ्गविशेषेषु प्रस्पन्दमाननखादिस्पर्श विशेषतः समभिव्यज्यमानस्य हासबहुलस्य आनन्दस्याभ्यासः । हिन्दी भाषायां गुद्गुदीति, काश्मीर भाषायां 'कंत कंत' इति । यथा—

"शाक्ते क्षोभे कुलावेशे सर्वनाड्यग्रगोचरे ।
व्याप्तौ सर्वात्मसंकोचे हृदयं प्रविशेत् सुधीः ॥"

(तं०आ० 5-71)

"यत्र कक्षादाविवाङ्गुलीभिर्मृदु प्रचोदनेन महानानन्दो जायते । यदुक्तम्—

'कुहनेन प्रयोगेन सद्य एव मृगेक्षणे ।
समुदेति महानन्दो येन तत्त्वं विभाव्यते' ॥"

(वि०भै०उद्ध०तं०आ०वि० खं० 3, पृ० 379)

शिवोपाध्यायेन तन्त्रालोकविवेकवाक्यमविमृश्यैव स्वकल्पनयाऽस्यैन्द्रजालिकाविकृतमायाप्रयोग इति या व्याख्या कृता नासौ मनः—सन्तोषदायिनीति विचार्यं सुधीभिः ।

कुलसूत्रम्——किमपि सूत्रात्मकं कौलिकं शास्त्रपुस्तकम् । यथा—

"तथा च कुलसूत्रेषु उक्तम्—

कुलपीठक्षेत्रादिवर्णपञ्चपिण्डप्रणवव्यपदेश्यमखिलाभासकरूपाया अहंभावाभिमतसंविदः समाश्रयभूतमात्मायतनं शरीरम् । इति ।"

(म०प्र०वि० पृ० 60)

कूटं~बीजम्——क्षकारः । यथा—

'कूटं क्ष ।'

(तं०आ० खं० 11/2, पृ० 137)
(तदेव खं० 12, पृ० 203)

कूटस्थ-नित्यम्——व्यवहारे उत्पत्तिविनाशरहितम् आकाशादि ।

तेननैतत् कूटस्थनित्यम्, अपि तु परिणामिनित्यम् ।

(तं०आ०वि० खं० 6, पृ० 227)

कृतान्ततान्तिशान्तिस्तवः——भट्टरम्यदेवस्य कृतिः कापि । यथा—

"तदुक्तं मया कृतान्ततान्तिशान्तिस्तवे—
मायेयं बहुरूपतामुपगता नाना यथा ते विभो
विद्याप्येवमनन्तभेदगहना नो चेत्कथं स्यादिदम् ।
नैःस्वाभाव्यगमेन केचन परे वैविक्त्यतः केऽपि वा
सार्वात्म्येन परे तदुत्तरदृशा मुक्ताः परे सर्वतः ॥ इति ।"

(भा०वि०, पृ० 41)

कृत्यपञ्चकम्——शिवेन क्रियमाणानि पारमेश्वराणि पञ्चकृत्यानि । तानि च—सृष्टिः, स्थितिः, संहारः पिधानम्, अनुग्रहश्चेति । यथा—

"सृष्टिसंहारकर्तारं विलयस्थितिकारकम् ।
अनुग्रहकरं देवंप्रणतार्तिविनाशनम् ॥
मुदितं भैरवं दृष्ट्वा………………।"

(स्व० तं० 1, 3)

~व्यवहारे——लौकिकः प्रमाता भावं जिज्ञासते, ततोऽनुभवति, ततो विकल्पयति, ततो ज्ञाततया निराकांक्षो भवति । तदेवमेव व्यवहारजातं साधकः सिसृक्षा-सृष्टि-स्थिति-संहृति-विश्रान्तिरूपतया भावयन् कृतकृत्यो भवति स्वात्मशिवतानुभूत्या । यथा—

"तत उद्योगसक्तेन स-द्वादशकलात्मना ।
सूर्येणाभासयेद् भावं पूरयेदथ चर्चयेत् ॥"

(तं० आ० 5-63, 64)

"यः कश्चनार्थक्रियार्थी हि प्रमाता प्रमाणोपारूढमेवार्थजातं प्रथममालोचयेद्, अनन्तरम् इदमित्थमिति विकल्पयेत्, तदनु "ज्ञातोऽयं मयार्थः" इति संतोषाभिमानाद् बहीरूपताविलापनेन स्वात्मन्येव विश्रमयेत् इत्यनुभवसाङ्गिकोऽयमर्थः ।"

(तं०आ०वि० खं० 3, पृ० 368, 369)

उपायविशेषोऽयमात्मसाक्षात्कारस्य ।

कृत्या——अनिष्टकारिणी प्राणिविशेषा देवयोनौ।

"शत्रुनाशाय स्त्रीकलेवरप्रवेशिता वेताली कृत्या।"

(ने०तं०उ० खं० 2, पृ० 73)

कृशपूर्णा~देवी——द्र० पूर्णकृशा देवी इति।

कृशा~देवी——(1) प्रमेयभूतभावराशि-रेचन-परत्वेन ज्ञेयं भावराशिं स्वस्माद् भिन्नमवभासयन्ती ज्ञानशक्तिः। भावराशीश्चाभासनेन ज्ञानरूपतायां सञ्जिहीर्षुर्देवी। एषैवागमिकपरिभाषाया सूर्यरूपिणीति कथ्यते। कृशेत्यप्यागमिकी संज्ञास्याः। यथा—

"द्वितीया तु तत्स्वरूपभावराशिरेचनानुप्रवेशोद्रिक्ता तद्रेचनादेव कृशा भावमण्डलप्रकाशनप्रसारणव्यापारा सूर्यरूपा स्वरूपभूता कुलसंवित् संजिहीर्षात्मिका महासंहारशक्तिर्ज्ञानाख्या।"

(प०त्री०वि० पृ० 169)

(2) विश्वं बहिः सृजन्ती सती तद्रिक्तेव भान्ती पराशक्तिः कृशेति भाव्यते।

"एषैव (शक्तिः) विश्वगतसृष्टिसंहारोपचारात् कृशपूर्णोभयरूपापि एकैव सर्वरहस्यनयेषु गीयते।"

(प०सा०वि० पृ० 42)

~पराशक्तिः——पराशक्तिर्विश्वोत्तीर्णसंविन्मात्रतास्थितौ।

"अन्तः शून्यो बहिरपि घटः शून्य एवाम्बरान्तः
अन्तः पूर्णो बहिरपि तथा पूर्ण एवार्णवेऽस्ति।
एवं मातस्त्व-सि सततं शून्यपूर्णस्वरूपा
तत्त्वोत्तीर्णाऽप्यहमनुभवा तत्स्वरूपा त्वमेव॥"

(मं० स्तो० 65)

~शाक्तदृष्टौ——(3) द्वैतात्मकप्रतिपक्षादुत्तीर्णा शुद्धा विश्वोत्तीर्णा संविद्देवी। यथा—

"कृशा यानपरा देवी ……………………।'

इत्यागमगत्या एकैव परं सर्वात्मना कृशा देवी राजते अपाकृतद्वैताख्यप्रतिपक्षा द्योतते।"

(म०प्र०वि० पृ० 6)

अभिप्रायद्वयमाश्रित्य द्विविधतया भाव्यते कृशा देवीति वेद्यं सुधीभिरिति नात्र विरोधः शङ्कनीयः।

केयूरवती——कालीनये शिवानन्दनाथस्य शिष्या। गोविन्दराजोऽस्याः शिष्यः। उत्तरपीठस्यैका पीठेश्वरीयम्। यथा—

"गोविन्दराजाभिधानः…………………………… …
……… …………………… …पीठेश्वरीभ्यः · ………
शिवानन्दनाथाल्लब्धानुग्रहाभ्यः श्रीकेयूरवती-श्रीमदनिका-श्री
कल्याणिकाभ्यः…… · …………………… ………
प्राप्तवन्तः।"

(क्र०के०उद्धृ०तं०आ०वि० खं० 3, पृ० 192)

केवलिनौ——प्रलयाकलविज्ञानाकलौ।

द्र० अकलौ इति।

कैवल्यम्~सामान्यतः——मोक्षस्य नामान्तरम्।

~निर्वचनतः——केवलस्य भावः कैवल्यम्। प्रारब्धान्ते विवेकवतः पुरुषस्य विवेकबुद्धिः तं त्यक्त्वा करणवर्गेण साकं यदा मूलप्रकृतौ लयं याति, तदा पुरुषो लिङ्गशरीरहीनः सुचिरं सहचारिण्या बुद्ध्या त्यक्तः सन् केवलस्तिष्ठति। तस्यासौ स्थितिरेव केवलस्य भावः इति निर्वचनतः कैवल्यात्मकः सांख्ययोगशास्त्रसम्मतो मोक्षः। मूलतोऽयं शब्दस्तथाविधे सुषुप्तिदशा-विशेषमये क्लेशप्रशममात्रे एव प्रयुक्तः सन् प्रतिभाति। अनन्तरं चार्थपरिवृत्तिनियमानुसारं परस्या अपि मुक्तेर्नामान्तरतया प्रयुक्तो गुरुभिरिति प्रतीयते।

~विवेकतः——भेदवादिनां शैवानां विज्ञानाकलताप्राया स्थितिः। मोक्षाभासोऽयं त्रिकशास्त्रदृष्ट्या। यथा—

"कैवल्यं शुद्धविज्ञानकेवलित्वं, यद् भेदवादिशैवानां परं पदं प्राप्यम्।"

(स्व०तं०उ० प० 6, पृ० 143)

"ते च सांख्यपुरुषप्राया विज्ञानाकला उच्यन्ते।"

(ई०प्र० वृ० 3-18)

कोमलवल्लीस्तवः——महेश्वरानन्दकृतः कश्चन देवीस्तवः। यथा—

यदुक्तं मयैव श्रीकोमलवल्लीस्तवे—

"ज्ञातमेकमवमुच्य चेतसो भावमन्यमवगाढुमिच्छतः।
अन्तरालभुवमम्ब लम्बिनीमामनन्ति तव तत्त्वमद्वयम्॥"

(म०म०प० पृ० 50)

द्र० च (तदेव पृ० 19, 71, 76, 86, 112, 118) इति।

कौण्डिली~प्राणयोगे——शक्तिद्वादशान्तः। यथा—

"कन्दहृत्कण्ठताल्वग्रकौण्डिली-द्वादशान्ततः।"

(तं० आ० 5-145)

"कौण्डिली शक्ति-द्वादशान्तः।"

(तं०आ०वि० खं० 3, पृ० 460)

प्राणवकला या कौण्डलीति सात्वन्या योगसाधनाभूमिः। कोऽयं शक्तिद्वादशान्तः इति न स्पष्टीकृतं टीकायाम्।

कौलम्——सद्यः फलप्रदो भोगमोक्षोपायक्रमविशेषः।

~कुलाद् भिन्नम्——साधनप्रक्रिया द्वयमिदम् कुलं कौलं चेति। परमेनयोः पारस्परिको भेदो न स्पष्टीकृत आचार्यैः। कुलयागादितान्त्रिकविधिप्रधानस्तावत् कुलसाधनाक्रमः स्फुट एव। परं कौलस्य ततः को विशेष इति न स्पष्टमुक्तं क्वापि। तन्त्रालोके रत्नमालाग्रन्थोद्धरणपूर्वकमेतावन्मात्रमेवोक्तं यद्वामदक्षिणाचारद्वयं यदा त्रिके एकत्र मिलितं भवति तदा त्रिकमेव कौलमित्युच्यते इति। यथा—

"अशेषतन्त्रसारं तु वामदक्षिणमाश्रितम् ।
एकत्र मिलितं कौलं श्रीषडर्धकशासने ।।"

(तं० आ० 37-26)

भेदश्चानयोर्ध्वनितोऽनेकदा । यथा—

"क्रमिकः शक्तिपातश्च सिद्धान्ते वामके ततः ।
दक्षे मते कुले कौले षडर्धे हृदये ततः ।।
उल्लङ्घनवशाद्वापि झटित्य क्रममेव वा ।"

(तं० आ० 8-300, 301)

"वेदाच्छैवं ततो वामं ततो दक्षं ततो मतम् ।
ततः कुलं ततः कौलं त्रिकं सर्वोत्तमं परम् ।।"

(तं०आ०वि० खं० 8, पृ० 181)

~तत्त्वम् ——(1) सदाशिवादितत्त्वात्मनि कुले व्यापकत्वेन स्थितं परसंविदात्मकं परमार्थिकं तत्त्वम् । यथा—

"कुले भवमकुलात्म कौलम्" ।

(तं०आ०वि० खं० 2, पृ० 76)

~विस्तरतः——(2) न केवलं विश्वोत्तीर्णं न चापि केवलं विश्वमयम्, अपितूभयप्रकाशनकरं समरसीभूतं परशिवात्मकं तत्त्वम् । यथा—

"नो शान्तं नाप्युदितं शान्तोदितसूतिकारणं परं कौलम् ।"

(तं०आ० 29-117)

"परं कौलमिति शान्तोदितादिशब्दव्यपदेश्यत्वायोगादतीव रहस्यरूपमित्यर्थः । अथ च क्षेपस्यासम्पत्तेर्न शान्तं स्वरूपविश्रान्त्या च नोदितं किन्तु एतदवस्थाद्वयहेतुभूतमनवच्छिन्नसंविन्मात्रसतत्त्वमित्यर्थः ।"

(तं०आ०वि० खं० 11/2, पृ० 84)

कौलयागः— —कुलाचारानुसारं तान्त्रिकमण्डलान्तर्विधीयमानः आगमिको यागो यो भुक्तिमुक्तिफलप्रदः ।

~अद्वयप्रधानः——अद्वय-भावनाप्रधानोऽयं यागः । यथा—

"यत्किञ्चिदथवा मध्ये स्वानुष्ठानं प्रपूजयेत् ।।
अद्वैतमेव न द्वैतमित्याज्ञा परमेशितुः ।

(तं०आ० 29-73, 74)

~उत्तमः——स च भावनामय एव । यथा—

"कृत्वाधारधरां चमत्कृतिरसप्रोक्षाक्षणक्षालिता
मात्तैर्मानसतः स्वभावकुसुमैः स्वामोदसन्दोहिभिः ।
आनन्दामृतनिर्भरस्वहृदयानर्घार्घपात्रक्रमात् ।
त्वां देव्या सह देहदेवसदने देवार्चयेऽहर्निशम् ।।"

(तं०आ० 29-176)

~तदधिकारी——यो मन्त्रप्रयोगपूर्वकं दृढतरया भावनया स्वात्मनि भैरवत्वमुद्भावयितुमलं स एव कौलयागमाचरितुमधिकारी । अन्यथा कौलयागो योगिनीभिरेव विधीयते न साधारणैर्मर्त्यैः । यथा—

"तन्त्रोक्तमन्त्रतादात्म्याद्भैरवात्मत्वमानयेत् ।।"

(तं०आ० 29-22)

"नाहमस्मि न चान्योऽस्ति केवलाः शक्तयस्त्वहम् ।
इत्येवं वासनां कुर्यात् सर्वदा स्मृतिमात्रतः ।।"

(उद्ध० तं०आ०वि० खं० 11/2, पृ० 19)

"चरुकः सम्प्रदायश्च विज्ञानं मेलकं तथा ।
पूजाक्रमविधानं च योगिनीनां मुखे स्थितम् ।।"

(उद्ध० तदेव)

"इत्येवं भावनया च देहादौ —
'अमूर्त्ता मूर्तिमाश्रित्य देव्यः पिण्डान्तरे स्थिताः ।
क्रीडन्ति विविधैर्भावैरुत्तमद्रव्यलिप्सया' ।।"

(उद्ध० तदेव, पृ० 19)

~तद्वैशिष्ट्यम्——स्पष्टमेवोक्तं यथा—

"सिद्धान्तवैष्णवाद्युक्ता मन्त्रा मलयुतास्ततः ।।
तावत्तेजोऽसहिष्णुत्वान्निर्जीवाः स्युरिहाद्वये ।"

(तं०आ० 29-74, 75)

"सिद्धान्तवैष्णवबौद्धा वेदान्ताः स्मार्त्तदर्शनाः ।
ते प्रयत्नेन वा वर्ज्या यस्मात्ते पशवः स्मृताः ।।
अद्वैतद्रवसम्पर्कात् सन्निधानं त्यजन्ति ते ।
पराङ्मुखत्वमायान्ति निर्जीवा जीववर्जिताः ।।"

(तं०आ०वि० खं० 11/2, पृ० 52)

~तत्साधनानि——(1) अर्घपात्रम्, (2) यागधाम, (3) रत्नदीपकं चेति त्रीणि । तत् साधनानि मुख्यानि ।

"अर्घपात्रं यागधाम दीप इत्युच्यते त्रयम् ।।
रहस्यं कौलिके यागे.......... ..... ।"

(तं०आ० 29-14, 15)

त्रयमपीदं रहस्यवादोचितैरेव पदैरित्थमुक्तंप्रतिभाति । यथा—

"................. तत्रार्घः शक्तिसङ्गमात् ।
भूवस्त्र कायपीठाख्यं धाम चोत्कर्षभाक् क्रमात् ।।
दीपा घृतोत्था गावो हि भूचर्यो देवताः स्मृताः ।
इति ज्ञात्वा त्रयेऽमुष्मिन् यत्नवान् कौलिको भवेत् ।।"

(तं०आ० 29-15, 16)

~द्रव्योपयोगतः——आनन्दोद्बोधकानि तन्मयताकारीणि लोके निषिद्धानि मद्यमांसादिद्रव्याणि कौलयागे प्रयोज्यानि भवन्ति । यथा—

"अत्र यागे च यद् द्रव्यं निषिद्धं शास्त्रसन्ततौ ।
तदेव योजयेद्धीमान्वामामृतपरिलुप्तम् ।।"

(तं०आ० 29-10)

"द्रव्यैश्च लोकविद्विष्टैः शास्त्रार्थाच्च बहिष्कृतैः ।
विजुगुप्स्यैश्च निन्द्यैश्च पूजनीयस्त्वयं क्रमः ।।"

(उद्ध० तं०आ०वि० खं० 11/2, पृ० 8)

~बुभुक्षोः——ये चिरजीवित्वादि सिद्धीराप्तुमिच्छेयुस्ते कौलविधौ प्रसृतं कुण्डगोलकाख्यं द्रव्यमाहरेयुस्तेनैव च तर्पयेयुस्तास्ताः देवीः। ततस्तेषामभीष्टः सिद्धिलाभः। यथा—

"ये सिद्धिमाप्तुकामास्तेऽभ्युदितं रूपमाहरेयुरथो ॥
तेनैव पूजयेयुः संविन्नैकट्यशुद्धतमवपुषा।"

(तं॰आ॰ 29-127, 28)

'ये पिण्डस्थैर्यादिरूपां सिद्धिमाप्तुकामाः, ते तदभ्युदितं रूपं कुण्डगोलकादिशब्दव्यपदेश्यमाहरेयुः। अथ तेनैव …… …… पूजयेयुर्देवीचक्रं तर्पयेयुः।"

(तं॰आ॰वि॰ खं॰ 11/2, पृ॰ 91)

~भावनामयः——शाक्तोपायविशेषरूप। यथा—

"नाहमस्मि न चान्योऽस्ति केवलाः शक्तयस्त्वहम्।
इत्येवं वासनां कुर्यात् सर्वदा स्मृतिमात्रतः॥"

(तं॰आ॰ 29-64)

"नाहमस्मिन् चान्योऽस्ति केवलाः शक्तयस्त्विति ॥
क्षणमप्यत्र विश्रामं सहजं यदि भावयेत्।
तदा स खेचरो भूत्वा योगिनीमेलनं लभेत् ॥"

(कुलक्रमोदय उद्ध॰ तं॰आ॰वि॰ खं॰ 11/2, पृ॰ 45)

कौलागमाः——तेषां नामानि सङ्केततः प्रोक्तानि तन्त्रालोके स्पष्टीकृतानि च तद्विवेके। तानि तावत्—(1) श्रीवीरावलिशास्त्रम्, (2) हृदयभट्टारकः, (3) खेचरीमतम्, (4) योन्यर्णवः, (5) उत्फुल्लकम्, (6) सिद्धातन्त्रम्, (7) निर्मर्यादशास्त्रम्, (8) चर्याशास्त्रम् (9) कुलागमशास्त्रञ्चेति। यथा—

"तत्र तत्र च शास्त्रेऽस्य स्वरूपं स्तुतवान् विभुः।
श्रीवीरावलिहार्देशखेमतार्णववर्तिषु ॥
श्रीसिद्धोत्फुल्लमर्यादाहीनचर्याकुलादिषु।"

(तं॰आ॰ 29-165, 66)

"हार्देशो=हृदयभट्टारकः, खेमतम् =खेचरीमतम् अर्णवो योन्यर्णवः………………उत्फुल्लेत्युफुल्लकमतम्, मर्यादाहीनं= निर्मर्यादशास्त्रम्।"

(तं॰आ॰वि॰ खं॰ 11/2, पृ॰ 113)

कुलरत्नमाला च बहुधा समुद्धृता तन्त्रालोके।

कौलाचारः——(1) वेदाद्याचारेभ्य उत्कृष्टस्तान्त्रिकसाधनांप्रधानः यागादि क्रियाबहुलः पञ्चमकारसाधनः सत्वरमेवाभीष्टभुक्तिमुक्तिःप्रदः कोऽप्यागमिक आचारः।

~आनन्दोपायः——(2) जगदानन्दे प्रवेशलब्धये आनन्दोद्बोधनमेव सुतरां विधेयं कौलिके विधौ। ततो यद्यदानन्दोद्बोधकं वस्तु वा कृत्यं वा तत्तदेवोपादेयं कार्यं च। आनन्दप्रसरपरम्परायाः विस्तारो विधेयोऽभ्यासेन। मुख्यं च साधनालम्बनमानन्देन्द्रिययुगलमत्र। अन्यत् साधनजातमानन्दोद्बोधकं द्रव्यजातम्।

"यदेवानन्दसन्दोहि संविदो ह्यन्तरङ्गकम् ॥
तत्प्रधानं भवेच्चक्रमनुचक्रमतोऽपरम्।"

(तं॰आ॰ 29-105, 6)

प्रधानं चक्रमत्र मिथुनस्योपस्थयुगलम्, अनुचक्राणि स्तनजघनाधरादीनि।

~उत्कर्षतः——

"वेदादिभ्यः परं शैवं शैवाद्वामं च दक्षिणम्।
दक्षिणाच्च परं कौलं कौलात्परतरं न हि॥"

(उद्ध॰ तं॰आ॰वि॰ खं॰ 1, पृ॰ 48)

परमन्यत्रागमवाक्येषु कौलात् परतरं मतशास्त्रं ततोऽप्युत्कृष्टतरं त्रिकशास्त्रमिति। यथा—

"वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तरं परम्। इति।"

(उद्ध॰ प॰त्री॰वि॰ पृ॰ 92)

"वाममार्गाभिषिक्तोऽपि दैशिकः परतत्त्ववित्।
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः॥"

(उद्ध॰ तदेव)

~मिश्रः——त्रिकसाधनप्रक्रियासु यद् वामदक्षिणप्रक्रिययो मिलितं स्वरूपं वर्तते तदेवोत्कृष्टतमं भुक्तिमुक्तिसाधनम् कौलम्। यथा—

"अशेषतन्त्रसारं तु वामदक्षिणमाश्रितम्।
एकत्र मिलितं कौलं श्रीषडर्धकशासने ॥"

(तं॰आ॰ 37-26)

एतेन ज्ञायते यत् कौलप्रक्रियाया उत्कृष्टतरं स्वरूपं त्रिकप्रक्रियया अभिन्नमिति।

~सुखोपायः——न हि तत्र मण्डलाद्याडम्बरः परमावश्यकः। यथा—

"स्नानमण्डलकुण्डादि षोढान्यासादि यन्न तत्।
किञ्चिदत्रोपयुज्येत कृतं वा खण्डनाय नो॥
षण्मण्डलविनिर्मुक्तं सर्वावरणवर्जितम्।
ज्ञानज्ञेयमयं कौलं प्रोक्तं त्रैशिरसे मते॥"

(उद्ध॰त्रिशिरो भैरवात् तं॰आ॰ 29-9)

कौलिकी शक्तिः——(1) अनुत्तरस्य स्वभावभूता या विसिसृक्षा सैव तस्य कौलिकी शक्तिर्यद्वशादसावानन्दरूपतामारस्य विसर्गरूपतां यावदग्रे वा हकारक्षकारतां यावत् प्रसृतः। यथा—

"अस्यान्तर्विसिसृक्षासौ या प्रोक्ता कौलिकी परा॥
सैव क्षोभवशादेति विसर्गात्मकतां ध्रुवम्॥"

(तं॰आ॰ 3-136, 37)

(2) समस्ततत्त्वव्रातरूपस्य कुलस्य प्रतिबिम्बनीत्या सृष्टिकारिणी परा शक्तिः प्रभोः। यथा—

"अकुलस्यास्य देवस्य कुलप्रथनशालिनी।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः॥"

(तं॰आ॰ 3-67)

(3) परमेश्वरस्याभिन्नेऽपि स्वात्मनि भेदेन विश्वस्यावभासनसमर्था सा परा शक्तिर्यद्वशात् षट्त्रिंशत्तत्त्वरूपं कुलं सृष्ट्यादिविषयतामापद्यते । सा च मातृकाक्रमे विसर्गेणाभिव्यज्यते । यथा—

"विसर्गस्तस्य नाथस्य कौलिकी शक्तिरुच्यते ।।"

(तं०आ० 3-143)

त्रिधेदं व्याख्यानं विविधतया तत्त्वस्पष्टीकरणप्रयोजनम् । ततो न मतभेदावहं, स्ववचनविरोधावहं वेति बोध्यं सुधीभिः ।

~देहे——देहव्यापिनी चिच्छक्तिः ।

"कुले देहे भवा कौलिकी ।"

(पं०त्री०वि०वृ० पृ० 2)

~बहिः——सर्वाधारभूता संविद्देवी (शरीर-प्राणसुखादौ) कुले भवा कुलरूपा कौलिकी ।

अकुलात्मकं कौलं यस्यामन्तरस्ति सा कौलिकी । यथा—

"तत्रैव च कुले भवा कुलरूपा कौलिकी, यद्वा कुले भवमकुलात्म कौलं, तद् यस्यामन्तस्तादात्म्येनास्ति सा कौलिकी, कुलं ह्यकुलप्रकाशरूढमेव तथा भवति ।"

(प०त्री०वि० पृ०. 6:-62)

विश्वरूपतायामाभासमानापि वस्तुनोऽकुलात्मकविश्वोत्तीर्णशुद्धचिन्मयी परा शक्तिः ।

~मातृकात्मिका——अकारादारभ्य क्षकारपर्य्यन्तं सर्वस्य वर्णसमूहस्य, तदुपलक्षितस्य तत्त्वजातस्य प्रसवित्री पारमेश्वरी विसर्गशक्तिः । यथा—

"तस्य चैकैव कौलिकी विसर्गशक्तिः ययाऽऽनन्दरूपात् प्रभृति इयता बहिः सृष्टिपर्यन्तेन प्रस्पन्दतो वर्गादिपरामर्शा एव बहिस्तत्त्वरूपतां प्राप्ताः ।"

(तं०सा० पृ० 16)

~विसर्गप्रवणा——परैव हि सृष्टिशक्तिर्विसर्ग इत्युच्यते सकलतत्त्वविसर्जनात् । तत एव कादिक्षान्तस्य सदाशिवादिधरान्तस्य च कुलस्योदयः । यथा—

"अकुलस्य परा येयं कौलिकी शक्तिरुत्तमा ।।
स एवायं विसर्गस्तु तस्माज्जातमिदं जगत् ।"

(मा०वि०वा० 1, 890-91)

कौलिकी सिद्धिः——(1) स्थूलसूक्ष्मशरीरादिषु सत्स्वपि परशिवात्मतादार्ढ्यनिश्चयः । यथा—

"कुले भवा कौलिकी सिद्धिः, तथात्वदार्ढ्यं परिवृत्य आनन्दरूपं हृदयस्पन्दस्वरूपपरसंविदात्मकशिवविमर्शतादात्म्यम् । तां सिद्धिं ददाति; अनुत्तरस्वरूपतादात्म्ये हि कुलं तथा भवति ।"

(प०त्री०वि० पृ० 34)

(2) प्राणदेहादिरूपस्य कुलस्यापि परमेश्वरस्वात्मकनिश्चयात्मिका सिद्धिः । तस्यां सिद्धौ प्रत्यक्षेण सर्वमपि कुलं शिवात्मतया प्रकाशते । यथा—

"शरीरादयो हि झगिति अनुत्तरध्रुवविसर्गवीर्यविशेन अकालकलितेन प्राणादिमध्यमसोपानारोहेणैव भावनां तथात्वनिश्चयरूपां सिद्धिं विदधते ।"

(तदेव, पृ० 36)

कौलिनी— कुलकुण्डलिनी ।

"कौलिन्याः कुलकुण्डलिन्या पदम् ।"

(तं०आ०वि० खं० 12, पृ० 324)

कौलोत्तरम्——आगमिकं किमपि कौलसम्प्रदायसम्बन्धिपुस्तकं यस्य नामोल्लेखोऽभिनवगुप्तेन कृतः । यथा—

चतुष्कलभट्टारकस्य कौलोत्तरादौ …… ।

(प०त्री०वि० पृ० 156)

क्रमः——मूलतः पारमेश्वरलीलास्वातन्त्र्योद्भावितमापाते मायीयप्रमात्रा परिकल्पितं पदार्थानां देशकृतं कालकृतं च पौर्वापर्यं यद्व्यवहारे निराबाधमाभासते । यथा—

"वक्ष्यमाणेश्वरस्वातन्त्र्यरूपदेशकालशक्त्युपकल्पितः क्रमः, देशकालपरिपाटी ।"

(ई०प्र०वि० खं० 1, पृ० 278-79)

~कालिकः——यौ हि नियमबद्धावाभासानां सद्भावासद्भावौ, तावाश्रित्य व्यवह्रियमाणो वस्तूनां परस्परं यो भेद-विशेषः स एव कालः, यथा सतारकान्धकारावभासः, तमसः शैथिल्यावभासः, प्रभाया अस्फुट आभासः, स्फुटप्रभावभासः, इत्येवमादयो ये आभासभेदाः परस्परं नियमेनोदयव्ययभाजस्ते एव क्रमात्मका भेदावभासाः । तदाश्रित्य कालिकव्यवहारकल्पना लोके सततमत्रुटिता चलति । यथा—

"इह स्वभावभेदमात्रं यदि क्रमात्मा कालः, तदंगुलीचतुष्टयं भिन्नस्वभावमिति भिन्नकालं भवेत्, तस्मादरुणाभासस्य सद्भावः स्फुटप्रभापुञ्जस्य चासद्भावः इत्येवम्भूतो यो भेद आभाससद्भावासद्भावाभ्यामनुप्राणितस्तत्कृतः क्रमः कालात्मा ।"

(ई०प्र०वि०खं० 2, पृ० 11-12)

क्रमकेलिः——(1) सिद्धनाथकृतस्य क्रमस्तोत्रस्य टीकाऽऽचार्याभिनवगुप्तकृता येदानीमलभ्या । यथा—

"एवं क्रमकेलावप्येतद्गर्भीकारेण यदनेन ग्रन्थकृता व्याख्यातम् ।"

(तं०आ०वि०खं० 3, पृ० 191)

अनेन ग्रन्थकृतेत्याचार्याभिनवगुप्तेनेति ।

(2) उल्लेखास्तस्याः तट्टीकायाश्च बहुषु स्थलेषु लभ्यन्ते, उद्धरणान्यपि क्वचित् क्वचित् । यथा—

(क) "यथैकः श्रीमान् वीरवरः सुगृहीतनामधेयो गोविन्दराजाभिधानः…… इत्यारभ्य, स्तोत्रमुखेनापि तावत् प्रसारयंल्लोकाननुगृह्णीयाम् इति" इत्यन्तम् ।

(तं०आ०वि० खं० 3, पृ० 192तः 193)

सुविस्तृतमेतदुद्धरणं तन्त्रालोकविवेक एव द्रष्टव्यम् सुधीभिः।

(ख) "उक्तं च क्रमस्तोत्रे ………… …………
व्याख्यातं चैतन्मया तट्टीकायामेव क्रमकेलौ विस्तरतः।"

(प॰त्री॰वि॰ पृ॰ 236)

(ग) "यथोक्तमस्मद्गुरुभिः क्रमकेलौ—

श्रीमत्सदाशिवपदेऽपि महोग्रकाली।
भीमोत्कटभ्रुकुटिरेष्यति भंगभूमिः॥"

(शि॰स्तो॰वि॰, पृ॰ 159)

तन्त्रालोके समुद्धृता याः क्रमकेलिपंक्तयस्तदनुसारमेरकनाथेन पुरा संस्मृतमेतत् पद्यम्। ततोऽस्याभिनवगुप्तकृतत्वं भ्रान्तिमूलकमेव प्रतिभाति। अभिनवगुप्तेनोद्धृतं भवेदिदं पद्यं क्रमकेलौ। यथा—

(घ) "ताश्च—"इहैकैकत्र सृष्ट्यादौ चक्ररूपता विद्यते" इति श्रीक्रमकेलिक्लृप्त्या सृष्टिसृष्टिः सृष्टिस्थितिः, सृष्टिसंहारः, सृष्टितुरीयम्……………………संहारतुरीयम्, इति द्वादशानाम्………………।"

(म॰मं॰प॰, पृ॰ 100-1)

(ङ) "यदुक्तं श्रीक्रमकेलौ—"अत एव ये निर्विमर्शं तुर्यातीतमिच्छन्ति ते निरुपदेशा एव" इति।

(म॰मं॰प॰, पृ॰ 102)

(च) क्रमकेलौ च—"सेयमेवंविधा भगवती संविद्देव्येव मन्त्रः" इति।

(म॰मं॰प॰, पृ॰ 122)

(छ) "यथा क्रमकेलौ—

तद्विवर्तः स्मृतो रश्मिपुञ्जश्चक्रेशिपूर्वकः। इत्यत्र व्याख्यातम्—"विवर्तो विचित्रेण रूपेण वर्तनं, न त्वविद्यावशादपि तु स्वातन्त्र्यतः" इति।

(म॰मं॰प॰ पृ॰ 150)

(ज) "यच्चोक्तं क्रमकेलौ—'वाम-दक्षिणतन्त्रादिष्वप्येतन्मयमेव सर्वं निर्वहतीति मन्तव्यम्' इति।"

(म॰मं॰प॰ पृ॰ 171)

(झ) " 'यश्चायमेवंविधार्थमथनप्रगल्भो भगवान्, अत एव सर्वपर्यन्तप्रतिष्ठास्थानरूपो यः कुलेश्वरः, स एव यतः स्वशक्ति निर्मथ्य सृष्ट्यादिकारी, अत एवंविधं श्रीमन्थानं भैरवं नमामीति संबंधः' इति श्रीक्रमकेलिक्लृप्त्या स्वेच्छामात्रविजृम्भितविश्वक्षोभतयाऽनुभूयते।"

(तदेव, पृ॰ 172)

'एतद् वितत्य विख्यातैः क्रमकेलौ कुलागमे।
नाथभिनवगुप्तार्यैः पर्यालोचितमादरात्॥'

(ञ) तदुक्तं क्रमकेलौ—"वन्दनं हि तदनुप्रवेशः" इति।

(तदेव, पृ॰ 185)

क्रमदर्शनम्——कालिकोपासनाप्रधाना शाक्तोपायमयी साधनापद्धतिर्यां जयरथस्य काले साधकातिप्रियतया विद्वांसः पृथग्दर्शनत्वेनोल्लिखन्ति स्म। ततः क्रमनयशास्त्रमेव क्रमदर्शनम्, उपासनापद्धतिविशेषरूपम्। यथा—

"न केवलमेताः क्रमदर्शनादावेवोक्ता यावदस्मन्नयसहोदरेषु शास्त्रेष्वपीत्याह।"

(तं॰आ॰वि॰ खं॰ 2, पृ॰ 235)

त्रिकशास्त्रव्यतिरिक्तत्वेनैवात्र क्रमदर्शनस्योल्लेखः कृतोऽस्ति। केवलं लोकव्यवहारानुसारमेव न तु दर्शनान्तरदृष्ट्या; यतो हि क्रमनयस्योपयोगः शम्भवशाक्ताणवेषु त्रिष्वपि त्रिकाचारोपायेषु विधीयते। तन्त्रालोकस्य च चतुर्थे आह्निके शाक्तोपायस्य प्रतिपादने मुख्यत्वेन क्रमनय एवोपात्तः प्रतिपाद्यविषयत्वेनेति विचार्यं सुधीभिः। यत आधुनिकाः शोधकारा-विद्वांसोऽपि क्रमप्रक्रियां त्रिकप्रक्रियातो भिन्नामुद्घोषयन्ति।

द्र॰ क्रमनयः इति

(ख) "क्रमः—क्रमदर्शनम्।"

(तदेव खं॰ 7/2, पृ॰ 106)

आचार्याभिनवगुप्तपादैरपि क्रमपद्धतेर्लोकप्रियत्वेनैव स्वतन्त्रपद्धतित्वेन मनागुल्लेखोऽस्य कृतः। यथा—

"अथ यथोचितमन्त्रकदम्बकम्।
त्रिक कुल क्रमयोगि निरूप्यते॥"

(तं॰आ॰ 30-1)

न चाग्रे क्वापि विशेषतः क्रम एवोपयोगित्वं कस्यापि मन्त्रस्योक्तम्। किञ्चाग्रे यथा कुलप्रक्रियाया निरूपणं पृथगाह्निकेनं कृतं तैनं तथा क्रमप्रक्रियायाः विषये कृतम्। अपितु त्रिकप्रक्रियायाः प्रधानांगत्वेनैव क्रमोपासना प्रतिपादिता तत्र तत्र शम्भवशाक्ताणवेषूपायेषु। इति क्रमः त्रिकस्य कुलस्य चांगभूत एव नयो न स्वतन्त्रा क्वापि त्रिकाद् भिन्ना पद्धतिरिति।

जयरथस्य काले ततः पूर्वमेव वा तस्याः क्रमाख्यायाः साधनाप्रक्रियायाः बहवः स्वतन्त्रा ग्रन्था अपि निरमीयन्त तत्साधनापरैराचार्यैः। तत्रैव क्वापि शाक्तोपायसाधनापद्धतिः क्रमदर्शनमित्युच्यते स्म कालीनय-प्राधान्यतः। ग्रन्थोऽपि भवेत् कश्चित् क्रमदर्शनाख्यः। अथवा तथा कथितं क्रमशास्त्रमेवात्र क्रमदर्शनपदेनाभिप्रेतं स्याज्जयरथस्य। यथा—

"एता एव द्वादशापि संविदः क्रमदर्शनादौ अन्वर्थेनापि अभिधानेन दर्शिताः।"

(तं॰आ॰वि॰ खं॰ 2, पृ॰ 235)

किंतु तावदन्तरं क्रमत्रिकयोरिति न केनापि शोधविदुषा प्रतिपादितमद्यावधि। यथा खलु त्रिककुलप्रक्रिययोः परस्परं भेदः, तथा न त्रिक-क्रमयोः।

~ग्रन्थाः——द्र॰ क्रमनयः~तद्-ग्रन्थाः इति।

क्रमनयः——त्रिकाचारांगभूतस्य शाक्तोपायस्यासौ मुख्यः प्रकारो यदनुसारं पराशक्तेर्ज्ञानयोगमभ्युपासना तस्याः सृष्टिकालीप्रभृतीनि द्वादशकालीरूपाण्यालम्बनीकृत्य क्रमशो विधीयते कैश्च-

नोत्कृष्टतरैः साधकैः। तदेष उपासनाक्रमो वस्तुतस्त्रिकाचारीयशाक्तोपायांगभूतोऽपि सन् प्रचारभूयस्त्वात् साधकप्रियत्वाच्च लोकव्यवहारे पृथगुपायत्वेनापि प्रथितोऽभवत् कदाचित्। तत एवाचार्याभिनवगुप्तेनापि न केवलं जयरथेनास्योल्लेखः पृथक् स्वतन्त्रशास्त्रत्वेन कृतोऽस्ति, यद्यपि क्रमनयोपासनाः, विशेषतो द्वादशकाल्यः, शाम्भवोपाये, आणवोपाये चाप्याश्रितास्तन्त्रालोके।

~तद्ग्रन्थाः——क्रमनयप्रतिपादकाः भूयांसो ग्रन्थाः अभूवन्। यथा –

(क) महार्थञ्जरी परिमले समुद्धृताः—
(1) क्रमकेलिः (द्र० क्रमकेलिः इति।)
(2) क्रमोदयः (पृ० 48, 84)
(3) क्रमवासना (पृ० 111-113)
(4) क्रमसद्भावः (पृ० 85, 94, 97, 104)
(5) क्रमसिद्धिः (पृ० 85-86, 93-94, 97, 105-106)
(6) क्रमसूत्रम् (पृ० 159)
(ख) अन्यत्र समुल्लिखिता वा—
(1) क्रमस्तोत्रम् (सिद्धनाथस्य) (प०त्री०वि० पृ० 236) तं०आ०वि खं 3, पृ० 158, 160, 163, 165, 167, 169, 173, 178, 181, 183, 185, 188, 202, 223 इति।
(2) क्रमस्तोत्रम्—अभिनवगुप्तस्य।
(3) क्रमरहस्यम्—(तं०आ० 29-14)
(4) कुलक्रमोदयः—(तं०आ०वि० खं० 11/2, पृ० 44)
(ग) अद्यत्वे निर्मितो ग्रन्थः—
श्रीलक्ष्मण जीत्रस्वामिनिर्मिता "क्रमनयदीपिका" (हिन्दीभाषायाम्)।

~पृथग्रूपतया——यद्यपि तन्त्रालोकस्य चतुर्थे अह्निके क्रमप्रक्रियाशाक्तोपायांगत्वेनैव प्रतिपादिता तथाप्यत्र त्रिशाह्निकारम्भे त्रिककुलक्रमाणां पृथक् पृथग् नामकीर्त्तनं द्वन्द्वसमासे च समानमहिमत्वध्वननमेतत् प्रतिपादयति यदभिनवगुप्तस्य कालेऽपि क्रमप्रक्रिया पृथक् साधनासम्प्रदायत्वेन लोके प्रसिद्धिमागताऽभूदिति। ततः क्रमनयस्य साधकप्रियत्वं द्योत्यतेऽनेन। यथा—

अथ यथोचितमन्त्रकदम्बकं
त्रिककुलक्रमयोगि निरूप्यते।

(तं०आ० 30-1)

परं केनांशेन कैर्वांशैः पृथक्त्वं तयोरिति न क्वापि स्पष्टीकृतं केनाप्याचार्येण। ततो लोकप्रियतामात्रमत्र पार्थक्यगणने हेतुरिति विमृश्यं सुधीभिः। एतयोः जयरथोक्तं सोदरत्वमपि विचार्यम्।

क्रमनयत्रिकनयौ——जयरथस्य मतेन क्रमनयत्रिकनयौ परस्परंसोदरौ।

तदेवेदानीं विभज्य दर्शयन् क्रमनयसोदरतामस्य दर्शनस्यावेदयति।

(तं०आ०वि० खं० 39, पृ० 157)

क्रममुक्तिः——शिवभावासादनस्यैका आणवी प्रक्रिया। यथा—

"कन्द-नाभि-हृत्-कण्ठ-लम्पिका-(लम्बिका) बिन्दु-नादशक्तिरूपाणि सोपानानि ऊर्ध्वम् आक्रमणाय तीर्थान्येव तेषां पदम् आसादनं, तत्र हानादानरूपः क्रमः शनैः शनैः कन्दे ततो नाभौ ततो हृदि इत्येवम् आक्रमणं तेन-इति। एवं यावत् परमार्थप्ररोहोपलब्धौ पिण्डपातावसरे योगिनः तस्य क्रमेण शिवतास्वभावा स्थितिर्भवति, इति एषा क्रममुक्तिः कथिता।"

(प०सा०वि० पृ० 187-88)

क्रममुद्रा——यत्तावदन्तश्चिन्मात्रविमर्शनं, बहिश्च जगतस्तत्प्रसरात्मकतया विमर्शनं, तयोः क्रमेण बारं बारं योऽभ्यासोऽसौ क्रममुद्रा। अनयाऽन्तर्बहिरुभयत्र भैरवरूपस्यात्मनो दर्शनं पुनः पुनर्विधीयते। "यथोक्तं क्रमसूत्रेषु—

'क्रममुद्रया अन्तःस्वरूपया बहिर्मुखः समाविष्टो भवति साधकः। तत्रादौ बाह्याद् अन्तः प्रवेशः आभ्यन्तरात् बाह्यस्वरूपे प्रवेशः आवेशवशात् जायते—इति सबाह्याभ्यन्तरोऽयं मुद्राक्रमः।' इति।"

(प्र०हृ० पृ० 46)

क्रमयोगः——क्रमनयस्याणवेऽप्युपयोगो विधीयते। तदनुसारमाणवोपायात्मकः क्रियायोगोऽपि क्रमयोगः। एतेन योगेन साधक नियतेनैव क्रमेण सर्वं जगदात्मसात् कृतं भावयति, शाक्तेन त्वक्रममेव वाऽनियतक्रममादि वा सर्वमात्मतया साक्षात्कुरुते इत्यनयोः परस्परं विशेषः। यथा—

"अनेन क्रमयोगेन यत्र यत्र पतत्यदः।
चक्रं सर्वात्मकं तत्तत्सार्वभौममहीशवत्॥" इत्यादि

(तं०आ० 5-30, 31)

क्रमरहस्यम्——कौलिकं किमप्यागमशास्त्रपुस्तकम्। यथा—

"श्रीमत्क्रमरहस्ये च न्यरूपि परमेशिना।"

(तं०आ० 22-14)

क्रमवासना——महेश्वरानन्दस्य परमगुरुणा श्रीशिवानन्दनाथेन कृतः कोऽपि शाक्तसम्प्रदायग्रन्थः। यथा—

"यदुक्तमस्मत्परमगुरुभिः श्रीक्रमवासनायाम्—
संवित् सतत्त्वनैर्मल्यसिद्धये शोषणादिकम्।
विकल्पसार्वभौमस्य शरीरस्याश्रयाम्यहम्॥ इति"

(म०मं० पृ० 111-112)

क्रमशास्त्राणि——क्रमेति शब्दो येषां नामसु पूर्वपदं तानि, विशेषतश्च क्रमनयाख्य-शाक्तोपायप्रतिपादकानि पुस्तकानि। यथा—

"श्री सर्वाचारवीराली निशाचारक्रमादिषु ।"

(तं०आ० 12-23)

द्र० क्रमनयः इति ।

क्रमसद्भावः——कौलसम्प्रदायसम्बन्धि किमप्यागमिकं कालीनयप्रतिपादकं पुस्तकम्, यस्य पंक्तयो रुद्रकालीप्रतिपादनावसरे अन्यत्रापि च समुद्धृता जयरथेन महार्थमञ्जरीपरिमले च महेश्वरानन्देन । यथा—

"श्रीक्रमसद्भावभट्टारके रुद्रकालीति व्यपदिष्टा, तदुक्तं तत्र"—

(तं०आ०वि० खं० 3, पृ० 172-73)

द्र० म०मं०पं० पृ० 85, 94, 97, 104 इति ।

द्र० भद्रकाली/रुद्रकाली ~ क्रमसद्भावे इति ।

"तत्र शूलविधानं यदुक्तं भेदैरनन्तकैः ।
तद्योनिमण्डलं ब्रूमः सद्भावक्रमदर्शितम् ।"

(तं०आ० 31-10)

द्र० च (तं०आ०वि०खं० 3, पृ० 172-173, खं० 7/2, पृ० 107)

(मं०मं०प० पृ० 85, 97, 104)

अयमेव ग्रन्थो जयरथेन क्रमसद्भावभट्टारक इत्युक्तः ।

द्र० (तं०आ०वि० खं० 3, पृ० 190)

क्रमसद्भावभट्टारकः——क्रमसद्भावाख्य एव ग्रन्थः । यथा—

"यतः श्रीक्रमसद्भावभट्टारके अनाख्यचक्रे सप्तदश देव्यः पूज्यत्वेनोक्ताः इत्यादि" । द्रष्टव्यं विस्तरतः—

(तं०आ०वि० खं० 3, पृ० 190)

क्रमसिद्धिः——किमपि शाक्तदर्शन-पुस्तकम् ।

द्र० (म०मं०प०, पृ० 85-86, 93-94, 105-6) इति ।

क्रमसूत्रम्——क्रमप्रक्रियाभ्यासप्रतिपादकं किमपि शाक्तं साधनाप्रधानं पुस्तकम् । यथा—

"यदुक्तं श्रीक्रमसूत्रेषु—"बाह्यादन्तः प्रवेशोऽभ्यन्तराद्वा बाह्यस्वरूपानुप्रवेशः" इति ।

(म०मं०पं० पृ० 159)

"तदुक्तं पूर्वगुरुभिः स्वभाषाभयेषु क्रमसूत्रेषु—

'यथा वन्हिरुद्बोधितो दाह्यं दहति, तथा विषयपाशान् भक्षयेत्' ।"

(प्र० हृ० पृ० 35)

स्वभाषामयेष्वित्यनेनैतत् प्रतिभाति यन्मूलतो महानयप्रकाशवदेष ग्रन्थोऽपि देशभाषायामेव रचितो भवेदिति ।

क्रमस्तोत्रम् ~ अभिनवगुप्तीयम्——द्वादशकालीमुखेन शिवः स्तुतोऽनेन स्तोत्रेणाभिनवगुप्ताचार्येण । डॉ० कान्तिचन्द्रीयाभिनवगुप्तविषयकशोधप्रबन्धान्ते परिशिष्टेषु मुद्रितमेतत् स्तोत्रम् । एतस्य निर्माणकालः आचार्येण 66 इति सप्तर्षिवत्सरः कथितः सच—4066 इति, ख्रीस्तश्चासौ 990 AD इति । यथा—

"षट्षष्टिनामके वर्षे नवम्यामसितेऽहनि ।
मयाभिनवगुप्तेन मार्गशीर्षे स्तुतः शिवः ॥"

(क्र० स्तो० 30)

~ सिद्धनाथीयम्——सिद्धनाथकृतं प्रसिद्धं देवीस्तोत्रं द्वादशकाल्युपासना-रहस्यपतिपादकम् । अस्य स्तोत्रस्य केवलं चतुर्दश एव पद्यानि लभ्यन्ते यानि जयरथेनोद्धृतानि तन्त्रालोकविवेके । अन्यत्रापि ग्रन्थेषु तेषामेव पद्यानां मध्ये कानचिदेवोद्धृतानि लभ्यन्ते । यथा—

"उक्तं च क्रमस्तोत्रे—

सर्वार्थसंकर्षणसंयमस्य
यमस्य यन्तुर्जगतो यमाय ।
वपुर्महाग्रासविलाससक्तं
संकर्षयन्तीं प्रणमामि कालीम् ॥"

(प०त्री०वि०, पृ० 236)

द्र० (तं०आ० वि० खं० 3, पृ० 158 त० 187 इत्यत्रान्तरान्तरा)

द्र० क्रमकेलिः इति ।

~ तत्पद्यद्वयम्——उद्धृतमेतदपि तन्त्रालोकविवेके । यथा—

(1) "या सा जगद् ध्वंसयते समग्रं
मृत्योर्वपुर्ग्रासयतीति विष्वक् ।
धामाग्निरूपीयसहस्रदीप्तां
तां नौमि कालानलरुद्रकालीम् ।"

(उद्ध०तं०आ०वि० खं० 3, पृ० 202)

"अतएव श्रीस्तोत्रभट्टारकेऽपि—

(2) कालानलाद् व्योमकलावसानं
चिन्त्यं जगद्ग्रासकलालयेन ।
चक्रं महासंहृतिरूपमुग्रं
गतं चिदाकाशपदस्थमित्थम् ॥"

(उद्ध० तदेव खं० 3, पृ० 223)

प्रसिद्धद्वादशपद्यातिरिक्तं पद्यद्वयमेतत् । द्वादश पद्यानि च श्रीलक्ष्मणजीवमहोदयैः क्रमनयदीपिकायां प्रकाशितानि । तन्त्रालोक-विवेकेऽप्युद्धृतानि जयरथेन चतुर्थाह्निकव्याख्यामध्ये पृ० 158 तः 188 यावदन्तरान्तरा ।

क्रमाः——पञ्चप्रकाराः क्रमा भवन्ति ते च सृष्टिक्रमः, संहारक्रमः, ज्ञप्तिक्रमः, स्थितिक्रमः, अवतारक्रमश्चेति । देशकालक्रमाभ्यामतिरिक्ताः शास्त्रीयव्यवहारोपयोगिन इमे पञ्च क्रमाः । यथा—

"कोऽयं सृष्टि-संहार-ज्ञप्ति-स्थित्यवतारक्रमाणां मध्यात् क्रम: ?"

(प०त्री० वि० पृ० 120)

क्रमाक्रमौ——पारमेश्वर्यां संविदि सर्वमक्रमत एव वर्तते परं तस्य बहिर्भावावभास: क्रमत एवेति क्रमाक्रमावभासनशीला पारमेश्वरी पराभट्टारिका।

"सर्वं एवायं वाग्रूप: परामर्श: क्रमिक एव, अन्त: संविन्मयस्त्वक्रम एव—इति सदैवेयमेवंविधैव एवमेव विचित्रा पारमेश्वरी पराभट्टारिका।"

(प०त्री०वि० पृ० 167)

क्रमावभास:——जगतो यो बहिरवभासोऽसौ क्रमेणैव भवतीति जगदवभास एव क्रमावभास:।

~तत्कारणम्——पारमेश्वरी स्वतन्त्रेच्छैव क्रममवभासयति सुविचित्रम्, नान्यदत्र विषये किमपि कारणमविद्यादि। सदपि च तत् स्वयं पारमेश्वरस्वातन्त्र्याभासितमेव क्रमिकमेव च सञ्चकास्ति, कारणतां च याति। ततो मूलकारणं पारमैश्वर्यलीलामयं पारमेश्वरस्वातन्त्र्यविजृम्भितमेवमन्तव्यम्। यथा—

"तौ चाभासानां भावाभावौ न बाह्यहेतुकृतौ, इति विस्तार्योपपादितम्। इति य एव संवित्स्वभाव आत्मा स्वप्नसङ्कल्पादावाभासवैचित्र्यनिर्माणे प्रभु: प्रभविष्णु: इति स्वसंविदितस्तत एव तौ भवत:। ह्यात्मनि नीलादीनाभासानाभासयन् चित्रतया अपरिमेययाभासयति।……यदा तु शरदाभासं हेमन्ताभासेन च सर्वथैव शून्यमाभासयति, हेमन्ताभासं च शरदाभासेन, तदा कालात्मा क्रम उत्तिष्ठति, इति सेयमित्थम्भूताभासवैचित्र्यप्रथनशक्तिर्भगवत: कालशक्ति:।"

(ई०प्र०वि० खं० 2, पृ० 12-13)

क्रमोदय:——कश्चनागमिको दर्शनग्रन्थ:। यथा—

"तदुक्तं श्रीक्रमोदये—
रागो माया कला विद्या नियति: काल एव च।
पञ्चवृत्त्याश्रया: सर्वे पाशाश्चेति प्रकीर्तिता:॥"

(म०मं०प०, पृ० 48)

द्र० च (तदेव पृ० 84 इति)

क्रिया——एकात्मनोऽपि वस्तुनस्तावदवस्थाभेदाद् भेद इव लक्ष्यते, परं तथापि न तस्यात्मनोऽभेदो लुप्यति सर्वथा। सैषा वस्तुन: स्थितेर्भेदाभेदता तस्य क्रियेति। यथा—

"तत्र प्रत्यभिज्ञाबलेन यदेकात्मकमेकस्वभावं तस्य यो भेदोऽन्यान्यरूपता, इयमेव सा क्रियोच्यते।"

(ई०प्र०वि० खं० 2, पृ० 175)

सामान्यं लक्षणमेतत् क्रियाया:।

"देवदत्तस्य यद् वैतत्यं सा क्रिया।"

(ई०प्र०वि० खं० 2, पृ० 43)

गतिमत्तया वैतत्यमिति।

~अक्रमा——परमेश्वरस्य सृष्टिसंहारादिकृत्यपञ्चकमूलकारणभूताऽसौ पराशक्तिर्ययाऽसौ जगत्सृष्ट्यादिलीलामभिनयति। वस्तुतो भगवति परमशिवे याऽसौ स्वाभाविकी विमर्शरूपता, सैव तस्यैषा क्रिया ययाऽसौ परिपूर्णरूपं स्वात्मानं सदा विमृशति "अहम्" इति। तस्य पराद्वैत-स्वभावत्वेन क्रमराहित्यात् तस्येयं विमर्शनक्रियापि क्रमादुत्तीर्णैव। तस्या एव स्वातन्त्र्यस्य लीलाया: माहात्म्येन ज्ञातृज्ञेयभावादे: क्रमस्यावभासो लोके। यथा—

"तथा विज्ञातृविज्ञेयभावो यदवभासते"

इत्यन्तेन भगवति वस्तुतोऽक्रमाया एव क्रियाया: पशुप्रमातृगतक्रमावभासनयोगात् सक्रमत्वम्।"

(ई०प्र०वि०वि० खं० 3, पृ० 1)

परमेश्वरस्य शाश्वत्या: क्रियाया: अक्रमत्वम्, तस्य क्रमोत्तीर्णत्वात्। यथा—

"सक्रमत्वं च लौकिक्या: क्रियाया: कालशक्तित:।
घटते न तु शाश्वत्या: प्राभव्या: स्यात् प्रभोरिव॥"

(ई०प्र० 2-1-2)

"परमेश्वरे परमार्थतोऽक्रमा क्रिया, परिमितसांसारिकप्रमातृगतक्रमावभासनयोगात् सक्रमापि च।"

(ई०प्र०वि० खं० पृ० 2)

~अक्रमसक्रमा —— अन्तर्बहिरुभयाकारसहिष्णोरेकस्य परमेश्वरतत्त्वस्यान्तरक्रमा, परविमर्शात्मकपरस्पन्दरूपा, बहिश्च सक्रमा, पूर्वापरीभूतावयवा, पाकादिरूपाऽवभासनात्मिका क्रिया सिद्धा भवति। यथा—

"एवमेका क्रिया सैषा सक्रमान्तर्बहि: स्थिति:।
एकस्यैवोभयाकार-सहिष्णोरुपपादिता॥"

(ई०प्र० 2-4-5)

"एकश्चासावाश्रय: संविद्रूपो भगवान् स्वच्छन्दत्वस्वच्छत्वाभ्यां सहते एवोभयमन्तर्बहीरूपत्वम्।"

(ई०प्र०वि०वि० खं० 3, पृ० 189)

स्पष्टीकरणमेतत् क्रियाया:

~उपासनात्मिका——शुद्धचिन्मयस्वरूपविमर्शाभ्यास:।

"तदुक्तं श्रीगमशास्त्रे—
'योगो नान्य: क्रिया नान्या तत्त्वारूढा हि या मति:।
स्वचित्तवासनाशान्तौ सा क्रियेत्यभिधीयते'॥ इति।"

(उद्ध० ने० तं० उ० खं० II, पृ० 43)

~(सारभूता)——न तावदग्निहोत्रादिक्रिया: एवोपासनासारभूता: अपितु तासु पारमेश्वरशक्तिभावनैव वीर्यं येन ता: सफला भवेयु:। तत उन्मनादिभावनैव वास्तविकी यागादिक्रिया। यथा—

"उन्मना तु परा शक्तिर्ज्ञानरूपावधूतिका॥
सा क्रियेत्यभिधीयेत न क्रिया त्वध्वमध्यगा।"

(ने०तं० 16/78-79)

~कर्मस्था——व्याकरणे या कर्मस्था क्रिया स्वीक्रियते सा कर्मणि विशेषतो दृश्यमानतातिशयात् कर्मस्थेत्युच्यते, कर्मणोऽपि प्रकाशमानस्य वस्तुतः संविदात्मक मूल प्रमाणसारत्वमेव हि। कर्तुरेव ह्रीप्सिततमं कारकं कर्म। ततः पाकादिक्रिया कर्तृस्था सत्येव कर्मस्थेति गण्यते। कर्मभूते एव पदार्थे तत्फलदर्शनात्। एतेन पारिभाषिकमेवात्र कर्मस्थत्वं न वास्तविकम्। यथा—

"सर्वैव तावत् क्रिया कर्तृस्था। काचित्तु कर्मण्यपि विशेषदर्शनातिशयात् कर्मस्थोच्यते। साधारण्येन व्यपदेशा भवन्तीति, तद्यथा पाकः। तथा च कर्मभेदात् तस्य भेदो वक्ष्यते; न तु गमनस्य कर्मणि विशेषानाधानात् कर्तृस्थस्य। निर्माणक्रिया तु कर्मणि विशेषमादधानापि कर्मणोऽपि प्रकाशमानस्य संविदात्मकप्रमातृसारत्वात् तुल्यकक्ष्यतयैव कर्तृस्था कर्मस्था चोक्ता।"

(ई॰प्र॰वि॰वि खं॰ 3, पृ॰ 180)

~ज्ञानस्थौल्यमयी——ज्ञानमेव हि यदन्तः स्फुरति तदेव शरीराद्यावेशेन क्रियात्मकतया बहिः स्थूलतां प्राप्तं सदाभासते तथा। यथा—

"लोकेऽपि किल गच्छामीत्येवमन्तः स्फुरैव या।
सा देहं देशमक्षांश्चाप्याविशन्ती गतिक्रिया॥
तस्मात् क्रियापि या नाम ज्ञानमेव हि सा ततः।"

(तं॰आ॰ 1, 154-55)

~प्ररोहदृशा——(1) इच्छाज्ञानशक्त्योः परस्परसांकर्यं क्रिया। यथा—

"इच्छाज्ञानें एव परस्परस्वरूपसांकर्यवैचित्र्यचमत्कारमय पूर्वापरीभूतस्वरूपपरिग्रहे संरम्भसारा क्रिया।"

(प॰त्री॰वि॰ पृ॰ 171-172)

(2) इच्छा तावत् प्रथमं ज्ञानरूपतां धारयति सैव पश्चाज्ज्ञानस्य बहिर्मुखा घनीभावकल्पाऽवस्था कायादिस्पन्दनमयी क्रियेत्युच्यते। यथा—

"न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया।" इति

(उद्ध॰ने॰तं॰ उ॰ खं॰ II, पृ॰ 42)

"चित्तिश्च चैत्यमपि, तच्च विमर्शतत्त्वं, ज्ञान क्रिये न हि तयोः परमार्थभेदः।
ज्ञानं गृहीतकठिनत्वगुणं क्रिया स्याज्ज्ञानं भवेद्विरलिमाश्रयिणी क्रियैव॥
ज्ञानस्य सिद्ध्यति विना क्रियया न रूपं, तस्यास्तथैव नहि तेन विनोपलम्भः।
तस्मात्तयोर्यमलतैव मतं हि सैद्धं, पूर्वापरत्वकलनं त्विह पूर्वपक्षः॥"

(मा॰च॰वि॰ 1-15, 16)

~पारमेश्वरी——स्वेच्छा-परिस्पन्दमात्रेण निरुपादानसम्भारं जगदवभासनलीला हि पारमेश्वरी क्रिया। यथा—

"एष चानन्तशक्तित्वादेवमाभासयत्यमून्।
भावानिच्छावशादेषा क्रिया निर्मातृताऽस्य सा॥"

(ई॰प्र॰ 2-4-1)

"यदित्थमाभासनमिच्छाप्राणितमेतदेव भगवतः करणं निर्मातृत्वं स्रष्टृत्वमुच्यते, इति सूत्रार्थः।"

(ई॰प्र॰वि॰वि॰ खं॰ 3, पृ॰ 185)

~बाह्यपूजादौ——न्यासावाहनादिरूपा भूयसी। यथा—
"क्रियातिभूयसी……………………।"

(तं॰आ॰ 21-18)

~बीजभावे——(1) परमस्य शिवस्य या परा पूर्णा च विमर्शरूपता सैव तस्य सिसृक्षारूपतां प्राप्नुवती, प्रसरे प्रवर्तमाना सती तस्य क्रियेत्युच्यते। यथा—

"इह इच्छैव भगवतः क्रिया, यदुपसंहरिष्यते ……
……… ………एवमिच्छैव हेतुता कर्तृता क्रिया।"

(ई॰प्र॰ 2-4-21)

"चैत्रस्यापि पचामीति यैवेच्छा, सैवाधिश्रयणादिस्पन्दसहस्रेऽप्यनपायिनी स्वात्मनाऽक्रमा अपि क्रमरूपभावाभासरूपिता भाति। तथैव परमेश्वरस्यापि "ज्ञातृज्ञेयक्रम उल्लसतु' इति या स्वात्मनीच्छा "ईशे, स्फुरामि प्रत्यवमृशामि घूर्णे" इत्यादि-परमार्था सा स्वयमक्रमा अपि प्रमातृप्रमेयभेदोपरागात् सक्रमा भाति।"

(ई॰प्र॰वि॰वि॰ खं॰ 3, पृ॰ 24-25)

~लोकव्यवहारे——मूलतः सम्बन्धरूपतैव विविधत्वेनावभासभाना क्रिया-सामान्य-द्रव्य-दिक्-कालादिरूपतया व्यवहारविषयतामायान्ती तथा तथाऽऽभासते।

द्र॰ सम्बन्ध-विस्तरः इति।

~शिवे——शुद्धसंविन्मये शिवे तस्य प्रकाशात्मकता ज्ञानं विमर्शात्मकता च क्रिया। यथा—

"देवस्य क्रीडादिमयस्य, शुद्धे पारमार्थिक्यौ ज्ञानक्रिये। प्रकाशरूपता ज्ञानं, तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया। विमर्शश्चान्तःकृतप्रकाशः; इति विमर्श एव परावस्थायां ज्ञानक्रिये।"

(ई॰प्र॰वि॰ खं॰ 2, पृ॰ 338)

शुद्धविद्याक्षेत्रे——सदाशिवेश्वरभुवि ज्ञानशक्तिप्रधाना सदाशिवदशा, क्रियशक्तिप्रधाना चेश्वरदशा। यथा—

"परापरावस्थायां तु भगवत्-सदाशिव-भुवि इदन्तासामानाधिकरण्यापन्नाहन्ता-विमर्श-स्वभावे। अपरावस्थायां च मायापदे इदम्भाव-प्राधान्येन वर्तमाने इति विशेषः।"

(ई॰प्र॰वि॰ खं॰ 2, पृ॰ 338-39)

~सक्रमा——एकरसभेदरसिके मायीये पशुप्रमातरि योपक्रमाद्यपवर्गपर्यन्ता क्रियाऽसौ नियतं सक्रमैव, क्रमावभासनसमर्थेन भगवताऽसौ निजया पारमैश्वर्य-लीलयैव तथाऽवभासिता भवति।

द्र॰ 'क्रिया~अक्रमा' इति

लौकिकी क्रिया कालशक्तिप्रभावितत्वेन सक्रमा। यथा—

"सक्रमत्वं च लौकिक्या: क्रियाया: कालशक्तित: ।
घटते न तु प्राभव्या: ……………… ……॥

(ई०प्र० 2-1-2)

क्रियाकालगुणोत्तरम्——किमपि तन्त्रशास्त्रपुस्तकम् । यथा—

"यदुक्तं क्रियाकालगुणोत्तरे—
वातिका: पैत्तिकाश्चैव श्लैष्मिका: सन्निपातजा:

इत्युपक्रम्य—

दुश्चिकित्स: स उन्मादो विज्ञेय: सान्निपातिक: ।"

(ने०तं०उद्ध० खं० 2, पृ० 199)
द्र० (तदेव पृ० 157, 158, 198)

क्रियाधिकार:——ईश्वरप्रत्यभिज्ञाया: द्वितीयो भाग: । अत्र क्रियाया: स्वरूपत: स्वभावतश्च प्रतिपादनं द्रव्यदिक्कालसामान्यसम्बन्धादीनां दर्शनविद्योपयोगिनां पदार्थानां स्वरूपस्वभावयोर्निरूपणञ्च कृतम् । तदनन्तरं प्रमाणनिरूपणं कार्यकारणभावतत्त्वविवेचनं च निवद्धं वेदितव्यम् । विमर्शिन्यामाह्निकचतुष्टयेऽयमधिकारो विभक्तोऽभिनवगुप्तपादै: ।

क्रियाशक्ति:——(1) परमेश्वरस्यान्तरंगशक्तीनां मध्ये पञ्चमी शक्ति: । अनयैव परमशिवस्य परमेश्वरत्वं स्फुटतयाभिव्यक्तं भवत्यन्तर्बहिरुभयरूपतया । क्रियाशक्तिरूपतया दीव्यन्त्येव परा चिच्छक्ति: पारमैश्वर्यात्मकस्य स्वभावस्य परिपूर्णचमत्काररसमांस्वादयन्ती विजयते । अस्या बहिर्मुखाभिव्यक्तिरीश्वरतत्त्वे सम्भवति । तत एव तस्यैव तत्त्वस्याधिष्ठातु: पारिभाषिकी संज्ञा "ईश्वरभट्टारक" इति न हि तदुपरितनतत्त्वाधिष्ठातृणां सदाशिवप्रभृतीनामेषा संज्ञा । क्रियाशक्तेरेव हि बहिर्मुखस्य विकासस्य फलं सर्वस्यापि जगत: सृष्टिस्थितिसंहारवैचित्र्यम् । अस्या ऐश्वर एव तत्त्वेऽभिव्यक्ति: प्रतिपादिता मुख्येषु दर्शनग्रन्थेषु । यथा—

"तदेवं प्रसृतो देव:………………………।
……………… कदाचिदैश्वरीं स्थितिम् ॥
क्रियाशक्ति-समाभोगात् …… …………"

(शि०दृ० 1, 30-31)

"शक्ति-शक्तिमतोरभेदाद् ज्ञानशक्तिमान् सदाशिव: उद्रिक्तक्रियाशक्तिरीश्वर: ।"

(शि०दृ०वृ० पृ० 37)

"किन्त्वान्तरदशोद्रेकात् सादाख्यं तत्त्वमादित: ।
बहिर्भावपरत्वे तु परत: पारमेश्वरम् ॥"

(ई०प्र० 3-1-2)

"बहिर्भावस्य-क्रियाशक्तिमयस्य परत्वे-उद्रेकाभासे सति पारमेश्वरं-परमेश्वरशब्दवाच्यमीश्वरतत्त्वं नाम ।"

(ई०प्र०वि० खं० 2, पृ० 191)

"ईश्वरो बहिरुन्मेषो निमेषोऽन्त: सदाशिव: ।

(ई०प्र० 3-1-3)

"ईश्वरतत्त्वमेवोन्मेषशब्देनोक्तम् । विश्वस्य हि स्फुटत्वं बाह्यत्वमुन्मेषणं निमेषणं त्वस्फुटत्वापादनमन्तारूपतोद्रेचनम् । इति निमेष: सदाशिवतत्त्वं यतो जगत: प्रलय: । ……… ……… ……………………………… एवं निमेषोन्मेषशक्ती एवं सदाशिवेश्वरौ ।"

(ई०प्र०वि० खं० 2, पृ० 194-95)

"क्रियाशक्त्या तु सृजति ।"

(ने०तं० 21, 43)

(2) यत्तु तन्त्रालोके तन्त्रसारे च क्रियाशक्तिमयत्वं विद्यातत्त्वस्य ज्ञानशक्तिमयत्वं चेश्वरतत्त्वस्योक्तं, यदनुसारमेव च योगराजेनापि विषयोऽयं व्याख्यात: परमार्थसारटीकायां; तदुपासनक्रमदृष्ट्या तथा प्रतिपादितं वेदितव्यं, न दर्शन-सिद्धान्तदृष्ट्या । तत्त्वाध्वधारणायां हि तत्तत्तत्त्वादुपरितनैव पारमेश्वरी शक्तिर्भावनाविषयतां नीयते । तेनेश्वरतत्त्वोपासने तस्य तत्त्वस्य स्रोत:स्थानीया पारमेश्वरी ज्ञानशक्तिर्भाव्यते तत्तत्त्वरूपतया । क्रियाशक्तिप्रधानादीश्वरतत्त्वादेव यतो विद्यातत्त्वस्य जनिस्ततो विद्यातत्त्वोपासनायां तदुपरिवर्त्तिनीश्वरतत्त्वेऽभिव्यक्ततामुपयाता तत्र च स्फुटं परिस्पन्दमाना भगवत: क्रियाशक्तिरेव भावनाविषयतां नीयते । अनयैव नीत्या तत्त्वक्रमेणारोहणं कुर्वन् साधक: पर्यन्ते परशिवात्मतां साक्षात्कुर्वंस्तत्रैव स्वात्मानं सुविश्रान्तं कर्तुं शक्नोति ।

ततो नात्र विषये मतभेदशङ्का कार्या सुधीभि: । स्पष्टीकृतोऽयं विषयो मौखिकेनोपदेशेनास्मद्गुरुवर्यै: श्रीमदमृतवाग्भवाचार्यै: स्वकीयां साक्षादनुभूतिमाश्रित्येति ज्ञेयं सुधीभि: ।

(3) स्रष्टव्यस्य जगतो बहिरभिव्यक्तिं प्रति पारमेश्वरस्य परस्य स्पन्दस्य प्रबलतमोऽसौ समुद्यमो येन सद्य एव प्रथमं प्रमातुरन्तरेव सामान्याकारस्य स्रष्टव्यस्य स्फुट: आभासो भवत्यग्रे च स्फुटा बाह्या-सृष्टि: सञ्जायते । यथा—

" …… तदर्थं हि यो ऽसौ स्थूल: समुद्यम: ।
सा क्रियाशक्तिरुदिता तत: सर्वं जगत् स्थितम् ॥"

(शि० दृ० 1-21)

~धारणा-विशेषे——

"यदा स्वतन्त्रालुप्ता सा क्रिया करणरूपिणी ॥
वर्णरूपाष्टभेदेन स्फोटादिध्वनिरूपिणी ।
मातृका सा विनिर्दिष्टा क्रियाशक्तिर्महेश्वरी ॥
क्रियाख्या परमा सा तु सर्ववाङ्मयरूपिणी ।
एवं क्रियेति सा प्रोक्ता एकानन्यस्वभावजा ॥
स्वभावोत्था स्वभावार्था स्वा स्वत: स्वोदिता शिवा ।"

(ने० तं० 21/37-40)

(2) भगवतो विमर्शपरूता ।

द्र० 'क्रिया~शिवे' इति ।

(3) अभिन्नेऽपि स्वात्मनि परशिवे यो भेदावभासस्तस्य कारणभूता या शक्ति: सा क्रियाशक्तिस्तस्य । यथा—

"स्वात्मन्यभिन्नेऽपि विभोरेवं भेदावभासनात् ॥
क्रियाशक्तिरिति प्रोक्ता यया कर्ता महेश्वरः ।

(मा०वि० वा० 1, 307-308)

अभेदेऽलुप्तेऽपि यया शक्त्या भेदास्यावभासोऽसौ परमेश्वरस्य शक्तिः क्रियाख्येति तात्पर्यम् ।

(3) क्रमात्मकस्य क्रियाव्यवहारस्यावभासिका परमेश्वरस्य स्वतन्त्रेच्छा तस्य क्रिया-शक्तिः । यथा—

"उभयथा अस्य क्रियाशक्तिः—क्रमरूपक्रियानिर्माणसामर्थ्यं क्रमरूपक्रियोपरागश्च ।"

(ई०प्र०वि० खं० 2, पृ० 24)

"किन्तु निर्माणशक्तिः साप्येवं विदुष ईशितुः
तथा विज्ञातृविज्ञेयभेदो यदवभास्यते ॥"

(ई० प्र० 2-1-8)

(4) अन्तःस्फुटतयावभासमानं प्रमेयं प्रति या प्रमातुर्बहिरुल्लिलासा सा तस्य क्रियाशक्तिः । एवं स्फुटप्रमेयतया जगतोऽवभासनेच्छैव क्रियाशक्तिः । यथा—

"एवम्भूतमिदं वस्तु भवत्विति यदा पुनः ।
जाता तदैव तद्वस्तु कुर्वत्यत्र क्रियोच्यते ॥"

(उद्ध०तं०आ०वि० खं० 1, पृ० 18)

एतेनैतत् स्पष्टतां याति यदन्तःस्फुटप्रमेयावभासनं क्रियैवेति। स्पष्टीकरणप्रयोजनकमेतद् बहुप्रकारकं व्याख्यानम् । ततो नात्र मतभेदः कोऽपि शङ्कनीयः ।

~प्रभोः——तस्य स्वस्वभावविमर्शनमभेदभावतः एव ।

"पत्युर्विश्वप्रभोः सत्ता स्फुरत्ता भवने कर्तृतैव शुद्धविमर्शरूपा क्रियाशक्तिः ।"

(ई०प्र०वि०वि० खं० 3, पृ० 363)

ततो न भवनं क्रियाशक्तिरपि तु भवने कर्तृत्वरूपा सा, तत्फलं हि भवनं, यत् सदाशिवपदेऽवभासते इति ।

~बाह्यपूजासु——परैव पारमेश्वरी शक्तिर्गृहीत-क्रियाशक्तिरूपा सती पञ्चकलादिवैचित्र्यावभासिनी च सती ध्येया भवति। यथा—

"भावयेत्त्रिविधान्पाशान्पञ्चतत्त्वाध्वव्यापकान् ।
त्रयाणां व्यापिका शक्तिः क्रियाख्या पारमेश्वरी ॥
शान्त्यतीतादि भेदेन पञ्चसंज्ञा प्रतिष्ठिता ।"

(स्व तं० 3/181-2)

"येयं परमेश्वरस्य नित्यावियोगिनी शक्तिः सा क्रियाख्या गृहीतक्रियाशक्तिभूमिका सती इदन्तावैचित्र्योट्टङ्कनात् शान्त्यतीतादिपञ्चधात्वं प्राप्ता त्रयाणां मलानां व्यापिका ।"

(स्व०तं०उ० खं० 3, पृ० 238)

~बीजमन्त्रमयी——'क्षीं' इति ।

"चतुर्थस्वरसंयुक्तं हान्तं बिन्दुविभूषितम् ।
क्रियाशक्तिः समाख्याता सर्वसृष्टिप्रकाशिका ॥"

(स्व० तं० 1-66)

"चतुर्थः स्वरः ईकारः, हान्तं =क्ष वर्णः ।"

(स्व०तं०उद्० खं० 1, पृ० 54)

~मातृकासु——(1) ए, ऐ, ओ, औ इति वर्णचतुष्टयम् । यथा –

"अनुत्तरानन्दशक्तिस्त्रिकोणाद्वृत्तियोगतः ।
तथैवोन्मेषयोगेन क्रियाशक्तेः स्फुटं वपुः ॥"

(अ०प्र०पं०, 35)

~विशेषतः——(2) पारमेश्वरीणां शक्तीनां यत् स्वमध्य एव परस्परसंघट्टवैचित्र्यं तदेव हि क्रियाशक्तेः स्फुटं रूपम् । अनुत्तरानन्दादिशक्तीनामिच्छाज्ञानादिभिः शक्तिभिः सह चेत् संघट्टरूपा स्थितिर्न भवेत्तर्हि क्रियाशक्तेः स्फुटोऽवभास एव न भवेत् । तत्संघट्टवशादेव क्रियाविकासः, तद्विकासादेव च विश्वविसर्गः । तच्च सन्ध्यक्षरात्मकम् । यथा —

"स्वात्मसंघट्टवैचित्र्यं शक्तीनां यत् परस्परम् ॥
एतदेव परं प्राहुः क्रियाशक्तेः स्फुटं वपुः ।"

(तं० आ० 3, 103-104)

अनुत्तरोऽकारः, आनन्द आकारः, तयोरिच्छात्मकेनोन्मेषाख्येन च इकारेण, उकारेण च यः संघट्टः स एव हि स्फुटोऽवभासः क्रियाशक्तेः । स च सन्ध्यक्षरचतुष्टयरूपः अत्रेच्छेषणायाः उन्मेषेण चोनताख्यस्य वर्णस्योपलक्षणं वेदितव्यम् ।

~विस्तरतः——"कारिकासप्तकेनाप्रतिहतमेव स्वातन्त्र्यं क्रियाशक्तिरूपं भगवतो निर्वाह्यते ।"

(ई०प्र०वि०वि० खं० 3, पृ० 28)

तच्च कारिकासप्तकमीश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्या द्वितीयेऽधिकारे द्वितीये विमर्शे सुव्याख्यातम् । तद्धि —

"क्रिया सम्बन्धसामान्य ……… इत्यारभ्य,
तेन न भ्रान्तिरीदृशी……………इत्यन्तम् ॥"

एतत् कारिका-सप्तकमीश्वरप्रत्यभिज्ञायाः द्वितीयस्याधिकारस्य द्वितीयमाह्निकम् ।

~सुस्फुटा (मातृका)——अनुत्तरानन्दशक्ती यदोन्मेषेणोनतया वा संघट्टमासादयतस्तदा ओकारस्य स्थितिः । यदा पुनस्तौ ओकारेणापि भूयः संघट्टमाप्नुतस्तदा औकारस्य स्थितिः । औकार एव क्रियाशक्तेः स्फुटतमं रूपम् । यथा—

"ते एवोन्मेषयोगेऽपि पुनस्तन्मयतां गते ॥
क्रियाशक्तेः स्फुटं रूपमभिव्यङ्क्तः परस्परम् ।"

(तं० आ० 3, 96-97)

"क्रियाशक्तेः सन्ध्यक्षरेषु यथाक्रमम् अस्फुटं, स्फुटं, स्फुटतरं, स्फुटतमं च रूपमस्ति इत्यावेदितम् ।"

(तं०आ०वि० खं 2, पृ० 106)

तत्रास्फुटम्-ए इति, स्फुटम्-ऐ इति। स्फुटतरम्-ओ इति स्फुटतमं च औ इति ।

यद्यपि सन्ध्यक्षराणां सर्वेषां क्रियाशक्तिमयत्वं तथाप्यौकार एव स्फुटतमाऽसौ शक्तिः । औकारेणोपायभूतेनास्याः पूर्णतया साक्षात्कारो भवतीति तात्पर्यम् ।

क्रियोपाय:——आणव उपाय:। भावनाभ्यासविशेष:। भावनाया: अङ्गद्वयम्, भाव्यस्याभासस्तदनुकूलश्च प्रयत्न:। यत्राभ्यासे आभासस्यैव प्राधान्यमसौ ज्ञानोपाय: शाक्तोपायापरनामा; यत्र पुनराभासनानुकूलस्य बौद्धस्य यत्नस्यैव प्राधान्यमसौ बहुविधकल्पनात्मक-क्रियांश-प्रधानोऽभ्यास; क्रियायोग: क्रियोपाय इति, आणवोपाय इति च कथ्यते। यथा—

"सोपायत्वेऽपीच्छा वा ज्ञानं वा क्रिया वाऽभ्युपाय इति त्रैविध्यं शाम्भव-शाक्ताणवभेदेन समावेशस्य।"

(तं०सा० पृ० 7)

न हि क्रियाज्ञानेच्छाख्या: शक्तय: कदाचिदपि परस्परं वियुज्यन्ते। केवलं गुणप्रधानभावतयैव तत्तदेकशक्तिरूपतया व्यवहार: शास्त्रे।

~द्विविध:——भेदनिष्ठ: क्रियोपाय: द्विप्रकारतयाऽभ्यस्तो देह प्राणबुद्धयादीन् स्वाङ्गभूतान् विषयानालम्ब्य, तत्त्वभुवनादीन् वर्णमन्त्रादीश्चात्मन: सकाशाद् बाह्यान् विषयानालम्ब्य ततो ग्राह्यबाह्यभेदेन द्विविध: क्रियोपाय:। यथा—

"क्रियोपायेऽभ्युपायानां ग्राह्यबाह्यविभेदिनाम्।"

(तं० आ० 1-164)

"ग्राह्या: उच्चाराद्या: बाह्या: कुण्डमण्डलादय:।"

(तं०आ०वि० खं० 1, पृ० 199)

क्रीडा——आनन्दोच्छलत्तोद्भावित-चमत्काराभिव्यक्तिप्रयोजन: कायादिस्पन्द: क्रीडा। यथा—

(1) "हर्षानुसारी स्पन्द: क्रीडा।"

(शि०दृ०वृ० पृ० 29)

(2) "क्रीडते—हर्षानुसारेण स्पन्दते।"

(म०मं०प० पृ० 63)

आनन्दपरिस्पन्द एव हि क्रीडाया: बीजम्, आनन्दास्वाद एव च तस्या: प्रयोजनं, स्वयं च तस्या आनन्दानुकूलव्यापारात्मकत्वमिति त्रिष्वप्यवस्थासु क्रीडाऽऽनन्दमयी लीलैव।

क्रोधना~मुद्रा——क्रोधभरितत्वप्रदर्शिनी चतुर्विंशतितत्त्वानि च मान्त्रे वपुषि भावनया विलापयन्ती मुद्रा क्रोधना मन्त्रसिद्धानाम्। यथा—

"क्रोधनया-क्रोधव्यग्रया।"

(वि०भै०उ०, पृ० 66)

"चतुर्विंशतितत्त्वकं मान्त्रे वपुषि या क्रोडीकरोति सा क्रोधिनी इति मन्त्रसिद्धानां मुद्रा।"

(तदेव पृ० 67)

"स्वात्माधारसम्भवात् क्रोधिनी।"

(तदेव पृ० 67)

"पृथिव्यादिप्रकृत्यन्तं तत्त्वसन्दोहमन्त: संजिहीर्षालक्षणेन क्षोभेन स्वात्मरूपतां नयति क्रोधनी।"

(म०मं०प० पृ० 90)

क्रोधना, क्रोधनी, क्रोधिनी चेति त्रिधोच्यते मुद्रैषा।

क्रोधनी~मुद्रा——क्रोधनैव क्रोधनी क्रोधिनीति वा।

यथा—

"चतुर्विंशतितात्त्विकं मान्त्रे वपुषि या क्रोडीकरोति सा क्रोधनी-इति मन्त्रसिद्धानां मुद्रा।"

(मा०प्र०वि० पृ० 87)

"स्वरूपाक्षमतायामपि तद्ग्रासगृध्नुस्फुरत्तासारैव तद्रूपैव क्रोधिनी।"

(मा०वि० पृ० 32)

क्रोधराज:~मन्त्र:——क्षूं इति बीजपिण्ड:। यथा—

"संहार: षष्ठसंयुक्त: षडन्तेन समन्वित:॥
क्रोधराज: समाख्यात:…………… ।"

(स्व०तं० 1, 78-79)

संहार:=क्ष, षष्ठेन = ऊकारेण युक्त:, षण्णां वर्गाणामन्तिम: मकारस्तेनानुस्वारतां प्राप्तेन समन्वित: इति।

क्रोधेश:——भैरवागमेषु प्रथमेऽष्टके गणित: आगमविशेष:। यथा—

"स्वच्छन्दो भैरवश्चण्ड: क्रोध उन्मत्तभैरव:।"

(उद्ध० तं०आ०वि० खं० 1, पृ० 42)

क्लृप्तम्——शिव एव लीलाविलासक्रीडायां स्वशक्त्या यद्रूपतयावतिष्ठते तद्रूपं क्लृप्तं तत्त्वभुवनभावादि विश्वम्। यथा—

"पृथिव्यादिरूपेण शिव: क्लृप्त: सम्पन्न: स्वयं स्थित: इत्यर्थ:।"

(शि०दृ०वृ० 133)

क्ष

क्ष——धरादिसदाशिवान्तं तत्त्वग्रामं क्रोडीकृत्य प्रकाशमाना शिवस्य या पराशक्तिस्तदभिव्यञ्जको मातृकावर्ण: शाम्भवोपायाभ्यासे। यथा—

"येन निखिलमेव यौगपद्येन मातृकाया: सतत्त्वं प्रदर्शितं भवतीति।"

(तं०आ०वि० खं० 2, पृ० 178)

क्षकार:——प्रसरप्रशान्तिस्थानभूतो वर्ण:। न तदग्रे कोऽपि प्रसर:। यथा—

"क्षकारस्य प्रसरशमनरूपत्वात्।"

(प्र०हृ० पृ० 50)

द्र० षट्त्रिंशत्तत्त्वदीक्षा, (1) विद्याराजस्य इति।

~तत्सृष्टि:——(1) योनिद्वय संयोगात् क्षकारस्य सृष्टि:, तच्च योनिद्वयं प्रथमा योनि:=ककार:, अन्त्या योनि: सकार:। तस्य ककारसंसर्गेण षकाररूपता। उभयोर्मेलनेन क्षकारस्य

सृष्टिः। सर्वान् योनिवर्गान् प्रत्याहृत्य स्थितोऽयं मातृकावर्णः। यथा—

"योनिसंयोगजः क्षकारः इति।"

(तं०सा० पृ० 16)

(2) योनिरूपाणामपि वर्णानां योन्यन्तरयोगेन वर्णान्तरसृष्टिः सम्भवति। तन्निदर्शनतया मातृकाक्रमे क्षकारः ककारसकारयोगेन। यथा—

"योनिरूपेण तस्यापि योगे क्षोभान्तरं व्रजेत्॥
तन्निदर्शनयोगेन पञ्चाशत्तमवर्णता।"

(तं०आ० 3-180, 181)

क्षणः —— (1) क्षणरूपः कालो ज्ञानानि भिनत्ति व्यवहारदृशा परं वस्तुतः कालस्य सूक्ष्मसूक्ष्मो योंऽशः क्षणः इति तस्य कलना ज्ञानाश्रितैव, यतस्तावन्मात्र एव कालभागः क्षणो यावदेकं ज्ञानं तिष्ठति। यथा—

"कालस्तु भेदकस्तस्य स तु सूक्ष्मः क्षणो मतः।
सौक्ष्म्यस्य चावधिर्ज्ञानं यावत्तिष्ठति स क्षणः॥
अन्यथा न स निर्वक्तुं निपुणैरपि पार्यते।"

(तं०आ० 7-25, 26)

तत एव जाग्रत्स्वप्नादौ व्यवहारसमाधिसमावेशादौ च तथा च पितृदेवरुद्रादिस्थितौ कालक्रमस्य कालपरिमाणस्य चात्यन्तं भिन्नभिन्नत्वम्। तासु तास्ववस्थासु ज्ञानांशविश्लेषणस्योत्तरोत्तरं सूक्ष्मसूक्ष्मतरत्वेन ज्ञानक्षणस्यापि विविधपरिमाणत्वात्।

(2) यावत्कालं बुद्धावेकस्य ज्ञानस्योदयस्तिष्ठति तावान् कालो लोकव्यवहारे क्षणः। अत एव स्वप्नजागरयोः क्षणस्य वैचित्र्यम्, स्वप्ने ज्ञानशक्तौ जागरापेक्षया वेग बाहुल्यात्। तुर्यायां च सुप्रभूतं वेगबाहुल्यम्। यथा—

"ज्ञानस्य हि यावानवस्थितिकालः स एव क्षणः। प्राणोदये चैकस्मिन्नेकमेव ज्ञानम्।"

(तं०सा० पृ० 60)

"यावत्येव हि संबित्तिरुदिता सुस्फुटा भवेत्।
तावान् क्षणो वर्तमानः कल्पो वान्यद्वयावधि॥"

(का०पा०सं० उद्ध० ई०प्र०वि०वि० खं० 3, पृ० 288)

चतुर्थः पादोऽत्र नैव स्फुटतां याति।

~गणितविधौ——

"मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः।"

(स्व तं०, 11/201)

क्षण-शून्यवादौ——वस्तु तावद्विज्ञानात्मकमेव। विज्ञानं च सदा क्षणिकमेवेति सर्वं जगद्वस्तुतः क्षणिकमेव। प्रवाह-नित्यतादृष्ट्यैव तत् चिरस्थायीति व्यवह्रियते लोके। शैवदृष्ट्या क्षणमपि नश्वरमेवेति क्षणिकवादोऽपि शून्यवाद एव पर्यवस्यति। यथा—

"तेन ये भावसङ्कोचं क्षणान्तं प्रतिपेदिरे।
ते नूनमेनया नाड्या शून्यदृष्ट्यवलम्बिनः॥"

(तं०आ० 11-114)

"क्षणस्याप्यवान्तरानेकक्षणयोगात् क्षणत्वमेव न पर्यवस्येत्, भावानां क्षणादूर्ध्वमवस्थानानभ्युपगमात् क्षणस्य चाव्यवस्थितेः क्षणमपि स्थितिर्न स्यादिति शून्यतैवावलम्बिता भवेत्।"

(तं०आ०वि० खं० 7/2, पृ० 89)

क्षालितत्वभावनम् —— कुण्डलिनीशक्तेरुभयतोमुखगतिशीलतायामाप्यायनावस्थायां विधीयमानो भावनाभ्यास-विशेषः। द्वादशान्तपदं भावनया चिद्रसेन प्रक्षाल्यते इव यतः। यथा—

"द्वादशान्तपतितेन शाक्तामृतेन तत्स्थानस्य क्षालितत्वभावनम्।"

(पं०त्री०वि०वृ० पृ० 5)

क्षुरिका मन्त्रः——कालरात्रिमन्त्र एव मालिन्यां क्षुरिकेति परिभाषितः। यथा—

"अध्यर्घार्णा कालरात्रिः क्षुरिका मालिनीमते।"

(तं०आ० 30-56)

कालरात्रिमन्त्रश्च "स्कृक्" इति।

"अध्यर्घार्णा" इति पदं न स्फुटतामत्र यात्यर्थतः।

क्षुरिकाविद्या——क्षुरिकामन्त्र एव।

क्षेमराजः——अभिनवगुप्तस्य शिष्याणां मध्ये येनैकेनैव शिष्येण विरचिता बहवो ग्रन्था अद्यापि लभ्यन्तेऽसौ क्षेमराजः। स च सर्वेषां ग्रन्थानां पुष्पिकासु स्वात्मानमभिनवगुप्तपादपद्मोपजीवीति निर्दिशति। क्वचित् क्वचित् स्वात्मानं राजानकोपनाम्नापि समुल्लिखति। राजपदान्तेनास्य नाम्नानुमातुं शक्यते यद् भूतिराजादित्यराज-हेलाराजादिवंशसम्बन्धी क्षेमराजः।

यस्तु क्षेमस्तन्त्रालोकेऽभिनवगुप्तेन कृतनामोल्लेखः। यथा—

"अन्ये पितृव्यतनयाः शिवशक्तिशुभ्राः।
क्षेमोत्पलाभिनव-चक्रक-पद्मगुप्ताः॥" इति

(तं०आ० 37, 67)

नासौ क्षेमराजः। यतोऽभिनवगुप्तपितृव्यतनयः सन्नसौ क्षेमगुप्त एव। द्वन्द्वान्ते श्रूयमाणं गुप्तपदं तस्यापि नाम्ना सम्बध्यते। ततो राजानकः क्षेमराजः सुनिश्चितमन्य एव।

तन्त्रालोके, परात्रींशिकाविवरणादौ चाभिनवगुप्तपादैर्बहूनां निजशिष्याणां नामोल्लेखः कृतोऽस्ति, केषाञ्चन गुणकीर्त्तनमपि कृतं वर्तते। परं क्षेमराजस्य नामोल्लेखो नैव क्वापि लभ्यते। इतश्च मधुराजोऽभिनवगुप्ताश्रमवर्णने गुरुनाथपरामर्शनाम्नि प्रशस्तिकाव्ये क्षेमराजमेवाभिनवगुप्तशिष्यगणप्रधानत्वेन सूचयति। तदेषा प्रहेलिकेव कापि समस्या।

अत्र त्रिप्रकारकं समाधानं सम्भवति। एकं तावदेवं यदभिनवगुप्तस्य ये अल्पवयस्का बालशिष्या अभूवंस्तेष्वेव प्रधानः क्षेमराजो,

वयोवृद्धैः कर्ण-मन्द्रादिभिः शिष्यैः सह तुलनां नाधिरोहति। ततो
बालत्वेन तन्त्रालोकादिनिर्माणकालादनन्तरमेवासावुपनीतोऽभव-
दाचार्यवर्येण। तत एव तेषु ग्रन्थेषु तस्य नामोल्लेखो नास्ति।
द्वितीयमेतत्समाधानम् - कर्णमन्द्रादयोऽभ्यासेनात्मसाक्षात्कारसचवं-
णायामेव रता अभूवन् न शास्त्रलेखनादौ। केवलं क्षेमराज. पुनः
शास्त्रलेखनेऽपि विशेष-रुचिमान् सिद्धहस्तश्चेति लेखनप्रसंगे मधु-
राजेन प्राधान्येन तस्यैव नामोल्लेखः कृतो न कर्णमन्द्रादीनामिति।
तृतीयं पुनः समाधानमेतद् यत् क्षेमराजो निजबुद्धिवैभवेन बहु-
श्रुतत्वेन चातीव गर्वशीलोऽभवदिति तस्य ग्रन्थेभ्यः स्फुटतां याति।
किं च भट्टकल्लटसदृशं पुराणं गुरुणामपि गुरुं प्रति मन्दादरतामपि
क्वचित् क्वचिद्दयनक्ति। तदेतदुभयं नैव रोचते स्म गुरुवरे-
भ्योऽभिनवगुप्तमहोदयेभ्यः। अत एव क्षेमराजं प्रत्युपेक्षादृष्टि-
भाग्भिस्तैर्न विशेषतस्तस्य सम्बोधार्थं कस्यापि ग्रन्थस्य निर्माणं
कृतम्। ततश्च न तस्य नामसंकीर्त्तनं कृतं शास्त्ररचनाप्रसंगेषु। अग्रे
च क्षेमराजेनापि तस्य तस्यैव शिष्यस्य नामोल्लेखस्तत्र तत्र कृतो
यदर्थं तत्तद्ग्रन्थनिर्माणं सम्पादितम्।

अभिनवगुप्तपादानां कृतिभिः काश्मीरशैवदर्शनस्य परिपूर्णो
विकासः समभवत्। ततोऽभिनवगुप्तवाक्यान्येव परं प्रमाणं सिद्धान्त-
विषये प्रयोगविषये च, यथोत्तरं मुनीनां प्रमाण्यात्॥

क्षेमराजेन विशेषां कीर्तिमर्जितुं शास्त्रवाक्यानां द्रविड-
प्राणायामनीत्याऽभिनवया दृष्ट्या व्याख्यानं तथैव च नीत्याभिनव-
ग्रन्थनिर्माणं कृतम्। अभिनवगुप्तं यावच्छास्त्रसिद्धान्तानां स्फुटी-
करणार्थं यत्नः कृतो ग्रन्थकृद्भिर्व्याख्यातृभिश्च। परं क्षेमराजेन
सिद्धान्तानां क्लिष्टीकरणं प्रारब्धम् यशःकामतया। किञ्च
स्वात्मनो बहुतरशास्त्रवेतृत्वं प्रकटयितुमेव यथा यतितं तेन न तथा
शास्त्रार्थं सरलीकर्त्तुं स्फुटीकर्त्तुं वा।

भट्टाभास्करेण निजे शिवसूत्रवार्त्तिके सूत्राणां गुरुपरम्परोपदेश-
लब्धस्य तात्पर्यस्य प्रकटनं कृतम्। परं क्षेमराजेन निजबुद्ध्या
कल्पिता अर्थास्तत्रारोपिता बहुषु स्थलेषु। सूत्राणां प्रकरणत्रयस्यो-
पायत्रय तयायन्नामकरणं, तदपि क्षेमराजबुद्धिकल्पनाफलमेव,
न पारम्परिकोपदेशमूलं, न चापि युक्तिसंगतम्। चेच्छिवसूत्र-
प्रकरणत्रयेण क्रमेणोपायत्रयनिरूपणमेवाभिप्रेतमभविष्यत्तर्हि तत्र
द्वितीयस्मिन् प्रकरणे शाक्तोपायोचितयाग-होम-जप-व्रत-योगादीनां
निरूपणं, तृतीयस्मिंश्च क्रमेण ध्यानोच्चारादीनामानन्दोद्भव
कम्पादीनाञ्च निरूपणमभविष्यत्। तदियं प्रकरणानां विशेषनाम-
करणकल्पना क्षेमराजस्य निजैव, न गुरुपरम्परया प्राप्तेति।
शिवसूत्राणि मुख्यतया शाम्भवोपायोपदेशपराण्येव। शाम्भवो-
पायाभ्यासे सफलीभूते सति शाक्तोपायफलान्याणवोपायफलान्यपि
चानायासमेव योगिनमुपतिष्ठन्ते। तदेवमुपतिष्ठमानानां योगसिद्धी-
नामेव वर्णनादि शिवसूत्रस्य द्वितीयस्मिंस्तृतीयस्मिश्च प्रकरणे कृतं
वर्तते। नामानि च प्रकरणत्रयस्य परम्परानुसारं चित्प्रकाशप्रकरणं,
सहजविद्योदयप्रकरणं, विभूतिस्पन्द प्रकरणञ्चेति।

अभिनवगुप्त-प्रधानशिष्यत्वेन क्षेमराज्यस्येदं प्रधानकर्त्तव्यमभूद् यदसौ तन्त्रालोकतन्त्रसारादिग्रन्थान् विस्तृताभिष्टीकाभिर्विशदीकुर्यादिति। परं तं तथाविधं श्रममकृत्वैव स्तोत्रागमादिग्रन्थटीकास्तेन रचिताः, येन तन्त्रालोकटीका निर्माणसाहसोऽग्रे शताब्द्यनन्तरं जयरथेनैव कृतः। मालिनीविजयवार्त्तिकं चाद्यावधि टीकारहितमेव वर्तते। सैव वार्ता तन्त्रसारस्य। तत्रत्या देशभाषापंक्तयो नैव सर्वाः अर्थतो बुद्ध्यन्ते। एतत् सर्वं कर्त्तव्यं न कृतं क्षेमराजेन।

क्षेमराजेन शिवसूत्रे सुविस्तृता व्याख्या निर्मिता विमर्शिन्याख्या। परं तस्यां सूत्र तात्पर्यप्रकाशनार्थं तथा यत्नो नैव कृतो यथा स्वकीयस्य वैदुष्यस्य बहुश्रुतत्वस्य च प्रख्यापने। शिवसूत्रस्य यश्चतुर्थः खण्डो भट्टकल्लटेन तत्त्वार्थचिन्तामण्याख्यटीकया व्याख्यातोऽभूत्, तस्य विषये निर्देशोऽपि नैव कृतः क्वापि। केवलं क्वचित् क्वचित् स्पन्दसन्दोहादौ तत्रत्यानि सूत्राण्युद्धृतानि तेन। तदेतद् भट्टकल्लटविद्वेषित्वं न कथमपि शोभतेऽभिनवगुप्तशिष्यस्य। कालाध्वनिरूपणे पितॄणां हायनस्य प्रकरणे येषामाचार्याणां मतमभिनवगुप्तपादैर्दूषितं तेषां तं मतं प्रति समादर इव मनाक् संसूचितः क्षेमराजेन स्वच्छन्दतन्त्रस्योद्द्योताख्यायां टीकायाम्।

द्र० (तं०आ० 6, 137) इति
(तं०आ०वि० खं० 4, पृ० 119) इति
(स्व०तं० 11-208) इति च।

अर्वाचीनानां मध्ये शिवोपाध्यायेन महानादरः प्रकटीकृतः क्षेमराजं प्रति। तदेषा समस्या सुविचारणीया सुधीभिः।

क्षेमराजेन स्तवचिन्तामणेष्टीका विजयेश्वरे क्षेत्रे निर्मितेति तेनोक्तम्—

"तेनार्थिप्रणयाद्दिनैस्त्रिचतुरैर्या क्षेमराजो व्यधात्
क्षेत्रे श्रीविजयेश्वरस्य विमले सैषा शिवाराधनी॥"

(स्त०चि० पृ० 130)

एतेनानुमातुं शक्यते यदसौ विजयेश्वर निवासी, अथवा तीर्थेषु परिव्रजनशीलो विरक्त आसीदिति।

~आलोचितः— —जयारथानुसारं क्षेमराजेन स्वच्छन्दतन्त्रस्य पंक्तीनां कासामपि पाठो यः परिवर्त्तितो नासौ समीचीनः।

"अत्र चोद्योतकृता "यदित्थमिति" अपास्य "एकमिति" पठित्वा देहारम्भिशुभाशुभकर्ममध्यादेकमशुभमप्यस्य शोधयेदिति व्याख्यातं तदुपेक्ष्यम् ……………… . ……………।"

(तं०आ०वि० खं० 9, पृ० 19)

~तद्ग्रन्थाः——(क) स्वतन्त्राः ग्रन्थाः—

(1) पराप्रावेशिका (शैवशास्त्राध्ययनारम्भ उपयोगिनी)
(2) स्पन्दसन्दोहः (स्पन्द-सिद्धान्त-प्रकाशकः)
(3) प्रत्यभिज्ञाहृदयम्—जटिलप्रायोऽयं ग्रन्थो विशेषतोऽन्तिमभागे।

(4) भैरवानुकरणस्तोत्रम्—अस्य 14 पद्यानि स्वच्छन्दोद्द्योते समुद्धृतानि स्वयं तेन। तान्येव लभ्यन्त इदानीम्।

(ख) आगमादिशास्त्रटीकाः—

(5) शिवसूत्रविमर्शिनी—सुविस्तृता वैदुष्यमयी शिवसूत्रटीका।

(6) विज्ञानभैरवोद्द्योतः — (कतिचिदेव पत्राण्यस्य लभ्यन्ते)

(7) स्वच्छन्दोद्द्योतः—(स्वच्छन्दतन्त्रटीका)

(8) नेत्रतन्त्रोद्द्योतः—(नेत्रतन्त्र-टीका)

(9) स्पन्दनिर्णयः —(स्पन्दकारिकायाः सुविस्तृता टीका)

(ग) स्तोत्रग्रन्थ-टीकाः—

(10) शिवस्तोत्रावलिविमर्शिनी।

(11) स्तवचिन्तामणि-टीका।

(12) साम्ब-पञ्चाशिका-टीका।

(घ) अलभ्याः ग्रन्थाः—

(1) विज्ञान-भैरवोद्द्योतस्य भूयान् भागः।

~प्रधानशिष्यः——मधुराजस्य विचारतोऽयमभिनवगुप्ताचार्याणां मुख्यः शिष्यः। यथा—

"आसीनः क्षेमराजप्रभृतिभिरखिलैः सेवितः शिष्यवर्गैः।
पादोपान्ते निषण्णैरवहितहृदयैरुक्तमुक्तं लिखद्भिः॥"

(गु॰ना॰प॰ 4)

~विजयेश्वरवासी——क्षेमराजो विजयेश्वरपत्तननिवासी। अथवा स्तवचिन्तामणिटीकामात्रं तेन विजयेश्वरे निवसता निर्मितम्। यथा—

"श्रीरामेण कृतात्र सद्विवृतिरित्येषा किमर्थेति मा
सन्तश्चेतसि कुध्वमस्ति विवृतौ कोऽपि प्रकर्षोऽत्र यत्।
तेनार्थिप्रणयाद्दिनैस्त्रिचतुरैर्या क्षेमराजो व्यधात्
क्षेत्रे श्री विजयेश्वरस्य विमले सैषा शिवाराधनी॥"

(स्त॰चि॰वि॰ पृ॰ 130)

केचन विद्वांसो भाषाशास्त्रमाश्रित्यैवं वदन्ति यन्महादेवपर्वतसमीपे यो ग्रामः 'क्षेमर' इति नाम्ना प्रसिद्धः, असौ क्षेमराजसम्बन्धत एव तथाभिधानः। परं प्रायशो ग्रामा नगराणि च राज्ञां नामभिः सम्बद्धान्यासन् न साधारणविदुषामित्यपि केचित् तर्कयन्ति। एवम्प्रकारकं श्रुतिसामान्यं न प्रमाणमित्यपि भाषाशास्त्रविदः केचित्।

~स्तोत्रकारः——न लभ्यमिदानीं क्वापि क्षेमराजीयं स्तोत्रं यत्पंक्तिरुद्धृता तेन:—

"तदुक्तं मयापि स्वस्तोत्रे—
उन्मूलितापि शतशो दलितापि सहस्रशः।
गोनासेवाप्रथोदेति द्रागत्र शरणं शिवः॥ इति"

(स्त॰चि॰वि॰ 64)

एकं तावद् 'ज्ञानक्रियाऽद्वयशतकाख्यम्' अमुद्रितं क्षेमराजीय स्तोत्रं वर्तते कश्मीरराज्यरिसर्च पुस्तकालये। श्लोकशतमितं हि तत् स्तोत्रम्।

क्षेत्रज्ञः——लिङ्गशरीरेण युक्तः क्रियाज्ञानवान् प्राणी। भगवन्तं विष्णुमारभ्य कृमिकीटोद्भिज्जादिपर्यन्ताः सर्वेऽपि सकलाख्याः प्रमातारः क्षेत्रज्ञाः। यथा—

"तदधरवर्त्तिनां विष्णुब्रह्मादीनां क्षेत्रज्ञत्वं पशुत्वं च यथोक्तं—
भिन्नप्रमेयप्रसरे ब्रह्मविष्णू ……।" इति

(ई॰प्र॰वि॰वि॰ खं॰ 3, पृ॰ 366)

द्र॰ 'अणुः~(तत्त्वतः)' इति।
'बुधः' इति च।

"क्षेत्रज्ञानां पुनरेतान्येव करणानि परमेश्वरनियतिशक्तिनियन्त्रितानि सन्ति घटादिपदार्थमात्रज्ञानकरणसमर्थान्येव, न तैः सर्वं ज्ञायते, नापि क्रियते।"

(प॰सा॰वि॰ पृ॰ 13)

द्र॰ 'अणुः' इति।

क्षेत्रवित्——
द्र॰ 'अणुः'~(तत्त्वतः) इति।

क्षेत्रम्——शैवसाधनोचितं स्थानम्, विशेषतः सिद्धादिप्रतिष्ठितशिवलिङ्गाधिष्ठितं शिवमन्दिराद्यायतनम्, तीर्थं वा गङ्गाद्वारादिरूपम्।

द्र॰ 'आयतनम्' इति।

~अनावश्यकम्——क्षेत्रसन्तानादिविषये यो नियमस्य निषेधः, यश्च क्षेत्रसन्तानादिविषये नियमस्य विधिस्तौ क्रमेण मतादिशास्त्रेषु सिद्धान्तशास्त्रेषु च। इह पराद्वैतप्रधाने त्रिके नैव विधिर्न चापि निषेधः, अपि तूभयथा स्वातन्त्र्यम्। यथा—

"एवं क्षेत्रप्रवेशादि संताननियमान्ततः॥
नास्मिन् विधीयते तद्धि साक्षान्नोपयिकं शिवे।
न तस्य च निषेधो यन्न तत्तत्त्वस्य खण्डनम्॥
विश्वात्मनो हि नाथस्य स्वस्मिन् रूपे विकल्पितौ।
विधिर्निषेधौ वा शक्तौ न स्वरूपस्य खण्डने॥"

(तं॰आ॰ 4, 270 तः 272)

~योगस्थितिरूपम्——रुद्रशक्तिसमावेशावस्थैव क्षेत्रम्, यतस्तस्यां सम्पन्नायां सर्वपापक्षपणं सर्वस्माच्च सर्वेषां त्राणं भवति। परा परमेश्वरताभावनाप्येवंविधकार्यकरणसमर्था सती क्षेत्रं शिवयोगिनः कृते। यथा—

"क्षपणात् सर्वपापानां त्राणात् सर्वस्य पार्वति॥
रुद्रशक्तिसमावेशस्तत् क्षेत्रं भावना परा।"

(वि॰भै॰ 150-51)

(2) सामान्यतस्तु क्षेत्रं साधनसिद्धिप्रदं विशिष्टं देवायतनादि स्थानम्।

क्षेपः~कालीनये——अभिन्नस्यापि प्रमेयप्रमाणादेः स्वात्मनो विभिन्नतयाऽवभासनं क्षेपः। स्वतो बहिः प्रक्षेप इवायम्। यथा—

"स्वात्मनो भेदनं क्षेपः।"

(तं०आ० 4-174)

"भेदनमिति-बहिरुल्लासनम्।"

(तं०आ०वि० खं० 3, पृ० 204)

"स्वात्मनः स्वात्मनि स्वात्मक्षेपो वैसर्गिकी स्थितिः।"

(तं०आ० 3-141)

"क्षेपः तत्तदाभासवैचित्र्येणान्तर्बहीरूपतया परिस्फुरणमिति।"

(तं०आ०वि० खं० 2, पृ० 144)

~प्रणवकला——बिन्दुरूपायाः कलाया नामान्तरं त्रिशिरोभैरवोक्तम्। बिन्दुरीश्वरदशा। तस्यामेव हि प्रमेयांशस्य स्फुटो य आभासोऽसौ प्रमात्रंशाद् बहिः क्षेप इव संस्तथोक्त आगमे। यथा—

(क) "बिन्दुनादादिका व्याप्तिः श्रीमत्त्रैशिरसे मते।
क्षेपा क्रान्ति························· ·······।
························· ·····शब्दिताः॥"

(तं०आ० 30-12-13)

(ख) "क्षेपस्तु कथितो बिन्दुः···········।" (उद्धरणम्)

(तं०आ०वि० खं० 12, पृ० 180)

(ग) "बिन्दोः·····························।
············बहिरुल्लसनमेव सतत्त्वम्।"

(तं०आ०वि० खं० 12, पृ० 179)

क्षोभः~अणोः——(1) भोगलोलिकस्याणोर्भोगप्राप्तये कार्मस्य मलस्य सहकारिकारणतया स्थितः क्षोभश्चाञ्चल्यम्। तच्चेश्वरेच्छावशादस्य जायते। यथा—

"क्षोभोऽस्य लोलिकाख्यस्य सहकारितया स्फुटम्।
तिष्ठासायोग्यतौन्मुख्यमीश्वरेच्छावशाच्च तत्॥"

(तं०आ० 9, 143)

"तेषामणूनां स मल ईश्वरेच्छावशाद् भृशम्।
प्रबुध्यते······························॥"

(तं०आ० 9, 147)

"भोगावेशमयत्वेन प्रमातृक्षोभरूपत्वात्।"

(तं०आ०वि० खं० 7/2, पृ० 49)

द्र० लोलिका इति।

(2) देहादावहम्भावप्रत्ययः।

"क्षोभः प्रतिनियतशरीराद्यालम्बनाहंप्रत्ययात्ममायीय उपप्लवः।"

(स्प०वि० पृ० 39)

"यदा क्षोभः प्रलीयेत तदा स्यात् परमं पदम्।"

(स्प०का० 9)

"क्षोभः "अहमिति" प्रत्ययभावरूपः।"

(स्प०सं० पृ० 8)

स च परिमितोऽहंप्रत्यय इति वेद्यम्।

"क्षोभो विकारोऽशुद्धिजनितो देहाहम्प्रत्ययरूपो · ······।"

(स्पं०प्र० पृ० 21)

~अनुत्तरस्य——अनुत्तरस्य परशिवस्य विसर्गात्मतापत्तिः, तत एव हि कादिहान्तवर्णसृष्टिः, धरादिशक्त्यन्ता च तत्त्वसृष्टिः। यथा—

"यतोऽनुत्तरनाथस्य विसर्गः कुलनायिका।
तत्क्षोभः कादिहान्तं तत्प्रसरस्तत्त्वपद्धतिः॥"

(तं०आ० 5-67)

स एव हि परः स्पन्दः पारमेश्वरः।

~तत्क्षोभणा——स्वात्मनि ज्ञेयस्यावभासनं क्षोभः। ज्ञेयस्य च स्वात्मनो बहिर्भावितयावभासनं क्षोभणा। संविदि द्वयमप्येतद् वर्तते। यथा—

"क्षोभकं संविदो रूपं क्षुभ्यति क्षोभयत्यपि॥
क्षोभः स्याज्ज्ञेयधर्मत्वं क्षोभणा तद्बहिष्कृतिः॥"

(तं०आ० 3-82, 83)

क्षोभोऽयं परमेश्वरस्य परः स्पन्दो येनासावहमितिविमर्शनिर्भरतया सततं चित्स्पन्दवानस्ति। सर्वं हि विश्वं तस्मिन्नहमिति विमर्शमयमेव स्पन्दते प्रकाशते च तथैव सदा। तथा विमर्शनप्रकाशन-परिस्पन्दनं पारमेश्वरः क्षोभः। असौ परमेश्वरो निजां पारमेश्वरीं शक्तिं सदा बहिर्भावाभिमुख्येन परिस्पन्दयति येनेदमंशस्याहमंशाद् भिन्नतयाप्यवभासो जायते प्रतिबिम्बकल्पतया। सैषा परशिवस्य क्षोभणात्मिका स्वभावभूताऽपरस्पन्दोन्मुखतेति ज्ञेयं सुधीभिः।

क्षोभविलयः——शिवानुग्रहात् प्राप्तदीक्षस्य साधकस्य साधनाभ्यासफलत्वेन भोगलोलिकायाः या शान्तिरसौ क्षोभविलयः।

~तत्फलम्——हानादानाङ्गपरिस्पन्दः क्षोभः। तच्छान्तिः क्षोभविलयः। तेन स्वरूपे स्थितिः। शाम्भवोपायरूपोऽयं क्षोभविलयाभ्यासः। यथा—

"निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिणः।
यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम्॥"

(स्प०का० 9)

ख

ख~मातृकासु——(1) कवर्गस्य द्वितीयो वर्णो जलतत्वस्थानीयः।

(2) असौ मातृकावर्णो यदभ्यासतः स्वात्मनः शक्तिविशेष एव स्वात्मचित्प्रकाशे स्वलीलाविलासत एव जलतत्त्वरूपतया प्रतिफलितः सन् स्वात्मानं तत् प्रतिबिम्बसुन्दरमभिव्यञ्जयति।

~वीजमन्त्रः——बिन्दोरागमिकं नाम । यथा—
"ख विन्दुः ।"
(तं०आ०वि० खं० 12, पृ० 200)

खकारः——
द्र० 'पददीक्षा, (7) त्रितत्त्वदीक्षा' (2)

खटिकासूत्रम्——मण्डललेखनसाधनविशेषः । न सम्यक् स्पष्टीकृतेयं परिभाषा । यथा—
"भ्रामयेत् खटिकासूत्रम् ।"
(तं०आ० 31-109)
मण्डलाकाररेखालेखनसाधनभूतं सूत्रमिदं भवितुमर्हति ।

खट्वाङ्गमुद्रा——लक्षिता यथा—
"तिर्यक्कृत्वा करं वामं कनिष्ठाद्यङ्गुलित्रयम् ।
अंगुष्ठेनाक्रमेद्देवि ऋज्वीं कृत्वा प्रदेशिनीम् ॥
पराङ्मुखं करं कृत्वा स्कन्धदेशे निवेशयेत् ।
खट्वाङ्गं कीर्तितं ह्येतत्··················॥"
(स्व०तं०प० 14, का० 3)
"एतन्मुद्रासतत्त्वमपि तत्रैव (श्रीभैरवानुकरण) स्तोत्रे प्रदर्शितम्—
निःशेषाहृतसारा मय्येव जगत्स्थितिस्तदेकमये ।
इति खट्वाङ्गकरङ्कोद्वहनच्छलतो ददास्याज्ञाम् ॥" इति
(स्व०तं० 3, प० 14, पृ० 111)
अस्याः सत्यं स्वरूपं योग्येन गुरुणैव दर्शयितुं शक्यम् ।

खड्गचन्द्रः——मण्डलाङ्गविशेषः ।

खड्गमुद्रा——लक्षिता यथा—
"अङ्गुष्ठेनाक्रमेद्देवि सकनिष्ठामनामिकाम् ।
मध्यमां तर्जनीं चोर्ध्वं खड्गमुद्रा प्रकीर्तिता ॥"
(स्व० तं० 14, 4)
"स्कन्धक्षेत्रे पराङ्मुखदक्षकरप्रदर्शनी वा एषा । ········
········ यदुक्तं तत्रैव (श्रीभैरवानुकरणस्तोत्रे)
अन्तः शक्तिकृपाणीं व्यनक्षि संसृतिविभेदिनीमसिना ।
निजशक्तिमहिमस्वीकृतसमस्तविश्वा हि वीरवराः ।"
(स्व०तं०उ० प० 14, पृ० 112)
अस्याः वास्तविकं स्वरूपं सद्गुरुणैव दर्शयितुं शक्यम् ।

खण्डचक्रम्—किमपि तन्त्रशास्त्रपुस्तकम् । यथा—
"एकादश इति खण्डचक्रोक्ताः ।"
(तं०आ०वि० खं० 1, पृ० 154)

खण्डचन्द्रः——मण्डलविशेषे अर्द्धवर्तुलाकारा रेखा । यथा—
"खण्डचन्द्रेण युज्यते सोऽत्रास्ति तदाकारमिति यावत्" ।
(तं०आ०वि० खं० 12, पृ० 233)

खत्रयम् ~अपरम्——स्पष्टीकृतं यथा—
"विन्दुनादब्रह्मरन्ध्रलक्षणखत्रयम् ।"
(तं०आ०वि० खं० 12, पृ० 309)
~परम्——स्पष्टीकृतं यथा—
"शक्तिव्यापिनीसमनात्मनाखत्रयेण ···· ···" ।
(तं०आ०वि० खं० 12, पृ० 309)

खदशकम्——उच्चारयोगाभ्यासे आलम्बनत्वेनाश्रितं पदार्थदशकम् । तत्र प्रमेयांशशून्यत्वं यन्न्यूनाधिकं तत्र तत्र पदार्थेषु तदेव स्वरूपत्वमवगन्तव्यं तेषाम् । तच्च खदशकमेतत्—
(1) आत्मा, (2) अणुः, (3) कुलमूलम्, (4) शक्तिः, (5) मूतिः, (6) चितिः, (7) रतिः, (8) ज्ञानशक्तिः, (9) क्रियाशक्तिः, (10) इच्छाशक्तिः । इति । यथा—
(क) "आत्माणुकुलमूलानि शक्तिर्मूतिश्चिती रतिः ।
शक्तित्रयं द्रष्टृदृश्योपरक्तं तद्विवर्जितम् ॥
एतत् खं दशधा प्रोक्तमुच्चारोच्चारलक्षणम्" ॥
(तं०आ० 5, 93-94)
(ख) (1) "आत्मा परमात्मा, (2) अणुः सङ्कुचित आत्मा, (3) कुलमूलं प्राणशक्तेः प्रभवस्थानं जन्माधारः (4) शक्तिर्मध्यमप्राणवाहिनी, (5) भूतिः स्वातन्त्र्यलक्षणमैश्वर्यम्, (6) चितिस्तुर्यातीतपदात्मिका परासंवित् ।"
(तं०आ०वि० खं० 3, पृ० 404)
अत्रोत्तरोत्तरं प्रमेयांशस्पर्शराहित्यमेवोत्कृष्टोत्कृष्टतरं शून्यत्वं ज्ञेयम् ।

~उपयोगतः——उच्चारयोगाभ्यासे योगी मूतिलक्षणं पञ्चमं खं स्वविमर्शेनारुह्य तद्दृष्ट्यैव द्वितीयमणुरूपं विमृशेदित्थम्—इदमणुरूपं खं वस्तुतः पूर्णपूर्णप्रथात्मकः आत्मैवेति । तत्फलत्वेन निजमणुरूपं खं परमात्मक-प्रथमखरूपतया विमृशेत् । तदनन्तरमासवत्यात्मकरतिरूपे सप्तमे खेऽवतिष्ठमानेन चेतसा सावधानं कुलमूलात्मके तृतीये सैषुम्ने खे समुच्चरन्तीं चतुर्थखरूपां प्राणशक्ति तदूर्ध्वं समुच्चारयेत् । तेन च क्रियाशक्त्यात्मकं प्रमेयभूनामकमष्टमं खं, प्रमातृभूनामकं च ज्ञानशक्त्यात्मकं नवमं खं क्रमेण परित्यज्य द्रष्टृदृश्यानुपरक्तम् इच्छा-साम्राज्यात्मकं दशमं खमधिष्ठाय स्वावष्टम्भबलेन तदाक्रम्य ततश्चितिनामकं तुर्यातीत-पदस्थं षष्ठं खं सम्यक् समाविशेत् । इत्येषा खदशकानुप्रवेशविधिरुच्चारयोगे । अत्र त्रिशिरोभैरववाक्ये यः क्रमो खदशकस्यान्यथा निबद्धोऽसौ रहस्यात्मकत्वेन वस्तुतत्त्वस्य गोपनायैव मन्तव्यः इति । यथा—

"अत्र जयरथकृता व्याख्या द्रष्टव्या तन्त्रालोकस्य विस्तरतस्तृतीये खण्डे 400 तः 402 पृष्ठेषु । संक्षेपतो यथा—

"ऐश्वर्यात्मस्वातन्त्र्यलक्षणं खमारूह्य ·· ·· अणुशब्दव्यपदेश्ये खे स्थितं ······ ··खं ·· ······पूर्णप्रथात्मकमवश्यज्ञेयमात्मानं विचारयेत् । ········खे रतावदवतिष्ठमानेन तदासक्तेन सावधानेन चेतसा खे कुलमूले शक्त्युत्पत्त्यात्मनि जन्माधारे स्थितं खं प्राणरूपां शक्तिमुच्चरेत्······ ऊर्ध्वं द्वादशान्तं नयेत्, येन क्रियाशक्त्यात्मनि खे गतं दृश्यं, तदुपरक्तां क्रियाशक्तिं प्रमेयभुवं, तथा खे ज्ञानशक्ताववस्थितं द्रष्टारं तदुपरक्तां ज्ञानशक्तिं प्रमाणभुवंत्यक्त्वा ········खं द्रष्टृदृश्याद्युपाधिवर्जितां स्वविमर्शमात्ररूपामिच्छाशक्तिं ······· स्वावष्टम्भबलेनाक्रम्य चितिशब्दाभिधेयं खं ········सम्यग्भैरवमुद्रानुप्रवेशक्रमेण विशेत् समावेशभाग्यभवेदित्यर्थः ।"

(तं०आ०वि० खं० 3, पृ० 400 तः 402)

~माहात्म्यतः——सत्स्वप्यन्येषु परतत्त्वप्रवेशोपायेषु खदशकानुप्रवेशयुक्तिरेवोत्तमा । अन्या युक्तीर्मध्यमा एव । यथा——

"भेदोपभेदभेदेन भेदः कार्यस्तु मध्यतः ।"

(तं०आ० 5, 96)

"यः पुनरन्यो भेदोपभेदात्मोपायभेदः सम्भवति स मध्यतः कार्यो मध्यमो नैवंविध उत्तम इत्यर्थः ।"

(तं०आ०वि० खं० 3, पृ० 407)

खपुष्पादिसत्ता——इदन्तावभासो हि बाह्यता, खपुष्पादिरपीदन्तया भाति, ततस्तस्यापि बहिः सत्ता संकल्पादौ । यथा—

"खपुष्पाद्यस्तितां ब्रूमस्ततो न व्यभिचारिता ।"

(तं०आ० 9 160)

खम्——शैवयोगे ध्येयं प्रमाण-प्रमेय-प्रपञ्चशून्यं किमपि चित्स्वभावं तत्त्वम् । यथा—

"खं-शून्यं, शक्ति-व्यापिनी-समनालक्षणम् ।"

(तं०आ०वि० खं० 17, पृ० 100)

~बीजम्——हकारस्यागमिकं नाम खमिति । यथा—

"खेत्याकाशबीजं ह ।"

(तं०आ वि० खं० 12, पृ० 197)

खार्खोदः——घोरस्वभावं तान्त्रिकं किमपि चक्रात्मकं यन्त्रम् । यथा—

"मृत्यूच्चाटनादिकृत् यन्त्रं खार्खोदः ।"

(ने०तं०उ०, खं० 2, पृ० 73)

खे गतिः~खेचर्यम्——शरीराद्यहम्भावनिमज्जनपूर्वकं शुद्धबोधगगने सञ्चारः । यथा—'मेदिनीं त्यजतीति देहाद्यहन्तापहस्तनेन परबोधाकाशचारी भवेदित्यर्थः ।"

(तं०आ०वि० खं० 12, पृ० 311)

त्रिकयोग इयं खेचरी । हठयोगे तु विहङ्गमवदाकाशमार्गे गतिर्भवतीति ।

खेचरी——योगमुद्राविशेषो बहुप्रकारः ।

~अष्टविधा——भर्गशिखाख्य आगमे प्रतिपादिता या खेचरी सा तत्राष्टविधोक्ता ।

(1) शशाङ्किनी
(2) व्योमाख्या
(3) हृदयाख्या
(4) शान्ताख्या
(5) शक्तिमुद्रा
(6) पञ्चकुण्डलिनी
(7) संहारमुद्रा
(8) वीरभैरवाख्या ।

संहारमुद्रैव झगिति पाशकर्तरी भवन्ती उत्क्रामणीति, तस्या एवावान्तरप्रकाररूपा । यथा——

"सूपविष्टः पद्मके तु ·········· ········ ···इत्यारभ्य अष्टधेत्थं वर्णिता श्रीभार्गाष्टकशिवाकुले" इत्यन्तम् ।

(तं०आ० 32, 54 तः 62)

अष्टानामपि लक्षणानि स्वे स्वे स्थाने द्रष्टव्यानि ।

~उत्क्रमणी——संहारमुद्राख्या खेचरी ।

द्र० 'खेचरी~संहारमुद्रा' इति ।

~कालग्रसनशीला——भूतत्वभविष्यत्वकल्पनां विलाप्य वर्तमाने एव तिष्ठन् ततस्तस्य भूतभविष्यदपेक्षाश्रितां वर्तमानकालतामपि विलाप्य तिष्ठन् योगी कालग्रासकारी भवति । सैषा कलनाजालशून्ये गगनकल्पे निजे चिदात्मके स्वरूपे या स्थितिस्सैव कालग्रसनशीला शाम्भवोपायमयी खेचरीमुद्रा शिवयोगिनाम् । यथा—

"न भूतं न भविष्यच्च वर्तमानाद्विभज्यते ।
अविभागस्तयोर्यावत्तावत् का वर्तमानता ॥
भूतभाविस्वभावाभ्यां सा हि याति विभागिताम् ।
तदस्मिन् संविदवधौ विश्रम्य त्रुटिमात्रकम् ॥
कालग्रासपरो योगी जायते खेचरः क्षणात् ।
··············· ·······················
··· · ····· ···························· ॥
तदुक्तं परमेशेन तन्त्रे श्रीडामराभिधे ॥
निरुद्ध्य रश्मिचक्रं स्वं पीत्वामृतमनुत्तमम् ।
कालोभयापरिच्छिन्ने वर्तमाने सुखी भवेत् ॥"

(मा०वि०वा० 1, 151-156)

~कौले——आनन्देन्द्रियद्वयस्य संघट्टात्मिका मुद्रा । तत्र शैवं कमलं सूर्यः, शाक्तं पद्मं सोमः, सङ्घट्टजो द्रवोऽग्निः । त्रितयं मिलितं कौलिकी खेचरी मुद्रा । यथा—

मध्यस्थानलगुम्फितसरोजयुगघट्टनक्रमादग्नौ ।
मध्यस्थपूर्णसुन्दरशशधरदिनकरकलौघसंघट्टात् ॥
त्रिदलारुणवीर्यकला सङ्ग्रान्मध्येऽङ्कुरः सृष्टिः ।
इति शशधरवासरपतिचित्रगुसंघट्टमुद्रया झटिति ॥
सृष्ट्यादिक्रममन्तः कुर्वंस्तुर्ये स्थितिं लभते ।
एतत् खेचरमुद्रावेशेऽन्योन्यस्य शक्तिशक्तिमतोः ॥"

(तं०आ० 29, 152 तः 155)

अनेन रहस्यप्रक्रियाभ्यासेन वीर्यविसर्गसमकालमेव जगदानन्दस्थितेरुदयाच्छुद्धसंविन्मये बोधगगने गतिः सिद्धा भवति कौलानाम्।

क्रियायोगतः——

(1) कायविषये—पद्मासनेऽवस्थानम्।

(2) चित्तविषये—नाभौ चित्तनिवेशनम्।

(3) मन्त्रविषये—परिपूर्णमहमिति विमर्शनम्।

(4) करविषये—न स्पष्टीकृतोऽयमंशः।

(5) मानसभावनाविषये—नाभौ चित्तनिवेशनम्। तदनन्तरं बिन्दु-नाद-ब्रह्मरन्ध्रस्थानाक्रमणं क्रमेण। ततो भावनया शक्तिव्यापिनी-समनामध्यतश्चित्तं सञ्चार्य बलादौन्मनसेपदे तस्यारोपणमिच्छाशक्तिप्रयोगेण तीव्रेण, तथाकृते सति खे शुद्धबोधगगने साधकस्य गतिर्भवति। यथा—

वद्ध्वा पद्मासनं योगी नाभावक्षेश्वरं क्षिपेत्॥
दण्डाकारं तु तं तावन्नयेद्यावत्कखत्रयम्।
निगृह्य तत्र तत्तूर्णं प्रेरयेत् खत्रयेण तु॥
एतां बद्ध्वा खे गतिः स्यादिति श्रीपूर्वशासने।

(तं॰ आ॰ 32. 10 तः 12)

दण्डाकारतया मूर्धन्यं बिन्दुनादब्रह्मरन्ध्रलक्षणं खत्रयं यावन्नीत्वा तत्रैव कुम्भकानुवृत्त्या निरुध्य शक्तिव्यापिनीसमनात्मना खत्रयेण तूर्णमुद्घातगत्या प्रेरयेदुन्मनापदाक्रमणेन परमशिवाभिमुख्यं नयेद् येनास्यैतदवष्टम्भेन परबोधगगनचारित्वं स्यात्।"

(तं॰आ॰वि॰ खं॰ 12, पृ॰ 309)

~गतिः——(1) कुण्डलिन्या अभ्यासे सहस्रारमध्ये स्वच्छन्दा गतिर्योगिनः। यथा—

"खेचरी मुद्रामाह—
तयापूर्याशु मूर्धान्तं भङ्क्त्वा भ्रूक्षेपसेतुना।
निर्विकल्पं मनः कृत्वा सर्वोर्ध्वे सर्वगोद्गमः॥"

(वि॰भै॰ 31, पृ॰ 27)

(2) स्वात्मरूपे प्रपञ्चशून्ये चिदाकाशे गतिर्गमनं ज्ञानं तद्रूपतया स्वात्मसाक्षात्कारः। यथा—

"खे स्वचिद्गगनाभोगे चरणात् खेचरीति सा।"

(शि॰सू॰वा॰भा॰ पृ॰ 34)

~त्रिविधा——(1) सुदूरदर्शनप्रसृतत्वं व्यञ्जयन्ती।

(2) शक्तिव्यापिन्यादिसूक्ष्मतरप्रणवकलादर्शनप्रवणा।

(3) निरावरणबोधगगनसंचारिणी च मुद्रा शाम्भवसिद्धानाम्। असावित्थं त्रिप्रकारोत्तरोत्तरमुत्कृष्टतरा प्रतिपादिता। यथा—

(1) "खेचर्या—दूरमाकाशदर्शनार्थं प्रसृतया मुद्रया·····।"

(वि॰भै॰ 3, पृ॰ 66)

(2) "शक्तिव्यापिन्यादिषु खेषु सदा चरति या सा खेचरी इति सा शाम्भवसिद्धानां मुद्रा।"

(तदेव पृ॰ 67)

(3) "निरावरणत्वेन बोधगगनस्वरूपप्रतिष्ठानात् खेचरी।"

(तदेव पृ॰ 67)

"खेषु सदा चरति या, सा खेचरी इति शाम्भवसिद्धानां मुद्राः।"

(म॰प्र॰वि॰ पृ॰ 87)

"खे बोधरूपे प्रमातरि चरणात् खेचरी।"

(म॰म॰प॰ पृ॰ 86)

~पञ्चकुण्डलिनी——खेचर्याः अष्टसु प्रकारेष्वन्यतमा खेचरी। यथा—

"दशानामङ्गुलीनां तु मुष्टिबन्धादनन्तरम्॥
द्राक् क्षेपात् खेचरी देवी पञ्चकुण्डलिनी मता।"

(तं॰आ॰ 32, 58, 59)

विशेषतः सद्गुरुणैव शिक्षणीया सम्यक्।

~परतरा——व्यवहारेऽपि शिवभावसमावेशयुताऽखण्डितस्वात्मसाक्षात्कारमयी स्थितिः। यथा—

"खे ब्रह्मणि अभेदरूपे स्थित्वा चरति विषयमवगमयति, तथा हानादानादिचेष्टां विधत्ते, स्वरूपे च आस्ते इति खेचरी।"

(प॰त्री॰वि॰ पृ॰ 39)

हठयोगिनां खेचरी तावदवरैव न परेति वेद्यं सुधीभिः।

~परा——शिवस्वस्वभावे शुद्धे संविद्गगने यत्स्वच्छन्दविचरणशीलत्वं परयोगिनः सैव परा खेचरी, सा च तस्य देहस्थस्यापि शिवावस्था। शाम्भवोपायरूपासौ। यथा—

"विद्यासमुत्थाने स्वाभाविके खेचरी शिवावस्था।"

(शि॰सू॰ 2, 5)

"पराद्वयप्रथारूपशुद्धविद्योदये खे बोधगगने चरतीति खेचरीमुद्रा अभिव्यंज्यते।"

(शि॰सू॰ वृ॰ 2, 5)

'खे बोधगगने चरतीति मुद्राभिव्यज्यते। कीदृशी खेचरी, शिवस्य चिन्नाथस्य अवस्थातुः सम्बन्धिनी अवस्था, स्वानन्दोच्छलत्तात्मिका स्फुरत्ता।"

(शि॰सू॰वि॰ पृ॰ 28)

"वाच्यवाचकाद्यशेषविकल्पविक्षोभविलापिनी सौषुम्नसरणिसीमोल्लङ्घिनी स्वात्मसंविदविभिन्नाकारा च खेचरी।"

(म॰मं॰प॰. पृ॰ 91)

द्र॰ (तदेव पृ॰ 86) चापि।

~माहात्म्यतः——

'श्रीखेचरीसमाविष्टो यद्यत्स्थानं समाश्रयेत्॥
देवीसन्निधये तत् स्यादलं किं डम्बरैर्वृथा'।"

(तं॰आ॰ 32, 7-8)

परस्याः खेचर्याः विषय उक्तमेतत् स्यात्।

~मुद्रा——द्र॰ 'खेचरी' इति सविस्तरम्।

~वीरभैरवसंज्ञा——खेचर्या अष्टसु प्रकारेष्वन्यतमा खेचरी मुद्रा। लक्षिता यथा—

"श्वभ्रे सुदूरे झटिति स्वात्मानं पातयन्निव ॥
साहसानुप्रवेशेन कुञ्चितं हस्तयुग्मकम् ।
अधोवीक्षणशीलं च सम्यग्दृष्टिसमन्वितम् ॥
वीरभैरवसंज्ञेयं खेचरी बोधवर्धिनी ।"

(तं०आ० 32, 60 त: 62)

~ व्यापिनी —— भैरवी-लेलिहाना-करङ्किणी-प्रभृतिषु मुद्रासु खेचरी व्याप्य तिष्ठति । खेचर्या एव रूपान्तराणि तेनेमाः मुद्राः इति वेद्यम् । यथा—

"तस्या हि त्रिशूलिन्यादिसकलरूपोपग्रहेऽपि न निष्कलाद्रूपात्प्रच्याव इत्यभिप्रायः । उक्तं हि—

इयं सा खेचरी मुद्रा निष्कला परिकीर्तिता ।
सकलं रूपमेतस्या भेदैस्तैस्तैरवस्थितम् ॥"

(उद्ध० तं०आ०वि० खं० 12, पृ० 306)

मूलतो निष्कला, त्रिशूलिन्यादिरूपतायां सकलेति तात्पर्यम् ।

~व्योमाख्या——खेचर्या अष्टसु प्रकारेष्वेकतमा खेचरी । यथा—

"तस्मादेव समुत्तम्भ्य बाहू चैत्रावकुञ्चितौ ॥
सम्यग् व्योमसु संस्थानाद् व्योमाख्या खेचरी मता ।"

(तं०आ० 32, 55-56)

सद्गुरुणैव दर्शयितुं शक्या सम्यक् ।

~शशाङ्किनी——अष्टानां प्रकाराणां मध्य एका । यथा—

"सूपविष्टः पद्मके तु हस्ताग्राङ्गुलिरश्मिभिः ।
पराङ्मुखैर्झटित्युद्यद्रश्मिभिः पृष्ठसंस्थितैः ॥
अन्तःस्थितिः खेचरीयं संकोचाख्या शशाङ्किनी ।"

(तं०आ० 32, 54-55)

विशेषतस्तु सद्गुरुणैव साक्षाद् दर्शयितुं शक्या ।

~शक्तिमुद्रा——खेचर्या अष्टसु प्रकारेष्वन्यतमा खेचरी । यथा—

"एषैव शक्तिमुद्रा चेदधोधावितपाणिका ।"

(तं०आ० 32, 58)

एष शान्ताख्यैवेति । विशेषतो गुरुणैव साक्षाद् दर्शनीया ।

~शान्ताख्या——अष्टसु खेचरीप्रकारेष्वन्यतमा खेचरी । यथा —

"शान्ताख्या सा हस्तयुग्ममूर्ध्वाधः स्थितमुद्गतम् ।
समदृष्ट्यावलोक्यं च बहिर्योजितपाणिकम् ॥"

(तं०आ० 32, 57)

~शिवयोगिनाम्——सहस्राराख्ये शून्यसदने योगिनं विहारयन्ती कुण्डलिनीयोगसिद्धिः । यथा—

"अनेन सहजविद्योदयात्मके शाक्तसमावेशे स्फुरति सति स्वत एव कुण्डलिन्या उत्थानमूर्ध्वगतिश्चेत्यपि सूचितम् । यतः खे सहस्रारे चरतीति खेचरी शिवावस्था ।"

(शि०सू०विवृ० 2, 5)

~सङ्कोचाख्या——खेचर्याः अष्टसु प्रकारेषु शशाङ्किनी नाम या खेचरी तस्या एवाभिधानमपरं सङ्कोचाख्येति ।

~संहारमुद्रा——खेचर्या अष्टसु प्रकारेष्वन्यतमा खेचरी । यथा—

"संहारमुद्रा चैषैव यद्यूर्ध्वं क्षिप्यते किल ।
उत्क्रामणी झगित्येव पशूनां पाशकर्त्तरी ॥"

(तं०आ० 32, 59, 60)

उत्क्रामणीति नामान्तरमस्याः । विशेषतो गुरुणैव साक्षात् प्रदर्शनीया ।

~हठयोगे——हठयोगिन आस्यस्यान्तर्जिह्वां परिवर्त्य विपरीतगत्या कण्ठकूपं प्रति सारयन्ति । तेनाभ्यासेन यदा केनापि कालेन जिह्वा तथा दीर्घतामुपैति यथा बहिर्नासाशिखरं स्पृशेत्, तदान्तरूर्ध्वं कमपि नाडीचक्रं स्पृशन्ती परमामानन्दानुभूतिममृतरसास्वादं चानुभावयन्ती योगिनमानन्दचमत्कारे निमज्जयन्ती कृतकृत्यतां नयति । तथाविधो योगी यथेच्छमाकाशचारित्वसामर्थ्यं लभते, परां च स्वरूपप्रत्यभिज्ञामुपायान्तरेण शाम्भवशाक्ताविना सत्वरमेवाधिगच्छति । परं बुभुक्षा चेदन्तर्वर्तेत तर्हि व्यावहारिकसिद्धिजालेषु बद्धः सञ्जायते । उत्कृष्टतराणां हठयोगिनां जिह्वाग्रं बहिर्मूर्मध्यमपि स्पृशतीति ज्ञातं कस्यापि सिद्धजनस्योपदेशतः ।

~हृदयाख्या——खेचर्या अष्टसु प्रकारेषु तृतीया खेचरी । यथा—

"मुष्टिद्वितयसङ्घट्टाद्धृदि सा हृदयाह्वया ॥"

(तं०आ० 32, 56)

खेचरी-चक्रम्——(1) कलाद्याः पशुप्रमातुः शक्तयः ।

(2) सर्वज्ञताद्याः पतिप्रमातुः शक्तयः । यथा —

"(चितिशक्तिरेव) पशुभूमिकायां शून्यपदविश्रान्ता किंचित्कर्तृत्वाद्यात्मक-कलादिशक्त्यात्मना खेचरीचक्रेण गोपितपारमार्थिकचिद्गगनचरीत्वस्वरूपेण चकास्ति ।"

(प्र०हृ०पृ० 29)

"पतिभूमिकायां तु सर्वकर्तृत्वादिशक्त्यात्मकचिद्गगनचरीत्वेन ·········स्फुरति ।"

(तदेव, पृ० 29-30)

एवंविधा परिभाषा क्षेमराजेनैवोपनिबद्धा । नात्र किमप्यागमवाक्यमुद्धृतम् ।

खेचरीपुरम्——मण्डलविशेषः ।

खेचरीसाम्यम्——(1) शुद्धभैरवात्मकस्वात्मपरमेश्वरताविमर्शः । स एव सर्वस्यापि भेदावभासस्यैकमधिष्ठानमेकं च स्रोतः । यथा—

"अस्याः साम्यं स्वभावेन शुद्धभैरवतामयम् ।
……
भिन्नाया वर्णसृष्टेश्च तदभिन्नं वपुः परम् ॥
वीर्यमित्युक्तमत्रैव यद्गुप्त्या मन्त्रगुप्तता ।
तदेतदहमित्येव विसर्गानुत्तरात्मकम् ।
स्वस्वभावं परं जानन् जीवन्मुक्त. सकृद्बुधः ।"

(प०त्री०वि०, पृ० 215)

(2) प्रबुद्धेन साधकेन शब्दस्पर्शादिविषयैस्तोषिता इन्द्रियदेवतास्तं स्वरूपसाक्षात्कारोन्मुख्यतामापादयन्ति । प्रारम्भे यो निर्विकल्पो विषयप्रकाशस्तस्मिन्नेव ताः साधकं विकल्पावसरेऽपि स्थिरं स्थापयन्त्यः स्वात्मशिवत्वसाक्षात्कारकारिण्यः सम्भवन्ति । एतदेव खेचरीसाम्यम् जीवन्मुक्तिरूपम् । तदस्य सविस्तरं व्याख्यानमुपरितनं च संक्षिप्तम् । ततो न मतभेदशङ्काऽत्र कार्या । यथा—

"स्वरूपपरिज्ञानं चैतावदेव-यदेतासु वृत्तिषूदयसमारब्धतत्तद्विचित्रशब्दारुषितत्वेऽपि न तादृशेन वर्णपुञ्जात्मना शक्तिचक्रेण युज्यते, यत्तस्य प्राक्तननिर्विकल्पैकव्यवहारमयस्य विकल्पात्मनो मातुः स्वरूपं खण्डयेत् । न च विकल्पा अनुभवाद् विकल्पान्तराद्वा भिन्नाः, अपि तु स एवैकः स्वातन्त्र्यभेदितभावोपरागलब्धभेदभूताद्यमिधविज्ञानचक्रप्रभुः, तदेवं खेचरीसाम्यनैव मोक्षः ।"

(प०त्री०वि०, पृ० 44, 45)

खेचर्यः ~बन्धकारिण्यः——प्राणिसंघातान् संसृतिचक्रे एव स्थापयन्त्यो मातृकावर्णपुञ्जाधिष्ठात्र्योऽणूनां स्वरूपावरणकारिण्यः शिवस्य शक्तयो घोरतराख्याः । यथा—

"पञ्चाशद्भेदसम्भिन्नप्रत्ययप्रसवात्मिका ।
बन्धरूपा स्वभावेन स्वरूपावरणात्मिकाः ॥
अत्रैवान्तर्गतास्तास्ताः खेचर्यो विषयात्मिकाः ।
तन्वते संसृति चित्रां कर्ममायाणुतामयीम् ॥"

(प०त्री०वि०, पृ० 214)

द्र० 'खेचर्याद्याः' इति ।

~बन्धमोक्षकारिण्यः——तत्राघोराख्याः स्वरूपप्रकाशकारिण्यो, घोरतराख्याश्च स्वरुपगोपिन्यः शिवस्य शक्तयः । यथा—

"खे बोधगगने चरन्ति इति खेचर्यः प्रमातृभूमिस्थिताः, परशक्तिपातपवित्रितानां चिदानन्दप्रसरोद्गमनसारा अकालकलितस्वादभेदसर्वकर्तृत्वसर्वज्ञत्वपूर्णत्वव्यापकत्वस्वरूपोन्मीलनपरमार्थाः । मायामोहितानां तु अनानन्दप्रदाः शून्यप्रमातृभूमिचारिण्यः काल-कला-ऽशुद्ध-विद्याराग-नियतिमयतया बन्धयित्र्यः ।"

(स्पं०सं०, पृ० 20)

~बाह्याः——सूक्ष्मशरीरधारिण्यः शिवस्य शक्तिविशेषरूपा देव्यः काश्चन । यथा—

"तत्र आकाशे चरन्त्योऽशरीराः खेचर्यः, यदिच्छामात्राधिष्ठितमिथुनसंप्रयोगजः प्रबुद्धशुद्धविद्योदयो योगिनी-गर्भोद्भूतो भवति ।"

(स्पं०सं०, पृ० 21)

अशरीरा इति स्थूल शरीर-रहिताः ।

खेचर्याद्याः——चत्वार एते शक्तिवर्गाः । तेषु (1) खेचर्यो वेद्यवेदकभावोत्तीर्णे महाशून्यभावे (1) गोचर्यः संविन्मात्रदृगुल्लासे (3) दिक्चर्यं आन्तरभेदोल्लासे, (4) भूचर्यश्च स्फुटभेदोल्लासे विजृम्भणशीलाः । उत्कृष्टा च शिवस्वभावभूता पराशक्तिरेताः सर्वा अपि व्याप्य तिष्ठन्ती परा मुख्या खेचरी । यथा—

"(क) (1) वेद्यवेदकभावानुल्लासिपदे शून्ये, (2) संविन्मात्रदृगुल्लासे (3) संवेद्यगतान्तरैक्यरूपदिश्यमानभेदोल्लासे (4) स्फुटभेदोद्रेके च क्रमेण व्योमचरी-गोचरी-दिक्चरी-भूचरीभूता याः शक्तयस्ता वस्तुत उक्तनयेन स्वभावचरखेचरीरूपशक्त्यविभक्ता एव इत्येकैव सा पारमेश्वरी शक्तिः । यदुक्तम्—

'शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः' इति ।"

(प०त्री०वि०पृ० 39-40)

(ख) "परमेश्वरी हि संवित्स्वातन्त्र्यस्य शक्तिः प्रकृत्या निर्विकल्पकपदाधिरूढापि क्वचित् परिमिते प्रमातरि स्फुरन्ती तदनु तदन्तःकरणानुप्रविष्टा पश्चात् तस्यैव बाह्येन्द्रियानुबन्धिनी च भूत्वा बहिर्वेद्यलक्षणं विषयोल्लासमखिलमुपयुङ्क्त इति सर्वपथीनोऽयं प्रकारः ।"

(म०मं०प० पृ० 86)

खेटनन्दनः——कश्चन विख्यो गुरुः शैवदर्शनस्य । यथा—

"तेन यत् खेटनन्दनेन—
"मण्डलिनः श्रीकण्ठः क्रोधाद्याः शतभवाः सवीरेशाः ।
एते कलादियोगात्प्रकटीकृतदृक्क्रियाः परेशेन ॥'
इत्युक्तम्"

(स्व०तं०उ०प० 8, पृ० 23-24)

खेटपालः——(1) स्वायम्भुवस्यागमस्य व्याख्याकारः । यथा—

"खेटपालगुरुः श्रीस्वायम्भवशास्त्रटीकायां …. ।"

(शि०हृ०वृ०, पृ० 103)

(2) सद्योज्योतिरभिधानः शैवसिद्धान्ताचार्यविशेषः समुल्लिखितं यस्य मतं तन्त्रालोके । यथा—

"नन्वेतत् खेटपालाद्यैर्निराकारि न कर्मणाम् ।"

(तं०आ० 9, 262)

"खेटपालाद्यैरिति श्रीमत्सद्योज्योतिःप्रभृतिभिः ।"

(तं०आ०वि० खं० 6, पृ० 211)

~तन्मतम्——सद्योज्योतिरिति नामान्तरस्य शैवसिद्धान्तगुरोः द्वैतदृष्टिप्रधानं मतम् । यथा —

"खेटपालाचार्यप्रभृतयो द्वैतप्राधान्यमशिश्रियन्, तदनुसारिणोऽप्यन्ये तथैव ।"

(ई०प्र०वि०वि० खं० 3, पृ० 404)

~कर्मेन्द्रियविषये——खेटपालो वदति यन्न सर्वेषां कर्मणां साधनभूतानि करणानि कर्मेन्द्रियाणि, अपितु केवलमानन्दाविपञ्चकर्मणामेव । ततः पञ्च एव तानि न तेष्वानन्त्यम् । यथा —

"नन्वेतत् खेटपालाद्यैर्निराकारि न कर्मणाम् ॥
यत्साधनं तदक्षं स्यात् किंतु कस्यापि कर्मणः।"
(तं०आ० 9, 262-63)

"यदाहुः —
'आनन्दादिभिरेभिस्तु कर्मभिः परिभाषितैः ।
कर्मेन्द्रियाण्यतो नैषामानन्त्यं कर्मणां वशात्' ॥"
(उद्धृ०तं०आ०वि० खं० 6, पृ० 211)

~शक्तिविषये——
" ·········खेटपालोऽपि प्राह सा काचन स्थिता ।
शक्तिः पदार्थजातस्य देवदेवस्य साखिला ॥"
(शि०दृ० 3, 64)

ख्यातिः~पूर्णा——यथार्थमोक्षदं ज्ञानम् । पूर्णख्यातिरसौ स्वात्मनः परमेश्वरत्वमद्वैतत्वं, विश्वोत्तीर्णत्वं विश्वमयत्वञ्च प्रख्यापयति । यथा—

"अख्यात्यभाव एव हि पूर्णा ख्यातिः, सैव च प्रकाशानन्दघनस्यात्मनस्तात्त्विकं स्वरूपं, तत्प्रथनमेव मोक्षः।"
(तं०आ०वि० खं० 1, पृ० 57)

ग

ग——मातृकाक्रमे तृतीयो योनिवर्णोऽग्नितत्वाभिव्यञ्जकः। मातृकाभ्यासे निर्विकल्पतया साक्षात्क्रियमाणोऽयं गवर्णः साधकस्य स्वात्मानं स्वशक्तिविशेषस्य बहिर्मुखेनाग्नितत्त्वतयावभासमानेन प्रतिबिम्बेन खचितं सन्तमभिव्यनक्ति ।

गकारः——द्र० पददीक्षा, (6); त्रितत्त्वदीक्षा, (2) इति ।

गतागतम्——स्वप्नदशाया भेदचतुष्टये एकतमो भेदः। स्वप्नस्थप्रमातृताविषयः स्वाप्नप्रपञ्चभेदविशेषः। यथा—
"तत्रापि चातुर्विध्यं तत् प्राग्दिशैव प्रकल्पयेत् ॥
गतागतं सुविक्षिप्तं संगतं सुसमाहितम् ।"
(तं०आ० 10, 252, 53)

गतिः~कालीनये——कलनाप्रकारविशेषः। गतिः संवित्स्वरूपे प्रतिबिम्बन्यायेनारोहणम् । "नीलमिति" विकल्पज्ञाने सति नीलपदार्थः संविद्यारूढो भवन्नेव चकास्ति । येन नीलतयैव संविदाभासते । यथा—
"गतिः स्वरूपारोहित्वं प्रतिबिम्बवदेव यत् ।"
(तं०आ० 4, 175)
"भेदितोऽर्थः संविल्लक्षणं स्वरूपमारोहति प्राप्नोति स्वरूपारोही ।"
(तं०आ०वि० खं० 3, पृ० 204-205)

द्र० 'काली' इति ।

गन्धतन्मात्रम्—— सौरभत्वासौरभत्वादि-विशेष-प्रविभाग-रहितो गन्धत्वावच्छिन्नः सामान्याकारगन्धमात्रात्मकः सूक्ष्मतरो घ्राणग्राह्योऽप्रक्षुब्धो विषयः। स च तमःप्रधानादहङ्कारात्जातः सन् क्षुब्धो भवन् गन्धविशेषरूपतां, नितरां प्रक्षोभं प्राप्तः संश्च स्थूलपृथ्वीरूपतां धत्ते सृष्टिक्रमे । यथा—
"पृथिव्यां सौरभान्यादिविचित्रे गन्धमण्डले ।
यत्सामान्यं हि गन्धत्वं गन्धतन्मात्रनाम तत् ॥"
(तं०आ० 2, 280-81)

द्र० 'तन्मात्रम्' इति ।

~तत्त्वम्—– सामान्येन गन्धमात्रमतिसूक्ष्मं सौरभत्वासौरभत्वादिविमर्शेनाऽसम्भिन्नं केवलं गन्धमात्रविमर्शविषयभूतं तत्त्वम् । एवमेव हि रसरूपादितन्मात्राणि ज्ञेयानि । यथा—

"गन्धो हि सौरभाद्यवान्तरविशेषविनिर्मुक्तो गन्ध इत्येव भासमानः, तदेव, नाधिकं तत्रान्यत् चकास्ति इति तन्मात्रमविशेषश्च उच्यते ।"
(ई०प्र०वि०वि० खं० 2, पृ० 148)

गन्धाद्याः——
बाह्येन्द्रियाणां ग्राह्या विशेषविषयाः ।
ते च गन्धो, रसो, रूपं, स्पर्शः शब्द इति ।

~क्षोभकाः——प्राणिनो निजात् संवित्-स्वरूपात् प्राच्यावकाः। यथा—
"अतो बिन्दुरतो नादो रूपमस्मादतो रसः।
प्रवर्तन्तेऽचिरेणैव क्षोभकत्वेन देहिनः॥"
(स्पं०का० 42)

गणपतिः——करणचक्राख्यस्य गणस्येश्वरोऽहङ्कारः। यथा—
"दिनकरसममहदादिकगणपतितां वहति यो नमस्तस्मै ।
इत्यादिदृशा पतिरहङ्काररूपः प्रभुः।"
(उद्ध०तं०आ०वि खं० 1, पृ० 22)

गणेश मन्त्रः——"ओं गां गणेशाय नमः।"
(तं०आ०वि० खं० 12, पृ० 185)

गणेश-वटुकौ——आगमिकसाधनायां पूज्यौ, क्रमेणापाने प्राणे च व्यापनशीलौ देवौ, उभावेतौ देवी-पुत्राविति मन्येते। यथा—

"वस्तुतो ह्यपान व्याप्तिरस्य (गणेशस्य) अस्ति ।········ ······· अस्य (वटुकस्य) हि प्राणव्याप्तिरस्ति, इत्येवं निर्दिशन्ति गुरवः। देवीसुत इत्युभयोरपि कुलशास्त्रोचितोऽयं व्यपदेशः। तदुक्तम्—
" 'देवीपुत्रोऽत्र वटुकः स्वशक्तिपरिवारितः' इति ।
'गणेशो विघ्नहर्तासौ देवीपुत्रः'············।"
(तं०आ०वि० खं० 1, पृ० 23)

गण्डिका——मण्डलाङ्गविशेषः । न स्पष्टीकृतः । यथा—

"उच्छ्रायात्तु ततः कार्या गण्डिका तु स्वरूपतः ।"

(तं॰आ॰ 31, 111)

तर्क्यते यत्त्रिकोणपद्मदलकर्णिकादीनामन्तरा यानि रिक्तानि स्थानानि विविधाकृतीनि तेषामेतदमिधानं भवेद् गण्डिकेति ।

गमः——गमशास्त्रम् । यथा—

"द्वाभ्यां सृष्टिः संहृतिस्तद्विसर्गस्त्रिविधो गमे ।"

(तं॰आ॰ 29, 142)

'गमशास्त्रे त्रिविधो विसर्गः ।"

(तं॰आ॰वि॰ खं 11/2, पृ॰ 100)

गमशासनम्——गमशास्त्रमेव । यथा —

"······················ तथा श्रीगमशासने ॥
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् ।
तत्फलं कोटिगुणितमनामातर्पणात्प्रिये ।"

(तं॰आ॰ 15, 281)

द्र॰ (तं॰आ॰ 16, 286) चापि ।

गमशास्त्रम्——किमप्यागमिकं शास्त्रं यन्मतमुद्धृतं तन्त्रालोके तद्विवेके च बहुशः । यथा—

"तत्राहुर्गमशास्त्रज्ञा ································।"

(तं॰आ॰ 15, 422)

द्र॰ (तदेव 15-531, 32)
तथा (तदेव 15-553-557) इति च ।

~तद्वाक्यानि——

"तदुक्तं तत्रैव (श्रीगमशासने इति)
'वामपाणौ जपन्त्याश्च तुम्बरोश्चापि मेलके ।
दातव्यं विप्रुषामात्रमुपर्युपरि कल्पितम्' ॥"

(उद्धृ॰तं॰आ॰वि॰ खं॰ 9, पृ॰ 139)

"तदुक्तं श्रीगमशास्त्रे—
'योगो नान्यः क्रिया नान्या तत्त्वारूढा हि या मतिः ।
स्वचित्तवासनाशान्तौ सा क्रियेत्यमिधीयते' ॥"

(ने॰तं॰उ॰ खं॰ 2, पृ॰ 43)

द्र॰ 'दीक्षाकाले एव मुक्तिः' इति ।

गर्भः——(1) भट्टभास्करमतेन — प्रकाशानन्दचमत्कारस्यान्तरतमा चिन्मयी स्थितिः । यथा—

"गर्भे चित्तविकासो विशिष्टोऽविद्यास्वप्नः ।"

शि॰सू॰ 2, 4)

"प्रकाशानन्दसारान्तर्व्यावर्तनबलाद् भृशम् ॥
विषयेभ्यो निवृत्तस्य मनसश्चिन्मयी स्थितिः ।"

(शि॰सू॰वा॰भा॰, पृ॰ 32)

(2) क्षेमराजमतेन—अख्यातिमयो मितसिद्धिप्रपञ्चः । यथा—

"गर्भोऽख्यातिर्महामाया, तत्र तदात्मके मितमन्त्रसिद्धिप्रपञ्चे··· ·································।"

(शि॰सू॰वि॰ 2, 4)

(3) मतान्तरेण — साधकावस्थायाः सिद्धावस्थायाश्च मध्यगतावस्था । यथा—

"गर्भे साधकसिद्धावस्थयोर्मध्ये ।"

(शि॰सू॰विवृ॰ 2-4)

गर्भस्थम्——मन्त्राक्षरन्यासविशेषः । यथा—

"मध्यस्थस्य मन्त्रस्य चतुर्दिक्कं साध्यनामन्यासो गर्भस्थत्वम् । यदुक्तं—

'यद्ग्रस्ते लक्षणं प्रोक्तं गर्भस्थेऽपि तदुच्यते' ।"

(ने॰तं॰ उ॰ खं॰ 2, पृ॰ 78)

गहनेशः——महामायाक्षेत्रे प्रकटीभूतेश्वरभट्टारकस्यावतारविशेषो यो भगवाननन्तनाथस्तस्यैव क्रियाशक्तिप्रधानं शरीरान्तरं यत्तदधिष्ठाता भगवान् गहनेशः । अनन्तनाथस्यैवापरा मूर्त्तिः । स च स्वदिनारम्भे मायां प्रक्षोभ्य पञ्चकञ्चुकतत्त्वानि सृष्ट्वा तैः सुसीमितस्य पुरुषतत्त्वस्य तत् प्रमेयभूतस्य च प्रकृतितत्त्वस्य स्रष्टा । स एव स्वदिनान्ते तत्त्वसप्तकमेतत् पुनर्मायायां विलापयति । यथा—

"तद्दिनप्रक्षये विश्वं मायायां प्रविलीयते ।
क्षीणायां निशि तावत्यां गहनेशः सृजेत् पुनः ॥"

(तं॰आ॰ 6, 155)

"तस्यां (गहनेशस्य रात्रौ) च समस्तमेव मायायां विलीयते । पुनर्गहनेशः सृजति ।"

(तं॰सा॰ पृ॰ 55)

~तदायुः—— यावच्छ्रीकण्ठनाथस्यायुस्तावानव्यक्ततत्त्वकालः । तस्य दशभिः परार्धैर्गुणनेन गहनेशस्य दिनं तावती रात्रिः, तत्परिमाणेन तस्यायुर्वर्षशतम् । यथा—

"यत्तु श्रीकण्ठनाथस्य स्वमायुस्तत् कञ्चुकवासिनां रुद्राणां दिनं, तावती रजनी, तेषां यदायुस्तद् गहनेशस्य दिनं तावती एव क्षपा । तस्यां समस्तमेव मायायां विलीयते । पुनर्गहनेशः सृजति । एवं योऽव्यक्तकालस्तं दशभिः परार्धैर्गुणयित्वा मायादिनं कथ्यते, तावती रात्रिः । स एव प्रलयः ।"

(तं॰सा॰ पृ॰ 55)

मायादिनरात्रिमानेन वर्षशतं गहनेशस्यायुरिति ।

~तद्गुरुपरम्परा——असौ क्रमः एषः (1) शिवः, (2) शक्तिः, (3) स्वच्छन्दभैरवः, (4) लकुलीश्वरः, (5) अनन्तनाथः, (6) गहनेश इति । यथा—

"भैरवो भैरवी देवी स्वच्छन्दोलाकुलोऽणुराट् ।
गहनेशोऽब्जजः शक्रः··· ·····················॥"

(तं॰आ॰ 36, 1-2)

परमन्यत्र 'स्वच्छन्द' इत्युमापतेर्नामोक्तं, स चोमापतिः शिष्यपरम्पराक्रमे गहनेशादधः, श्रीकण्ठादप्यधः । तदयमत्रत्यः स्वच्छन्दो-

ऽपरः कश्चन रुद्रो भवितुमर्हति। सुतरां विचारणीयोऽयं विषयः सुधीभिः।

द्र० 'अनन्तनाथः' इति।

गह्वरः——कुलगह्वर एवायं स्यात्। यथा—

"यदुक्तं श्रीमद्गह्वरे—
'दृष्ट्वा शिष्यं जराग्रस्तं व्याधिना परिपीडितम्।
उत्क्रमय्य ततस्त्वेनं परतत्त्वे नियोजयेत्'॥"
इति।

(स्व०तं०उ० प० 4, पृ० 94)

गह्वरम्——अनिवर्चनीयत्वेन गम्भीरं शक्तिमत्तत्त्वं शिवाख्यम्।

द्र० 'कुलगह्वरम्~निवर्चनतः' इति।

गह्वरशास्त्रम्——कुलगह्वरं नामागमशास्त्रं कौलिकम्। यथा—

"उक्तं च गह्वराभिख्ये शास्त्रे शीतांशुमौलिना।"

(तं०आ० 28, 224)

"षोढा श्रीगह्वरे वेधदीक्षोक्ता परमेशिना।"
द्र० (तदेव 29, 240) इति।
द्र० (तदेव 15, 596) चापि।

गीतानिष्यन्दः——किमपि परापूजाप्रतिपादकं पुस्तकम्। यथा—

"यथा श्रीगीतानिष्यन्दे—
न पादपतनं भक्तिर्व्यापिनः परमात्मनः।
भक्तिर्भावस्वभावानां तदेकीभावभावनम्॥"

(म०मं०प०, पृ० 108)

गुणतत्त्वम्——(1) सूक्ष्मविश्लेषणेन प्रकृतितत्त्वमहत्तत्त्वयोर्मध्ये गुणतत्त्वस्य स्थितिः। तच्च प्रकृतिप्रक्षोभात्मकम्। तस्मिन् प्रक्षोभे सत्येव महत्तत्त्वस्य सृष्टिः। ततस्तदवस्थान्तरतया स्वीकृतं शास्त्रे। यथा—

"त एते क्षोभमापन्ना गुणाः कार्यं प्रतन्वते।
अक्षुब्धस्य विजातीयं न स्यात्कार्यमदः पुरा॥
उक्तमेवेति शास्त्रेऽस्मिन् गुणांस्तत्त्वान्तरं विदुः।"

(तं० आ० 9, 223-24)

"तदेव तु भोग्यसामान्यं प्रक्षोभगतं गुणतत्त्वम्। एवं क्षुब्धात् प्रधानात् कर्त्तव्यान्तरोदयः, नाक्षुब्धादिति क्षोभः अवश्यमेवान्तराले अभ्युपगन्तव्य इति सिद्धं सांख्यापरिदृष्टं पृथग्भूतं गुणतत्त्वम्।"

(तं०सा० पृ० 85)

(2) प्रकृतेरेवेदं द्वितीयं रूपं मन्तव्यमिति न पृथकतत्त्वरूपत्वेन संख्यातम्। यथा महामायातत्त्वं विद्यातत्त्वस्यैवान्तर्गण्यते तथैतदपि। यथा—

"श्रीपूर्वशास्त्रे गुणांस्तत्त्वान्तरं प्रकृतेरेव कार्यजननोन्मुखं क्षुब्धं द्वितीयं रूपं मायाया इव ग्रन्थिं विदुः।"

(तं०आ०वि० खं० 6, पृ० 179)

"अतश्च गुणतत्त्वं नाम न प्रकृतितत्त्वातिरिक्तं तत्त्वान्तरं किन्तु तस्यैव कार्यजननोन्मुखं क्षुब्धं रूपान्तरमिति।"

(तं०आ०वि० खं० 5, 178)

गुणत्रयम्~मूलतः——शिवस्य शक्तित्रयमेव जीवभावे गुणत्रयपदवीमवरोहति। यथा—

"ज्ञानशक्तिरेव मायाप्रमातरि भिन्नज्ञेयविषयत्वेन सत्त्वम्, एवंक्रियाशक्तिर्भिन्नकार्यविषयत्वेन रजः, माया एव भिन्नवस्तुविमोहमयी तमः। इति वक्ष्यते।"

(ई०प्र०वि०वि० खं० 3, पृ० 302)

गुणपुरुषभेदः——"सुखदुःखमोहाः करणकार्यवर्गतादात्म्यवृत्तयो यदि पुरुषव्यापि तादात्म्यं भजेरन्, तर्हि पुरुषः कार्यकरणपर्यन्तसृष्टिमयः सम्पन्नः। परिणामश्च दूषितः। इति स्वातन्त्र्यशक्त्या पुरुषो विश्वरूपः इत्यायातम्। तथा च न कश्चित् पुरुष ईश्वर एव। तस्मादप्रत्यभिज्ञानमयपुरुषस्वरूपविचारे सत्त्वादयोभिन्ना एव।"

(ई०प्र०वि० खं० 2, पृ० 256-57)

यदि पुरुषो गुणमयस्तदासौ परिणामवानपि भवेत्। ततो न पुरुषो गुणमयोऽपि तु तस्य या मायामयी भेददृष्टिस्तत्रैव त्रैगुण्यम्। तया च दृष्ट्या दृष्टं सद् वेद्यं सर्वं त्रिगुणात्मकमेव प्रधानादारभ्य पृथिव्यन्तम्। ततो मूलतो गुणाः पुरुषस्य करणस्थानीयायां दृष्टौ। ततश्च तद्दृष्टि-कलिताः सन्त एव ते प्रधाने। तेनैव प्रधानं त्रिगुणम्, यतस्तथैव सुखदुःखमोहसंघट्टतया विमृश्यते पुरुषेण "इदम्" इति। अस्येदमात्मकस्य मूलप्रमेयतत्त्वस्य विकाराणां सुखदुःखमोहात्मकत्वान्मूलतत्त्वमपि तथारूपमेवेति तत् त्रिगुणं सत्त्वरजस्तमोमयम्।

द्र० 'गुणसाम्यम्' इति।

गुण-शक्ति-भेदः——अभेदभूमिकायां प्राणिनां यानि विविधानि सामर्थ्यानि तानि तेषां शक्तय इति व्यवह्रियन्ते। शक्तिशक्तिमतोरभेदात्। परं मायापदे भेदप्राधान्यतो नासौ वाग्व्यवहारः समुचितः। ततस्तत्र ते गुणाः इति कथ्यन्ते न, शक्तयः इति। यथा—

(क) "भेदस्थितेः शक्तिमतः शक्तित्वं नापदिश्यते।
एषां गुणानां करणकार्यत्वपरिणामिनाम्॥"

(ई० प्र० 4-1-5)

(ख) "संकुचितस्वभावः पुरुषो, नास्य नैसर्गिकं भावविषयं प्रकाशनादिरूपं, सर्वदा तत्प्रसङ्गात्; अपि त्वन्यसम्बन्धकृतम्। ततश्च तस्मात् पशोः शक्तिमत्त्वेन शंक्यमानाद् भेदेन यत एतानि

सत्त्वादीनि. ततः शक्तयो व्यतिरेकमुक्ताः इति नोच्यन्ते; किन्तूपकरणत्वाद् गुणा इत्युच्यन्ते।"

(ई०प्र०वि०, खं० 2, पृ० 256)

गुणसाम्यम्——प्रधानं तत्त्वं हि तावत् सामान्येनेदमिति प्रमेयमात्रम्। परमग्रे गुणवैषम्यदशोत्पादे तत्परिणामाः गुणत्रयात्मकतया यतोऽवभासन्ते ततो मूलतोऽपि तत् त्रिगुणं गुणत्रयसाम्यात्मकं चाङ्गीक्रियते। यथा—

"एवं संवेद्यमात्रं यत् सुखदुःखविमोहतः॥
भोत्स्यते यत्ततः प्रोक्तं तत्सम्यात्मकमादितः।"

(तं० आ० 9, 220-21)

गुणाः——(1) सत्त्वं, रजस्तमश्चेति त्रिप्रकाराः मायाप्रमातुः सामर्थ्यात्मकसाधनविशेषाः। यथा—

"गुणाः परभैरवस्य गृहीतमायाप्रमातृभूमिकस्य परापरदशोचित्येनावस्थिता धर्माः शक्तयः।"

(स्व०तं०उ० प० 7, पृ० 308)

(2) प्रकाश-प्रवृत्त्यवष्टम्भात्मकं सत्त्वरजस्तमोरूपं त्रिकम्। यथा—

"सत्त्वं प्रकाशजनकं प्रवृत्तिजनकं रजः।
तमोऽवष्टम्भकं प्रोक्तं विज्ञेयं तु गुणत्रयम्॥"

(स्व० तं० 11, 65)

~त्रयएव——प्रकाशाप्रकाशोभयभिन्नं चतुर्थं वस्तु न किमपि क्वापि दृष्टं श्रुतं वेति न कोऽपि चतुर्थोऽसौ गुणः। ततो गुणत्रयमेवेति सिद्धान्तः। यथा—

"अनुभयरूपं तु नास्ति यथा नीलं वस्तु धियि नीलानीलं तदुभयानुसन्धानधियि स्फुरेत्; चतुर्थं न कल्पितायां न अकल्पितायां धियि भातुमर्हति। अनीलनीले एव हि तदा भवेतामिति त्रय एव गुणा इति।"

(ई०प्र०वि०वि० खं० 3,. पृ० 363-64)

नीलभिन्नं ह्यनीलं, अनीलभिन्नं हि "अननीलम्" तच्च नीलमेवेति, नातिरिक्तं किमपि।

~मूलतः——परमेश्वरस्य ज्ञानशक्तिः क्रियाशक्तिर्मायाशक्तिश्च पाशवानां सत्त्वरजस्तमसां गुणानां बीजानि। शक्तित्रयमेतत् पशुभावे परिमितत्वेन भिन्नत्वेन चकासद्गुणत्रयतामापद्यते। ततो गुणत्रयस्य बीजानि शिवे। गुणत्रयं च पशोः सम्बन्धि परं ततो भिन्नम् करणवर्गवत्। गुणमय्या दृष्ट्या यदा पुरुषः प्रमेयप्रमाणादिकं कार्यकरणवर्गं पश्यति तदा गुणत्रयमयत्वं तत्रापि प्रकाशते। ततः पुरुषस्य सामान्यं प्रमेयभूतं तत्त्वमपि त्रिगुणमेवाभासते। इत्थं सर्वथाभिनवोऽयं शैवशास्त्रसिद्धान्तः। सांख्यादयस्तु गुणत्रयं मलतः प्रधानस्यैव स्वभावतया मन्यन्ते, पुरुषस्तन्मतेषु निर्गुणः। परमिह पुरुषस्य साधनं गुणत्रयम्। तस्य दृष्टिर्गुणमयी। तत एव तस्य प्रमेयभूतं प्रधानमपि सगुणम्। यथा—

"स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
माया-तृतीये ते एव पशोः सत्त्वं रजस्तमः॥"

(ई० प्र० 4, 1-4)

"ज्ञानशक्तिरेव मायाप्रमातरि भिन्नज्ञेयविषयत्वेन सत्त्वम्, एवं क्रियाशक्तिर्भिन्नकार्यविषयत्वेन रजः, माया एव भिन्नवस्तुविमोहमयी तम इति वक्ष्यते।"

(ई०प्र०वि०वि० खं० 3, पृ० 302)

"परतत्त्वे यद् ज्ञान-क्रिया-मायाशक्तित्रयं, तदेव वेद्यप्राधान्यं भजमानं सत् सुखदुःखमोहात्मकं गुणत्रयमिति।"

(तदेव खं० 2, पृ० 303)

"पुंसि यौ सृष्टौ कल्पितौ क्रियानन्दौ-क्रियाज्ञानशक्ती, विमर्शप्रकाशमय्यौ, ते एव क्रमेण सुखं दु.खं च, मध्ये तु विश्रमात्मकं तमो मायामयमिति स एव भोगः।"

(तदेव खं० 3, पृ० 359)

त्रयमपीदं भोग एवेति।

~व्याप्तितः——गुणाः पारस्परिकगुणप्रधानभावमादायैव भिन्नभिन्नान् प्राणिनो व्याप्नुवन्ति। यथा—

"गुणत्रयस्य व्याप्तिं वै कथयामि यथा स्थिताम्।
सत्त्वेनाधिष्ठिता देवा ब्रह्माद्या मघवान्तकाः॥
गन्धर्वयक्षमनुजा दैत्याश्चैव तु राजसाः।
यातुधानाः पिशाचाश्च तामसाः परिकीर्तिताः॥
रजः-सत्त्वोत्कटा ज्ञेया ऋषयः संशितव्रताः।
अन्योऽन्याभिभवास्ते च पृथिव्यां संव्यवस्थिताः॥
अत्यन्ततमसाविष्टाः स्थावराश्च सरीसृपाः।
पादपादविहीनाश्च तामसाः परिकीर्तिताः।
सरीसृपा विज्ञेयाः……………………॥"

(स्व० तं० 11, 167-71)

तारतम्येन पादेन पादेन विहीनं हि तमः स्थावरादीनामिति। ते च क्रमेण सरीसृपाः, पक्षिणः, मृगाः, गृहपशवः इति।

द्र० (स्व०तं०उ० खं० 6, पृ० 1-16)

~स्वभावतः——लाघवसुखप्रकाशस्वभावं सत्त्वम्, गुरुत्वमोहशैथिल्यस्वभावं तमः, चाञ्चल्य-प्रवृत्ति-दुःखस्वभावं रजः।

~स्वरूपतः——पत्युः स्फुरत्तात्मिका महासत्ता, सा च प्रकाशरूपता। प्रकाशस्य विमर्शाविनाभूतत्वेन सैव विमर्शात्मिका तस्य क्रिया। अनन्योन्मुखत्वेन पूर्णेन स्वातन्त्र्यरूपत्वेन सैवानन्दः। परं परिमितस्य पुरुषस्य सत्तानन्दः कदाचिदभिव्यक्तो भवति प्रियपुत्रादिदर्शनगीताद्यास्वाददशासु। कदाचित् पुनर्निद्रामूर्च्छादावेकघनस्तदभावोऽपि प्रकाशते। तदयं सत्तानन्दप्रकाशस्तस्य सत्त्वं सुखात्मकम्, तदभावस्तस्य तमो मोहात्मकम्। परं कदाचिदुभावेतौ समकालमेव प्रकाशेते। यथा रुग्णस्य प्राणसंकटग्रस्तस्य प्रियपुत्रादेर्दर्शने। तत्र प्रियपुत्रदर्शनेन सुखरूपता प्रकाशते, परमभिमतरूपतया कल्याणरूपतया दर्शनाभावोऽपि प्रकाशते। ततस्तत्र

सत्तानन्दभागोऽपि तदभावोऽपि समकालमेव मिश्रितौ भातः। एष तत् सत्त्वतमसोर्मिश्रितो यः आभासः स एव चाञ्चल्यकारि दुःखात्मकं रजः इति। यथा—

"सत्तानन्दः क्रियापत्युस्तदभावोऽपि सा पशोः।
द्वयात्मा तद्रजो दुःखं श्लेषि सत्त्वतमोमयम् ॥"
(ई० प्र० 4, 1-6)

"प्रियपुत्रादेरेकघन एव प्रकाशः सुखम्, एकघन एवाप्रकाशो मोहः। यस्तु कथञ्चित्प्रकाशो यथा सव्याधिकदेहरूपतयानभिमतया, कथञ्चिच्चाप्रकाशो यथा गतगदकल्याणधर्मयोगितयाभिमतया, तदेव दुःखत्वम्। अयमेव पूर्वापरीभावसारः क्रियापरमार्थः।"
(ई०प्र०वि० खं० 2, पृ० 258-259)

"यत्र सुखं भोग्यरूपप्रकाशः सत्त्वम्, दुःखं प्रकाशाप्रकाशान्दोलनात्मकमत एव क्रियारूपं रजः, मोहः प्रकाशाभावरूपस्तमः।" त्रितयमप्येतद् भोग्यरूपम्।
(तं० सा० पृ० 84)

पुरुषस्य मायामयी या दृष्टिस्तया दृश्यमानः प्रमेयांश एव तस्य कृते गुणत्रयमयः। इति गुणत्रयरूपत्वं प्रमेये तेनारोपितमेव मन्तव्यम्; यद्यप्यसौ स्वयं गुणातीत एव। यथा—

कल्पिता क्रिया दुःखम्, रजो हि प्रकाशाप्रकाशचाञ्चल्यरूपं दुःखमुच्यते। प्रकाशरूपं च सत्त्वं सुखम्। तमस्त्वप्रकाशरूपो मध्ये विश्रामः प्रलयस्थानीयः।"
(ई०प्र०वि० खं० 2, पृ० 253-254)

गुप्ततन्त्रम्——किमप्यागमशास्त्रपुस्तकं समुद्धृता यस्य पंक्तयः क्षेमराजेन। यथा—

"बद्ध्वा सप्तशिखां मुद्रामाशिखान्तं हलाकृतिम्।' इत्यादिना
'तदा ग्रसन्ति योगिन्यो रावं कृत्वा शिखान्तरे।'
इत्यन्तेन श्रीगुप्ततन्त्रे प्रदर्शितम्।"
(ने०तं०उ० खं 2, पृ० 232)

गुप्ताः~आचार्याः—— गुप्तोपनामका अभिनवगुप्तादयः। न च ते वैश्याः, यथाऽद्यत्वे गुप्ताः भवन्ति। यतोऽत्रिगुप्तस्योल्लेखः "द्विजन्मा" इति 'अगस्त्यगोत्रः" इति च कृतस्तन्त्रालोके 37-38 इत्यत्र। परात्रींशिकाविवरणान्ते चासौ 'प्राग्र्यजन्मा"(पृ० 280) इत्येवं निर्दिष्टो वर्तते। अस्ति खलु प्रसिद्धिः परम्परायाता यद् "गोप्ता ग्रामशताध्यक्षः" इति। ततो ग्रामशतप्रशासकः कोऽपि महत्त्वपूर्णः गोप्ता कदाचिदभूत् कान्यकुब्जदेशे। गोप्तृत्वेन तस्य प्रसिद्ध्या तद्वंशीया अपि गोप्तारः इति कथ्यन्ते स्म। "गोप्ता" इति शब्द एव कालान्तरे लोकव्यवहारे गुप्त इति रूपं दधौ। एवंविधा एव गुप्ता अभूवनन्येऽपि केचन ब्राह्मणा विद्वांसो यथा अर्थशास्त्रकृद् विष्णुगुप्तः, ज्योतिर्विद् ब्रह्मगुप्तश्चेति।

गुप्तिः~मन्त्रस्यः——द्र० 'मन्त्रगुप्तिः' इति।

गुप्तिभावः——मन्त्रसंरक्षणम्। यथा—

"गुप्तिभावो रक्षणं, तच्च नेत्रनाथसंपुटीकृतस्य अयुतजपात् भवति। यथोक्तम्—

मृत्युजित्संपुटीभूतं जपेत्तदयुतं पुनः।
जप्तेनानेन विधिना मन्त्ररक्षा कृता भवेत् ॥ इति।"
(ने०तं० उ० खं० 2, पृ० 75)

गुरवः~कौले——(1) ते चोच्छुष्मादिहुलहुल्वन्ताः दश सिद्धाः। यथा—

"देव एव गुरुत्वेन तिष्ठासुर्दशधा भवेत्।
उच्छुष्म-शवर-चण्डगु-मतङ्ग-घोरान्तकोग्रहल हलकाः।
क्रोधी हुलुहुलुरेते दश गुरवः शिवमयाः पूर्वे ॥"
(तं० आ० 28, 391)

(2) दशदिव्यगुरूणामंशा एव मानवशरीरं धृत्वात्रलोके आविर्भूताः इति। यथा—

"ते स्वांशचित्तवृत्तिक्रमेण पौरुषशरीरमास्थाय।
अन्योन्यभिन्नसंवित्क्रिया अपि ज्ञानपरिपूर्णाः ॥
सर्वेऽलिमांसनिधुवनदीक्षार्चनशास्त्रसेवने निरताः।
अभिमानशमक्रोधक्षमादिरवान्तरो भेदः ॥"
(तं० आ० 28, 392-93)

शमक्रोधक्षमादि-कृतस्तेषां परस्परं भेदोऽपि।

द्र० 'देवीयामलम्~तत्पंक्तयः' इति।

~दिव्याः—(त्रिके)——देवताशरीरास्त्रिकशास्त्रोपदेष्टारः। ते च क्रमेण दक्षाद्याः, संवर्ताद्याः, वामनाद्या, भार्गवः, बलिः, नृसिंहः, वैनतेयः, वासुकिनागः तं यावत् त्रिकशास्त्रं सप्तदशखण्डेषु विभक्तम्। यथा—

"एतैस्ततो गुरुःकोटिमात्रात् पादं वितीर्णवान्।
दक्षादिभ्यः उभौपादौ संवर्त्तादिभ्य एव च ॥
पादं च वामनादिभ्यः पदार्धं भार्गवाय च।
पादपादं तु बलये पादपादस्तु योऽपरः ॥
सिंहायार्धं ततः शिष्टाद् द्वौ भागौ विनताभुवे।
पादं वासुकिनागाय खण्डाः सप्तदश त्वमी ॥"
(तं०आ० 36, 3 तः 5)

गुरुः——(1) मूलप्रवक्ता शास्त्रस्य, शास्त्रपरम्पराप्रवर्तकः।

(2) मुक्तिमुक्तिप्रदायाः दीक्षायाः सम्पादक आचार्यः।
(3) मोक्षसाधनोपदेष्टा।
(4) मोक्षावाप्त्यनुकूलस्यानुग्रहस्य कर्ता।
(5) शास्त्रतत्त्वव्याख्याता।
(6) साधनारहस्यप्रकाशकः।
(7) दीक्षाकर्मणैव भुक्तिमुक्तिप्रदः।

एताभिः सर्वाभिर्विशेषताभिः समलङ्कृतोगुरुरतीवोत्कृष्टतरः। कतिचिद्विशेषतायुतोऽपि समुत्कर्षवान् गुरुः। एकैकविशेषतावानपि गुरुपदवीमधिरोहत्येव।

~अकल्पितः——स्वप्रतिभोदितज्ञानविज्ञानः सांसिद्धिको गुरुः। नास्य गुरुत्वपदव्यभिषेकः केनापि कल्प्यते। नानेनशास्त्राभ्यासो वा, साधनाभ्यासो वा क्रियाभ्यासोऽपि वा कश्चन क्रियते। एतत्प्रपञ्चराहित्येन तीव्रशक्तिपातपवित्रितः सन् स्वयमेव गुरुत्वपदवीमारूढोऽन्येषां तारको भवति। यथा—

"अकल्पितो गुरुर्ज्ञेयः सांसिद्धिक इति स्मृतः।"

(तं॰आ॰ 4, 51)

~अकल्पितकल्पकः——(1) अकल्पितस्यैव प्रकारविशेषः।

स्वयं समुदितप्रातिभज्ञानोऽपि यः स्वयमेव तत्संस्कारस्थैर्यार्थं स्वात्मशिवत्वभावनायोगाभ्यासं करोत्यसावकल्पित-कल्पको गुरुः। भावनाभ्यासफलत्वेन तस्य शास्त्रार्थस्य ज्ञानविज्ञाने सम्यक् सिद्ध्यतः। यथा—

"यस्तु तद्रूपभागात्म-भावनातः परं विना।
शास्त्रवित् स गुरुः शास्त्रे प्रोक्तोऽकल्पितकल्पकः॥"

(तं॰आ॰ 4, 51-52)

"आत्मनो दीक्षादिलक्षणं संस्कारं प्रकल्पयेत् येनायमकल्पितकल्पकः प्रागुक्तः।"

(तं॰आ॰वि॰ खं॰ 8, पृ॰ 93)

(2) अकल्पितकल्पको गुरुः स्वयमेव भावना-ध्यान-जपाद्यभ्यासं कुर्वन् सर्वशास्त्रतत्त्वविद् भवति। यथा—

"भावनातोऽथ वा ध्यानाज्जपात् स्वप्नाद्व्रताद्धुतेः।
प्राप्नोत्यकल्पितोदारमभिषेकं महामतिः॥"

(तं॰ आ॰ 4, 53)

अभिषेकपदेनात्र दीक्षादिकरणेऽधिकारो वेद्यः। राज्याभिषेकवत्। यथा—

"अभिषेकं प्राप्नोति-शास्त्रज्ञानादावधिकारवान्भवति।"

.(तं॰आ॰वि॰ खं॰ 3, पृ॰ 60)

~अकार्यरतः——समयोल्लंघनेन मारणमोहनादिकारित्वेन च दोषजातेन गुरवो शिवभावप्रवेशान्निरुद्धा भवन्ति, न प्रविशन्ति शिवत्वं; निरोधिका तान्निरुध्नाति। तत्र एवं निरुद्धस्त्रिकाचारनिष्ठः साधकः शुद्धविद्येश्वरपदव्यामेव तिष्ठति। एषैव गतिस्तान्त्रिकाणाम्। अन्ये पुनः सैद्धान्तिकाद्या एवंविधं कर्म कुर्वन्तः क्रव्यादयोनिं प्रविशन्ति। तदनन्तरं ते पिशाचविद्येश्वरपदवीमधिगच्छन्ति। यथा—

"अन्यायं ये प्रकुर्वन्ति शास्त्रार्थं वर्जयन्त्यलम्।
तेऽर्धनारीशपुरगा गुरवः समयच्युताः॥"

(तं॰आ॰ 23, 97)

(त्रिकसार वाक्यमतेत्) अन्यागममतानि यथा—
"अन्यत्राप्यधिकारं च नेयाद्विद्येशतां व्रजेत्।"
अन्यत्र समयत्यागात्क्रव्यादत्वं शतं समाः॥"

(तं॰आ॰ 23, 98)

अत्रैष निर्णयो यत् सिद्धान्तशैवाद्या एव क्रव्यादादियोनिं गच्छन्ति, पिशाच-विद्येशत्वं वा। परं त्रिकशास्त्रोपासकोऽर्धनारीशभुवनं गच्छति, न पतित इति। यथा—

"इयत्तत्रत्यतात्पर्यं सिद्धान्तगुरुरुन्नयः।
भवेत्पिशाचविद्येशः शुद्ध एव तु तान्त्रिकः॥
षऽर्धदैशिकश्चार्धनारीशभुवन-स्थितिः।"

(तं॰आ॰ 23, 99-100)

परमेषकर्मप्रधानानामेव गुरूणां विषये नियमो न ज्ञानिनाम्। यथा—

"एषा कर्म-प्रधानानां गुरूणां गतिरुच्यते॥
ज्ञानिनां चैष नो बन्ध इति सर्वत्र वर्णितम्।"

(तदेव 23, 100-101)

कर्मप्रधानाश्च दीक्षादिकर्मण्येवाधिकारवन्तो न ज्ञाने।

~अधरोत्तरः——अधरशास्त्रोपदेशकाद् गुरोर्य ऊर्ध्वशास्त्रोपदेशकस्य शरणं गच्छति तस्य तत् कर्म शिवानुग्रहशक्तिपातस्यैव फलम्। यथा—

"यस्तूर्ध्वोर्ध्वपथप्रेप्सुरधरं गुरुमागमम्।
जिहासेच्छक्तिपातेन स धन्यः प्रोन्मुखीकृतः॥"

(तं॰आ॰ 13, 356)

अधरशास्त्राणि बौद्ध-जैन-सांख्य-वेदसिद्धान्तशैवादीनि। उत्तराणि पुनः कुलमतकौलत्रिकाणि।

~अधिकारभेदतः——यथाऽनादिशिवसन्निधौ न मुक्तशिवानां सृष्ट्यादावधिकारस्तथाऽकल्पिते गुरौ सति न कल्पितस्य दीक्षादिकारणेऽधिकारः। यथा—

"तत् सन्निधौ नाधिकारस्तेषां मुक्तशिवात्मवत्॥
किन्तु तूर्ष्णीं स्थितिर्यद्वा कृत्यं तदनुवर्तनम्।"

(तं॰आ॰ 4, 75-76)

"नाधिकारः·······; सांसिद्धिकस्य गुरोः सन्निधाने कल्पितादीनां दीक्षादौ।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 81)

~अभिषिक्तः——(1) सामान्यतः स्वभ्यस्तज्ञानवान् योगसिद्धश्च सुप्रबुद्ध एव साधकः गुरूणाभिषिक्तः सन् शिष्याणां पाशदाहादावधिकृतो भवति। परं कदाचित्तथाविधसुप्रबुद्धाधिकारिणोऽभावे सति अस्वभ्यस्तज्ञानः प्रबुद्धमात्रोऽपि साधक आचार्यपदेऽभिषिच्यते स्वभ्यस्तविज्ञानेन समर्थेन गुरुणा, प्रतिष्ठाप्यते चाचार्यपदे। तदर्थं च साधकेन पूर्वं षड्भिर्मासैर्जपहोमादिविधिविशेषोऽनुष्ठेयो भवति। तत्पूर्त्तावेव गुरुणा कृताभिषेकविधिः सन्नभिषिक्तो गुरुरित्युच्यते। अस्याभिषिक्तत्वेनैवाचार्यत्वं न स्वभ्यस्तविज्ञानित्वेनेति तात्पर्यं परिभाषायाः। यथा—

"सोऽभिषिक्तो मन्त्रदेवतातादात्म्यसिद्धये षाण्मासिकं प्रत्यहं जपहोमविशेषपूजाचरणेन विद्याव्रतं कुर्यात्। तदनन्तरं लब्धतन्मयीभावो दीक्षादावधिकृतः।"

(तं॰सा॰ पृ॰173)

"प्राप्ताभिषेकः स गुरुः षण्मासान्मन्त्रपद्धतिम् ।
सर्वां तन्त्रोदितां ध्यायेज्जपेच्चातन्मयत्वतः ॥
यदैव तन्मयीभूतस्तदा वीर्यमुपागतः ।
छिन्द्यात्पाशांस्ततो यत्नं कुर्यात्तन्मयतास्थितौ ॥"

(तं०आ० 23, 31-32)

तन्त्रालोकस्याभिषेकाह्निके (23 शे) सुविस्तरं प्रतिपादितोऽभिषेकविधिस्तत्सम्बन्धि च प्रमेयजातमखिलम् ।

(2) कश्चित् स्वयमेव स्वस्याभिषेकं विधत्ते । तथाहि— प्रातिभज्ञानवतो ज्ञानं चेन्न दृढतां यायात् तदाऽसौ व्रत-जपहोमादि कुर्यात् स्वयं चात्मानं कल्पनयाभिषिञ्चेत् । तेनासावप्यभिषिक्तो गुरुः सम्पद्यते । यथा—

"यतो वाजसिनेयाख्य उक्तं सिञ्चेत्स्वयं तनुम् ॥
इत्याद्युपक्रमं यावदन्ते तत्परिनिष्ठितम् ।
अभिषिक्तो भवेदेवं न बाह्यकलशाम्बुभि. ॥"

(तं०आ० 13, 143-44)

"व्रतादौ च जपादौ च तयोरन्ते तथैव च ।
यागं कृत्वाथ विधिवत्स्वेन स्वमभिषेचयेत् ॥
यदि संपत्त्यभावः स्यान्मनसैवं प्रकल्पयेत् ।
यस्मादिदं जगत्सर्वं मनस्यन्तः प्रतिष्ठितम् ॥
ततः पीयूषकलशं कलाकमलमण्डितम् ।
ध्यात्वा शिरसि तेनैव प्लावितं भावयेद्बुधः ॥
अभिषिक्तो भवेदेवं न बाह्यकलशाम्बुभिः ।
य एवमभिषिक्तः सन् सोऽधिकारी जपादिके ॥"

(उद्ध० तं०आ०वि० खं० 8, पृ० 94)

~अभिषेचकः (अधिकारवान्)—— योग्याय शिष्यायाभिषेकदीक्षया स्वाधिकारान् दत्वाप्यभिषेचको गुरुर्नाधिकारहीनतामापद्यते । यद्यप्यन्येषां योग्यतावतां शिष्याणां दीक्षणे नासौ प्रागिव कर्त्तव्यबद्धः तथापि नासौ कृतस्वसुतराज्याभिषेकोऽनन्तदेवादिरिव 'राजा स्वयमधिकारहीनो जायते । स्वातन्त्र्यमस्य दीक्षणेऽदीक्षणे वा । यथा—

"ततः प्रभृत्यसौ पूर्वो गुरुस्त्यक्ताधिकारकः ।
यथेच्छं विचरेद् व्याख्यादीक्षादौ यन्त्रणोज्झितः ।
कुर्वन्न बाध्यते यस्माद्दीपाद्दीपवदीदृशः ॥
सन्तानो नाधिकारस्य च्यवोऽकुर्वन्न बाध्यते ।
प्राक् चाकुर्वन् विहन्येत्······················ ।।"

(त०आ० 23, 26तः 28)

~असद्रूपः——परतत्त्वरहस्यसाक्षात्काररहिता अपि स्वशिष्यमुखैः कारिताभिः स्वप्रशंसाभिर्मुग्धाञ्जनान् स्वजालेषु पातयन्तः स्वात्मनो गुरुत्वं घोषयन्तः स्वयं बम्भ्रम्यमाणाः सन्तः स्वशिष्यानपि भ्रामयन्ति । न तादृशाः गुरवः सद्गुरवः । यथा—

"भ्राम्यन्तो भ्रमयन्ति मन्दधिषणास्ते जन्तुचक्रं जडं
स्वात्मीकृत्य गुणाभिधानवशतो बद्धा दृढं बन्धनैः ॥
दृष्टेत्थं गुरुभारवाहविधये यातानुयातान्पशून्
तत्पाशप्रविकर्तनाय घटितं ज्ञानत्रिशूलं मया ॥"

(प०त्री०वि० पृ० 281)

~उत्कृष्टतमः——सर्वशास्त्रतत्त्वज्ञानविज्ञानवान् गुरुः । यथा—

"सर्वज्ञाननिधानं तु गुरुं संप्राप्य सुस्थितः ॥
तमेवाराधयेद्धीमांस्तत्तज्जिज्ञासनोन्मुखः ।"

(तं०आ० 22, 47-48)

~ऐश्वर्यमात्रदः——यो गुरुः केवलं सिद्धयोगी न च स्वभ्यस्तज्ञानवान्, स केवलं लोकलोकान्तरलभ्यमैश्वर्यभोगमेव दातुमलं, न मोक्षं नापि ज्ञानम् । इत्येतच्छम्भुनाथमतम् यथा—

"मुक्त्यंशे योगिनं यस्तत्फलं दातुं भवेत्क्षमः ।

(तं०आ० 13, 339)

बभुक्षुणा तथाविध एव गुरुरन्वेष्टव्य इति ।

~कर्त्तव्यतः—— शिवानुग्रहपात्रतामवाप्तस्य जनस्य दीक्षणमभिषिक्तस्य शिवगुरोः कर्त्तव्यम् । शिष्यस्य साधनसम्पत्त्यभावे गुरुणा स्वकीयेन वित्तेन तस्य साधन-सम्पत्तिः पूरणीया भवति । भिक्षोपार्जनेन वा तस्याः पूर्तिः कारणीया । तदभावे दूर्वाजलेनैव दीक्षणीयः । यथा तथापि पात्रतां प्राप्तः शिष्यो दीक्षणीय एवेति नियमः । यथा—

"स्वधनेन दरिद्रस्य कुर्यादीक्षां गुरुः स्वयम् ।
अपि दूर्वाम्बुभिर्यद्वा दीक्षायै भिक्षते शिशुः ॥"

(तं० आ० 15, 36-37)

~कर्मी——द्र० 'कर्मी~गुरुः' इति ।

~कल्पितः——(1) गुर्वाराधनक्रमेण विधिवच्छास्त्राभ्यासं साधनाक्रियाश्चाभ्यस्य समुपार्जितज्ञानविज्ञानः कल्पितो गुरुः । नासौ सांसिद्धिकः । यथा—

"कल्पितमप्यभिधातुमुपक्रमते—"

(तं०आ०वि० खं० 3, पृ० 75)

"यस्तु शास्त्रं विना नैति शुद्धविद्याख्यसंविदम् ॥
गुरोः स शास्त्रमन्विच्छुस्तदुक्तं क्रममाचरेत् ।"

(तं०आ० 4, 69-70)

"इदं कृत्वेदं कुर्यादित्येवमात्मकं क्रममाचरेत्, येनास्य गुर्वाराधनक्रमेण शुद्धविद्योदयः ।"

(तं०आ०वि० खं० 3, पृ० 76)

द्र० 'गुरुः~अभिषिक्तः' इति ।

(2) सामय्यादिदीक्षामारभ्याभिषेकान्तक्रियासम्पादनेन समुवितशुद्धविद्यः आचार्यपदे लब्धाभिषेको गुरुः । यथा—

"येन केनाप्युपायेन गुरुमाराध्य भक्तितः ।
तद्दीक्षाक्रमयोगेन शास्त्रार्थं वेत्त्यसौ ततः ।
अभिषेकं समासाद्य यो भवेत् स तु कल्पितः ।
सन्नप्यशेष - पाशौघ - विनिवर्तन - कोविदः ।"

(तं०आ० 4, 70 तः 72)

~कल्पिताकल्पितः——(1) परेण गुरुणाऽऽचार्यपदेऽभिषिक्तः सन्नपि क्वचिदंशे स्वप्रतिभोदितज्ञानविज्ञानो गुरुः। यथा—

"यो यथाक्रमयोगो न कस्मिंश्चिच्छास्त्रवस्तुनि ॥
आकस्मिकं व्रजेद् बोधं कल्पिताकल्पितो हि सः ॥"

(तं०आ० 4, 72-73)

(2) कल्पिताकल्पिते गुरौ योऽकल्पितोंऽशः स एव श्रेष्ठः, तत्रैव शुद्धविद्यायाः समुत्कर्षात्। यथा—

"तस्य योऽकल्पितो भागः स तु श्रेष्ठतमः स्मृतः ॥
उत्कर्षः शुद्धविद्यांश - तारतम्यकृतो यतः।"

(तं०आ० 4, 73-74)

~ज्ञानवान्——स्वशिवत्वसाक्षात्कारवान् गुरुः। स एव हि उत्तमो गुरुषु। यथा—

"अतो देशकुलाचारदेहलक्षणकल्पनाम् ॥
अनादृत्यैव संपूर्णज्ञानं कुर्याद् गुरुं गुरुम्।"

(तं०आ० 23, 16-17)

एतेन व्यज्यते यत्स्वभ्यस्तज्ञानवानेव गुरुराचार्यपदप्रतिष्ठाधिकारी ज्ञानवत्त्वादेव, न तस्य विषये शरीराङ्गवैकल्यकुजात्यादिदोषा गणनीया इति। यथा—

"तत्त्वज्ञानात्मकं साध्यं यत्र यत्रैव दृश्यते।
स एव हि गुरुस्तत्र हेतुजालं प्रकल्प्यताम् ॥"

(तं०आ० 4, 59)

तत्त्वज्ञानोदयस्य योगिनीदीक्षाद्या हेतवस्तत्र कल्प्यन्त इति।

~ज्ञानमोक्षदः——यो गुरुरुत्कृष्टलोकलोकान्तरैश्वर्यं दातुमसमर्थोऽपि तत्त्वज्ञानमोक्षमात्रप्रदोऽसौ केवलभोगप्रदाद् गुरोरुत्कृष्टतरः। यथा—

"तदभावे तु विज्ञानमोक्षयोर्ज्ञानिनं श्रयेत्।
मुक्त्यंशे योगिनं यस्तत् फलं दातुं भवेत् क्षमः ॥
फलदानाक्षमे योगिन्युपायैकोपदेशिनि।
वरं ज्ञानी योऽभ्युपायं दिशेदपि च मोचयेत् ॥"

(तं०आ० 13, 339-40)

~ज्ञानी——तत्त्ववेत्ता गुरुर्ज्ञानीत्युच्यते। स एव हि मोक्षं दातुं समर्थः। यथा—

"स चायं पूर्णज्ञान एव सर्वोत्तमः।"

(तं०सा० पृ० 125)

द्र० 'ज्ञानी~गुरुः' इति।

~तत्त्वज्ञानी——य एव तत्त्वज्ञानवान् स एव भावनाद्यभ्यासोपदेशादिनाऽकल्पितकल्पको गुरुर्भवितुमर्हति, न पुनः केवलभावनाद्यभ्यासी। यथा—

"तत्त्वज्ञानात्मकं साध्यं यत्र यत्रैव दृश्यते।
स एव हि गुरुस्तत्र हेतुजालं प्रकल्प्यताम्।"

(तं०आ० 4, 59)

किमपि तत्र योगिनीदीक्षादिकं हेतुजालं प्रकल्प्यते इति।

"अर्थद्वारेण संवादयति—
तत्त्वज्ञानादृते नान्यल्लक्षणं ब्रह्मयामले।"

(तं०आ० 4, 60)

"सर्वलक्षणहीनोऽपि ज्ञानवान् गुरुरुत्तमः।"

(उद्धृ०तं०आ०वि० खं० 3, पृ० 67)

~त्याज्यो न वा ——अवरं गुरुं परित्यज्योत्तमस्य गुरोराश्रयणे नैव प्रायश्चित्तम्, वैपरीत्ये तु प्रायश्चित्तम्। सम्पूर्णज्ञानस्य गुरोस्त्यागे तु प्रायश्चित्तमस्त्येव। यथा—

"सम्पूर्णज्ञानगुरुत्यागे तु प्रायश्चित्तमेव।"

(तं०सा० पृ० 125)

द्र० 'गुरुबहुत्वम्' इति।

~प्रातिभः——स्वयमेवोद्भूतप्रातिभतत्त्वज्ञानवान् गुरुः।
द्र० 'अकल्पितः' इति।

~महामहिममण्डितः——(1) कृच्छ्रचान्द्रायणादिभिर्यन्न प्राप्यते तद् गुरोरनुग्रहेण लभ्यते। इत्येष सद्गुरोर्महिमा। यथा—

"श्रीमत्त्रैशिरसेऽप्युक्तं कृच्छ्रचान्द्रायणादिभिः ॥
अरण्ये काष्ठवत्तिष्ठेदसिधाराव्रतोऽपि सन्।
नियमस्थो यतस्थोऽपि तत्पदं नाश्नुते परम् ॥
गुर्वाराधनसंक्तस्तु मनसा कर्मणा गिरा।
प्राप्नोति गुरुतस्तुष्टात् पूर्णं श्रेयो महाद्भुतम् ॥
....
....इत्यादि
..........................तस्मादाराधयेद्गुरुम् ॥" इत्यन्तम्।

(तं०आ० 15, 540 तः 545)

(2) ज्ञानविज्ञानदो गुरुः साक्षाच्छिव इति बुद्ध्या पूज्यो भवति। यथा—

" ...... शिवः साक्षात् तस्मात्तं पूजयेत् सदा ॥
शाठ्यं तत्र न कार्यं च तत्कृत्वाधो व्रजेच्छिशुः।
न पुनः कीर्त्तयेत्तस्य पापं कीर्त्तयिता व्रजेत् ॥
निरयं वर्जयेत्तस्मादिति दीक्षोत्तरे विधिः।"

(तं०आ० 21, 59 तः 61)

~महामहिमशीलः——उक्तो विस्तरेण श्रीसारशास्त्ररीत्या तस्य महिमा। यथा—

"श्रीसारेऽप्यस्य संभाषात्पातकं नश्यति क्षणात्।
तस्मात्परीक्ष्य यत्नेन शास्त्रोक्त्या ज्ञानलक्षणैः ॥
शास्त्राचारेण वर्तेत तेन सङ्गं तथा कुरु।
स्नेहाज्जातु वदेज्ज्ञानं लोभान्न ह्रियते हि सः ॥
तेन तुष्टेन तृप्यन्ति देवाः पितर एव च।
उत्तीर्य नरकाद्यान्ति सद्यः शिवपुरं महत् ॥
भुङ्क्ते तिष्ठेद्यत्र गृहे व्रजेच्छिवपुरं तु सः।
इति ज्ञात्वा सदा पित्र्ये श्राद्धे स्वं गुरुमर्चयेत् ॥"

(तं०आ० 15, 546 तः 549)

~मोक्षदः——स्वभ्यस्तेन ज्ञानेन परतत्त्वपूर्णसाक्षात्कारवानेवोत्तमो गुरुः, यः शिष्यं मोक्तुं सुनिश्चयं समर्थः। यथा—

"इहाप्युक्तं मोक्षदः स्यात् स्वभ्यस्तज्ञानवानिति ॥"

(मा०वि०वा० 2, 328)

~योगी——योगसिद्धयात्मकमुक्तिप्रदो गुरुर्योगीत्युच्यते। असावैश्वर्यभोगप्रद एव, न मोक्षप्रदः। यथा—

"योगी तु फलोत्सुकस्य युक्तो यदि उपायोपदेशेन अव्यवहितमेव फलं दातुं शक्तः।"

(तं०सा० पृ० 125)

द्र० 'योगी~गुरुः' इति।

~लक्षणतः——(1) योगसिद्धिमान् स्वभ्यस्तज्ञानवांश्च सुप्रबुद्धः सिद्धो ह्युत्तमो गुरुर्भवितुमर्हति, नैकाङ्गविकलः। इति स्वभ्यस्तज्ञानित्वे सति योगसिद्धत्वं गुरोर्लक्षणम्। असौ गुरुर्वास्तविकं मोक्षं शास्त्रज्ञानं च पूर्णं दातुं क्षमः, सर्वाश्च शंकाः शमयितुम्। गुरोः सुसिद्धत्वं न तथावश्यकम्। तत् तु भोगमोक्षज्ञानात्मकफलत्रयाकांक्षिणे आवश्यकम्। यथा—

"तस्मात् स्वभ्यस्तविज्ञानतैवैकं गुरुलक्षणम्।"

(तं०आ० 13, 333)

विज्ञानं च तत्त्वस्य योगसिद्धिं विना न सम्भवत्येवेति पूर्णविज्ञानवत्त्वेन योगसिद्धत्वमप्याक्षिप्तम्। यथा—

"यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः।
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः॥
स्पृष्टाः सम्भषितास्तेन दृष्टाश्च प्रीतचेतसा।
नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि।
ये पुनर्दीक्षितास्तेन प्राणिनः शिवचोदिताः॥
ते यथेष्टं फलं प्राप्य पदं गच्छन्त्यनामयम्।"

(मा०वि०तं० 2, 10तः 12)

(2) उपास्य-देवतया सह तादात्म्यमापन्न एव योगी वस्तुतस्तत्तत्स्तरनिष्ठो गुरुर्भवितुमर्हति, न केवलं शास्त्रपाठकः। यथा—

"तस्मात्तादात्म्यमापन्नो गुरुरित्यभिधीयते।"

(मा०वि०वा०, 2, 313)

"तस्मान्मुख्यो ह्ययं कल्पः प्रतिशास्त्रं गुरुर्गुरुः॥"

(तदेव, 2, 318)

~विशेषलक्षणतः——अनुत्तरविसर्गात्मकस्य अकारहकारद्वयस्य तत्त्वं यो विजानाति स एव हि गुरुर्भवितुमर्हति। तथाविध एव गुरुस्तारकः। यथा—

"गुरोर्लक्षणमेतावदादिमान्त्यं च वेदयेत्।
पूज्यः सोऽहमिव ज्ञानी भैरवो देवतात्मकः॥"

(तं०आ० 3, 224)

~शिष्टः——यः प्रतिभज्ञानवान् गुरुरसौ नैव शासिता नापि शिष्योऽतोऽसौ शिष्टो गुरुरिति परिभाषितः। यथा—

"प्रतिभाचन्द्रिकाशान्तध्वान्तश्चाचार्यचन्द्रमाः।
तमस्तापौ हन्ति दृशं विस्फार्यानन्दनिर्भराम्॥
स शिष्टः कर्मकर्तृत्वाच्छिष्योऽन्यः कर्मभावतः।"

(तं०आ० 13, 133-34)

"तमस्तापाविति शैष्यौ।"

(तं०आ०वि० खं० 8, पृ० 87)

"शास्यत्वाभावेन स्वातन्त्र्यविवक्षया कर्तृत्वात् "लूयते केदारः" इतिवत् कर्मवद्भावात् कर्मणि क्ते शिष्ट इति।"

(तदेव खं० 8, पृ० 88)

~श्रेष्ठः——यो ह्येकतः सम्पूर्णज्ञानवानपरतश्च सर्वथा योगसिद्धिभागसौ निश्चयेनाभीष्टां भुक्तिं मुक्तिं चापि दातुं समर्थो, अन्यतश्च सम्पूर्णक्रियाजालतत्त्वविज्ञानमर्मज्ञः स एव केवलज्ञान्यपेक्षया केवल-योग्यपेक्षया च श्रेयानिति सर्वश्रेष्ठोऽसौ गुरुः। यथा—

"यस्तु भोगं च मोक्षं च वाञ्छेद् विज्ञानमेव च।
स्वभ्यस्तज्ञानिनं योगसिद्धं स गुरुमाश्रयेत्।"

(तं०आ० 13, 338)

"धन्यस्तु पूर्णविज्ञानं ज्ञानार्थी लभते गुरुम्॥"

(तदेव 11, 342)

~सद्योमुक्तिदः——(1) सद्गुरुं प्रति यियासां विनापि कदाचित्तथा गुरुकृपा शिष्ये भवति यथाऽसौ सद्य एव मुक्तो भवति, समवाप्तशिवभावस्य गुरोः स्वातन्त्र्यात्। यथा—

"तत्क्षणादिति नास्यास्ति यियासादिक्षणान्तरम्।
किंत्वेवमेव करुणानिघ्नस्तं गुरुरुद्धरेत्॥"

(तं०आ० 21, 5)

तीव्रतीव्रशिवानुग्रह शक्तिपातस्यैव फलमेवंविधा गुरुकृपा।

~सम्पूर्णज्ञानः——सर्वशास्त्रतत्त्वज्ञो योगसिद्धोऽसौ गुरुर्योऽनुग्रहपरः सन् स्वाशिष्यान् सद्य एवाज्ञानसागरात्तारयति स्वयैव योगशक्त्या, मोचयति संसारबन्धात्। यथा—

"यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः।
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः॥
स्पृष्टाः सम्भाषितास्तेन दृष्टाश्च प्रीतचेतसा।
नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि॥
ये पुनर्दीक्षितास्तेन प्राणिनः शिवचोदिताः।
ते यथेष्टं फलं प्राप्य पदं गच्छन्त्यनामयम्॥"

(मा०वि०तं० 2, 10-12)

"यस्मिन्काले तु गुरुणा निर्विकल्पं प्रकाशितम्॥
तदैव किल मुक्तोऽसौ यन्त्रं तिष्ठति केवलम्॥"

(तं०आ० 13, 230-31)

द्र० 'सम्पूर्ण ज्ञानः~(गुरुः)' इति।

~सर्वज्ञः——परिपूर्णज्ञानवान् सिद्धयोगश्च गुरुः शिष्यविषये जगद्विषये च प्रायः सर्वं तत्त्वं जानाति।

~(तारतम्यतः)——देहसम्बन्धस्य गाढतायां गुरूणामपि सर्वज्ञता प्रायो नैव सर्वत्र प्रवर्तते। ततस्तेऽपि कदाचिद्दाम्भिकैर्वञ्चयितुं शक्यन्ते। यथा—

"देहसम्बन्धसञ्छन्नसार्वज्ञ्यो दम्भभाजनम्।
अविदन् दीक्षमाणोऽपि न दुष्येद् दैशिकः क्वचित्॥"

(तं०आ० 23, 44-45)

गुरोः सर्वज्ञत्वं तु न सकल-व्यावहारिक-विषयकं ज्ञानम्; अपितु "सर्वं वस्तुतः स्वात्मशिवरूपमेव" इत्येवंप्रकारकं वस्तुतत्त्वज्ञानम्। तेन शिष्यस्य दाम्भिकत्वमजानन्नपि सर्वज्ञ एवासौ।

~सर्वोत्तमः——यस्तु बाह्य-संस्कार संस्कृतः सन् प्रतिभात्मकज्ञानवानसौ गुरुः सर्वश्रेष्ठः, तस्य शिष्यमोचकत्वं यतः सुकरम्। यथा—

"यस्तु प्रातिभबाह्यात्म-संस्कारद्वयसुन्दरः।
उक्तोऽनन्योपकार्यत्वात्स साक्षाद्वरदो गुरुः॥"

(तं०आ० 13, 158)

~सांसिद्धिकः——स्वयमुद्बुद्धप्रातिभतत्त्वज्ञानवान् गुरुः। द्र० 'अकल्पितः' इति।

~सामर्थ्यदः——मन्त्रदर्शनसामर्थ्यरहितोऽपि शिष्यो गुरोरनुग्रहेण सहकारिणा मन्त्रदर्शनक्षमो जायते। यथा—

"चक्षुरादीन्द्रियाणां हि सहकारिणि तादृशे॥
सत्यत्यन्तमदृष्टे प्रागपि जायेत योग्यता।"

(तं०आ० 15, 453-54)

~सामान्यतः——प्रत्यभिज्ञातात्मस्वरूप एव देशिको गुरुरुक्तः। यथा—

"तदुक्तं श्रीकामिकायां—

'ज्ञानमूलो गुरुः प्रोक्तः सप्तसत्रीप्रवर्तकः'। इति श्रीसिद्धामतेऽपि—

'ज्ञानेन तु महासिद्धो भवेद्योगीश्वरस्त्विह'। इति।"

(ने०तं० उ० खं० 2, पृ० 36)

~स्वभ्यस्तज्ञानः——(1) यः पूर्णज्ञानी योगाभ्याससिद्धश्च गुरुः यश्च दीक्षाकर्मणापि शिष्यं मोचयितुं क्षमः, स एव हि गुरुः सर्वथा भोगमोक्षप्रदः। यथा—

"तेनोक्तं मालिनीतन्त्रे विचार्य ज्ञानयोगिते।
यतश्च मोक्षदः प्रोक्तः स्वभ्यस्तज्ञानवान् बुधैः॥"

(तं०आ० 13, 332)

गुरुनाथपरामर्शः——मधुराजकृताऽभिनवगुप्तप्रशस्तिः पञ्चचत्वारिंशत्पद्यमयी।

गुरुनिर्वाणदिनम्——गुरुमरणदिनं शिष्यपरम्पराणां कृते पर्वदिनम्। यथा—

"तन्मरणं तद्विद्यासन्तानिनां पर्वदिनं संविदंशपूरणात्, तावतः सन्तानस्यैकसंविन्मात्रपरमार्थत्वाद् जीवतो ज्ञानलाभसन्तानदिवसवत्।"

(थं०सा० पृ० 176-77)

गुरुपंक्तिः~पूज्या——(1) गणपतिः, (2) गुरुः, (3) परमगुरुः, (4) परमेष्ठिगुरुः, (5) पूर्वसिद्धः (परमाचार्यः), (6) वागीश्वरी, (7) क्षेत्रपतिः इति। यथा—

"गणपतिगुरुपरमाख्याः परमेष्ठी पूर्वसिद्धवाक्क्षेत्रपतिः।
इति सप्तकमाख्यातं गुरपंक्तिविधौ प्रपूज्यमस्मद्गुरुभिः॥"

(तं०आ० 16, 10)

गुरुपंक्तित्रयम्——पुरुषतत्त्वे यानि भुवनानि तत्र स्थितास्तिस्रः गुरूपंक्तयः परिगणिताः यथा—

"अथोर्ध्वं गुरुशिष्याणां पंक्तित्रयमतः श्रृणु।
मस्करी पूरणः कृत्स्नः·······इत्यारभ्य॥
पंक्तित्रयं समाख्यातमृषीणां गुरुशिष्ययोः॥"

(स्व०तं०पं० 10, 1074 तः 1086)

~1 मा पंक्तिः——पुरुषतत्त्वान्तर्गतेषु भुवनेषु परिगणिता मस्कर्यादिर्भदन्तान्ताः। अत्र द्वाविंशतिर्गुरुवराः। तेषु दुर्वासा परमर्षित्वेन गणितः। द्रष्टव्यं—

"मस्करी, पूरणः, कृत्स्नः, ········इत्यारभ्य।
························वायुपुत्रो, भदन्तकः॥
मस्कर्यादिभदन्तान्ता दृष्टादृष्टस्य वादिनः।
द्वाविंशतिगुरुवराः प्रथमा पंक्तिरिष्यते।" इत्यन्तम्।

(स्व०तं० 10, 1074 तः 1078)

अत्रैव—कपिलः, सनत्कुमारः, गौतमः, वसिष्ठः, कश्यपः, वाल्मीकिः, पराशरः, इत्येतेऽपि परिगणिताः। सर्वं एवैते इदानीं पुरुषतत्त्वान्तर्विद्यमानेषु भुवनेषु निवसन्ति।

~2 या पंक्ति——पुरुषतत्त्वान्तर्गतेषु भुवनेषु परिगणिता जह्नुमारभ्य चार्वन्ताः पञ्चविंशतिगुरवोऽत्र पंक्तौ। अत्र अगत्स्यः, शुक्रः, भृगुः, अङ्गिराः, जामदग्न्यः (परशुरामः) इत्येतेऽपि परिगणिताः। यथा—

"जह्नुश्च, तृणबिन्दुश्च,········इत्यारभ्य।
जह्न्वादिचारुपर्यन्ता द्वितीया पंक्तिरिष्यते॥" इत्यन्तम्।

(स्व०तं० 10, 1078 तः 1081)

"जह्न्वादिचारुपर्यन्ता ऋषयः पञ्चविंशतिः।" इति च।

(तदेव 10-1081)

~3 या पंक्तिः——पुरुषतत्त्वान्तर्गत-भुवनमध्येऽसौ गुरुपंक्तिः परिगणिता। तत्र हरमारभ्य ध्रुवान्तं विंशतिर्गुरवः। तेषु तावदमरेशः, कपालीशः, महाकालः, ध्रुवः इत्येतेऽपि गणिताः। यथा—

"हरो भिण्ठी प्रतोदश्च……………………। इत्यारभ्य
……………………भारभूतेश्वरो ध्रुवः ॥" इत्यन्तम् ।
(स्व० तं० 10, 1082 तः 1085)

तथा—
"हरादयो ध्रुवान्ताश्च गुरवो विंशतिः स्मृताः ।"
पंक्तित्रयं समाख्यातमृषीणां गुरुशिष्ययोः ॥
(तदेव 10, 1086)

इत्यन्तं च ।

गुरुपूजाविधिः——विस्तरतः प्रतिपादितस्तन्त्रालोकेऽष्टाविंश आह्निके 423तः 434 यावत् कारिकाभिः क्रियाबहुलो विधिः ।
(तं०आ० 28, 423तः 434)

गुरुबहुत्वम्——(1) परिपूर्णज्ञानेच्छुः साधकः बहूनपि गुरूनुपास्य तेभ्यस्तत्तज्ज्ञानं गृहीत्वा ज्ञानपरिपूर्णतां प्रत्यग्रेसरेत्; न गुरुबहुत्वविषये शङ्कां कुर्यात् कामपि । यथा—

(क) "ज्ञानी न पूर्ण एवैको यदि ह्यंशांशिकाक्रमात् ।
ज्ञानान्यादाय विज्ञानं कुर्वीताखण्डमण्डलम् ॥
तेनासंख्यान् गुरून् कुर्यात् पूरणाय स्वसंविदः ।"
(तं०आ० 13, 341-42)

(ख) "तस्मान्न गुरुभूयस्त्वे विशङ्केत कदाचन ।"
(तं०आ० 13, 349)

(ग). "ज्ञानपूर्णताकाङ्क्षी च बहूनपि गुरून् कुर्यात् ।"
(तं०सा० पृ० 125)

(घ) "योऽपि हृत्स्थमहेशानचोदनातः सुविस्तृतम् ।
शास्त्रज्ञानं समन्विच्छेत्सोऽपि यायाद्बहून्गुरून् ॥
तद्दीक्षाश्चापि गृह्णीयादभिषेचनपश्चिमाः ।
ज्ञानोपोद्बलिकास्ता हि तत्तज्ज्ञानवता कृताः ॥"
(तं०आ० 22, 43-44)

(ङ) "उक्तं च श्रीमते शास्त्रे तत्र तत्र च भूयसा ।
आमोदार्थी यथा भृङ्गः पुष्पात्पुष्पान्तरं व्रजेत् ॥
विज्ञानार्थी तथा शिष्यो गुरोर्गुर्वन्तरं त्विति ।"
(तं०आ० 22, 45-46)

(च) "अत्र चेयान् विशेषो यत् पूर्वगुर्वाज्ञया गुर्वन्तरं व्रजेदिति ।"
(तं०आ०वि०खं० 10, पृ० 260)

(2) परिपूर्णज्ञानविमुक्त्यर्थी पूर्वगुरुं विहाय गुर्वन्तरमप्याश्रयेत् स्वभ्यस्तज्ञानयोगम् । यथा—
"अन्यं त्यजेत् प्राप्तमपि तथाचोक्तं शिवेन तत् ।
आमोदार्थी यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत् ॥
शक्तिहीनं गुरुं प्राप्य मोक्षज्ञाने कथं श्रयेत् ।
नष्टमूले द्रुमे देवि कुतः पुष्पफलादिकम् ॥
उत्तरोत्तरमुत्कर्षलक्ष्मीं पश्यन्नपि स्थितः ।
अधमे यः पदे तस्मात् कोऽन्यःस्याद्दैवदग्धकः ॥"
(तं०आ० 13, 334तः 337)

गुरुवक्त्रम्——पराशक्तिः । यथा मुखेन प्राणाद्यन्तः प्रविशति तथा स्वशक्त्यभिव्यक्तिमुखेन जीवः शिवभावं प्रविशति । यथा—
"गुरोः परमशिवस्य वक्त्रं प्राप्त्युपायः । यदुक्तं त्रिशिरोभैरवे—'गुरोर्गुरुतरा शक्तिः……' । इति"
(स्व०तं०उ०प० 10, पृ० 556)

गुर्वन्तरम्——यत्र शास्त्रे यो गुरुर्नाधिकृतस्तत्रासौ गुर्वन्तरम्, न चोपास्यम् । यथा—
"तत्रानधिकृतो यस्तु तद्गुर्वन्तरमुच्यते ।"
(तं०आ० 13, 351)

गुह्यकाः——यक्षविशेषाः । यथा—
"गुह्यकाः प्रधानयक्षाः ।"
(ने०तं०उ० खं० 2, पृ० 115)

गुह्यम्~बीजम्——शकारः । यथा—
"गुह्यनितम्बदण्डवामस्कन्धैः । तेन श् म् र् यूं नमः इति ।"
(तं०आ०वि० खं० 12, पृ० 212)
अत्र बीजपिण्डे शकार एव गुह्यपदेनोक्तः ।

गुह्ययोगिनीतन्त्रम्——किमप्यागमशास्त्रम् । यथा—
"हयो हेषति यद्वच्च दान्त उद्रवतीव च ।
सिंहो गर्जति यद्वच्च उष्ट्रः सीत्कुरुते यथा ॥
तथोदीर्यं पशोः प्राणानाकर्षन्ति बलाधिकाः ।
महामन्त्रप्रयोगोऽयमसाध्याकृष्टिकर्मणि ॥"
(उद्ध०प०त्री०वि० पृ० 190)

गुह्यशक्तिः~बीजम्——ई । यथा—
"गुह्यशक्तिरी ।"
(तं०आ०वि० खं० 12, पृ० 197)

गूढिः——गोपनम् अष्टप्रकारम् । समयदीक्षायां समयविशेषः । यथा—
"स्वमन्त्रमक्षसूत्रं च विद्या ज्ञानस्वरूपकम् ॥
समाचारान् गुणान् क्लेशान् सिद्धिलिङ्गानि गूहयेत् ।"
(उद्ध०तं०आ० 15, 525-26)

गोचरी~कौले——बहिरिन्द्रियदेव्यो हि गोचर्यः । यथा—
"बहिरिन्द्रियाधिष्ठात्र्यो देव्यः गोचर्यः ।
गोषु बहिरिन्द्रियेषु सञ्चरणाद् गोचरी ।"
(म०म०प० पृ० 86)

~त्रिके——अन्तःकरणाधिष्ठातृदेव्यः गोचर्यः। यथा—

"(चितिशक्तिरेव पशुभूमिकायां) भेदनिश्चयाभिमानविकल्पनप्रधानान्तःकरणदेवीरूपेण गोचरीचक्रेण गोपिताभेदनिश्चयाद्यात्मकपारमार्थिकस्वरूपेण प्रकाशते।"

(प्र०हृ० पृ० 29)

"(पतिभूमिकायां तु) अभेदनिश्चयाद्यात्मना गोचरीत्वेन··· स्फुरति।"

(तदेव पृ० 30)

"गौः वाक् तदुपलक्षितासु संजल्पमयीषु बुद्ध्यहंकारमनोभूमिषु चरन्ति इति गोचर्यः, शक्तिपातवतां शुद्धाध्यवसायाभिमानसंकल्पप्ररोहिण्यः, परेषां तु विपर्यासिन्यः।"

(स्पं०सं० पृ० 20)

गोपनीयता~तन्त्रविधेः——न हि तान्त्रिको विधिः परेषामग्रे प्रकाशनीयः। यथा—

"कथितं गोपितं तेभ्यस्तस्माल्लेख्यं न पुस्तके।
गुरुवक्त्रात्तु लभ्येत अन्यथा न कदाचन॥" इति

तथा—

"स्वमन्त्ररक्षणं यत्नात् सर्वदा कारयेत् सुधीः।"
(तं०आ०वि० खं० 3, पृ० 73-74)

गोलकम् —— देहस्थानीन्द्रियद्वाराणि गोलकानीति। यथा—

"प्रत्यक्षादिप्रमाणैश्च ग्रहीता गोलकस्थितिः॥
गोलकं द्वारमित्युक्तं मनसा बाह्यतां ततः।
न जहाति न गृह्णाति ·················॥"
(त्रि०शि०भै० उद्ध० तं०आ०वि० खं० 3, पृ० 440)

गोविन्दराजः——कालीनयस्य प्रशिक्षकः, श्रीकेयूरवतीशिष्यः, सोमानन्दस्य गुरुः। यथा—

"गोविन्दराजाभिधानः··········· ········· ······
········· ········ · सममेवोपदेशं············ ···
श्रीकेयूरवती-श्रीमदनिका-श्रीकाल्याणिकाभ्यः प्राप्तवन्तः
··
स चेदं रहस्यं श्रीसोमानन्दाभिधानायगुरवे सञ्चारयाम्बभूव।"
(क्र०के०उद्धृ०तं०आ०वि० खं 3, पृ० 192)

गौडपादपद्यम्——समुद्धृतं रामकण्ठेन। यथा —

"यथोक्तं ब्रह्मविदा —
कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया।
स एव बुद्ध्यते भेदानिति वेदान्तनिश्चयः॥"
(मा०का० 2, 12 उद्धृ स्प०वि० पृ० 92)

ग्रथितम्——प्रत्यर्णं मन्त्रसंपुटीकारो ग्रथनम्। यथा—

"अभिधेयार्णमेकैकं मन्त्रार्णैः संपुटीकृतम्।
ग्रथितं·····························॥" इति।
(उद्ध०ने०तं०उ०, खं० 2, पृ० 77)

ग्रस्तम्——स्पष्टीकृतं यथा—

"मध्यस्थस्य नाम्नो दिक्चतुष्टये मन्त्रनिवेशो ग्रस्तम्। यदुक्तम्—
"उर्ध्वेऽधरस्तातथा तिर्यङ्मन्त्रं कुर्याद्विचक्षणः।
मध्ये संज्ञा भवेत्तत्र ग्रस्तमित्यभिधीयते॥" इति।
(ने०तं०उ० खं० 2, पृ० 77)

ग्रहाः——सूक्ष्मशरीरभाजः प्राणिविशेषाः। यथा—

"ग्रहाः बालग्रहरतिग्रहाद्याः।"

(ने०तं० उ० खं० 1, पृ० 47)

ग्रहीता~करणयोगे——जीवचितः एवापरं नामैतत्। संवित्तिः। यथा —

"··· ·····चित्स्वरूपं तु व्यक्ताव्यक्तविचारकम्।
प्रत्यक्षादिप्रमाणैश्च ग्रहीता गोलकस्थितिः॥
गोलकं द्वारमित्युक्तं मनसा बाह्यतां ततः।
न जहाति न गृह्णाति ग्रहीता ग्राहकः स्मृतः॥"
(त्रिशिरः पंक्तयः) (उद्ध०तं०आ०वि० खं० 3, पृ० 440)

ग्रामधर्मः~साधनादृष्ट्या—— भावयोर्भावाभावयोरभावायोर्वा द्वयोराभासस्य मध्ये प्रकाशमानो यश्चित्प्रकाशः स एव पूर्वापराच्छुरितत्वेन स्वयं तत्तदाकारतया प्रकाशते। इति सर्वाभासानां परस्परमध्यगता चितिरेव तेषामाधारः। स चाभासग्रामश्चितेरेवाभास इति चितिरेवैका सर्वत्र प्रकाशत इत्येवं हेतोराभासद्वयमध्यवर्तिन्यां चितावेव स्थिरतयाऽवस्थानंयत् सुप्तबुद्धानां योगिनां स एव ग्रामधर्म इत्यागमिकपरिभाषया परिभाष्यते। स च शाम्भवोपायप्रकारः कश्चन। यथा—

(क) "तत्त्वग्रामस्य सर्वस्य धर्मः स्यादनपायवान्।
आत्मैव हि स्वभावात्मेत्युक्तं श्रीत्रिशिरोमते॥"
(तं०आ० 1, 82)

(ख) "भावद्वयस्य भावाभावयोर्वा प्रतीतिकाले मध्यं तद्द्वयावच्छेदहेतुं शून्यमुपलभ्य तद्भावाभावादियुगपत् त्यक्त्वा तत्रैव सावधानस्य परमोपेये शिवामृतपरिप्लुते परमात्मनि वृत्तिर्जायते।"
(तं०आ०वि० खं० 1, पृ० 126)

(ग) "उभयोर्भावयोर्ज्ञाने ज्ञात्वा मध्यं समाश्रयेत्।
युगपच्च द्वयं त्यत्वा मध्ये तत्त्वं प्रकाशते॥
भावे त्यक्ते निरुद्धा चिन्नैव भावान्तरं व्रजेत्।
तदा तन्मध्यभावेन विकासत्यतिभावना॥"
(वि०भै० 61-62)

(घ) "आत्मैव धर्म इत्युक्तः शिवामृतपरिप्लुतः।
प्रकाशावस्थितं ज्ञानं भावाभावादिमध्यतः॥

स्वस्थाने वर्तनं ज्ञेयं द्रष्टृत्वं विगतावृति।
विविक्तवस्तुकथितशुद्धविज्ञाननिर्मलः ॥
ग्रामधर्मवृत्तिरुक्तस्तस्य सर्वं प्रसिद्ध्यति।"
(तं०आ० 1, 84तः 86)

"यदुक्तं तत्र—
चतुर्थं सम्प्रवक्ष्यामि ग्रामधर्म-विभेदतः। इत्युपक्रम्य—
हृदिस्थं सर्व-देहस्थं स्वभावस्थं सुसूक्ष्मकम्।
सामूह्यं चैव तत्त्वानां ग्रामशब्देन कीर्तितम्॥

इत्यारभ्य

स्वात्मन्यात्मनि यज्ज्ञानं शिवामृतपरिप्लुतम्।
विविक्तवस्तुकथित-शुद्धविज्ञाननिर्मलः ॥
ग्रामधर्मवृत्तिरुक्तस्तन्त्रेऽस्मिन् सर्वथोदितः।"

इत्यन्तम्

"स्थितिः कार्या तु तत्त्वस्था मध्यशक्तिप्रभावतः।"

इति च।

(उद्ध तं०आ०वि० खं० 1, पृ० 129)

ग्रामधर्मता~दार्शनिकी——सर्वमपि विश्वं शिवस्वभावम्। अतः विषयग्रामस्य शिवात्मकस्वभावनिष्ठता या सैव शिवस्य ग्रामधर्मता। त्रिशिरोमते हि—

"सामूह्यं चैव तत्त्वानां ग्रामस्तद्धर्मता शिवः।"
(ई०प्र०वि०वि० खं० 3, पृ० 270)

समस्ततत्त्वग्रामाकारत्वेनाभासमानता शिवस्य स्वभावः, स एव तस्य तद्धर्मतेति ग्रामधर्मता।

ग्राम्यधर्मः——शाक्तोपायनीत्या सर्वस्य यद् दर्शनं तदभ्यासो ग्राम्यधर्मः। तथाहि कौलसाधकः प्रमातृ-प्रमाण-प्रमेयात्मकं सर्वमपि जगच्छिवशक्तितयैव पश्यन् तद्दर्शनाभ्यासात्मकेन ग्राम्यधर्मेण सिद्धो भवति। यथा—

"नाहमस्मि न चान्योऽस्ति केवलाः शक्तयस्त्वहम्।
इत्येवं वासनां कुर्यात् सर्वदा स्मृतिमात्रतः॥
न तिथिर्न च नक्षत्रं नोपवासो विधीयते।
ग्राम्यधर्म-रतः सिद्ध्येत् सर्वदा स्मरणेन हि॥"
(तं०आ० 29, 64-65)

ग्रामधर्मः शाम्भवीं दृष्टिं ग्राम्यधर्मश्च शाक्तीं दृष्टिं प्राधान्येन श्रयते ततस्तुल्यप्रायत्वमनयोः। यथा—

"ग्राम्यधर्मरतः इति तद्वृत्तिरित्यर्थः।
एतच्च प्रथमाह्निक एवोक्तमिति तत एवावधार्यम्॥"
(तं०आ०वि० खं० 11/2, पृ० 45)

द्र० (तं०आ०वि० खं० 1, पृ० 129) इति।

ग्राहकः कञ्चुकपरिवेष्टितः परिमितः प्रमाता। अणुः। जीवः। पशुः। इति। यथा—

"अधुना किञ्चित् करोमि जानन्नभिष्वक्तोऽहमिति हि कालकलाविद्यारागानुविद्ध एवाणुर्नियत्यनुप्राणितो ग्राहक उच्यते।"
(ई०प्र०वि०वि० खं० 3, पृ० 270-71)

मुद्रित पुस्तके "अधुना न किञ्चित्" इति यः पाठोऽसावपपाठ एव लेखकप्रमादाद्वा सम्पादकप्रमादाद्वा तथा दृश्यते।

~करणयोगे——कञ्चुकवेष्टितताया जीवचितः एवापरमेतन्नाम। समुद्धृतैस्त्रिशिरोभैरववाक्यैरेतत् प्रतीयते यद् ग्राहकपदेनैकतः परिमितो ग्रहीता जीवचैतन्यात्मकोऽपरतश्च तेन समर्थतां नीतं ग्राहकसंज्ञं करणचक्रमपि परिभाषयानयाभिप्रेतमुभयमिति। तत एव तत्र पुंलिङ्गत्वेन क्लीवत्वेन चोपदिष्टमुभयथा। ततो लिङ्गशरीरवेष्टितस्य जीवचैतन्यस्य परिभाषिकं नाम ग्राहक इति।

यथा—

"……चित्तस्वरूपं तु व्यक्ताव्यक्तविचारकम्।
प्रत्यक्षादिप्रमाणैश्च ग्रहीता गोलकस्थितिः॥
गोलकं द्वारमित्युक्तं मनसा बाह्यतां ततः।
न जहाति न गृह्णाति ग्रहीता ग्राहकः स्मृतः॥"
(तं०आ०वि० खं० 3, पृ० 440)

ग्रहीतुर्जडांशस्य सङ्कोचांशस्य च निमज्जनेन शुद्धपरिपूर्णचितश्चोन्मज्जनेन परिपूर्णतायां स्थितिरत्र करणयोगप्रक्रियया साध्यते।

ग्राहकभावः~करणयोगे——पशुप्रमातृरूपग्राहकभावोऽपि शिवैश्वर्यविलाससमुल्लासितः सन् शिवात्मक एवेति भाव्यते करणयोगाभ्यासक्रमे यथा—

"येऽपि प्रतिबिम्बरूपा ग्राहकास्तेषां चिद्भागः शिवः एवेत्युपपाद्याचिद्भागोऽपि वेद्यात्मा तच्छक्तिरेव सदा शिवरूपेति।"
(ई०प्र०वि०वि० खं० 3, पृ० 271)

ग्राहकम्~करणयोगे——येनोपायभूतेन ग्राह्यस्य ग्रहणं भवति तदिन्द्रियादिकं ग्राहकमुच्यते करणयोगे। तस्यापि परिपूर्णसंवित्स्वरूपतया दर्शनस्याभ्यासतस्यस्य ग्राह्यरूपताया तिरस्कारेण तद्द्वारा स्वस्वरूपे प्रतिष्ठानुभूयते करणयोगाभ्यासतः। यथा—

"…………………… ग्राहकं तु स्फुटार्थकम्।
ग्राहयेत् …………………………… ……॥"
(त्रि०शि०भै०उद्धृ०तं०आ०वि० खं० 3, पृ० 440)

ग्राह्यत्वम्——इदंरूपतया विषयतया प्रकाशमानता।

यथा—

"अनन्तरमन्तःकरणैकवेद्यतया सुखादेरिव ग्राह्यत्वम्।"
(तं०आ०वि० खं० 6, पृ० 10)

ग्राह्यम्~करणयोगे——प्रमेयात्मना स्थितं संवित्तत्त्वं ग्राह्यम्। अस्य ग्राह्यस्य परिपूर्णसंवित्स्वरूपतया दर्शनस्याभ्यासे कृते तत्फलतया संविद्व्याप्तिदर्शनपूर्वकमस्य ग्राह्यत्वस्य

तिरस्कारेण परिपूर्णस्वात्मसंवित्तया दर्शनं क्रियते, ग्राह्यालम्बने करणयोगे। एतदुक्तं रहस्यमय्या शैल्या। यथा—

"ग्राह्यस्वरूपविज्ञानं द्रव्यत्वे यद् व्यवस्थितम्।"

(त्रि०शि०भै०उद्धृ०तं०आ०वि० खं० 3, पृ० 440)

ग्राह्यबाह्यभेदः——स्वशरीराद् बहिर्देशकालविशेषरूपाः प्रमेयपदार्थाः ये आणवयोगावलम्बनत्वेन स्वीक्रियन्ते ते ग्राह्याः सन्तोऽपि बाह्याः। बुद्धयादिदेहान्ताः पुनः केवलं ग्राह्याः एव, न बाह्या इति परिभाषाद्वयोपयोगः। यथा—

"घटादयो बाह्याः कुम्भस्थण्डिललिङ्गपूजाद्युपायतया कीर्तयिष्यमाणाः।"

(तं०सा० पृ० 36)

ग्राह्ययोगः——देहप्राणबाह्यादिकं प्रमेयजातमालम्ब्य विधीयमानः शिवभावभावनाभ्यासः। स चाणवोपायात्मकः, तस्य ग्राह्यबाह्य भेदतो द्विप्रकारकत्वात्।

ग्लानिः——मलस्थापरमभिधानम्। यथा—

"ग्लानिर्विलुम्पिका देहे तस्याश्चाज्ञानतः सृतिः।
तदुन्मेष-विलुप्तं चेत् कुतः सा स्यादहेतुका॥"

(स्पा०० का० 40)

"मलोऽभिलाषश्चाज्ञानमविद्या लोलिका प्रथा।
भवदोषोऽनुप्लवश्च ग्लानिः……………॥"

(पू०प्र० खं० 2, 446)

घ

घः~मातृकाक्रमे——वायुतत्त्वरहस्याभिव्यञ्जको वर्णः। शाम्भवोपायविधिना घवर्णः साधकस्य स्वशक्तिप्रतिबिम्बविशेषात्मकेन वायुतत्त्वस्याभासेनोपरञ्जितसुन्दरं स्वात्मानमभिव्यनक्ति।

घकारः—— द्र० पददीक्षा, (5), षट्त्रिंशत्तत्त्वदीक्षा, (31) इति।

घटमानः~योगी——यस्तत्त्वाच्चलनशीलस्य चेतसः पुनः पुनस्तत्त्वे एव घटनस्याभ्यासं करोति स घटमानो योगी। यथा—

"चेतसो घटनं तत्त्वाच्चलितस्य पुनः पुनः॥
यः करोति तमिच्छन्ति घटमानं मनीषिणः।"

(मा०वि०तं० 4, 35, 36)

घटादिशिवता——यो यो भावोऽर्थक्रियाकारी, स सोऽर्थक्रियाकरणे समर्थः सन् शक्तिमान्। शक्तिमत्त्वेन तस्य शिवत्वं सिद्धम्। तस्य शिवत्वस्य स्फुटतयाऽप्रथनमज्ञानवशादेव। यथा—

" 'अशक्तश्चार्थक्रियायां विद्यते च'-इत्येतावन्नास्ति, प्रख्योपाख्याकरणेन तावदव्यभिचारात्। शक्तं चेत्, तद्वस्त्वेव, परमार्थसदेव, शिवरूपमिति। ····· घटपटादिकं करणशक्तं चेत्, तत् स्वतन्त्रं चिद्रूपं शिवरूपमेवेति।"

(शि० दृ०वृ०, पृ० 144-45)

"नन्वेवं घटेऽपि यदि चिद्रूपतां कश्चित् पश्येत्, तर्हि किमभ्रान्त एवासौ। ओमित्याह……… शक्त्या शुद्धविद्यारूपया ह्ययं सम्यगिति जडरूपतान्यक्क्रियया चिद्रूपताप्राधान्येनावेशः आ समन्तात् स्वरूपप्रवेश इत्यर्थः।"

(ई०प्र०वि०वि० खं० 3, पृ० 315)

घण्टामुद्रा——गुरुमुखादेव स्पष्टं वेद्या।—उक्ता यथा—

(क) "घण्टाकारं करं वामं कृत्वा चैव त्वधोमुखम्।
दक्षहस्तस्य तर्जन्या घृषद्घण्टा प्रकीर्तिता॥"

(स्व०तं०पं० 14/12, पृ० 116)

(ख) "अस्यापि……… तत्रैव (श्रीभैरवानुकरणस्तोत्रे) सतत्त्वं दर्शितम् —
वीणाघण्टाडमरुनुड्डामरदंशयन्निदं दिशसि।
वृत्तित्रिभेदभिन्नं नादामर्शं निभालयनन्तः।" इति।

(स्व० तं० उ० प० 14, पृ० 116)

घरम्——पृथक् पृथगाश्रमस्थानं तेषां तेषां कौलोपासकानां राजपुत्राणाम्॥ यथा —

"घरम् इति षण्णां साधिकाराणां राजपुत्राणां भिन्नं भिन्नमाश्रमस्थानम्।"

(तं०आ०वि० खं० 3, पृ० 297)

घातनम्——समयविशेषः समयदीक्षायाम्। समयिना शिष्येण पालनीयोऽष्टविधोऽनिष्टतत्त्वविनाशनाभ्यासनियमः। यथा—

"रागं द्वेषमसूयां च संकोचेर्ष्याभिमानिताः॥
समयप्रतिभेत्तूंस्तदनाचारांश्च घातयेत्।"

(तं०आ० 15, 529-30)

घुमघुमायनता——(1) भट्टरम्यदेवेन स्वविरचितभावोपहारविवरणे प्रयुक्तः कश्चित् रहस्यात्मकः शब्दः, विशेषतया भावानुकरणात्मकः। स्वभावसाक्षात्कारक्रमे अनुभूयमानः कोऽपि अवस्थाविशेषसूचको ध्वनिः।

(द्र०भा०वि० पृ० 2)

(2) विशेषशब्दानुकृत्यवस्थेति मनाक् स्पष्टीकरणमस्याः। यथा—

"तालुमध्यगतः प्राणो यदा भवति सुव्रते।
भिन्दतस्तालुग्रन्थि तु शब्दो घुमघुमायते॥"

(स्व० तं० 4/372)

घुमघुमायनम्——शब्दानुकृतिरेषा। बिन्दुग्रन्थिभेदनावसरे "घुमघुम" इत्येवंविधस्य शब्दस्य श्रवणं भवति योगाभ्यासविशेषे। यथा—

"बिन्दुं भेदयतो देवि शब्दो घुमघुमायते ।"

(स्व०तं० 4, 375)

घूर्णि:~उच्चारयोगे——(1) उच्चारादियोगाभ्याससाफल्यस्य पञ्चमं बाह्यं चिह्नम् । संविदात्मनि सत्ये पदे सम्यग् रूढोऽभ्यासी विश्वात्मिकां स्वात्मसंविदं साक्षात्कुर्वन् घूर्णते। असावस्य घूर्णिरेव तन्नामकं योगसाफल्यस्यलक्षणम् । यथा—

"ततः सत्यपदे रूढो विश्वात्मत्वेन संविदम् ॥
संविदन् घूर्णते घूर्णिर्महाव्याप्तिर्यतः स्मृता ।"

(तं०आ० 5, 104-105)

द्र० 'महाव्याप्तिः' इति ।

"अनात्मन्यात्मभावे लीने स्वात्मनः सर्वमयत्वादात्मन्यनात्मभावो विलीयते इति, अतो घूर्णिर्महाव्याप्त्युदयात् ।"

(तं०सा० पृ० 40)

(2) आनन्दादिचिन्हचतुष्कं व्याप्नुवत् पञ्चमं लक्षणमुच्चारयोगसिद्धेः । यथा—

"आनन्दोद्भवकम्पनिद्राव्याप्तिरूपघूर्ण्याविर्भावनक्रमेण जीवन्मुक्तालाभः ।"

(ई०प्र०वि०वि० खं० 3, पृ० 330)

घोर:——ईश्वरसदाशिवदशोल्लासकत्वे रूपे शिवः । यथा—

"घोरः—भेदाभेदात्मकसदाशिवेशादिपदोल्लासकः ।"

(स्व० तं० उ० प० I, पृ० 36)

घोरघोरतरा:~रुद्रा:——पशुप्रमातॄन् विषयभोगादिषु पातयन्तस्तेषां बन्धं च दृढतामापादयन्तो देवाः । यथा—

"घोरघोरतरास्त्वन्ये विज्ञेयास्त्वध आश्रिताः ।"

(स्व०तं० 3, प० I, पृ० 38)

घोरघोरतरा~शक्ति:——स्फुटभेदावभासकारिणी शिवस्य शक्तिः । यथा—

"घोरघोरतरा चान्या क्षेमिका सा क्रियात्मिका ॥"

(ने०तं० 19, 160)

"घोरघोरतरा स्फुटविश्वभेदावभासरूपा अत एव क्षोभिका ग्राह्यग्राहकादिकालुष्योल्लासिका अपरारूपा ।"

(ने० तं० उ० खं० 2, पृ० 189)

क्रियाशक्तिरेवेश्वरतत्त्वेऽभिव्यक्तिमती ।

~शक्तय:——विषयासक्त्या जीवानधोऽधः पातयन्त्यः शिवस्य शक्तयः । यथा—

"विषयासक्तचित्तानामधोऽधः पातकारकम् ।
घोरघोरतरं································ ···········"

(शि०सू०वा०भा० पृ० 61)

एताः एव घोरतर्यः शिवशक्तयः ।

घोरतरा:~शिवशक्तय:——क्षोभकारिण्यः शक्तयः । घोरतर्यः शक्तयः । क्षुद्रेषु भोगेषु प्रवर्तकत्वं तासां क्षोभकारित्वम् । एता एव घोरघोरतराः घोरतर्याश्चाप्युच्यन्ते ।

घोरतर्य:~शिवशक्तय:——जीवानधोऽधः पातयन्त्यस्तेषां बन्धस्य दार्ढ्यकारिण्यश्च परमेश्वरस्य अपराः शक्तयः । यथा—

"विषयेष्वेव संलीनानधोऽधः पातयन्त्यणून् ।
रुद्राणून् याः समयालिङ्ग्य घोरतर्योऽपराः स्मृताः ॥"

(मा०वि०तं० 3, 31)

एता एव घोरतराः घोरघोरतराश्चेति ।

~उद्गमस्थानत:——यथेच्छाशक्तेरघोराणां ज्ञानशक्तेश्च घोराणां शक्तिव्रातानां प्रसरस्तथैव क्रियाशक्तिर्घोरतरीणां शक्तिसमूहानां प्रसरावनिः । यथा—

"अत एव भेदप्राधान्यादस्या" ·························
···
··································· ·························

"अशुद्धाध्वाधिष्ठात्रीणां घोरतरीणामपि शक्तीनां निमित्तत्वमित्यवगन्तव्यम् ।"

(तं०आ०वि० खं० 2, पृ० 111)

घोरा~शक्ति:——ज्ञानशक्तिः । सदाशिवपदेऽभिव्यक्तिभागिनी शक्तिः । यथा—

"घोरा ज्ञानस्वरूपा तु सा परिग्रहवर्तिनी ।

(ने०तं० 19/160)

घोरा भेदाभेदाभासरूपा परापरा अत एव परितः समन्तात् ग्रहणेन विश्वस्य स्वभित्तौ स्वानतिरिक्तस्यापि अतिरिक्तस्येव उल्लेखात्मना स्वीकारेण वर्तते तच्छीला ।"

(ने०तं०उ० खं० 2, पृ० 189)

घोरा:~मातर:——उकाराभिव्यंग्याया ज्ञानशक्तेः सकाशात् प्रसरन्त्यः शक्तयो घोरा मातरः । ताश्च धर्मादौ प्रवर्तिन्योऽपि मोक्षमार्गनिरोधिन्य एव, स्वर्गसुखादावासक्तिमुपजनयन्ति यतः । यथा—

"इयं परापरादेवी घोरां या मातृमण्डलीम् ।
सृजत्यविरतं शुद्धाशुद्धमार्गैकदीपिकाम् ॥"

(तं०आ० 3, 74-75)

~रुद्रा:——घोराणां शक्तीनामधिपतयो रुद्राः । यथा—

"घोरेति पाशजालाख्यं पापयुक्तं भयानकम् ।
·····································श्रृणु घोरान्समासतः ॥
प्रोक्ता गोपतिपूर्वा ये रुद्रास्तु गहनान्तगाः ।
ते तु घोराः समाख्याता नानाभुवनवासिनः ॥
विद्येश्वराद्यनन्तान्ता महामाहेश्वराश्च ये ।"

(उद्ध० स्व०तं०उ०, प० 1, पृ० 38)

~शक्तयः——मिश्रकर्मफलासक्तिपोषकं पशूनां संसारचक्र एव चिरं स्थापकं शक्तिचक्रं घोरम् । यथा—

"मिश्रकर्मफलासक्तिजनकं घोरलक्षणम् ॥"

(शि०सू०वा०भा० पृ० 61)

~उद्गमस्थानतः——घोरारूपधारिणीभ्यो द्वादशकालिकाभ्य एवोदीयमानाः घोराः शिवशक्तयः । यथा—

"घोरघोरतराणां च सोतृत्वाच्च तदात्मिकाः ।"

(तं०आ० 3, 258)

~स्वभावतः——जीवान् भुक्तिं प्रति प्रेरयन्त्यो धार्मिकेषु कृत्येषु च तान् प्रवर्तयन्त्यः परमेश्वरस्य परापराः शक्तयः । यथा—

"मिश्रकर्मफलासक्तिं पूर्ववज्जनयन्ति याः ।
मुक्तिमार्गनिरोधिन्यस्ताः स्युर्घोराः परापराः ॥"

(मा०वि०तं० 3, 32)

घोषः——कर्णशष्कुलीरोधनेन यो ध्वनिः श्रूयतेऽसौ घोष इत्युच्यते । नादयोगे प्रथमोऽयं नादः । यथा—

"श्रवणाङ्गुलिसंयोगाद्यः शब्दः सम्प्रवर्तते ।
दीप्तवह्निस्वनाभासः स शब्दो घोष उच्यते ॥".

(उद्ध० स्व०तं० उ०, प० 11, पृ० 9)

"धर्मशिवाचार्येण स्वपद्धतौ—

....

श्रवणाङ्गुलिसंयोगाद्यः शब्दः संप्रवर्तते ।
दीप्तवह्निस्वनाभासः स शब्दो घोष उच्यते ॥"

(स्व०तं०उ०, प० 11, पृ० 8-9)

घोषानुकृतिः——नादाभ्यास-प्रक्रियाविशेषः । यथा—

"भित्त्वा हृत्पद्मग्रन्थिं तु ततः शब्दः प्रजायते ।
यदाकाशसमायोगात् घोषशब्दोपमो भवेत् ॥"

(स्व०तं० 14, 370)

ङ

ङ (मातृकासु) —— आकाशतत्त्वस्वरूपाभिव्यञ्जको मातृकावर्णः । मातृकाभ्यासे ङवर्णः साधकस्य शक्तिविशेषप्रतिबिम्बरूपत्वेनाभासमानमाकाशतत्त्वं तस्य चित्प्रकाशे तथा प्रकटयति यथा तत्प्रतिबिम्बसुन्दरस्य स्वात्मनः साक्षात्कारः सम्भवति तस्य ।

ङकारः——द्र० पदवीक्षा, (4); षट्त्रिंशत्तत्त्वदीक्षा (30) इति ।

च

च——गन्धतन्मात्रतत्त्वस्वरूपव्यञ्जको योनिवर्णो मातृकाक्रमे । शाम्भवोपाये मातृकोपासनक्रमे 'चकारः' साधकस्य स्वशक्तिविशेषप्रतिबिम्बात्मकतयाऽवभासमानं गन्धतन्मात्रतत्त्वमभिव्यञ्जयन् स्वात्मरूपां शुद्धां संविदं तत्प्रतिबिम्बसुमण्डितां साक्षात्कारयति ।

चकारः——द्र० पददीक्षा, (4); षट्त्रिंशत्तत्त्वदीक्षा, (28) इति ।

चकितमुद्रा——महासाहसमुद्रा । विषयेभ्यः प्रत्यावृत्तासु बहिरिन्द्रियवृत्तिषु स्वात्मैकविमर्शनाभ्यासः । यथा—

महासाहससंयोग-विलीनाखिलवृत्तिकः ।
पुञ्जीभूते स्वरश्म्योघे निर्भरीभूय तिष्ठति ॥
अकिञ्चिच्चिन्तकस्तत्र स्पष्टदृग् याति संविदम् ।
यद्विस्फुलिङ्गाः संसार-भस्मदाहैकहेतवः ।

(तं०आ० 5, 84-85)

महासाहसशब्दाभिधेयचकितमुद्रानुप्रवेशने......।

(तं०आ०वि० खं० 3, पृ० 394)

चक्रपाणिनाथः——भावोपहारस्तोत्रनिर्माता कौलाचार्यविशेषः । यथा—

"श्रीचक्रपणिनाथविरचिते भावोपहारस्तोत्रे......।"

(मा०वि० पृ० 44)

"विमर्शमय्या निजशक्तिदेव्या
विश्वप्रथाभैरवक्लृप्तपूजः ।
जयत्यकामोदितरश्मिरूप-"
स्वशक्तिपुञ्जात्मजचक्रनाथः ॥

(तदेव पृ० 1)

चक्रपूजा——कौलाचाराङ्गभूता रहस्यमयी कुलचक्रसाधना या निषिद्धसाधारणजनप्रवेशे कुलचक्रे पञ्चमकाराणां सदुपयोगतः रहस्यमय्या रीत्या सुगुप्तमभ्यस्यते वीरवरैः साधकैः ।

~तत्फलम्——ये तावन्नैव समुदितपराद्वैतविज्ञानाः साधकास्तेषां तद्विज्ञानं चक्रपूजानुष्ठानेन जायते । यथा—

"येऽप्यप्राप्तविबोधांस्तेऽभ्युदितोत्फुल्लयागसंरूढाः ॥
तत्परिकल्पितचक्रस्थदेवताः प्राप्नुवन्ति विज्ञानम् ।"

(तं०आ० 29, 129-30)

~पूज्यास्तत्र——चक्रप्रविष्टाः सर्वेऽपि शिवशक्तिरूपत्वेन दृश्याः पूज्याश्च भवन्ति । यथा—

"यावन्त्येव शरीराणि स्वाङ्गवत् स्युः सुनिर्भराम् ॥
एकां संविदमाविश्य चक्रे तावन्ति पूजयेत् ।"

(तं०आ० 28, 380-81)

~प्रवेश नियमतः——अदीक्षितोऽनधिकारी च चक्रे प्रवेशमपि नार्हति प्रायः । परमसावधानतया चेत् प्रविष्टस्तदा चक्रयागप्रक्रियया दीक्ष्य एव ।

"प्रविष्टश्चेत् प्रमादेन सङ्कोचं न व्रजेत्ततः ॥
प्रस्तुतं स्वसमाचारं तेन साकं समाचरेत् ।

स त्वनुग्रहशक्त्या चेद् विद्धस्तत्तन्मयीभवेत् ॥
वामाविद्धस्तु तन्निन्देत् पश्चात्तं घातयेदपि ।"
(तं॰आ॰ 28, 381-82)

तं कुलचक्रसमाचारमसौ निन्देत् पश्चाच्च तं घातयेदपि । अतो निवारणीय एवानधिकारिणः प्रवेशः ।

चक्रप्रवेशः~उच्चारयोगादौ——मूलाधारादिचक्रक्रमेण सावधानं स्वस्याः संविदो अन्तः-प्रवेशः ।

द्र॰ 'चक्रम्~उच्चारयोगादौ' इति ।

तत्फलम्——क्रमेण त्रिकोणादिचक्रप्रवेशे क्रमेणैवानन्दादि-पञ्चकस्यानुभूतिः । यथा—

"यथा सर्वेशिना बोधेनाक्रान्तापि तनुः क्वचित् ॥
किञ्चित् कर्तुं प्रभवति चक्षुषा रूपसंविदम् ।
तथैव चक्रे कुत्रापि प्रवेशात् कोऽपि सम्भवेत् ॥
आनन्दचक्रं वह्न्यश्रि कन्द उद्भव उच्यते ।
कम्पो हृत् तालु निद्रा च घूर्णिः स्यादूर्ध्वकुण्डली ॥"
(तं॰आ॰ 5, 109तः 111)

चक्रम्——(1) मण्डलपूजोपयोगी रेखासन्निवेशात्मक-यन्त्रविशेषः ।

(2) देहस्थनाडीसङ्घट्टविशेषः ।
(3) मन्त्रादिरूपम् । यथा—
"चक्राणामिति मन्त्राद्यात्मनाम् ।"
(तं॰आ॰वि॰ खं॰ 4/2, पृ॰ 1)

~अरसंख्याभेदतः——द्र॰ 'चक्रोदयः~विशेषान्तरतः' इति ।

~उच्चारयोगादौ——देहस्थं मूलाधारादि-सहस्रार-पर्यन्तं चक्र-चक्रवालम् । यथा—

"एताश्च भूमयस्त्रिकोण-कन्द-हृत्-तालूर्ध्वकुण्डलिनी-प्रवेशे भवन्ति ।"

(तं॰सा॰ पृ॰ 40)

द्र॰ (तं॰आ॰ 5, 54तः 58)

~कौले——आनन्दाभिव्यक्तिस्थानं देहे ।

द्र॰ 'आनन्दचक्रम्' इति ।

द्वादशारम्——(1) देहस्थानि यानि नाडीचक्राणि तेषु प्रथमं द्वादशारम् । यथा—

"अनेन ध्यानयोगेन विश्वं चक्रे विलीयते ॥
तत् संविदि ततः संविद्विलीनार्थैव भासते ।"
(तं॰आ॰ 5, 34-35)

"न केवलमेतदेव चक्रं योगिना ध्येयं यावच्चक्रान्तराण्यपि ।"
(तं॰आ॰वि॰ खं॰ 3, पृ॰ 345)

~बुद्धि ध्याने——(1) द्वादशशक्तिचक्रम् । यथा—

"इत्थं विश्वाध्वपटलमयत्नेनैव लीयते ॥
भैरवीयमहाचक्रे संवित्तिपरिवारिते ।
ततः संस्कारमात्रेण विश्वस्यापि परिक्षये ॥
स्वात्मोच्छनत्तया भ्राम्यच्चक्रं संचिन्तयेन्महत् ।
ततस्तद्ग्राह्यविलयात् तत्संस्कारपरिक्षयात् ॥
प्रशाम्यद्भावयेच्चक्रं ततः शान्तं ततः शमम् ।"
(तं॰आ॰ 5, 32तः 34)

चक्रयागः——(1) मूर्तियागः । अत्र यागे ज्ञानी वा योगी वा पुरुषः स्त्री वा कौलिकेन विधिना पूज्यते । यथा—

"सर्वत्र चक्रयागोऽत्र मुख्यः काम्ये विशेषतः ।
ज्ञानी योगी च पुरुषः स्त्री वास्मिन् मूर्त्तिसंज्ञके ॥
यागे प्रयत्नतो योज्यस्तद्धि पात्रमनुत्तरम् ।
तत् सम्पर्कात् पूर्णता स्यादिति त्रैशिरसादिषु ॥"
(तं॰आ॰ 28, 62-63)

द्र॰ 'मूर्तियागः' इति ।
(2) पर्वदिवसेषु क्रियमाणस्तान्त्रिको विधिविशेषः ।
द्र॰ 'अनुयागः' इति । उक्तञ्च—
"पवित्रारोहणे श्राद्धे तथा पर्वदिनेष्वलम् ॥
सूर्यचन्द्रोपरागादौ लौकिकेष्वपि पर्वसु ।
उत्सवे च विवाहादौ विप्राणां यज्ञकर्मणि ॥
दीक्षायां च प्रतिष्ठायां समयानां विशोधने ।
कामनार्थं च कर्तव्यो मूर्तियागः स पञ्चधा ॥"
(तं॰आ॰ 28, 76-78)

~प्रवेशनियमतः——(1) गुरुसाधकमातंग्यादिजनान् विहाय चक्रयागे कस्याप्यदीक्षितस्य चक्रचर्यामजानतो वाऽनधि-कारिणो वा जनस्य प्रवेश. कदापि न दीयते । यथा—

"प्रवेशोऽत्र न दातव्यः पूर्वमेव हि कस्यचित् ॥"
(तं॰आ॰ 28, 98)

यागारम्भात् प्रागेव प्रवेशो निषेध्योऽदीक्षितानामिति ।

(ख) "अतन्मये तु कस्मिंश्चित्तत्रस्थे प्रतिहन्यते ॥
स्थपुटस्पर्शवत्संविद् विजातीयतया स्थिते ।
अतश्चक्रार्चनाद्येषु विजातीयमतन्मयम् ॥
नैव प्रवेशयेत्संवित् संकोचननिबन्धनम् ।"
(तं॰आ॰ 28, 378 तः 380)

(2) प्रमादात् प्रविष्टस्य द्विगुणया क्रियया शिवभावे प्रवेशो भवति चक्रयागतः । यथा—

"प्रविष्टश्चेत् प्रमादेन संकोचं न व्रजेत्ततः ॥"
(तं॰आ॰ 28, 381)

"विचारं न कुर्यात् । कृत्वा पुनर्द्विगुणं चकयागं कारयेद् गुरुः ।"

(तं॰सा॰ पृ॰ 186)

~भोज्यकल्याणकरः——मूर्त्तियागे पूज्येन तत्त्वदर्शिना प्रबुद्धेन गुरुणा भुज्यमानानां फलवनस्पतिशाकादीनामपि कल्याणं भवति । यथा—

"अथ तत्त्वविदेतस्मिन् यदि भुञ्जीत तत् प्रिये ।
परिसंख्या न विद्येत तदाह भगवाञ्छिवः ॥
भोज्यं मायात्मकं सर्वं शिवो भोक्ता स चाप्यहम् ।
एवं यो वै विजानाति दैशिकस्तत्त्वपारगः ॥
तं दृष्ट्वा देवमायान्तं क्रीडन्त्योषधयो गृहे ।
निवृत्तमद्यैवास्माभिः संसारगहनार्णवात् ॥
यदस्य वक्त्रं सम्प्राप्ता यास्यामः परमं पदम् ।"

(तं०आ० 28, 67-70)

चक्राणि~उच्चारयोगे —— तानि मूलाधारादारम्य सहस्रारपर्यन्तानि । यथा—

"प्रदर्शितेऽस्मिन्नानन्दप्रभृतौ पञ्चके यदा ॥
योगी विशेत्तदा तत्तच्चक्रेशत्वं हठाद्व्रजेत् ।"

(तं०आ० 5, 108-109)

'तत्र तत्र नियते चक्रे त्रिकोणादावीशत्वं भवेत्, तत्तच्चक्रजयो जायत इत्यर्थः ।"

(तं०आ०वि० खं० 3, पृ० 419)

~मन्त्रन्यासः (चक्रेषु) —— रहस्यमय्या वाचोक्तस्तन्त्रालोके । यथा—

"जुंकारोऽथाग्निपत्नीति षडरे षण्ठवर्जिताः ॥
द्वादशारे तत्सहिताः षोडशारे स्वराः क्रमात् ।
हलस्तद्द्विगुणेऽष्टारे याद्यं हान्तं तु तत् त्रिके ॥"

(तं०आ० 33, 17-18)

"अग्निपत्नी स्वाहेति, तेन प्रत्येकमेकैको वर्णः । तत्सहिता इति षण्ठसहिताः । तद्द्विगुणे इति द्वात्रिंशदरे ।"

(तं०आ०वि० खं० 12, पृ० 345)

"द्वात्रिंशदरके सान्तं बिन्दुः सर्वेषु मूर्धनि ।
एवमन्यान्बहूँश्चक्रभेदानस्मात्प्रकल्पयेत् ॥"

(तं०आ० 33, 19)

चक्रान्तराणि ~ बुद्धिध्याने——द्वादशाराच्चक्रादन्यान्यपि शक्तिचक्राणि यानि समुपास्यन्ते बुद्धिध्यानप्रकारान्तरेषु । यथा—

"एवं त्रिशूलात् प्रभृति चतुष्पञ्चारकक्रमात् ।
पञ्चाशदरपर्यन्तं चक्रं योगी विभावयेत् ॥
चतुष्षष्टिशतारं वा सहस्रारमथापि वा ।
असंख्यारसहस्रं वा चक्रं ध्यायेदनन्यधीः ॥"

(तं०आ० 5, 37-38)

"अक्रमक्रमवशाद् द्विशस्त्रिशो
भूरिशोऽथ विविधैः क्रमाक्रमैः ।
चक्रमेतदुदितं विजृम्भते
मेयमानमितिमातृभक्षकम् ॥"

(मा०वि०वा० 1, 942)

द्र० 'ध्यानयोगः' इति, 'बुद्धिध्यानम्' इति, 'काली' इति च ।

चक्रेश्वरः——(1) शक्तिचक्रेश्वरः शिवतुल्यः सुप्रबुद्धः सिद्ध । यथा—

"यदा त्वेकत्र संरूढस्तदा तस्य लयोद्भवौ ।
नियच्छन् भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ॥"

(स्प०का० 51)

"यदा पुनस्त्वेकत्र स्थूले सूक्ष्मे वा संरूढो लीनचित्तः, तदा तस्य प्रत्ययोद्भवस्य लयोद्भवौ ध्वंसप्रादुर्भावौ नियच्छन् कुर्वन् भोक्तृतां प्राप्नोति, ततः चक्रेश्वरो भवेत् सर्वाधिपतिर्भवति ।"

(स्प०वृ० पृ० 39)

चक्रेश्वरः शक्तिचक्रस्वामी सर्वज्ञतादियुतः सर्वाधिपतिः······ ···············.····· ।"

(स्पं०प्र० पृ० 53)

(2) विश्वात्मकस्य चक्रस्याधिपतिः परमेश्वरः । यथा—

"चक्रस्य ····· ···············चराचरभावपर्यन्तेन प्रपञ्चेन प्रसृतस्य शब्दराशिसमुत्थस्य स्वशक्तिसमूहस्य, ईश्वरोऽधिष्ठाता ।"

(स्प०वि० पृ० 160)

चक्रेश्वरभैरवाष्टकम् —— भावोपहारविवरणकारस्य रम्यदेवस्य कृतिः कापि । यथा—

"भूतचतुष्टयकवलन-
बृंहिततनुगगनमप्यनुच्चण्डम् ।
परमाणुवत्प्रहीणं
यत्र नभस्तन्नुमः शैवम् ॥"

(भा०वि०, पृ० 29)

चक्रोदयः——यत्नजो मन्त्रोदयः । प्राणचारैः साकं भावनात्मकेन यत्नेन तत्तन्मन्त्रसमन्वयेन विधीयमानोऽभ्यासविशेषस्त्रिकशास्त्रैकविषयः परमरहस्यात्मको भुक्तिमुक्तिलाभप्रद उपायः । प्राणापानगतौ साधको मन्त्राक्षराणां भावनाभ्यासं करोतीति तात्पर्यम् । यथा—

(क) "अथ परमरहस्योऽयं चक्राणां भण्यतेऽभ्युदयः ।"

(तं०आ० 7, 1)

(ख) "चक्राणामिति मन्त्राद्यात्मनाम् ।"

(तं०आ०वि० खं० 4/2, पृ० 1)

स्वस्थस्ततावस्थायां प्राणापानगतौ मन्त्राः स्वयमेवोदयन्ते साधकस्येति तात्पर्यम् । स एव हि मन्त्रचक्रोदयः । यथा—

"यथारघट्टचक्राग्रघटीयन्त्रौघवाहनम् ॥
एकानुसन्धियत्नेन चित्रं यन्त्रोदयं भजेत् ।
एकानुसन्धानबलाज्जाते मन्त्रोदयेऽनिशम् ॥
तन्मन्त्रदेवतायत्नात्तादात्म्येन प्रसीदति ।"

(तं०आ० 7, 3तः 5)

"यथा हि यन्त्रं वाहयन्नरघट्टवाहकस्तत्र वैचित्र्यान्तरमपि प्रयत्नान्तरनिरपेक्षमासादयेत्, एवं साधकोऽपि मन्त्रोदय एव प्रयतमानः परसंविदैकात्म्यमिति।"

(तं॰आ॰वि॰ खं॰ 4/2, पृ॰ 4)

यन्त्रवाहकः सावधानं घटीयन्त्रमेव वाहयति। घटीनामधोगमनं, तासां जलेन पूरणम्, उर्ध्वगमनम्, जलस्य पातनं, क्षेत्रमध्ये तस्य प्रसरणमिति सर्वमयत्नत एव भवति। यथा—

"यत्नजस्तु मन्त्रोदयोऽरघट्टघटीयन्त्रवाहनवदेकानुसन्धिबलाञ्चित्रं मन्त्रोदयं दिवानिशमनुसन्दधत् मन्त्रदेवतया सह तादात्म्यमेति।"

(तं॰सा॰ पृ॰ 59)

अभ्यास प्रक्रियातः——एकपिण्डात्मकवर्णसमुदायरूपस्य मन्त्रस्य यदैकस्मिन् प्राणचारे समुदयस्तदाहोरात्रकाले तस्य मन्त्रस्य 21600 वारं विमर्शनम्। पिण्डद्वयात्मकस्य मन्त्रस्योदये प्रतिवारं प्राणचारद्वये समुदयेनाहोरात्रकाले 10800 वारं विमर्शनम्। एवमेव पिण्डसंख्या-विवृद्धौ क्रमेण न्यूनन्यूनतरादिप्राणचारसंख्यासूदयो मन्त्राणां, यावत् पर्यन्तेऽष्टोत्तरशतसंख्याकपिण्डयुक्तस्य मन्त्रस्याहोरात्रकाले शतद्वयवारमुदयः। इत्येवं प्रतिपादितं विस्तरतः। यथा—

"द्वे रसैकाक्षि-नित्योत्थे तदर्धं द्विकपिण्डके। इत्यारभ्य···

……

अष्टोत्तरशते चक्रे द्विशतस्तूदयो भवेत्।" इत्यन्तम्।

(तं॰आ॰ 7, 5 तः 19)

~अवस्थाभेदतः——प्राणचारे मन्त्रोदये तिस्रोऽवस्था भवन्ति। (1) प्रवेशः, (2) ऐकात्म्यम्, (3) निर्गमः। मन्त्रः प्राणे प्रविशति, ऐकात्म्यमुपयाति तेन, निःसरति च ततः। यथा—

"निरुद्ध्य मानसीर्वृत्तीश्चक्रे विश्रान्तिमागतः।
व्युत्थाय यावद्वि श्राम्येत्तावच्चारोदयो ह्ययम्॥
पूर्णे समुदयेत्वत्र प्रवेशैकात्म्यनिर्गमाः।"

(तं॰आ॰ 7, 53-54)

"इह खलु योगी संकल्पात्मिका मानसीर्वृत्ती—"निरुद्ध्य" अन्तर्मुखीकृत्य 'चक्रस्य' एकपिण्डाद्यात्मनो मन्त्रस्य "विश्रान्ति" मध्यधामैकात्म्यमागतः सन् यावदुत्थाय हृद आरम्य द्वादशान्तपर्यन्तं निर्गम्य पुनरन्तः प्रविश्य हृद्येव विश्राम्येत् तावदयं प्राणस्योदयो भवेदित्यर्थः।"

(तं॰आ॰वि॰ खं॰ 4/2, पृ॰ 42)

~आरुरुक्षोः——आरुरुक्षुर्हि योगी अनेकाक्षरं पिण्डमन्त्रं विभज्य द्वित्रिचतुर्षु प्राणचारेषु मध्योदयदशामापादयन्नभ्यसेत्। यथा—

"द्विस्त्रिश्चतुर्वा मात्राभिर्विद्यां वा चक्रमेव वा।
तत्त्वोदययुतं नित्यं पृथग्भूतं जपेत् सदा॥
पिण्डाक्षरपदैर्मन्त्रमेकैकं शक्तितस्त्वगम्।"

(तं॰आ॰ 7, 57-58)

~गोपनीयः——प्राणचारैः साकं मन्त्राणां समन्वयोऽयमतिगोपनीयो विधिः। अनधिकारिहस्तपतितत्वे सत्यस्य दुरुपयोगस्य दुर्निवारत्वात्। यथा—

"अथ परमरहस्योऽयं चक्राणां भण्यतेऽभ्युदयः।"

(तं॰आ॰ 7, 1)

चक्राणामिति मन्त्रसमूहानामिति।

~ज्ञानाभेदतः——यथा हि शिखरस्थस्य विविधविषयावगाहि ज्ञानमेकमेव तथैव चक्रोदयाभ्यासपराकाष्ठायां विश्वपूर्णायाः स्वात्मसंविदः साक्षात्कार एक एव। न विषयानन्त्यकृतं ज्ञानानन्त्यमिति भावः। यथा—

"तथाहि प्राणचारस्य नवस्यानुदये सति॥
न कालभेदजनितो ज्ञानभेदः प्रकल्पते।
संवेद्यभेदान्न ज्ञानं भिन्नं शिखरिवृत्तवत्॥"

(तं॰आ॰ 7, 23-24)

~परसंविदभिव्यक्तितः——यथारघट्टयन्त्रवाहकस्य घटीयन्त्रचालनमात्रेण जलपूरणाद्यपि सिद्धयत्येव, एवमेव मन्त्रचक्रोदये सावधानस्य तत्तन्मन्त्रदेवताप्रसादेन संवित्स्पन्दाभिव्यक्तिक्रमेण पर्यन्ते शिवता-समावेशोऽपि सिद्धयति।

द्र॰ 'चक्रोदये' इति।

~फलदृष्टया——प्रयत्नसंरुद्धप्राणचारस्य योगिनः क्रमेण प्राणचारस्य ग्रासे जाते कालसंकर्षणस्थित्यामेकमात्राद्वयात्मसंविन्मात्रसाक्षात्कारो जायते। यथा—

"एवं प्रयत्नसंरुद्धप्राणचारस्य योगिनः॥
क्रमेण प्राणचारस्य ग्रास एवोपजायते।
प्राणग्रासक्रमावाप्तकालसङ्कर्षणस्थितिः॥
संविदेकैव पूर्णा स्याज्ज्ञानभेदव्यपोहनात्।"

(तं॰आ॰ 7, 21तः 23)

~माहात्म्यतः——

"मन्त्रचक्रोदयज्ञस्तु विद्याचक्रोदयार्थवित्।
क्षिप्रं सिद्धयेदिति प्रोक्तं श्रीमद्विशतिके त्रिके॥"

(तं॰आ॰ 7, 56)

~मूलप्रतिष्ठास्थानतः——चक्रोदयस्य प्रतिष्ठा प्राणचारे, तस्य प्राणस्पन्दे, तस्य शून्यप्रमातरि, तस्यापि च शुद्धे चिन्मात्रे इति। यथा—

"इत्येष कालविभवः प्राण एव प्रतिष्ठितः॥
स स्पन्दे खें स तच्चित्यां तेनास्यां विश्वनिष्ठितिः।"

(तं॰आ॰ 7, 62-63)

~यत्नजमन्त्रोदयः—(तत्र)——अत्र प्रक्रियायां पिण्डमन्त्रसंख्यानुसारमनेकेषां प्राणचाराणामेकानुसन्धानमयत्वेनैकैव संख्या। इत्येवंप्रकारकनीत्यनुसारमत्र साधकेच्छाकल्पनायत्नाश्रितत्वम्। अतो यत्नज एवैष उदयो मन्त्राणाम्। यथा—

"अत्र हि स्वारसिकप्राणचारद्वयकालस्यैकप्राणचारतयोदयस्य चिकीर्षितत्वम् ।"

(तं०आ०वि० खं० 4/2, पृ० 9)

~(एतद्रहस्यम्)—कालभेदो ज्ञानभेदायत्तः ज्ञानभेदो ज्ञानतदभावोदयायत्तः। ज्ञानाभावश्च प्रमातृ-रिन्द्रिय-विषयादि संयोगविभागायत्तः। संयोगविभागिता च प्राणस्पन्दायत्ता। चक्रोदयाभ्यासेन प्राणस्पन्दान्तरानुदये सति ज्ञानरूपा संविदेकैवाखण्डा पूर्णा च विमर्शदशाभागिनी दीव्यतीति चक्रोदयाभ्यासरहस्यम्। यथा—

"सा (संयोगवियोगिता) चेदुदयते स्पन्दमयी तत् प्राणगा ध्रुवम् ।
भवेदेव ततः प्राणस्पन्दाभावे न सा भवेत् ॥
तदभावान्न विज्ञानाभावः सैवं तु सैव धीः ।"

(तं०आ० 7, 28-29)

~विशेषान्तरतः——(1) अष्टोत्तरशतात्मकं चक्रं पुनः षड्वारं द्विगुणीकृत्य तथा तथा विमृश्यते येन चारसंख्या 6912 इति भवति। एकवारं पुनर्द्विगुणीकृत्य यदा सूक्ष्मविश्लेषणेन विमृश्यते तदा 13824 इति संख्या भवति। यथा—

"क्रमेणेत्थमिदं चक्रं षट्कृत्वो द्विगुणं यदा ।"

(तं०आ० 7, 19)

"प्रथमं षोडशाधिकशतद्वयात्मकं (6912) यदा भवेत् तदा तस्मिन्नपि द्विगुणे सचतुर्विंशतिशताष्टकाधिकसहस्रत्रयोदशात्मके (13824) चक्रे·········।"

(तं०आ०वि० खं० 4/2, पृ० 12)

(2) 13824 संख्याकस्यापि चक्रस्याध्यर्धकरणे सति षोडशभागादि-सूक्ष्मसूक्ष्मतरकल्पनया विमर्शने भूयसी संख्या सञ्जायते। 16 भागकल्पने तावत् 345600 इति। सूक्ष्मसूक्ष्मतर-विमर्शशालिनस्तीव्रावधाना योगिनश्चक्रोदयस्यासंख्यविधाः विशेषताः अनुभवन्ति। यथा—

"ततोऽपि द्विगुणेऽष्टांशस्यार्धमध्यर्धमेककम् ।
ततोऽपि सूक्ष्मकुशलैरर्धार्धादिप्रकल्पने ॥
भागषोडशकस्थित्या सूक्ष्मश्चारोऽभिलक्ष्यते ।"

(तं०आ० 7, 20-21)

~सारतः——मन्त्रादेः प्रवेशैकात्म्यनिर्गमेषु प्राणेनैकात्म्यमेव सारश्चक्रोदयाभ्यासे। यथा—

"पूर्णे समुदये त्वत्र प्रवेशैकात्म्यनिर्गमाः ।
त्रय इत्यत्र एवोक्तः सिद्धो मध्योदयो वरः ॥"

(तं०आ० 7, 54)

"प्रकारत्रयमध्यात् सिद्धिनिमित्तमैकात्म्यलक्षणो मध्योदय एव प्रवेशादपि वरः ।"

(तं०आ०वि० खं० 4/2, पृ० 43)

~सूक्ष्मतरविमर्शगम्यः——

"इत्येष सूक्ष्मपरिमर्शनशीलनीय-
श्चक्रोदयोऽनुभवशास्त्रदृशा मयोक्तः ॥"

(तं०आ० 7, 71)

चण्डी——(1) पूर्णस्य परमेश्वरस्य पूर्णताख्या पराशक्तिरेव चण्डीति कथ्यते विश्वस्यात्मसात्करणेन तद्ग्रसनशीलत्वात्तस्याः। यथा—

द्र० (तं०सा० पृ० 27)

द्र० 'ऊर्मिः' इति।

द्र० 'काली' इति।

(2) विश्वं प्रमातृ-प्रमेय-जातं बलाद् ग्रसमाना स्वात्मसात्कुर्वती परमेश्वरस्य परा शक्तिः।

द्र० 'काली' इति।

चतुरात्मा——जयः अजयः, सुजयो, विजयः इति चतुष्प्रकारके ध्याने। यथा—

"यथा-चतुरात्मा-जयादिभेदेन ।"

(तं०आ०वि० खं० 1, पृ० 153)

न च ते जयाद्याः सम्यक् स्पष्टीकृता ग्रन्थकारैष्टीकाकृद्भिर्वा। मङ्गलश्लोकेषु जयरथेन तन्त्रालोकाह्निकानामारम्भ एवंविधानां पारिभाषिकपदानां प्रयोगः कृतोऽस्ति। परं न तानि पदानि चत्वार्येव। तत्र जयाद्या एवं वर्णिताः।

~जयः इति——

"जयतान्नतजनजयकृत् स जयो रुद्रो विनाभ्युपायं यः ।
पूरयति कं न कामं कामं कामेश्वरत्वेन ॥"

(तं०आ०वि० खं 1/2, पृ० 1)

~विजयः इति——

"स्वात्मत्वेऽपि विचित्रं निखिलमिदं वाच्यवाचकात्म जडम् ।
दर्पणनगरवदात्मनि विभासयन् विजयते विजयः ॥"

(तदेव खं० 2, पृ० 1)

~सुजयः इति——

"कवलयितुं किल कालं कलयति यो व्यायतास्यतां सततम् ।
जयति स सुजयः साक्षात् संसारपराकृतौ सजयः ॥"

(तदेव खं० 4/1, पृ० 1)

अन्ये चैवंविधाः शब्दास्तत्र—जयरुद्रः (तदेव 4/2, पृ० 1) जयकीर्तिः—(तदेव 5, पृ० 1) जयावहः —(तदेव खं० 6, पृ० 1) इति।

चतुर्दलचक्रम्——शाक्तोपायाभ्यासे कालीभावनाङ्गतयोपदिष्टं यद्ध्यानं तत्र चक्षुर्मण्डलमध्ये चतुर्दलं पद्मं ध्येयतयोपदिष्टम्। यथा—

"ये चक्षुर्मण्डले श्वेते प्रत्यक्षे परमेश्वरि ।
षोडशारं द्वादशारं तत्रस्थं चक्रमुत्तमम् ।"

(तं०आ० 4, 127)

"प्रमातुरपि प्रमायां विश्रान्तेः चतुर्दले ज्ञेये-देवीत्रयं श्रीमातृसद्भावश्चेति प्रमामात्रसतत्त्वानाख्यचक्ररूपतया प्रस्फुरत इत्यर्थः।"

(तं०आ०वि० खं० 3, पृ० 139)

चतुर्युगीमानम्——कृतयुगं दिव्यानां वर्षाणां सहस्राणि चत्वारि, त्रेतायुगं त्रीणि, द्वापरं द्वे, कलिः एकम्। मध्ये च सन्धयः तावत्संख्याकःशतैः। यथा—

"दिव्यार्काब्दसहस्राणि युगेषु चतुरादितः॥
एकैकहान्या तावद्भिः शतैस्तेष्वष्टसन्धयः।"

(तं०आ० 6; 138-39)

चतुर्विंशत्यरे~देवाः——परिगणिताः। यथा—

"संवर्तो लकुलीशश्च भृगुः श्वेतो बकस्तथा।
खड्गी पिनाकी भुजगो नवमो बलिरेव च॥
महाकालो द्विरण्डश्च छगल.ण्डः शिखी तथा।
लोहितो मेषमीनौ च त्रिदण्ड्याषाढिनामकौ॥
उमाकान्तोऽर्धनारीशो दारुको लाङ्गुली तथा।
तथा सोमेशशर्माणौ चतुर्विंशत्यमी मताः॥"

(मा०वि०तं० 20, 54तः 56)

सोमेशः सोमशर्मा चेति।

द्र० (तं०आ० 33, 13तः 16) इति।

~देव्यः——उक्ताः स्पष्टं नामभिः।

"नन्दा भद्रा जया काली कराली विकृतानना।
क्रोष्टुकी भीममुद्रा च वायुवेगा हयानना।
गम्भीरा घोषणी चेति चतुर्विंशत्यरे विधिः॥"

(तं०आ० 33, 4-5)

द्वादशारदेवताभिर्मिलिता एताः चतुर्विंशत्यरे स्थिताः इति वेदितव्यम्।

चतुष्कपञ्चाशिका——ग्रन्थविशेषः।

"चतुष्कपञ्चाशिकया तदेतत्तत्वमुच्यते।"

(तं०आ० 26, 44)

"चतुष्कपञ्चाशिकेति सृष्टयादिप्रमेयचतुष्टयाभिधायिनैवंपरिमाणेन ग्रन्थविशेषेण।"

(तं०आं०वि० खं० 10, पृ० 344)

चतुष्कलः——'हूँ' इति मन्त्रः। अस्य हकार ऊकारोऽर्धचन्द्रो बिन्दुश्चेति चतुरङ्गत्वमेव चतुष्कलत्वम्।

चतुष्किका~उच्चारयोगे——मूलाधारादुपरितनं किमपि नाडीचक्रम्। प्राणशक्तेः सौषुम्नमार्गेणोपरिसारिण्यां गतौ प्रबोधानान्तरं प्रथमतश्चतुष्किकाया एवोल्लेखात्।

जयरथकृते व्याख्याने तु चतुष्किकाऽऽज्ञाचक्रादप्यूर्ध्वे स्थाने स्थिता। तत् कथमिति चिन्त्यमेव। यथा—

"चतुष्किका ब्रह्मरन्ध्रादधोवर्ती चतुष्पथरूपश्चिन्तामण्यभिधान आधारः इति।"

(तं०आ०वि० खं० 3, पृ० 359)

"प्राणदण्डप्रयोगेन (ण) पूर्वापरसमीकृतेः॥
चतुष्किकाम्बुजालम्बिलम्बिकासौधमाश्रयेत्।"

(तं०आ० 5, 54-55)

मुद्रिते पुस्तके 'प्रयोगेन' इति पाठः प्रामादिक इव भाति।

चतुष्पीठता ~ शास्त्राणाम्—— आगमशास्त्राणि चतुष्पीठान्युच्यन्ते। तत्र (1) विद्या (2) मन्त्राः (3) मुद्रा (4) मण्डलानीति चत्वारोंऽशा पीठचतुष्टयं तेषाम्। यथा—

"इह विद्या-मन्त्र-मुद्रा-मण्डलात्मतया चतुष्पीठं तावच्छास्त्रम्।"

(तं०आ०वि० खं०11/2, पृ० 114)

चतुस्त्रिंशद्~देवाः——

"जयश्च विजयश्चैव जयन्तश्चापराजितः।
सुजयो जयरुद्रश्च जयकीर्तिर्जयावहः॥
जयमूर्तिर्जयोत्साहो जयदो जयवर्धनः।
बलश्चातिबलश्चैव बलभद्रो बलप्रदः॥
बलावहश्च बलवान् बलदाता बलेश्वरः।
नन्दनः सर्वतोभद्रो भद्रमूर्तिः शिवप्रदः॥
सुमनाः स्पृहणो दुर्गो भद्रकालो मनोऽनुगः।
कौशिकः कालविश्वेशौ सुशिवः कोप एव च॥
एते योनिसमुद्भूताश्चतुस्त्रिंशत् प्रकीर्तिताः।"

(मा०वि०तं० 3, 20 तः 24)

द्र० (तं०आ० 33, 14 तः 16) चापि।

~देव्यः ——पुंदेवतानां यानि नामानि तान्येव स्त्रीलिङ्गयुक्तानि स्त्रीदेवतानाम्। यथा—

"स्त्रीपाठाच्छक्तयस्त्वेताः।"

(तं०आ० 33, 17)

चतुस्त्रिशूलम्~मण्डलम्——मण्डलपूजोपयोगी यागस्थानरचनाविशेषः।

द्र० (तं०आ० 31, 33) इति।

चन्द्रः——(1) प्रमेयम्। आह्लादमयोऽयम्। सितवर्णः। क्रियाशक्तिः शिवस्य। यथा—

"प्रकाश्यवस्तुसारांशवर्षि तत् सोम उच्यते।"

(तं०आ० 3, 120)

"चन्द्ररूपेण तपति क्रियाशक्तिः शिवस्य तु।"

(उद्ध०तं०आ०वि० खं० 2, पृ० 125)

प्रसङ्गवशतस्तपतीति प्रकाशते इति अविभागात्मकप्रमेयप्रवर्षकः प्रकाश एव सोम इति तात्पर्यम्।

(2) अपानवृत्तेरियमागमिकी पारिभाषिकी संज्ञा। यथा—

"अपानो विमर्शनेनान्तर्विश्रान्त्यानन्ददायी देहादिप्रमातृभावमाप्याययतीति चन्द्रस्तत्कालो निशेति प्रमात्रपेक्षाप्रधानतयैवं विभज्यते।"

(ई०प्र०वि०वि० खं० 3, पृ० 343)

चन्द्रगर्भः——ग्रन्थविशेषः

श्रीचन्द्रगर्भादौ—

"भृङ्गत्रयसमोपेता ब्रह्मविष्णुहरालयाः।" इति।

(उद्धृ०स्व०तं०उ० प० 10, पृ० 60)

चन्द्रज्ञानम्——योगविद्यासम्बन्धि किमपि पुस्तकं यन्नेदानीं लभ्यते। यथा—

"यथेन्दुः पुष्पसंकाशः समन्तादवभासते।
आह्लादनसमूहेन जगदाह्लादयेत् क्षणात्॥
तद्वद्देवि महायोगी यदा पर्यटते महीम्।
ज्ञानेन्दुकिरणैः सर्वं जगच्चित्रं समस्तकम्॥
आह्लादयेत् समन्तात्तदवीच्यादि शिवान्तकम्। इति
श्रीचन्द्रज्ञाने जागरादौ तुर्याभोगमयत्वं महायोगिनो दर्शितम्।"

(शि०सू०वि० पृ० 11)

द्र० (वि०भै०उ० पृ० 119) इति।

द्र० (म०मं०प० पृ० 160) इति च।

चन्द्र-(राशि)-मण्डलम्——ठकारस्यागमिकमभिधानम्। यथा—

"राशिमण्डलं ठकारम्।"

(ने० तं० उ० खं० 2, पृ० 63)

चन्द्रसूर्यौ——ठकारडकारयोरागमिके नाम्नी। यथा—

"चन्द्रसूर्यौ ठडौ।"

(ने०तं०उ०, खं० 2, पृ० 63)

चन्द्रानन्दभट्टः——कश्चन ग्रन्थकारो यन्मतमुद्धृतं विवृतिविमर्शिन्याम्। यथा—

"तत एव भट्टचन्द्रानन्देन—
पश्यतो रूपमालेखाद्भातो भातानुषङ्गि यत्।
प्रतीपभानं प्रतिभा भावानाम्…………॥"

(उद्ध०ई०प्र०वि०वि० खं० 2, पृ० 339)

चमत्कारः——चिदाह्लादचर्वणा, सुव्याख्याता विस्तरेणेश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्याम्। यथा—

"चमत्कारो हीति—स्वात्मन्यनन्यापेक्षे विश्रमणम्। एवं भुञ्जानतारूपं चमत्त्वं, तदेव करोति संरम्भे विमृशति, नान्यत्रानुधावति। चमदिति क्रियाविशेषणम्, अखण्ड एव वा शब्दो निर्विघ्नास्वादनवृत्तिः 'चमदिति वाऽऽन्तरस्पन्दान्दोलनोदितपरामर्शमयशब्दनाव्यक्तानुकरणम्। काव्यनाट्यरसादावपि भाविचित्तवृत्त्यन्तरोदयनियमात्मकाविघ्नविरहित एवास्वादो रसनात्मा चमत्कार इति उक्तमन्यत्र।"

(ई०प्र०वि०वि० खं० 3, पृ० 251)

~इच्छात्मकः——चिदात्मकस्य परमेश्वरस्य स्वभावभूतानन्दस्पन्दवशतो यो विश्वसिसृक्षात्मकश्चमत्कारविशेषो मातृकाक्रमे इवर्णेनाभिव्यंग्योऽसौ तस्येच्छात्मकश्चमत्कारः। यथा—

"यदा तु तस्य चिद्धर्मविभवामोदजृम्भया॥
विचित्ररचनानाना - कार्यसृष्टि - प्रवर्तने।
भवत्युन्मुखिता चित्ता सेच्छायाः प्रथमा तुटिः॥

(शि०दृ० 1, 7-8)

स्कारयस्यखिलमात्मना स्फुरन्
विश्वमामृशसि रूपमामृशन्।
यत्स्वयं निजरसेन घूर्णसे
तत् समुल्लसति भावमण्डलम्॥

(शि०स्तो० 11, 15)

संघट्टेऽस्मिंश्चिदात्मत्वाद् यत्तत्प्रत्यवमर्शनम्॥
इच्छाशक्तिरघोराणां शक्तीनां सा परा प्रभुः।

(तं०आ० 3, 71-72)

~(तत् प्रसारः)——सर्वत्र तावच्चमत्कार इच्छारूपतयाऽग्रे प्रसरति। यथा—

"सर्वत्र हि चमत्कार एवेच्छा, सा च परभूमावप्यस्ति।
यदुक्तम्-'तदेच्छा तावती…………………इति।"

(शि०दृ० 1, 3)

"चमत्कारिता हि भुञ्जानरूपता स्वात्मविश्रान्तिलक्षणा सर्वत्रेच्छा।"

(ई०प्र०वि०वि० खं० 3, पृ० 252)

~कामात्मकः——आगूरितविशेषं भावान्तरमपेक्ष्योत्थाप्यमान इच्छात्मकश्चमत्कारः 'काम' इति परिभाष्यते। यथा—

"आगूरितविशेषतायां तु कामः इति।"

(ई०प्र०वि०वि० खं० 3, पृ० 252)

~रागात्मकः——"क्वचित्तु स्वात्मविश्रान्तिर्भावान्तरमनागूरितविशेषमपेक्ष्योत्थाप्यते, यत्र सेच्छा 'राग' इत्युच्यते।"

(ई०प्र०वि०वि० खं० 3, पृ० 252)

रागतत्त्वात्मकोऽयं चमत्कारो न बुद्धिधर्मविशेषात्मकोऽत्राभिप्रेतः।

चर्वनम्——साधकः गृहीतमर्थं प्रमारूपायां दशायां स्वात्मसात्करोति-'घटमहं जानामीति'। तदेतत् स्वात्मसात्करणात्मकं भावसंहरणमेव चर्वनम्। यथा—

"चर्वयेत्-स्वात्मसात्कारेण संहरेदित्यर्थः।"

(तं०आ०वि० खं० 3, पृ० 368)

चर्या——पुत्रकदीक्षादिरूपाऽसौ क्रिया यया शिष्यस्य मलशोधनं सामर्थ्यवता गुरुणा विधीयते। सा च चर्या त्रिकाचार

क्रियामयी वा कौलाचारमयी वा रहस्यचर्येति प्रसिद्धा। सामर्थ्यवान् साधको ज्ञानेन योगेन वा मुक्तो भवति। परं तथाविधसामर्थ्य-रहितः साधकः कृपापरेण गुरुणा कृतया दीक्षात्मिकया चर्ययैवान्तर्निर्मलो भवति, देहपाते च तन्निर्मलत्वं संवेत्ति, यद्यपि सति देहे तस्य तन्नैर्मल्यं नाभिव्यक्तं भवति। यथा—

"नित्यं नैमित्तिकं कर्म कुर्वञ्शाठ्यविवर्जितः।
विनापि ज्ञानयोगाभ्यां चर्यामात्रेण मुच्यते॥"
(तं०सा० पृ० 192)

"यस्मिन् काले तु गुरुणा निर्विकल्पं प्रकाशितम्।
तदैव किल मुक्तोऽसौ यन्त्रं तिष्ठति केवलम्॥"
(तं०आ० 13, 230-31)

~कापालिकादिव्रते——पञ्चमकारादिसेवनेऽघोरव्रते च स्वात्मनः सर्वशिवमयत्वदृष्टेः परीक्षणं मुख्यं प्रयोजनम्। तथाविधदृष्टिसम्पन्नस्य नैव क्वापि घृणाशङ्काभयलज्जाजुगुप्सादि समुदेतुमलम्। पञ्चमकारसेवनक्रमेण तत्परीक्षणविधिश्चर्या। यथा—

"न चर्या भोगतः प्रोक्ता या ख्याता भीमरूपिणी।
स्वचित्तप्रत्यवेक्षातः चलं किं वा स्थिरं मनः॥"
(उद्ध०तं०आ०वि० खं० 3, पृ०269)

~त्रिके——(1) मद्यमांसमैथुनाद्यभ्यासेन जगदानन्दोद्द्योतनसमर्था कापि साधनाप्रक्रिया, यया सद्य एव शाक्त-शाम्भवयोगौ सिद्ध्यतः, स्वरूपलाभं च वितरतः। विषयानन्दोपायसाहाय्येन परतरस्मिञ्जगदानन्दे प्रवेशयुक्त्या तत्र चित्तस्य स्थिरीकरणमेव चर्या न भोगमात्रम्। इयं च प्रायशो रहस्यचर्येत्यभिधीयते। यथा—

"स एव भगवानन्तर्नित्यं प्रस्फुरदात्मकः॥
अन्तःस्थसर्वभावौघपूर्णमध्यमशक्तिकः।
स्वेच्छाक्षोभस्वभावोद्यजगदानन्दसुन्दरः॥
नित्यं स्फुरति संपूर्णविसर्गरसनिर्भरः।
शिवशक्त्योः स संघट्टः स्नेह इत्यभिधीयते॥
अत्रैव पूर्णवैसर्गपदे लब्धुं प्रवेशनम्।
लेहनामन्थनेत्यादि-संप्रदायमुपासते॥"
(मा०वि०वा० 1, 89 ततः 896)

लेहनामन्थनेत्यादिना कौलिकी चर्याऽत्रोपदिष्टा। उदाहरणतयोक्तासौ। यथा—

"यथा योनिश्च लिङ्गं च संयोगात् स्रवतोऽमृतम्।
तथामृताग्निसंयोगाद् द्रवतस्ते न संशयः॥"
(तं०आ० 4, 131)

सङ्केतमात्रतः सूचितो मकारात्मको रहस्यसाधनाक्रमस्तन्त्रालोके तत्र तत्र द्रष्टव्यः।

प्रकटीकृतश्च मनाक् टीकायाम्। यथा—

"वियुतत्वे त्र्यराणि, यामलत्वे षडराणि, अप्रकाशत्वाद्गुह्यानि, अत एव रहस्यरूपाणि जन्मस्थानप्रभृतीनि चक्राणि धावति-जगत्सिसृक्षया तदौन्मुख्येन प्रवर्तंते।"
(तं०आ०वि० खं० 3, पृ० 148)

"अत्र चान्तरान्तरावस्थितोऽपि चर्याक्रमः सुस्पष्टत्वात् रहस्यत्वाच्च न तथा वितानितः इति स्वयमेवावधार्यम्॥"
(तं०आ०वि० खं० 3, पृ० 154)

~प्रगोपनीया——

"अलं रहस्यकथया गुप्तमेतत्स्वभावतः।
योगिनीहृदयं तत्र विश्रान्तः स्यात् कृती बुधः॥"
(तं०आ० 5, 73)

"एतन्नायोगिनी जातो नारुद्रो लभते स्फुटम्॥"
(प०त्री० 10)

~प्रयोगदृष्ट्या— —संघट्टात्मकशिवशक्त्याभिमुख्यदशायां वर्तमानस्य जगदानन्दस्याभिव्यक्तये समुत्कृष्टतरा अधिकारिणो योषिता मिथुनीभूय वीर्यप्रक्षोभानन्दसमकालमेव जगदानन्दपदवीं प्रविशन्ति। यतो वीर्यविसृष्टिं सकलजगद्विसृष्टिं च कुर्वाणौ आनन्दसमुद्रेकौ एकस्वभावौ। क्षणिके विसर्गानन्दे स्थिरतया दत्तावधानोऽनवच्छिन्नस्य जगदानन्दस्य पदं प्रविशति तीव्रतीव्रतरशक्तिपातपवित्रितः साधकोत्तमः। यथा—

"शक्तिसंगमसंक्षुब्धशक्त्यावेशावसानिकम्।
यत् सुखं ब्रह्मतत्त्वस्य तत् सुखं स्वाक्यमुच्यते॥"
(वि०भै० 69)

"अपूर्णा केवलं सा तु पूर्णा तु भगवन्मयी॥
तैन वैसर्गिकी शक्तिरेकैवेयं प्रजृम्भते।"
(मा०वि०वा० 1, 898-99)

~भावनामयी——दृढतरया भावनया भाव्यमानोऽपि स्पर्शादिधाम्नि मिथुनीभावसुखभरः स्मर्यमाणोऽपि साक्षात् स्पर्शादिविषयसुखकृतां तां सकलवीर्यक्षोभोज्जिगमिषात्मिकां सुविचित्रामनुपमां च रुद्रयामलभावचमत्कृतिमुद्भावयति। यथा—

"'लेहनामन्थनाकोटैः स्त्रीसुखस्य भरात्स्मृतेः।
शक्त्यभावेऽपि देवेशि भवेदानन्दसम्प्लवः'॥"
(वि०भै० 70)

'भरात् स्मर्यमाणो हि संस्पर्शः तत्स्पर्शक्षेत्रे च मध्यमाकृत्रिमपरात्मकशक्तिनालिकाप्रतिबिम्बितः तन्मुख्यशाक्तस्पर्शाभावेऽपि तदन्तर्वृत्तिशाक्तस्पर्शात्मकवीर्यक्षोभकारी भवति इत्यभिप्रायेण।"
(प०त्री०वि० पृ० 51)

~रहस्यतः——चर्यारहस्यं तु येन केनापि प्रकारेण संविदः उन्मज्जनम्। संविदुन्मज्जनस्य चानन्दातिरेकप्रज्वलनरूपत्वम्। तच्च चर्याभ्यासेन सद्यो भवति। यथा—

"संविदुद्रेचकमेव वस्तु अर्चने योग्यमित्याह—"
तं०आ०वि० खं० 9, पृ० 84)

"उन्मज्जयति निर्मग्नां संविदं यत्तु सुष्ठु तत्॥
अर्चायै योग्यमानन्दो यस्मादुन्मग्नता चितः।
तेनाचिद्रूपदेहादिप्राधान्यविनिमज्जकम्॥
आनन्दजननं पूजायोग्यं हृदयहारि यत्।"
(तं०आ० 15, 167 ततः 169)

यद्वस्तु निर्मग्नां संविदमुन्मज्जयति तदत्राचार्यं योग्यम् । यत आनन्द एव चित उन्मग्नतेति ।

~व्याख्यात:——अत्यन्तं रहस्यभूतोऽयं साधनाक्रम: । अत्र मिथुनीभूतयो: साधकयोर्न केवलं स्पर्शसुखधाम्न्येव वीर्यप्रक्षोभो यावदुभयलिङ्गात्मनि मध्यमनाडीधाम्न्यपि सुविचित्रानन्दचमत्कारात्मक: स्पन्दरूप: प्रक्षोभो भवंस्तथानन्दचमत्कारमयतया परिस्फुरन् परिपूर्णसृष्ट्यानन्दरूपरुद्रयामलयोगानुभूतिं प्रवेशयति वीरसाधकयुगलम् । इत्येतच्चर्याक्रमयोगरहस्यं, लक्षेष्वपि केनापि विरलविरलेन साधकेन लभ्यम्, आचरणीयं, चर्वणीयं च । नैवाधुनाऽस्य योगक्रमस्य गुरवो वाऽधिकारिण: शिष्या वा क्वापि सुलभा: । उक्तं ह्येतद्विषये । यथा—

"यदा सकलेन्द्रियनाडीभूतमरुदादिपरिपूरणे तु महामध्यमसौषुम्नपदानुप्रवेशे निजशक्तिक्षोभतादात्म्यं प्रतिपद्यते तदा सर्वतो द्वैतगलने परिपूर्णस्वशक्तिभरविमर्शाहन्तामयचमत्कारानुप्रवेशे—परिपूर्णसृष्ट्यानन्दरूपरुद्रयामलयोगानुप्रवेशने तन्महामन्त्रवीर्यविसर्गविश्लेषणात्मना ध्रुवपदात्मकनिस्तरङ्गाकुलभैरवभावाभिव्यक्ति: । तथाहि तन्मध्यनाडिरूपस्योभयलिङ्गात्मनोऽपि तद्वीर्योत्साहबललब्धावष्टम्भस्य कम्पकाले सकलवीर्यक्षोभोज्जिगमिषात्मकम् अन्त: स्पर्शसुखं स्वसंवित्साक्षिकमेव ।"

(प०त्री०वि० पृ० 49-50)

"तथा हि मध्यमां नाडीमधिष्ठायाखिलं वपु: ।
प्राणयत् परमं तेज: प्रक्षुब्धमृतुमाल्यत: (रतिमन्थत:) ॥
विसृष्टिरूपतां गच्छद् यात्यानन्दचमत्क्रियाम् ।
अपूर्णा केवलं सा तु पूर्णा तु भगवन्मयी ॥
तेन वैसर्गिकी शक्तिरेकैवेयं प्रजृम्भते ।"

(मा०वि०वा० 1, 897 त: 899)

~सङ्केतिता——
"तत्रानन्दश्च सर्वस्य ब्रह्मचारी च तत्पर: ।
तत्र सिद्धिश्च मुक्तिश्च समं संप्राप्यते द्वयम् ॥"

(तं०आ० 4, 139)

"सिद्धिरैहिक्यानन्दरूपा, मुक्तिर्ब्रह्मचारित्वरूपा ।"

(तं०आ०वि० खं० 3, पृ० 150)

~सिद्धान्तशैवे——शैवसाधकस्य दैनंदिनमाचरणं यत् समयदीक्षया शिक्षितम् । तस्य नित्या नैमित्तिकी च दिनचर्या । यथा—

"विद्यापादार्थकुशल: क्रियापादधृतक्रम: ।
योगपादकृताभ्यासश्चर्यापादानुवर्तक: ॥
गुरुर्दीक्षां प्रकुर्वीत………………।"

(उद्ध०तं०आ०वि० खं० 9, पृ० 12)

चवर्ग:~मातृकासु——गन्धादि-पञ्चतन्मात्राणां वास्तविकस्य चित्प्रतिबिम्बात्मकस्य स्वरूपस्याभिव्यञ्जकं वर्णपञ्चकम् । यथा—

"चादिमान्तं गन्धादि-शब्दान्तं तन्मात्र-पञ्चकम् ।"

(प०त्री०वि० पृ० 113)

"………………गन्धादि: स्याच्चवर्गक: ।"

(पू० प्र० 2, 100)

चवर्गदेवता——महेशानी । यथा—
"चवर्गे तु महेशानी………………।"

(स्व०तं० 1, 35)

चवर्गसृष्टि:——स्वरूपस्थाया: शुद्धाया: इच्छाशक्ते: चादिपञ्चवर्णानां सृष्टि: । यथा—

"इच्छाशक्ते: स्वस्वरूपसंस्थाया एकरूपत: ॥
चवर्ग: पञ्चशक्त्यात्मा क्रमप्रस्फुटतात्मक: ।"

(तं०आ० 3, 150-51)

चिदादिक्रियान्तपञ्चशक्ति-सम्भिन्नाया: इच्छाशक्तेश्चवर्गस्य सृष्टि: । तत एव चवर्ग: पञ्चात्मक: ।

चार्वाकमति:——"देहादन्यत् किमप्यात्माभिधाभिधेयं वस्तुतो नास्त्येव, देहे भस्मीभूते शून्यतायां लयो भवति प्राणरूपस्य प्रमातु: ।" इत्येवं भावयन्तश्चार्वाका देहान्ते शून्यप्रलयाकलतां प्राणप्रलयाकलतां वासादयितुं शक्नुवन्ति चेदसौ भावना तेषां सुदृढा भवेत् । यथा—

"प्राणनावृत्तितादात्म्यसंवित्स्वोचितदेहजाम् ।
चेष्टां पश्यन्त्यतो मुग्धा नास्त्यन्यदिति मन्वते ॥
तामेव बालमूर्खस्त्रीप्रायवेदितृसंश्रिताम् ।
मतिं प्रमाणीकुर्वन्तश्चार्वाकास्तत्त्वदर्शिन: ॥
तेषां तथा भावना चेद्दार्ढ्यमेति निरन्तरम् ।
तद्देहभङ्गे सुप्ता: स्युरातादृग्वासनाक्षयात् ॥"

(तं०आ० 6, 15-17)

सुप्ता=इति सौषुप्तपदस्था: प्रलयाकला: इति ।

चिकीर्षा~परा——पारमेश्वरी क्रिया । सृष्ट्याद्युल्लिलासा, विश्वकर्तृताया: बीजभूता । यथा—

"य एव तथा चिकीर्षुस्तस्यैव सा चिकीर्षा बहिष्पर्यन्ततां प्राप्ता क्रिया ।……………………………………
………………तेन महेश्वर एव भगवान् विश्वकर्ता ।"

(ई०प्र०वि० खं 2, पृ० 183-84)

चिच्छक्ति:——शुद्धशिवता । यथा—
"यदागम:……………
चिच्छक्तिरमला शुद्धा बाह्यसंवेदनोज्झिता ।
शिवसद्भावधर्मस्था सा ह्यनाख्येति विश्रुता ॥
इति अकुलस्वभावा ।"

(म०प्र०वि० पृ० 39)

चिच्छक्तिसंस्तुतिः——योगिनाथकृतो ग्रन्थविशेषः पाञ्चरात्रमतानुसारी। यथा—

"उक्तं च योगिनाथेन ह्येतच्चिच्छक्तिसंस्तुतौ—
तदेवं त्वत्प्रवृत्त्या त्वन्निवृत्त्या चोदयेतरे।
जुषन्ते येन तत्त्वानि तान्यतः स्पन्द एव ते।
वैसादृश्येऽपि कार्यस्यास्यात्र दृष्टान्तमाह यत्।
ज्वलनाद्धूमोद्गतिरिव विविधाकृतिरम्बरे गता भाति।
तद्वद्विष्णोः सृष्टिः स्वभावजाऽद्वैतरूपेयम्॥
प्राश्यानश्चिद्रसस्यौघः साकारत्वमुपागतः।
अवश्यायः प्रबोधार्के तूदिते स्वस्वभावभाक्॥

(स्प॰प्र॰ पृ॰ 5-6)

चित्——(1) शुद्धा देशकालाकारवैचित्र्यशून्या संवित्। यथा—

"चिद्रूपस्य देशकालस्वरूपवैचित्र्यं हि न कदाचित्।"

(ई॰प्र॰वि॰वि॰ खं॰ 1, पृ॰ 91)

(1) सा च वास्तविकपरतत्त्वस्वरूपा चेतना। यथा—

"ततो गत्यन्तराभावाच्चिदेव परिशिष्यते।
सतश्चिदैक्यं प्रकृतं कदाचिन्न निवर्तते॥"

(अ॰प्र॰पं॰ 8)

~करणयोगे——संवित्तिः। सा च क्षेत्रज्ञप्रमातृरूपा संविदेव। तस्या बोध्यतात्मकस्य संकोचांशस्य न्यग्भावेन शुद्धचिद्रूपताया उद्रेचनेन परसंवित्प्रतिष्ठाऽऽसादनीया भवति करणयोगाभ्यासेन। यथा—

"...... चित्स्वरूपं तु व्यक्ताव्यक्त-विचारकम्।
प्रत्यक्षादिप्रमाणैश्च ग्रहीता........................॥
..................ग्रहीता ग्राहकः स्मृतः॥"

(त्रि॰शि॰भै॰उद्धृ॰तं॰आ॰वि॰ खं॰ 3, पृ॰ 440)

चितिः——(1) स्वात्मस्वरूपस्वभावप्रत्यवमर्शनस्वभावा संवित्। सैव परावाक्। सैव च परस्वातन्त्र्यात्मिका परतत्त्वस्य परमेश्वरता। यथा—

"चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः॥
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः॥
स्वात्मानमत एवायं ज्ञेयीकुर्यात्.........।"

(ई॰प्र॰ 1-5-13तः 15)

"चितिः स्वतन्त्रा विश्वसिद्धिहेतुः।"

(प्र॰हृ॰ 1)

"पराशक्तिरूपा चितिरेव भगवती.........स्वतन्त्रा अनुत्तरविमर्शमयी शिवभट्टारकाभिन्ना,...........अस्यां हि प्रसरन्त्यां जगदुन्मिषति व्यवतिष्ठते च, निवृत्तप्रसरायां च निमिषति इति स्वानुभव एवात्र साक्षी।"

(तदेव, पृ॰ 2)

"चिदेव भगवती स्वच्छस्वतन्त्ररूपा तत्तदनन्तजगदात्मना स्फुरति।"

(तदेव पृ॰ 3)

(2) आत्मनः कर्तृत्वज्ञातृत्वे। यथा—

"यतो ज्ञाने कृतौ च स्वातन्त्र्यमेव चित्त्वम्।"

(ई॰प्र॰वि॰वि॰ खं॰ 1, पृ॰ 48)

~उच्चारयोगे——ख-दशके षष्ठं खम्। तुर्यातीता परा संवित्। यथा—

"आत्माणुकुलमूलानि शक्तिर्भूतिश्चिती रतिः।
शक्ति-त्रयं द्रष्टृ-दृश्योपरक्तं तद्विवर्जितम्।
एतत् खं-दशधा प्रोक्तमुच्चारोच्चारलक्षणम्।"

(तं॰आ॰ 5, 93-94)

"चितिस्तुर्यातीतपदात्मिका परा संवित्।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 404)

~परा——अन्तर्लीन-समस्तविश्वस्य शुद्धचिन्मात्रस्वरूपस्य स्वात्मनोऽहमिति विमर्शनम्। यथा—

"अन्तर्निलीनानन्तार्थस्वात्मामर्शश्चितिः परा।

(प॰पं॰ 41)

~लक्षणतः——आत्मनः कर्तृत्वज्ञातृत्वे। यथा—

"यतो ज्ञाने कृतौ च स्वातन्त्र्यमेव चित्त्वम्।"

(ई॰प्र॰वि॰वि॰ खं॰ 1, पृ 48)

शक्तिः——(1) परिपूर्णस्वातन्त्र्यात्मिका चैतन्यशक्तिः परस्य तत्त्वस्य।

द्र॰ 'चिच्छक्तिः' इति।

(2) सैव बहिर्मुखतावभासे प्रमातृ-प्रमाण-प्रमेयात्मकतया परिस्फुरन्ती। प्रमाणरूपतायां चान्तर्बहिष्करणात्मकतयावभासमाना। यथा—

किञ्च चितिशक्तिरेव भगवती विश्ववमनात् संसारवामाचारत्वाच्च वामेश्वर्याख्या सती, खेचरी-गोचरी-दिक्चरी-भूचरीरूपैः अशेषैः प्रमातृ-अन्तःकरण-बहिष्करण-भावस्वभावैः परिस्फुरन्ती।

(प्र॰हृ॰ पृ॰ 28-9)

चित्तम्——चैतन्याख्यकर्तृत्वपदादवरूढा, करणपदव्यां विजृम्भमाणा कार्योन्मुख्येन सङ्कोचयुक्ततयाऽवभासमाना चिच्छक्तिः। यथा—

"चित्तं हि नाम चैतन्यपथावरोहाच्चेत्यसञ्चयान्तश्चर्याचातुर्योपात्तसङ्कोचा चिच्छक्तिरित्यवधार्यते।"

(म॰मं॰प॰ पृ॰ 23)

अन्तःकरणम्।

"चितिरेव चेतनपदादवरूढा चेत्यसंकोचिनी चित्तम्॥"

(प्र॰हृ॰ 5)

"न चित्तं नाम अन्यत् किंचित्, अपितु सैव (चितिः) भगवती तत्।"

(तदेव, पृ॰ 11)

चित्तत्त्वम्——ज्ञानक्षणानामनुसन्धानात्मकमेकीभवनस्वरूपं तत्त्वम् । यथा—

"अशेषपदार्थज्ञानानामन्योन्यानुसन्धानं चित्तत्त्वम् इति । सामानाधिकरण्येनानुगामित्वेन सन्धानं विच्छिन्नसम्मतानामपि ज्ञानानामेकीभवनं नाम, चिदेवान्तर्मुखा, नान्यत् किञ्चिदिति ।"

(ई०प्र०वि०वि० खं० 1, पृ० 276)

~स्वरूपतः——

"चित्तत्त्वमेव महेश्वररूपम्, न चात्मा चित्तत्त्वादन्यः कश्चिदिति ·························। चित्तत्त्वं च प्रकाशस्वातन्त्र्यमेवोच्यते, नान्यत् किञ्चित् ।"

(ई०प्र०वि०वि० खं० 1, पृ० 289)

चित्तसन्तोषत्रिंशिका——महामाहेश्वराचार्येण नागार्जुनेन विरचितं किमप्यद्वैतशैवदर्शनसिद्धान्तगर्भमतीव मनोहरं स्तोत्रम्—"शैवाचार्यो नागार्जुनः" इत्यत्र ग्रन्थे सटीकं प्रकाशितं श्रीरणवीर-विद्यापीठेन, जम्मूपुरस्थेन ।

चित्प्रकाशः——चैतन्यस्य स्वमहिम्नैव "अहम्" इति स्वात्मनः सततं प्रकाशनम् तथा संवेदनं च ।

~तन्माहात्म्यम्——प्रकाशानुग्रहं विना जडस्य न कथमपि सिद्धिः । प्रकाशात्मक आत्मा स्वयं सिद्धः । तत्प्रकाशेन तदन्तः प्रकाशमानो नीलसुखादिर्जडः सन्नपि सद्रूपतयैव सिद्धिं लभते, नान्यथा न स्वतः । स च चित्प्रकाशः प्रत्यक्षानुमानादि-प्रमाणान्यपि स्वयं प्रकाशयन् लोकव्यवहारे तत्तत्प्रमाणसाचिव्येनैव नीलसुखादिं प्रकाशयति । ततः प्रकाश एव जडानां प्रतिष्ठास्पदम् । यथा—

"एवमात्मन्यसत्कल्पाः प्रकाशस्यैव सन्त्यमी ।
जडाः, प्रकाश एवास्ति स्वात्मनः स्वपरात्मभिः ॥"

(अ०प्र०सि०, 13)

~द्विविधः——अहमिति चित्-प्रकाशः परिमितरूपतया जीवतयाऽपरिमितरूपतया च परमेश्वरतयावभासते । एतदुभयमध्य एव सर्वे व्यवहारा ब्रह्मादिकीटान्तानां जन्तूनां जडानां च भाव-भुवनव्रातानां सर्वेषामपि । यथा—

"उभयोऽप्येष पर्यन्तभूमिः सर्वार्थसंविदाम् ।
एक एवानुसन्धानादतोऽन्यो नोपपद्यते ॥"

(अ०प्र०सि०, 17)

चित्संवित्तिः~त्रैशिरसे——एकादशी प्रणवकला । समना नाम शक्तिः । तस्यां स्वात्मनश्चिद्रूपतायाः संवेदनं भवतीति । यथा—

"··············संवित्तिः समना स्मृता ।"

(उद्ध०तं०आ०वि० खं० 12, पृ० 180)

चित्स्थापनं~त्रैशिरसे——दशमी प्रणव-कला । व्यापिनी शक्तिः । तस्यामवस्थायां स्वात्मनश्चिद्रूपता सुस्थिरतया विमृश्यते योगिभिः । तस्याः स्थापनं च स्थिरीकरणमेव । यथा—

"व्यापिन्यां कथञ्चिदुद्रेकेऽपि तथैवावस्थानम् ।"

(तं०आ०वि० खं० 12, पृ० 180)

"स्थापनं व्यापिनी प्रोक्ता"

(उद्ध० तत्रैव)

चित्स्वरूपम्——यस्य भासा सम्पूर्णं दृश्यं प्रकाशतेऽसौ सर्वदृश्यप्रकाशनशीलः, आत्मा स्वयं चिद्रूपः । नंक्ष्यमाणमिदं जगन्नैव चिद्रूपं व्यवहारे, यद्यपि परमार्थत इदमपि चित्प्रकाश-विभूतिमयमेव । यथा—

"यद्भासा दृश्यमाभाति तस्य चित्त्वं न किं स्फुटम् ।
पश्याम्यहमिदं सर्वं-इति मूढोऽपि मन्यते ॥
आत्मा यदि न चिद्रूपो जडत्वं जगतः कथम् ।
नश्यमानस्य जगतश्चिद्रूपत्वं न सिद्ध्यति ॥"

(आ० वि० 2, 13-14)

चिदानन्दः~उच्चारयोगे——उच्चारयोगक्रमे सर्वस्य मूलस्रोतोभूतायां सर्वात्मिकायां सर्वोत्तीर्णायां च चिदात्मिकायां चिन्मात्रविमर्शमय्यां व्यानाख्यायां प्राणवृत्तौ विश्रान्त्या यस्योत्कृष्टतरस्यात्मानन्दस्याभिव्यक्तिर्भवत्यसावानन्दश्चिदानन्द इति परिभाषितः, अत्र विश्वोत्तीर्णता प्रकाशते परस्याश्चितः । यथा—

"निरुपाधिर्महाव्याप्तिर्व्यानाख्योपाधिवर्जिता ।
तदा खलु चिदानन्दो यो जडानुपबृंहितः ॥
नह्यत्र संस्थितिः कापि विभक्ता जडरूपिणः ।"

(तं० आ० 5, 49-50)

~महानन्दाद् भिन्नः——महानन्दे जडं जगद्विलीयमानतयावतिष्ठत एव, परं चिदानन्दे भिन्नस्य जडस्य वस्तुनो नाममात्रेणाप्याभासो नैव वर्तते इति भेदोऽनयोः । चिदेकमात्ररूपतयैवात्र जडस्य स्थितिर्न कथमपि चितो भिन्नत्वेन । यथा—

"विभक्ता इति—अविभागेन पुनरेषामस्त्येव सद्भावः—इति भावः ।"

(तं०आ०वि० खं० 3, पृ० 354)

चिदानन्दशक्ती——परमशिवस्वभावभूतं शक्तिद्वयम् । परशिवतत्त्वस्य स्वरूपं चित्, स्वभावश्चानन्दः ।

तस्य या चिदसावानन्दमयी, आनन्दश्च तस्य चिन्मयः । इत्यनयोरभेद एव परं तत्त्वम् । यथा—

"स्वरूपानुप्रविष्टचिन्निर्वृतिरूपशक्तिद्वयः प्रकाशानन्दमयः पूर्णः परमेश्वरः शिवः·····························।"

(शि०दृ०वृ० पृ० 23)

"आत्मैव सर्वभावेषु स्फुरन्निर्वृतचिद्विभुः ।"

(शि० दृ० 1-2)

चिदापत्तिः~त्रैशिरसे——द्वादशी प्रणवकला । उन्मना शक्तिः । तस्यां साधकश्चिद्रूपतामापन्नमेव स्वात्मानं संवेत्ति । यथा—

“उन्मनाभूमौ च तदैकात्म्यम् ।”

(तं०आ०वि० खं० 12, पृ० 180)

“उन्मना च तदापत्तिः ।”

उद्ध० (त्रि०भै०)

(तं०आ०वि० खं० 12, पृ० 180)

चिदुद्बोधः——अष्टमी प्रणवकला । नादान्तः । तस्यामवस्थायां स्वात्मनश्चिद्रूपतोद्बुद्धा भवति । यथा—

“चिदुद्बोधः परावस्था................।”

उद्ध० (त्रि०भै०)

“इदन्तानिमज्जनादहन्तोन्मज्जनात्मनि नादान्ते प्रमातृरूपायाः, संविद एव प्रबोध इति चिदुद्बोध इति ।”

(तं०आ०वि० खं० 12, पृ० 180)

चिद्घनः——यथा सैन्धवघनः सर्वतो रसघनस्तथा शिवः सर्वतः सर्वथा, सर्वदा च चिदेकघनः । चिदेव सर्वथा नाचित् कथमपि ।

चिद्दीपनं~त्रै शिरसे——प्रणवकलासु नवमी कला । स्वात्मनश्चिद्रूपतायाः सम्यग् या ख्यातिस्तद्रूपतामभ्यवस्था । कौण्डली शक्तिः । यथा—

“चिदुद्बोधः परावस्था दीपनं शक्तिरुच्यते ।”

उद्ध० (त्रि०भै०)

एवं बुद्धायाः संविदः शक्तिदशायामुद्रेकः ।”

(तं०आ०वि० खं० 12, पृ० 180)

चिद्रूपम्——स्वप्रकाशं तत्त्वम् । यथा—

“यत् स्वयमेव प्रकाशते, नान्यत्र (तः), प्रकाशत एव च, न तु प्रकाश्यतेऽन्येनेति, तदेव तत्त्वतश्चिद्रूपम् ।”

(ई०प्र०वि०वि० खं० 1, पृ० 91)

अत्र “नान्यत्र” इति प्रामादिकः पाठो मुद्रितः । “नान्यतः” इति पाठः शुद्धः ।

चिन्तामयम्~ज्ञानम्——पूर्वापरपक्षविचारपूर्वकं, शङ्कासमाधानाचितः सुनिश्चितं ज्ञानं चिन्तापूर्वकमिति । तच्च मन्दस्वभ्यस्तभेदाभ्यां द्विप्रकारकम् । यथा—

“सर्वमालोच्य शास्त्रार्थमानुपूर्व्या व्यवस्थितम् ।
तद्वच्चिन्तामयं ज्ञानं द्विरूपमुपदिश्यते ॥
मन्दस्वभ्यस्तभेदेन तत्र स्वभ्यस्तमुच्यते ।”

(मा०वि०तं० 4, 30-31)

चिन्मूर्तिः——द्र० ‘चिद्घनः’ इति ।

चिमिचिमिका——भट्टरम्यदेवेन स्वविरचितभावोपहारविवरणे संकेतितः कोऽपि दशाविशेषः । स्वरूपसमावेशक्रमे अनुभवगम्या प्रथमस्पन्दरूपा तुटिरूपा वाऽपि अलौकिकी स्थितिः । भावानुकरणात्मकः शब्दोऽयम् । यथा—

“उद्गच्छदाद्येच्छाचिमिचिमिका.........।”

(मा०वि० पृ० 37)

चिल्लाचक्रेश्वरमतम्——शास्त्रं किमपि यस्माज्जन्ममरणविचाराख्ये ग्रन्थे काश्चन पंक्तय उद्धृताः भट्टवामदेवेन । यथा—

उक्तं श्री चिल्लाचक्रेश्वरमते—

“सोमसूर्यरसोल्लासपरस्परनिघर्षणात्—

इत्यादि विस्तरतः ।”

(ज०म०वि० पृ० 9)

चिल्लाचक्रेश्वरीमतमेव स्यादिदम् । यथा—

उक्तञ्च चिल्लाचक्रेश्वरमते—

“माया कला शुद्धविद्या रागकालौ नियन्त्रणा ।
षडेतान्यावृतिवशात् कञ्चुकानि मितात्मनः ॥
एवञ्च पुद्गलस्यान्तर्मलः कञ्चुकवत्स्थितः ।
तुषवत् कञ्चुकानि स्युस्तस्माज्ज्ञानक्रियोज्झितः ॥”

(ज०म०वि० पृ० 4)

“आदिशब्देन चिल्लाचक्रेश्वरीमतादेर्ग्रहणम् ।”

(तं०आ०वि० खं० 1, पृ० 85)

चुखलकः——अभिनवगुप्तस्य पिता नरसिंहगुप्तः कदाचिच्छैशवे तं पितरौ चुखलेति स्निग्धसंज्ञयाऽऽकारयामासुः । अनन्तरं प्रौढत्वेऽपि तन्नाम्ना तस्योल्लेखः भूयसा समभवदिति सम्भाव्यते । तत एवासौ लोके ‘चुखल’ इति वा ‘चुखुल’ इति वा प्रसिद्धोऽभवत् । यथा—

“स श्री चुखुलको दिश्यादिष्टं मे गुरुरुत्तमः ॥”

(तं० आ० 1, 12)

“चुखुलक” इति लोकप्रसिद्धमस्य नामान्तरम् ।”

(तं०आ०वि० खं० 1, पृ० 31)

चुखुलकः——चुखलक एव ।

चुम्बकः——शाक्तस्पर्शः । यथा—

“चुम्बकेन शाक्तस्पर्शेन.........।

(प०त्री०विवृ०, पृ० 9)

चुम्बकेन विश्वस्पर्शकेन शाक्तेन रूपेण.........।”

(प०त्रि०विवृ० पृ० 245)

चुम्बिका——द्र० ‘मातरः’ इति ।

(ने०तं०उ०, खं० 2, पृ० 145-46)

चैतन्यम्——सर्वकर्तृत्व-सर्वज्ञत्वादिरूपं स्वातन्त्र्यं परस्य प्रमातुः । अपरस्यापि परात्मकत्वेनैव परिमितं स्वातन्त्र्यम् । परस्य पुनः सर्वथा परिपूर्णं तत् । यथा—

"चेतयत इति चेतनः सर्वज्ञानक्रियास्वतन्त्रः, तस्य भावश्चैतन्यं सर्वज्ञानक्रियासम्बन्धमयं परिपूर्णं स्वातन्त्र्यमुच्यते ।"

(शि॰सू॰वृ॰ पृ॰ 1)

(2) प्रथमे शिवसूत्रे प्रयुक्तस्य चैतन्यपदस्य स्वातन्त्र्यमेवार्थः। अन्यत्सर्वं चेदस्ति प्रकाशते वा तच्चैतन्याश्रयतश्चैतन्यानुग्रहेणैव। एकमात्रं चैतन्यमेव स्वयमेव निजेन स्वातन्त्र्येण प्रकाशते, स्वसत्तां च प्रतिष्ठापयति। तदेव च परतत्त्वस्यात्मनो लक्षणम्। यथा—

"चैतन्यमिति भावान्तः शब्दः स्वातन्त्र्यमात्रकम्।
अनाक्षिप्तविशेषं सदाह सूत्रे पुरातने ॥

(तं॰आ॰ 1, 28)

(3) अन्यनैरपेक्ष्येणैव प्रकाशमानत्वं विमृशत्वं च। यथा—
"अन्यनिरपेक्षतैव परमार्थत आनन्दः, ऐश्वर्यं, स्वातन्त्र्यं, चैतन्यं च।"

(ई॰प्र॰वि॰ खं॰ 1, पृ॰ 207)

(4) स्वात्मविमर्शनात्मिका चितिक्रिया यया चेतनः स्वसत्तासाक्षात्कारवान् भवत्यहमिति। यथा—

"चैतन्यं चित्क्रियारूपं शिवस्य परमस्य यत्।

(व॰रा॰वा॰, 2)

(5) ज्ञानक्रियाविषयं स्वातन्त्र्यम्। यथा—

"चैतन्यं सर्वज्ञानक्रियासम्बन्धमयं परिपूर्णं स्वातन्त्र्यमुच्यते ।"

(शि॰सू॰वि॰ पृ॰ 2)

प्रतिपादनप्रकारा एवेमे स्पष्टीकरणार्थमत्र दत्ताः नात्र मतभेदशङ्का कार्या। परस्परपूरकत्वमेतेषां प्रतिपादनप्रकाराणाम्।

~द्विप्रकारकम्——तद्धि परिमितमपरिमितं च। तत्रपरिमितं किञ्चिज्ज्ञत्वं किञ्चित्कर्तृत्वं चेति जीवोचितं चैतन्यमणुरूपम्। अपरिमितं पुनः शिवचैतन्यम्। तद्धि सर्वज्ञानक्रियास्वातन्त्र्यं सर्वज्ञत्वं सर्वकर्तृत्वं चेति परमात्मरूपम्। तदेव हि स्वयमात्मानमनन्तजीवचैतन्यरूपतयावभासयति। यथा—

"द्विधा स एष एवात्मा मितोऽपरिमितस्तथा।
प्राणादिना निरुद्धोऽणुः परमात्मा त्वखण्डितः ।।
उभयोऽप्येष पर्यन्तभूमिः सर्वार्थसंविदाम्।
एक एवानुसन्धानादतोऽन्यो नोपपद्यते ॥"

(अ॰प्र॰सि॰ 16-17)

~वस्तुतः——वास्तविकत्वेन तु परिपूर्णज्ञानक्रियास्वातन्त्र्यस्यैव चैतन्यमित्यभिधानं शैवशास्त्रे। अत एव शिवसूत्रे तदेवात्मनो लक्षणमिति प्रतिपादितम्। परिमितेषु प्रमातृषु यच्चैतन्यं तद्गौणमेव न मुख्यम्। यथा—

"चैतन्यं" पूर्णक्रियावत्त्वं, तदेव च पारमैश्वर्यस्वभावं स्वातन्त्र्यमुच्यते।"

(तं॰आ॰वि॰ खं॰ 1, पृ॰ 59-60)

~व्याख्यानतः——"चेतयते" इति चेतनः। तस्य भावश्चैतन्यम्। भावश्च सत्ताधायकं तत्त्वम्। चेतनस्य चेतनत्वापादकं तत्त्वं चैतन्यम्। तदेव तस्य सारभूतं स्वरूपम्। तद्राहित्ये चेतन एवासौ नाभविष्यत्। चेतनत्वञ्च चितिव्यापारसंवहनम्। चितिव्यापारश्च ज्ञानक्रिये। उभे ते परस्परमविनाभूते। ततश्चैतन्यं ज्ञानक्रियास्वातन्त्र्यम्।"

(शि॰सू॰विवृ॰ 1-1)

छ

छ——रसतन्मात्रतत्त्वस्वरूपस्थितिव्यञ्जको मातृकावर्णः। शाम्भवोपासनायां मातृकाक्रमे 'छकारः' स्वात्मनः शक्तिविशेषमेव स्वात्मप्रकाशे बहिर्मुखतया प्रतिफलितं सन्तं रसतन्मात्रतत्त्वात्मकतयावभासयति, तथावभासमानेन प्रतिबिम्बेन खचितं च स्वात्मानमभिव्यक्तिपदं नयति।

छकारः——द्र॰ 'षट्त्रिंशत्तत्त्वदीक्षा' इति।

छुम्मकाः~कौलिके विधौ——कौलसाधनायां विशेषसंङ्केतयुताः अस्पष्टतात्पर्याः पारिभाषिकाः शब्दाः। तेषां तथा प्रयोगो साधना-रहस्य-संरक्षणार्थं क्रियते। साधारणा जनास्तेषां तं तं सङ्केतितमर्थं नावबुद्ध्यन्ते, परं दीक्षिताऽवबुद्धयन्ते। 'छुम्माः' इति 'छुम्मकानीति' चोच्यन्ते। यथा—

"जपध्यानादियुक्तस्य चर्याव्रतधरस्य च ॥
छुम्मकाः सम्प्रवक्ष्यामि साधकस्य वरानने।"

(स्व॰तं॰प॰ 15, 1-2)

"छुम्मकाशर्मपर्यायपारिभाषिकसंज्ञाभिर्लोकोत्तरव्यवहारप्रवर्तनेन गूढतया शास्त्रस्य अस्य रहस्यतां दर्शयितुं·········।"

(स्व॰तं॰उ॰प॰ 15, पृ॰ 125)

"छुम्मका तत्समयानुप्रविष्टसञ्चित्या पारिभाषिकी संज्ञा।"

(तदेव पृ॰ 126)

वर्णिताः स्वच्छन्दतन्त्रे पञ्चदशे पटले। अत्र च तच्छ्लोकक्रमेणैव प्रदर्श्यन्ते न वर्णमाला-क्रमेण। यथा—

छुम्मकाः	तात्पर्याणि	स्वच्छन्दागमवाक्यानि 15 पटले
धाम	भैरवः	भैरवस्तु स्मृतो धाम,
सर्वदः	गुरुः	सर्वदस्तु गुरुः स्मृतः ।
गिरिः	साधकः	साधकस्तु गिरिर्ज्ञेयः,
विमलः	पुत्रकः	पुत्रको विमलः स्मृतः ॥2॥
कान्तदेहः	समयी	समयी कान्तदेहस्तु,
बलदर्पिताः	भगिन्यः	भगिन्यो बलदर्पिताः ।
हर्षणम्	मद्यम्	मद्यं तु हर्षणं ज्ञेयम्,
मुदिता	सुरा	मुदिता तु सुरा स्मृता ॥3॥
जलचराः	मत्स्याः	मत्स्या जलचरा ज्ञेयाः,
बलवर्धनम्	मांसम्	मांसं च बलवर्धनम् ।
प्ररूढम्	जातम्	जातं प्ररूढमित्याहुः,
पराङ्मुखम्	मृतम्	मृतं चैव पराङ्मुखम् ॥4॥
अमृतम्	रक्तम्	रक्तं त्वमृतमित्याहुः,
पद्मनालः	अन्त्रसंचयः	पद्मनालोऽन्त्रसञ्चयः ।
चन्द्रः	शुक्रम्	शुक्रं चन्द्रः समाख्यातः,
सूत्रम्	स्नायुः	स्नायुः सूत्रं प्रकीर्तितम् ॥5॥
डामरम्	श्मशानम्	श्मशानं डामरं ज्ञेयम् ।
भयङ्करः	राक्षसः	राक्षसस्तु भयङ्करः ॥
रोमजननः	पिशाचः	पिशाचो रोमजननः,
रुहा	रजस्वला	रुहा ज्ञेया रजस्वला ॥6॥
छादिका	रात्रिः	रात्रिं वै छादिकां विद्धि,
प्रकाशः	दिनम्	प्रकाशश्च दिनं भवेत् ।
चञ्चले	नयने	नयने चञ्चले ज्ञेये,
संग्राहिका	जिह्वा	जिह्वां संग्राहिकां विदुः ।
घनकरौ	करौ	करौ घनकरौ ज्ञेयौ,
सहचरौ	पादौ	पादौ सहचरौ विदुः ।
सन्तोषजननम्	लिङ्गम्	लिङ्गं सन्तोषजननं,
प्रीतिविवर्धनः	भगः	भगः प्रीतिविवर्धनः ॥8॥
विभागजननम्	शस्त्रम्	शस्त्रं विभागजननम्,
कार्यसाधिका	कर्तरी	कर्तरी कार्यसाधिका ।
संवाहिका	दूती	दूती संवाहिका ज्ञेया,
ह्लादनः	धूपः	धूपो ह्लादन उच्यते ॥9॥
सन्तोषजननः	गन्धः	गन्धः सन्तोषजननः,
राजानः	धारकाः (पिष्टादिमयाः-दीपाधाराः)	राजानो धारकाः स्मृताः ।
विबोधकः	पशुः	पशुर्विबोधको ज्ञेयः,
सार्वकामिकः	चरुकः	चरुकः सार्वकामिकः ॥10॥

छुम्मकाः	तात्पर्याणि	स्वच्छन्दागमवाक्यानि 15 पटले
साधनम्	अन्नम्	अन्नं साधनमित्युक्तम्,
वसा	मण्डम्	वसा मण्डमिहोच्यते।
दिशां मुखम्	श्रवणम्	दिशां मुखं तु श्रवणम्,
संवेदनी	त्वक्	त्वक् च संवेदनी स्मृता ॥11॥
सुस्थितम्	घ्राणम्	घ्राणं सुस्थितमित्युक्तं,
प्रविचारकम्	मुखम्	मुखं तु प्रविचारकम्।
प्रचारः	पशुः	पशुः प्रचारो विज्ञेयः,
धात्री	माता	माता धात्रीति कथ्यते ॥12॥
सृष्टिकर्ता	पिता	पितरं सृष्टिकर्तारम्,
पालकः	भ्राता	भ्रातरं पालकं विदुः।
शुभकरी	भगिनी	भगिनी शुभकरी ज्ञेया,
सर्वार्थ-साधिका	सखी	सखी सर्वार्थसाधिका ॥13॥
गुणानां जननम्	मित्रम्	मित्रं गुणानां जननम्,
गुणनाशः	रिपुः	गुणनाशं रिपुं विदुः।
छित्	स्फिजौ	छित् स्फिजौ कीर्तितौ देवि,
दृष्टिः	चक्षुः	दृष्टिश्चक्षुः प्रकीर्तितम् ॥14॥
खण्डकाः	दशनाः	दशनाः खण्डका ज्ञेयाः,
आधारः	उदरम्	आधार उदरं स्मृतम्।
गुह्यम्	हृदयम्	हृदयं गुह्यमित्युक्तम्,
कठिनम्	अस्थि	कठिनं त्वस्थि विद्धि हि ॥15॥
वसा	मेदः	मेदो वसां विजानीयात्,
पुष्टिकरः	मज्जा	मज्जा पुष्टिकरः स्मृतः।
विदूषिका	विष्ठा	विष्ठां विदूषिकां विद्धि,
स्रावः	मूत्रम्	मूत्रं स्राव इहोच्यते ॥16॥
कालेयकं	कुसुमम्	कालकेयं तु कुसुमम्,
धृतिकरः	धूमः	धूमं धृतिकरं विदुः।
सङ्घातः	मेलकः	मेलकं चैव संघातः,
उद्द्योतकः	पुत्रः	पुत्रः सोद्द्योतकः स्मृतः ॥17॥
ह्लादिका	दुहिता	दुहिता ह्लादिका ज्ञेया,
चलितः	क्षुब्धः	क्षुब्धं वै चलितं विदुः।
जारः	दूषकः	दूषको जार इत्युक्तः,
वन्दितम्	पीतम्	पीतं वन्दितमेव च ॥18॥
प्राप्तम्	भक्षितम्	भक्षितं प्राप्तमित्याहुः,
विकृतीकृतम्	छर्दितम्	छर्दितं विकृतीकृतम्।
कर्षितम्	दूषितम्	दूषितं कर्षितं ज्ञेयम्,
सम्मतम्	समयः	सम्मतं समयं विदुः ॥19॥
महल्लः	रक्षकः	महल्लो रक्षको ज्ञेयः,
कनिष्ठकः अथवा	छगलः	छगलस्तु कनिष्ठकः।
छगलः	कनिष्ठकः	

छुम्मकाः	तात्पर्याणि	स्वच्छन्दागमवाक्यानि 15पटेल
विनयः	देहकर्म	विनयो देहकर्म स्यात्,
साधनम्	जपः	साधनं तु जपः स्मृतः ॥20॥
सिद्धिजननम्	होमितं हविः (हुतमिति)	होमितं सिद्धिजननम्,
रोचकः	विभागः	विभागो रोचकः स्मृतः।
कदम्बम्	वृन्दः	कदम्बं वृन्दमित्याहुः,
अश्लिष्टः	विरलः	विरलोऽश्लिष्ट उच्यते ॥21॥
विमलः	शिष्यः	विमलः शिष्य इत्युक्तः,
इच्छा	आज्ञा (गुरूणाम्)	इच्छा चाज्ञा प्रकीर्तिता।
देवता	दर्शनम्	देवतादर्शनं यत्तत्,
लब्धः	शास्त्रहृतः	लब्धं शास्त्रहृतं विदुः ॥22॥
बिडालः	निशाचरः	निशाचरो बिडालः स्यात्,
विदारकाः	नखिनः	नखिनश्च विदारकाः।
सारितम्	आनीतम्	आनीतं सारितं ज्ञेयम्,
पिहितम्	रक्षितम्	रक्षितं पिहितं तथा ॥23॥ (स्व० तं० 15, 2 तः 23)

~योगिनी सङ्केताः (कौलिके विधौ)——गुरुकृपया संवृत्ते योगिनो-मेलापके योगिन्यः साधकं प्रति स्वाङ्गविशेषाणां दर्शनादिना सङ्केतभूतेन प्रदत्ताः सिद्धीः प्रकटयन्ति। ते च सङ्केताः छुम्मकप्रकारविशेषा इति गण्यन्ते। तत्र भिन्न-भिन्नाङ्गानां स्पर्शेन दर्शनेन वा भिन्नभिन्नाः सिद्धीः प्रकटिता भवन्ति। यथा—

स्पृष्टमङ्गम्	साक्षात्कार्यंतत्त्वम्	स्वच्छन्दागमवाक्यानि 15 पटले
शिखा	शक्तितत्त्वम्	शिखां संस्पृशते या तु सा तु शक्तिं विनिर्दिशेत्। (स्व०तं० 15-24)
शिरः	सादाशिवं तत्त्वम् बिन्दुनायकम्	शिरः प्रदर्शयेद्या तु सा च बिन्दुं निवेदयेत्। (तदेव 15-24)

बिन्दु पदमत्र सदाशिवार्थे प्रयुक्तं वेदितव्यम्।

"बिन्दुमिति—अशेषवाच्यवाचकाविभागप्रकाशं सादाशिवं धाम।"

(स्व०तं०उ०खं० 6, पृ० 141)

क्षेमराजीय-व्याख्यानुसारं व्याख्यैषा। परमन्यत्र बिन्दुरीश्वरो नादश्च सदाशिवः इति प्रसिद्धम्। अस्मन्मत्याऽत्र पाठो बिन्दुरिति। स चेच्छाशक्त्यावेशयुक्तः शिवः इति। सदाशिवोऽपि हि सततमेव शिवत्वावेशयुक्त एव तेनशिरो दर्शनेन सदाशिवोचिताः सिद्धीर्योगिनी प्रददातीति तात्पर्यम्।

स्पृष्टमङ्गम्	साक्षात्कार्यंतत्त्वम्	स्वच्छन्दागमवाक्यानि
ललाटम्	ईश्वर-तत्त्वम्	ललाटं दर्शयेद्या तु ईश्वरं सा विनिर्दिशेत्। (तदेव 15-25)
तालुकम्	रुद्रः	तालुकं दर्शयेद्या तु तया रुद्रः प्रकीर्तितः॥ (तदेव 15-25)

स्पृष्टमङ्गम्	साक्षात्कार्यंतत्त्वम्	स्वच्छन्दागमवाक्यानि
जिह्वा	(1) शुद्धविद्या	जिह्वां प्रदर्शयेद या तु विद्या साथ विनिर्दिशेत ॥ (तदेव 26)
	(2) मन्त्र सिद्धिः	सप्तकोट्यस्तु मंत्राणां तस्या ज्ञेयाग्तु सुव्रते ॥ (तदेव)
घण्टिका	अनन्तनाथः	घण्टिकां दशयेद् या तु तयाऽनन्तः प्रदर्शितः । (तदेव 27)
कण्ठः	कालतत्त्वम्	कण्ठं तु संस्पृशेद् या सा कालतत्त्वं विनिर्दिशेत् ॥ (तदेव 27)
हृत्पद्मम्	पुरुषतत्त्वम्	हृत्पद्मं दर्शयेद् या तु पुरुषं सा विनिर्दिशेत् । (तदेव 28)
नाभिः	प्रकृतितत्त्वम्	नाभिं प्रदर्शयेद् या तु प्रकृतिं सा विनिर्दिशेत् ॥ (तदेव 28)
नाभ्यधः	बुद्धितत्त्वम्	तस्याधस्ताद् बुद्धितत्त्वं यदि स्याद् दर्शनं प्रिये ॥ (तदेव 29)
गुह्यम्	आहङ्कारिकस्तत्त्ववर्गः	यदा गुह्यं स्पृशेद् देवि अहङ्कारोऽधिदैवतम् ॥ (तदेव 29) अत्रैव चान्तर्भूतस्येन्द्रियतन्मात्रषोडशकस्य दर्शनम् । (स्व०तं०उ०प० 15, पृ० 142)
कटिः	आकाशतत्त्वम्	कटिं सन्दर्शयेद्या तु व्योम तत्राधिदैवतम् ॥ (तदेव 30)
ऊरू	वायुतत्त्वम्	ऊरुकौ दर्शयेद् देवि पवनं सा विनिर्दिशेत् ॥ (तदेव 30)
जानुनी	तेजस्तत्त्वम्	जानुनी दर्शयेद् या तु तया तेजः प्रकीर्तितम् । (तदेव 31)
जङ्घे	जलतत्त्वम्	जङ्घे प्रदर्शयेद् या तु वरुणं सा विनिर्दिशेत् ॥ (तदेव 31)
शरीरम्	सर्वदेवमयं विश्वम्	शरीरं दर्शयेद् देवि सर्वदेवमयं प्रिये ॥ (तदेव 32)

छुम्मकानि~कौले——छुम्मका एव । यथा—

छुम्मकानि आगमिकपारिभाषिकनामानि, तद् यथा—"शस्त्रं विभागजननं, मांसं बलविवर्धनं, कालकेयं कुसुमं, वसा मण्डं, शिरो विचारः, शस्त्रहतो लब्धः ।"

इति । (ने०तं०उ० खं० 2, पृ० 233)

छुम्माः~कौले——रहस्यात्मकान्यभिधानानि, उपदेशादीनि च । रहस्यसंकेताधीनाः परिभाषाश्च कौले । यथा—

द्विदशान्तोर्ध्वगकुण्डलि—
बैन्दवहृन्नाभिकन्दमिति छुम्माः ॥

(उद्ध०तं०आ०वि० खं० 3, पृ० 228)

द्र० छुम्मकाः इति

छुम्माद्याः~कौले——(1) षण्णां मच्छन्दपुत्राणां विषये केचन घरपल्लिप्रभृतिभी रहस्यात्मकसंज्ञाभिरभिधेयाः विषयाः । यथा—

"तेषां मुद्राश्च छुम्माश्च पल्ली ओवल्लयस्तथा ।
पीठक्रमो घराश्चैव पित्रा विभजता तथा ॥

इत्युपक्रम्य

बोधिश्चामरपादानां प्रभुश्च वरदेवके
चित्रः पादश्च संप्रोक्तो ह्यलिरानन्दसंज्ञितः ॥
विन्ध्यपादश्च योगी तु गुडिकावलिरेव च । इति"

(उद्ध०तं०आ०वि० खं० 11/2, पृ० 28)

कुलक्रीडावताराख्याद् ग्रन्थादुद्धृताः इमाः पंक्तयः । आसु राजपुत्राणामोवल्ल्य उक्ताः । ताश्च बोधिः, प्रभुः इत्याद्याः ।

(2) कौलयागे पूजायां न्यासविधिरयं स्याद्वा न वा, अन्यद्वा स्यात् किमपि । यथा—

"दक्षहस्तस्य चङ्गुष्ठादारभ्य च कनिष्ठिकाम् ।
वामस्य यावंन्मुद्रा वै ·षट्सु विस्तरतः शृणु ॥
अङ्गुष्ठो ज्येष्ठपुत्रस्य द्वितीयस्य तु तर्जनी ।
मध्यमा वै तृतीयस्य चतुर्थस्याप्यनामिका ॥
पञ्चमस्य कनिष्ठा वै षष्ठस्य च कनिष्ठिका ।
छुम्मकाः संप्रवक्ष्यामि कुलाम्नाये यथा स्थिताः ।
अतीतं प्रथमस्यापि द्वितीयस्य तु कुण्डली ॥
भ्रूमध्ये वै तृतीयस्य सङ्घट्टश्च चतुर्थके ।
नाभिस्तु पञ्चमस्यैव जन्माधारश्चषष्ठके ॥" इति

(तदेव-11/2, पृ० 28-29)

(3) घरषट्कं पल्लिषट्कं च मत्स्येन्द्र-पुत्राणाम्—

"षण्णां वै राजपुत्राणां घरपल्लिक्रमं शृणु ।
अमरस्यं तु पट्टिलः दक्षिणावर्तपल्लिका ॥
वरदेवे करबिल्लं पल्ली कुम्भारिका भवेत् ।
अम्बिल्लं चैव चित्रस्य बिल्लं पल्ली सुमध्यमे ॥
अलिनाथे पुलिन्देति अडबी पल्लिरुच्यते ।
शरबिल्लं विन्ध्यनाथे पल्ली चाक्षरसंज्ञिता ॥
गुडिकानाथपादानामडबिल्लं घरं प्रिये ।
डोम्बी पल्ली च निर्दिष्टा·············॥" इति

(तं०आ०वि० खं० 11/2, पृ० 29)

(4) अत्रैषा तालिका—

	राजपुत्रः	घरं	वल्ली
1.	अमरः	पट्टिल्लः	दक्षिणावर्ता
2.	वरदेवः	करबिल्लम्	कुम्भारिका
3.	चित्रः	अम्बिल्लम्	सुमध्यमा
4.	अलिनाथः	पुलिन्दम्	अडवी
5.	विन्ध्यनाथः	शरबिल्लम्	अक्षरा
6.	गुडिकानाथः	अडबिल्लम्	डोम्बी

कौलसाधका एष्वायतनेषु दीक्षामवाप्य कौलिकसाधनाभ्यासं प्रायः कुर्वन्ति ।

(5) सिद्धिक्षेत्राणि तेषाम्—

"त्रिपुरोत्तरे[1] निकेतं सिद्धिस्थानं च तद्विदुः ।
अमरस्य वराशेहे वरदेवस्य कामरू[2] ॥
चित्रस्य अट्टहासं[3] वै देवीकोट्टमलेस्तथा[4] ।
दक्षिणं[5] चैव विन्ध्यस्य गुडिका कौलगियंतः[6] ॥ इति ॥

उद्धरणानि श्रीकुल क्रीडावतारतः

(उद्ध०तं०आ०वि० खं० 11/2, पृ० 29)

एतानि मच्छन्दपुत्राणां पुण्यक्षेत्राणि यत्र साधकाः सिद्धीर्लभन्ते । यथा—

इति संकेताभिज्ञो भ्रमते पीठेषु यदि स सिद्धीप्सुः ।
अचिराल्लभते तत्तत् प्राप्यं यद्योगिनीवदनात् ॥

(तं आ० 29, 40)

द्र० 'छुम्मकाः' इति ।

छेत्ता——ककारस्य रहस्यात्मकमभिधानम् । यथा—
"छेत्ता क ।"

(तं०आ०वि० खं० 12, पृ० 203)

छेदकम्——ककारस्य रहस्यात्मकमभिधानम् ।
"छेदकं क ।"

(तं०आ०वि० खं० 12, पृ० 203)

छेदिनी~मन्त्रः——येन शिष्यस्य पाशच्छेदो भवति सद्यः । अस्यापि क्षुरिकेति नामान्तरम् । स च मन्त्रः पञ्चपिण्डात्मा ।

"रंः रंः ह् क्ष् जः क्षः क्ष्रः" इति
उक्तो रहस्यार्थैः पदैर्यथा—

"द्विदंण्डाग्नी शूलनभः प्राणाश्छेत्त्रनलौ तथा ।
कूटाग्नी सविसर्गाश्च पञ्चाप्येतेऽथ पञ्चसु ॥
व्योमस्विति शिवेनोक्तं तन्त्रसद्भावशासने ।
छेदिनी क्षुरिकेयं स्याद् यया योजयते परे ॥"

(तं० आ० 30, 58-59)

~विद्या——छेदिनीतिनामा मन्त्र एव ।

ज

ज~मातृकाक्रमे——रूपतन्मात्रस्य वास्तविकं यत्तत्त्वं तस्य प्रकाशको मातृकावर्णः । साधकस्य स्वकीयं शक्तिविशेषमेव स्वकीय एव चित्प्रकाशे बहिर्मुखतया प्रतिफलितं सन्तं रूपतन्मात्राकारेणाभासमानं साक्षात्कारयन्, तेन च तथाविधेन प्रतिबिम्बेन खचितं साधकस्यात्मानमभिव्यञ्जयन् मातृकावर्णः ।

जकारः——
द्र० 'पददीक्षा, (3); षट्त्रिंशत्तत्त्वदीक्षा, (27)' इति ।

जगत्——माया-प्रभावतः स्वात्मनः सकाशाद् भिन्नतयावभासमानं तत्त्वभुवनभावमयमेतद्विश्वम् । यथा—

"दर्पणबिम्बे यद्वत् नगरग्रामादि चित्रमविभागि ।
भाति विभागेनैव च परस्परं दर्पणादपि च ।।
विमलतमपरमभैरवबोधात् तद्वद् विभागशून्यमपि ।
अन्योन्यं च ततोऽपि च विभक्तमाभाति जगदेतत् ।।"

(प०सा०, 12-13)

~तत्सृष्टिः——स्वात्मनि चिद्रूपतया विद्यमानस्य विश्वस्य सुखदुःखमोहबहुलरूपतया प्रतिबिम्बन्यायेनावभासनं लीलाविलासाभिनयेनेति । यथा—

"इत्थं विश्वमिदं नाथे भैरवीयचिदम्बरे ।
प्रतिबिम्बमलं स्वच्छे न खल्वन्यप्रसादतः ।।"

(तं० आ० 3, 65)

न तु परमेश्वराद् भिन्नाया अविद्यायाः प्रभावान्मिथ्या जगदाभासः । तथात्वे हि द्वैतवादापत्तिः, सिद्धजनानुभूतिविरोधश्चेति ।

~(अदोषवहा)——दुःखबहुलस्यास्य जगतः परमेश्वरकृतत्वं न दोषावहम् । तस्य स्वतन्त्रत्वात् क्रीडाविशीलत्वादस्य च जगतो वस्तुतः तत्स्वरूपरसप्रसाररूपत्वाल्लीलाविलाससमयत्वाच्च । यथा—

(क) कुत्सितेऽकुत्सितस्य स्यात् कथमुन्मुखतेति चेत् ।।
रूपप्रसाररसतो गर्हितत्वमयुक्तिमत् ।

(शि०दृ०, 1-11-12)

(ख) सर्वदा स्वरूपप्रसरणमेवेति कथं गर्हितत्वम् ।

(शि०दृ०वृ०, पृ० 14)

~तदुपादानकारणम्——अशुद्धं मायातत्त्वमेव जगदुपादानकारणम् । तच्च शिवेच्छामयमेव, न ततो भिन्नम् । यथा—

"स्वसिद्धान्तेऽपि च माया प्रधानकर्मादेः पृथग्भूतस्य जगत्कारणत्वेनोक्तेः ।"

(शि०दृ०वृ०, पृ० 108)

~तन्निमित्तकारणम्——कर्माद्यपि जगतो निमित्तकारणम् । तच्च सर्वं परमेश्वरेच्छामयमिति न द्वैतवादशङ्का ।

द्र० उपरि (शि०दृ०वृ० पृ० 108)

~तन्मूलकारणम्——मूलभूतं जगदुत्पत्त्यादिनिमित्तं नाविद्यादि, अपितु परमेश्वरस्य स्वाभाविकं स्वातन्त्र्यमेव । यथा—

"अनन्यापेक्षिणः स्वातन्त्र्यस्यैव जगद्वैचित्र्यनिमित्तत्वमुक्तम्; अविद्यावासनादीनां भेदाभेदविकल्पोपहतत्वाद् जगद्वैचित्र्यनिमित्तत्वाभिधानानुपपत्तेः ।"

(तं०आ०वि० खं० 1, पृ० 6)

~प्रकाशात्मकम्——जडतया बाह्यतया चाभासमानमपि वस्तुतः संवित्प्रकाशात्मकमेव, तत एव हि प्रकाशमानम् । अन्यथा नैव प्रकाशेत कथमपि । यथा—

"वेद्यराशिर्हि समस्त एवं प्रकाशादभिन्नः । यत् प्रकाशते तत् प्रकाशाभिन्नं, संवित्प्रकाश इव । नहि प्रकाशभिन्नस्य अप्रकाशमानस्य प्रकाशमानता युक्ता, विरोधात् ।……………………।"

(ई०प्र०वि०वि० खं० 1, पृ० 5)

~भ्रान्तिरूपम्——जगदाभासो हि मायोद्भावितया भ्रान्त्यैव सम्भवति । चिद्रूपः स्वात्मपरमेश्वर एव विषयभूतबाह्यजगदाकारेणाभासते मायाया वशात् । सैषा भ्रान्तिरेव । यथा—

"ननु सत्यरूप्यज्ञानमपि अपूर्णख्यातिः । ततस्तर्हि किम् ? इदम्—अतः सर्वं भ्रान्तिरित्यागच्छेत् । दिष्ट्या दृष्टिरुन्मिमीलिषत्यायुष्मतः; मायापदं हि सर्वं भ्रान्तिः ।"

(ई०प्र०वि० खं० 2, पृ० 114)

जगतो जगद्रूपत्वावभासो भ्रान्तिः, शिवरूपतादर्शनं सत्यं ज्ञानम् । इत्येतावन्मात्रमत्राभिप्रायभूतम् ।

~मूलकारणतः——शिवस्य शक्तिरेव जगतो मूलभूत उत्सः । यथा—

"हृदयं बीजमेतस्यां सारं यत्तत्परं महः ।
वटबीजे यथा वृक्षस्तथात्र निहितं जगत् ।।
विचार्यमाणे नैवेदं कारणादतिरिच्यते ।
मृदादेः कलशादीनां तत्त्वं नान्यन्निरूपणे ।।
इत्याहुस्तत्त्ववादिन्यः श्रुतीनामन्तिमा गिरः ।
इदं सर्वं सदेवासीदग्रे इति विनिश्चयात् ।।"

(अ०प्र० पं० 41-43)

भ्रान्तिरूपस्य जगदाभासस्य मूलकारणं शिवस्य शक्तेर्बहिर्मुखो विलास एव, न पुनस्ततोऽन्या माया वाऽविद्या वोपाधिभूतेति ।

पराभट्टारिकारूपे हृदयबीजेऽन्तर्भूतमेतज्जगत् । कथं ? यथा घटशरावादीनां मृद्विकाराणां पारमार्थिकं रूपं मृदेव, यथा वा जलादिद्रवजातीनां विचार्यमाणं व्यवस्थितं रूपं जलादिसामान्यमेव भवति ।

(प०प्रा०, पृ० 11)

~वस्तुतः——चैतन्यस्वरूप आत्मैव जगद्रूपतयावभासते, चैतन्यमहिम्नैव जगतोऽवभासस्य सम्भवत्वात् । यथा—

"यदेतच्चैतन्यमुक्तं स एवात्मा स्वभावो भावाभावरूपस्य जगतः ।"

(शि०सू०वृ० पृ० 1)

~विमर्शात्मकम्——प्रकाशमानत्वेन सिद्धा जगद्भावाः प्रकाशात्मकाः । प्रकाशश्च स्वयं विमर्शात्मकः । ततो जगद्भावा अपि विमर्शात्मकाः । रुद्रक्षेत्रज्ञादिप्रमातृवर्गाः, बाह्यान्तरप्रमेयवर्गाश्च सर्वेऽपि भावाः विमर्शात्मकाः । यथा—

"तदमी प्रकाश एव तावद्विश्रान्ता भावाः । प्रकाशश्च विमर्शशून्यो न भवति । ततश्च विमर्श एव भगवत इच्छा नित्यैव, रुद्रक्षेत्रज्ञप्रमातृवर्गसुखदुःखनीलपीतादिप्रमेयसंचयं चावभासयतीति, तथावभासमानमपि च संविन्मये प्रकाश एव विश्राम्यति, अन्यथा तथात्वस्यैवासत्कल्पत्वात् ।"

(ई०प्र०वि०वि० खं० 1, पृ० 5-6)

~शिवात्मकम्——(1) तत्त्वभुवनादिरूपतयाऽवभासमानमपि वस्तुतः परमशिवात्मकमेव । यथा—

"स्वरूपावस्थितमशेषं वेद्यवेदकप्रपञ्चं ततः स्वरूपाद् बहिर्भावेन निजयेच्छया बहिर्भावयन्नसौ बहिर्भूतानपि स्वात्मन्येवावभासयति । तथावभास्यमानानामपि तेषां स एवात्मा ।"

(ई॰प्र॰वि॰वि॰ खं॰ 1, पृ॰ 4)

(2) जगदाकारतया भासमानं सर्वमपि वस्तुतः शिवात्मकमेवाजडं सत्यं तत्त्वम् । यथा —

"…………एतदेव अस्य जगतः कर्तृत्वमजडत्वं च, जगतः कार्यत्वमपि एतदधीनप्रकाशत्वमेव । एवंभूतं जगत् प्रकाशरूपात् कर्तुर्महेश्वरादभिन्नमेव, भिन्नवेद्यत्वेऽप्रकाशमानत्वेन प्रकाशनायोगात् न किंचित्स्यात् । अनेन च जगता अस्य भगवतः प्रकाशात्मकं रूपं न कदाचित् तिरोधीयते, एतत्प्रकाशनेन प्रतिष्ठां लब्ध्वा प्रकाशमानमिदं जगद् आत्मनः प्राणभूतं कथं निरोद्धुं शक्नुयात्, कथं च तन्निरुध्य स्वयमवतिष्ठेत ।"

(प॰प्रा॰, पृ॰ 3-4)

~सत्यम् (वस्तुतः)——(1) आभासवादानुसारं जगत् सर्वं चिदाभासमयं चित्त्वात् सत्यमेव । यथा—

न चाभासजीवितभाववादे व्यवहारस्योवस्तुत्वमाभासमानत्वादेवेति दर्शयति ।

(ई॰प्र॰वि॰वि॰ खं॰ 2, पृ॰ 342)

(2) चिद्रूपस्यात्मनः परमार्थसत्यता, द्विचन्द्रादेरसत्यता, जगतश्च संवृतिसत्यता । तत्र संवृतिसत्यतापि सत्यताया एव प्रकारविशेषो, नासावसत्यता । यथा—

"एवमियता संवृतौ विकल्पबुद्धौ स्फुरतः सामान्यादेः संवृतिसत्त्वं नाम सत्त्वविशेष एवावतिष्ठते, न द्विचन्द्रादिवदसत्यतेति उपपादितम् ।"

(ई॰प्र॰वि॰वि॰ खं॰ 3, पृ॰ 51)

तर्कान्तरमत्र वक्ष्यते न मतभेदः ।

~(व्यवहारे)——प्रकाशरूपस्य शिवस्य परमार्थसत्यरूपत्वेन जगत्प्रकाशोऽपि न वन्ध्यासुतकल्पः । प्रकाश एव हि जगद्रूपतयाऽऽभासते । न च प्रकाशोऽसत्यः । ततो जगत् प्रकाशोऽपि प्रकाशांशतायां परमार्थसत्य एवेति, जगदंशतायां च न शशविषाणकल्पः इति । यथा —

"इह यद्यत्किंचित् स्फुरति तत्तद्वक्ष्यमाणेश्वररूपस्वात्मप्रथामात्रम् । तत्र तु उपायोपेयभावप्रभृतिः कार्यकारणभावोऽपि यथाप्रकाशं परमार्थभूत एव प्रकाशस्यानपह्नवनीयत्वात् ।"

(ई॰प्र॰वि॰ खं॰ 1, पृ॰ 9-10)

"व्यवहारतयैवास्ति सत्यत्वं न निबन्धनात् ।"

(शि॰दृ॰ 4-13)

"सत्यम्, किन्तु व्यवहारतयैवाप्यस्य व्यवहारस्य सत्यत्वम्, न तु निबन्धनाद् निबन्धनत्वात्प्ररूढत्वादित्यर्थः ।"

(शि॰दृ॰वृ॰ पृ॰ 150)

"एवंच संवृतिर्विकल्पबुद्धिस्तद्वशादुच्यतां संवृतिसत्यत्वं सत्यत्वस्यैव तु प्रकारस्तत् ।"

(ई॰प्र॰वि खं॰ 2, पृ॰ 42)

जगदानन्दः——विश्वत्र विजृम्भमाणोऽनवच्छिन्नोऽपरिमितश्चात्मनः स्वभावभूत आनन्दः । यथा—

"विश्वेन रूपेणानन्दो यत्र यतश्चेति जगदानन्दशब्दवाच्यम् आनन्दं शम्भुनाथ आदिशत् ।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 356)

~उच्चारयोगे——(1) षडानन्दभूमिका उत्तीर्य सर्वथाऽनवच्छिन्नस्य सर्वथाऽप्यपरिमितस्यानन्दस्यानुपाया याऽभिव्यक्तिरसौ जगदानन्दस्थितिरिति । यथा —

"यत्र कोऽपि व्यवच्छेदो नास्ति यद्विश्वतः स्फुरत् ॥
यदनाहतसंवित्तिपरमामृतबृंहितम् ।
यत्रास्ति भावनादीनां न मुख्या कापि संगतिः ॥
तदेव जगदानन्दमस्मभ्यं शम्भुरूचिवान् ।"

(तं॰आ॰ 5, 50तः 52)

(2) अनाहतेत्यक्षताऽनवच्छिन्नाऽपरिमितेति भावः । शम्भुनाथोक्तत्वेनास्य प्रतिपादनस्य सर्वथा प्रमाणत्वम् ।

"सङ्गतिः साक्षादुपायता नास्तीत्यर्थः ।"

(तं॰आ॰वि॰ खं॰ 3, पृ॰ 355)

(3) षडानन्दभूमिकानामेकसंघट्टात्मकः सर्वथाप्यनवच्छिन्नः स्वात्मानन्दः सततमुदयास्तमयविहीनः षण्णामानन्दभूमिकानामुदयास्तमयभूमिः । यथा—

"षडानन्दभूमय उपदिष्टाः, यासामेकः अनुसन्धाता उदयास्तमयविहीनोऽन्तर्विश्रान्तिपरमार्थरूपो जगदानन्दः ।"

(तं॰सा॰ पृ॰ 39)

सुतरां स्पष्टीकरणप्रयोजनकमिदं व्याख्यानं न विरोधावहम् ।

~मूलतः——(1) शिवशक्त्योः परस्परसाम्मुख्येन यः संघट्टात्मको विमर्शः स एव पारमैश्वर्यचमत्कारात्मकोऽसौ जगदानन्दो यस्यावेशेन परमेश्वरः पञ्चकृत्यलीलायां सदैव प्रसरन्नेवास्ते । यथा—

"शिवशक्त्योस्तु संघट्टादन्योन्योच्छलितत्वतः ॥
परस्परसमापत्तिर्जगदानन्ददायिनी ।"

(प॰त्री॰वि॰ पृ॰ 213-14)

(2) परमेश्वरस्य स्वात्मावधाने स्वीयपारमैश्वर्यविमर्शः । स एव तस्य शक्तिसाम्मुख्यमिति, परमशिवः पराशक्ति-संघट्टात्मो वेति च निर्दिश्यते शास्त्रे । तथाविधः परामर्श एव सृष्ट्यादिपञ्चकृत्येषु प्रवर्तकस्तस्य । ततोऽसावेव वस्तुतो निखिलजगद्व्यवहारमूलकारणत्वेन जगदानन्द इत्यभिहितः शास्त्रे । अस्य जगदानन्दस्य साक्षादनुभूतिरेवोत्कृष्टतरं प्रयोजनं त्रिकादि-योगशास्त्राणाम् । यथा—

"तत्रापि शक्त्या सततं स्वात्ममय्या महेश्वरः ॥
यदा संघट्टमासाद्य समापत्ति परां व्रजेत् ।
तदास्य परमं वक्त्रं विसर्गप्रसरास्पदम् ॥
अनुत्तरविकासोद्यज्जगदानन्दसुन्दरम् ।
भाविवक्त्राविभागेन बीजं सर्वस्य यत्स्थितम् ॥"

(मा०वि०वा० 1, 17तः 19)

~लक्षणतः——

"न च यत्र स्थितिः कापि विभक्ता जडरूपिणी ।
यत्र कोऽपि व्यवच्छेदो नास्ति यद्विश्वतः स्फुरत् ॥
यदनाहतसंवित्तिपरमामृतबृंहितम् ।
तदेव जगदानन्दधामास्माकं गुरूर्जगौ ॥
यत्रास्ति भावनादीनां न मुख्या कापि सङ्गतिः ।
तत्र विश्रान्तिराधेया हृदयोच्चारयोगतः ॥
या तत्र सम्यग् विश्रान्तिस्तत् पराद्वैतमुच्यते ।"

(मा०वि०वा० 2, 39-42)

~**स्थितिः (तन्मयी)**——सा ह्यनुत्तरपरमशिवमयी स्थितिर्योगिनः । जगदानन्दस्थितेः प्राप्तप्रकर्षो योगी तावदनुत्तरपरमशिवत्वे स्थितो भवतीति । यथा—

"या तत्र सम्यग् विश्रान्तिः सानुत्तरमयी स्थितिः ।"

(तं०आ० 5, 53)

जटाभस्मादिविधिः——शैवसिद्धान्ते पाशुपतादौ च जटाभस्मादिविधिः, कुलादिप्रक्रियासु तन्निषेधः । परं सर्वशिवत्वदृष्टिपरे त्रिके नैव विधिर्नापि निषेधः । उभयत्र स्वातन्त्र्यम् । योगस्य ज्ञानस्य भक्तेश्च प्राधान्यं तत्र । यथा—

"सिद्धान्ते लिङ्गपूजोक्ता विश्वाध्वमयताविदे ।
कुलादिषु निषिद्धासौ देहे विश्वात्मताविदे ॥
इह सर्वात्मके कस्मात् तद्विधिप्रतिषेधने ।"

(तं०आ० 4, 256-57)

लिङ्गपूजाङ्गान्येव हि जटाभस्मादिधारणविधिशेषभूतानि ।

जडः——यस्य परिच्छिन्न-प्रकाशता स जडः, यथा नील सुखाद्याः, शरीरेन्द्रियान्तःकरणाद्या वा । सर्व एवैते परिच्छिन्नप्रकाशाः । ततो जडाः । अजडः प्रकाशो न परिच्छिद्यते वस्तुतः । यथा—

"परिच्छिन्नप्रकाशत्वं जडस्य किल लक्षणम् ।
जडाद्विलक्षणो बोधो यतो न परिमीयते ॥"

(बो०पं०द० 8)

(तं०आ० 3, 101-102)

जडत्वम्——परेण प्रकाश्यत्वम् । तच्च चित्स्वातन्त्र्येणैव कल्पितं मायात्मकत्वमिति । यथा—

"चिच्छक्तेरेव मायात्मिकाया अभिमानमात्रेण गृहीतजडभावस्येत्यर्थः ।·····························। जडस्य हि लक्षणमुक्तम्—नास्यात्मीयः प्रकाशः इति ।

(ई०प्र०वि०वि० खं० 1, पृ० 274)

जडविवर्तवादः——अविद्यात्मकं जडं तत्त्वमुपकल्प्य तदाश्रित्य प्रवर्तितो विवर्तवादो वेदान्तिनां बौद्धानां वैयाकरणानां च । शैवानां पुनश्चेतनेन परमेश्वरेण स्वविलासलीलयाऽऽभासितो विवर्त्त इत्यसौ न जडविवर्तवादः । यथा—

"अस्मद्दर्शनानभ्युपगमे ब्रह्मविवर्त्तवादो जडविवर्तवाद एव । तत्र चाविद्यापि विवर्त्ततत्त्वोपपादिका न समर्थयितुं शक्येति वितानितं श्रीशिवदृष्टौ ।"

(ई०प्र०वि०वि० खं० 3, पृ० 237)

शैव्यां दृष्टौ यदपि तत्त्वभुवनभावादि व्यवहारे जडमित्युच्यते, तदपि वस्तुतः चिद्रूपस्यात्मनोऽन्तः सदैव चिदात्मकतया संवृतमिव तिष्ठति; तदेवात्मनः स्वतन्त्रायाः लीलाया विलासेन प्रमेयतामुभावाभासमानतां नीयमानं सद्विभ्रियत इव बहिः । स एव हि विवर्त्तवादः प्रामाणिको, यतः स्वातन्त्र्यनिष्ठो नाविद्यादिपरतन्त्रः ।

जडाजडत्वव्यवस्था——संविदेव केवलमजडा । सा च शुद्धा परिपूर्णाहंविमर्शमयी शिवरूपिणी । इदमिति विमर्शेन विमृश्यमानं नीलसुखादि-प्रमेयजातं जडम् । मध्ये तिष्ठन्त इन्द्रोपेन्द्ररुद्राद्या अंशतो जडाः अंशतश्चाजडा देवाः । सर्वे च शुद्धाः प्रमातृवर्गाः अपि जडाजडरूपाः । तेषु संविदात्मकत्वमजडत्वं, मनाक् परिमितत्वञ्च जडत्वम् । चिद्रूपता तेषामंशतोऽनावृतांशतश्चावृता । यथा—

"सोऽयमात्मानमावृत्य स्थितो जडपदं गतः ।
आवृतानावृतात्मा तु देवादिस्थावरान्तगः ।
जडाजडस्याप्येतस्य द्वैरूप्यस्यास्ति चित्रता ॥"

(तं०आ० 1, 134-135)

~**तद्व्यवस्थापकः**——स च सततं क्रीडनशीलः परमेश्वर एव । यथा—

"अयं भगवान् मायाशक्त्या स्वात्मकल्पेऽपि भाववर्गे कांश्चित् पुर्यष्टकस्वरूपान् वेद्यखण्डानपि अहन्ताव्यवस्था-रसाभिषिक्तान् वेदकीकरोति, कांश्चिद् वेद्यीकरोति, यदपेक्षया अयं जडाजडव्यवस्थास्वरूपो भेदव्यवहारः सुस्थित एव उपपद्यते । तेन लोष्टादिः वेद्यत्वात् जडः, वेदकत्वात् पुर्यष्टकप्रमाताऽपि अजडः । न पुनः परमार्थेन परमेश्वरापेक्षया जडाजडव्यवहारः ।"

(प०सा०वि०, पृ० 25-26)

जडात्मानः——बहवः शास्त्रचिन्तका अपि जडानेव पदार्थान् आत्मत्वेन मन्यन्ते । ततस्ते जडात्मानः । ते च - (1) मोक्षदशायामात्मानं ज्ञानवृत्तिशून्यं मन्वानाः नैयायिकवैशेषिकाः, (2) कर्तृत्वज्ञातृत्वे बुद्धिधर्मत्वेन प्रतिपादयन्तः सांख्याः, (3) क्षणिकं विज्ञानमात्रं, शून्यं वा चित्तत्त्वमहन्तयावभासमानं

मन्यमाना बौद्धा:, (4) शून्यतुल्ययोगक्षेममैश्वर्यलेशतोऽपि रहितं शुद्धं चित्स्वरूपमात्मानं मन्वाना अद्वैतवेदान्तिन: इति । यथा —

"यस्य तु वैशेषिकादेर्जड आत्मा स सिद्धिं करोत्वीश्वरविषयाम्, अन्यस्तु सांख्यादिर्निषेधं; सांख्योऽपि विषयाभासनरूपं ज्ञानं बुद्धिधर्ममिच्छन् आत्मानं वस्तुतो जडमेवोपैति ।"

(ई०प्र०वि० खं० 1, पृ० 34)

(2) अद्वैतवेदान्तादिवादा: ये ये आत्मानं पारमैश्वर्यशक्तिहीनं परिनिष्ठितचिन्मात्ररूपमङ्गीकुर्वन्ति ते सर्वेऽपि जडात्मवादा: । यथा—

"आत्मापि.............. यदि परिनिष्ठित-संविन्मात्ररूपेण भाति, तदा संविदां भेदनं, भेदितानां चान्तरनुसन्धानेनाभेदनं न स्यात् ।"

(ई०प्र०वि० खं० 1, पृ० 30)

जनलोकाधिकारिण:——कपिलादय: साध्याश्च । यथा—

"अष्टौ कोट्यो महल्लोकाज्जनोऽत्र कपिलादय: ॥
तिष्ठन्ति साध्यास्तत्रैव बहव: सुखभागिन: ।"

(तं०आ० 8, 151-52)

जन्मदिनम्~मुख्यम्——आत्मनो दीक्षादिसंस्कारदिनमेव मुख्यं जन्मदिनं, यत् पर्वसु गणितम् । यथा—

"दीक्षादिकश्च संस्कार: स्वात्मनो यत्र चाह्नि तत् ।
भवेज्जन्मदिनं मुख्यं ज्ञानसन्तानजन्मत: ॥"

(तं०आ० 28, 215)

जन्ममरणविचार:——लघुकायो ग्रन्थविशेषो भट्टवामदेवविरचित: । अत्र संक्षेपेण जीवभावाविर्भावस्य, गर्भवासादे:, जन्ममरणचक्रस्य शिवानुग्रहेण गुरुप्राप्तेस्तद्दीक्षया च योगाभ्यासपूर्वकं पुन: शिवभावासादनस्य निरूपणं कृतं वर्तते । विशेषत आयुर्वेदशास्त्रसिद्धान्तबहुलोऽयं ग्रन्थ: ।

जन्मान्तरबीजम्——यमेव भावं प्राणी जीवने दृढतया भावयते, यथाविधाश्च तस्य संस्कारा: प्ररूढा भवन्ति, जीवनान्तकाले तदनुकूलमेव जन्मान्तरमसौ लभते । यथा—

"तेन स्थितमिदं यद्यद् भाव्यते तत्तदेव हि ॥
देहान्ते बुध्यते नो चेत् स्यादन्यादृक् प्रबोधनम् ।"

(तं०आ० 28, 360-61)

जप:——कस्यचिद् वर्णस्याक्षरस्य पदस्य मन्त्रस्य वाक्यस्य वा पुन: पुनर्विमर्शनं वाचा, मनसोभयथा वा जप: ।

~निर्वचनत:——जकारपकाराभ्यामेतद् व्यज्यते यत् स्वात्मशिवत्वविमर्शजनक: सङ्कोचमयाच्च बन्धनात् पालको जपो भवति । इति जकारपकारयोरत्र तात्पर्यम् । यथा—

"जननपालनस्वभावतया हि जप इत्युच्यते । यदुक्तमस्मत्परमगुरुभि:—

"जनिपालन-धर्मेण जपेनान्तर्मुखात्मना ।" इति ।

(म०मं०प० पृ० 123)

~अध्वोपयोगे——आलम्बनीकृतस्य वस्तुनो विश्वाध्वपूर्णत्वेनानुसन्धानदार्ढ्येन पुन: पुनर्विकल्पज्ञानेन विमर्शनं यत्तदेवाध्वोपयोगे जप इति । यथा—

"संपूर्णत्वानुसंधानमकम्पं दार्ढ्यमानयन् ।
तथान्तर्जल्पयोगेन विमृशञ्जपभाजनम् ॥

(तं०आ० 12, 10)

~उत्कृष्टतम:——शुद्धशिवात्मक-स्वस्वरूपपरामर्शपरम्परैवोत्कृष्टतमो जपो य: शाक्तयोपायप्रकारविशेष: । यथा—

"तत्स्वरूपं जप: प्रोक्तो भावाभावपदच्युत: ।"

(तं०आ० 1, 90)

"तस्य शिवस्य स्वरूपं परावाक्स्वभावमात्मरूपम् । अर्थाद् भूयो भूय: परामृश्यमानं जप: ।"

(तं०आ०वि० खं० 1, पृ० 135)

~उपांशु:——द्र० 'उपांशु:~'जप:' इति ।

~कौलयागे——(1) निर्विकल्पतया स्वात्मविमर्शनम् । यथा—

"शुद्धाशुद्धविकल्पानां त्याग एकान्त उच्यते ।
तत्रस्थ: स्वयमेवैष जुहोति च जपत्यपि ॥
जप:सञ्जल्पवृत्तिश्च नादामर्शस्वरूपिणी ।"

(तं०आ० 29, 92-93)

परोऽयं कौलिको जप: ।

(2) यत्र यत्र क्वापीन्द्रियवृत्तिर्वा मनोवृत्तिर्वा पतेत् तत्र तत्रानुसन्धाय द्विवारं प्राणापानानुसारं स्वात्मानुसन्धानरूपो जपो विधेय: तदभ्यासदार्ढ्ये सति मन: स्वात्माभिमुखतामेवायाति । यथा—

"यत्र यत्र गतं चक्षुर्यत्र यत्र गतं मन: ।
हंसस्तत्र द्विरभ्यस्यो विकासाकुञ्चनात्मक: ।"

(तं०आ० 29, 89)

हंसोऽत्र प्राण: । विकास: प्राणगति:, आकुञ्चनं चापानगति: । अपरोऽयं कौलिको जप: ।

~चतुर्विध:——(1) शाक्तो जप:—चिन्मयोऽहंविमर्श: ।
(2) निष्कल:—प्रणवात्मक: ।
(3) हंस जप:—"हंस:" इति नादात्मक: ।
(4) पौद्गलो जप:—"सोहं" इति प्राणगतिरूपो मरुदात्मक: ।

एतज्जपचतुष्टयमेव क्रमेण वीर्यमिति, अवलम्बनमिति, उच्चार इति, सञ्चार इति च चतुर्विधा कथा । यथा—

कथा जप: । इति ।

(शि०सू० 3, 27)

प्राणध्वनिमनुगतोऽयं स्वयमुच्चरन्नस्ति सन्ततो जप: । यथा—

"वीर्यावलम्बनोच्चारसंचाराख्या कथा जपः।
एवं चतुर्धा विज्ञेयः शाक्तो हंसश्च पौद्गलः॥
निष्कलोऽप्यथ शाक्तोऽत्र येयं स्वाहङ्क्रिया चितेः।
निष्कलः प्रणवाङ्गस्थो हंसो नादकलात्मकः॥
जीवसंज्ञो मरुद्रूपः स्वप्रवृत्त्यायुतद्वयम्।
सहस्रं षट्शतान्येव वहत्यच्छिन्नसंततिः॥"

(शि॰सू॰वा॰ 3, पृ॰ 68)

21600 इतिवारमेष स्वयं समुच्चरत्यहोरात्रे इति।

~निष्फलः——भेददृष्टौ विद्यमानायां जपो नैव सिद्धिप्रदः कौलिके विधौ। यथा—

"अन्यः सोऽन्योऽहमित्येवं विकल्पं नाचरेद्यतः॥
यो विकल्पयते तस्य सिद्धिमुक्ती सुदूरतः।"

(तं॰आ॰ 29, 99-91)

~परयोगिनः——परो योगी यत्र यत्र स्वात्मविमर्शनं करोति, तत्र तत्र स इच्छाज्ञानक्रियात्मकं शक्तित्रयं त्रिधा स्थापयति। द्वादशशक्तिचक्रे एवं नवधा विमर्शनेनाष्टोत्तरा या शतसंख्या सैव तस्य जपस्थानीया। एवमसौ यत् किमपि भाषते तदस्य जपरूपतामारोहति। यथा—

"एवं यत्र क्वचित्तिष्ठेत् स्वविमर्शस्वभावतः।
तत्र शक्तित्रयावेशस्त्रिधा तावत् प्रकाशते॥
नवधा भासमानस्य प्रोक्तद्वादशचक्रतः।
विश्रान्तिरेकक्षणगा साष्टोत्तरशतस्थितिः॥
एकैव शतसंख्या च सा स्थितिः प्रविभाव्यते।
इत्थं यत् किञ्चनैतस्य वचनं योगिनो भवेत्॥
तदेव जपयोगाय जायतेऽनुत्तरे पथि।"

(मा॰वि॰वा॰ 2, 127 तः 130)

~प्राणचारसम्मितः——क्वचिदनेकपदेषु मन्त्रेषु अनेकवर्णेषु पदेषु वा भागशः प्राणचारसम्मिततया जपस्य गणना भूयसी भवति रहस्ययोगिनाम्। यथा—

"न केवलमनेकपदस्य मन्त्रस्य प्राणशक्तौ सकृदुच्चारयितुमशक्यत्वं यावद्बह्वर्णतया तत्पदस्यापीति तस्याप्यंशांशिकया विभागः कार्यो येन शनैः शनैरेकमेकं तदंशं प्राणसाम्येनोच्चारयतां योगिनां लक्षजपादि सिद्ध्येदिति।"

(तं॰आ॰वि॰ खं॰ 4/2, पृ॰ 39)

~भुवनाध्वयोगे——शिवयोगी भावनाबलेनैकैकं भुवनं यत् स्वात्मनि स्वात्मतया विमृशति देशाध्वधारणाक्रमेण तत् तेषां भुवनानां तथा क्रमेण विमर्शनमेव तस्य रुद्राक्षपरिवर्तनकल्पो जपः। यथा—

"भुवनावलीं समस्तां तत्त्वक्रमकल्पनामथाक्षगणम्।
अन्तर्बोधे परिवर्तयति यत्सोऽस्य जप उदितः॥"

(प॰सा॰का॰ 78)

आणवोपायाङ्गभूतोऽयं जपः।

~मानसः——द्र॰ 'मानस जपः' इति।

~वास्तवः——शाक्तोपायात्मको जपः। यथा—

"अनेन च मन्त्रवीर्यानन्तर्येणानुजोद्देशोद्दिष्टं वास्तवं जपाद्युपक्रान्तम्।"

(तं॰आ॰वि॰खं॰ 3, पृ॰ 227)

~शाक्तोपाये——(1) परस्य तत्त्वस्य यः स्वकीयो वास्तविकः स्वभावस्तस्य पुनः पुनश्चेतसा विमर्शनं जपः। यथा।

"उभयात्मकपरामर्शोदयार्थं बाह्याभ्यन्तरादि-प्रमेयरूपभिन्नभावानपेक्षयैव एवंविधं तत् परं तत्त्वं स्वस्वभावभूतमित्यन्तःपरामर्शनं जपः।"

(तं॰सा॰ पृ॰ 26)

(2) परमस्य सत्यस्य भावनायाः पुनः पुनर् विकल्पात्मकविमर्शनाभ्यास एव ज्ञानयोगे जपः। यथा—

"भूयो भूयः परे भावे भावना भाव्यते हि या।
जपः सोऽत्र स्वयं नादो मन्त्रात्मा जप्य ईदृशः॥"

(वि॰भै॰ 145)

(3) परस्य तत्त्वस्य विश्वोत्तीर्णतायाः विश्वमयतायाश्च सम्यक् प्रथनार्थं तथाविधस्य तत्स्वभावस्य पुनः पुनर्विमर्शनं जपः। यथा—

"उभयात्मकपरामर्शोदयार्थं बाह्याभ्यन्तरादिप्रमेयरूपभिन्नभावानपेक्षयैव "एवंविधं तत् परं तत्त्वं स्वस्वभावभूतम्" इत्यन्तःपरामर्शनं जपः।"

(तं॰सा॰ पृ॰ 26)

अधिकस्पष्टीकरणप्रयोजनकमिदमपरं व्याख्यानम्। नात्र मतद्वयशङ्का कार्या।

(4) मम शक्तिसन्तानः सततं प्रसरणशील एवास्तीति मुहुर्मुहुर्विमर्शनं जपो भावनोपायमयः। यथा—

"सन्ततं शक्तिसन्तानप्रसरेण सदैव मे॥
अनिरुद्धो जपोऽस्त्येव सर्वावस्थास्वसौ जपः।"

(शि॰दृ॰ 7, 84-85)

(5) अहं नानाकारैः सर्वं क्रियाजातं कुर्वन् सर्वत्र सततमुदेमीति मुहुर्मुहुश्चिन्तनमपि जपः शाक्तोपायमयः। यथा।

"नानाकारैः सदा कुर्वन्नुदयन् सर्ववस्तुगः॥
अभ्यासेनास्मि सोऽप्यत्र जपः परम उच्यते।"

(शि॰दृ॰ 7, 85-86)

(6) मदीया सङ्कल्पसन्ततिरेव मे शाब्दो जपः इति सततं विमर्शनमपि जपः। यथा —

"सङ्कल्पाञ्जनयन्नस्मि स्थितः शब्दानतो मुखे॥
सो हि नाम जपो ज्ञेयः सत्यादिस्त्रिविधो हि सः।"

(शि॰दृ॰ 7, 86-87)

(7) बुद्धिद्वारा विधीयमानस्य शुद्धस्य पारमेश्वरस्वरूपस्य स्वात्मनः पुनः पुनर्विमर्शनं शाक्तोपाये जपः। श्लोकगाथादीनामपि स्वात्मपरामर्शप्रधानतयैव विमर्शनं जपः। यथा—

"अकृत्रिमैतद्धृदयारूढो यत्किञ्चिदाचरेत् (वुच्चरेत्) ।
प्राण्याद्वा मृशते वापि स सर्वोऽस्य जपो मतः ॥"

(तं०आ० 4, 194)

"सर्वमेवास्य स्वात्मदेवताविमर्शानवरतावर्तनात्मत्वेन मन्त्ररूपतया परिस्फुरेत् ।"

(तं०आ०वि० खं० 3, पृ० 227)

एष शाक्तो जपः शाम्भवत्वोन्मुख इति, विविधाः प्रकारा एते शाक्तोपायमयस्य जपस्येति ज्ञेयम् ।

~षड्विधः——स च—(1) परः, (2) सूत्रितभेदः, (3) मध्यमः (4) उपांशुः, (5) वाचिकः (6) सशब्दः, इति यथा—

"जीवन्मुक्तौ परो देवि मुक्तौ सूत्रितभेदकः ।
मध्यमो भोगमोक्षाख्य उपांशुः सिद्धिदायकः ॥
वाचिको भूतविषजित् सशब्दस्त्वाभिचारिकः ।
इति षोढा जपज्ञस्य मन्त्राः सर्वार्थसाधकाः ॥"

(उद्ध० ई०प्र०वि०वि० खं० 2, पृ० 261)

एकत्र त्रिविध एव जप उक्तो (1) मानसः (2) उपांशुः (3) सशब्दः इति । अन्यत्र चतुर्विधः । इह पुनर्विश्लेषणसौकर्यादेवम् ।

~सशब्दः——द्र० 'सशब्दजपः' इति ।

~सुप्रबुद्धस्य——परिपूर्णेऽहंविमर्शे प्रतिष्ठितस्य योगिनो मुखाद्यद्यत्समुच्चरेत्तत्तज्जप एवास्य । यथा—

"महामन्त्रात्मकाकृतकाहंविमर्शारूढस्य यद्यदालापादि, तत्तदस्य स्वात्मदेवताविमर्शानवरतावर्तमानात्मा जपो जायते ।"

(शि०सू०वृ० 3, 27)

"शब्दः कश्चन यो मुखादुदयते मन्त्रः स लोकोत्तरः ।"

(अ०नि० स्तो० 4)

जम्भनम् ~ (मन्त्राणाम्)——

"कीलनं चैव मन्त्राणां भेदनं मोहनं तथा ।
संत्रासं ताडनं चैव जम्भनं स्तम्भनं तथा ।

(ने०तं० 16, 33)

"जम्भनं कार्यकरणासाध्यसामर्थ्याधानम् ।"

(ने०तं० उ०, खं० 2, पृ० 17)

न सम्यक् स्पष्टीकरणं कृतं टीकाकृता ।

द्र० (ने०तं० उ० खं० 2, पृ० 15 तः 17)

जयद्रथराजानकः——जयरथस्य भ्राता । एतेन परात्रीशिकायाः कापि टीका विरचिताऽभवद् याद्यत्वे नैव लभ्यते । तदुद्धरणं दत्तमस्ति टिप्पण्यां यथा—

यदुक्तं श्रीमज्जयद्रथ राजानकैः—

"भिन्नयोनिस्तु मालिनी" इत्यस्या व्याख्यानावसरे ।

(प०त्री०वि० टिप्पणी पृ० 121)

जयरथः——तन्त्रालोके विवेकाख्यायाः बृहट्टीकाया निर्माता ।

~तत्सम्बन्धिनः——शृङ्गाररथोऽस्य पिता, जयद्रथोऽस्य कनीयान् भ्राता । यथा—

"तया स शृङ्गाररथाभिधानो बालो विवृद्धिं गमितो जनन्या ।

(तं०आ०वि० खं० 12, पृ० 432)

जयरथ-जयद्रथाख्यौ सकलजनानन्दकौ समगुणर्द्धी ॥
.... उदितौ ।

(तदेव खं० 12, पृ० 433)

~तद्गुरवः——(1) सङ्खधरोऽस्य विद्यागुरुः, शङ्खधरो वाऽयम् ।

(2) कल्याणः (कल्हणः) अस्य शैवशास्त्रगुरुः ।

(3) सुभटदत्तोऽस्य शैवदीक्षागुरुः ।

"तस्माच्छ्रीसङ्खधरादवाप्तविद्यः कृती जयरथाख्यः ।"

(तं०आ०वि० खं० 12, पृ० 434)

"शिवाद्वैतज्ञप्तिप्रकटितमहानन्दविदितं
गुरुं श्रीकल्याणाभिधममुमवाप्यास्तरजसम् ।"

तदेव (पृ० 433)

"श्री सुभटदत्त आसीदस्य गुरुर्यो ममाप्यकृत दीक्षाम् ।"

(तदेव पृ० 433)

"श्री शृङ्गाररथादवाप्य कृतिनो जन्मामवद्यक्रमं
श्रीमच्छंखधरात्परं परिचयं विद्यासु सर्वास्वपि ।
श्रीकल्याणतनोः शिवादधिगमं सर्वागमानामपि
व्याख्यातं प्रथमाह्निकं जयरथेनात्रावधेयं बुधैः ॥"

(तं०आ०वि० खं० 1, पृ० 310)

स्वगुरुकृतं पद्यमेकमुद्धृतं जयरथेन । परं गुरोर्नाम न तत्रोक्तम् । कदाचित् कल्याण इत्युल्लिखितः कल्हणोऽस्य पद्यस्य कर्ता स्यात् । यथा—

यदभिप्रायेणैवास्मद्गुरुभिरपि—

"शश्वद्विश्वमनश्वरप्रकृतयो विश्वस्तचित्ता भृशं
ये विज्ञानतनूनपाति विततोन्मेषा वषट्कुर्वते ।
तेषां सन्ततसर्वमेययजनक्रीडामहायज्वनां
नो मन्येऽवभृथक्षणः क्षणमपि क्षीणा स्थितिर्लक्ष्यते ॥"

इत्याद्युक्तम् ।

(उद्ध० तं०आ०वि० खं० 3, पृ० 233)

नामनिर्देशं विनैव स्वगुरोः पद्यमपरं समुद्धृतं जयरथेन । यथा—

यद्गुरवः—

"सर्वभावमयभावमण्डलं
विश्वशक्तिमयशक्तिबर्हिषि ।
जुह्वतो मम समोऽस्ति कोऽपरः
विश्वमेत्रमययज्ञयाजिनः ॥"

(तं०आ०वि० खं० 3, पृ० 371)

असौ सम्भवतो राजतरङ्गिणीकारः कल्हण एव । यथा—

"देहे विमुक्त एवास्मि श्रीमत्कल्याणवारिधेः।
यस्य कारुण्यविप्रुड्भिः सद्गुरुं तं हृदि श्रये॥
मूर्ध्न्युत्तंस इव क्ष्मापैः सर्वैर्यस्यानुशासनम्।
हृदये भवसंभारकर्कशेऽप्याशु शिश्रिये॥"

(तं॰आ॰वि॰ खं॰ 1, पृ॰ 2)

~तद्ग्रन्थाः——(1) तन्त्रालोकविवेकः।

(2) वामकेश्वरीमतविवरणम्।

"मया जयरथेनैवं किञ्चिदेतत् प्रपञ्चितम्।"

(वा॰म॰ पृ॰ 141)

(3) हरचरितचिन्तामणिः। एष ग्रन्थो जयरथ-जयद्रथाभ्यां भ्रातृभ्यां परस्परसहयोगेन रचितः।

~तद्वैदुष्यम्——त्रिकशासने क्रमशासने च सर्वोत्तमोऽयं विद्वानभूत् स्वे काले। यथा—

तथाप्यस्यामङ्ग क्वचन भुवि नास्ति त्रिकदृशि।
क्रमार्थे वा मत्तः सपदि कुशलः कश्चिदपरः।

(तं॰आ॰वि॰ खं॰ 12, पृ॰ 435)

तत्कृतेन तन्त्रालोकविवेकेन तस्य बहुश्रुतत्वं सर्वशास्त्रार्थवेत्तृत्वं च सुतरां स्पष्टतां याति।

~तन्निवासस्थानम्——इदानीं 'व्यजिब्रोर' इति प्रसिद्धं 'विजबिहारा' इत्यप्युक्तं विजयेश्वरक्षेत्रं कश्मीरमण्डलमध्यस्थम्। यथा—

देशे श्रीविजयेशस्य निवसन् प्रेरणात् तयोः।
चरित्राणि त्रिनेत्रस्य शास्त्रदृष्टानि गुम्फये॥

(ह॰च॰चि॰ 1, 5)

जलम्~वर्णः——वकारः।

"जलं व"।

(तं॰आ॰वि॰ खं॰ 12, पृ॰ 212)

जलस्नानम्—~शाक्तोपायभूतम्——सर्वासु सुखदुःखादिप्रतिपत्तिषु स्वात्मनः शिवत्वस्यैव विमर्शनेन यत् स्वात्मन आह्लादनं तदेव जलस्नानं शाक्तोपायमयम्। यथा—

"दुःखे वापि सुखे वापि सर्वासु प्रतिपत्तिषु॥
शिवोऽस्मीति मनोह्लादो जलस्नानं परं मतम्।"

(शि॰ दृ॰ 7, 88-89)

जलस्नानविधिः——

"स्नानं च देवदेवस्य यन्मूर्त्यष्टकमुच्यते।
तत्रैवं मन्त्रदीप्तेऽन्तर्मलदाहे निमज्जनम्॥"

(तं॰ आ॰ 15, 47)

विस्तरतः प्रतिपादितस्तन्त्रालोके।

द्र॰ (तं॰ आ॰ 15, 48 तः 53) इति।

जाग्रत्——(1) जीवनव्यापारस्य भेदेष्वेकस्य नाम जाग्रदिति। तत्र सर्वप्रमातृभिर्वेद्यो यो व्यापारो बाह्येन्द्रियैः क्रियते तत्र व्यापारे या तदनुकूला जीवनस्य स्थितिः सा जाग्रत्। यथा—

"सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा।
सृष्टिः साधारणी सर्वप्रमातॄणां स जागरः॥"

(ई॰ प्र॰ 3-2-17)

(2) यस्यां वेद्यवेदकसम्बन्धरूपायामवस्थायां बहिरिन्द्रियैः स्थूलानां विषयाणां ग्रहणं भवति सावस्था जाग्रन्नाम्नी। तत्र मेयं स्थूलं बाह्यम्, माता सकलः, मानञ्च बाह्येन्द्रियकं प्रत्यक्षादि। अत्र प्रमेयस्य प्राधान्यमधिष्ठेयस्य। यथा—

"तत्र यदाधिष्ठेयतया बहीरूपतया भानं तदा जाग्रदवस्था मेये मातरि माने च।"

(तं॰सा॰ पृ॰ 105)

द्र॰ (शि॰सू॰ वृ॰ 1, 8) इति।

(स्पं॰वि॰ पृ॰ 20) इति च।

~अभिधानभेदतः——योगिनो जाग्रदवस्थां पिण्डस्थमिति वदन्ति ज्ञानिनश्च सर्वतोभद्रमिति। यथा—

"पिण्डस्थः सर्वतोभद्रो जाग्रन्नामद्वयं मतम्।"

(मा॰वि॰ तं॰ 2, 36)

~अवान्तरभेदतः——(1) ते च मुख्याश्चत्वारः। (1) अबुद्धम्, (2) बुद्धम्, (3) प्रबुद्धम्, (4) सुप्रबुद्धमिति। यथा—

"उक्तं च पिण्डगं जाग्रदबुद्धं बुद्धमेव च॥
प्रबुद्धं सुप्रबुद्धं च चतुर्विधमिदं स्मृतम्।"

(तं॰ आ॰ 10, 239-240)

~तद्रहस्यम्——चतसृणामपि दशानां यानि लक्षणानि तेषां परस्परसङ्करवशात् सर्वासामपि तासां प्रकाराश्चत्वारश्चत्वारः। तद्यथा—जाग्रज्जाग्रत्, जाग्रत्स्वप्नः, जाग्रत्सुषुप्तिः, जाग्रत्तुर्या इति चत्वारो मुख्याः भेदाः। एवमेव स्वप्नादीनामपि भेदाः ऊह्याः। पुनः पुनः सङ्करवशात्तेषामवान्तरभेदाश्चासंख्याताः। तत एव सांसारिकाणां प्राणिनां परस्परं परःसहस्रप्रकारकस्य भेदप्रभेदस्य दर्शनं भवत्यत्र संसारे; न च कोऽपि केनापि सर्वथा समानः स्वभावतः प्रवृत्तितश्च। तत्र प्रत्येकमेकैको भेदः शुद्धस्त्रयश्च परस्परसाङ्कर्यंत इति वेद्यम्। सङ्करश्चानुलोमतो विलोमतश्चेति षोडश षोडश भेदाः।

~तत्त्व भेदने——तत्त्व भेदनप्रक्रियायां स्थूलतर-स्थूल-सूक्ष्म-सूक्ष्मतर परतरादि-तारतम्यतः एकैकस्यां धारणायां भिन्न-भिन्न एव जाग्रदादिक्रमः। अग्रे वक्ष्यते यथा—

~(एकादशात्मकत्वे)——स्वशक्तिसहितस्य प्रलयाकलस्य स्वं स्वरूपमेवात्र जाग्रत्। यथा—

"……………………………… प्रलयकेवले।
स्वं जाग्रत्………………………………॥"

(तं॰ आ॰ 10, 304)

द्र० 'अवस्था-भेद-विस्तरः' इति।

~(त्रयोदशात्मकत्वे)——पुंस्तत्त्वादारभ्य कलान्तस्य तत्त्वव्रातस्य धारणालम्बनभूतत्वेन वेद्यस्वरूपत्वम्, सकलस्य चापि प्रमातुस्तथैवात्र वेद्यस्वरूपत्वम्। ततस्तस्य तत्त्वग्रामस्य सकलस्य च जाग्रत्स्थानीयत्वमेव। यथा—

"त्रयोदशात्मके भेदे स्वरूपस (म) ? कलावुभौ॥"

(मा०वि० तं० 2, 29)

जाग्रदाद्या इति शेषः

"························त्रयोदशभिधे पुनः।
स्वरूपं जाग्रदन्यत्तु प्राग्वत्··················॥"

(तं० आ० 10, 303-4)

~(त्र्यात्मकत्वे)——

द्र० 'जाग्रत्~मन्त्रमहेश्वरे' इति।

~(नवात्मक भेदे)——

द्र० 'जाग्रत्~विज्ञानाकले' इति।

~(पञ्चात्मकभेदे)——

द्र० 'जाग्रत्~मन्त्रेश्वरे' इति।

~(पाञ्चदश्ये)——तत्त्वस्य स्वं रूपं, सकलः प्रमाता, तस्य शक्तिश्चेति त्रयं जाग्रद् दशा। यथा—

"स्वरूपं तत्र शक्तिश्च सकलश्चेति तत् त्रयम्,
इति जाग्रदवस्थेयं भेदे पञ्चदशात्मके॥"

(मा०वि० तं० 2, 29)

"तत्र स्वरूपं शक्तिश्च सकलश्चेति तत् त्रयम्।
इति जाग्रदवस्थेयं भेदे पञ्चदशात्मके॥"

(तं० आ० 10, 302)

द्र० 'अवस्थाभेद विस्तरः' इति।

~(प्रलयाकले)——

द्र० 'जाग्रत्~एकादशात्मके' इति।

~(मन्त्रमहेश्वरे)——स्वशक्तियुतं मन्त्रमहेश्वरस्य स्वरूपम्।

द्र० 'अवस्था-भेद-विस्तरः' इति।

~(मन्त्रे)——मन्त्रप्रमातुः स्वं रूपं स्वस्य च शक्तिः।

द्र० 'अवस्था-भेद-विस्तरः' इति।

~(मन्त्रेश्वरे)——स्वशक्तिसहितं मन्त्रेश्वरस्य स्वं रूपं जाग्रत्।

द्र० 'अवस्था-भेद-विस्तरः' इति।

~(विज्ञानाकले)——तत्र विज्ञानाकलः तस्य शक्तिश्चेति जाग्रत्।

द्र० 'अवस्था-भेद-विस्तरः' इति।

~(शिवतत्त्वे)——क्रियाशक्तिरूपता शिवस्य तत्त्वभेदनानुसारं तत्र जाग्रदवस्था।

द्र० 'अवस्था-भेद-विस्तरः' इति।

~(सप्त-भेदात्मक-विधौ)——

द्र० 'जाग्रत्~मन्त्रे' इति।

अतीव गहना एते विषया योगिभिरेव स्पष्टं वेद्याः। ततः पुनर्विचारणीया विद्वद्वरैः।

जाग्रत्तुर्या दशा——यदा खलु प्रमेयप्रमाणाभ्यां संकुचिताच्च प्रमातृरूपत्वादुत्तीर्य पूर्णतौन्मुख्यदशायामवस्थीयते साधकेन तदा सा तस्य जाग्रत्तुर्या दशा भवति। यथा—

यदा तु तस्मिन्नेव प्रमातृविश्रान्तिगते प्रमातुः पूर्णतौन्मुख्यात् तद्द्वारेण पूर्णतौन्मुख्यतया भानं तदा तुर्यावस्था। सा च रूपम्, दृशा, अहम्, इत्येवंविधमंशत्रयमुत्तीर्य पश्यामीति—अनुपायिका प्रमातृता स्वातन्त्र्यसारा, नैकट्य-मध्य-दूरत्वैः प्रमातृप्रमाणप्रमेयताभिषेकं ददती तदवस्थात्रयानुग्राहकत्वात् त्रिभेदा।

(तं०सा० पृ० 106)

जाग्रत्प्रपञ्चः—— स्थूलशरीरधारिणो जरायुजाद्याः प्राणिनो यत्र प्रमातारः धरादीनि स्थूलतत्त्वानि यत्र प्रमेयभूतानि, प्रत्यक्षादीनि यत्र प्रमाणानि, शाब्दबोधादिरूपाः यत्र प्रमाः असौ स्थूलः प्रपञ्चो नामरूपात्मकः सर्वोऽपि जाग्रदवस्थाप्रपञ्चः। यथा—

"चैत्रमैत्रादिभूतानि तत्त्वानि च धरादितः।
अभिधाकरणीभूताः शब्दाः किं चाभिधा प्रमा॥
प्रमातृमेयतन्मानप्रमारूपं चतुष्टयम्।
विश्वमेतदधिष्ठेयं यदा जाग्रत्तदा स्मृतम्॥"

(तं० आ० 10, 232-233)

अत एव जाग्रद्विश्वमिति कथ्यते। किञ्चाधिष्ठेयतायामेव विश्वं जाग्रदिति। यथा—

"यत्तु बाह्यतया नीलं चकास्त्यस्य न विद्यते।
कथंचिदप्यधिष्ठातृभावस्तज्जाग्रदुच्यते॥"

(तदेव 235)

एतेन गम्यते यदत्राधिष्ठातृत्वं भजमाना देवगणाः जाग्रद्दशोत्तीर्णा एवेति।

~प्राधान्यतः——प्रमेयताया एव यत्र प्राधान्यं सावस्था जाग्रत्। यथा—

"जागरायां च यथा प्रमेयस्य प्राधान्यं ·····।"

(तं०आ०वि० खं० 7, पृ० 174)

~मुख्य रूपतः——प्रमेयमेव मुख्यं जाग्रत्, यतस्तदधिष्ठेयमेव नाधिष्ठातृ। यथा—

"भूततत्त्वाभिधानानां योंऽशोऽधिष्ठेय उच्यते।
पिण्डस्थमिति तं प्राहुरिति श्रीमालिनीमते॥"

(तं०आ० 10, 241)

पिण्डस्थमिति जाग्रद्दशाया नामान्तरम्।

~लोकाव्यवहारे——बाह्येन्द्रियैः स्थूलविषयग्रहणस्य या वृत्तिस्तन्मयी दशा जाग्रत्। यथा—

"तत्राक्षवृत्तिमाश्रित्य बाह्याकारग्रहो हि यः ।
तज्जाग्रत्स्फुटमासीनमनुबन्धि पुनः पुनः ॥"

(तं०आ० 10, 289)

"बाह्येन्द्रियकरणका, बाह्याभ्यन्तरविषयोन्मुखा, ज्ञानक्रियाव्यवहारावस्था जाग्रद्दशा। एतस्यां दशायां प्रायः स्वतो भिन्नानां विषयाणां ज्ञानं करणं च। अत्र प्रमातृप्रमाणप्रमेयात्मकस्य भेदमयस्य त्रिकोणस्य साम्राज्यम्। अत्र प्रमातृरूपः पतिः प्रमाता त्रितयमपि स्वात्मतया पश्यन् समावेशभाग्भवति। पशुः पुनः सर्वं भिन्नमेव पश्यन् भेददृष्ट्या कदर्थ्यते।"

(शि०सू०वि०वृ० 1, 8)

~सामान्यलक्षणतः —— स्फुटविषयावभासप्रधाना दशा। यथा–

"यस्य यद्यत् स्फुटं रूपं तज्जाग्रदिति मन्यताम्।"

(तं०आ० 10, 294)

स्फुटं स्थिरं चाभासजातं सर्वं जाग्रत्। तथाविधाभासप्रधाना दशा जाग्रदित्यर्थः ।

जाग्रदाद्याः~दशाः —— जाग्रत्, स्वप्नः, सुषुप्तिः, तुर्या, तुर्यातीता च दशाः पञ्च।

~त्रिप्रकाराः —— जाग्रदाद्याः दशाः परस्परं सम्भिन्नाः सत्यः प्रत्येकं त्रिरूपाः सम्भवन्ति। तद्यथा जाग्रत्-स्वप्नो जाग्रत्-सुषुप्तिर्जाग्रत्तुर्यमिति। चतुर्थं चासां स्वं रूपम्। यथा–

"इत्थं तिस्रस्त्रिप्रकाराः प्रत्येकान्योन्ययोगतः ।
मुख्यगौणत्वभेदेन ज्ञेयाः सम्यक् चिदात्मनः ॥

(शि०सू०वा०भा० 1, 45-46)

एतद्विश्लेषणं भट्टभास्करस्य मते। न हि तेन तुर्यस्य सम्भेदनं त्रिषु गणितं, न चापि तुर्ये त्रयस्य। परं विज्ञानाकलाः, मन्त्राः, मन्त्रेश्वराः, मन्त्रमहेश्वराः, इति चत्वारोऽपि प्राणिवर्गास्तुर्यदशाभाजः। इत्यस्ति तत्रापि त्रयस्य सम्भेदः। तत एव चातुर्विध्यम्। जागरेऽपि समावेशदशाः, क्रोधहर्षादिदशापराकाष्ठाश्च तुर्यरूपा एव। तथा च काव्यनाट्यरसास्वाददशासु विषयोपभोगदशासु च तुर्याचित् क्षणदृष्टनष्टतया झटिति प्रकाशत एव स्पन्दसिद्धान्तानुसारम्।

ततो भट्टभास्करमतं स्थूलमेवेति मन्तव्यं सुधीभिः। अन्येषां मते स्पष्टतया चातूरूप्यं जाग्रदादीनाम्।

~दृष्टिभेदतः —— इह तन्त्रालोके त्रिकयोगप्रक्रियानुसारं योगिसाक्षात्कारदृष्टिमाश्रित्यैव जाग्रदादि-प्रपञ्चस्य निरूपणम्। ईश्वरप्रत्यभिज्ञादौ च व्यावहारिकस्यैव जाग्रदादिचतुष्टयस्य प्रतिपादनमिति न कोऽपि विरोधः शङ्कनीयः। यथा–

"अन्ये तु कथयन्त्येषां भङ्गीमन्यादृशीं श्रिताः ।
यद्रूपं जाग्रदादीनां तदिदानीं निरूप्यते ॥

(तं०आ० 10, 288)

~भेदविस्तरतः—— जाग्रदादीनां चतुर्णामपि दशानां प्रत्येकं चत्वारो भेदाः। ते च परस्परमांशिकेनानुवेधेन। यथा–

(क) 1. जाग्रज्जाग्रत्, 2. जाग्रत्स्वप्नः, 3. जाग्रत्सुषुप्तिः, 4. जाग्रत्तुर्या। इति।

(ख) 1. स्वप्नजाग्रत्, 2. स्वप्नस्वप्नः, 3. स्वप्नसुषुप्तिः, 4. स्वप्नतुर्या इति।

(ग) 1. सुषुप्तिजाग्रत्, 2. सुषुप्तिस्वप्नः, 3. सुषुप्तिसुषुप्तिः, 4. सुषुप्तितुर्या इति। यथा–

"चातुर्विध्यं हि पिण्डस्थनाम्नि जाग्रति कीर्तितम्।
जाग्रदादिचतुष्कं हि प्रत्येकमिह विद्यते॥"

(तं०आ० 10, 237-38)

"तेन जाग्रज्जाग्रज्जाग्रत्स्वप्नः इत्यादिप्रसिद्धिर्न विरुध्यते।"

(तं०आ०वि०सं० 7, पृ० 162)

"किन्तु जाग्रत्पदादीनां प्रत्येकं बहुभेदता।"

(मा०वि०वा० 1, 265)

जाग्रदादिषु चतसृष्ववस्थासु जाग्रज्जाग्रत्, जाग्रत्स्वप्नः, जाग्रत्सुषुप्तम्, जाग्रत्तुरीयमित्यादिना रूपेण परस्परानुवेधः प्रतीयते ।

(म०मं०पं०, पृ० 157)

~योगिदृष्ट्या—— योगिनः कृते धारणाध्यानसमाधयः क्रमेण जाग्रत्स्वप्नसौषुप्तानि। यथा–

"योग्यमभिप्रायेण प्रथमं तत्तद्धारणारूपं ज्ञानं जाग्रत्, ततस्तत्प्रत्यय प्रवाहरूपा विकल्पाः स्वप्नः, ग्राह्यग्राहकभेदासंचेतनरूपश्च समाधिः सौषुप्तम्।"

(शि०सू०वि० पृ० 11)

~शिवात्मिकाः —— सुप्रबुद्धो योगी जाग्रदाद्यवस्थास्वपि सर्वं शिवमयमेव पश्यति। यथा–

'तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।
नित्यं स्यात्सुप्रबुद्धस्य तदाद्यन्तेऽपरस्य तु ॥
ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया युतः ।
पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः ॥'

(स्पं०का० 17, 18)

द्र० 'प्रत्यक्षाद्वैतम्' इति ।

~संज्ञाभेदतः —— जाग्रदादीनां पञ्चानामवस्थानां ज्ञानिषु, योगिषु च प्रचलितानि नामान्तराणि साधनाप्रधानेषु शैवशास्त्रग्रन्थेषु प्रयुज्यन्ते। यथा–

लोके	योगिषु	ज्ञानिषु
जाग्रत्	पिण्डस्थम्	सर्वतोभद्रम्
स्वप्नः	पदस्थम्	व्याप्तिः
सुषुप्तिः	रूपस्थम्	महाव्याप्तिः
तुर्या	रूपातीतम्	प्रचयम्
तुर्यातीतम्	X X	महाप्रचयम्

तुर्यातीतस्य योगधारणाया अविषयत्वान्न तत्क्रमेऽस्य नामान्तरम्। यथा–

"भूयोऽप्यासामवस्थानां संज्ञाभेदः प्रकाश्यते।
पिण्डस्थः सर्वतोभद्रो जाग्रन्नामद्वयं मतम्॥
द्विसंज्ञं स्वप्नमिच्छन्ति पदस्थं व्याप्तिरित्यपि।
रूपस्थं तु महाव्याप्तिः सुषुप्तस्यापि तद्द्वयम्॥
प्रचयं रूपातीतं च सम्यक् तुर्यमुदाहृतम्।
महाप्रचयमिच्छन्ति तुर्यातीतं विचक्षणाः॥"

(मा०वि०तं० 2, 36 तः 38)

प्रचयं रूपातीतं चेत्यत्रार्थः क्रमो बलीयान् स शाब्दः। तन्त्रेष्वेवंविधं बहुतरं व्युत्क्रमेण भण्यते, वाग्भणितस्य तत्राप्राधान्यं, गुरूपदिष्टस्यैव प्राधान्यात्। श्लोकलक्षणानुकूल्येनापि क्वचित् पदानां व्युत्क्रमः।

~**स्वरूपभेदतः** –– भिन्नभिन्नासु भूमिषु तत्र तत्र स्थितं जाग्रदादिदशास्वरूपमेतत्––1. सुस्फुटो वस्तुतत्त्वाभासो जाग्रत्। 2. स एवास्थिरः सन् स्वप्नः। 3. अस्फुट आभासः सुषुप्तिः। 4. त्रयस्याप्यस्य यदनुसन्धानं वस्तुतत्त्वस्य यस्य स्वरूपस्यानुसन्धानतो जायते तस्य तत् स्वरूपमेव हि तुर्यम्। 5. यत्पुनरद्वैतभरोल्लासिविद्राविताशेषभेदं वस्तुतत्त्वस्वरूपं तत् तुर्यातीतम्। यथा–

"यस्य यद्यत् स्फुटं रूपं तज्जाग्रदिति मन्यताम्॥
तदेवास्थिरमाभाति स्वरूपं स्वप्न ईदृशः।
अस्फुटं तु यदा भाति सुप्तं तत् तत् पुरोऽपि यत्॥"
त्रितयस्यानुसन्धिस्तु यद्वशादुपजायते।
स्रक्सूत्रकल्पं तत्तुर्यं सर्वभेदेषु गृह्यताम्॥
यत्त्वद्वैतभरोल्लासि द्राविताशेषभेदकम्।
तुर्यातीतं तु तत् प्राहुरित्थं सर्वत्र योजयेत्॥

(मा०वि०वा० 2, 1004तः 7)

अनयैव दृष्ट्या सकलादारभ्य शिवं यावत्तत्जागरादिपञ्चावस्थाकल्पनाः शैवसाधनासु। तत्र तत्र भूमिकास्वेवं भिन्नभिन्नं स्वरूपं जाग्रदादीनाम्।

जाग्रत्सृष्टिः –– स्थिरत्वेन सर्वप्रमातृवेद्येयं बाह्या सृष्टिः। यथा–

यत्र तु बाह्याक्षविषयं सर्वप्रमातृसाधारणत्वं च निश्चयानुवृत्त्या बाधारहितया परमार्थत्वेन चकास्ति, तत एव स्थैर्यं, विषयस्यापि सा सृष्टिः पशोः जागरः। तद्विषयं प्रमातृत्वं जागरावस्था।

(ई०प्र०वि० खं० 2, पृ० 241)

जाड्यम्–– तद्धि चैतन्यस्यातिमन्दमन्दतरत्वाभिव्यक्तिः। विश्वस्यैव परमेश्वररूपत्वेन न वस्तुतः किमपि जडं क्वापि सर्वस्य परमेश्वरात्मकत्वात्। परं पाषाणादिषु विद्यमानस्यापि शिवत्वात्मकस्य चैतन्यस्योल्वणाभिव्यक्तिर्न भवति, घ्राणादिसाहाय्यराहित्यात्। ततस्तज्जडमित्युच्यते लोकव्यवहारे। यथा–

"तत्रोत्तरं शिलादावप्यस्ति चैतन्यवासना।
नौल्वण्यमस्याः प्राणादिसाहाय्यानुदयादिति॥"

(उद्ध०म०मं०प०, पृ० 53)

~**विलासकल्पितम्**––सिद्धान्तः खल्वेष यत् सर्वं शिवात्मकमेव। ततो जडत्वं परमार्थतो न क्वापि। परं पारमेश्वरलीलाविलासकल्पितमेव जडत्वं पूर्णत्वाख्यातिरूपं मायापदे बहुप्रकारतयावभासते केवलम्। यथा–

"इह तावत्। परधाम्नि न किञ्चिज्जडं नाम, मायापदे तु नीलादयः सृज्यन्ते। तेषां चेयमेव सृष्टिर्यदन्योन्यतश्चिद्रूपा अचिद्रूपाश्च नानेति बहुशाखेन वैविक्त्येनाभासनम्। इयं हि सा पूर्णत्वाख्यातिरिति वक्ष्यते।"

(ई०प्र०वि०वि० खं० 1, पृ० 90)

जालप्रयोगदीक्षा–– कदाचित् केनापि कारणेनाकृतमलशोधनस्यैव शिष्यस्य मृत्युर्यदि भवेत् तदा तस्य बान्धवादिभिः प्रार्थितः सन् सामर्थ्यवान् गुरुस्तस्य परोक्षदीक्षां करोति। यागमण्डपे तस्य दर्भमयं वा जातीफलमयं वा शरीरं निधाय मन्त्रादिप्रयोगेण मृतं शिष्यं लोकान्तरादाकृष्य ऐहलौकिकदेहान्तरादपि वा, तत्र दार्भादिशरीरे संक्रमय्य तत्र तस्याभिषेकादिविधिं विदधाति। तेनासौ पाशविमुक्तः सन्नूर्ध्वलोकान्वा याति भोगार्थं, परशिवे वा विलीयते। एषा दीक्षा सप्रत्ययापि भवति यस्यां दार्भशरीरं स्पन्दते। यथा–

"आकृष्टावुद्धृतौ वा मृतजनविषये कर्षणीयेऽथ जीवे।
योगः श्रीशम्भुनाथागमपरिगमितो जालनामा मयोक्तः।

(तं०सा० पृ० 167)

एवं जालप्रयोगाकृष्टो जीवो दार्भं जातीफलादि वा शरीरं समाविष्टो भवति, न च स्पन्दतेमनःप्राणादिसामग्र्यभावात्॥ तदनुध्यानवलात्तु स्पन्दतेऽपि। तादृशेऽपि तस्मिन् पूर्ववत् प्रोक्षणादिसंस्कारः पूर्णाहुतियोजनिकान्तः। अत्र परं पूर्णाहुत्या तस्य दार्भाद्याकारस्य परतेजसि लयः कर्त्तव्यः। एवमुद्धृतोऽसौ पूर्णाहुत्यैवापवृज्यते यदि स्वर्नरकप्रेततिर्यक्षु स्थितः। मनुष्यस्तु तदैव ज्ञानं योगं दीक्षां विवेकं वा लभतेऽधिकारिशरीरत्वात्, इति मृतोद्धरणम्।

(तं०सा० पृ० 168)

~**(जातीफले)**––जालाकृष्टः शिष्यो जात्यादिफलेऽपि वाऽधिष्ठाप्यते, तत्रस्थस्यैव दीक्षाविधिः। यथा–

"जातीफलादि यत्किंचित् तेन वा देहकल्पना।"

(तं०आ० 21, 36)

~**जालाकर्षणतः** –– स्पष्टमुक्तं यथा–

स्वरश्मिरनिकुरम्बेन (ण) सकलमेवाध्वानं संछाद्य गर्भीकृत्य शीघ्रमेव मत्स्यमिवाभीष्टं जीवमानयति प्राणकरणाद्येकीकारेणकर्षयतीत्यर्थः।

(तं०आ०वि०खं० 10, पृ० 227)

~**दार्भादिदेहस्थितितः** ––जालप्रयोगदीक्षायां दार्भादिदेहाः सुषुप्ताविव निश्चेष्टास्तिष्ठन्ति। तथाविधानामेव संस्काराः सर्वे

विधीयन्ते यैर्जीवः संस्कृतो भवति। पूर्णाहुत्या सह दार्भादौ देहे होमाग्नावर्पिते सति जीवः शुद्धं वा लोकमासादयति कमपि योजनिकावशात्, शिवभावं वाधिगच्छति केवलमुमुक्षावशात्। सप्रत्यये तु तत्र दीक्षाविधौ दार्भो देहः स्पन्दते। यथा–

"ततो जालक्रमानीतः स जीवः सुप्तवत् स्थितः।
मनोविशिष्टदेहादिसामग्रीप्राप्त्यभावतः॥
न स्पन्दते न जानाति न वक्ति न किलेच्छति।
तादृशस्यैव संस्कारान् सर्वान् प्राग्वत् प्रकल्पयेत्॥
निर्बीजदीक्षायोगेन सर्वं कृत्वा पुरोदितम्।
विधियोजनिकां पूर्णाहुत्या साकं क्षिपेच्च तम्॥
दार्भादिदेहे मन्त्राग्नावर्पिते पूर्णया सह।
मुक्तपाशः शिवं याति पुनरावृत्तिवर्जितः॥"

(तं०आ० 21, 37 तः 40)

~देहान्तरत्यागेन––विधानज्ञो गुरुरत्र लोके देहान्तरगतं शिष्यं तं देहमपि त्याजयति कदाचित् स्वबलप्रयोगेण प्राणाहरणदीक्षायामिव। इत्येषोऽस्त्येकः प्रकारोऽस्या दीक्षायाः। अपरोऽग्रे वक्ष्यते। यथा–

"योगमन्त्रक्रियाज्ञानभूयोबलवशात् पुनः।
मनुष्यदेहमप्येष तदैवाशु विमुञ्चति॥"

(तं०आ० 21, 34)

~देहान्तरस्थितौ––(1) मानवदेहान्तरस्था प्रमातारो जालप्रयोगेणाकृष्टा अपि कदाचित् तात्कालिकं स्वकीयं मानवदेहं न परित्यजन्ति। दार्भे देहे तेषां संस्कारे जाते सति मानवदेहस्थाः सन्तोऽपि ते संस्कृताः सम्भवन्ति। भोगमोक्षफले च लभन्ते तच्छरीरान्ते। दीक्षाकाले देहद्वये तेषां स्थितिः। इत्येषोऽपरः प्रकारोऽस्याः दीक्षायाः वेदितव्यः। यथा–

"अधिकारिशरीरत्वान्मानुष्ये तु शरीरगः।
न तदा मुच्यते देहाद्देहान्ते तु शिवं व्रजेत्॥"

(तं०आ० 21, 31)

(2) किञ्च मानवदेहस्थे तस्मिन् दीक्षाप्रयोगवशतोऽयत्नादेव भक्तिश्रद्धाज्ञानादिविभूतयो विकासमायान्ति। यथा–

"तस्मिन् देहे तु काप्यस्य जायते शाङ्करी परा।
भक्तिरूहाच्च विज्ञानादाचार्याद्वाप्यसेवितात्॥"

(तं०आ० 21, 32)

(3) अपरं च तद्देहस्थोऽप्यसौ दार्भं देहमप्यधितिष्ठत्यचेतयन्नपि। यथा–

"तद्देहसंस्थितोऽप्येष जीवो जालबलादियम्।
दार्भादिदेहं व्याप्नोति स्वाधिष्ठित्यप्यचेतयन्॥"

(तं०आ० 21, 33)

~प्रलयाकलस्य––स्पष्टमुक्ता। यथा–

"सुप्तकल्पोऽप्यदेहोऽपि यो जीवः सोऽपि जालतः।
आकृष्टो दार्भमायाति देहं फलमयं च वा॥"

(तं०आ० 21, 35)

~विधानतः ––

"निष्कम्पः सकलः शान्तो ह्यहमेव परः शिवः।
परमात्मा सर्वगतो जगद्व्याप्तं मयाखिलम्॥
एवं ध्यानगतः कुर्याद्रेचकं पूरकं ततः।
कुम्भकान्ते रेचकेन निक्षिपेदखिलं शनैः॥
रेचकान्ते पुनः स्वान्तं द्वादशान्ते सशक्तिकम्।
लक्षयेदङ्कुराकारां सर्वाण्डान्तरचारिणीम्॥
मायाबीजं समुच्चार्य चैतन्यं लिङ्गसंयुतम्।
शुद्धमम्बुकणाकारं यत्र स्रोतोऽन्तरे स्थितम्॥
गृहीत्वा तत्प्रयोगेण महाजालेन युक्तितः।
गृहीतं हृदये स्थाप्यं बीजाभिख्यासमन्वितम्॥"

(उद्ध०तं०आ०वि० खं० 10, पृ० 227)

~सप्रत्यया ––सप्रत्ययापि भवति जालप्रयोगदीक्षा यत्र शिष्यस्य दार्भादिकं शरीरं स्पदन्ते। यथा–

"सप्रत्यया त्वियं यत्र स्पन्दते दर्भजा तनुः।
तत्र प्राणमनोमन्त्रार्पणयोगात्तथा भवेत्॥"

(तं०आ० 21, 41)

जालाकृष्टिः––परलोकगतस्य वा पुनर्जन्मगतस्य वा शिष्यस्य जालप्रयोगदीक्षायां विधीयमाना जीवाकृष्टिः।

~अन्त्येष्टिदीक्षायाम्––अन्त्येष्टिदीक्षापि जालाकृष्ट्या विधीयते,

द्र० 'अन्त्येष्टिः~दीक्षाजालाकृष्ट्या' इति।

जीवः ––पशुप्रमाता, सकलाख्यः प्राणी, संसरणशीलः प्राणी, लिङ्गशरीरयुतो मायीयः प्रमाता। यथा–

"जीवः पुर्यष्टकचैतन्यरूप आत्मा।"

(ने०तं०उ० खं० 2, पृ० 193)

द्र० 'बुधः' इति।

"शब्दादिविषयाणां य इन्द्रियाणां प्रवर्तते।
हृत्पुण्डरीकमध्यस्थां धर्माधर्मप्रवर्तकः॥
रागद्वेषाभिभूतस्तु त्रिधान्तःकरणावृतः।
कार्यकारणसंबद्धः करणैर्भूतसंयुतैः॥
निर्बद्धश्चिन्मलेनैव शतशोऽथ सहस्रशः।
कार्याकार्यान्तरशतैर्धर्माधर्मविचेष्टितैः॥
प्रलुप्तनिजचैतन्यो जीव इत्यभिधीयते।"

(ने०तं० 19, 164 तः 67)

~देहे––पाञ्चभौतिके शरीरे, तत्रापि मुख्यतया हृदये संस्थितो लिङ्गशरीरधारी प्रमाता। यथा–

"..........................पुरुषः पद्ममध्ये व्यवस्थितः।
चित्स्वरूपश्च सर्वेषु देहमापूर्य संस्थितः॥
स जीव इति विख्यातो येन जीवति तत्पुरम्॥"

(स्व०तं० 12, 105-6)

द्र० पुरुषः इति।

~बीजमन्त्रः — (1) सकारस्य नाम जीव इति। यथा–

जीवः सः

(तं०आ०वि० खं० 12, पृ० 188, 202)

जीवः सकारः

(ने०तं०उ० खं० 2, पृ० 52)

(2) सविसर्गः सकारः। यथा–

जीवः सविसर्गः सः।

(तं०आ०वि० खं० 12, पृ० 200)

अस्य सविसर्गत्वेन निर्विसर्गत्वेनोभयथोपयोगः कदाचिद् भवेत् परम्पराभेदे इति सम्भाव्यते।

~मूलतः —शिवस्य पारमेश्वरी शक्तिरेव जागद्रूपतयाऽवभासमाना जीवत्वेनाप्याभासते। ततो मूलतः शिव एव जीवरूपतया स्वात्मानमवभासयति। यथा–

श्रीत्रिशिरोभैरवे–

"जीवः शक्तिः शिवस्यैव.................।"

(ने०तं०उ० खं० 2, पृ० 30)

~वस्तुतः — (1) विस्मारितात्मशिवभावो दर्पणनगरन्यायेन च गृहीतपरिमितप्रमातृभावः शिव एव जीव इति कथ्यते। वस्तुतश्शिवादन्यो न कोऽपि जीवः। यथा–

"भोक्ता च तत्र देही शिव एव गृहीतपशुभावः।"

(प०सा० 5)

शिवः स एव स्वरूपगोपनासतत्त्वः सन् स्वेच्छया नट इव देहप्रमातृभूमिकां समापन्नः पाल्यत्वात् पशुत्वात् पशुसत्तालक्षणश्च सुखदुःखादिमये स्वयं निर्मितेऽस्मिन् भोग्ये भोक्ता देहीति कथ्यते।

(प०सा०वि० पृ० 16)

ग्राहकोऽपि अयं प्रकाशैकात्म्येन.................................. विश्वशरीरशिवैकरूप एव, केवलं तन्मायाशक्त्या अनभिव्यक्तस्वरूपत्वात् संकुचित इव आभाति।.................................. ....सर्वो ग्राहको विश्वशरीरः शिवभट्टारक एव। ....इत्यादिना शिवजीवयोरभेद एव उक्तः। ....ग्राहकोऽयं विकल्पमयः।

(प्र०हृ०, पृ० 9-11)

~विस्तरतः —ब्रह्माणमारभ्य स्थावरान्तं सर्वं प्राणिजातं जीववर्ग इति। जीवतायाः प्राप्तेः मूलकारणं परतन्त्रताया भजनमस्ति। यथा–

"ब्रह्मादिस्थावरान्तं हि जीवतामश्नुते चिरात्
परतन्त्रत्वभजनं जीवताप्राप्तिकारणम्॥"

(आ०वि० 3-4)

~व्यवहारे—(1) मायाकृतसङ्कोचश्चिद्रूपोऽहमिति परिमितः प्रमाता, शून्यप्राणादावहमिति मानी। यथा–

एवं शून्य एवाहन्ता अक्षचक्रोपोद्बलिता जीवनम्। इति स शून्य एव जीवः संसरति।

(ई०प्र०वि०, खं० 2, पृ० 236)

(2) प्राणी यथा–

"नादाख्यं यत्परं बीजं..................................।

इति तन्त्रान्तरोक्तदृशा सर्वस्य स्वतः स्फुरन् स एष प्रायः प्राणनापरपर्यायो जीवः स्मृतो गुरुपारम्पर्येणाविच्छेदेनाधीतः।

(स्व०तं०उ०, प० 4, पृ० 161)

प्राणीत्यपरनामतः स्थूलप्राणस्पन्द एव जीवः। इति।

द्र० 'प्राणस्पन्दः' इति।

जीवत्परोक्षदीक्षा— द्र० 'परोक्षदीक्षा~जीवतः' इति।

जीवनम्— प्राणनम्, प्राणनव्यापारः, यद्वशाद्वै "अयं प्राणी" इत्युच्यते। तच्च ज्ञानक्रियात्मकं जीवनव्यवहर्तृत्वम्। यथा–

"ज्ञानं क्रिया च भूतानां जीवतां जीवनं मतम्।"

(ई०प्र० 1-1-4)

जीवनं च जीवनकर्तृत्वं तच्च ज्ञानक्रियात्मकम्। यो हि जानाति च करोति च स जीवतीत्युच्यते।

(ई०प्र०वि०, खं० 1, पृ० 43)

जीवनस्य ज्ञानक्रिये तत्त्वमित्युपपद्यते।

(ई०प्र०वि०वि० खं० 1, पृ० 88)

~अवस्थाभेदतः — जीवनक्रियायाश्चतस्रोऽवस्थाः। ताश्च जाग्रत्, स्वप्नः, सुषुप्तिः, तुर्या चेति। तुर्यातीतं पदं तु नैवावस्थासु गणनार्हम्। तस्य मूलभूतसत्यत्वात्; यद्यपि कदाचिद् गण्यतेऽपि तथा शिष्यसम्बोधार्थम्।

द्र० 'अवस्थाः' इति।

जीवनान्तक्षणप्रभावः — भवितव्यतानुसारं तत्क्षणे भाविजन्मवासना प्रधानतां भजते। यथा–

इह अन्त्ये क्षणे ह्यभ्यासभूयस्त्वादिना येनैव रूपेणाग्रे भवितव्यं, तत्संस्कारस्यैव प्रबोधेन भाव्यम्। तद्वशात्तत्स्मरणं, तत्स्मृत्या च तद्भावप्राप्तिरति।

(तं०आ०वि० खं० 11, पृ० 133)

~वासनावशतः —जीवनस्यान्तिमे क्षणे या वासना प्राणिन्यारूढा भवति तदनुसारमेव तस्य गतिः। यथा–

"सा देहत्यागकालांशकला देहवियोगिनी॥
तत एव हि तद्देहसुखदुःखादिकोज्झिता।
तस्यां यदेव स्मरति प्राक्संस्कारप्रबोधतः॥
अदृष्टाभ्यासभूयस्त्वशक्तिपातादिहेतुकात्।
तदेव रूपमभ्येति सुखिदुःखिविमूढकम्।
श्रद्धा निःसुखदुःखादि यदि वाऽऽनन्दरूपकम्।

(तं०आ० 28, 329 तः 332)

जीवानान्तवासना—— द्र० 'जीवानान्तक्षणप्रभावः' इति।

जीवन्मुक्तः —— (1) विज्ञातात्मतत्त्वो योगी प्रारब्धकर्मक्षयान्तं संसारे प्रबुद्धतया तिष्ठन्नपि परोपकारार्थशास्त्रनिर्माणादि च सम्पादयन्नपि मोहकलासंस्कारशेषतया लोकव्यवहारं कुर्वन्नपि वस्तुतो न व्यामोहभाग् ज्ञानवान् साधकः। प्रारब्धान्तमसौ तथा तिष्ठति शरीरपाते च शिवीभवति प्रायशः। कश्चिज्जीवन्मुक्त उत्कृष्टभुवनभोगभाग् भूत्वा तदनन्तरमेव शिवीभवति। न कोऽपि जीवन्मुक्तः पुनः संसरति। कश्चित्त्विहैव जन्मनि पारमैश्वर्यशक्त्यंशानप्युपभुंक्ते। यथा–

"यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात्।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः॥
तेन शब्दार्थचिन्तासु न सावस्था न या शिवः।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥
इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत् ।
स पश्यन्सततं युक्तो जीवन्मुक्तो न संशयः ॥"

(स्प० का०, 28, 29, 30)

"अयं भूतकञ्चुकी शरीरारम्भीणि भूतानि कञ्चुकं व्यतिरिक्तं प्रावरणमिव नत्वहन्तापदस्पर्शीनि यस्य तथाभूतः सन् विमुक्तो निर्वाणभाक्, यतो भूयो बाहुल्येन पतिसमः चिद्घनपारमेश्वरस्वरूपाविष्टः।"

(शि०सू०वृ० 3, 42)

"इत्यपि सर्वथा मोंहकलासंस्कारस्याप्रक्षयः। प्रक्षये त्वस्य देहाद्यहम्भावनियमविगलनात् परमेश्वरतैव ।"

(ई०प्र०वि०वि०खं० 3, पृ० 183)

"भिन्नाज्ञानग्रन्थिर्गतसंदेहः पराकृतभ्रान्तिः ।
प्रक्षीणपुण्यपापो विग्रहयोगेऽप्यसौ मुक्तः ॥"

(प०सा०का० 61)

"स जीवन्" नियतदेहाधिकरणान् प्राणान् धारयन्नेव 'मुक्तः' सर्वव्यापकसर्वात्मसर्वेश्वरस्वतन्त्रस्वस्वभावाहंकारप्रतिपत्तिदार्द्येन जन्मादिविरोधात् निष्क्रान्तः परमेश्वर एव संवृत्तः..........।"

(स्प०वि०पु० 86)

द्र० (स्प०वृ० पृ० 25) इति च।

(प०सा०वि० पृ० 28, 118, 119)
(तं०व०धा० 1-26, 27)
(प०प्रा० पृ० 12)

~जीवन-व्यवहारतः —— ज्ञानप्राप्तिसमकालमेव जीवन्मुक्तः सन् साधको न किमप्यभ्यासाद्यपेक्षते न च तस्य लोकव्यवहारे कोऽपि नियमः। परं लोकसंग्रहार्थमध्ययन-पूजनयोगाद्यसौ सेवमान एव कालं नयति। लोकोपकारार्थं च शास्त्रलेखनव्याख्यानादि शिष्यजनावबोधनदीक्षणादि च स्वविलासतः कुर्वन्नेव परमानन्दनिर्भरतां रसयंस्तिष्ठति प्रारब्धकर्मपरिसमाप्तिं यावत्। यथा–

"अपि शब्दः स्वात्मनस्तदभिन्नतामविष्कुर्वन् पूर्णत्वेन स्वात्मनि परार्थसम्पत्त्यतिरिक्त-प्रयोजनान्तरावकाशं पराकरोति । परार्थश्च प्रयोजनं भवत्येव।"

(ई०प्र०वि०खं० 1, पृ० 15-16)

~परोपकारी—— अधिकारिजनसमुद्धारमात्ररूपः परार्थ एवात्र ग्रन्थरचनादौ प्रयोजनम्। यथा–

"परार्थश्च प्रयोजनं भवत्येव तल्लक्षणयोगात्।"

(ई०प्र०वि० खं० 1, पृ० 16)

~प्रारब्धभोगी—— ज्ञानाग्निः सर्वकर्माणि दहति, परं प्रारब्धकर्मसु न तस्य प्रभावः। तेन साक्षात्कृतस्वात्मशिवभावोऽपि योगी प्रारब्धानुसारं सुखदुःखादि भुंक्ते, परं न तद्भोगेनान्तः प्रभावितो भवति। यथा–

"करणगणसंप्रमोषः स्मृतिनाशः श्वासकलिलताच्छेदः ।
मर्मसु रुजाविशेषाः शरीरसंस्कारजो भोगः ॥
स कथं विग्रहयोगे सति न भवेत्तेन मोहयोगेऽपि ।
मरणावसरे ज्ञानी न च्यवते स्वात्मपरमार्थात् ॥"

(प०सा० 94-95)

~लक्षणतः —— ये तावदात्मनोऽप्रकाशांशं विगाल्य वस्तुतश्चित्प्रकाशरूपतायामेवाभिमानिनस्ते जीवन्मुक्ताः। यथा–

"................तथा केचन तां निजाम् ।
अप्रकाशदशां घ्नन्ति देहप्राणतदात्मताम् ॥
ते प्रबुद्धाश्च पतयो जीवन्मुक्ता महर्षयः ।"

(तं०द०धा० 1, 26-27)

~विधिनिषेधाबद्धः —— जीवन्मुक्तो नैव विधिनिषेधाभ्यां बद्ध्यते। येन केनापि प्रकारेण प्रवर्तमानोऽप्यसौ मोक्षमेवाप्नोति न पुनर्जन्म। यथा–

"अश्नन् यद्वा तद्वा संवीतो येन केनचिच्छान्तः ।
यत्र क्वचन निवासी विमुच्यते सर्वभूतात्मा ॥"

(प०सा० 69)

~शेषवृत्तितः —— लोकोपकारादन्यन्नास्य किमपि शेषवृत्तितयोक्तमस्ति। लोकोपकारमपि पारमैश्वर्यक्रीडामयत्वेनैव करोति। यथा–

"समस्तयन्त्रणातन्त्रत्रोटनाटङ्कधर्मिणः ।
नानुग्रहात् परं किञ्चिच्छेषवृत्तौ प्रयोजनम् ॥"

(त०आ० 2, 38)

"परानुग्रहकारित्वमत्रस्थस्य स्फुटं स्थितम् ।
यदि तादृगनुग्राह्यो दैशिकस्योपसर्पति ॥"

(तदेव 3, 290-291)

~स्वभावतः —— कश्चन जीवन्मुक्तः संसारे सर्वथाऽसक्तो जडवद् विचरति। यथा–

"मदहर्षकोपमन्मथविषादभयलोभमोहपरिवर्जी ।
निःस्तोत्रवषट्कारो जड इव विचरेदवाद मतिः ॥"

(प०सा० 71)

द्र० 'जीवन्मुक्तिः' इति।

जीवन्मुक्तिः —— योगाद्यभ्यासफलत्वेन स्वरूपसाक्षात्कारे संवृत्ते सति प्रत्यभिज्ञातस्वात्मशिवभावो योगी प्रारब्धकर्मानुसारं शरीरे तिष्ठन्नपि, लोकव्यवहारं चापाततः कुर्वन्नपि दृष्टेन्द्रजालतत्त्व इव विद्वान् यथेन्द्रजालं पश्यन्नपि तद्रसं च चमत्कुर्वन्नपि वस्तुतो न व्यामुह्यति, तथैव जीवन्मुक्तो नान्तः प्रभावितो भवति लोकव्यवहारेण। जीवनान्तं तथा तिष्ठति। शरीरान्ते च शिवतां वासादयति परिपूर्णामुत्तरस्मिन्वा क्वापि भुवने भोगाँश्चिरं भुक्त्वा तदनन्तरमेव शिवभावं समासादयति परिपूर्णम्। सैषा तस्य जीवन्मुक्तिः। यथा–

"यत्तत्त्वस्य परिज्ञानं स मोक्षः परमेशता ।
तत्पूर्णत्वं प्रबुद्धानां जीवन्मुक्तिश्च सा स्मृता ॥"

(बो०पं०द० 13)

(2) शोकमोहादिरहिता सावस्था यस्यां साधकः सर्वं शिवरूपतयैव पश्यन् कृतकृत्यो भवति। यथा–

"इत्थं तत्त्वसमूहे भावनया शिवमयत्वमभियाते ।
कः शोकः को मोहः सर्वं ब्रह्मावलोकयतः ॥"

(प०सा० 52)

(3) चिदैकात्म्यप्रतिपत्तिलाभस्य दार्ढ्यं जीवन्मुक्तिः। यथा–

"जडस्यापि देहादेश्चिदैकात्म्यप्रतिपत्तिदार्ढ्यं जीवन्मुक्तिः । उक्तं च–

"देहादिषु चेत्यमानेष्वपि चिदैकात्म्यप्रतिपत्तिदार्ढ्यं जीवन्मुक्तिः ।" इति।

(प०त्री०वि०वृ० पृ० 2)

स्पष्टीकरणप्रयोजनं व्याख्यानत्रयं न परस्परं मतभेदावहं, परस्परपूर्वकं हि यतस्तत् ।

द्र० (प्र०हृ० पृ० 24-37)
तथा (प०त्री०ल०वृ० पृ० 11)

~अद्भुततमा——

"इहैकभविको मोक्ष एष तावत् परीक्ष्यताम् ।
अनेकभविको मोक्षः पश्चात्स च गमिष्यति ॥

इति हि परमकृपालुना भगवताऽऽगमग्रन्थेन निरूपितमद्भुतत्वम्। इदं त्वद्भुततमं यत् किल जीवन्नेव मुक्त इति।

(ई०प्र०वि०वि० खं० 3, पृ० 403)

~ऐश्वर्यहीना—— स्वात्मशिवतासाक्षात्कारमात्रेण तस्यां दृढो विश्वासः सञ्जायते शिवयोगिनां, परं पञ्चविधपारमेश्वरकृत्यकारित्वरूपमैश्वर्यं प्रायस्तावदभिव्यक्ततां नायाति यावत् प्रारब्धकर्मवशाच्छरीरं तिष्ठति। पतित एव मर्त्यशरीरे तदभिव्यक्तं भवति।

द्र० '~साधारणी' इति।

द्र० '~प्रकार' इति च।

~कारणतः —— पौरुषज्ञानपूर्वकमुद्भूतं ततः स्थिरतां चापन्नं यद् बौद्धं ज्ञानं तदेव जीवन्मुक्तेः साक्षात्कारणम्, तत्कारणञ्च बौद्धाज्ञानविनाशः। तन्नाशे सत्येव तस्योदयात्। यथा–

"बौद्धज्ञानेन तु यदा बौद्धमज्ञानजृम्भितम् ।
विलीयते तदा जीवन्मुक्तिः करतले स्थिता ॥"

(तं०आ० 1, 44)

न चाप्रध्वस्तपौरुषाज्ञानस्य अनेन किञ्चित् भवतीत्युक्तप्रायम् ।

(तं०आ०वि० खं० 1, पृ० 82)

"विकल्पयुक्तचित्तस्तु पिण्डपाताच्छिवं व्रजेत् ।
इतरस्तु तदैवेति शास्त्रस्यात्र प्रधानतः ॥"

(तं०आ० 1, 51)

~द्विप्रकारा—— केवलं शुद्धजलाशयकल्पाऽऽन्तर्निर्मलतारूपा एका जीवन्मुक्तिरपरा च पारमैश्वर्यांशा निभालनसामर्थ्यरूपा परापरसिद्धिमण्डितापि जीवन्मुक्तिः। यथा–

"यद् यदिच्छति, तत्तज्जानाति करोति च समावेशाभ्यासपरोऽनेनैव देहेन, अतत्परोऽपि सति देहे परमेश्वरप्रमातृतद्दर्शनदृढहृदयो जीवन्मुक्तः, तत्पाते परमेश्वर एवेति ।"

(ई०प्र०वि०वि० खं० 3, पृ. 396)

~पारमैश्वर्यमयी—— अभ्यस्तशाम्भवशाक्तादिसमावेशरसानां परयोगिनां देहे स्थितेऽपि केनाप्यंशेन स्वेच्छया स्वस्वातन्त्र्येण सृष्टिसंहारादिसम्पादने सामर्थ्यस्याभिव्यक्तिः। यथा–

"अभ्यास-भावनाबलेन तु शिवशासनोपदिष्टेन देहघटादावेव परमेश्वरतासमावेशमभिनिविश्य पश्यत इहैव शरीरे पारमेश्वर्यांशधर्मोद्गमः न तु वस्तुतः पूर्णता। देहत्वस्यैव सङ्कोचप्राणस्य गलने यथास्थितविश्वात्मकतापत्तेः॥"

(ई०प्र०वि० खं० 2, पृ० 131-132)

~साधारणी—— जीवन्मुक्तेरिदं निरूपणं वेदितव्यम्–जीवन्मुक्तो लोकव्यवहारमनुवर्तमानोऽपि न तेन तत्-संस्कारेण वा व्यामुह्यते। सर्वं नाट्यदृश्यमिव विमृशन् नान्तः स्पृश्यते केनापि लोकवृत्तेन। सामान्यैषा जीवन्मुक्तिः। यथा–

"व्यपोहिते व्यामोहे, स्थितेऽपि तत्संस्कारमात्रविधृते शरीरादौ, अनात्मताभिमानपुरःसर एवात्मताभिमाने, घटादौ च प्रकाशमान एवानात्मताभिमाने, ज्ञातेन्द्रजालतत्त्वस्य पश्यतोऽपीन्द्रजालं यथा न तत्त्वतो व्यामोहस्तथा प्रत्यभिज्ञातात्मस्वरूपस्य।"

(ई०प्र०वि० खं० 2, पृ० 131)

द्र० 'जीवन्मुक्तः' इति।

~सैश्वर्या—— समावेशरसाभ्यासिनः साधकाः इह मर्त्यजीवने प्रचलत्येव स्वात्मनः पञ्चकृत्यसम्पादनस्वातन्त्र्यमनुभवन्ति केनाप्यंशेन, रसयन्ति च तद्रसम् ।

द्र० 'पारमैश्वर्यमयी' इति ।

जीवत्वलीला—— जीवोऽपि वस्तुतः शिव एवेति तस्य ज्ञानक्रियास्वातन्त्र्यमनवच्छिन्नमेव। यच्च तस्य स्वातन्त्र्यस्यानभिमननं, तत्तु निजशिवतालीलाविलासकल्पितमेव। एतत्प्रकारकं कल्पनमेव हि शिवतास्वभावभूतमैश्वर्यमिति शिवताभिमानाभावोऽपि शिवताया एव विलासोऽयम्। यथा–

"ममेच्छामनुवर्तन्तामित्यत्राहंविदि स्फुरेत् ।
शिवो वा परमेशानो देहादिरथ निर्मितः ॥
शिवस्य तावदस्त्येतद्देहस्त्वेष तथा 'त्वया' ।
कृतः कान्या देहतास्य तत् किं स्याद् वाच्यतापदम् ॥"

(तं०आ० 14, 29-30)

त्वया शिवेनैवेति तात्पर्यम् ।

जीवसूत्रम्—— न स्पष्टीकृतं जयरथेन **Radius** इति वा **Diameter** इति वा भवेदेतन्नामकं सूत्रं वा स्यान्मण्डललेखनविधावुपयोगि।

जीवाभेदः —— तर्कयुक्त्या प्रदर्शितो यथा–

"घटशरीरप्राणसुखतदभावरूपं सद् यल्लग्नं भाति तदेव जीवरूपभूतं सत्यं, तस्य च आपाते यद्यपि बहुत्वं भाति तथापि तज्जडात्मकवेद्यशरीराद्युपाधेः। ततस्तदपारमार्थिकम्, अन्योन्याश्रयात् । जीवा हि जडभेदाद् भेदभागिनो, जडाश्च जीवभेदाद्, एतद्देहोऽयमेतद्वेद्योऽयमिति भेदमुपेयुः ।"

(ई०प्र०वि०, खं० 1, पृ० 42-43)

जीवेश्वरविशेषः —— परमेश्वरस्तावत् सर्वमविकल्पतया स्वाङ्गरूपत्वेन संवेत्ति। परं पुरुषो भेददर्शी सन् सर्वं सविकल्पतया स्वतो भिन्नत्वेनैव पश्यतीति अविकल्पसविकल्पताकृतोऽभेदभेदकृतश्चानयोः संवेदने भेदः। यथा–

"ईश्वरस्य विकल्पात्मकतामन्तरेण शुद्धविमर्शविषयीभाव्या अर्थाः, पशोस्त्वन्योन्यापोहनहेवाकिनी विकल्पे समारूढास्तेऽर्था भवन्ति, सांसारिकहानादानादिव्यवहारोपयोगात् ।"

(ई०प्र०वि० खं० 2, पृ० 263)

(ज्ञ)

ज्ञाततावादः —— आचार्याभिनवगुप्तस्य विचारे शिवस्येच्छाविलासत आभासमाने जगति वस्तुजातं यथाऽऽभासते तथैव तस्य सत्ताऽङ्गीकार्या शास्त्रीये व्यवहारजाते। तेन घटादिर्जडः पदार्थो ज्ञातोऽप्यज्ञातोऽपि व्यवहारविषयतामापद्यते, भिन्नभिन्नां चार्थक्रियां साधयति। तदनुसारं ज्ञाताज्ञातयोर्घटयोरपि व्यवहारे परस्परं भेदः। तेन ज्ञाते घटे ज्ञातता नाम कश्चन विशेषो धर्मो येनासावज्ञातादंशतो भेदं भजते। तेन ज्ञातेषु प्रमेयपदार्थेष्वश्यं ज्ञातताख्यो धर्मोऽङ्गीकार्यः, तस्यापि भासमानत्वात्। भासमानतासार एव हि सर्वोऽपि व्यावहारिकः प्रपञ्चः। अनुभूतिश्चात्र प्रमाणं यज्ज्ञातता विषयधर्मतयैव प्रतिभासमाना सती व्यवहारविषयतामायाति। न चात्र कापि शङ्का कर्त्तव्या, यतः स्वतन्त्रः परमेश्वर एवं सर्वत्र सर्वदा तथा तथा भाति, तथा तथा भासनमेव च तस्य परमेश्वरत्वं, लीलामयमानन्दघनं वास्तविकं तत्त्वम्, तस्य भावस्तत्त्वमिति व्युत्पत्तेः। परमेश्वरे एव हि परमेश्वरभावस्य प्रतिष्ठा। यथा नीले नीलतात्मको धर्म आभासते तथैव ज्ञाते नीलादौ ज्ञाततापि। ततो नीलतेव ज्ञाततापि विषयधर्म एव।

तदेतत् सर्वमभिप्रेत्योक्तं तत्र तत्र तन्त्रालोके–

"एवं च नीलता नाम यथा काचित्प्रकाशते ॥
तद्वच्चकास्ति वेद्यत्वं तच्च भावांशपृष्ठगम् ।
फलं प्रकटतार्थस्य संविद्वेति द्वयं ततः ॥"

(तं०आ० 10, 56-57)

प्रकटतार्थगतेति कौमारिलाः ।

संवित् प्रमातृगतेति प्राभाकराः ।

(तं०आ०वि० खं० 7, पृ० 45)

"तथाहि निभृतश्चौरश्चैत्रवेद्यमिति स्फुटम् ॥
बुद्ध्वा नादत्त एवाशु परीप्साविवशोऽपि सन् ।
सेयं पश्यति मां नेत्रत्रिभागेनेति सादरम् ॥
स्वं देहममृतेनेव सिक्तं पश्यति कामुकः ।"

(तं०आ० 10, 58, तः 60)

अन्येन दृश्यमानं चोरणीयत्वेनानुसन्धानविषयीकृतं वस्त्वन्यदेव, तत एव तथाभूतं सन्न चोर्यते। सुन्दर्या प्रेममय्या दृष्ट्या दृश्यमानं कामुकस्य निजं शरीरममृताप्लुतमिवानुभूयते तेन। एतेन पूर्वावस्थातो भिन्नं तदिति तेन दृष्टता वा ज्ञातता वा वस्तुनोऽन्यादृशत्वं जनयतीति स एको विशेषपदार्थो विषयधर्म एव। यथा–

"यथा चार्थप्रकाशात्मज्ञानं संगीर्यते त्वया ॥
तथा तज्ज्ञातृवेद्यत्वं भावीयं रूपमुच्यताम् ।"

(तदेव 10, 66-67)

भावस्यैव विशेषरूपम् इति ।

"अतश्च वेद्यता नाम भावस्यैव निजं वपुः ।"

(उद्ध०तं०आ०वि० खं० 7, पृ० 56)

ज्ञातृत्त्व-कर्तृत्त्वे—— वस्तुतः परस्परमभिन्ने ह्येते। तथापि ज्ञानांशप्राधान्येन ज्ञातृत्वं क्रियांश-प्राधान्येन च कर्तृत्वम्। ज्ञातृत्वं ज्ञाने स्वातन्त्र्यम्। तच्च स्वातन्त्र्यमनपेक्षं कर्तृत्वमेव। ज्ञाने कर्तृत्वमेव हि ज्ञातृत्वम् । यथा–

"ज्ञातृत्वमेव शिवतो स्वातन्त्र्यं तदिहोच्यते ।"

(तं०आ० 14, 27)

"न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया।"

(उद्ध०तं०आ०वि० खं० 8, पृ० 228)

आभासोऽत्र ज्ञानांशो यत्नश्च क्रियांश इति।

~अभिन्ने (परस्परम्)——

द्र० 'ज्ञानक्रिये~अभिन्ने इति।

ज्ञानक्रिये—— स्वात्मन्यवभासनं ज्ञानम्, परत्रावभासयोग्यतासम्पादनं क्रिया। ज्ञानमेव बहिर्विकासं गच्छत् क्रिया

क्रियैवान्तर्मुखतायां ज्ञानम्।

~अपरावस्थायाम्—— स्वतो भिन्नस्य विषयस्येदम्भावेन प्रतीतिर्ज्ञानम्, अन्यैरपि तथा वेद्यतायाः सम्पादनं तस्य करणम्। उभयं विमर्शाश्रितम्। यथा—

"अपरावस्थायां च मायापदे इदम्भावप्राधान्येन वर्तमाने इति विशेषः। सर्वथा तु विमर्श एव ज्ञानम्, तेन विना हि जडभावोऽस्य स्यादिति उक्तम्। स एव च क्रिया।

(ई०प्र०वि० खं० 1, पृ० 338-39)

स इति विमर्शः।

~अभिन्ने—— कर्मरहितं ज्ञानं न भवति, कौशलरहितं ज्ञानरहितं च कर्म न भवति। एवमुभयस्वरूपे उभे। कौशलं च ज्ञानमेव। यथा—

"ज्ञानं कर्मणा रहितं न भवति, कर्म च कौशलोपेतं ज्ञानरहितं न भवति, इत्येकमेव वस्तु ज्ञानकर्मणी। तथा चोक्तम्—

न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया।
ज्ञानक्रियाविनिष्पन्न आचार्यः पशुपाशहा॥"

(उद्ध०भ०गी०सं० पृ० 32)

~अविनाभूते—— न हि क्रियारहितं ज्ञानम्, ज्ञानस्य स्वयं क्रियात्मकत्वेनैव जानातीति तिङ्प्रयोगात्। क्रियापि न ज्ञानरहिता, तद्राहित्येन तस्याः करणस्यैवासम्भवत्वात्। यथा—

ततो हेतोरन्योन्यमवियुक्ते ज्ञानक्रिये प्रकाशविमर्शात्मिके।

(ई०प्र०वि०वि० खं० 3, पृ० 257)

शुद्धसंविद्रूपिण्यां परस्यां ह्यवस्थायां प्रकाशरूपता ज्ञानं विमर्शरूपता क्रिया।

द्र० '~परावस्थायाम्' इति।

~ईश्वरादौ—— अन्तरवभासनं ज्ञानं, बहिरवभासनं क्रिया। सदाशिवभुवि प्रमेयस्य ध्यामलमवभासनं चित्प्रकाश एवान्तर्भूतं सन्मनाक् चकास्ति। ईश्वरभुवि प्रमेयस्य स्फुटेऽवभासे सञ्जाते सति, चित्प्रकाशस्य च गौणतायां प्रक्षेपे सति, तद्बाह्यत्वस्यैव प्राधान्यं सत्यप्यभेदे। एवमेव कुम्भकारस्य घटज्ञाने घटकरणे चाभ्यन्तरतायाः बाह्यतायाश्च स्फुटोऽवभासः।

द्र० '~अभिन्ने' इति।

~एकरूपे—— ज्ञानमेव घनीभूतमिव बहिर्मुखतायां स्फुटतया दृश्यमानतां यातं सत् क्रिया भवति। क्रियाया एव द्रवीभूततेवान्तर्मुखी सूक्ष्मा दशा ज्ञानम्। यदेवान्तः सङ्कल्पादौ स्फुरति, तदेव बहिः करणैः क्रियात्मकतया सम्पाद्यते। ततो ज्ञानमेव स्थूलतामायातं क्रिया भवति। यथा—

"क्रिया हि नाम विज्ञानान्नान्यद् वस्तु क्रमात्मताम्।
उपायवशतः प्राप्तं तत् क्रियेति पुरोदितम्॥"

(तं०आ० 1, 23)

"ज्ञानं गृहीतकठिनत्वगुणं क्रिया स्याज्ज्ञानं भवेद्विरलिमाश्रयिणी क्रियैव॥
ज्ञानस्य सिद्ध्यति विना क्रियया न रूपं
तस्यास्तथैव न हि तेन विनोपलम्भः।
तस्मात्तयोर्यमलतैव मतं हि सैद्धं
पूर्वापरत्व-कलनं त्विह पूर्वपक्षः॥"

(मा०च०वि० 1, 15-16)

तस्मादवियुक्तं ज्ञानं क्रिया च। ज्ञानं विमर्शानुप्राणितं, विमर्श एव च क्रियेति। न च ज्ञानशक्तिविहीनस्य क्रियायोगः।

(ई०प्र०वि० खं० 2, पृ० 189-190)

~ओतप्रोते—— ज्ञानं हि क्रियात्मकं क्रिया च ज्ञानसम्भिन्ना। यथा—

"तत् क्रियापि भवेज्ज्ञानं ज्ञातुर्धर्मो यदुच्यते।
एवं कर्तृस्वभावत्वात् तस्य ज्ञानमपि क्रिया॥"

(म०मं०प० पृ० 130)

~तत्त्वतः —— उभयस्य तत्त्वं संविद्रूप आत्मैव प्रकाशविमर्शमयः। यथा—

यत एव ज्ञानस्यैव क्रिया पुच्छभूता, ज्ञानं च प्रमातुरपृथग्भूतं, संवेद्यभेदात् कल्पितभेदम्।

(ई०प्र०वि०वि० खं० 1, पृ० 105)

~तत्त्वसृष्टौ—— ज्ञानशक्तेर्बहिरभिव्यक्तिः सदाशिवतत्त्वम्, क्रियाशक्तेश्चेश्वरतत्त्वम्। यथा—

(क) "ज्ञानक्रिये सदाशिवेश्वरौ।"

(ई०प्र०वि०वि० खं० 3, पृ० 270)

(ख) तदेवं प्रसृतो देवः कदाचिच्छक्तिमात्रके॥
विभर्ति रूपमिच्छातः, कदाचिज्ज्ञानशक्तितः।
सदाशिवत्वमुद्रेकात्...................... ।"

(शि०दृ० 1, 29-30)

(ग) "कदाचित् पुनर्ज्ञानशक्तिरूपत्वात् सदाशिवरूपं विभर्ति।"

(शि०द०दृ० पृ० 24)

(घ) "........................ कदाचिदैश्वरीं स्थितिम्॥
क्रियाशक्तिसमाभोगात् .... ।

(शि०दृ० 1, 30-31)

(ङ) "ऐश्वरीं तु स्थितिं कदाचित् क्रियाशक्तेः समाभोगात् पर्यन्तप्राप्तविस्तराद् बिभर्तिः।"

(शिवदृ०वृ० पृ० 24)

~परापरावस्थायाम्—— सदाशिवता ज्ञानप्रधानावस्थेश्वरता च क्रियाप्रधाना। यथा—

"परापरावस्थायां तु भगवत्सदाशिवभुवि इदन्तासामानाधिकरण्यापन्नाहन्ताविमर्शस्वभावे।"

(ई०प्र०वि० खं० 1, पृ० 338)

"ततश्चान्तरी ज्ञानरूपा या दशा तस्या उद्रेकाभासने सादाख्यं ....। बहिर्भावस्य क्रियाशक्तिमयस्य परत्वे उद्रेकाभासने सति पारमेश्वरं परमेश्वरशब्दवाच्यमीश्वरतत्त्वं नाम।"

(ई०प्र०वि० खं० 2, पृ० 191-92)

~परावस्थायाम्—— "अहम्" इति संविदात्मकशुद्धप्रकाशविमर्शरूपे। यथा—

"स एव ह्यहम्भावात्मा विमर्शो देवस्य क्रीडादिमयस्य शुद्धे पारमार्थिक्यौ ज्ञानक्रिये। प्रकाशरूपता ज्ञानं तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया। विमर्शश्चान्तःकृतप्रकाशः इति विमर्श एव परावस्थायां ज्ञानक्रिये।"

(ई०प्र०वि० खं० 1, पृ० 338)

द्र० '~अपरावस्थायाम्' इति।

~भूमिकात्रये—— परमेश्वरस्य प्रकाशात्मकतामयी ज्ञानशक्तिरेव विद्याभूमौ सदाशिवदशा, मायाभूमौ चास्फुटतायामशुद्धविद्या, स्फुटतायां च ज्ञानेन्द्रियगणः। तस्य शुद्धविमर्शात्मिका क्रियाशक्तिरप्येवमेव विद्याभूमावीश्वरदशा मायाभूमौ च पूर्ववत् कला कर्मेन्द्रियगणश्च। यथा—

"ज्ञानक्रियाशक्ती एव स्वाभाविक्यावप्ररूढभेदोन्मेषे सदाशिवेश्वरौ, भेदस्य सामान्यतः प्ररोहे विद्याकले, विशेषतः प्ररोहे बुद्धिकर्मेन्द्रियगण इति।"

(ई०प्र०वि० खं० 1, पृ० 44)

~शक्ती—— (1) सदाशिवेश्वरतत्त्वाभिव्यक्तिरूपे। यथा—

"तत्र यथा प्ररूढस्फुटास्फुटेदन्ताप्रकाशने सदाशिवेश्वरता ज्ञानक्रियाशक्तिरूपा।"

(ई०प्र०वि०वि० खं० 3, पृ० 277)

अत्रास्फुटत्वे सदाशिवता स्फुटत्वे चेश्वरतेति ज्ञेयम्। शाब्दक्रमादार्थक्रमस्य बलीयस्त्वादन्यत्रत्यपंक्तिसंवादाच्चेति।

(2) स्पष्टतरं व्याख्याते। यथा—

"स एष द्वयोरपि (शुद्धोऽशुद्धश्च) सर्गः परमशिवस्य भगवतः शक्तिविजृम्भा। ततः सा शक्तिरन्तरवभासमानस्वभावतया ज्ञानशक्तिरुच्यते, बहिर्भावरूपेण तु क्रमोपबृंहितेन विमर्शदार्ढ्येनोपलक्षिता क्रियाशक्तिरिति व्यपदिश्यते।"

यदागमः —

"एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ॥
एवम्भूतमिदं वस्तु भवत्विति यदा पुनः ।
जाता तदैव तत्तद्वत् कुर्वत्यत्र क्रियोच्यते ॥"

(मा०वि०तं० 3, 8)
(उद्ध०ई०प्र०वि०वि० खं० 3, पृ० 262)

"शक्तिशक्तिमतोरभेदाज्ज्ञानशक्तिमान् सदाशिवः, उद्रिक्तक्रियाशक्तिरीश्वर इति।"

(शि०दृ०वृ० पृ० 37)

तेन सदाशिवस्य शक्तिर्ज्ञानात्मिका, ईश्वरस्य च क्रियात्मिकेति।

~स्थौल्य-सौक्ष्म्यतः—— ज्ञानस्य स्थौल्यं क्रिया, क्रियायाः सौक्ष्म्यं ज्ञानम्। यदेवान्तर्ज्ञायते सूक्ष्मतया तदेव बहिः क्रियते स्थूलतया। यथा—

"एवं ज्ञानस्वाभावैव क्रिया स्थूलत्वमात्मनि ।
यतो वहति तेनास्यां चित्रता दृश्यतां किल ॥

(तं०आ० 1, 163)

ज्ञानगर्भम्—— किमप्यागमशास्त्रम्; यथा—

"श्रीज्ञानगर्भेऽपि—
बिहाय सकलाः क्रिया जननि मानसीः सर्वतो
विमुक्तकरणक्रियानुसृतिपारतन्त्र्योज्ज्वलम् ।
स्थितैस्त्वदनुभावतः सपदि वेद्यते सा परा
दशा नृभिरतन्द्रितासमसुखामृतस्यन्दिनी ।" इति।

(स्त०चि०वि० पृ० 5)

ज्ञानगर्भेऽपि—
"मयि स्थितमिदं जगत् सकलमेव सर्वत्र वा,
स्थितोऽहमिति धारणाद्वितभावनावेशतः ।
जगत्त्रितयनाथ तानतिचिरेण सम्प्राप्यते,
नृभिस्तव सपर्यया दलितकिल्विषोपप्लवैः ॥"

(उद्ध०स्पं०नि० पृ० 48)
(उद्ध०स्पं०प्र० पृ० 41)

द्र० च (शि०सू०वि पृ० 51)
(प्र०हृ० पृ० 40-44)
(स्वं०तं०उ०प० 6, पृ० 112)

ज्ञानचन्द्रः —— शिवयोगिनस्तज्ज्ञानं यद्बलेन कौलमार्गानुयायी सुप्रबुद्धो योगी विषयान् भुञ्जानोऽपि स्वरूपविमर्शनानन्दान्न च्यवते। यथा—

"यदुक्तं श्रीचन्द्रज्ञाने—
'येन प्रबुद्धभावेन भुञ्जानो विषयान् स्वयम् ।
न याति पाशवं भावं ज्ञानचन्द्रः स कीर्तितः ॥"

(म०मं०प० पृ० 160)

~ग्रन्थः—— द्र० उपरि।

ज्ञानदीक्षा—— असौ दीक्षा यस्यां गुरुर्न योगं नापि क्रियां शिक्षयति, अपितु स्वं शिष्यमित्थं बोधयति—

'त्वमेव तावत्संविद्घनः परमेश्वरः। त्वय्येव सर्वः प्रपञ्चोऽवभासते तवैव शक्त्या। त्वमेव चास्य प्रपञ्चस्य स्वयं विधाता। ततस्त्वं परमेश्वर एवेति। एवं सानुग्रहशक्तिपातमुपदिश्यमानः शिष्यः सद्य एव स्वात्मप्रत्यभिज्ञां लभते एवंविधया ज्ञानदीक्षया। अस्यां गुरोरनुग्रहशक्तिपातस्यैव प्राधान्यम्। यथा—

"संविद्घनस्तेन परस्त्वमेव
त्वय्येव विश्वानि चकासति द्राक् ।
स्फुरन्ति च त्वन्महसः प्रभावात्
त्वमेव चैषां परमेश कर्त्ता ।'

(प०च० 6)

तस्य च न मन्त्रपूजाध्यानचर्यादिनियन्त्रणा काचित् ।

(तं०सा० पृ० 9)

~सर्वोत्तमा—— ज्ञान्यत्र ज्ञानदीक्षाप्रदोऽनुग्रहकरणसमर्थो गुरुः।
......................तस्माज्ज्ञान्युत्तमोत्तमः ।

(तं०आ० 15, 11)

~साक्षाद्विमोचिका—— सम्यग्ज्ञानस्वभावा हि विद्या साक्षाद्विमोचिका॥

(तं०आ० 15, 9)

ज्ञानभेदाः —— अष्टप्रकाराः।

"तारं सुतारं तरणं तारकं च प्रमोदकम् ।
प्रमुदितं रम्यकं च सदाप्रमुदितं तथा ॥
एतज्ज्ञानं समाख्यातं समासात्परमेश्वरि ।'

(स्व०तं० 11, 146-47)

एतेषां नामान्येव परिगणितानि, न लक्षणान्युक्तानि तन्त्रे वा उद्द्योते वा।

ज्ञानम्—— बहुप्रकारकोऽवबोधः। तत्र—

(1) अवबोधात्मकं प्रकाशनम्, सामान्यतो ज्ञानम्।

(2) अवबोधात्मिका प्रकाशनक्रियापि ज्ञानं जानातीत्यादिरूपम्। यथा—

"यदुक्तमन्यत्र—
'न क्रियारहितं ज्ञानं न ज्ञानरहिता क्रिया ।
क्रियाज्ञानविनिष्पन्न आचार्यः पशुपाशहा॥' इति।

(उद्द्यो०ने०तं०उ०, खं० 2, पृ० 42)

(3) शास्त्रतत्त्वाबोधात्मकम्। उत्कृष्टमेतत् ।

(4) शुद्धविकल्पात्मकम्। सत्यमेतज्ज्ञानम् ।

(5) स्वरूपसाक्षात्कारात्मकम् परतरमेतज्ज्ञानं निर्विकल्पकम् ।

एवंविधेष्वर्थेषु ज्ञानपदस्य बहुधोपयोगः शास्त्रेषु।

~अतिमार्गम्——(1) पाशुपतानां यदतिमार्गं ज्ञानं तत्तु बुद्धिधर्मेभ्योऽतीतत्वेनैवातिमार्गमित्युच्यते। तस्य लोकाचारसरणेर्यतोऽतिक्रान्तत्वं, ततस्तदतिमार्गम् इति। यथा—

"अतीतं बुद्धिभावानामतिमार्गं प्रकीर्तितम् ।
लोकातीतं तु तज्ज्ञानमतिमार्गमिति स्मृतम् ॥"

(स्व०तं०प० 11, 182)

(2) पशुभावातीतानां पाशुपतयोगिनां यतस्तज्ज्ञानं ततोऽप्यतिमार्गम्। यथा—

"लोकाश्च पशवः प्रोक्ताः सृष्टिसंहारवर्त्मनि ।
तेषामतीतास्ते ज्ञेयाः येऽतिमार्गे व्यवस्थिताः।"

(तदेव 183)

(3) कापालिकानां पाशुपतानां च तज्ज्ञानं यत् सनिश्चयं संसृतिसकाशान्मुक्तिप्रदमस्ति। यथा—

"कपालव्रतिनो ये च तथा पाशुपताश्च ये ।
सृष्टिर्न विद्यते तेषामीश्वरे च ध्रुवे स्थिताः॥
यस्मान्मोक्षं गमिष्यन्ति ह्यपुनर्भवकारणम्।"

(तदेव 184-185)

~अनन्योपायम्—— शाम्भवोपायं ज्ञानम्। यथा—

"संहृत्य सर्वतश्चिन्तामहमित्यनुशीलयन् ।
अविकल्पां स्वसंवित्तिं प्रत्यक्षां प्रतिपद्यते ॥
अनन्तैतावदाकारस्वीकारेऽप्येकलक्षणाम् ।
तां स्वसंविदमाविश्य विकल्पान्न विकल्पयेत् ॥
खेचर्यादिचतुस्स्रोतोवाहपूर्णां महाह्रदम् ।
व्योमेश्वरीमात्मचितिं विगाह्य ब्रोडयेज्जडम् ॥"

(प०पं० 21 तः 23)

अहमित्यनेन शुद्धोऽपरिमितश्चिदानन्दमात्रात्मकः स्वात्मपरशिवोऽभिप्रेतोऽत्र, न देहादिः। प्रत्यक्षपदेनापरोक्षसाक्षात्कारोऽभिप्रेतः प्रत्यक्षाद्वैतमपि वेति वेद्यम् ।

~अनुग्रहफलम्—— पारमेश्वरमनुग्रहं विना सहस्रधा परिचिन्तिता अपि मोक्षशास्त्रसिद्धान्ता न दृढेन निश्चयेन बुद्धौस्थानं लभन्ते, न चाप्यनुभूयन्ते साक्षात्। यथा—

"समुज्ज्वलन्न्यायसहस्रसाधितो—
ऽप्युपैति सिद्धिं न विमूढचेतसाम् ।
महेश्वरः पाणितलस्थितोऽपि सन्
पलायते दैवहतस्य सन्मणिः ॥"

(ई०सि० 55)

अनुग्रहशक्तिपातवञ्चिता एवात्र विमूढचेतसः इत्युक्ताः।

~अष्टविधम्——शास्त्रतत्त्वविषयं ज्ञानं नामभेदतः परिसंख्यातम्, न पृथक् पृथग् लक्षितं तन्त्रे वा तद्व्याख्याने वा। यथा—

"तारं सुतारं तरणं तारकं च प्रमोदकम् ।
प्रमुदितं रम्यकं च सदा प्रमुदितं तथा ॥
एतज्ज्ञानं समाख्यातं समासात् परमेश्वरि ।"

(स्व०तं० 11, 146-47)

यत् पूर्वं पुंस्तत्त्वभुवननिर्णयावसरे "तारा चैव सुतारा च........ .... 10-1071, इत्यादि सिद्ध्यपेक्षया स्त्रीपाठेनोक्तं, तत् सांख्योक्तोहादिरूपसिद्ध्यष्टकं ज्ञानविशेषमित्याशयेन।"

(स्व०तं०उ०, खं० 6, पृ० 87)

तारा चैव सुतारा च तारयन्ती प्रमोदिका ।
प्रमोदिता मोदमाना रम्यका च ततः परम् ॥
सदा प्रमुदिता चैव सिद्ध्यष्टकमुदाहृतम् ।"

(स्व०तं०प० 10, 1071-72)

~आत्मधर्मः —— देहादिकृतसंकोचा संविदेवात्मा। तस्या बहिः प्रमेयोपरागरहितत्त्वे बहिः सङ्कोचराहित्यम्। परं बाह्यविषयसम्बन्धेनासौ ज्ञानरूपतां धारयन्ती बहिरपि संकोचमुपयाति। तस्यास्तस्मिन् ज्ञानात्मनि संकुचिते रूपे व्यापकमान्तरमसंकुचितं रूपम्। इत्थमन्तः संकुचिते मायाप्रमातृरूपे आत्मनि ज्ञानात्मकं बहिः संकुचितं तस्या रूपमवतिष्ठत इत्यात्मधर्मत्वं ज्ञानस्य। यथा–

"तस्मात् संविदेव प्रमातृरूपाऽन्तःशरीरप्राणशून्यादिकावच्छेदपरिगृहीतसंकोचापि बहिर्मुखानवच्छेदाद् बहिरलब्धसंकोचा मायाप्रमातृरूपा। बहिरपि तु लब्धसंकोचतायां ज्ञानरूपा। तत्रापि बहिरसंकुचितं रूपमनुयायि भासत एव। अन्यथानुसन्धानायोगात्। इति ज्ञानमात्मधर्म उच्यते।"

(ई०प्र०वि०वि० खं० 1, पृ० 257)

~आत्मोपायम्—— द्र० 'ज्ञानम्~अनन्योपायम्' इति।

~इच्छात्मकम्—— आध्यात्मिकमेतज्ज्ञानम्। यो हि निर्विकल्पस्वात्मपरमेश्वरतासाक्षात्कारः स एवेह ज्ञानम्। तस्य स्वरूपम् इच्छोपायकः स्वात्मसाक्षात्कारः। इच्छोपायसाध्यं ज्ञानम्। शाम्भवोपायजं ज्ञानम्। यथा–

"तत्राद्ये स्वपरामर्शे निर्विकल्पैकधामनि।
यत् स्फुरेत् प्रकटं साक्षात् तदिच्छाख्यं प्रकीर्तितम्।"

(तं०आ० 1, 146)

अव्यवधानेच्छाशक्तिस्फाररूपः शाम्भवाख्य उपाय उक्तः।

(तं०आ०वि० खं० 1, पृ० 186)

~इच्छोपायम्—— इच्छाख्यमेव ज्ञानम्। इच्छाशक्तिप्रयोगवशतः उद्बुध्यमानः स्वात्मसाक्षात्कारः। शाम्भवयोगाभ्याससाध्यमात्मशिवताज्ञानम्। यथा–

उपायान्तरनिरपेक्षत्वाद् अव्यवधानेच्छाशक्तिस्फाररूपः शाम्भवाख्य उपाय उक्तः इत्यर्थः।

(तं०आ०वि० खं० 1, पृ० 186)

द्र० '~इच्छात्मकम्' इति।

~उपायरूपम्—— ज्ञानमेव ज्ञानस्योपायः। अपूर्णं ज्ञानं पूर्णस्य ज्ञानस्य। तत्र क्रियात्मकं स्थूलं ज्ञानमाणवम्। तस्य च शाक्तं ज्ञानं प्रत्युपायता। तच्च शाक्तं सूक्ष्मं सद् ज्ञानात्मकम्। तदिच्छात्मकस्य परस्य शाम्भवस्य ज्ञानस्योपायभूतम्। इत्यधराधरं ज्ञानमुपाय उत्तरोत्तरस्य ज्ञानस्य। अधराधरमपेक्षपयाऽपूर्णम्, उत्तरोत्तरं चापेक्षया पूर्णम्। परिपक्वमिच्छात्मकं ज्ञानं तु सर्वथा परिपूर्णम्। तदेवानुपायं ज्ञानम्। तच्च शाम्भवस्य परिपक्वतात्मकं परं स्वरूपं, न पुनर्ज्ञानान्तरं किमपि। यथा–

"ज्ञानस्य चाभ्युपायो यो न तदज्ञानमुच्यते।
ज्ञानमेव तु तत् सूक्ष्मं परं त्विच्छात्मकं मतम्॥"

(तं०आ० 1, 144)

"अतः परं शाम्भवमित्यर्थः। अत एवेच्छात्मकमित्युक्तम्। शाक्ताणवयोर्हि ज्ञानक्रियात्मकत्वं भवेत्॥"

(तं०आ०वि० खं० 1, पृ० 183-84)

एतत् सर्वमुपायत्रयस्येच्छा-ज्ञान-क्रियोपायत्व-दृष्ट्या प्रतिपादितं जयरथेन।

~कम्प्रम्—— यज्ज्ञानं न पूर्णतया हृदयङ्गमीभावमापन्नं भवति तदज्ञानसंस्कारवशादस्थिरविश्वासमिव भवति। सैषा ज्ञानस्य कम्प्रता या जीवन्मुक्तिनिरोधिनी। यथा–

"तत्र ये कम्प्रविज्ञानास्ते देहान्ते शिवाः स्फुटम्।"

(तं०आ० 28, 303)

न सति देहे इति।

~कालीनये—— कलनाविशेषात्मकम्। स्वात्मनः सकाशाद् भेदितस्यापि विषयस्य निर्विकल्पमस्फुटमंगुलिनिर्देशमात्रकल्पम् "इदमिति" रूपतयावभासनम्। नैतद्विशिष्टाभिलापसम्भिन्नमपि तु सामान्यायमानमेवेदमिति। यथा–

"................................. भेदितस्याविकल्पनम्।
ज्ञानं... ॥"

(तं०आ० 4, 173)

"अविकल्पनमिति-स्वात्माभेदेन परामर्शः।"

(तं०आ०वि० खं० 3, पृ० 204)

एतच्च वर्तमाने युगे **Sensation** इति कथ्यते। इन्द्रियार्थसन्निकर्षमात्रजन्यं बौद्धाध्यवसायशून्यमेतज्ज्ञानम्।

~केवलम्—— केवलं बौद्धमेव केवलं पौरुषमेव वा। केवलेन बौद्धेन ज्ञानेन वचनपटुतात्मकं वैदुष्यमेव लभ्यते। नाभीष्टे भुक्तिमुक्ती।

केवले पौरुषे ज्ञाने समुदिते सति बुद्धिनिष्ठाः याः विचिकित्सास्ता न शाम्यन्ति कदाचित्ताः पौरुषं ज्ञानं सम्पन्नमपि पुनराविलयन्ति स्थगयन्ति वा। तद्यथा– बौद्धज्ञानेन विना पौरुषं ज्ञानं यावज्जीवं स्फुटतां नैव याति। धीगताः संशयाः पौरुषं ज्ञानमप्रधानतां नयन्ति। बौद्धं च ज्ञानं पौरुषे ज्ञाने सत्येव स्थिरतां याति, अन्यथा वितर्कमात्रसारता तस्य। ततः केवलं बौद्धं वा पौरुषं वापि न पूर्णफलप्रदम्। यथा–

"तत्र दीक्षादिना पौंस्नमज्ञानं ध्वंसि यद्यपि।
तथापि तच्छरीरान्ते तज्ज्ञानं व्यज्यते स्फुटम्॥"
बौद्धज्ञानेन तु यदा बौद्धमज्ञानजृम्भितम्।
विलीयते तदा जीवन्मुक्तिः करतले स्थिता॥

(तं०आ० 1, 43-44)

दीक्षापि बौद्धविज्ञानपूर्वा सत्यं विमोचिका।
तेन तत्रापि बौद्धस्य ज्ञानस्यास्ति प्रधानता॥

(तदेव 1, 45)

दीक्षया गलितेऽप्यन्तर्विकल्पे पौरुषात्मनि।
धीगतस्यानिवृत्तत्वाद्विकल्पोऽपि हि सम्भवेत्॥

देहसद्भावपर्यन्तमात्मभावो यतो धियि ।
देहान्तेऽपि न मोक्षः पौरुषाज्ञानहानितः ॥"

(तदेव 1, 48-49)

"केवलेन पुनस्तेन न किञ्चित्सेत्स्यति ।"

(तं०आ०वि० खं० 1, पृ० 57)

~क्रियाकलापविषयम्—— दीक्षासम्बन्धिनीनां रहस्यभूतानां विधीनां सम्पादने पटुत्वम् । तच्च शास्त्रविधिज्ञतायां प्रवीणस्यैव गुरोर्भवति ।

~आवश्यकम्—— क्रियाकलाप-मन्त्र-मण्डल-मुद्रादि-प्रवीण एव गुरुः शिष्याय योजनिकादिना भुक्तिप्रदः, शिवहस्तादिविधिप्रपञ्चेन च मोक्षदो भवति। ततः शास्त्रोक्तक्रियाकलापविधिज्ञानमावश्यकं गुरोः कृते, शिष्यस्यापि च कृते, येनासावपि तत्र तत्र क्रियासु पूर्णं सहयोगं दातुं प्रभवेत्। यथा—

"योगी तु प्राप्ततत्त्वसिद्धिरप्युत्तमे पदे ।
सदाशिवाद्ये स्वभ्यस्तज्ञानित्वादेव योजकः ॥"

(तं०आ० 13, 329)

"यतश्च मोक्षदः प्रोक्तः स्वभ्यस्तज्ञानवान्बुधैः ॥"

(तदेव 332)

स्वभ्यस्तज्ञानवानेव गुरुर्मोक्षप्रदः ।"

(तं०आ०वि० खं० 8, पृ० 199)

~क्रियोपायम्—— क्रियैवोपायो यस्य तत् क्रियोपायं ज्ञानम्। प्रमेयात्मकालम्बननिष्ठेन भावनाभ्यासेनोद्बुध्यमानः स्वात्मसाक्षात्कारः। आणवोपायात्मकेन क्रियायोगेन साध्यं स्वात्मशिवता ज्ञानम्। यथा—

"यत्तु तत्कल्पनाक्लृप्तबहिर्भूतार्थसाधनम् ।
क्रियोपायं तदाम्नातं भेदो नात्रापवर्गगः ॥"

(तं०आ० 1, 149)

क्रियाशक्तिस्फारात्मकाणवोपायसमधिगम्यं सर्वागमेषूक्तम् ।

(तं०आ०वि० खं० 1, पृ० 187)

~चतुर्विधम्—— (1) श्रौतम् (2) मन्दं चिन्तामयम् (3) स्वभ्यस्तं चिन्तामयम् (4) भावनामयम् इति चत्वारः प्रकाराः ज्ञानस्योत्तरोत्तरमुत्कृष्टा इति यथा—

"श्रौतं चिन्तामयं द्वयात्मभावनामयमेव च ।
ज्ञानं तदुत्तरं ज्यायो यतो मोक्षैककारणम् ॥"

(तं०आ० 13, 327)

~चित्स्वभावम्—— (1) ज्ञानं चिद्रूपतया स्वस्वभावतश्चेतनं सङ्कोचहीनं च। तस्य विषयांशे एव जडता, न संविदंशे। असौ विषयांशोऽपि स्वातन्त्र्यपर्यायतदैश्वर्योद्भावितः। ततो ज्ञानं वस्तुतश्चित्स्वभावम्। यथा—

अजडमेव चासङ्कुचितरूपं ज्ञानम्-तत्स्वातन्त्र्यावभासितज्ञेयोपरागवशात् त्वस्य सङ्कोचावभासः।

(ई०प्र०वि० खं० 2, पृ० 3-4)

(2) स्वसंविन्मात्ररूपत्वं स्वप्रकाशत्वं ज्ञानस्य स्वभावः । यथा—

तथा च ज्ञानस्य स्वसंविन्मात्ररूपत्वमन्यतो जडाद् व्यावर्तकमिति स एव तस्य स्वभावः।

(ई०प्र०वि०वि० खं० 2, पृ० 44)

~चिन्तामयम्—— शास्त्राभ्यासजन्यं बौद्धाध्यवसायात्मकं व्यावहारिकं वस्तुस्थितेर्ज्ञानम्। नैतत् मुक्तिप्रदं सर्वदा। यथा—

"इदमत्रेदमत्रेति इदमत्रोपयुज्यते ॥
सर्वमालोच्य शास्त्रार्थमानुपूर्व्या व्यवस्थितिः ।
तच्च चिन्तामयं ज्ञानम्......................॥"

(उद्ध०तं०आ०वि० खं० 8, पृ० 196)

शास्त्राध्ययनचिन्तनजन्यमेतज्ज्ञानम् ।

~द्विप्रकारकम्—— यथा—

"तच्च चिन्तामयं ज्ञानं द्विरूपमुपदिश्यते ।
मन्दस्वभ्यस्तभेदेन तत्र स्वभ्यस्तमुत्तमम् ॥

(उद्ध०तं०आ०वि० खं० 8, पृ० 196)

स्वभ्यस्तमेव हि मुक्तिप्रदम् ।
मन्दस्य तिरोधानमपि भवेद् व्यवहारपतितत्वेन।

~ज्ञानवैराग्यसम्बद्धम्—— तद्धि सांख्यशास्त्रीयं ज्ञानम् । ज्ञानपदेनात्र शास्त्रसिद्धान्ताभिज्ञत्वमभिप्रेतम् ।

द्र० 'ज्ञानम्~सांख्यानाम्' इति।

~ज्ञानवैराग्यैश्वर्यनिष्ठितम्—— तद्धि पातञ्जलानां ज्ञानम्।

द्र० 'ज्ञानम्~पातञ्जलम्' इति।

~ज्ञानान्तरावेद्यम्——

द्र० 'परचित्तज्ञानम्' इति।

द्र० (ई०प्र०वि०वि० खं० 2, पृ० 43)

~ज्ञानोपायम्—— स्वात्मपरमेश्वरस्य विषये यद्विकल्पात्मकं ज्ञानं तस्याभ्यासेन यः स्वात्मपरमेश्वरतासाक्षात्कारसुनिश्चयः स एव ज्ञानोपायकं ज्ञानमित्युच्यते। ज्ञानयोगजं ज्ञानं तत्, शाक्तोपायजं वेति बोध्यम्। यथा—

"भूयो भूयो विकल्पांशनिश्चयक्रमचर्चनात् ।
यत् परामर्शमभ्येति ज्ञानोपायं तु तद्विदुः ॥"

(तं०आ० 1, 148)

"ज्ञानशक्तिस्फारात्मकं शाक्तमुपायं जानीयुः ।
इह हि विकल्प एव क्रमेण निर्विकल्पतामेति॥"

(तं०आ०वि० खं० 1, पृ० 187)

~त्रिप्रकारकम्—— ज्ञानं तावत् त्रिप्रकारम् – श्रुतं, चिन्तामयं, भावनामयं चेति। यथा—

"ज्ञानं तत् त्रिविधं प्रोक्तं तत्राद्यं श्रुतमिष्यते ।
चिन्तामयमथान्यच्च भावनामयमेव च ॥"

(मा०वि०तं० 4, 28)

चिन्तामयस्यैवान्यत्र पुनर्विश्लेषणेन द्विप्रकारकत्वं ज्ञानस्योक्तं प्राक् ।

~त्रिप्रत्ययम्—— गुरुतः शास्त्रतः स्वतः इति त्रिप्रकारक-स्रोतःसम्प्राप्तं ज्ञानं परिपूर्णं भवत् त्रिप्रत्ययमित्युच्यते। यथा—

"तेन श्रीकिरणोक्तं यद् गुरुतः शास्त्रतः स्वतः ॥
त्रिप्रत्ययमिदं ज्ञानमिति यच्च निशाटने ।
तत्संघातविपर्यासि विग्रहैर्भासते तथा ॥

(तं०आ० 4, 78-79)

~त्रिस्रोतसम्—— यतो ज्ञानस्य त्रीणि स्रोतांसि—(1) गुरुः, (2) शास्त्रम्, (3) स्वानुभूतिश्च। तेषूत्तरोत्तरमुत्कृष्टं, पूर्वं पूर्वं च तदपेक्षयोपायभूतम्। यथा—

"किरणायां यदप्युक्तं गुरुतः शास्त्रतः स्वतः ॥
तत्रोत्तरोत्तरं मुख्यं पूर्वपूर्व उपायकः ।"

(तं०आ० 4, 41-42)

"श्रीमन्निशाटने चात्मगुरुशास्त्रवशात्त्रिधा ।
ज्ञानं मुख्यं स्वोपलब्धिविकल्पार्णवतारणम् ॥

(तं०आ० 13, 197)

~द्विप्रकारकम्—— एकं तावद् बुद्धिगुणरूपं ज्ञानमध्यवसायात्मकमपरं पुनः शुद्धं स्वात्मसाक्षात्कारात्मकमविकल्पं प्रकाशविमर्शमयं दर्शनम्। तत्र पूर्वं व्यावहारिकं, परं च पारमार्थिकम् ।

द्र० 'त्रिनेत्रता' इति।

~द्विवर्गकम्—— तत्र संकुचितदृष्टिमयं विकसितदृष्टिमयं चेति वर्गद्वयात्मकं शास्त्रज्ञानम्। उभयं परमेश्वरप्रोक्तमपि तदधिकारिभेदानुकूलत्वदृष्ट्या द्विधा प्रोक्तम्। सङ्कोचयुक्तमवरेभ्योऽधिकारिभ्यो, विकासमयं चोत्तमाधिकारिभ्य इति। यथा—

यतो यद्यपि देवेन वेदाद्यपि निरूपितम् ।
तथापि किल सङ्कोचभावाभावविकल्पतः ॥

(तं०आ० 4, 252)

~धर्मज्ञाननिबद्धम्—— तद्धि वेदोक्तं पाञ्चरात्रागमोक्तं च ।

द्र० 'ज्ञानम्~पाञ्चरात्रम्' इति।

~धर्ममात्रनिबद्धम्—— तच्च लौकिकं धर्मशास्त्राद्युक्तं परम्पराप्राप्तं च ज्ञानं विधिनिषेधविषयम् ।

द्र० 'ज्ञानम्~लौकिकम्' इति।

~न कर्मजम्——

"नहि कर्मास्ति तादृक्षं येन ज्ञानं प्रवर्तते ।
कर्मजत्वे च तज्ज्ञानं फलराशौ पतेद्ध्रुवम् ॥"

(तं०आ० 13, 11)

मोक्षात्मकस्य ज्ञानस्य विषयेऽयं नियमः ।

~पतिज्ञानम्—— अभेदोन्मुखमभेदनिष्ठं च ज्ञानं पतिज्ञानम्। यथा—

"विकासतारतम्येन पतिज्ञानं तु बाधकम्।"

(तं०आ० 4, 253)

"विकासः संकोचाभावादभेदप्रथा ।
अत एव भेदप्रथाया बाध्यत्वादिदं बाधकम् ॥

(तं०आ०वि० खं० 3, पृ० 282)

~परापररूपम्—— पररूपमेकमपररूपं च द्वितीयम्। तथा हि — प्रतिबिम्ब-कल्प-विश्व-भाव-खचितस्य स्वात्मनो यदविकल्पमद्वयात्मकं ज्ञानं तदेव परं ज्ञानम्। तच्च शाम्भवोपायतः समुदेति। विकल्पात्मकं यदहमेवेदं सर्वमित्यादिरूपं ज्ञानं तदपरम्। तच्च शाक्ताणवोपायजाततः समुद्दीप्यते। यथा—

"विश्वभावैकभावात्मस्वरूपप्रथनं हि यत् ।
अणूनां तत्परं ज्ञानं तदन्यदपरं बहु ॥"

(तं०आ०1, 141)

"अविकल्पवृत्त्या साक्षात्करणं तदेवाणूनां परं पूर्णं पारमेश्वरं ज्ञानम्, तत एवंविधात् पूर्णाद्ज्ञानादन्यद् विकल्पात्मकं शाक्तादिज्ञानमपरम्।'

(तं०आ०वि० खं० 1, पृ० 181)

मोक्षात्मकस्य ज्ञानस्य प्रकाराविमौ।

~पाञ्चरात्रम्—— धर्मेण ज्ञानेन चेति द्वाभ्यां बुद्धिगुणाभ्यां प्राधान्येन निबद्धं यज्ज्ञानं तत् पाञ्चरात्रागमप्रोक्तं, वेदोक्तं च। यथा—

"धर्मज्ञाननिबद्धं तु पाञ्चरात्रं च वैदिकम् ।

(स्व०तं०प० 11, 180)

~पातञ्जलम्—— तद्धि ज्ञानवैराग्यैश्वर्यात्मकैस्त्रिभिर्बुद्धिगुणैः सम्बद्धम्। यथा—

ज्ञानवैराग्यमैश्वर्यं योगज्ञानप्रतिष्ठितम् ।

(स्व०तं०प० 11, 181)

~पारमार्थिकम्—— शाम्भवाद्युपायोद्भासितं स्वात्मसाक्षात्काररूपं मोक्षात्मकं ज्ञानम्। एतच्च तन्त्रालोके प्रथम आह्निके विस्तरतः प्रतिपादितम्।

द्र० (तं०आ०आ० 1, का 2 तः 51 यावत्)

~पाशवम्—— सङ्कोचतारतम्ययुतं बहुतरं भेदात्मकं शास्त्रज्ञानम्। यथा—

"संकोचतारतम्येन पाशवं ज्ञानमीरितम्।"

(तं०आ० 4, 223)

"तेन संकोच-भावाभाव-भेदेन द्विधा शास्त्राण्युपदिष्टानि। कानिचिद् भेदप्रधानानि इति। तत्र भेदप्रधानानि वेदादीनि शास्त्राणि अभेदप्रधानानि च शैवादीनि।

(तं०आ०वि० खं० 3, पृ० 282)

~पाशुपतम्—— तद्धि बुद्धिगुणातीतं लोकातीतं संसृतिविमुक्तिप्रदं च। अत एवातिमार्गाख्यम् ।

द्र० 'ज्ञानम्~अतिमार्गम्' इति।

~पौरुषम्—— (1) वास्तविकस्य स्वस्वरूपस्यासौ निर्विकल्पः साक्षात्कारो यत्र स्वात्मा शुद्धोऽसंकुचितः परिपूर्णः पारमेश्वर्यशक्तिसम्पन्नश्च स्पष्टं साक्षाद् विमृश्यते संविन्मात्रस्वरूपः' इति। आणवादिमलापहारतः समुदेति पौरुषं ज्ञानम्। मलापहारश्च शाम्भवाद्युपायतो वा गुर्वनुग्रहतोऽपि वा भवति।

(2) गलितेष्वाणवादिमलेषु क्षीणेषु च पशुतोचितेषु संस्कारेषु योगी निर्विकल्पतया स्वात्मानं शिवतया साक्षाद् यज्जानाति तज्ज्ञानमस्य पौरुषम्। तच्च गुर्वनुग्रहतो वोपायतोऽपि लभ्यम्। यथा–

"क्षीणे तु पशुसंस्कारे पुंसः प्राप्तपरस्थितेः ।
विकस्वरं तद्विज्ञानं पौरुषं निर्विकल्पकम् ॥

(तं०आ० 1, 41)

विकस्वरं– पराहन्ताविमर्शात्मकं निर्विकल्पकं कृत्रिमाहंकारादिविकल्पविलक्षणं ज्ञानं पौरुषं भवति।

(तं०आ०वि० खं० 1, पृ० 78)

सानुग्रहया दीक्षया पौरुषेऽज्ञाने गलिते सति पौरुषं ज्ञानमुदेति, परं शरीरान्तं यावदज्ञानसंस्कारावृतत्वेन तन्नैव स्फुटतां याति। पतिते देहे स्फुटमभिव्यक्तं भवति। तीव्रमध्यशक्तिपातफलमेवंविधं पौरुषं ज्ञानम् । यथा–

"तीव्रमध्ये तु दीक्षायां कृतायां न तथा दृढाम् ॥
स्वात्मनो वेत्ति शिवतां देहान्ते तु शिवो भवेत् ।"

(तं०आ० 13, 240-41)

मोक्षात्मकस्य ज्ञानस्य विशेषोऽयम् ।

~बौद्धम्—— (1) "अहं तु वस्तुतो अनवच्छिन्नशुद्धसंविन्मात्रस्वरूपः, सर्वथा स्वतन्त्रः, सर्वं ज्ञातुं कर्त्तुं च समर्थः सन् स्वेच्छया स्वविलासलीलया विश्वरूपतयाऽऽभासमानः, स्वैरं च पञ्चकृत्यक्रीडापरः परमेश्वर एव" इत्येवम्भूतो विकल्पात्मको यः शुद्धाध्यवसायरूपो निश्चयोऽसौ बौद्धं ज्ञानम्। निर्विकल्पस्वात्मसाक्षात्कारसमाश्रयतः समुदितमिदं विकल्पात्मकं यथार्थं ज्ञानम्, न पुनः स्वसङ्कल्पजन्यं व्यावहारिकाध्यावसायरूपं कल्पनात्मकम्। तत्त्वनेकेषां विंदुषां भवति। परं न ते मुक्ता भवन्ति। तस्य कल्पनामात्रोत्थिततत्वं यतो, न स्वात्मसाक्षात्कारोत्थिततत्वम्। यथा–

"विकस्वराविकल्पात्मज्ञानौचित्येन या वसा ।
तद्बौद्धं यस्य तत् पौस्नं प्राग्वत् पोष्यं च पोष्टृ च॥"

(तं०आ० 1, 42)

(2) पौरुषबौद्धज्ञानयोः परस्परं पोष्टृपोष्यभावो वर्तते। शुद्धविकल्पज्ञानोचितं यद्बौद्धमध्यवसायात्मकं स्वात्मशिवताज्ञानं तद्बौद्धम् बुद्धिवृत्तिरूपत्वात्। यथा–

अतश्च "सर्वो ममायं विभवः" इत्येवं रूपत्वमस्याः।

(तं०आ०वि० खं० 1, पृ० 79)

(3) केवलं पठनपाठनादिनार्जितं विकल्पात्मकं बौद्धं ज्ञानं नात्र ज्ञानत्वेनाभिहितम्; अपि त्वात्मसाक्षात्कारमूलं मोक्षात्मकं शुद्धं विकल्पज्ञानमिति बोध्यम्।

~बौद्धार्हतादिरूपम्—— यत्तु केवलेन वैराग्येणैव निबद्धं यज्ज्ञानं तद्बौद्धार्हतशास्त्रेषु। यथा–

"बौद्धमारहतं चैव वैराग्येणैव सुव्रते।"

(स्व०तं०प० 11, 180)

~भावनामयम्—— उक्तं यथा–

"सुनिष्पन्ने ततस्तस्मिन् जायते भावनामयम् ।
यतो योगं समासाद्य योगी योगफलं लभेत् ॥"

(उद्ध०तं०आ०वि० खं० 8, पृ० 196)

शाक्तोपायात्मकभावनायोगजन्यं ज्ञानमेतन्मोक्षात्मकम् ।

~मोक्षात्मकम्—— (1) तद्धि निजैश्वर्यरूपायाः पञ्चकृत्यकर्तृतायाः स्वसंवेदनेनानुभूतिः न केवलं शून्यप्रायायाः स्वस्य विश्वोत्तीर्णतायाः प्रकाशः। तुर्यातीतदशायामप्यन्तरहमिति विमर्शनात्मकं स्वैश्वर्यस्पन्दनं सञ्चेत्यत एव सुधीभिः ततो विश्वोत्तीर्णतायामप्यैश्वर्यचमत्कारो वर्तत एव, यद्यपि विशेषस्फुटतां न याति। तदेवम्भूतः स्वात्मपरमेश्वरतायाः साक्षात्कार एव तज्ज्ञानं यन्मोक्षत्वेन वर्ण्यते शैवशास्त्रेषु। यथा–

"यच्च कर्तृताया मुख्यत्वम्-उन्मग्नता, इदमेव ज्ञानमज्ञानात्मकमलप्रतिपक्षत्वात्।"

(ई०प्र०वि०, खं० 2, पृ० 232)

~मोक्षाभिन्नम्~—— स्वस्वरूपसाक्षात्कारात्मकं ज्ञानमेव हि मोक्षः। या खलु ज्ञानमोक्षयोः परस्परं हेतु-फल-कल्पना सा तु गौणी न मुख्यतयाभिप्रेता। यथा–

"मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः ।
स्वरूपं चात्मनः संविन्नान्यत् तत्र तु या पुनः॥
क्रियादिकाः शक्तयस्ताः संविद्रूपाधिका नहि ।
असंविद्रूपतायोगाद् धर्मिणश्चानिरूपणात् ॥"

(तं०आ० 1, 156-57)

मोक्षो हि ज्ञानमेव। ज्ञानं चात्मनः साक्षात्कारः। आत्मन इच्छाज्ञानक्रियाणां साक्षात्काररूपो यो मोक्षः सोऽपि स्वात्मज्ञानमेव; इच्छादीनां शक्तीनां स्वात्मरूपत्वादेवेति ज्ञानमेव स्वयं मोक्षः, इति तात्पर्यम्। यथा–

"यतो ज्ञानेन मोक्षस्य या हेतुफलतोदिता ।
न सा मुख्या.............................. ॥"

(तं०आ० 1, 162)

~लौकिकम्—— (1) लौकिकं ज्ञानं केवलं धर्मेणैकेनैव निबद्धं भवति। तच्च विधिनिषेधादिरूपं शास्त्रज्ञानम्। यथा–

"धर्मेणैकेन देवेशि बद्धं ज्ञानं हि लौकिकम् ।"

(स्व०तं०प० 11, 179)

~वैदिकम्—— तद्धि धर्मेण ज्ञानेन च निबद्धम्। यथा–

द्र॰ 'ज्ञानं~पाञ्चरात्रम्' इति।

~वैराग्यमात्रनिबद्धम्—— तच्च बौद्धमार्हतं च। यथा–

द्र॰ 'ज्ञानम्~बौद्धार्हतादिरूपम्' इति।

~व्यावहारिकम्—— मायीयस्य पशुप्रमातुरिन्द्रियवृत्तिर्बुद्धिवृत्तिश्च ज्ञानं लोकव्यवहारे। यथा–

(क) "यदिन्द्रियेण स्फुटग्राहिणा बाह्येन विषयेण स्फुटेन च नियन्त्रितं संवित्तत्त्वं तज्ज्ञानम्।"

(ई॰प्र॰वि॰ खं॰ 1, पृ॰ 223-24)

(ख) प्रत्यगात्मन..............एवमावृत्तिर्बुद्धिवृत्तिर्वा ज्ञानम्।

(ई॰प्र॰वि॰ खं॰ 2, पृ॰ 218)

(2) व्यवहारे यदुपयोगि यच्च प्रत्यक्षादिप्रमाणजन्यं न्यायमीमांसादिशास्त्रेषु विवेचितम्।

~श्रौतम्—— शास्त्रार्थज्ञानम्। यथा–

"शास्त्रार्थस्य परिज्ञानं विक्षिप्तस्य श्रुतं मतम्।"

(उद्ध॰तं॰आ॰वि॰ खं॰ 8, पृ॰ 196)

~सांख्यानाम्—— तद्धि ज्ञानेन वैराग्येण च सम्बद्धम्। यथा–

"ज्ञानवैराग्यसम्बद्धं सांख्यज्ञानं हि पार्वति।

(स्व॰तं॰पं॰ 11, 181)

~स्थितिकालतः—— ज्ञानस्य स्थितेरवधिस्तावद् यावत्तस्याभावो नोदेति संवेदने। यथा–

"ज्ञानं कियद् भवेद् यावत्तदभावो न भासते।"

(तं॰आ॰ 7, 26)

~स्थूलतापन्नम्—— क्रियारूपम्। आशयानभावेन स्थूलतामापन्नं ज्ञानमेव क्रिया, यतः सङ्कल्पात्मकं ज्ञानमेव कायपरिस्पन्दरूपतां प्राप्तं सत् क्रियेत्युच्यते। यथा–

"एवं ज्ञानस्वभावैव क्रिया स्थूलत्वमात्मनि।
यतो वहति तेनास्यां चित्रता दृश्यतां किल॥"

(तं॰आ॰ 1, 163)

"ज्ञानं गृहीतकठिनत्वगुणं क्रिया स्यात्।"

(मा॰च॰वि॰ 1, 15)

~स्वतः समुदितम्——

द्र॰ 'स्वतः समुदितं~ज्ञानम्' इति।

~स्वभ्यस्तम्—— सुष्ठु हृदयङ्गमीभावमुपयातं दृढतरविश्वासयुतं चात्मज्ञानं स्वभ्यस्तम्। तच्च जीवन्मुक्तिमपि ददाति। स्वभ्यस्तज्ञानवान् गुरुः शिष्यं स्वबलेन मोक्तुं क्षमो भवति। यथा–

"यतश्च मोक्षदः प्रोक्तः स्वभ्यस्तज्ञानवान् बुधैः।
तस्मात्स्वभ्यस्तविज्ञानतैवैकं गुरुलक्षणम्।"

(तं॰आ॰ 13, 332-33)

मोक्षदस्य गुरोरिदं लक्षणमिति।

ज्ञानकर्मेन्द्रियाणि—— बाह्यकरणानि।

"बाह्यकरणमाह–
श्रोत्रत्वगक्षिरसना घ्राणं बुद्धीन्द्रियाणि शब्दादौ।
वाक्-पाणि-पादपायूपस्थं कर्मेन्द्रियाणि पुनः॥"

(प॰सा॰ 20)

ज्ञानप्रधानानि 'श्रोत्रादीनि' पञ्चेन्द्रियाणि, क्रियाप्रधानानि चेन्द्रियाणि पञ्च वागादीनि।

(प॰सा॰वि॰ पृ॰ 52)

ज्ञानमोक्षप्रदो~गुरुः—— शम्भुनाथोपदेशानुसारं यो गुरुः स्वभ्यस्तज्ञानः स ज्ञानं मोक्षं च दातुं समर्थः। स्वभ्यस्तज्ञानित्वेनास्य सिद्धयोगिताक्षिप्यते, परं न सुसिद्धता। सिद्धयोगित्वं चास्य स्वस्वरूपसाक्षात्कारविषये एव मन्तव्यं न भोगवैचित्र्यप्रदयोगसिद्धिविषयेऽपि। एष गुरुर्द्वितीयश्रेणिको मध्यमः। यथा–

"तदभावे तु विज्ञानमोक्षयोर्ज्ञानिनं श्रयेत्।"

(तं॰आ॰ 13, 339)

तदभावे सुसिद्धयोग्यभावे इति।

ज्ञानयोगः—— ज्ञानोपायः, शाक्तोपायः, शाक्तयोग इति। वास्तविकस्य सत्यस्य पुनः पुनर्विकल्पबुद्ध्या विमर्शनस्याभ्यासः।

द्र॰ 'ज्ञानोपायः' इति।

द्र॰ 'शाक्तोपायः' इति।

~जपात्मकः—— परस्य तत्त्वस्य यो वास्तविकः स्वभावस्तस्य पुनः पुनरन्तर्विमर्शनं जपः। शाक्तोपायप्रकारोऽयम्।

द्र॰ 'शाक्तोपायः'~जपात्मकः' इति।

तद्बलमहिमा—— ज्ञानयोगबलहीनः शिष्यो न स्वबलेन किमप्यासादयितुमलम्, सदैवासौ गुरुकृपापेक्षी भवति। यथा–

"यस्तु विज्ञानयोगादिवन्ध्यः सोऽन्धो यथा पथि॥
दैशिकायत्त एव स्याद् भोगे मुक्तौ च सर्वथा।"

(तं॰आ॰ 16, 298-99)

~विधिनिषेधविमुक्तः—— श्रौतस्मार्त्ताः विधिनिषेधाः न प्रवर्तन्ते त्रिकाचारीये ज्ञानयोगाभ्यासे। यथोक्तम्–

"नात्र शुद्धिर्न चाशुद्धिर्न भक्ष्यादिविचारणम्।
न द्वैतं नापि चाद्वैतं लिङ्गपूजादिकं न च॥
न चापि तत्परित्यागो निष्परिग्रहतापि वा।
सपरिग्रहता वापि जटाभस्मादिसंग्रहः॥
तत्त्यागो न व्रतादीनां चरणाचरणं च यत्।
क्षेत्रादिसम्प्रवेशश्च समयादिप्रपालनम्॥
परस्वरूपलिङ्गादि नामगोत्रादिकं च यत्।
नास्मिन् विधीयते किञ्चिन्न चापि प्रतिषिध्यते॥

(मा॰वि॰तं॰ 18, 74 त॰

ज्ञानशक्तिः —— परमेश्वरस्यान्तरङ्गशक्तीनां मध्ये चतुर्थी शक्तिः। अन्तरेवास्फुटप्रमेयावभासकारित्वमस्याः स्वरूपम्। अनया शक्त्या पारमेश्वरे शुद्धे संवित्प्रकाशे स्रष्टव्यस्य जगतः सामान्याकारेण "इदम्" इति रूपेण श्यामलप्रायोऽवभासो भवति। विश्वविकासक्रमेऽसौ स्थितिः सदाशिवदशेति वा सादाशिवं तत्त्वमिति वा भण्यते।

यच्च तन्त्रालोके, तन्त्रसारे, षट्त्रिंशत्तत्त्वसन्दोहे, परमार्थसारटीकायां च ज्ञानशक्तेरीश्वरतत्त्वरूपत्वमुक्तं, तत् साधनादृष्ट्या तथोक्तं, न सिद्धान्तदृष्ट्या। ईश्वरतत्त्वे तावत् क्रियाशक्तेः स्फुटाभिव्यक्तिः। परं तस्य तत्त्वस्य यदव्यवहितं कारणं तत्तु सदाशिवात्मकज्ञानशक्तिरेव, सैव हि बहिर्मुखे विकासे क्रियाशक्तिप्रधानस्येश्वरतत्त्वस्य स्थितिं गृह्णाति। तत एव मुमुक्षवः तत्त्वाध्वाभ्यासे ईश्वरतत्त्वधारणायां तत्तत्त्व-मूलभूतां ज्ञानशक्तिमेव भावनाविषयतां नयन्ति। तद्दृष्ट्यैव ज्ञानशक्तिसमन्वय ईश्वरतत्त्वेनेति वेद्यं सुधीभिः। यथा—

"ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।
एवम्भूतमिदं वस्तु भवत्विति यदा पुनः॥
जाता तदैव तत्तद्वत् कुर्वित्यत्र क्रियोच्यते।"

(मा०वि०तं० 3, 7-8)

अनन्तरं हि तत्कार्यज्ञानदर्शनशक्तिता ॥
ज्ञानशक्तिस्तदर्थ हि योऽसौ स्थूलः समुद्यमः।
सा क्रियाशक्तिरुदिता ततः सर्वं जगत् स्थितम्॥

(शि०दृ० 1, 20-21)

"तस्मिन् विश्वलक्षणे कार्ये यज्ज्ञानं, तत्प्रकाशनशक्तिरूपता चिदात्मनः सर्वप्रतिपत्तॄणामवेद्यमन्तःकरण इव प्रकाशमानं तत् कार्यं यतः सा ज्ञानशक्तिः। अनन्तरं सर्वप्रमातृवेद्यस्थूलकार्याकारसम्पत्तिफलः समुद्यम इच्छाविषय एव क्रियाशक्तिः।"

(शि०दृ०वृ० पृ० 18)

"भासना च क्रियाशक्तिरिति शास्त्रेषु कथ्यते।
यया विचित्रतत्त्वादिकलना प्रविभज्यते ॥
भासनानवभाते च कथं नाम प्रकल्पते ।
तदस्यान्तः स्थितं भानं ज्ञानशक्तिरहं स्मृता॥"

(मा०वि०वा० 1, 90-91)

"अत्र (ईश्वरतत्त्वदशायाम्) वेद्यजातस्य स्फुटावभासनात् ज्ञानशक्त्युद्रेकः।"

(ष०त्रिं०त०सं०वि० पृ० 4)

ईश्वरतत्त्वोपासनायां तस्य तत्त्वस्य बीजत्वेनोपरि स्थिता सादाशिवी ज्ञानशक्तिरित्यनेन विचारेणैतद् व्याख्यानम्। अन्यथा ज्ञानशक्तिः सादाशिवे तत्त्वे क्रियाशक्तिश्चैश्वरे।

(2) जगत्स्थितिकारिणी शिवस्य शक्तिः। यथा—

.... ज्ञानशक्त्या जगत्स्थितिम् ।
..........................कुरुते ....॥"

(ने०तं० 21, 43-44)

~**परमे पदे**—— शुद्धचिदात्मकस्य भगवतः परमशिवस्य परा याऽसौ पारमेश्वरी संविदसावपि ज्ञानक्रियात्मिका। तस्याः शुद्धस्वात्मप्रकाशरूपता ज्ञानात्मकत्वं तथाविधा विमर्शात्मकचमत्कारसंरम्भरूपता च तस्याः क्रियात्मकता। परदशोचिते इमे ज्ञान-क्रिये। यथा—

"विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः ॥

(ई०प्र० 1-8-11)

"देवस्य क्रीडादिमयस्य शुद्धे-पारमार्थिक्यौ ज्ञानक्रिये प्रकाशरूपता ज्ञानं, तत्रैव स्वातन्त्र्यात्मा विमर्शः क्रिया।"

(ई०प्र०वि० खं० 1, पृ० 338)

~**पशुभूमौ**—— पारमेश्वरी ज्ञानशक्तिरेव पशुताभूमौ अशुद्धविद्यारूपतामायाति। यथा—

"स्वतन्त्रोऽपि बोधः स्वमायया यथा अणुत्वं प्राप्तः, तथैव तदीये ज्ञानक्रियाशक्ती संकुचिते अस्य पशुरूपस्य विद्या-कले इति उच्येते।"

(प०सा०वि०, पृ० 46-47)

~**बीजमन्त्ररूपा**—— "सूं" इति मन्त्रः। यथा—

शंकरस्य तृतीयं तु षष्ठयुक्तं सबिन्दुकम् ।
ज्ञानशक्तिः स्मृता ह्येषा प्रबोधजननी शुभा ॥"

(स्व०तं० 1, 67)

~**मातृकासु**—— ज्ञातव्यविश्वोन्मेषात्मा आद्यो बहिर्मुखः स्पन्दो हि ज्ञानशक्तिरुकारेणाभिव्यङ्ग्या मातृकाक्रमे। यथा—

"स्वात्मप्रत्यवमर्शो यः प्रागभूदेकवीरकः ।
ज्ञातव्यविश्वोन्मेषात्मा ज्ञानशक्तितया स्थितः ॥"

(तं०आ० 3, 73-74)

~**योगिनः** —— ज्ञानेनोपार्जिता शक्तिः। इयं च नान्तरङ्गशक्तिषु गणिता शिवशक्तिरपि तु योगिभिरर्जिता विशेषरूपा शक्तिः। यथा—

"योगशक्तिर्ज्ञानशक्तिः सर्वशास्त्रेषु गीयते ॥
सा शक्तिः परमेशस्य शिवस्याशिवहारिणी ।
बन्धमोक्षकरी पुंसां न स्वतन्त्रा स्वभावतः ॥
अनेनैवानुसारेण शिवः सर्वप्रदः शुभः ।"

(ने०तं० 16, 79-89)

~**व्यवहारभित्तिः** —— सर्वसर्वात्मकतायां सर्वस्यापि संवित्स्वरूपतायां च वास्तविक्यां सदा विद्यमानायामपि लोकव्यवहारे किञ्चिदेव देहप्राणाद्यभिनिविष्टमहमिति तत्त्वं कस्यैवापि प्रमेयस्य विषये ज्ञातृत्वं भजते शिवस्यैव शक्त्या। तदियं तत्तद्विशिष्टज्ञातृज्ञेयभावावभासिका लोकव्यवहारभित्तिभूता शिवस्य व्यावहारिकी ज्ञानशक्तिरपोहनज्ञानस्मृतिष्वेकतरा। अन्या तु सदाशिवतत्त्वेऽभिव्यक्ततां यान्ती शक्तिरन्यैवान्तरङ्गशक्तिपञ्चकमध्ये गणिता। नानयोः परस्परं भ्रमितव्यं सुधीभिः। ततो लौकिकज्ञातृज्ञेयभावावभासिकैषा व्यावहारिकी ज्ञानशक्तिः शिवस्य। यथा—

.... नश्येज्जनस्थितिः ।
न चेदन्तःकृतानन्तविश्वरूपो महेश्वरः ।
स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान् ॥"

(ई०प्र०1-3, 6-7)

"अत्यक्तसंविदभेदस्यैव भावस्य कल्पितप्रमात्रपेक्षया विच्छेदेन यत् प्रकाशनं सा भगवतो ज्ञानशक्तिः।"

(ई०प्र०वि० खं० 2, पृ० 68)

विच्छिन्नत्वेन प्रकाशनं ज्ञानशक्तिर्विच्छेदस्यावभासोऽपोहनशक्तिरित्यनयोर्विवेकः। यथा–

"(संवित्) सततमेवोन्मग्नेन निमग्नेन वा विश्वात्मना प्रकाशेत, तथास्वभावत्वात्। न चैवम्। अतः स्वरूपान्तर्ब्रुडितम् अर्थराशिमपरमपि भिन्नाकारमात्मनि परिगृह्य कंचिदेवार्थं स्वरूपादुन्मग्नमाभासयति इत्यापतितम्, सैव ज्ञानशक्तिः।

उन्मग्नाभाससम्भिन्नं च चित्स्वरूपं बहिर्मुखत्वात् तच्छायानुरागान्नवं नवं ज्ञानमुक्तम्।"

(ई०प्र०वि०, खं० 1, पृ० 107-109)

"अपरिगणितसर्वभावनिर्भरो भगवान् स्वातन्त्र्याद् भावराशिमध्यात् कंचिदेव भावं प्रकाशस्वरूपात् पृथक् करोति, पृथक्कृतं च प्रकाशयति, न च पृथक्कृतस्य प्रकाशनोपन्नेति न महाप्रकाशात् पृथक्करोति, अपि तु तथाविधमपरमार्थप्रकाशरूपमारोपितप्रकाशं मायाप्रमातारं निर्मिमीते। तथा सङ्कोचेनावभासनमेव च भगवतः स्वात्मनि तन्निर्माणमुच्यते। एवं च माया प्रमाता शरीराद्यवच्छिन्नसङ्कुचितप्रकाशस्वभावो भवन् स्वापेक्षया पृथग्भूतं भावमवभासयति। तन्नवनवतदीयच्छायोपरक्तमस्य बहिर्मुखं रूपं नवनवं ज्ञानमुच्यते। तत्र च यदैश्वरं स्वातन्त्र्यं सा ज्ञानशक्तिः।

(ई०प्र०वि०वि०, खं० 1, पृ० 286)

व्यवहारभित्तिभूतेयं ज्ञानशक्तिः। मुख्या तु सदाशिवतत्त्वावभासमयीति न विस्मर्तव्यं सुधीभिः।

~शिवस्य~—— सर्वज्ञतारूपा। यथा–

"ज्ञानरूपा तु सैवैका यदा संबोधयत्यलम्।
बोधो ह्यनादिरत्यन्तः परं ज्ञानं तु सा स्मृता ॥
ज्ञानशक्तिरिति ख्याता सार्वज्ञ्यादिगुणास्पदम् ।"

(ने०तं०, 21, 36-37)

अत्यन्त इत्यन्तमतिक्रान्तोऽनन्त इति।

~शैवी—— संविदात्मनि स्वात्मनि स्रष्टव्यादि ज्ञापयन्ती सती पैरव शक्तिर्ज्ञानशक्तिरिति परिभाष्यते। स्रष्टव्यस्यात्रोन्मेषमात्रम्। एषा सादाशिवी भूमिः। यथा–

"ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ।

(मा०वि०तं० 3, 7)

~सृष्टिक्रमे—— स्रष्टव्यस्य जगतो ययाऽन्तरभिव्यक्तया शक्त्या चिद्भूमावेव ह्यामलोऽस्फुटोऽवभासः प्रजायते सदाशिवदशायां सा भगवतः शक्तिर्ज्ञानशक्तिः। यथा–

"परतस्तस्मिन् विश्वलक्षणे कार्ये यज्ज्ञानं तत् प्रकाशनशक्तिरूपता चिदात्मनः............ सा ज्ञानशक्तिः।"

(शि०दृ०वृ०, पृ० 18)

"ज्ञानशक्तिरूपा हि श्रीसदाशिवादिदशा ।"

(ई०प्र०वि०वि०, खं० 3, पृ० 25)

ज्ञानसन्तानः —— गुरुसन्तानः। जनस्य भुक्त्युपायरूपा स्वात्मसाक्षात्कारोपायभूता च गुरुपरम्परा। यथा–

"स्वातन्त्र्यात् पुनरात्मीयादयं छन्न इव स्थितः ॥
पुनश्च प्रकटीभूय भैरवी भावभाजनम् ।
तत्रास्य प्रकटीभावे भुक्तिमुक्त्यात्मके भृशम् ॥
य उपायः समुचितो ज्ञानसन्तान एष सः ।"

(तं०आ० 28, 199-201)

यागारम्भे पूज्यासौ गुरुसन्ततिः ।

~तद्विस्तारः —— यथा–

"गुरुः कारणमत्रोक्तं तत् पत्नी सहकारिणी ॥
यतो निःशक्तिकस्यास्य न योगेऽधिकृतिर्भवेत् ।"

(तदेव, 209-210)

"एकजन्याभ्रातरः स्युस्तत् सदृग्यस्तु कोऽपि सः ॥
पुनः परम्परायोगाद् गुरुवर्गोऽपि भण्यते ।
मुख्य एष तु सन्तानः पूज्यो मान्यश्च सर्वदा ॥"

(तदेव 211-212)

"गुरोः पत्नी तथा भ्राता पुत्र इत्यादिको गणः ।
न योनिसंबन्धवशाद्विद्या संबन्धजस्तु सः ॥"

(तं०आ०28, 194)

"ये तु त्यक्तशरीरस्था बोधाहम्भावभागिनः ।
बोधोपकारसन्तानद्वयात्ते बन्धुताजुषः ॥"

(तदेव, 197)

"तेन विज्ञानसन्तानप्राधान्याद्यौनसन्ततेः ।
अन्योऽन्यं गुरुसन्तानो यः शिवज्ञाननिष्ठितः।"

(तदेव, 207-208)

ज्ञानसिद्धा—— मुद्रा करङ्किणी नाम मुद्रा। यथा–

"ज्ञानसिद्धा–रौद्रेश्वरी करङ्किणीति ।"

(म०प्र०वि०, पृ० 87)

ज्ञानाकलः —— विज्ञानाकल एव। यथा–

"विज्ञानाकलवेद्यत्वेऽप्यन्यो ज्ञानाकलो भवेत् ।"

(तं०आ० 10, 125)

एको विज्ञानाकलोऽपि खल्वन्येन विज्ञानाकलेन वेद्यो भवतीति गण्यते तत्त्वभेदनधारणासु।

ज्ञानाज्ञानद्वैविध्यम्—— ज्ञानमज्ञानञ्च द्विविधम्, पुरुषस्यान्तरङ्गत्वेन स्थितम्, तस्य बुद्धिवृत्तिरूपमध्यवसायात्मकञ्चेति। यथा–

"ज्ञानाज्ञानस्वरूपं यदुक्तं प्रत्येकमप्यदः ।
द्विधा पौरुषबौद्धत्वमिहोक्तं शिवशासने ॥"
(तं०आं० 1, 36)

ज्ञानाधिकारः ——ईश्वरप्रत्यभिज्ञायाः प्रथमो भागः। अत्र ज्ञानस्मृत्यपोहनादिशक्तिमतः परमेश्वरस्य स्वप्रकाशायाः सत्तायाः प्रतिपादनं कृतमष्टभिराह्निकैर्विमर्शिन्याम्। मूले त्वाह्निकविभागकलना नास्ति।

ज्ञानाभावस्योदयः —— यदा खलु ज्ञानसाधनभूतानामिन्द्रियादीनां विषयान्तरसम्बन्ध उदेति तदैव पूर्वज्ञानाभावोदयः। उत्तरज्ञानोदयक्षण एव प्राग्ज्ञानाभावोदयक्षण इति। यथा—

"तदभावश्च न तावद् यावत्तत्राक्षवर्त्मनि ।
अर्थे वात्मप्रदेशे वा न संयोगविभागिता ॥"
(तं०आ० 7, 27)

"प्रमातुर्नीलादिविषये ज्ञाने जायमाने यदा नीलादिना विभाग उत्पद्यते, पीतादिना वा संयोगस्तदा तदभावः।"
(तं०आ०वि०, खं० 4/2, पृ० 19)

ज्ञानामृतरसायनम्—— शास्त्रं किमपि समुद्धृतं विज्ञानभैरवोद्द्योते। यथा—

"ज्ञानामृतरसायने च—
मात्रार्धमात्रात् परमं तदर्धाच्च परं परम् ।
तत्त्वातीतं परं तत्त्वमभावं भावमाश्रितम् ॥"
(वि०भै०उ०, पृ० 80)

ज्ञानाहरणक्रिया—— ज्ञानाहरणदीक्षा। असौ तान्त्रिकी क्रिया यस्याः सामर्थ्येन गुरुः छलगृहीतदीक्षस्यापात्रस्य वा शिष्यस्य ज्ञानमाहरति। यथा—

"शिष्योऽप्यन्यायतो गृह्णन्नरकं प्रतिपद्यते ॥
न च तत् कलामाप्नोति वचस्त्ववितथं मम।
न्यायेन ज्ञानमासाद्य पश्चान्न प्रतिपद्यते ॥
तदा तस्य प्रकुर्वीत विज्ञानापहृतिं बुधः ॥"
(मा०वि०तं० 18, 56-58)

ज्ञानाहरणदीक्षा—— (1) ज्ञानाहरणक्रिया। दाम्भिकेनापात्रेण शिष्येण वञ्चनोपायेन गुरोर्गृहीतं शिवज्ञानं विदित्वा गुरुणा तस्य तज्ज्ञानं स्वबलेन हरणीयम्। तदनुकूला या क्रियाऽसौ ज्ञानाहरणदीक्षा। यथा—

"अज्ञातेऽपि पुनर्ज्ञाते विज्ञानाहरणं चरेत् ॥
पुनः पुनर्यदा ज्ञातो.......................... ।"
इत्यारम्भ— विज्ञानमन्त्रविद्याद्याः प्रकुर्वन्त्यपकारिताम्। इत्यन्तम्।
(तं०आ० 23, 51-55)

(2) यदि शिष्यो न्यायपूर्वकं दीक्षां गृहीत्वापि पश्चादनुचितमाचरेत्तदा गुरुस्तस्य ज्ञानमाहरेदित्यस्ति विधिः। तत्रोपयोगिनी च क्रिया ज्ञानाहरणक्रियेत्युच्यते। तस्य विधिर्मालिनी विजयोत्तरेऽष्टादशे पटले 57 तः 67 यावत् विस्तरतः प्रतिपादितः। दिङ्मात्रं यथा—

द्र० 'ज्ञानाहरणक्रिया' इति।

अन्यायेन गृहीतविद्यस्य तु ज्ञानाहृतिर्विधीयत एव प्रायः।

~अभिनवगुप्तमते——(1) ज्ञानाहरणं नैव कस्यापि करणीयम्, सदैवानुग्रहपरेणैव भाव्यं गुरुणेति प्रोक्तं तन्त्रालोके। यथा—

"अस्मद् गुर्वागमस्त्वेष तिरोभूते स्वयं शिशौ।
न कुप्येन्न शपेद्धीमान् स ह्यनुग्राहकः सदा॥"
(तं०आ० 23, 65)

"शिवाभिन्नोऽपि हि गुरुरनुग्रहमयीं विभोः ।
मुख्यां शक्तिमुपासीनोऽगृह्णीयात्सर्वथा ॥
स्वातन्त्र्यमात्रज्ञप्त्यै तु कथितं शास्त्रम् ईदृशम् ।
न कार्यं पततां हस्तालम्बः सह्यो न पातनम् ॥
अत एव स्वतन्त्रत्वादिच्छायाः पुनरुन्मुखम् ।
प्रायश्चित्तैर्विशोध्यैनं दीक्षेत कृपया गुरुः ॥"
(तदेव, 67-69)

सम्पूर्णज्ञानिनो योगसिद्धस्य गुरोः शक्तेर्वर्णनार्थमेव ज्ञानाहरणमुक्तं शास्त्रे। असौ शिष्यस्य ज्ञानमाहर्तुमपि समर्थ इति। उपाहरेदित्यत्रोपाहर्त्तुं सामर्थ्यं तस्येति शक्यार्थे लिङ्। न च तथा तेन कार्यमित्यर्थः। एवमागमवाक्यं व्याख्यातं मन्तव्यम्।

(2) परिपूर्णं यच्छिवज्ञानं तस्य तु हरणं नैव सम्भवति। अप्ररूढमेव यज्ज्ञानं तदेव गुरुः शिष्यस्यापात्रतां विदित्वापहरति न प्ररूढं पूर्णं च। ततो नैव तद्धरणीयमिति मतमाचार्याभिनवगुप्तपादानाम्। यथा—

"उच्यते नास्य शिष्यस्य विज्ञानं रूढिमागतम् ।
तथात्वे हरणं कस्मात् पूर्णयोग्यत्वशालिनः ॥
(तं०आ० 23, 57)

(3) बह्वपराधस्यैव शिष्यस्य ज्ञानापहरणं कार्यम्, न स्वल्पदोषादिकारेण नापि क्रीडार्थम्। यथा—

"अपराधसहस्रैस्तु महाकोपसमन्वितः ।
विधिमेनं प्रकुर्वीत क्रीडार्थं न तु जातुचित्॥"
(उद्ध०तं००आ०वि० खं० 10, पृ० 284)

~तस्करस्य—— छद्मना प्राप्तदीक्षोऽनधिकारी शिष्यः। तद्विषये ज्ञानाहरणक्रिया विधीयते गुरुणा।

द्र० 'तस्करः' इति।

~शास्त्राभिप्रायतः ——लब्धाधिकारो गुरुः स्वशिवत्वप्रत्यभिज्ञानन्तरं समावेशरसाभ्यासेन शिवाभेदेन पञ्चकृत्यकारित्वेऽप्यंशतः सामर्थ्यं लभते। तदसौ विलयकृत्यं कुर्वन्नेवापात्रस्य शिष्यस्य विज्ञानापहरणं कर्तुं समर्थ इति। एवंविधतात्पर्यतः शास्त्रे विज्ञानापहृतिरपि प्रतिपादिता। यथा

"अतो यथा शुद्धतत्त्वसृष्टिस्थित्योर्मलात्यये ।
योजनानुग्रहे कार्यचतुष्केऽधिकृतो गुरुः ॥

शिवाभेदेन तत् कुर्यात्तद्वत्पञ्चममप्ययम् ।
तिरोभावाभिधं कृत्यं तथासौ शिवतात्मकः ॥"

(तं०आ० 23, 60-61)

ततो नावश्यं शिष्यस्य विज्ञानमपहरणीयमिति तात्पर्यम्।

ज्ञानी—— लब्धसमावेशरसास्वादः प्रत्यभिज्ञातस्वात्मशिवभावः साधकः। यथा—

"समावेशलक्षणं सत्यस्वरूपे सम्यगासमन्तात् प्रवेशलक्षणं ज्ञानं यल्लाभेन ज्ञानी.............. भवति।"

(ई०प्र०वि०वि०, खं० 3, पृ० 327)

~अच्युतः ——यो हि दृष्टस्वात्ममहेश्वरभावो योगी स विषयसेवनं कुर्वाणोऽपि नैव तत्त्वान्मनागपि च्यवते, यतोऽसौ सर्वत्र स्वं शिवत्वमेव साक्षात्कुर्वन्नेव सर्वं लोकव्यवहारमाचरति। न च लिप्यते तेन। यथा—

"निमज्जमानमप्येतन्मनो वैषयिके रसे ॥
नान्तरार्द्रत्वमभ्येति निश्छिद्रं तुम्बकं यथा।"

(मा०वि०वा० 2, 108-109)

~उत्कृष्टगुरुः ——व्यावहारिकयोगसिद्धिमतो गुरोरपेक्षया स्वभ्यस्तज्ञानवानेव गुरुः श्रेयान्। यतोऽसौ मुक्त्युपायमपि शिक्षयति, सिद्धान्तज्ञानमपि ददाति। यथा—

"फलदानाक्षमे योगिन्युपायैकोपदेशिनि ।
वरं ज्ञानी योऽभ्युपायं दिशेदपि च मोचयेत् ।"

(तं०आ० 13, 340)

~कम्प्रज्ञानः—— येषां विज्ञानमस्ति परं न सम्यग् हृदयङ्गमीभावमायातमस्ति, अपि तु कम्प्रमेवास्ति, तेषां देहान्त एव शिवता। ततः पूर्वं न तेषां मोक्षरसास्वादः। यथा—

"तत्र ये कम्प्रविज्ञानास्ते देहान्ते शिवाः स्फुटम् ॥
यतो विज्ञानमेतेषामुत्पन्नं न च सुस्फुटम् ।
विकल्पान्तरयोगेन न चाप्युन्मूलितात्मकम् ॥
अतो देहे प्रमादोत्थो विकल्पो देहपाततः ।
नश्येदवश्यं तच्चापि बुध्यते ज्ञानमुत्तमम् ॥"

(तं०आ० 28, 303-305)

~गुरुः ——(1) आत्मसाक्षात्कारवान् शास्त्रज्ञानवांश्च गुरुः समस्तशङ्कापनोदनसमर्थः। यथा—

"सर्वलक्षणहीनोऽपि ज्ञानवान् गुरुरिष्यते ।"

(तं०आ० 23, 6)

(2) असौ गुरुर्यो ज्ञानदीक्षयैव शिष्यं मोचयति, विना योगाभ्यासं, विना च दीक्षादिक्रियाप्रपञ्चम्।

द्र० 'कर्माद्याः'~'तारतम्यतः' इति।

~चतुःप्रकारः —— ज्ञानिनो ज्ञानमेव त्रिविधं—श्रुतं चिन्तामयं भावनामयं चेति। चिन्तामयस्य द्वौ भेदौ मन्दं स्वभ्यस्तं चेति। संकलनया चतुर्विधं ज्ञानम्। तेन ज्ञानिनोऽपि गुरवश्चतुर्विधाः। यथा—

"एवं विज्ञानभेदेन ज्ञानी प्रोक्तश्चतुर्विधः ।"

(मा०वि०तं० 4, 32)

~द्विप्रकारकः —— कश्चित् कम्प्रविज्ञानोऽपरः कोऽपि स्थिरविज्ञानः। कम्प्रविज्ञानस्य ज्ञानं न सम्यग् हृदयङ्गमीभावमाप्तं भवति इतरस्य तु भवत्येव तथा।

~निष्कर्मा—— इदं कर्म मया कृतमिति या जनानां संवित् तत् कारणादेव ते तत् फलभोगं प्रति विवशाः सन्तः संसरन्ति। परं यदा शिवयोगाद्यभ्यासवशादेवंविधा संविदुदेति यच्छिव एव सर्वेषां कर्मणां कर्ता नाहमिति, तदा आपेक्षिकी कर्मकर्तृत्ववासना क्षीणा नष्टा भवति। विनष्टायां तस्यां सर्वमपि सञ्चितं क्रियमाणं च कर्म निष्फलतामापद्यते, न च योगिनं फलभोगाय संसृतौ नियोजयति। तस्य तत्कर्तृत्वाभिमानसंस्काराराहित्यात्। यथा—

"तथा च प्राच्यकर्मौघफलसम्प्लोषणात्मिका ।
यस्यैकाप्युत्तरोदेति संवित् स फलभाङ्न हि॥"

(मा०वि०वा० 1, 1070)

~परिपक्वज्ञानः —— स्वभ्यस्तज्ञानास्तु देहे सत्यपि शिवा एव जीवन्तोऽपि च मुक्ता एव। यथा—

"ये तु स्वभ्यस्तविज्ञानमयाः शिवमयाः सदा।
जीवन्मुक्ता हि ते नैषां मृतौ कापि विचारणा॥"

(तं०आ० 28, 307)

~शिष्यसन्तानतारकः ——

"यावानस्य हि सन्तानो गुरुस्तावत्सकीर्तितः ।
सम्यग् ज्ञानमयश्चेति स्वात्मना मुच्यते ततः ॥
तत एव स्वसन्तानं ज्ञानी तारयतीत्यदः ।
युक्त्यागमाभ्यां संसिद्धं तावानेको यतो मुनिः ॥"

(तं०आ० 1, 235-236)

शिष्यसन्तानं स्वात्मत्वेन पश्यन् गुरुस्तत्तच्छिष्यरूपत्वेनावस्थितं स्वात्मानमेव मोचयतीति तात्पर्यम्। यथा—

"आचार्यः स्वजनानाञ्च कुलकोटिसहस्रशः ।
ज्ञानज्ञेयपरिज्ञानात्सर्वान् सन्तारयिष्यति ॥"

उद्ध० (तं०आ०वि० खं० 1, पृ० 253)

सन्तानक्रमे सप्तमं सोपानं यावद् ज्ञानिनो गुरोर्विशेषा आत्मीयता भवति। ततस्तदवधि येऽधिकारिणस्तानसौ तारयत्येव। पारमेश्वरविलयकृत्य—पात्रतामुपयातान् सन्तानानुपेक्षत एवेति दृष्टं कोषकृता।

ज्ञानेन्दुकौमुदी—— किमपि साधनाप्रतिपादकं शास्त्रम्। सम्भवतः विज्ञानभैरवोपरि याऽऽनन्दभट्टनिर्मिता टीका सैव।

द्र० (म०मं०प०, पृ० 116)

ज्ञानेन्द्रियता~श्रोत्रादीनाम्—— यद्यपि श्रवणादिरूपापि क्रिया भवति, तथापि तत्र क्रियांशापेक्षया ज्ञानांशस्यैव प्राधान्यात्तत्साधनं श्रोत्रादिज्ञानेन्द्रियमेव न कर्मेन्द्रियम्। यथा—

"मुख्यं च गमनादीनां क्रियात्वम्, न रूपाद्युपलभ्यस्य ।"

(तं०सा०, पृ० 88)

ज्ञानेन्द्रियाणि—– शब्दादिविषयग्रहणसाधनभूतानि श्रोत्रादीनि पञ्चेन्द्रियाणि।

~अभौतिकानि—– पञ्चज्ञानेन्द्रियाणि न पंजभूतविकारात्मकानि अपि त्वहमात्मन एवैताः शक्तय इत्यहङ्कारादेव जातानि। ततो भौतिकत्वमिन्द्रियाणां यन्नैयायिकैः प्रतिपादितं तन्न समींचीनम्। यथा–

"तस्मादिन्द्रियसंघातो भौतिको नोपपद्यते ।
आहङ्कारिकतायां तु व्याप्तृत्वमविभिन्नता ॥"

(मा०वि०वा० 1, 522)

अहङ्कारस्तेषां व्यापकः, इति दर्शनश्रवणादौ तस्यानुस्यूतत्वात्।

~अहङ्कारजानि—– (1) शब्दादितन्मात्रहेतुभूतादहङ्कारात् पञ्चज्ञानेन्द्रियसृष्टिस्ततस्तेषां शब्दादिग्राहकत्वनियमः । यथा–

"शब्दतन्मात्रहेतुत्वविशिष्टाया त्वहङ्कृतिः ।
सा श्रोत्रे करणं यावद् घ्राणे गन्धत्वभेदिता ॥"

(तं०आ० 9, 240)

एतदेकं मतं करणसृष्टिविषये ।

(2) सत्त्वप्रधानादहङ्कारान्मनसो बाह्यज्ञानेन्द्रियाणां चोदयः। अपरमेतन्मतम्।

यथा–

"सत्त्वप्रधानाहंकाराद्धोक्त्रंशस्पर्शिनः स्फुटम्।
मनोबुद्ध्यक्षषट्कं तु जातं भेदस्तु कथ्यते॥"

(तं०आ० 9, 234)

अहंकारस्य विविधानि सामर्थ्यानि। तेषां सङ्करतो ज्ञानेन्द्रियादिसृष्टिः। तेन योऽहङ्कारः सत्त्वगुणप्रधानो यश्च शब्दादि तन्मात्रसृष्टिप्रवणस्तस्मादेव ज्ञानेन्द्रिय-सृष्टिरिति वेदितव्यम्। एक एव यतोऽसावहङ्कारस्ततस्तस्य सामर्थ्यानां संमेलनादपि भिन्नभिन्नतत्तत्तत्त्वसृष्टिः। इति नात्र विरोधशङ्का कार्या। भिन्नभिन्नानां प्राणिनां विषये भिन्नभिन्नप्रकारोऽपि करणगणसृष्टिरुपपद्यते, कञ्चुकसृष्टिक्रमवत्। ततो नात्र विरोधः शङ्कनीयः। गोमयवृश्चिकादितो वृश्चिकसृष्टिरत्रोदाहरणीकृताऽऽचार्याभिनवगुप्तपादैः।

ज्ञानोत्तरम् –– आगमशास्त्रविशेषो सर्वज्ञानोत्तरमिति प्रसिद्धो यन्मतमुल्लिखितं तन्त्रालोके। श्रीनगरे राजकीय रिसर्चविभागस्य मातृकासङ्ग्रहे वर्ततेऽस्य ग्रन्थस्यैकं पुस्तकम्। स च सङ्ग्रह इदानीं काश्मीरविश्वविद्यालयीये भवने वर्तते।

"पुंरागवित्कलाकालमाया ज्ञानोत्तरे क्रमात्॥"

(तं०आ० 9, 45)

ज्ञानोत्तरा –– ज्ञानोत्तरं नामागमविशेषः। उल्लेखस्तस्य–

"उक्तं ज्ञानोत्तरायां च तदेतत् परमेशिना।"

(तं आ० 26, 6)

द्र०–'ज्ञानोत्तरम्' इति।

ज्ञानोपायः –– स्वात्मस्वरूपविषये स्वस्वभावविषये च शुद्धविकल्पमयस्य–"अहं सर्वं" "मयि सर्वं" मत्तः सर्वमित्यादिरूपस्य यथार्थस्य ज्ञानस्य पौनःपुन्येन क्रियमाणस्तथाविधोऽभ्यासो यथासौ शुद्धविकल्पसंस्कारो अशुद्धान् देहप्रमातृत्वादि संस्कारानपोह्य शुद्धचिदात्मके स्वात्मनि सुदृढतां यायात्। एष एव ज्ञानयोगः शाक्तोपायः, शाक्तयोगः, भावनाभ्यासः, भावनायोगः, इत्यादिभिः संज्ञाभिरुच्यते।

द्र०– 'शाक्तोपाय' इति।

~जपात्मकः –

द्र० 'शाक्तोपायः'~'जपात्मकः' इति।

~ध्यानात्मकः –

द्र० 'ध्यानम्'~'शाक्तोपाये' इति।

~पूजात्मकः –

द्र० 'शाक्तोपायः'~'पूजात्मकः' इति।

~यागात्मकः –

द्र० 'शाक्तोपायः'~'यागात्मकः' इति।

~योगात्मकः –

द्र० 'शाक्तोपायः'~'योगात्मकः' इति।

~व्रतात्मकः –

द्र० 'शाक्तोपायः'~'व्रतात्मकः' इति।

~स्नानात्मकः –

द्र० 'शाक्तोपायः'~'स्नानात्मकः' इति।

~होमसंज्ञः —– चेतना स्रुचा चिदग्नौ विकल्पजालं यद्धूयते शिवयोगिना भावनाभ्यासोपायतः स एव तस्यापूर्वो होमः। यथा–

"इत्थं सकलविकल्पान् प्रतिबुद्धो भावनासमीरणतः।
आत्मज्योतिषि दीप्ते जुह्वज्ज्योतिर्मयोभवति॥"

(प०सा०का० 68)

द्र० 'शाक्तोपायः'~'होमात्मकः' इति।

ज्ञेयसारः –– सर्वस्यापि ज्ञेयस्य नीलादेः सुखादेरपि च पारमार्थिकतया सारभूतं वास्तविकं स्वरूपं पारमैश्वर्यस्वभावकं शुद्धसंविन्मयमेव वस्तुतः।

यथा–

"ज्ञेयस्य च परं तत्त्वं यः प्रकाशात्मकः शिवः।"

(तं०आ०वि०ख०-1, पृ० 58)

ज्योतिः –– ज्वलनशीलं तेजः। प्रणवकलासु च '1' इत्येवं विधाऽकुटिलरेखात्मिका निरोधिका।

"ज्योतिर्निरोधिका स्पष्टरेखात्मा।"

(ने०तं०उ० ख० 1, पृ० 21)

ज्येष्ठाशक्तिः —— (1) अनुग्रहप्रधाना मोक्षमार्गे प्रवर्तनाकारिणी शिवस्य शक्तिरिच्छात्मिका। यथा–

"स्वस्वरूपं प्राप्तुमिच्छुः, ज्येष्ठाख्यशक्तिरूपया शिवेच्छया सद्गुरुं प्रति नीयते।"

(तं०आ०वि० खं० 3, पृ० 40)

"क्रमेण सर्वभोगात्मसंस्कारार्थपरम्पराम्।
संजिहीर्षुर्महापूर्णा ज्येष्ठा मोक्षैकपद्धतिः॥"

उद्ध०– (तं०आ०वि० खं० 8 पृ० 131)

(2) सुप्रबुद्धेषु साधकेषु स्वं प्रभावं विकासयन्ती तेषां शिवमयतासम्पादिका प्रभुशक्तिः।

यथा–

"..................................प्रभुशक्तिर्विधायिनी।
ज्येष्ठा तु सुप्रबुद्धानां..............................॥"

(तं०आ० 6, 56)

"..........................ज्येष्ठा शिवमयी यतः।"

(तदेव, 57)

"ज्येष्ठा स्वातन्त्र्यलेशं तु तनुते ज्ञानकर्मणोः।"

उद्ध०- (तं०आ०वि०, खं० 4/1, पृ० 50)

"अनुग्रहं ज्येष्ठया तु कुरुते नात्र संशयः।"

(ने०तं०, 21/44)

"श्रीमदानन्दभैरवे–

"................................ ज्येष्ठया पालयेत्पुनः।
.... प्रभुः॥"

इति।"

उद्ध०– (स्व०तं०उ० प० 10, पृ० 484)

ज्वलनशक्तिः —— प्रकाशमात्रात्मिकाऽग्निशक्तिः रकारश्रुतिः इयं 'ऋ', 'ॠ', वर्णयोरन्तः श्रूयते।

यथा–

"अचिरद्युतिभासिन्या शक्त्या ज्वलनरूपया इष्यमाणसमापत्तिः... ....॥"

(तं०आ० 3, 79)

ज्वालिनी मुद्रा ——

हनुर्ललाटगौ हस्तौ प्रसार्याङ्गुलितः स्फुटौ॥
चालयेद्वायुवेगेन कृत्वान्तर्भ्रुकुटीं बुधः।
विदार्यास्यं सजिह्वं च हाहाकारं तु कारयेत्।
एषा ज्वालिन्यग्निचक्रे तया चाष्टोत्तरं शतम्।
जपेद् यदि तदा सिद्ध्येत् त्रैलोक्यं सचराचरम्॥"

(तं०आ० 32, 26-29)

"अग्निचक्रे- ऊर्द्ध्वमुखे त्र्यश्रे।"

(तं०आ०वि०, खं० 12, पृ० 317)

~तत्फलम्—— खेचरत्वं हि तत् फलम्। यथा–

"परदेहेषु चात्मानं परं चात्मशरीरतः।
पश्येच्चरन्तं हानादाद् गमागमपदस्थितम्।
नवच्छिद्रगतं चैकं नदन्तं व्यापकं ध्रुवम्।
अनया हि खचारी श्रीयोगसञ्चर उच्यते॥"

(तं०आ० 32, 30-31)

"हानादेति- हाहाकारस्य नादेन उच्चारेणेत्यर्थः।
गमागमेति- स्वदेहात् परदेहे, परदेहाद्वा स्वदेहे।"

(तं०आ०वि० खं० 12, पृ० 317)

(झ)

झ—— स्पर्शतन्मात्रतत्त्वस्य यद्रहस्यात्मकं स्वरूपं तस्याभिव्यञ्जको मातृकावर्णः शाम्भवोपाये। योगी स्वात्मानं स्वेच्छया स्वशक्तिविशेषप्रतिबिम्बात्मकेन स्पर्शतन्मात्रतत्त्वेन खचितं साक्षात्कुर्वञ्छाम्भवसमावेशरसचमत्कारचर्वणापरो भवति।

झकारः —— द्र०- 'पददीक्षा', (2) 'षट्त्रिंशत्तत्त्वदीक्षा'(26)

झाङ्कारः —— सर्वतन्त्री-समाघातज इव यो मृदुस्तब्धनिनादः श्रूयमाणः सप्तमो नादो नादयोगाभ्यासे। यथा–

"धर्मशिवाचार्येण स्वपद्धतौ–
सर्वतन्त्रीसमाघाताद्वीणायामिव साधु यः।
मृदुस्तब्धं निनदति झाङ्कारः सप्तमस्त्वसौ॥"

(स्व०तं०उ० पृ० 11 पृ० 9)

झिंमिझिमिः —— ध्वन्यनुकृतिविशेषः।

यथा–

"भित्त्वा बिन्दुं ततो देवि अर्धचन्द्रं विभेदयेत्।
भिद्यतश्चार्धचन्द्रस्य ललाटे झिमिझिमायते॥"

(स्व०तं०, 4/377)

(ञ)

ञ—— द्र०- 'पददीक्षा' (2) 'षट्त्रिंशत्तत्त्वदीक्षा;, (25)